कस्मान्न भवति ?, सोऽपि हि भूतमात्रनिमित्तक एव ततः कथं तस्यापि क्वचित् कदाचिद् भावः ?। अन्यच्च, स किंरूपः परिणतिविशेषः ? इति वाच्यम्, कठिनत्वादिरूप इति चेत्, तथाहि– काष्ठादिषु दृश्यन्ते घुणादिजन्तवो जायमानाः, ततो यत्र कठिनत्वादिविशेषस्तत् प्राणिमयं न शेष इति, तदप्यसत्, व्यभिचारदर्शनात्। तथाहि– अविशिष्टेऽपि कठिनत्वादिविशेषे क्वचिद् भवन्ति क्वचिन्न, क्वचिच्च कठिनत्वादि-विशेषमन्तरेणापि संस्वेदजा नभसि च सम्मूर्च्छिमा जायन्ते। किञ्च, समानयोनिका अपि विचित्रवर्ण-संस्थाना दृश्यन्ते प्राणिनः, तथाहि– गोमयाद्येकयोनिसम्भविनोऽपि केचिन्नीलतनवोऽपरे पीतकाया अन्ये विचित्रवर्णाः, संस्थानमप्येतेषां परस्परं विभिन्नमेव, तद् यदि भूतमात्रनिमित्तं चैतन्यं तत एकयोनिकाः सर्वेऽप्येकवर्णसंस्थाना भवेयुः, न च भवन्ति, तस्मादात्मान एव तत्तत्कर्मवशात् तथोत्पद्यन्ते इति प्रतिपत्तव्यम्।

स्यादेतत्[१], आगच्छन् गच्छन् वा नाऽऽत्मोपलभ्यते, केवलं देहे सति संवेदनमुपलभ्यते, देहाभावे च भस्मावस्थायां न, तस्मान्नास्त्यात्मा, किन्तु संवेदनमात्रमेवैकमस्ति, तच्च देहकार्यं देहे एव च समाश्रितम्, कुड्ये[२] चित्रवत्– न हि चित्रं कुड्यविरहितमवतिष्ठते, नापि कुड्यान्तरं सङ्क्रामत्यागतं वा कुड्यान्तरात्, किन्तु कुड्ये एव उत्पन्नं कुड्ये एव च विलीयते, एवं संवेदनमपि, तदप्यसत्, आत्मा हि स्वरूपेणामूर्त्तः, आन्तरमपि शरीरमतिसूक्ष्मत्वान्न चक्षुर्विषयः। तदुक्तम्–

अन्तराभवदेहोऽपि सूक्ष्मत्वान्नोपलभ्यते।
निष्क्रामन् प्रविशन्[३] वाऽऽत्मा नाभावोऽनीक्षणादपि॥१॥

[वार्त्तिकालं० २। श्लो० ५१२ पृ० ८९]

तत आन्तरशरीरयुक्तोऽप्यात्मा आगच्छन् गच्छन् वा नोपलभ्यते, लिङ्गतस्तूपलभ्यत एव। तथाहि– कृमेरपि जन्तोस्तत्कालोत्पन्नस्याप्यस्ति निजशरीरविषयः प्रतिबन्धः, उपघातकमुपलभ्य पलायनदर्शनात्। यश्च यद्विषयः प्रतिबन्धः स तद्विषयपरिशीलना-भ्यासपूर्वकः, तथादर्शनात्, न खल्वत्यन्तापरिज्ञातगुण-दोषवस्तुविषये कस्याप्याग्रह उपजायते, ततो जन्मादौ शरीराग्रहः शरीरपरिशीलनाभ्यासजनितसंस्कारनिबन्धन इति

१. °तत्तदागच्छन् खं० पामू० ॥ २. कुड्यचित्र° पा०॥ २. °शन् वापि ना° - वार्त्तिका०॥

सिद्धमात्मनो जन्मान्तरादागमनम्। उक्तं च–

शरीराग्रहरूपस्य चेतसः सम्भवो यदा।
जन्मादौ देहिनां दृष्टः किं न जन्मान्तरागतिः ?॥१॥

[वार्त्तिकालं० २। श्लो० ४५३ पृ० ७२]

अथाऽऽगतिः प्रत्यक्षतो नोपलभ्यते ततः कथमनुमानादवसीयते ?, नैष दोषः, अनुमेयविषये प्रत्यक्षवृत्तेरनभ्युपगमात्, परस्परविषयपरिहारेण हि प्रत्यक्षा-ऽनुमानयोः प्रवर्त्तनमिष्यते ततः कथं स एव दोषः ?। आह च–

अनुमेयेऽस्ति नाध्यक्षमिति कैवात्र दुष्टता ?।
अध्यक्षस्यानुमानस्य विषयो विषयो न हि॥१॥

[वार्त्तिकालं० २। श्लो० ४५४ पृ० ७२]

अथ तज्जातीयेऽपि प्रत्यक्षवृत्तिमन्तरेण कथमनुमानमुदयितुमुत्सहते ? न खलु यस्याग्निविषया प्रत्यक्षप्रवृत्तिर्महानसेऽपि नाऽऽसीत् तस्यान्यत्र क्षितिधरादौ धूमाद् धूमध्वजानुमानम्, तदप्ययुक्तम्, अत्रापि तज्जातीये प्रत्यक्षवृत्तिभावात्, तथाहि– आग्रहोऽन्यत्र परिशीलनाभ्यासप्रवृत्तः प्रत्यक्षत एवोपलब्धः, तदुपष्टम्भेनेहाप्यनुमा प्रवर्त्तते। उक्तं च–

आग्रहस्तावदभ्यासात् प्रवृत्त उपलभ्यते।
अन्यत्राध्यक्षतः साक्षात् ततो देहेऽनुमा न किम् ?॥१॥

[वार्त्तिकालं० २। श्लो० ४५५ पृ० ७२]

योऽपि चित्रदृष्टान्तः प्रागुपन्यस्तः सोऽप्ययुक्तः, वैषम्यात्, तथाहि– चित्रमचेतनं गमनस्वभावरहितं च, आत्मा च चेतनः कर्मवशाद् गत्यागती च कुरुते, ततः कथं दृष्टान्त-दार्ष्टान्तिकयोः साम्यम् ?। ततो यथा कश्चिद् देवदत्तो विवक्षिते ग्रामे कतिपयदिनानि गृही भूत्वा ग्रामान्तरे गृहान्तरमास्थायावतिष्ठते तद्वद् आत्माऽपि विवक्षिते भवे देहं परिहाय भवान्तरे देहान्तरमारचय्यावतिष्ठते।

यच्चोक्तम्[१] 'तच्च संवेदनं देहकार्यम्' इति, तत्र चाक्षुषादिकं संवेदनं देहाश्रितमपि

---

१. पृ०८ पं०१३ ॥

कथञ्चिद् भवतु, चक्षुरादीन्द्रियद्वारेण तस्योत्पत्तिसम्भवात्, यत्तु मानसं तत् कथम् ?, न हि तद् देहकार्यं घटते, युक्त्ययोगात्। तथाहि– तद् मानसं ज्ञानं देहादुत्पद्य-मानमिन्द्रियरूपाद्वा समुत्पद्येत ? अनिन्द्रियरूपाद्वा केश-नखादिलक्षणात् ?। तत्र न तावदाद्यः पक्षः, इन्द्रियरूपात् तदुत्पत्ताविन्द्रियबुद्धिवद् वर्त्तमानार्थग्रहणप्रसक्तेः, इन्द्रियं हि वार्त्तमानिक एवार्थे व्याप्रियते, ततस्तत्सामर्थ्यादुपजायमानं मानसमपि ज्ञानमिन्द्रियज्ञानमिव वर्त्तमानार्थग्रहणपर्यवसितसत्ताकमेव भवेत्। अथ यदा चक्षू रूपविषये व्याप्रियते तदा रूपविज्ञानमुत्पादयति न शेषकालम्, ततः तद् रूपविज्ञानं वर्त्तमानार्थविषयम्, वर्त्तमाने एवार्थे चक्षुषो व्यापारात्, रूपविषयव्यापृत्यभावे च मनोज्ञानम्, ततो न तत् प्रतिनियतकालविषयम्, एवं शेषेष्वपीन्द्रियेषु वाच्यम्, ततः कथमिव मनोज्ञानस्य वर्त्तमानार्थग्रहणप्रसक्तिः ? तदसाधीयः, यत इन्द्रियाश्रितं तदुच्यते यद् इन्द्रियव्यापारमनुसृत्योपजायते, इन्द्रियाणां च व्यापारः प्रतिनियते एव वार्त्तमानिके स्वस्वविषये, ततो मनोज्ञानमपि यदिन्द्रियव्यापाराश्रितं तत् ऐन्द्रियज्ञानमिव वार्त्तमानिकार्थग्राहकमेव भवेत्, अन्यथा इन्द्रियाश्रितमेव तन्न स्यात्। उक्तं च–

अक्षव्यापारमाश्रित्य भवदक्षजमिष्यते।
तद्व्यापारो न तत्रेति कथमक्षभवं भवेत् ?॥१॥

[वार्त्तिकालं० २। श्लो० ४२४ पृ० ६५]

अथानिन्द्रियरूपादिति पक्षः, तदप्ययुक्तम्, तस्याचेतनत्वात्। नन्वचेतनत्वादिति कोऽर्थः ? यदि इन्द्रियविज्ञानविरहादिति तदिष्यत एव, यदि नामेन्द्रियविज्ञानं ततो न भवति मनोविज्ञानं तु कस्मान्न भवति ?। अथ मनोविज्ञानं नोत्पादयतीति अचेतनत्वं तदा तदेव विचार्यमाणमिति प्रतिज्ञार्थैकदेशासिद्धो हेतुः, तदप्यसत्, अचेतनत्वादिति किमुक्तं भवति ? - स्वनिमित्तविज्ञानैः स्फुरच्चिद्रूपतयाऽनुपलब्धेः, स्पर्शादयो हि स्वस्वनिमित्तविज्ञानैः स्फुरच्चिद्रूपा उपलभ्यन्ते ततस्तेभ्यो ज्ञानमुत्पद्यत इति युक्तम्, केश-नखादयस्तु न मनोज्ञानेन तथा स्फुरच्चिद्रूपा उपलभ्यन्ते ततः कथं तेभ्यो मनोज्ञानं भवतीति प्रतीमः ?। आह च–

चेतयन्तो न दृश्यन्ते केश-श्मश्रु-नखादयः।
ततस्तेभ्यो मनोज्ञानं भवतीत्यतिसाहसम्॥१॥

[वार्त्तिकालं० २। श्लो० ४२५ पृ० ६५][1]

अपि च, यदि केश-नखादिप्रतिबद्धं मनोज्ञानं ततस्तदुच्छेदे मूलत एव न स्यात्, तदुपघाते चोपहतं भवेत्, न च भवति, तस्मान्नायमपि पक्षः क्षोदक्षमः। किञ्च, मनोज्ञानस्य सूक्ष्मार्थभेत्तृत्व-स्मृतिपाटवादयो विशेषा अन्वय-व्यतिरेकाभ्यामभ्यासपूर्वका दृष्टाः, तथाहि– तदेव शास्त्रमीहा-ऽपोहादिप्रकारेण यदि पुनः पुनः परिभाव्यते ततः सूक्ष्म-सूक्ष्मतरार्थावबोध उल्लसति स्मृतिपाटवं चापूर्वमुज्जृम्भते, एवं चैकत्र शास्त्रेऽभ्यासतः सूक्ष्मार्थभेत्तृत्वशक्तौ स्मृतिपाटवशक्तौ चोपजातायामन्येष्वपि शास्त्रान्तरेष्वनायासेनैव सूक्ष्मार्थावबोधः स्मृतिपाटवं चोल्लसति, तदेवमभ्यासहेतुकाः सूक्ष्मार्थभेत्तृत्वादयो मनोज्ञानस्य विशेषा दृष्टाः। अथ च कस्यचिदिहजन्माभ्यासव्यतिरेकेणापि दृश्यन्ते ततोऽवश्यं ते पारलौकिकाभ्यासहेतुका इति प्रतिपत्तव्यम्, कारणेन सह कार्यस्यान्यथाऽनुपपन्नत्वप्रतिबन्धतोऽदृष्टतत्कारणस्यापि तत्कार्यत्वविनिश्चितेः, ततः सिद्धः परलोकयायी जीवः, सिद्धे च तस्मिन् परलोकयायिनि यदि कथञ्चिदुपकारी चाक्षुषादेर्विज्ञानस्य देहो भवेद् भवतु, न कश्चिद् दोषः, क्षयोपशमहेतुतया देहस्यापि कथञ्चिदुपकारित्वाभ्युपगमात्। न चैतावता तन्निवृत्तौ सर्वथा तन्निवृत्तिः, न हि वह्नेरासादितविशेषो घटो वह्निनिवृत्तौ समूलोच्छेदं निवर्त्तते, केवलं विशेष एव कश्चनापि, यथा सुवर्णस्य द्रवता, एवमिहापि देहनिवृत्तौ ज्ञानविशेष एव कोऽपि तत्प्रतिबद्धो निवर्त्तताम्, न पुनः समूलं ज्ञानमपि। यदि पुनर्देहमात्रनिमित्तकमेव विज्ञानमिष्येत देहनिवृत्तौ च निवृत्तिमत् तर्हि देहस्य भस्मावस्थायां मा भूत्, देहे तु तथाभूते एवावतिष्ठमाने मृतावस्थायां कस्मान्न भवति ?।

प्राणा-ऽपानयोरपि हेतुत्वात् तदभावान्न भवतीति चेत्, न, प्राणा-ऽपानयोर्ज्ञानहेतुत्वायोगात्, ज्ञानादेव तयोरपि प्रवृत्तेः। तथाहि– यदि मन्दौ प्राणा-ऽपानौ निस्रष्टुमिष्येते[2] ततो मन्दौ भवतः, दीर्घौ चेत् तर्हि दीर्घाविति। यदि पुनर्देहमात्रनिमित्तौ

१. "चेतयन्तो न दृश्यन्ते यदा केश-नखादयः। तदा तेभ्यो मनोज्ञानं भवतीति कथं स्थितिः॥" इति **वार्तिकालङ्कारे** पाठः ॥ २. **निःस्र**° जेसं०१, खंसं० ॥

प्राणा-ऽपानौ प्राणा-ऽपाननिमित्तं च विज्ञानं तर्हि नेत्थमिच्छावशात् प्राणा-ऽपानप्रवर्त्तनं भवेत्, न हि देहमात्रनिमित्ता गौरता श्यामता वा इच्छावशात् प्रवर्त्तमाना दृष्टा। प्राणा-ऽपाननिमित्तं च यदि विज्ञानं ततः प्राणा-ऽपाननिर्ह्रासा-ऽतिशयसम्भवे विज्ञानस्यापि निर्ह्रासा-ऽतिशयौ स्याताम्। अवश्यं हि कारणे परिहीयमानेऽभिवर्द्धमाने च कार्यस्यापि हानिरुपचयश्च भवति, यथा महति मृत्पिण्डे महान् घटोऽल्पे चाल्पीयान्, अन्यथा कारणमेव तन्न स्यात्। न च भवतः प्राणा-ऽपाननिर्ह्रासा-ऽतिशयसम्भवे विज्ञानस्यापि निर्ह्रासा-ऽतिशयौ, विपर्यस्यापि भावात्, मरणावस्थायां प्राणा-ऽपानातिशयसम्भवेऽपि विज्ञानस्य निर्ह्रासदर्शनात्।

स्यादेतत्, तदानीं वात-पित्तादिभिर्दोषैर्देहस्य विगुणीकृतत्वाद् न प्राणा-ऽपानातिशयसम्भवेऽपि चैतन्यस्यातिशयसम्भवः, अत एव मृतावस्थायामपि न चैतन्यम्, द्रेहस्य विगुणीभूतत्वात्, तदसमीचीनतरम्, एवं सति मृतस्यापि पुनरुज्जीवनप्रसक्तेः, तथाहि– मृतस्य दोषाः समीभवन्ति, समीभवनं च दोषाणामवसीयते ज्वरादिविकारादर्शनात्, समत्वं चाऽऽरोग्यम्, **तेषां समत्वमारोग्यम्, क्षय-वृद्धी विपर्ययः**। [**सिद्धसारे** १।१०] इति वचनात्, आरोग्यलाभाच्च देहस्य पुनरुज्जीवनं भवेत्, अन्यथा देहः कारणमेव न स्याच्चेतसः, तद्विकारभावा-ऽभावाननुविधानात्, एवं हि देहकारणता विज्ञानस्य श्रद्धेया स्याद् यदि पुनरुज्जीवनं भवेत्।

स्यादेतत्, अयुक्तमिदं पुनरुज्जीवनप्रसङ्गापादनम्, यतो यद्यपि दोषा देहस्य वैगुण्यमाधाय निवृत्तास्तथापि न तत्कृतस्य वैगुण्यस्य निवृत्तिः, न हि दहनकृतो विकारः काष्ठे दहननिवृत्तौ निवर्त्तमानो दृष्टः, तदयुक्तम्, इह हि किञ्चित् क्वचिदनिवर्त्त्यविकारारम्भकम्, यथा वह्निः काष्ठे, न हि श्यामतामात्रमपि वह्निना कृतं काष्ठे वह्निनिवृत्तौ निवर्तते; किञ्चित् पुनः क्वचिन्निवर्त्त्यविकारारम्भकम्, यथा स एवाग्निः सुवर्णे, तथाहि– अग्निकृता सुवर्णे द्रवताऽग्निनिवृत्तौ निवर्त्तते; तथा वाय्वादयो दोषा निवर्त्त्यविकारारम्भकाः, चिकित्साप्रयोगदर्शनात्, यदि पुनरनिवर्त्त्यविकारारम्भका

१. बौद्धाचार्य**रविगुप्त**विरचितः आयुर्वेदसम्बन्धी ग्रन्थः **सिद्धसारः** R. E. EMMERIK संपादितः Frazz Steiner Verlag Gmbh Wiesbaden (1980) इत्यतः प्रकाशितोऽस्ति॥

भवेयुस्तर्हि न तद्विकारनिवर्त्तनाय चिकित्सा विधीयेत, वैफल्यप्रसङ्गात्। न च वाच्यम्– मरणात् प्राग् दोषा निवर्त्त्यविकारारम्भका मरणकाले त्वनिवर्त्त्यविकारारम्भका इति, एकस्यैकत्रैव निवर्त्त्या-ऽनिवर्त्त्यविकारारम्भकत्वायोगात्, न हि एकमेव तत्रैव निवर्त्त्यविकारारम्भकमनिवर्त्त्यविकारारम्भकं च भवितुमर्हति, तथाऽदर्शनात्।

ननु द्विविधो हि व्याधिः-साध्योऽसाध्यश्च, तत्र साध्यो निवर्त्त्यस्वभावः, तमेव चाधिकृत्य चिकित्सा फलवती, असाध्योऽनिवर्त्तनीयः, न च साध्या-ऽसाध्यभेदेन व्याधिद्वैविध्यमप्रतीतम्, सकललोकप्रसिद्धत्वात्, व्याधिश्च दोषवैषम्यकृतः, ततः कथं दोषाणां निवर्त्त्या-ऽनिवर्त्त्यविकारारम्भकत्वमनुपपन्नम् ? इति, तदप्यसत्, भवन्मतेनाऽसाध्यव्याधेरेवानुपपत्तेः। तथाहि– असाध्यता व्याधेः क्वचिदायुःक्षयात्, यतस्तस्मिन्नेव व्याधौ समानौषध-वैद्यसम्पर्केऽपि कश्चिद् म्रियते कश्चिद् न; क्वचित् पुनः प्रतिकूलकर्मोदयात्, प्रतिकूलकर्मोदयजनितो हि श्वित्रादिव्याधिरौषधसहस्रैरपि कश्चिदसाध्यो भवति। एतच्च द्विविधमप्यसाध्यत्वं व्याधेः पारमेश्वरप्रवचनवेदिनामेव मते सङ्गच्छते, न भवतो भूतमात्रतत्त्ववादिनः। क्वचित् पुनरसाध्यो व्याधिर्दोषकृतविकारनिवर्त्तनसमर्थस्यौषधस्याभावाद् वैद्यस्य वा, वैद्योषधसम्पर्काभावे हि व्याधिः सर्पन् सकलमप्यायुरुपक्रमते।

ननु वैद्यौषधसम्पर्काभावादेवास्माकमपि पुनरुज्जीवनं न भविष्यति, न हि तदस्ति किञ्चिदौषधं वैद्यो वा यत् पुनरुज्जीवयति, तदप्ययुक्तम्, वैद्यौषधे हि दोषकृतविकारनिवर्त्तनार्थमिष्येते न पुनरत्यन्तासतश्चैतन्यस्योत्पादनार्थम्, तथाऽनभ्युपगमात्, दोषकृताश्च विकारा मृतावस्थायां स्वयमेव निवृत्ताः, ज्वरादेरदर्शनात्, ततः किं वैद्यौषधान्वेषणेन ? इति तदवस्थ एव पुनरुज्जीवनप्रसङ्गः। अपि च, कश्चिद् दोषाणामुपशमेऽप्यकस्मादेव म्रियते, कश्चिच्चातिदोषदुष्टत्वेऽपि जीवति, तदेतद् भवन्मते कथं व्यवतिष्ठते ?। आह च–

दोषस्योपशमेऽप्यस्ति मरणं कस्यचित् पुनः।
जीवनं दोषदुष्टत्वेऽप्येतन्न स्याद् भवन्मते॥१॥ [वार्तिकालं० २।४६५ पृ०७४]

अस्माकं तु मतेन यावदायुःकर्म विजृम्भते तावद् दोषैरतिपीडितोऽपि जीवति,

आयुःकर्मक्षये च दोषाणामविकृतावपि म्रियते, तन्न देहमात्रनिमित्तं संवेदनम्। अन्यच्च, देहः कारणं संवेदनस्य सहकारिभूतं भवेद् ? उपादानभूतं वा ?। यदि सहकारिभूतं तदिष्यत एव, देहस्यापि क्षयोपशमहेतुतया कथञ्चिद् विज्ञानहेतुत्वाभ्युपगमात्। अथोपादानभूतं तदयुक्तम्, उपादानं हि तत् तस्य यद्विकारेणैव यस्य विकारः, यथा मृद् घटस्य, न च देहविकारेणैव विकारः संवेदनस्य, देहविकाराभावेऽपि भय-शोकादिना तद्विकारदर्शनात्, तन्न देह उपादानं संवेदनस्य। उक्तं च–

अविकृत्य हि यद् वस्तु यः पदार्थो विकार्यते।
उपादानं न तत् तस्य युक्तं गो-गवयादिवत्॥१॥ [*प्रमाणवा० १।६३]

एतेन यदुच्यते– **मातापितृचैतन्यं सुतचैतन्यस्योपादानम्** [ ] इति तदपि प्रतिक्षिप्तमवगन्तव्यम्, तत्रापि तद्विकारे विकारित्वं तदविकारे चाविकारित्वमिति नियमादर्शनात्। अन्यच्च– यद् यस्योपादानं तत् तस्मादभेदेन व्यवस्थितम्, यथा मृदो घटः, मातापितृचैतन्यं चेत् सुतचैतन्यस्योपादानं ततः सुतचैतन्यं मातापितृचैतन्यादभेदेन व्यवतिष्ठेत, न च व्यवतिष्ठते, तस्माद् यत्किञ्चिदेतत्। तन्न भूतधर्मो भूतकार्यं वा चैतन्यम्, अथ चास्ति प्रतिप्राणि स्वसंवेदनप्रमाणसिद्धम्, अतो यस्येदं स यथोक्तलक्षणो जीवः॥

योनयः इति, [१]**युक् मिश्रणे** [**मल० धा०**], युवन्ति तैजस-कार्मणशरीरवन्तः सन्त औदारिकशरीरेण वैक्रियशरीरेण वाऽऽस्विति योनयः जीवानामेवोत्पत्तिस्थानानि। ताश्च सचित्तादिभेदभिन्ना अनेकप्रकाराः। उक्तं च– [२]**सचित्त-शीत-संवृतेतरमिश्रास्तद्योनयः** [*तत्त्वा० अ० २ सू०३३] इति। जगच्च जीवाश्च योनयश्च जगज्जीवयोनयः, तासां विविधम्– अनेकप्रकारमुत्पादाद्यनन्तधर्मात्मकतया जानातीति विज्ञायको **जगज्जीवयोनिविज्ञायकः**, अनेन केवलज्ञानप्रतिपादनात् स्वार्थसम्पदमाह।

तथा जगद् गृणाति-यथावस्थितं प्रतिपादयति शिष्येभ्य इति **जगद्गुरुः**, यथावस्थितसकलपदार्थप्रतिपादक इत्यर्थः। एतेन यत् कैश्चित् शब्दस्य बहिरर्थं प्रति

---

१. "युक् मिश्रणे" - हैम० धा० २।२२। "यु मिश्रणे" - पा० धा० १०३३॥ २. "सचित्त-शीत-संवृताः सेतरा मिश्राश्चैकशस्तद्योनयः" इति तत्त्वार्थसूत्रे पाठः ॥

प्रामाण्यमपाक्रियते तदपास्तं द्रष्टव्यम्। तथाहि त एवमाहुः–

प्रमेयं वस्तु परिच्छिन्नं प्रापयत् प्रमाणमुच्यते, प्रमेयं च विषयः प्रमाणस्येति प्रामाण्यं विषयवत्तया व्याप्तम्, ततो यद् विषयवन्न भवति न तत् प्रमाणम्, यथा गगनेन्दीवरज्ञानम्, न भवति च विषयवत् शाब्दं ज्ञानमिति। न चायमसिद्धो हेतुः, यतो द्विविधो विषयः– प्रत्यक्षः परोक्षश्च। तत्र न प्रत्यक्षः शाब्दज्ञानस्य विषयः, यस्य हि ज्ञानस्य प्रतिभासेन स्फुटाभनीलाद्याकाररूपेण योऽर्थोऽनुकृतान्वयव्यतिरेकः स तस्य प्रत्यक्षः, तस्य च प्रत्यक्षस्यार्थस्यायमेव प्रतिपत्तिप्रकारः सम्भवदशामश्नुते नापरः, तद्विषयं च तदन्वय-व्यतिरेकानुविधायि स्फुटप्रतिभासं ज्ञानं प्रत्यक्षम्, प्रत्यक्षज्ञेयत्वात्, तन्न प्रत्यक्षोऽर्थोऽनेकप्रकारप्रतिपत्तिविषयो यः शाब्दप्रमाणस्यापि विषयो भवेत्।

नापि परोक्षः, तस्यापि हि निश्चिततदन्वय-व्यतिरेकनान्तरीयकदर्शनात् प्रतिपत्तिः, यथा धूमदर्शनाद् वह्नेः, अन्यथाऽतिप्रसङ्गात्। न च शब्दस्यार्थेन सह निश्चिताऽन्वय-व्यतिरेकता, प्रतिबन्धाभावात्, तादात्म्य-तदुत्पत्त्यनुपपत्तेः। तथाहि– न बाह्योऽर्थो रूपं शब्दानां नापि शब्दो रूपमर्थानाम्, तथाप्रतीतेरभावात्, तत् कथमेषां तादात्म्यम् ? येन व्यावृत्तिकृतव्यवस्थाभेदेऽपि नान्तरीयकता स्यात्, कृतकत्वानित्यत्ववद्। अपि च, यदि तादात्म्यमेषां भवेत् ततोऽनला-ऽचल-क्षुरिकादिशब्दोच्चारणे वदनदहन-पूरण-पाटनादिदोषः प्रसज्येत, न चैवमस्ति, तन्न तादात्म्यम्। नापि तदुत्पत्तिः, तत्रापि विकल्पद्वयप्रसक्तेः। तथाहि– वस्तुनः किं शब्दस्योत्पत्तिः ? उत शब्दाद् वस्तुनः ?। तत्र वस्तुनः शब्दोत्पत्तावकृतसङ्केतस्यापि पुंसः प्रथमपनसदर्शने तच्छब्दोच्चारणप्रसङ्गः। शब्दाच्च वस्तूत्पत्तौ विश्वस्यादरिद्रताप्रसक्तिः, तत एव कटक-कुण्डलाद्युत्पत्तेः। तदेवं प्रतिबन्धाभावान्न शब्दस्यार्थेन सह नान्तरीयकतानिश्चयः, तदभावाच्च न शब्दाद् निश्चितस्यार्थस्य प्रतिपत्तिः, अपि त्वनिवर्त्तितशङ्कतयाऽस्ति न वेति विकल्पितस्य। न च विकल्पितमुभयरूपं वस्त्वस्ति यत् प्राप्यं सद् विषयः स्यात्, प्रवर्त्तमानस्य तु पुरुषस्य[1] तस्यार्थस्य पृथिव्याममज्जनादवश्यमन्यद् ज्ञानान्तरं प्राप्तिनिमित्तमुपजायते यतः किञ्चिदवाप्यत इति शाब्दज्ञानस्य विषयवत्त्वाभावः, तदसत्, विषयवत्त्वाभावासिद्धेः,

१. "**पुरुषस्यार्थस्य पृथिव्या**०" इति **धर्मसंग्रहणीवृत्तौ** पत्र १२-२॥

परोक्षस्य तद्विषयत्वाभ्युपगमात्।

यत् पुनरुक्तम्[१]– 'न शब्दस्यार्थेन सह निश्चितान्वय-व्यतिरेकता, प्रतिबन्धाभावात्' इति, तदसमीचीनम्, वाच्य-वाचकभावलक्षणेन प्रतिबन्धान्तरेण नान्तरीयकतानिश्चयात्, शब्दो हि बाह्यवस्तुवाचकस्वभावतया तन्नान्तरीयकः, ततस्तन्नान्तरीयकतायां निश्चितायां शब्दाद् निश्चितस्यैवार्थस्य प्रतिपत्तिर्न विकल्पितरूपस्य, निश्चितं च प्रापयत् विषयवदेव शाब्दं ज्ञानमिति।

स्यादेतद्– यदि वास्तवसम्बन्धपरिकरितमूर्त्तयः शब्दास्तर्हि समाश्रयतु निरर्थकतामिदानीं सङ्केतः, स खलु सम्बन्धो यतोऽर्थप्रतीतिः, स चेद् वास्तवो निरर्थकः सङ्केतः, तत एवार्थप्रतीतिसिद्धेः। तदेतदत्यन्तप्रमाणमार्गानभिज्ञत्वसूचकम्, यतो न विद्यमान इत्येव सम्बन्धोऽर्थप्रतीतिनिबन्धनम्, किन्तु स्वात्मज्ञानसहकारी, यथा प्रदीपः, तथाहि– प्रदीपो रूपप्रकाशनस्वभावोऽपि यदि स्वात्मज्ञानसहकारिकृतसाहायकः ततो रूपं प्रकाशयति, नान्यथा, ज्ञापकत्वात्, न खलु धूमादिकमपि लिङ्गं वस्तुवृत्त्या वह्न्यादिप्रतिबद्धमपि सत्तामात्रेण वह्न्यादेर्गमकमुपजायते। तदुक्तमन्यैरपि–

ज्ञापकत्वाद्धि सम्बन्धः स्वात्मज्ञानमपेक्षते[२]।
तेनासौ विद्यमानोऽपि नागृहीतः प्रकाशकः॥१॥ [मी० श्लो० वा० संबन्धाक्षेप० ३२]

सम्बन्धस्य च परिज्ञानं तदावरणकर्मक्षय-क्षयोपशमाभ्याम्, तौ च सङ्केत-तपश्चरण-भावनाद्यनेकसाधनसाध्यौ, ततस्तपश्चरण-भावना-सङ्केतादिभ्यः समुत्पन्नतदावरणकर्म-क्षय-क्षयोपशमानां शब्दादर्थाच्च केवलादप्यवैपरीत्येन वाच्य-वाचकभावलक्षणः सम्बन्धोऽवगमपथमृच्छति। तथाहि– सर्वे एव सर्ववेदिनः **सुमेरु-जम्बूद्वीपादी**-नर्थानगृहीतसङ्केता अपि तच्छब्दवाच्यानेव प्रतिपद्यन्ते, तैरेव तथा प्ररूपणात्। कल्पान्तरवर्त्तिभिरन्यैरेवं प्ररूपिता इति तैरपि तथा प्ररूपिता इति चेत्, ननु तेषामपि कल्पान्तरवर्त्तिनां तथा प्ररूपणे को हेतुः ? इति वाच्यम्, तदन्यैरेवं प्ररूपणादिति चेत्, अत्रापि स एव प्रसङ्गः, समाधिरपि स एवेति चेत्, ननु तर्हि सिद्धः **सुमेर्वाद्यर्थानां**

१. पृ०१५ पं०११ ॥ २. "नन्वगृहीतोऽपि तावदस्तीति किं नार्थं प्रत्यायति ? अत आह- **ज्ञापकत्वाद्धि**.... ॥३२॥ ज्ञापकस्य हि ज्ञातापेक्षापि लिङ्गादौ दृष्टा, तेन विद्यमानस्यापि युक्तमप्रकाशकत्वमिति ॥३२॥" इति **न्यायरत्नाकर**सहिते **मीमांसाश्लोकवार्तिके** ॥

तदभिधायकानां च वास्तवः सम्बन्धः, सर्वकल्पवर्त्तिभिरपि सर्ववेदिभिस्तेषां **सुमेर्वा**दि-शब्दवाच्यतया प्ररूपणात्। अनादित्वात् संसारस्य कदाचित् कैश्चिदन्यथाऽपि सा प्ररूपणा कृता भविष्यतीति चेत्, न, अतीन्द्रियत्वेनात्र प्रमाणाभावात्, सर्वैरपि तथैव सा प्ररूपणा कृतेत्यत्रापि न प्रमाणमिति चेत्, न, अत्र प्रमाणोपपत्तेः, तथाहि– **शाक्यमुनि**ना सम्प्रति **सुमेर्वादि**कोऽर्थः सुमेर्वादिशब्देन प्ररूपितः, स च सुमेर्वादौ सुमेर्वादिशब्दप्रयोगः सङ्केतद्वारेणाप्यतत्स्वभावतायां तयोर्नोपपद्यते, तत्स्वभावत्वाभ्युपगमे च सिद्धं नः समीहितम्, अनादावपि काले तयोः तत्स्वभावत्वात्, तत्समानपरिणामस्य प्रवाहतो नित्यत्वात् तत्र सम्बन्धाभ्युपगमात्। इत्थं चैतदङ्गीकर्त्तव्यम्, अन्यथाऽनादित्वात् संसारस्य कदाचिदन्यतोऽपि धूमादेर्भावो भविष्यतीत्येवं व्यभिचाराशङ्का धूम-धूमध्वजादिषु प्रसरन्ती दुर्निवारेत्यलं दुर्मतिविस्पन्दितेषु[१] प्रयासेन।

ननु यदि पारमार्थिकसम्बन्धनिबद्धस्वरूपत्वादिमे शब्दास्तात्त्विकार्थाभिधान-प्रभविष्णवः तर्हि दर्शनान्तरनिवेशिपुरुषपरिकल्पितेषु वाच्येष्वेतेषां प्रवृत्तिर्नोपपद्येत, परस्परविरुद्धत्वेन तेषामर्थानां स्वरूपतोऽभावात्। यदपि च विनष्टमनुत्पन्नं वा तदपि स्वरूपेण न समस्तीति तत्रापि वाचो न प्रवर्त्तेरन्। अपि च, यदि वाचां सद्भूतार्थमन्तरेण न प्रवृत्तिः तर्हि न कस्याश्चिदपि वाचोऽलीकता भवेत्, न चैतद् दृश्यते, तस्मात् सर्वमपि पूर्वोक्तं मिथ्या। तदप्ययुक्तम्, इह द्विधा शब्दाः-मृषाभाषावर्गणोपादानाः सत्यभाषावर्गणोपादानाश्च, तत्र ये मृषाभाषावर्गणोपादानास्ते तु तीर्थान्तरीयपरिकल्पिताः कुशास्त्रसम्पर्कवशसमुत्थ[२]वासनासम्पादितसत्ताकाः 'प्रधानरूपं जगत्, ईश्वरकृतं विश्वम्' इत्येवमाकारास्तेऽनर्थका एवाभ्युपगम्यन्ते, ते हि वन्ध्याऽबला इव तदर्थप्राप्त्यादि-प्रसवविकलाः केवलं तथाविधसंवेदनभोगफला इति न तैर्व्यभिचारः।

अथ तेऽपि सत्याभिमतशब्दा [३]इव प्रतिभासन्ते तत् कथमयं सत्या-ऽसत्यविवेको निर्द्धारणीयः ?, ननु प्रत्यक्षाभासमपि प्रत्यक्षमिवाऽऽभासते ततस्तत्रापि कथं सत्या-ऽसत्यप्रत्यक्षविवेकनिर्द्धारणम् ?! स्वरूप-विषयपर्यालोचनयेति चेत्, तथाहि-अभ्यासदशामापन्नाः स्वरूपदर्शनमात्रादेव प्रत्यक्षस्य सत्या-ऽसत्यत्वमवधारयन्ति, यथा

१. °**विस्पंदनेषु** खंसं० जेमू१॥ २. °**त्थभावनास**° जे०॥ ३. **इति प्र**° खं० जेमू १॥

मणिपरीक्षका मणेः, अनभ्यासदशामापन्नास्तु विषयपर्यालोचनया, यथा-किमयं विषयः सत्यः ? उताहो न ? इति, तत्रार्थक्रियासंवाददर्शनतः तद्गतस्वभाव-लिङ्गदर्शनतो वा सत्यत्वमवगच्छन्ति अन्यथा त्वसत्यत्वमिति, तदेतत् स्वरूप-विषयपर्यालोचनया सत्या-ऽसत्यत्वविवेकनिर्द्धारणमिहापि समानम्, तथाहि-दृश्यन्त एव केचित् प्रज्ञातिशयसमन्विताः शब्दश्रवणमात्रादेव पुरुषाणां मिथ्याभाषित्वममिथ्याभाषित्वं वा सम्यगवधारयन्तः। विषयसत्या-ऽसत्यत्वपर्यालोचनायां तु किमेष वक्ता यथावदाप्तः ? उत न ? इति, तत्र यदि यथावदाप्त इति निश्चितं ततो विषयसत्यत्वम् इतरथा त्वसत्यत्वम्, आप्तेतरविवेकोऽपि परिशीलनेन लिङ्गतो वा कुतश्चिदवसेयः, निपुणेन हि प्रतिपत्त्रा भवितव्यम्।

यदप्युक्तम्[१]- 'यदपि च विनष्टमनुत्पन्नं वा तदपि न स्वरूपेण समस्ति' इत्यादि, तत्रापि यदि विनष्टा-ऽनुत्पन्नयोर्वार्त्तमानिकविद्यमानरूपाभिधायकः शब्दः प्रवर्त्तते तर्हि स निरर्थकोऽभ्युपगम्यत एव, ततो न तेन व्यभिचारः, यदा तु ते अपि विनष्टा-ऽनुत्पन्ने विनष्टा-ऽनुत्पन्नतयाऽभिधत्ते शब्दः तदा तद्विषयसर्वज्ञ[२]ज्ञानमिव सद्भूतार्थविषयत्वात् स प्रमाणम्, इत्थं चैतदङ्गीकर्त्तव्यम्, अन्यथाऽतीतकल्पान्तरवर्त्ति[३]पार्श्वादिसर्वज्ञदेशना-भविष्यच्छङ्खचक्रवर्त्त्यादिदेशना च सर्वथा नोपपद्येत, तद्विषयज्ञानशब्दप्रवृत्त्यभावात्।

अथोच्यते[४]-अनलेऽनलशब्दः तदभिधानस्वभावतया यमभिधेयपरिणाममाश्रित्य प्रवर्त्तते स जले नास्ति, जला-ऽनलयोरभेदप्रसङ्गात्। अथ च प्रवर्त्तते सङ्केतवशाज्जले-ऽप्यनलशब्दः तत् कथं शब्दा-ऽर्थयोर्वास्तवः सम्बन्धः ?, तदसत्, शब्दस्यानेक-शक्तिसमन्वितत्वेनोक्तदोषानुपपत्तेः, तथाहि– नाऽनल- शब्दस्यानलवस्तुगताभिधेय-परिणामापेक्षी तदभिधानविषय एवैकः स्वभावः, अपि तु समया[५]भिधान-तत्स्मरणपूर्वकतया विलम्बितादिप्रतीतिनिबन्धनत्वेन जलवस्तुगताभिधेयपरिणामापेक्षी तदभिधानस्वभावोऽपि, तथा तस्यापि प्रतीतेः, अन्यथा निर्हेतुकत्वेन तत्प्रतीत्य-भावप्रसङ्गात्।

---

१. पृ०१७ पं०१३ ॥ २. °**सार्व**° पामू० विना ॥ ३. °**पश्वादि**° पा० मांसं० विना॥ ४. **अथोच्यते** खं० ॥ ५. **समयाधान**° जेसं१, जे२, मां० । सङ्केतः - खंटि०॥

ननु कथमेते शब्दा वस्तुविषयाः प्रतिज्ञायन्ते ?, चक्षुरादीन्द्रियसमुत्थबुद्धाविव शाब्दे ज्ञाने वस्तुनोऽप्रतिभासनात्, यदेव च चक्षुरादीन्द्रियबुद्धौ प्रतिभासते व्यक्त्यन्तराननुयायि प्रतिनियतदेश-कालं तदेव वस्तु, तस्यैवार्थक्रियासमर्थत्वात्, नेतरत् परपरिकल्पितं सामान्यम्, विपर्ययात्, न च तद् अर्थक्रियासमर्थं वस्तु शाब्दे ज्ञाने प्रतिभासते, तस्मादवस्तुविषया एते शब्दाः, तथा चात्र प्रमाणम्- योऽर्थः शाब्दे ज्ञाने येन शब्देन सह संस्पृष्टो नावभासते न स तस्य शब्दस्य विषयः, यथा गोशब्दस्याश्वः, नावभासते चेन्द्रियगम्योऽर्थः शाब्दे ज्ञाने शब्देन संस्पृष्ट इति, यो हि यस्य शब्दस्यार्थः स तेन शब्देन सह संस्पृष्टः शाब्दे ज्ञाने प्रतिभासते, यथा गोशब्देन गोपिण्डः, एतावन्मात्रनिबन्धनत्वाद् वाच्यत्वस्येति।

तदेतदसमीचीनम्, इन्द्रियगम्यार्थस्य[1] शाब्दे ज्ञाने शब्देन सहानवभासासिद्धेः, तथाहि– 'कृष्णं महान्तमखण्डं मसृणमपूर्वमपवरकाद् घटमानय' इत्युक्तः कश्चित् तज्ज्ञानावरणक्षयोपशमयुक्तः तमर्थं तथैव प्रत्यक्षमिव शाब्दे ज्ञाने प्रतिपद्यते, तदन्यघटमध्ये तदानयनाय तं प्रति भेदेन प्रवर्त्तनात्, तथैव च तत्प्राप्तेः। अथ तत्राप्यस्फुटरूप एव वस्तुनः प्रतिभासोऽनुभूयते स्फुटाभं च प्रत्यक्षं तत् कथं प्रत्यक्षगम्यं वस्तु शाब्दज्ञानस्य विषयः ?, नैष दोषः, स्फुटा-ऽस्फुटरूपप्रतिभासभेदमात्रेण वस्तुभेदायोगात्, तथाहि– एकस्मिन्नमेव नीलवस्तुनि दूरा-ऽऽसन्नवर्त्तिप्रतिपत्तृज्ञाने स्फुटा-ऽस्फुटप्रतिभासे उपलभ्येते, न च तत्र वस्तुभेदाभ्युपगमः, द्वयोरपि प्रत्यक्षप्रमाणतयोपगमात्[2], तथेहाप्येकस्मिन्नपि वस्तुनीन्द्रियज-शाब्दज्ञाने स्फुटा-ऽस्फुटप्रतिभासे भविष्यतः, न च तद्गोचरवस्तुभेदः।

अथ वस्त्वभावेऽपि शाब्दज्ञानप्रतिभासाविशेषात् सत्यपि वस्तुनि शाब्दं ज्ञानं न तद्याथात्म्यसंस्पर्शि, तद्भावा-ऽभावयोरननुविधानात्, यस्य हि ज्ञानस्य प्रतिभासो यस्य भावा-ऽभावावनुविधत्ते तत् तस्य परिच्छेदकम्, न च शाब्दज्ञानप्रतिभासो वस्तुनो भावा-ऽभावावनुविधत्ते, वस्त्वभावेऽपि तदविशेषात्, तन्न वस्तुनः परिच्छेदकं शाब्दं ज्ञानम्, रसज्ञानमिव गन्धस्य, प्रमाणं चात्र– यद् ज्ञानं यदन्वय-व्यतिरेकानुविधायि न भवति न तत् तद्विषयम्, यथा रूपज्ञानं रसविषयम्, न भवति चेन्द्रियगम्यार्थान्वय-

---

१. **इन्द्रियार्थस्य** जेमू१, पामू० खं० ॥ २. °**तयाभ्युप**° जेसं१, जे२, मां० ॥

व्यतिरेकानुविधायि शाब्दं ज्ञानमिति व्यापकानुपलब्धिः, प्रतिनियतवस्तुविषयवत्त्वं हि ज्ञानस्य निमित्तवत्तया व्याप्तम्, अन्वय-व्यतिरेकानुविधानाभावे च निमित्तवत्त्वाभावः स्यात्, निमित्तान्तरासम्भवात्, तेन तद्विषयवत्त्वं निमित्तवत्त्वाभावाद् विपक्षाद् व्यापकानुपलब्ध्या व्यावर्त्तमानमन्वय-व्यतिरेकानुविधानेन व्याप्यत इति प्रतिबन्धसिद्धिः, तदयुक्तम्, प्रत्यक्षज्ञानेऽप्येवमविषयत्वप्रसक्तेः, तथाहि– यथा जलवस्तुनि जलोल्लेखि प्रत्यक्षमुदयपदवीमासादयति तथा जलाभावेऽपि मरौ मध्याह्नमार्त्तण्डमरीचिका-स्वक्षूणजलप्रतिभासमुदयमानमुपलभ्यते, ततो जलाभावेऽपि जलज्ञानप्रतिभासाविशेषात् सत्यपि जले जलप्रत्यक्षं प्रादुर्भवन्न तद्याथात्म्यसंस्पर्शि, तद्भावा-ऽभावयोरननुकारादि-त्यादि सर्वं समानमेव।

अथ देश-काल-स्वरूपपर्यालोचनया तत्प्राप्त्यभावादिना च मरुमरीचिकासु जलोल्लेखिनः प्रत्यक्षस्य भ्रान्तत्वमवसीयते, भ्रान्तं चाप्रमाणम्, ततो न तेन व्यभिचारः, प्रमाणभूतस्य च वस्त्वन्वय-व्यतिरेकानुविधायित्वाव्यभिचार एव, तदेतदन्यत्रापि समानम्, तथाहि– यथार्थदर्शनादिगुणयुक्तः पुरुष आप्तः, तत्प्रणीतशब्दसमुत्थं च ज्ञानं प्रमाणम्, न च तस्य वस्त्वन्वय-व्यतिरेकानुविधायित्वव्यभिचारसम्भवः। यत् पुनरनाप्त-प्रणीतशब्दसमुत्थं ज्ञानं तदप्रमाणम्, अप्रमाणत्वाच्च न तेन व्यभिचारः।

यदपि च प्रमाणमुपन्यस्तं तदपि हेतोरसिद्धत्वान्न साध्यसाधनायालम्, असिद्धता च हेतोराप्तप्रणीतशब्दस्य वस्तुव्यतिरेकेण प्रवृत्त्यसम्भवात्। यत् पुनरिदमुच्यते–'शब्दः श्रूयमाणो वक्त्रभिप्रायविषयं विकल्पप्रतिबिम्बं तत्कार्यतया धूम इव वह्निमनुमापयति' तत्र स एव वक्ता विशिष्टार्थाभिप्राय-शब्दयोराश्रयो धर्मी, अभिप्रायविशेषः साध्यः[१], शब्दः साधनमिति, तदाह– **वक्तुरभिप्रेतं तु सूचयेयुः** [ ] इति स एव तथा प्रतिपद्यमान आश्रयोऽस्त्विति, तत् पापात् पापीयः, तथाप्रतीतेरभावात्, न खलु कश्चिदिह धूमादिव वह्निं तत्कार्यतया शब्दादभिप्रायविषयं विकल्पप्रतिबिम्बमनुमिमीते, अपि तु वाचकत्वेन बाह्यमर्थं प्रत्येति, देशान्तरे कालान्तरे च तथा प्रवृत्त्यादिदर्शनात्। न च देशान्तरादावपि तथा प्रतीतावन्यथापरिकल्पनं श्रेयः, अतिप्रसङ्गप्राप्तेः, नाग्निर्धूमं जनयति किन्त्वदृष्टः

१. साध्यं जेमू१, जे२, मां० ॥

पिशाचादिरित्यस्या[१] अपि कल्पनायाः प्रसङ्गात्।

अपि च– अर्थक्रियार्थी प्रेक्षावान् प्रमाणमन्वेषयति, न चाभिप्रायविषयं विकल्पप्रतिबिम्बं विवक्षितार्थक्रियासमर्थम्[२], किन्तु बाह्यमेव वस्तु। न च वाच्यम्– अभिप्रायविषयं विकल्पप्रतिबिम्बं ज्ञात्वा बाह्ये वस्तुनि प्रवर्त्तिष्यते तेनायमदोष इति, अन्यस्मिन् ज्ञाते अन्यत्र प्रवृत्त्यनुपपत्तेः, न हि घटे परिच्छिन्ने पटे प्रवृत्तिर्युक्ता। एतेन विकल्पप्रतिबिम्बकं शब्दवाच्यमिति यत् प्रतिपन्नं तदपि प्रतिक्षिप्तमवसेयम्, तत्रापि विकल्पप्रतिबिम्बके शब्देन प्रतिपन्ने वस्तुनि प्रवृत्त्यनुपपत्तेः।

दृश्य-विकल्प्यावर्थावेकीकृत्य[३] वस्तुनि प्रवर्त्तते इति चेत्, तथाहि-तदेव विकल्पप्रतिबिम्बकं बहीरूपतयाऽध्यवस्यति ततो बहिः प्रवर्त्तते तेनायमदोष इति, न, तयोरेकीकरणासिद्धेः, अत्यन्तवैलक्षण्येन साधर्म्यायोगात्, साधर्म्यं चैकीकरणनिमित्तम्, अन्यथाऽतिप्रसङ्गात्। अपि च– कश्चैतावेकीकरोतीति वाच्यम्, स एव विकल्प इति चेत्, न, तत्र बाह्यस्वलक्षणानवभासात्, अन्यथा विकल्पत्वायोगात्, अनवभासितेन चैकीकरणासम्भवात्, अतिप्रसक्तेः। अथ विकल्पादन्य एव कश्चिद् विकल्प्यमेवार्थं दृश्यमित्यध्यवस्यति, हन्त ! तर्हि स्वदर्शनपरित्यागप्रसङ्गः, एवमभ्युपगमे सति बलादात्मास्तित्वप्रसक्तेः, तथाहि– निर्विकल्पकं न विकल्प्यमर्थं साक्षात्करोति, तदगोचरत्वात्, ततो न तद् दृश्यमर्थं विकल्पेन सहैकीकर्त्तुमलम्, न च देश-काल-स्वभावव्यवहितार्थविषयेषु शाब्दविकल्पेषु तद्विषयनिर्विकल्पकसम्भवः, तत् कथं तत्र तेन दृश्य-विकल्प्यार्थैकीकरणम् ?, ततो विकल्पादन्यः सर्वत्र दृश्य-विकल्प्यावर्थावेकीकुर्वन् बलादात्मैवोपपद्यते, न च सोऽभ्युपगम्यते, तस्माच्छब्दो बाह्यस्यार्थस्य वाचक इत्यकामेनापि प्रतिपत्तव्यम्।

इतश्च प्रतिपत्तव्यम्, अन्यथा सङ्केतस्यापि कर्त्तुमशक्यत्वात्। तथाहि– येन शब्देन इदं तदित्यादिना सङ्केतो विधेयः तेन किं सङ्केतितेन ? उतासङ्केतितेन ?। न तावत् सङ्केतितेन, अनवस्थाप्रसङ्गात्, तस्यापि हि येन शब्देन सङ्केतः कार्यः तेन किं सङ्केतितेन ? उतासङ्केतितेन ? इत्यादि तदेवाऽऽवर्त्तते। अथासङ्केतितेन, सिद्धस्तर्हि शब्दा-ऽर्थयोर्वास्तवः

---

१. °त्यन्यस्या खं० पा० ॥ २. **विकल्पितार्थ**° जे१ ॥ ३. °**कृत्य बाह्ये वस्तुनि** धर्मसं० टीकायाम्॥

सम्बन्ध इति॥

तथा **जगदानन्दः**, इह जगच्छब्देन संज्ञिपञ्चेन्द्रियपरिग्रहः, तेषामेव भगवद्दर्शन-देशनादित आनन्दसम्भवात्, ततश्च **जगतां** संज्ञिपञ्चेन्द्रियाणाममृतस्यन्दिमूर्त्तिदर्शनमात्रतो निःश्रेयसा-ऽभ्युदयसाधकधर्मोपदेशद्वारेण चाऽऽनन्दहेतुत्वादैहिका-ऽऽमुष्मिक-प्रमोदकारणत्वात् **जगदानन्दः**, अनेन परार्थसम्पदमाह।

तथा **जगन्नाथः**, इह जगच्छब्देन सकलचरा-ऽचरपरिग्रहः, नाथशब्देन च योग-क्षेमकृदभिधीयते, **योग-क्षेमकृद् नाथः** [ ] इति विद्वत्प्रवादात्, ततश्च **जगतः** सकलचरा-ऽचररूपस्य यथावस्थितस्वरूपप्ररूपणद्वारेण वितथप्ररूपणापायेभ्यः पालनाच्च नाथ इव नाथो जगन्नाथः, अनेनापि परार्थसम्पदमाह।

तथा **जगद्बन्धुः**, इह जगच्छब्देन सकलप्राणिगणपरिग्रहः, प्राणिन एवाधिकृत्य बन्धुत्वोपपत्तेः, ततश्च जगतः-सकलप्राणिसमुदायरूपस्याव्यापादनोपदेशप्रणयनेन सुखस्थापकत्वाद् बन्धुरिव बन्धु**र्जगद्बन्धुः**, सकलजगदव्यापादनोपदेशप्रणयनं च भगवतः सुप्रतीतम्। तथा चाऽऽ**चारसूत्रम्**– [१]**सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता न हंतव्वा न अज्जावेयव्वा न परिघेत्तव्वा न उवद्दवेयव्वा, एस धम्मे सुद्धे धुवे नीए सासए, समेच्च लोयं खेयन्नेहिं पवेइए** [*आचा० १।४।१।१३२] इत्यादि। एतेन संसारमोचकानां व्यापाद्योपकृतये दुःखितसत्त्वव्यापादनमुपदिशतामकुशलमार्गप्रवृत्तत्वमावेदितं द्रष्टव्यम्। यतस्ते एवमाहुः–

यत् परिणामसुन्दरं तद् आपातकटुकमपि परेषामाधेयम्, यथा रोगोपशमनमौषधम्, परिणाम[२]सुन्दरं च दुःखितसत्त्वानां व्यापादनमिति।

तथाहि– कृमि-कीट-पतङ्ग-मशक-लावक-चटक-कुष्ठि-महादरिद्रा-ऽन्ध-पङ्ग्वादयो दुःखितजन्तवः पापकर्मोदयवशात् संसारसागरमभिप्लवन्ते ततस्तेऽवश्यं तत्पापक्षपणाय परोपकारकरणैकरसिकमानसेन व्यापादनीयाः, तेषां हि व्यापाद[३]ने

---

१. सर्वे प्राणाः सर्वे भूताः सर्वे जीवाः सर्वे सत्त्वा न हन्तव्या नाज्ञापयितव्या न परिग्रहीतव्या नोपद्रोतव्याः [यद्वा नापद्रावयितव्याः] एष धर्मः शुद्धो ध्रुवो नित्यः शाश्वतः, समेत्य लोकं खेदज्ञैः प्रवेदितः॥ २. °**मसुखं च** जे१,२ मां०॥ ३. °**दने दुःख**° जे१,२, मांमू०॥

महादुःखमतीवोपजायते, तीव्रदुःखवेदनाभिभववशाच्च प्राग्बद्धं पापकर्म उदीर्योदीर्यानुभवन्तः[1] प्रतिक्षिपन्ति। स्यादेतत्– किमत्र प्रमाणं यत् ते व्यापाद्यमानाः तीव्रवेदनानुभवतः प्राग्बद्धं पापकर्मोदीर्योदीर्य परिक्षिपन्ति न पुनरार्त्त-रौद्रध्यानोपगमतः प्रभूततरं पापमावर्जयन्तीति[2] ?, उच्यते-युष्मत्सिद्धान्तानुगतमेव नारकस्वरूपोपदर्शकं वचः। तथाहि– नारका निरन्तरं परमाधार्मिकसुरैः ताडन-भेदनोत्कर्त्तन- शूल्यारोपणाद्यनेकप्रकारमुपहन्यमानाः परमाधार्मिकसुराभावे परस्परोदीरिततीव्रवेदना रौद्रध्यानोपगता अपि प्राग्बद्धमेव कर्म क्षपयन्ति, नापूर्वं पापमधिकतरमुपार्जयन्ति, नारकायुर्बन्धासम्भवात्, तदसम्भवश्चानन्तरं भूयः तत्रैवोत्पादाभावात्। अपि च, यत एव रौद्रध्यानोपगता अत एव तेषां प्रभूततरप्राग्बद्धपापकर्मपरिक्षयः, तीव्रसङ्क्लेशभावात्, न खलु तीव्रसङ्क्लेशाभावे परमाधार्मिकसुरा अपि तेषां कर्म क्षपयितुं शक्ताः, ततो रौद्रादिध्यानमुपजनयन्तोऽपि व्यापादका व्यापाद्यानामुपकारका एव, इत्थं च व्यापादनतः तेषामुपकारसम्भवे ये तद्व्यापादनमुपेक्षन्ते प्रतिषेधन्ति वा ते महापापकारिणः। ये पुनः प्रागुपात्तपुण्यकर्मोदयवशतः सुखासिकामनुभवन्तोऽवतिष्ठन्ते न ते व्यापादनीयाः, तेषां व्यापादने सुखानुभववियोगभावतोऽपकारसम्भवात्, न च परहितनिरताः परापकृतये संरम्भमातन्वते।

तदेतदयुक्तम्, परोपकारो हि स एव सुधिया विधेयो य आत्मन उपकारकः, न च परेषां व्यापादनेनोपकृतिकरणे भवतः कमप्युपकारमीक्षामहे। तथाहि–परेषां व्यापादने को भवतः उपकारः ?, किं पुण्यबन्धः ? उत कर्मक्षयः ?। तत्र न तावत् पुण्यबन्धः, परेषामन्तरायकरणात्–ते हि परे यदि भवता न व्यापाद्येरंस्ततः तेऽपरान् सत्त्वान् व्यापाद्य पुण्यमुपार्जयेयुः, व्यापादिताश्च परवधे अशक्ता इति व्यापादनं पुण्योपार्जनान्तरायकरणम्; न च पुण्योपार्जनान्तरायकृत् पुण्यमुपार्जयति, विरोधात्, सर्वस्य पुण्यबन्धप्रसक्तेश्च। एतेन यदुक्तम्[3]– 'परिणामसुन्दरं च दुःखितसत्त्वानां व्यापादनम्' इति तदसिद्धं द्रष्टव्यम्, पुण्योपार्जनान्तरायकरणेन परिणामसुन्दरत्वायोगात्।

अथ कर्मक्षय इति पक्षः, ननु तत् कर्म किं सहेतुकम् ? उताहेतुकम् ?, सहेतुकमपि

---

१. °**भवतः** जे१ खं० विना॥ २. **पापमर्ज**° खंसं० **पापकर्मावर्ज**° जेसं०॥ ३. पृ०२२ पं०१९ ॥

किमज्ञानहेतुकम् ? उताहिंसाजन्यम् ? उताहो वधजन्यम् ?। तत्र न तावदज्ञानहेतुकम्, अज्ञानहेतुकतायां हिंसातो निवृत्त्यसम्भवात्, यो हि यन्निमित्तो दोषः स तत्प्रतिपक्षस्यैवाऽऽसेवायां निवर्त्तते, यथा हिमजनितं शीतमनलासेवने, न चाज्ञानस्य हिंसा प्रतिपक्षभूता, किन्तु सम्यग्ज्ञानम्, तत् कथमज्ञानहेतुकं कर्म हिंसातो विनिवर्त्तते ?।

अथाहिंसाजन्यमिति वदेत् तदपि न युक्तम्, एवं सति मुक्तानामपि कर्मबन्धप्रसक्तेः, तेषामहिंसकत्वात्। अथ हिंसाजन्यम्, यद्येवं तर्हि कथं हिंसात एव तस्य निवृत्तिः, न हि यत एव यस्य प्रादुर्भावः तत एव तस्य निवृत्तिर्भवितुमर्हति, विरोधात्, न खल्वजीर्णप्रभवो रोगो मुहुरजीर्णकरणाद् विनिवर्त्तते, ततः प्राणिहिंसोत्पादितकर्म-निवृत्त्यर्थमवश्यमहिंसाऽऽसेवनीया। उक्तं च–

तम्हा[१] पाणिवहोवज्जियस्य कम्मस्स खवणहेऊओ।
वहविरई कायव्वा, संवररूव त्ति नियमेण॥१॥ [ ]

अथाहेतुकं न तर्हि तदस्ति, खरविषाणवत्, तत् कथं तदपगमाय प्राणिवधोद्यमो भवतः ?। अथाहेतुकमप्यस्ति यथाऽऽकाशम्, तर्ह्याकाशस्येव तस्यापि न कथञ्चन विनाश इत्यफलत्वाद् न कार्यः प्राणिवधः।

यदप्युक्तम्[२]–'ये तु प्रागुपात्तपुण्यकर्मवशतः सुखासिकामनुभवन्तोऽवतिष्ठन्ते न ते व्यापादनीयाः' इत्यादि, तदप्ययुक्तम्, यतः **पुण्य-पापक्षयान्मुक्तिः** [ ], ततो यथा परेषां पापक्षपणाय व्यापादने भवतः प्रवृत्तिः तथा पुण्यक्षपणायापि भवतु[३]। अथ पापं दुःखानुभवफलं ततो व्यापादनेन दुःखोत्पादनतः पापं क्षपयितुं शक्यम्, पुण्यं तु सातानुभवफलं ततस्तत् कथं दुःखोत्पादनेन क्षपयितुं शक्यम् ?, सातानुभवफलं हि कर्म सातानुभवोत्पादनेनैव क्षपयितुं शक्यम्, नान्यथा, तदपि न समीचीनम्, यतो यत् पुण्यं विशिष्टदेवभववेदनीयं तन्मनुष्यादिभवव्यापादनेन प्रत्यासन्नीक्रियते, प्रत्यासन्नीकृतं च प्रायः स्वल्पकालवेद्यं भवति, तत एवं पुण्यक्षपणस्यापि सम्भवात् कथं न व्यापादनेन पुण्यपरिक्षयः ?, अथ व्यापादनानन्तरं विशिष्टदेवभववेदनीयपुण्योदयः[४] सन्दिग्धः,

---

१. तस्मात् प्राणिवधोपार्जितस्य कर्मणः क्षपणहेतुतः। वधविरतिः कर्त्तव्या संवररूपा इति नियमेन॥ २. पृ०२३ पं०१२॥ ३. **भवति** पा० मांसं० विना॥ ४. **विशिष्टभववे°** पा० मांसं० विना॥

कस्यचित् पापोदयस्यापि सम्भवात्, ततो न व्यापादनं पुण्यमनुभवतः कर्त्तुमुचितम्, यद्येवमितरत्र कथं निश्चयः ?, इतरत्रापि हि संदेह एव, तथाविधदुःखितोऽपि यदि मार्यते तर्हि नरकदुःखानुभवभागी भवति, अमारितश्च सन् कदाचनापि प्रभूतसत्त्वव्यापादनेन पुण्यमुपार्ज्य विशिष्टदेवादिभवसुखभागी भवेत्, ततो दुःखितानामपि व्यापादनं न भवतो युक्तम्, एवं च सति सन्दिग्धानैकान्तिकोऽपि हेतुः, व्यापादनस्य परिणामसुन्दरत्वसन्देहात्। 5

यदप्युक्तम्[1]- 'युष्मत्सिद्धान्तानुगतं नारकस्वरूपोपदर्शकं वचः' इत्यादि, तदप्यसमीक्षिताभिधानम्, सम्यगस्मत्सिद्धान्तापरिज्ञानात्, अस्मत्सिद्धान्ते ह्येवं नारकस्वरूपव्यावर्णना— नारकाणां परमाधार्मिकसुरोदीरितदुःखानां परस्परोदीरितदुःखानां वा वेदनातिशयभावतः सम्मोहमुपागतानां नातीव परत्र[2] सङ्क्लेशो यथाऽत्रैव केषाञ्चिन्मानवानां सम्मूढानाम्, तथाहि— मानवा लकुटादिप्रहारजर्जरीकृतशिरःप्रभृत्यवयवा 10 वेदनातिशयभावतः सम्मूढचेतना नातीव परत्र सङ्क्लिश्यमाना उपलभ्यन्ते तथा नारका अपि सदैव द्रष्टव्याः, ततः तथाविधतीव्रसङ्क्लेशाभावाद् नारकाणां नाभिनवप्रभूततरपापोपचयः। यद्येवं तर्हि सम्मोहो महोपकारी, तथाहि—सम्मोहवशान्न परत्रातीव सङ्क्लेशः, तीव्रवेदनाभावतश्च प्राग्बद्धपापकर्मपरिक्षयः, सम्मोहश्च हिंस्रव्यापारादुपजायते, ततो हिंसका महोपकारिण इति सिद्धमस्मत्समीहितम्, तदयुक्तम्, 15 हिंसकानां परपीडोत्पादनतः क्लिष्टकर्मबन्धप्रसक्तेः, न खलु पापस्य परपीडामतिरिच्यान्यद् निबन्धनमीक्षामहे, यदि स्यात् तर्हि मुक्तानामपि पापबन्धप्रसङ्गः, तेषामहिंसकत्वात्, ततः कथमिव सचेतनो मनसाऽपि परं व्यापादयितुमुत्सहते ? इत्यलं पापचेतोभिः सह प्रसङ्गेन॥

तथा '**जयति जगत्पितामहः**' इति, [ग्रन्थाग्रम् ५३७] इह जगच्छब्देन 20 सकलसत्त्वपरिग्रहः, ततश्च **जगतां** सकलसत्त्वानां नरकादिकुगतिविनिपात-भयापायरक्षणात् पितेव **पिता**, सम्यग्दर्शन[3]मूलो मूलोत्तरगुणसंहतिस्वरूपो धर्मः, स हि दुर्गतौ प्रपततो जन्तून् रक्षति शुभे च निःश्रेयसादौ स्थाने स्थापयति। तथा चोक्तं **निरुक्तशास्त्रवेदिभिः**—

---

१. पृ०२३ पं०४ ॥ २. परस्मिन् विषये खंटि०। **अन्यत्र मारके** जेटि०॥ ३. °**मूलमूलो**° पा० डे० सं०॥

दुर्गतिप्रसृतान् जन्तून् यस्माद् धारयते ततः।
धत्ते चैतान् शुभे स्थाने तस्माद् धर्म इति स्मृतः॥१॥ [ ]

ततः सकलस्यापि प्राणिगणस्य पितृतुल्यः, तस्यापि च पिता भगवान्, अर्थतस्तेन प्रणीतत्वात्, ततो भगवान् **जगत्पितामहः**। **जयती**ति पुनः क्रियाभिधानं स्तवाधिकाराददुष्टम्।

उक्तं च–

[1]**सज्झाय-झाण-तव-ओसहेसु उवएस-थुइ-पयाणेसु।**
संतगुणकित्तणासु य न होंति पुणरुत्तदोसा उ॥१॥ [ ]

अनेनापि परार्थसम्पदमाह। '**भगवान्**' इति भगः-समग्रैश्वर्यादिलक्षणः, आह च–

ऐश्वर्यस्य समग्रस्य रूपस्य यशसः श्रियः।
धर्मस्याथ प्रयत्नस्य षण्णां भग इतीङ्गना॥१॥ [ ]

भगोऽस्यास्तीति भगवान्, अनेन स्व-परार्थसम्पदमाह, स्व-[2]परोपकारित्वादैश्वर्यादेः॥१॥

तदेवमनादिमन्तोऽनन्तास्तीर्थकृत इति ज्ञापनार्थं सामान्यतस्तीर्थकृन्नमस्कारमभिधाय साम्प्रतं सकलसांसारिकदुःखाऽऽतङ्कसमुच्छेदाप्रतिहतशक्तिपरमौषधकल्पप्रवचनप्रतिपादकतयाऽऽसन्नोपकारित्वाद् वर्त्तमानतीर्थाधिपतेर्भगव**द्वर्द्धमान**स्वामिनो नमस्कारमभिधित्सुराह–

जयइ सुयाणं पभवो, तित्थयराणं अपच्छिमो जयइ।
जयइ गुरू लोगाणं, जयइ महप्पा महावीरो॥२॥

[3]**जयई**त्यादि। **जयती**ति पूर्ववत्। **श्रुतानां** स्वदर्शन-परदर्शनानुगतसकलशास्त्राणां प्रभवन्ति सर्वाणि शास्त्राण्यस्मादिति **प्रभवः** प्रथममुत्पत्तिकारणम्, तदुपदिष्टमर्थमुपजीव्य सर्वेषां शास्त्राणां प्रवर्त्तनात्। परदर्शनशास्त्रेष्वपि हि यः कश्चित् समीचीनोऽर्थः संसारासारता-स्वर्गा-ऽपवर्गादिहेतु[4]प्राण्यहिंसादिरूपः स भगवत्प्रणीतशास्त्रेभ्य एव समुद्धृतो वेदितव्यः। न खल्वतीन्द्रियार्थपरिज्ञानमन्तरेणातीन्द्रियः प्रमाणाबाधितोऽर्थः पुरुषमात्रेणोपदेष्टुं शक्यते, अविषयत्वात्। न चातीन्द्रियार्थपरिज्ञानं परतीर्थिका-

१. स्वाध्याय-ध्यान-तप-औषधेषु उपदेश-स्तुति-प्रदानेषु। सद्गुणकीर्तनासु च न भवन्ति पुनरुक्तदोषास्तु॥
२. °**परार्थकारि**° जे१,२, मांमू०॥ ३. **जय इत्यादि** पा० विना ॥ ४. °**हेतुः प्राण्य**° जे१ ॥

नामस्तीत्येतदग्रे वक्ष्यामः। ततस्ते भगवत्प्रणीतशास्त्रेभ्यो मौलं समीचीनमर्थलेशमुपादाय पश्चादभिनिवेशवशतः स्वमत्यनुसारेण तास्ताः स्वप्रक्रियाः प्रपञ्चितवन्तः। उक्तं च **स्तुतिकारेण**–

सुनिश्चितं नः परतन्त्रयुक्तिषु स्फुरन्ति याः काश्चन सूक्तिसम्पदः।
तवैव ताः पूर्वमहार्णवोत्थिताः जगत्प्रमाणं जिन ! वाक्यविप्रुषः॥१॥ 5

[सिद्ध० द्वा० १ का० ३०]

शाकटायनोऽपि यापनीययतिग्रामाग्रणीः स्वोपज्ञशब्दानुशासनवृत्तावादौ भगवतः स्तुतिमेवमाह–

श्रीवीरममृतं ज्योतिर्नत्वाऽऽदिं सर्ववेदसाम्। [**शाकटायनव्या० पृ० १**]

अत्र च **न्यासकृतो** व्याख्या- **'सर्ववेदसां' सर्वज्ञानानां स्व-परदर्शनसम्बन्धि-** 10 **सकलशास्त्रानुगतपरिज्ञानानाम् 'आदिं' प्रभवं प्रथममुत्पत्तिकारणम्** [ ] इति।

अत एव चेह **श्रुतानामित्यत्र** बहुवचनम्, अन्यथैकवचनमेव प्रयुज्यते, प्रायः श्रुतशब्दस्य केवलद्वादशाङ्गमात्रवाचिनः सर्वत्रापि सिद्धान्ते एकवचनान्ततया प्रयोगदर्शनात्। सर्वश्रुतकारणत्वेन च भगवतः स्तुतिप्रतिपादने इदमप्यावेदितं द्रष्टव्यम्– सर्वाण्यपि श्रुतानि पौरुषेयाण्येव, न किमप्यपौरुषेयमस्ति, असम्भवात्। तथाहि– 15

शास्त्रं वचनात्मकम्, वचनं च तालोष्ठपुटपरिस्पन्दादिरूपपुरुषव्यापारान्वय-व्यतिरेकानुविधायि, ततस्तदभावे कथं भवति ?, न खलु पुरुषव्यापारमन्तरेण वचनमाकाशे ध्वनदुपलभ्यते। अपि च, तदपौरुषेयं वचनमकारणत्वान्नित्यमभ्युपगम्यते, **सदकारणवन्नित्यम्**। [**वैशे० ४।१।१**] इति वचनप्रामाण्यात्। ततश्चात्र विकल्प-युगलमवतेतीर्यते– तदपौरुषेयं वचः किमुपलभ्यस्वभावम् ? उतानुपलभ्यस्वभावम् ?। 20 तत्र यद्यनुपलभ्यस्वभावं तर्हि तस्य नित्यत्वेनाभ्युपगमात् कदाचिदपि स्वभावाप्रच्युतेः सर्वदैवोपलम्भाभावप्रसङ्गः। अथोपलभ्यस्वभावं तर्हि सर्वदाऽनुपरमेनोपलभ्येत[२], अन्यथा तत्स्वभावताहानिप्रसङ्गात्।

---

१. "श्री**वीर**ममृतं ज्योतिर्नत्वाऽऽदिं सर्ववेदनम्। शब्दानुशासनस्येय**ममोघा** वृत्तिरुच्यते ॥" इति शाकटायन-स्वोपज्ञशब्दानुशासनवृत्तौ प्रारम्भे एव संपूर्णः मङ्गलश्लोकः॥ २. °**लभ्यते** पासं० विना॥

अथोपलभ्यस्वभावमपि सहकारिप्रत्ययमपेक्ष्योपलम्भमुपजनयति तेन न सर्वदोपलम्भप्रसङ्गः, तदयुक्तम्, एकान्तनित्यस्य सहकार्यपेक्षाया अयोगात्, यतो[१] विशेषप्रतिलम्भलक्षणा हि तस्य तत्रापेक्षा। यदाह **धर्मकीर्त्तिः**– **अपेक्षाया विशेषप्रतिलम्भलक्षणत्वाद्** [ ] इति। न च नित्यस्य विशेषप्रतिलम्भोऽस्ति, अनित्यत्वापत्तेः, तथाहि– स विशेषप्रतिलम्भः तस्याऽऽत्मभूतः, ततो विशेषे जायमाने स एव पदार्थः तेन रूपेण जातो भवति, प्राक्तनं त्वविशिष्टावस्थालक्षणं रूपं विनष्टमित्यनित्यत्वापत्तिः। अथोच्येत– स विशेषप्रतिलम्भो न तस्याऽऽत्मभूतः किन्तु व्यतिरिक्तस्ततः कथमनित्यत्वापत्तिः ?, यद्येवं तर्हि कथं स तस्य सहकारी ?, न हि तेन सहकारिणा तस्य वचनस्य किमप्युपक्रियते, भिन्नविशेषकरणात्।

अथ भिन्नोऽपि विशेषः तस्य सम्बन्धी तेन तत्सम्बन्धिविशेषकरणात् तस्याप्युपकारी द्रष्टव्य इति सहकारी व्यपदिश्यते। ननु विशेषेणापि सह तस्य वचनस्य कः सम्बन्धः?। न तावत् तादात्म्यम्, भिन्नत्वेनाभ्युपगमात्। नापि तदुत्पत्तिः, विकल्पद्वयानतिक्रमात्। तथाहि– किं वचनेन विशेषो जन्यते ? उत विशेषेण वचनम् ?। तत्र न तावदाद्यः पक्षः, विशेषस्य सहकारिणोऽभावात्। नापि द्वितीयः, वचनस्य नित्यतया कर्त्तुमशक्यत्वात्।

अथ मा भूद् वचन-विशेषयोर्जन्य-जनकभावः, आधारा-ऽऽधेयभावो भविष्यति, तदप्यसमीचीनम्, आधारा-ऽऽधेयभावस्यापि परस्परोपकार्योपकारकभावापेक्षत्वात्। तथाहि– बदरं पतनधर्मकं सत् कुण्डेन स्वानन्तरदेशस्थायितया परिणामि जन्यते, ततस्तयोराधारा-ऽऽधेयभाव उपपद्यते; वचनेन तु न विशेषो जन्यते, तस्यान्यतो भावात्, ततः कथमनयोराधारा-ऽऽधेयभावः ?। अथ तेन विशेषेण वचनस्योपकारः कश्चित् क्रियते ततः स तस्य सम्बन्धी, ननु स उपकारः ततो भिन्नोऽभिन्नो वा ? इत्यादि तदेवाऽऽवर्त्तते इत्यनवस्था।

अपि च, कुतः प्रमाणाद् वचनस्यापौरुषेयत्वाभ्युपगमः ?। कर्त्तुरस्मरणादिति चेत्, न, तस्यासिद्धत्वात्। तथाहि– स्मरन्ति जिनप्रणीतागमतत्त्ववेदिनो वेदस्य कर्तॄन्

१. **ततो** खं० विना॥

पिप्पलादप्रभृतीन्। स कर्तृस्मरणवादः तेषां मिथ्यारूप इति चेत्, क इदानीमेवं सति पौरुषेयः ?, सर्वस्याप्यपौरुषेयत्वप्रसक्तेः। तथाहि– **कालिदासा**दयोऽपि **कुमारसम्भवा**दिष्वात्मानमन्यं वा प्रणेतारमुपदिशन्त एवं प्रतिक्षेप्तुं शक्यन्ते-मिथ्या त्वमात्मानमन्यं वा **कुमारसम्भवा**दिषु प्रणेतारमुपदिशसीति। ततः **कुमारसम्भवा**दयोऽपि ग्रन्थाः सर्वेऽप्यपौरुषेयाः भवेयुः, तथा च कः प्रतिविशेषो वेदे ? येन स एव प्रमाणतयाऽभ्युपगम्यते न शेषागमाः।

अपि च, यौष्माकीणैरपि पूर्वमहर्षिभिः सकर्तृकत्वं वेदस्याभ्युपगतमेव। तथा च तद्ग्रन्थः– [1]**ऋग्गिरावृचश्चक्रुः, सामानि सामगिरौ** [ ] इति। अथ तत्र करोतिः स्मरणे वर्त्तते न निष्पादने, दृष्टश्च करोतिरर्थान्तरेऽपि वर्त्तमानः, यथा संस्कारे, तथा च लोके वक्तारः-पृष्ठं मे कुरु पादौ मे कुर्विति, अत्र हि संस्कारे एव करोतिर्वर्तते, नापूर्वनिर्वर्त्तनं सम्भवति, अशक्यक्रियत्वात्, ततोऽन्यथानुपपत्त्या संस्कारे एव करोतिर्वर्त्त्यते, वेदविषये तु नान्यथाऽनुपपन्नत्वं किमपि निबन्धनमस्ति ततः कथं तत्र स्मरणे वर्त्तयितुं शक्यते ?।

स्यादेतद्, यदि वेदविषये करोतिः स्मरणे न वर्त्त्येत तर्हि वेदस्य प्रामाण्यं न स्यात्, अथ च प्रामाण्यमभ्युपगम्यते, तच्चापौरुषेयत्वादेव, अन्यथा सर्वागमानामपि प्रामाण्यप्रसक्तेः, ततोऽत्रापि करोतिः प्रामाण्यान्यथानुपपत्त्या स्मरणे वर्त्यत इति, तदेतदसत्, इतरेतराश्रयदोषप्रसङ्गात्। तथाहि– प्रामाण्ये सिद्धे सति तदन्यथानुपपत्त्या करोतेः स्मरणे वर्त्तनम्, करोतेः स्मरणे वृत्तौ चापौरुषेयत्वसिद्धितः प्रामाण्यमित्येकासिद्धावन्यतरासिद्धिः। अनैकान्तिकं च कर्त्तुरस्मरणम्, **वटे वटे वैश्रवणः** इत्यादिशब्दानां पौरुषेयाणामपि कर्त्तुरस्मृतेः। यत्नवान् तत्कर्त्तारमुपलभते एवेति चेत्, न, अवश्यं तदुपलम्भसम्भवनियमाभावात्।

किञ्च, अपौरुषेयत्वेनाभ्युपगतस्य वेदस्य कर्त्ता नैवास्ति कश्चित् पौरुषेयत्वेनाभ्युपगतस्य च **वटे वटे वैश्रवणः** इत्यादेरस्तीति न प्रमाणात् कुतश्चिद् विनिश्चयः, किन्तु परोपदेशात्, स च भवतो न प्रमाणम्, परस्य रागादिपरीतत्वेन यथावद्वस्तुतत्त्वापरिज्ञानात्, ततः कर्त्रभावसन्देह इति सन्दिग्धासिद्धोऽप्ययं हेतुः।

---

१. **ऋषिगिरावृचयश्चक्रुः** सं०। **ऋग्गिरोऽत्रयश्चक्रुः** जे१। खं० आदर्शे उद्देहिकया पाठो भक्षितः॥ २. °**र्वर्तते** सं० मु०॥

एतेन यदन्यदपि साधनमवादीद् वेदवादी-'वेदाध्ययनं सर्वं गुर्वध्ययनपूर्वकम्, वेदाध्ययनत्वात्, अधुनातनवेदाध्ययनवत्' इति, तदपि निरस्तमवसेयम्, एवमपौरुषेयत्वसाधने सर्वस्याप्यपौरुषेयत्वप्रसक्तेः। तथाहि– **कुमारसम्भवा**ध्ययनं सर्वं गुर्वध्ययनपूर्वकम्, कुमारसम्भवाध्ययनत्वाद् इदानीन्तनकुमारसम्भवाध्ययनवदिति कुमारसम्भवादीनामप्यनादितासिद्धेरपौरुषेयत्वं दुर्निवारम्, न च तेषामपौरुषेयत्वम्, स्वयङ्करणपूर्वकत्वेनापि तदध्ययनस्य भावात्; एवं वेदाध्ययनमपि किञ्चित् स्वयङ्करणपूर्वकमपि भविष्यतीति वेदाध्ययनत्वादिति व्यभिचारी हेतुः।

स्यादेतत्, वेदाध्ययनं स्वयङ्करणपूर्वकं न भवति, वेदानां स्वयं कर्त्तुमशक्तेः, तथा चात्र प्रयोगः–पूर्वेषां वेदरचनायामशक्तिः, पुरुषत्वात्, इदानीन्तनपुरुषवदिति, तदप्ययुक्तम्, अत्रापि हेतोर्व्यभिचारात्, तथाहि– **भारता**दिष्विदानीन्तनपुरुषाणामशक्तावपि कस्यचित् पुरुषस्य **व्यासादे**ः शक्तिः श्रूयते, एवं वेदविषयेऽपि सम्प्रति पुरुषाणां कर्त्तुमशक्तावपि कस्यचित् प्राक्तनस्य पुरुषविशेषस्य शक्तिर्भविष्यतीति।

अपि च, यथाऽग्निसामान्यस्य ज्वालाप्रभवत्वमरणिनिर्मथनप्रभवत्वं च परस्परमबाध्य-बाधकत्वान्न विरुध्यते, को ह्यत्र विरोधः ? अग्निः स्यात् कदाचिदरणिनिर्मथनपूर्वकः कदाचिज्ज्वालान्तरपूर्वकश्च। ततो यथाऽऽद्योऽपि पथिककृतोऽग्निः ज्वालान्तरपूर्वको नारणिनिर्मथनपूर्वकः, पथिकाग्नित्वात्, आद्यानन्तराग्निवदित्ययं हेतुर्व्यभिचारी, विपक्षे वृत्तिसम्भवात्, तथा वेदाध्ययनमपि विपक्षे वृत्तिसम्भवाद् व्यभिचार्येव। तथाहि– वेदाध्ययने स्वयङ्करणपूर्वकत्वमध्ययनान्तरपूर्वकत्वं च परस्परमबाध्य-बाधकत्वादविरुद्धम्, ततश्च वेदाध्ययनमपि स्यात् किञ्चित् स्वयङ्करणपूर्वकमपीति। यदा त्वेवं विशिष्यते– यस्तु तथाविधः स्वंय कृत्वाऽध्येतुमसमर्थस्तस्य वेदाध्ययनमध्ययनान्तरपूर्वकमिति, तदा न कश्चिद्दोषः, यथा यादृशोऽग्निर्ज्वालाप्रभवो दृष्टस्तादृशः सर्वोऽपि ज्वालाप्रभव इति।

अस्तु वा सर्वं वेदाध्ययनमध्ययनान्तरपूर्वकम्, तथाऽप्येवमनादिता सिद्ध्येद् वेदस्य,

---

१. °**मध्ययनानादिता**° पासं० डे० सं० पु०। °**मप्ययनादिता**° खंमू०, °**मप्यनादिता**° खंसं०। °**मध्ययनादिता**° पामू०॥

नापौरुषेयत्वम्। अथात एवानादितामात्रादपौरुषेयत्वसिद्धिरिष्यते तर्हि डिम्भकपांशुक्रीडादेरपि पुरुषव्यवहारस्यापौरुषेयतापत्तिः, तस्यापि पूर्वपूर्वदर्शन-प्रवृत्तत्वेनानादित्वात्। [१]अपि च– स्युरपौरुषेया वेदा यदि पुरुषाणामादिः स्याद् वेदाध्ययनं चानादि, तदाप्याद्यपुरुषस्याध्ययनमध्ययनान्तरपूर्वकं न सिध्यति, अध्यापयितुरभावात्, न च पुरुषस्य ताल्वादिकरणग्रामव्यापाराभावात् स्वयं शब्दा ध्वनन्ति, ततो वेदस्य प्रथमोऽध्येता कर्त्तैव वेदितव्यः।

अपि च– यद् वस्तु यद्धेतुकमन्वय-व्यतिरेकाभ्यां प्रसिद्धं तज्जातीयमन्यदप्य-दृष्टहेतुकं ततो हेतोर्भवतीति सम्प्रतीयते, यथेन्धनादेको वह्निर्दृष्टः ततस्तत्समान-स्वभावोऽपरोऽप्यदृष्टहेतुकस्तत्समानहेतुकः सम्प्रतीयते; लौकिकेन च शब्देन समानधर्मा सर्वोऽपि वैदिकः शब्दराशिः, ततो लौकिकवद् वैदिकोऽपि शब्दराशिः पौरुषेयः सम्प्रतीयताम्।

स्यादेतद्– वैदिकेषु शब्देषु यद्यपि न पुरुषो हेतुः तथापि पौरुषेयाभिमतशब्दसमाना विशिष्टपद-वाक्यरचना भविष्यति, ततः कथं तत्समानधर्मतामवलोक्य पुरुषहेतुकता तेषामनुमीयते ?, तदेतद् बालिशजल्पितम्, पद-वाक्यरचना हि यदि हेतुमन्तरेणापीष्येत तत आकस्मिकी सा भवेत्, ततश्चाऽऽकाशादावपि सा सर्वत्र सम्भवेत्, अहेतुकस्य देशादिनियमायोगात्, न च सा सर्वत्रापि सम्भवति, तस्मात् पुरुष एव तस्या हेतुरित्यवश्यं प्रतिपत्तव्यम्।

अन्यच्च, पुरुषस्य रागादिपरीतत्वेन [२]यथावस्तुपरिज्ञानाभावात् तत्प्रणीतं वाक्यमयथार्थमपि सम्भाव्यते इति संशयहेतुः [३]पुरुषोपकीर्णः, स च संशयोऽ-पौरुषेयत्वाभ्युपगमेऽपि वेदवाक्यानां तदवस्थ एव। तथाहि–स्वयं तावत् पुरुषो वेदस्यार्थं नावबुध्यते, रागादिपरीतत्वात्, नाप्यन्यतः पुरुषान्तरात्, तस्यापि रागादिपरीतत्वेन यथातत्त्वमपरिज्ञानात्। अथ [४]**जैमनि**श्चिरतरपूर्वकालभावी पटुप्रज्ञः सम्यग् वेदार्थस्य परिज्ञाताऽऽसीत् ततः परिज्ञानमभूदिति, न हि सर्वेऽपि पुरुषाः समानप्रज्ञा-मेधादिगुणा

---

१. **अपि स्युर**° खं० जे१,२, मांमू० ॥ २. **यथावद्वस्तु**° पा० मांसं०॥ ३. **पुरुषोऽप**° जेसं० ॥ ४. सर्वेष्वपि **नन्दीसूत्रटीका**दर्शेषु क्वचिद् **जैमनि** क्वचिच्च **जैमिनि** इति नामोल्लेख आवृत्त्या दृश्यते॥

इति वक्तुं शक्यम्, सम्प्रत्यपि प्रतिपुरुषं प्रज्ञादेस्तारतम्यस्य दर्शनात्। ननु स **जैमनिः** पुरुषो वेदस्यार्थं यथावस्थितमवगच्छति स्मेति कुतो निश्चयः ?। प्रमाणेन संवादादिति चेत्, नन्वतीन्द्रियेष्वर्थेषु न प्रमाणस्यावतारः, यथा अग्निहोत्रहवनस्य स्वर्गसाधनत्वे, बहवश्चातीन्द्रिया अर्था वेदे व्यावर्ण्यन्ते तत् कथं तत्र संवादः ?। अथ येष्वर्थेष्वस्मादृशां प्रमाणसम्भवः तद्विषये प्रमाणसंवाददर्शनादतीन्द्रियाणामप्यर्थानां [१]स सम्यक् परिज्ञाताऽभ्युपगम्यते, तदयुक्तम्, रागादिकलुषिततया तस्यातीन्द्रियार्थपरिज्ञानासम्भवात्, अन्यथा सर्वेषामप्यतीन्द्रियार्थदर्शित्वप्रसक्तिः, [२]ततस्तत्कृताऽतीन्द्रियार्थव्याख्या मिथ्यैव।

अपि च– आगमोऽर्थतः परिज्ञातः सन् प्रेक्षावतामुपयोगविषयो भवति, नापरिज्ञातार्थं शब्दगडुमात्रम्, ततोऽर्थः प्रधानम्, स चेत् पुरुषप्रणीतः किं शब्दमात्रस्यापौरुषेयत्वपरिकल्पनेन ?, निरर्थकत्वात्, तन्नान्यतोऽपि वेदार्थस्य सम्यगवगमः। नापि वेदः स्वकीयमर्थमुपदेशमन्तरेण स्वयमेव साक्षादुपदर्शयति, ततो वेदस्येष्टार्थप्रतिपत्त्युपायाभावाद् **अग्निहोत्रं जुहुयात् स्वर्गकामः** [ ] इत्यत्र **श्रुतौ** यथा [३]वेदप्रमाणिकैरयमर्थः परिकल्प्यते– घृताद्याहुतिं प्रक्षिपेत् स्वर्गकाम इति, तथाऽयमप्यर्थः तैः किं न कल्प्यते ? – खादेत् श्वमांसं स्वर्गकाम इति, नियामकाभावात्। उक्तं च–

स्वयं रागादिमान् नार्थं, वेत्ति वेदस्य नान्यतः।
न वेदयति वेदोऽपि, वेदार्थस्य कुतो गतिः ?॥१॥
तेनाग्निहोत्रं जुहुयात्, स्वर्गकाम इति श्रुतौ।
खादेच्छ्वमांसमित्येष, नार्थ इत्यत्र का प्रमा ?॥२॥ [*प्रमाणवा० ३।३१८-३१९]

अथ य एव शाब्दो व्यवहारो लोके प्रसिद्धः स एव वेदवाक्यार्थनिश्चयनिबन्धनम्, न च लोकेऽग्निहोत्रशब्दस्य श्वमांसं वाच्यम्, नापि जुहुयादित्यस्य भक्षणम्, तत् कथमयमर्थः परिकल्प्यते ?, तदयुक्तम्, नानार्था हि लोके शब्दा रूढाः, यथा गोशब्दः। अपि च सर्वे शब्दाः प्रायः सर्वार्थानां वाचकाः, देशादिभेदतो द्रुत-विलम्बितादिभेदेन तथाप्रतीतिदर्शनात्, तथाहि– **द्रमिड**स्याऽऽर्यदेशमुपागतस्य मारिशब्दाद् झटिति वर्षविषया प्रतीतिरुपजायते, विलम्बिता चोपसर्गविषया; यद्वा आर्यदेशोत्पन्नस्य **द्रमिड**देशमधिगतस्य

---

१. स पा० मांसं० विना नास्ति॥ २. ततः नास्ति खंमू० जेमू०१,२, मांमू० ॥ ३. °प्रामा° मां० ॥

शीघ्रमुपसर्गविषया प्रतीतिः विलम्बिता च वर्षविषया; एवमनया दिशा सर्वेषामपि शब्दानां सर्वार्थवाचकत्वं परिभावनीयम्। न च वाच्यम्– एवं सति घटशब्दमात्रश्रवणादखिलार्थप्रतीतिप्रसङ्गः, यथाक्षयोपशमावबोधप्रवृत्तेः[१], क्षयोपशमश्च सङ्केताद्यपेक्ष इति तदभावे न भवति। ततोऽग्निहोत्रादिशब्दस्य श्वमांसादिवाचकत्वेऽप्यविरोध इति लौकिकशाब्दव्यवहारानुसरणेऽपि न वैदिकवाक्यानामभिलषितनियतार्थप्रतिपत्तिः। 5

किञ्च– लोकप्रसिद्धेनैव शाब्देन व्यवहारेण वयं वेदवाक्यानां प्रतिनियतमर्थं निश्चेतुमुद्युक्ताः, लौकिकश्च शाब्दो व्यवहारोऽनेकधा परिप्लवमानो दृष्टः, सङ्केतवशतः प्रायः सर्वेषामपि शब्दानां सर्वार्थप्रतिपादनशक्तिसम्भवात्, ततो लौकिकेनैव शाब्देन व्यवहारेणास्माकमाशङ्कोदपादि– कोऽत्रार्थः स्यात् ?, किं घृताहुतिं प्रक्षिपेत् स्वर्गकाम इति ? उताहो श्वमांसं खादेदिति ?, तत् कथं तत एव निश्चयः कर्तुं बुध्यते ?, न 10 हि यो यत्र संशयहेतुः स तत्र निश्चयमुत्पादयितुं शक्त इति। अपि च– नैकान्तेन वेदे लौकिकशब्दव्यवहारानुसरणम्, स्वर्गोर्वश्यादिशब्दानामरूढार्थानामपि तत्र व्याख्यानात्, यथा स्वर्गः-सुखविशेषः, उर्वशी तु अरणिरिति, तथा शब्दान्तरेष्वप्यरूढार्थकल्पना किं न सम्भविनी ?। उक्तं च–

स्वर्गोर्वश्यादिशब्दश्च दृष्टोऽरूढार्थवाचकः। 15
शब्दान्तरेषु तादृक्षु तादृश्येवास्तु कल्पना॥१॥ [*प्रमाणवा० ३।३२१]

स्यादेतद्– अग्निहोत्रादेर्वाक्यस्य श्वमांसभक्षणप्रसङ्गो न युक्तः, वेदेनैवान्यत्र तस्यान्यथा व्याख्यानात्, तदयुक्तम्, तत्रापि वाक्यार्थस्य निर्णयाभावात्, यथोक्तं प्राक्, न हि अप्रसिद्धार्थस्य वाक्यस्य अप्रसिद्धार्थमेव वाक्यान्तरं नियतार्थप्रसाधनायालम्, तुल्यदोषत्वात्। अथेत्थमाचक्षीथाः-यत्रार्थे न काचित् प्रमाणबाधा सोऽर्थो ग्राह्यः, न 20 चाग्निहोत्रादिवाक्यस्य घृताद्याहुतिप्रक्षेपरूपेऽर्थे प्रमाणबाधामुत्पश्यामः, तत् कथं तमर्थं न गृह्णीमः ?, तदेतत् श्वमांसभक्षणलक्षणेऽप्यर्थे समानम्, न हि तत्रापि काश्चित् प्रमाणबाधामीक्षामहे।

अपि च– यदि प्रमाणबलात् प्रवृत्तिमीहसे तर्हि पौरुषेयमेव वचस्त्वयोपादेयम्,

---

१. °शममवबोध° जेसं०१ ॥

तस्य लोकप्रतीत्यनुसारितया सम्प्रदायतोऽधिगतार्थतया च प्रायो युक्तिविषयत्वात्, नापौरुषेयम्, विपरीततया तत्र युक्तेरसम्भवात्। तथाहि–काऽत्र युक्तिः यया श्वमांसभक्षणात् स्वर्गप्राप्तिर्बाध्यते, न घृताद्याहुतिप्रक्षेपादिति ?, घृताद्याहुतिप्रक्षेपादीनां स्वर्गप्रापणादिशक्तेरतीन्द्रियत्वेन प्रत्यक्षाद्यगोचरत्वात्, सम्प्रदायस्य चार्थनैयत्यकारिणोऽसम्भवात्, एतच्चानन्तरमेव[१] वक्ष्यामः।

अथाऽऽगमार्थाश्रया युक्तिः श्वमांसभक्षणतः स्वर्गप्राप्तेर्बाधिका भविष्यति, तदयुक्तम्, आगमार्थस्याद्याप्यनिश्चयाद् अनिश्चितार्थस्य च बाधकत्वायोगात्। अथ सम्प्रदायादर्थनिश्चयो भविष्यति, तथाहि– प्रथमतो वेदेन **जैमनये** स्वार्थ उपदर्शितः, पश्चात् तेनास्मभ्यमुपदिष्ट इति, तदप्यसत्, वेदस्य हि यदि स्वार्थोपदर्शनशक्तिः ततोऽस्मभ्यमपि स्वार्थं किं नोपदर्शयति ?, तस्माज्**जैमनये**ऽपि न तेन स्वार्थो दर्शितः, किन्तु स वेदमुखेनाऽऽत्मानमेवार्थनियमस्रष्टारमुपदर्शितवान्। यथा कश्चित् केनचित् पृष्टः-को मार्गः **पाटलिपुत्रस्य** ?; स प्राह-एष स्थाणुर्दृश्यमानो वक्ति-अयं मार्गः **पाटलिपुत्र**स्य; तत्र न स्थाणोर्वचनशक्तिः, केवलं स्थाणुमुखेन स एवाऽऽत्मानं मार्गोपदेष्टारं कथयति; एवं वेदस्यापि न स्वार्थोपदर्शनशक्तिः, ततस्तन्मुखेन **जैमनि**रात्मानमेवार्थनियमस्रष्टारं[२] दर्शयति। तन्न लौकिकशब्दव्यवहारानुसरणान्नापि युक्तेर्नापि च सम्प्रदायाद् वेदस्यार्थनिश्चयः, नापि तस्यापौरुषेयत्वसाधकं किमपि प्रमाणमित्यसम्भव्यपौरुषेयम्। उक्तं च– **वान्ध्येय-खरविषाणतुल्यमपौरुषेयम्** [ ] इति।

ननु यदि वान्ध्येय-खरविषाणतुल्यमपौरुषेयं भवेत् तर्हि न वेदवचोऽपौरुषेयतया शिष्टाः प्रतिगृह्णीयुः, अथ च सर्वेष्वपि देशेषु शिष्टाः प्रतिगृह्णन्तो दृश्यन्ते, तस्मान्नासम्भवि अपौरुषेयम्। तदत्र पृच्छामः– के शिष्टाः ?, ननु किमत्र प्रष्टव्यम् ?, ये ब्राह्मणीयोनिसम्भविनो वेदोक्तविधिसंस्कृता वेदप्रणीताचारपरिपालनैकनिषण्णचेतसः ते शिष्टाः, तदेतदयुक्तम्, विचाराक्षमत्वात्। तथाहि–किमिदं नाम ब्राह्मणत्वं यद्योनिसम्भवात् शिष्टत्वं भवेत् ?, ब्रह्मणोऽपत्यत्वमिति चेत्, तथाहि–ब्रह्मणोऽपत्यं ब्राह्मण इति व्यपदिशन्ति पूर्वर्षयः, न, एवं सति चाण्डालस्यापि ब्राह्मणत्वप्रसक्तेः, तस्यापि

---

१. **एतत्त्वन**° जे१॥ २. °**मद्रष्टा**° खं० विना॥

ब्रह्मतनोरुत्पन्नत्वात्। उक्तं च–

ब्रह्मणोऽपत्यतामात्राद्, ब्राह्मण्येऽतिप्रसज्यते।

न कश्चिदब्रह्मतनोरुत्पन्नः क्वचिदिष्यते॥१॥ [**वार्तिकालं० २।श्लो०६७, पृ०११**]

यदप्युक्तम्[१]– 'वेदोक्तविधिसंस्कृता वेदप्रणीताचारपरिपालनैकनिषण्णचेतसः' इति, तदप्ययुक्तम्, इतरेतराश्रयदोषप्रसङ्गात्। तथाहि–वेदस्य प्रामाण्ये सिद्धे सति तदुक्तविधिसंस्कृताः तदर्थसमाचरणाच्छिष्टा भवेयुः, शिष्टत्वे च तेषां सिद्धे सति तत्परिग्रहाद् वेदप्रामाण्यमित्येकाभावेऽन्यतरस्याप्यभावः। आह च–

शिष्टैः[२] परिगृहीतत्वाच्चेदन्योन्यसमाश्रयः।

वेदार्थाचरणाच्छिष्टास्तदाचाराच्च स[३] प्रमा॥१॥ [**वार्तिकालं० पृ० १०**]

स्यादेतत्– भवतोऽपि तत्त्वतोऽपौरुषेयं वचनमिष्टमेव, तथाहि–सर्वोऽपि सर्वज्ञो वचनपूर्वक एवेष्यते, **तप्पुव्विया अरिहया** [**आव० नि० गा० ५६७**] इति वचनप्रामाण्यात्, ततोऽनादित्वात् सिद्धं वचनस्यापौरुषेयत्वमिति, तदयुक्तम्, अनादितायामप्य-पौरुषेयत्वायोगात्, तथाहि– सर्वज्ञपरम्पराऽप्येषाऽनादिरिष्यते, ततः पूर्वः पूर्वः सर्वज्ञः प्राक्तनसर्वज्ञप्रणीतवचनपूर्वको भवन् न विरुध्यते।

किञ्च, वचनं द्विधा–शब्दरूपमर्थरूपं च, तत्र शब्दरूपवचनापेक्षया नायमस्माकं सङ्गरः[४] यदुत 'सर्वोऽपि सर्वज्ञो वचनपूर्वकः' इति, **मरुदेव्या**दीनां तदन्तरेणापि सर्वज्ञत्वश्रुतेः, किन्त्वर्थरूपापेक्षया, ततः कथं शब्दापौरुषेयत्वाभ्युपगमप्रसङ्गः ?। नन्वर्थपरिज्ञानमपि शब्दमन्तरेण नोपपद्यते, तत् कथं न शब्दरूपापेक्षयाऽपि सङ्गरः, तदसत्, शब्दमन्तरेणापि विशिष्टक्षयोपशमादिभावतोऽर्थपरिज्ञानस्य सम्भवात्। तथाहि– दृश्यते तथाविधक्षयोपशमभावतो मार्गानुसारिबुद्धेर्वचनमन्तरेणापि तदर्थप्रतिपत्तिरिति कृतं प्रसङ्गेन॥

प्रकृतं प्रस्तुमः– तत्र सर्वश्रुतप्रभवा **ऋषभा**दयोऽप्यासीरन्, न च ते सम्प्रति स्तोतुं प्रस्तुता इति तद्व्यवच्छेदार्थं विशेषणान्तरमाह– **तीर्थकराणामपश्चिमो जयति**। तत्र

---

१. पृ०३४ पं०२१ ॥ २. अत्र **वार्तिकालङ्कारे** प्रमाणसिद्धिपरिच्छेदे ईदृशः पाठः "सर्वागमसमानत्वाद् यागाद्यर्थक्रियात्मनः। न सर्वैः करणं तस्य तुल्यं वेदे पि किन्न तत्॥५७॥ न चेदादृतता शिष्टैरित्यन्योन्यसमाश्रयः। **वेदार्थाचरणाच्छिष्टास्तदाचाराच्च स प्रमा** ॥५८॥ ३. **सा** पा०, जेमू०१, खंसं०, मांसं०॥ ४. प्रतिज्ञा खंटि०॥

जन्म-जरा-मरणसलिलसम्भृतं मिथ्यादर्शना-ऽविरतिगम्भीरं महाभीमकषायपातालं दुरवगाहमहामोहावर्त्तभीषणं राग-द्वेषपवनविक्षोभितं विविधानिष्टेष्टसंयोग-वियोगवीचीनिचयसङ्कुलम् उच्चैस्तरमनोरथसहस्रवेलाकलितं संसारसागरं तरन्ति येन तत् तीर्थम्, तच्च सकलजीवा-ऽजीवादिपदार्थसार्थप्ररूपकम् अत्यन्तानवद्यं शेषतीर्थान्तरीयाविज्ञातचरणकरणक्रियाधारं सकलत्रैलोक्यान्तर्गतविशुद्धधर्म-सम्पत्समन्वितमहापुरुषाश्रयमविसंवादि प्रवचनम्, तत्करणशीलाः तीर्थकराः, तेषां तीर्थकराणाम्। अस्मिन् **भारते** वर्षेऽधिकृतायामवसर्पिण्यां न विद्यते पश्चिमोऽस्मादित्**यपश्चिम**ः-सर्वान्तिमः, पश्चिम इति नोक्तम्, अधिक्षेपसूचकत्वात् पश्चिमशब्दस्य।

ननु सर्वोऽपि प्रेक्षावान् फलार्थी प्रवर्त्तते, अन्यथा प्रेक्षावत्ताक्षतिप्रसङ्गात्, ततोऽसौ तीर्थं कुर्वन्नवश्यं फलमपेक्षते, फलं चापेक्षमाणोऽस्मादृश इव व्यक्तमवीतरागः, तदयुक्तम्, यतस्तीर्थकरः स एव भवति यस्तीर्थकरनामकर्मोदयसमन्वितः, न हि सर्वेऽपि भगवन्तो वीतरागाः तीर्थप्रवर्त्तनाय प्रवर्त्तन्ते, तीर्थकरनामकर्मैव[१] तीर्थप्रवर्त्तनफलम्, ततो भगवान् वीतरागोऽपि तीर्थकरनामकर्मोदयतः तीर्थप्रवर्त्तनस्वभावः सवितेव प्रकाशमुपकार्योपकारानपेक्षं तीर्थं प्रवर्त्तयतीति न कश्चिद्दोषः। उक्तं च–

तीर्थप्रवर्त्तनफलं यत् प्रोक्तं कर्म तीर्थकरनाम।
तस्योदयात् कृतार्थोऽप्यर्हंस्तीर्थं प्रवर्त्तयति॥१॥
तत्स्वाभाव्यादेव प्रकाशयति भास्करो यथा लोकम्।
तीर्थप्रवर्त्तनाय प्रवर्त्तते तीर्थकर एवम्॥२॥ [*तत्त्वार्थकारिका ९-१०]

ननु तीर्थप्रवर्त्तनं नाम प्रवचनार्थप्रतिपादनम्, प्रवचनार्थं चेद् भगवान् प्रतिपादयति तर्हि नियमादसर्वज्ञः, सर्वस्यापि वक्तुरसर्वज्ञतयोपलम्भात्, तथाचात्र प्रयोगः–विवक्षितः पुरुषः सर्वज्ञो न भवति, वक्तृत्वात्, रथ्यापुरुषवदिति, तदसत्, सन्दिग्धव्यतिरेकतया हेतोरनैकान्तिकत्वात्। तथाहि– न वचनं सर्ववेदनेन सह विरुध्यते, अतीन्द्रियेण सह विरोधानिश्चयात्, [ग्रन्थाग्रं शत[२] ६७५] द्विविधो हि विरोधः–परस्परपरिहारलक्षणः

१. °**कर्म च तीर्थ**° खं० पा० ॥ २. ७७५ पा० ॥

सहानवस्थानलक्षणश्च। तत्र परस्परपरिहारलक्षणः तादात्म्यप्रतिषेधे, यथा घट-पटयोः, न खलु घटः पटात्मको भवति नापि पटो घटात्मकः, **न सत्ता सदन्तरमुपैति** [ ] इति वचनात्, ततोऽनयोः परस्परपरिहारलक्षणो विरोधः, एवं सर्वेषामपि वस्तूनां भावनीयम्, अन्यथा वस्तुसाङ्कर्यप्रसक्तेः। यस्तु सहानवस्थानलक्षणो विरोधः स परस्परं बाध्य-बाधकभावसिद्धौ सिध्यति, नान्यथा, यथा वह्नि-शीतयोः, तथाहि–विवक्षिते प्रदेशे मन्दमन्दमभिज्वलितवति वह्नौ शीतस्यापि मन्दं मन्दं भावः, यदा पुनरत्यर्थमभिज्वाला विमुञ्चति वह्निः तदा सर्वथा शीतस्याभाव इति भवत्यनयोर्विरोधः। उक्तं च–

अविकलकारणमेकं तदपरभावे[1] यदा भवन्न भवेत्।
भवति विरोधः स तयोः शीत-हुताशात्मनोर्दृष्टः॥१।

[वार्तिकालं० ३।श्लो०२७६, पृ० २३३]

न चैवं वचन-संवेदनयोः परस्परं बाध्य-बाधकभावः, न हि संवेदने तारतम्येनोत्कर्षमासादयति वचस्वितायाः तारतम्येनापकर्ष उपलभ्यते, तत् कथमनयोः सहानवस्थानलक्षणो विरोधः ?। अथ सर्ववेदी वक्ता नोपलब्ध इति विरोध उद्घुष्यते, तदयुक्तम्, अत्यन्तपरोक्षो हि भगवान्, ततः[2] कथमनुपलम्भमात्रेण तस्याभावनिश्चयः ?, अदृश्यविषयस्यानुपलम्भस्याभावनिश्चायकत्वायोगात्। आह च **प्रज्ञाकरगुप्तः**[3]–

बाध्य-बाधकभावः कः स्यातां यद्युक्ति-संविदौ ?।
तादृशोऽनुपलब्धेश्चेदुच्यतां सैव साधनम्॥१॥
अनिश्चयकरं प्रोक्तमीदृक्षानुपलम्भनम्।
तन्नात्यन्तपरोक्षेषु सदसत्ताविनिश्चयौ॥२॥ [प्रमाणवा० २।९३-९४]

अथ वचनं विवक्षाधीनम्, विवक्षा च वक्तुकामता, सा च रागः, रागादिमतश्च सर्वज्ञत्वाभावो, वीतरागस्य सर्वज्ञत्वाभ्युपगमात्, ततः कथमिव वक्तृत्वान्ना-सर्वज्ञत्वानुमानमिति ?, तदसद्, वक्तुकामताया रागत्वायोगाद्, अभिष्वङ्गलक्षणो हि

---

१. "यदपर०" - वार्तिकालं० ॥ २. **तत् कथ°** डे० सं० पा०॥ ३. इदं श्लोकद्वयं **धर्मकीर्ति**विरचिते प्रमाणवार्तिके वर्तते। तत्र प्रज्ञाकरगुप्तस्य भाष्यं **वार्तिकालंकारे** [पृ० २३२] वर्तते, अतः **प्रज्ञाकरगुप्तस्य** निर्देशोऽत्र संभाव्यते ॥

रागः, न च भगवतः क्वाप्यभिष्वङ्गः। किमर्थं तर्हि देशना ? इति चेत्, ननूक्तं तीर्थकरनामकर्मोदयात्, अमूढलक्ष्यो हि भगवान्, ततो यत् कर्म यथा वेद्यं तत् तथैवाभिष्वङ्गाद्यभावेऽपि वेदयते, तथा चाद्यापि दृश्यन्ते परमौचित्यवेदिनः क्वचित् प्रयोजनेऽवश्यकर्त्तव्यतामवेत्याभिष्वङ्गाद्यभावेऽपि प्रवर्त्तमानाः, तीर्थकरनामकर्म च देशनाविधानेन वेद्यम्, [१]**तं च कहं वेइज्जइ ?, अगिलाए धम्मदेसणाईहिं** [*आव०नि०गा० **१८३, ७४३**] इति वचनात्, ततो न कश्चिद्दोषः।

स्यादेतत्– मा भूद् रागादिकार्यतया वचनादसर्वज्ञतासिद्धिः, रागादिसहचरिततया तु भविष्यति, तथाहि– रागादिसहचरितं सदैव वचनमुपलभ्यते, ततो वचनाद् रागादिप्रतीतावसर्वज्ञत्वसिद्धिः, तदयुक्तम्, सहदर्शनमात्रस्यागमकत्वाद्, अन्यथा क्वचिद् वक्तरि गौरत्वेन सह वचनमुपलब्धमिति गौरत्वाभावे कृष्णे वक्तरि न स्यात्, अथ च तत्राप्युपलभ्यते, तन्न सहदर्शनमात्रं गमकम्; ततो विपक्षे वृत्तिसन्देहाद् वक्तृत्वादिति सन्दिग्धानैकान्तिको हेतुः, अथवा [२]विरुद्धोऽपि, विपक्षेण सह प्रतिबन्धनिश्चयात्, तथाहि– वचनं संवेदनादेवोपजायते, अन्वय-व्यतिरेकाभ्यां तथानिश्चयात्। कथमन्वय-व्यतिरेकौ प्रतीतौ ? इति चेत्, उच्यते– इह यथा [३]यथा संवेदनमुत्कर्षमासादयति तथा तथा वचस्विताया अप्युत्कर्ष उपलभ्यते, संवेदनोत्कर्षाभावे च वचस्विताया अपकर्षः, मूर्खाणां स्थूलभाषितयोपलम्भात्, ततो यथा वृष्टितारतम्येन गिरिनदीपूरस्य तारतम्यदर्शनात् सर्वोत्कृष्टपूरदर्शने सर्वोत्कृष्टवृष्ट्यनुमानं तथेहापि भगवतः सर्वोत्कृष्टवक्तृत्वदर्शनात् सर्वोत्कृष्टं संवेदनमनुमीयते।

अपरस्त्वाह–वचनं वितर्क-विचारपुरस्सरम्, तथोपलम्भात्, वितर्क-विचारौ च विकल्पात्मकौ, विकल्पस्त्वस्पष्टप्रतिभासः, ततो भगवतोऽपि देशनां कुर्वतोऽस्पष्टप्रतिभासं वैकल्पिकं ज्ञानं प्रसक्तम्, तच्च भ्रान्तमिति कथमभ्रान्तः सर्ववेदी ?, तदसद्, यतो वितर्क-विचारावन्तरेणापि केवलज्ञानेन यथावस्थितं वस्तूपलभ्य भगवान् वचनं परावबोधाय प्रयुङ्क्ते, यथा शब्दव्यवहारनिष्णातः प्रत्यक्षतः स्तम्भमुपलभ्य स्तम्भशब्दम्,

१. तच्च कथं वेद्यते ? अग्लान्या धर्मदेशनादिभिः॥ २. **विरुद्धो विपक्षेण** खं० पामू० ॥ ३. **यथा** नास्ति खंसं० पासं० विना ॥

न च तस्य तथा स्तम्भशब्दं प्रयुञ्जानस्य वितर्क-विचारौ, नापि ज्ञानस्यास्पष्टप्रतिभासता, तथाऽननुभवाद्, एवं भगवतोऽपि द्रष्टव्यम्। उक्तं चान्यैरपि–

[१]**न चास्पष्टावभासित्वादेव शब्दः प्रवर्त्तते॥१॥**
प्रत्यक्षदृष्टे स्तम्भादावपि शब्दप्रवर्त्तनात्।
अयं स्तम्भ इति प्राप्तमन्यथाऽस्याऽप्रवर्त्तनम्॥२॥
न चास्पष्टावभासित्वमत्र ज्ञानस्य लक्ष्यते।
तथाऽन्यत्रापि शब्दानां, प्रवृत्तिर्न विरुध्यते॥३॥

[वार्तिकालं० २।श्लो० ६३१-६३३, पृ० ११७] इति।

तदेवं यतो भगवान् सर्वश्रुतानां प्रभवः सर्वतीर्थकृतां चापश्चिमस्तीर्थकरस्ततः सकलसत्त्वानां गुरुः। तथा चाऽऽह– **जयति गुरुर्लोकानाम्** इति। **लोकानां** सत्त्वानां गृणाति प्रवचनार्थमिति **गुरुः**, प्रवचनार्थप्रतिपादकतया पूज्य इत्यर्थः।

तथा **जयति महात्मा महावीरः** महान् अचिन्त्यशक्त्युपेत **आत्मा** स्वभावो यस्य स महात्मा। [२]**शूर वीर विक्रान्तौ [पा० धा० १९०३-१९०४]** वीरयति स्मेति **वीरः**-विक्रान्तः, **महान्** कषायोपसर्ग-परीषहेन्द्रियादिशत्रुगणजयादतिशायी विक्रान्तो **महावीरः**। अथवा [३]**ईर गति-प्रेरणयोः [ ]** विशेषेण ईरयति-गमयति स्फेटयति कर्म प्रापयति वा शिवमिति वीरः। अथवा [४]**ईरि गतौ [ ]** विशेषेण-अपुनर्भावेन ईर्त्ते स्म-याति स्म शिवमिति वीरः, महांश्चासौ वीरश्च महावीरः। **जयती**ति पूर्ववद्। भूयोऽस्याभिधानं च स्तवाधिकाराददुष्टम्॥२॥

पुनरप्यस्यैव भगवतो महावीरस्यातिशयद्वारेण स्तुतिमभिधित्सुराह–

भद्दं सव्वजगुज्जोयगस्स भद्दं जिणस्स वीरस्स।
भद्दं सुरा-ऽसुरणमंसियस्स भद्दं धुयरयस्स॥३॥

भद्दमित्यादि। **'भद्रं'** कल्याणं भवतु। कस्य ? **सर्वजगदुद्द्योतकस्य, सर्वं** समस्तं **जगद्** लोका-ऽलोकात्मक**मुद्द्योतयति** प्रकाशयति केवलज्ञान-दर्शनाभ्यामिति

---

१. सर्वासव(?)विकल्पस्य नास्त्यध्यक्षाद् विवेकिता। इति पूर्वार्द्धम्। २. "शूर-वीरणि विक्रान्तौ" - हैम० धा० ९।३६८-३६९॥ ३. **"ईर गतौ"** डे० सं०। "ईर क्षेपे" - पा० धा० १८११, "ईरण् क्षेपे" हैम० धा० ९।४०८॥ ४. "ईरिक् गतिकम्पनयोः" हैम० धा० २।५७, "ईर गतौ कम्पने च" पा० धा० १०१८॥

सर्वजगदुद्द्योतकः, तस्य, **भद्रा-ऽऽयुष्य-क्षेम-सुख[१]-हितार्थ-हितैराशिषि [मलय* ना० पा० ७ सू०२१]** इति विकल्पेन चतुर्थीविधानात् षष्ठ्यपि भवति, यथा-आयुष्यं देवदत्ताय आयुष्यं देवदत्तस्य। अनेन ज्ञानातिशयमाह। ननु विशेषणं तद् उपादीयते यत् सम्भवति, **सम्भवे व्यभिचारे च विशेषणम्** [ ] इति वचनात्, न च[२] सर्वजगदुद्द्योतकत्वं सम्भवति, प्रमाणेनाग्रहणात्। तथाहि–

सर्वजगदुद्द्योतकत्वं भगवतः किं प्रत्यक्षेण प्रतीयते ? उतानुमानेन ? आहोश्विदागमेन ? उताहो उपमानेन ? अथवा अर्थापत्त्या ?। तत्र न तावत् प्रत्यक्षेण, भगवतश्चिरातीतत्वात्; अपि च– परविज्ञानं सदैव प्रत्यक्षाविषयः, अतीन्द्रियत्वात्, ततस्तदात्वेऽपि न प्रत्यक्षेण ग्रहणम्।

नाप्यनुमानेन, तद्धि लिङ्ग-लिङ्गिसम्बन्धग्रहणपुरस्सरमेव प्रवर्त्तते। लिङ्ग-लिङ्गिसम्बन्धग्रहणं च किं प्रत्यक्षेण उतानुमानेन ?। तत्र न प्रत्यक्षेण, सर्ववेदनस्यात्यन्तपरोक्षतया प्रत्यक्षेण तस्मिन्नगृहीते तेन सह लिङ्गस्याविनाभावनिश्चयायोगात्, न चानिश्चिताविनाभावं लिङ्गं लिङ्गिनो गमकम्, अतिप्रसङ्गात्, यतः कुतश्चिद् यस्य तस्य वा प्रतिपत्तिप्रसक्तेः। नाप्यनुमानेन लिङ्ग-लिङ्गिसम्बन्धग्रहणम्, अनवस्थाप्रसङ्गात्, तथाहि– तदप्यनुमानं लिङ्ग-लिङ्गिसम्बन्धग्रहणतो भवेत्, ततस्तत्रापि लिङ्ग-लिङ्गिसम्बन्धग्रहणमनुमानान्तरात् कर्त्तव्यम्, तत्रापि चेयमेव वार्त्तेत्यनवस्था।

नाप्यागमतः सर्ववेदनविनिश्चयः, स हि पौरुषेयो वा स्यात् ? अपौरुषेयो वा ?, पौरुषेयोऽपि सर्वज्ञकृतः ? रथ्यापुरुषकृतो वा ?। तत्र न तावत् सर्वज्ञकृतः, सर्वज्ञासिद्धौ सर्वज्ञकृतत्वस्यैवाविनिश्चयात्। अपि च– एवमभ्युपगमे सतीतरेतराश्रयदोषप्रसङ्गः, तथाहि– सर्वज्ञसिद्धौ तत्कृतागमसिद्धिः, तत्कृतागमसिद्धौ च सर्वज्ञसिद्धिः। अथ रथ्यापुरुषप्रणीत इति पक्षस्तर्हि न स प्रमाणम्, उन्मत्तकप्रणीतशास्त्रवत्, अप्रमाणाच्च तस्मान्न सुनिश्चित[३]सर्वज्ञसिद्धिः, अप्रमाणात् प्रमेयासिद्धेः, अन्यथा प्रमाणपर्येषणं विशीर्येत। अथापौरुषेय इति पक्षस्तर्हि **ऋषभः** सर्वज्ञो **वर्द्धमानस्वामी** सर्वज्ञ इत्यादिरर्थवादः

---

१. °**सुखार्थ-हितार्थ**° मलयगिरिव्याकरणे॥ २. **च तत्सर्व**° खं० सं०॥ ३. °**श्चिता सर्व**° खंसं०॥

प्राप्नोति, **ऋषभाद्य**भावेऽपि भावात्, तथाहि– सर्वकल्पस्थायी आगमः, **ऋषभादय**स्त्वधुनातनकल्पवर्त्तिनः, तत **ऋषभाद्य**भावेऽपि पूर्वमप्यस्याऽऽगमस्यैवमेव भावात् कथमेतेषा**मृषभादी**नामभिधानं तत्र परमार्थसत् ?, तस्मादर्थवाद एषः, न सर्वज्ञप्रतिपादनमिति। अपि च– यद्यपौरुषेयागमाभ्युपगमस्तर्हि किमिदानीं सर्वज्ञेन ?, आगमादेव धर्मा-ऽधर्मादिव्यवस्थासिद्धेः, तस्मान्नाऽऽगमगम्यः सर्ववेदी।

नाप्युपमानगम्यः, तस्य प्रत्यक्षपूर्वकत्वात्, तथाहि– प्रत्यक्षप्रसिद्धगोपिण्डस्य 'यथा गौस्तथा गवयः' इत्यागमाहितसंस्कारस्याटव्यां पर्यटतो गवयदर्शनानन्तरं तन्नाम-प्रतिपत्तिरुपमानं प्रमाणं वर्ण्यते, न चैकोऽपि सर्वज्ञः प्रत्यक्षसिद्धो येन तत्सादृश्यावष्टम्भेनान्यस्य विवक्षित[१]पुरुषस्योपमानप्रमाणतः सर्वज्ञ इति प्रतीतिर्भवेत्।

नाप्यर्थापत्तिगम्यः, सा हि प्रत्यक्षादिप्रमाणगोचरीकृतार्थान्यथानुपपत्त्या प्रवर्त्तेत, न च कोऽप्यर्थः सर्वज्ञमन्तरेण नोपपद्यते, तत् कथमर्थापत्तिगम्यः ?। तदेवं प्रमाणपञ्चकाऽवृत्तेरभावप्रमाणमेव सर्वज्ञं क्रोडीकरोति। उक्तं च–

[२]प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्त्वसत्तावबोधार्थं तत्राभावप्रमाणता॥१॥ [*मी० श्लो० वा० अभाव० १]

अपि च– सर्वं वस्तु जानाति भगवान् केन प्रमाणेन ?, किं प्रत्यक्षेण ? उत यथासम्भवं सर्वैरेव प्रमाणैः ?। तत्र न तावत् प्रत्यक्षेण, देश-कालविप्रकृष्टेषु सूक्ष्मेष्वमूर्त्तेषु च तस्याप्रवृत्तेः, इन्द्रियाणामगोचरत्वात्, यदि पुनस्तत्रापीन्द्रियं व्याप्रियेत तर्हि सर्वः सर्वज्ञो भवेत्। अथेन्द्रियप्रत्यक्षादन्यदतीन्द्रियं प्रत्यक्षं तस्यास्ति तेन सर्वं जानातीति मन्येथाः, तदप्ययुक्तम्, तस्यास्तित्वे प्रमाणाभावात्, न च प्रमाणमन्तरेण प्रमेयसिद्धिः, सर्वस्य सर्वेष्टार्थसिद्धिप्रसक्तेः। अथवा अस्तु तदपि तथापि सर्वमेतावदेव जगति वस्तु इति न निश्चयः, न खल्वतीन्द्रियमप्यवधिज्ञानं सर्ववस्तुविषयं सिद्धम्, तदपरिच्छिन्नानामपि धर्मा-ऽधर्मास्तिकायादीनां सम्भवात्, एवं केवलज्ञानापरिच्छिन्नमपि किमपि वस्तु भविष्यतीत्याशङ्काऽनतिवृत्तेर्न सर्वविषयं केवलज्ञानं वक्तुं शक्यम्, तथा च कुतः सर्वज्ञस्यापि स्वयमात्मनः सर्वज्ञत्वविनिश्चयः ?। अथ यथायथं सर्वैरेव प्रमाणैः सर्वं

---

१. **विवक्षित**° नास्ति जे१,२, मां०॥ २. दृश्यतां पृ० ४८॥

वस्तु जानातीति पक्षः, नन्वेवं सति य एवाऽऽगमे कृतपरिश्रमः स एव सर्वज्ञः प्राप्नोति, आगमस्य प्रायः सर्वार्थविषयत्वात्, तथा च कः प्रतिविशेषो वर्द्धमानस्वाम्यादौ ? येन स एव प्रमाणमिष्यते न जैमिनिरिति।

अन्यच्च– यथावस्थितसकलवस्तुवेदी सर्वज्ञ इष्यते, ततोऽशुच्यादिरसानामपि यथावस्थिततया संवेदनादशुच्यादिरसास्वादप्रसङ्गः। आह च– **अशुच्यादिरसास्वाद-प्रसङ्गश्चानिवारितः। [वार्तिकालं० २। श्लो० ३५९ पृ० ५०]** किञ्च– कालतोऽनाद्यनन्तः संसारः, जगति च सर्वदा विद्यमानान्यपि वस्तून्यनन्तानि, ततः संसारं वस्तूनि च क्रमेण विदन् कथमनन्तेनापि कालेन सर्ववेदी भविष्यति ?। उक्तं च– [१]**क्रमेण वेदनं कथम् [वार्तिकालं०]** इति।

अत्र प्रतिविधीयते– तत्र यत्तावदुक्तं[२] 'सर्वजगदुद्द्योतकत्वं भगवतः केन प्रमाणेन प्रतीयते ?' इत्यादि, तत्राऽऽगमप्रमाणादिति ब्रूमः, स चाऽऽगमः कथञ्चिन्नित्यः, प्रवाहतोऽनादित्वात्। तथाहि– यामेव[३] द्वादशाङ्गीं कल्पलताकल्पां भगवान् ऋषभस्वामी पूर्वभवेऽधीतवान्, अधीत्य च पूर्वभवे इहभवे च यथावत् पर्युपास्य फलभूतं केवलज्ञानमवाप्तवान्, तामेवोत्पन्नकेवलज्ञानः सन् शिष्येभ्य उपदिशति, एवं सर्वतीर्थकरेष्वपि द्रष्टव्यम्, ततोऽसावागमोऽर्थरूपापेक्षया नित्यः। तथा च वक्ष्यति- [४]**एसा दुवालसंगी न कया वि नाऽऽसी न कया वि नत्थि न कया वि न भविस्सइ, धुवा नीया सासया अक्खया अव्वया अव्वाबाहा अवट्ठिया निच्चा [सू०११८]** इति। अस्मिंश्चागमे यथा संसारी संसारं पर्यटति यथा कर्मणामभिसमागमो यथा च तपः-संयमादिना कर्मणामपगमे केवलाभिव्यक्तिः तथा सर्वं प्रतिपाद्यते इति सिद्ध आगमात् सर्वज्ञः।

यदप्युक्तम्[५]- 'स पौरुषेयो वा' इत्यादि, तत्रार्थतोऽपौरुषेयः, स च न सर्वज्ञप्रकाशितत्वादेव प्रमाणं किन्तु कथञ्चित् स्वतोऽपि, निश्चिताविपरीत-प्रत्ययोत्पादकत्वात्, ततो नेतरेतराश्रयदोषप्रसङ्गः, सर्वज्ञप्रणीतत्वावगमाभावेऽपि

१. "क्रमेण वेदनेऽनादिवस्तुनो वेदनं कथम्। इति चेन्नाक्रमेणैव सर्वार्थानां प्रवेदनात् ॥५७८॥ इति वार्तिकालङ्कारे ३।श्लो० ५७८ पृ० ३३० ॥ २. पृ०४० पं०६॥ ३. **यामेव च द्वा**° खं० पा० ॥ ४. एषा द्वादशाङ्गी न कदाचिदपि नाऽऽसीद् न कदाचिदपि नास्ति न कदाचिदपि न भविष्यति, ध्रुवा नियता शाश्वती अक्षया अव्यया अव्याबाधा अवस्थिता नित्या॥ ५. पृ०४० पं०१८ ॥

निश्चिताविपरीतप्रत्ययोत्पादकतया तस्य प्रामाण्यनिश्चयात्, ततः सर्वज्ञसिद्धिः। अथैवमागमात् सर्वज्ञः सामान्यतः सिध्यति न विशेषनिर्देशेन यथा 'अयं सर्वज्ञः' इति, ततः कथं सर्वज्ञकालेऽपि सर्वज्ञोऽयमिति व्यवहारः ?, उच्यते– पृष्ट-चिन्तितसकलपदार्थप्रकाशनात्। तथाहि-यद् यद् भगवान् पृच्छ्यते यच्च यच्च स्वचेतसि प्रष्टा चिन्तयति तत् तत् सर्वं प्रत्ययपूर्वमुपदिशति ततोऽसौ ज्ञायते यथा सर्वज्ञ इति। तेन यदुच्यते **भट्टेन**–

सर्वज्ञोऽसाविति ह्येतत्, तत्कालेऽपि बुभुत्सुभिः।
तज्ज्ञान-ज्ञेयविज्ञानरहितैर्गम्यते कथम् ?॥१॥ [* मी० श्लो० वा० २।१३४]

इति तदपास्तं द्रष्टव्यम्, पृष्ट-चिन्तितसकलपदार्थप्रकाशनेन तस्य सर्वज्ञत्वनिश्चयात्। नन्वेवं व्यवहारतो निश्चयो न निश्चयतः, निश्चयतो हि तदा सर्ववेदी विदितो भवति यदा तज्ज्ञेयं सर्वं विदित्वा सर्वत्र संवादो गृह्यते, न चैतत् कर्त्तुं शक्यम्। अथैकत्र संवाददर्शनादन्यत्रापि स संवादी द्रष्टव्यः, एवं तर्हि मायावी बहुजल्पाकः सर्वोऽपि सर्वज्ञः प्राप्नोति, तस्याप्येकदेशसंवाददर्शनात्, आह च–

एकदेशपरिज्ञानं कस्य नाम न विद्यते ?।
न ह्येकं नास्ति सत्यार्थं पुरुषे बहुजल्पिनि॥१॥

[वार्तिकालं० २। श्लो० ३६७ पृ० ५१]

तदयुक्तम्, व्यवहारतोऽपि निश्चयस्य सम्यग्निश्चयत्वात्, वैयाकरणादिनिश्चयवत्; तथाहि–वैयाकरणः कतिपयपृष्टशब्दव्याकरणादयं सम्यग्वैयाकरण इति निश्चीयते, एवं पृष्ट-चिन्तितार्थप्रकाशनात् सर्वज्ञोऽपि। न चैवं मायाविनोऽपि सर्वज्ञत्वप्रसङ्गः, मायाविनि सर्वेषु पृष्टेषु चिन्तितेषु चार्थेषु संवादायोगात्, निपुणेन च प्रतिपत्त्रा भवितव्यम्। अथ वैयाकरणोऽन्येन वैयाकरणेन सकलव्याकरणशास्त्रार्थसंवादनिश्चयतोऽपि ज्ञातुं शक्यते, ननु सर्वज्ञोऽप्यन्येन सर्वज्ञेन यथावद् ज्ञातुं शक्यत एवेति समानम्। अथ तदानीमन्येन सर्वज्ञेन निश्चयतो ज्ञायताम्, इदानीं तु स कथं ज्ञायते ?, उच्यते– इदानीं तु सम्प्रदायादव्याहतप्रवचनार्थप्रकाशनाच्च।

यदप्यवादीत्[१]–'**ऋषभः** सर्वज्ञो **वर्द्धमानस्वामी** सर्वज्ञ इत्यादिरर्थवादः प्राप्नोति'

१. पृ०४० पं०२४ ॥

इत्यादि, तदप्यसारम्, आगमे ह्ययं कल्पः—यो यः सर्वज्ञः उत्पद्यते तेन तेन तत्तत्कल्पवर्त्तिनां तीर्थकृतां सर्वेषामप्यवश्यं चरितानि वक्तव्यानि, ततो न **ऋषभाद्यभिधानमर्थवादः**।

यदप्यभिहितम्[१]— 'नाप्युपमानप्रमाणगम्यः' इत्यादि, तदप्ययुक्तम्, एकं सर्वज्ञं यदा व्यवहारतो यथावद् विनिश्चित्यान्यमपि सर्वज्ञं व्यवहारतः परिज्ञाय 'एषोऽपि सर्वज्ञः' इति व्यवहरति तदा कथं नोपमानप्रमाणविषयः ?। अर्थापत्तिगम्योऽपि भगवान्, अन्यथाऽऽगमार्थस्य परिज्ञानासम्भवात्, न खल्वतीन्द्रियार्थदर्शनमन्तरेणा-ऽऽगमस्यार्थो-ऽतीन्द्रियः पुरुषमात्रेण यथावदवगन्तुं शक्यते, तत आगमार्थपरिज्ञानान्यथानुपपत्त्या सर्वज्ञोऽवश्यमभ्युपगन्तव्यः। एतेन यदुक्तं प्राक्[२] 'किमिदानीं सर्वज्ञेन ?, आगमादेव धर्मा-ऽधर्मव्यवस्थासिद्धेः' इति, तत् प्रतिक्षिप्तमवसेयम्, सर्वज्ञमन्तरेणाऽऽगमार्थस्यैव सम्यक्परिज्ञानासम्भवात्।

यच्चोक्तम्[३]— 'सर्वं वस्तु जानाति भगवान् केन प्रमाणेन' इत्यादि, तत्र प्रत्यक्षेणेति पक्षः, तदपि च प्रत्यक्षमतीन्द्रियमवसेयम्। ननु तत्राप्युक्तम्-'तस्यास्तित्वे[४] प्रमाणाभावात्' इति, उक्तमिदमयुक्तं तूक्तम्, तदस्तित्वेऽनुमानप्रमाणसद्भावात्। तच्चानुमानमिदम्—यत् तारतम्यवत् तत् सर्वान्तिमप्रकर्षभाक्, यथा परिमाणम्, तारतम्यवच्चेदं ज्ञानमिति, न चायमसिद्धो हेतुः, तथाहि—दृश्यते प्रतिप्राणि प्रज्ञा-मेधादिगुणपाटवतारतम्यं ज्ञानस्य, ततोऽवश्यमस्य सर्वान्तिमप्रकर्षेण भवितव्यम्, यथा परिमाणस्याऽऽकाशे, सर्वान्तिमप्रकर्षश्च ज्ञानस्य सकलवस्तुस्तोमप्रकाशकत्वम्। अथ यद्विषयः तरतमभावः सर्वान्तिमप्रकर्षोऽपि तद्विषय एव युक्तः, तर-तमभावश्चेन्द्रियाश्रितस्य ज्ञानस्योपलब्धः, ततः सर्वान्तिमप्रकर्षोऽपि तस्यैवेति कथमतीन्द्रियज्ञानसम्भवः ?, इन्द्रियाश्रितस्य च ज्ञानस्य प्रकर्षभावेऽपि न सर्वविषयता, तस्य सूक्ष्मादावप्रवृत्तेः। अथोच्येत—मनोज्ञानमप्यतीन्द्रियज्ञानमुच्यते, तस्य च तर-तमभावः शास्त्रादौ दृष्ट एव, तथाहि—तदेव शास्त्रं कश्चिद् झटित्येव[५] पाठतोऽवधारयति, अपरस्तु मन्दम्, बोधतोऽपि कश्चिन्मुकुलितार्थावबोधमपरो विशिष्टावबोधम्, एवमन्यास्वपि कलासु यथायोगं

---

१. पृ०४१ पं०६॥ २. पृ०४१ पं०४॥ ३. पृ०४१ पं०१५॥ ४. पृ०४१ पं०१९॥ ५. °व पठति अव° खं० दे० विना॥

मनोविज्ञानस्य तारतम्यं परिभाव्यते, ततस्तस्य सर्वान्तिमः प्रकर्षः सर्वविषयो भविष्यति, तदसत्[१], यतो मनोविज्ञानस्यापि तर-तमभावः शास्त्राद्यालम्बन एवोपलब्धः, ततः प्रकर्षभावोऽपि तस्य शास्त्राद्यालम्बन एव युक्त्योपपद्यते, न सर्वविषयः, न खल्वन्यविषयोऽभ्यासोऽन्यविषयं प्रकर्षभावमुपजनयति, तथाऽनुपलब्धेः, उक्तं च–

शास्त्राद्यभ्यासतः शास्त्रप्रभृत्येवावगच्छतः।
साकल्यवेदनं तस्य, कुत एवाऽऽगमिष्यति ?॥१॥

[वार्तिकालं० २। श्लो० ३६३ पृ० ५१]

अत्रोच्यते, इह तावदिन्द्रियज्ञानाश्रितः तर-तमभावो न ग्राह्यः, अतीन्द्रिय-प्रत्यक्षसाधनाय हेतोरुपन्यासात्, तथाहि-सकलवस्तुविषयमतीन्द्रिय-प्रत्यक्षमिदानीं साधयितुमिष्टम्, ततः तर-तमभावोऽपि हेतुत्वेनोपन्यस्तोऽतीन्द्रियज्ञानस्यैव वेदितव्यः, अन्यथा भिन्नाधिकरणस्य[२] हेतोः पक्षधर्मत्वायोगात्। साक्षाच्चातीन्द्रियग्रहणं न कृतम्, प्रस्तावादेव लब्धत्वात्, अतीन्द्रियं च ज्ञानमिन्द्रियानाश्रितं सामान्येन द्रष्टव्यम्, तेन मनोज्ञानमपि गृह्यते।

यदप्युक्तम्[३]-'मनोज्ञानस्यापि तर-तमभावः शास्त्राद्यालम्बन एवेति प्रकर्षभावोऽपि तद्विषय एव युक्तः' इति, तदप्यसमीचीनम्, शास्त्राद्यतिक्रान्तस्यापि तर-तमभावस्य सम्भवात्, तथाहि– योगिनः परमयोगमिच्छन्तः प्रथमतः शास्त्रमभ्यसितुमुद्यतन्ते, यथाशक्ति च शास्त्रानुसारेण सकलमप्यनुष्ठानमनुतिष्ठन्ति, मा भूत् किमपि क्रियावैगुण्यं प्रमादाद् योगाभ्यासयोग्यताहानिर्वेति कृत्वा, ततो निरन्तरमेव यथोक्तानुष्ठानपुरस्सरं शास्त्रमभ्यस्यतां शुद्धचेतसां प्रतिदिवसमभिवर्द्धन्ते प्रज्ञा-मेधादिगुणाः, ते चाभ्यासादभि-वर्द्धमाना अद्यापि स्वसंवेदनप्रमाणेनानुभूयन्ते ततो नासिद्धाः[४], ततः शनैः शनैरभ्यासप्रकर्षे जायमाने शास्त्रसन्दर्शितोपायाः वचनगोचरातीताः शेषप्राणिगणसंवेदनागम्याः सिद्धिपदसम्पद्धेतवः सूक्ष्म-सूक्ष्मतरार्थविषया मनाक्समुल्लसत्स्फुटप्रतिभासा ज्ञानविशेषा उत्पद्यन्ते, ततः किञ्चिदूनात्यन्तप्रकर्षसम्भवे मनसोऽपि निरपेक्षं मत्यादिज्ञानप्रकर्ष-पर्यन्तोत्तरकालभावि केवलज्ञानादर्वाक्तनं सवितुरुदयात् प्राक् तदालोककल्पमशेष-

---

१. तदेतदसत् डे० सं०॥ २. °णहेतोः पा० खं० जेमू०॥ ३. पं०२॥ ४. °द्धाः, शनैः शनैस्ततोऽभ्या° जे१॥

रूपादिवस्तुविषयं प्रातिभं[१] ज्ञानमुदयते, तच्च स्पष्टाभतयैन्द्रियप्रत्यक्षादधिकतरम्, न चेदमसिद्धम्, सर्वदर्शनेष्वप्यध्यात्मशास्त्रेषु तस्याभिधानात्।

अथ प्रथमतो मनःसापेक्षमभ्यासमारब्धवान्, अभ्यासप्रकर्षे तूपजायमाने कथं मनोऽपि नालम्बते ?, उच्यते– अत्यन्ताभ्यासप्रकर्षवशतो मनोनिरपेक्षमपि शक्तत्वात्, तथाहि– तरणं शिक्षितुकामः प्रथमं तरण्डमपेक्षते, ततोऽभ्यासप्रकर्षयोगतः तरणनिष्णातस्तरण्डमपि परित्यजति, एवं योग्यपि वेदितव्यः। ततः सर्वोत्कृष्ट-प्रकर्षसम्भवेऽतीव स्फुटप्रतिभासं सकललोका-ऽलोकविषयमनुपममबाध्यं केवल-ज्ञानमुदयते, ततो यदुक्तम्[२]– **शास्त्राद्यभ्यासतः शास्त्रप्रभृत्येवावगच्छतः।** [ ] इत्यादि, तदत्यन्तमध्यात्मशास्त्रयाथात्म्यवेदिगुरुसम्पर्कबहिर्भूतत्वसूचकमवसेयम्। स्यादेतत्– तारतम्यदर्शनादस्तु ज्ञानस्य प्रकर्षसम्भवानुमानम्, स तु प्रकर्षः सकलवस्तुविषय इति कथं श्रद्धेयम् ?, न खलु लङ्घनमभ्यासतः तारतम्यवदप्युपलभ्यमानं सकललोक-विषयमुपलभ्यते, तदसत्, दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यात्, तथाहि– न लङ्घनमभ्या-सादुपजायते, किन्तु बलविशेषतः, तथाहि– समानेऽपि गरुत्मच्छाखा-मृगशावकयोरभ्यासे न समानं लङ्घनम्। उक्तं च–

गरुत्मच्छाखामृगयोर्लङ्घनाभ्यासस[३]ङ्गमे।
समानेऽपि समानत्वं, लङ्घनस्य न विद्यते॥१॥

[वार्तिकालं० २। श्लो० ५८६ पृ० १०७]

अपि च-पुरुषयोरपि द्वयोः समानप्रथमयौवनयोरपि समानेऽप्यभ्यासे एकः प्रभूतं लङ्घयितुं शक्नोति अपरस्तु स्तोकम्, तस्माद् बलसापेक्षं लङ्घनं नाभ्यासमात्रहेतुकम्, अभ्यासस्तु केवलं देहवैगुण्यमात्रमपनयति, तच्च बलं वीर्यान्तरायकर्मक्षयोपशमात्, क्षयोपशमश्च जातिभेदापेक्षी द्रव्य-क्षेत्राद्यपेक्षी च, ततो यस्य यावद् बलं तस्य तावदेव लङ्घनमिति न सकललोकविषयम्। जीवस्तु शशाङ्क इव स्वरूपेण सकलजगत्प्रकाशन-स्वभावः, केवलमावरणघनपटलतिरस्कृतप्रभावत्वान्न तथा प्रकाशते। उक्तं च–

स्थितः शीतांशुवज्जीवः, प्रकृत्या भावशुद्धया।
चन्द्रिकावच्च विज्ञानं, तदावरणमभ्रवत्॥१॥ [ ]

१. प्रातिभं परमावधिरित्येकोऽर्थः॥ २. पृ०४५ पं०५ ॥ ३. °**सम्भवे** पा०॥

ततो यथा प्रचण्डनैर्ऋतपवनप्रहता घनपटलपरमाणवः शनैः शनैर्निःस्नेहीभूयापगच्छन्ति, तदपगमनानुसारेण च चन्द्रस्य प्रकाशो जगति वितनुते, तथा जीवस्यापि रागादिभ्यश्चित्तं विनिवर्त्त्य काय-वाक्चेष्टासु संयतस्य सम्यक् शास्त्रानुसारेण यथावस्थितं वस्तु परिभावयतो ज्ञानादिभावनाप्रभावतो ज्ञानावरणीयादिकर्मपरमाणवः शनैः शनैर्निःस्नेहीभूयाऽऽत्मनः प्रच्यवन्ते। कथमेतत् प्रत्येयम् ? इति चेत्, उच्यते– इहाज्ञानादिनिमित्तकं ज्ञानावरणीयादि कर्म, ततः तत्प्रतिपक्षज्ञानाद्यासेवनेऽवश्यं तदात्मनः प्रच्यवते। उक्तं च–

बंधइ[1] जहेव कम्मं अन्नाणाईहिं कलुसियमणो उ।
तह चेव तव्विवक्खे सहावओ मुच्चई जेण॥१॥ [*धर्मसं० गा० ११७७]

ज्ञानावरणीयकर्मपरमाणुप्रच्यवनानुसारेण चाऽऽत्मनः शनैः शनैर्ज्ञानमधिकमधिकतरमुल्लसति, यदा तु ज्ञानादिभावनाप्रकर्षवशेनाशेषज्ञानावरणीयादिकर्मपरमाण्वपगमस्तदा सकलाभ्रपटलविनिर्मुक्तशशाङ्क इव आत्मा लब्धयथावस्थितात्मस्वरूपः सकलस्यापि जगतोऽवभासकः, ततो ज्ञानस्य प्रकर्षः सकललोकविषयः। अथवा सर्वं वस्तु सामान्येन शास्त्रेऽपि प्रतिपाद्यते, यथा– पञ्चास्तिकायात्मको लोकः, आकाशास्तिकायात्मकश्चालोकः, किञ्चिद्विशेषतश्च ऊर्ध्वाधस्तिर्यग्लोकानां सविस्तरं तत्राभिधानात्, शास्त्रानुसारेण च ज्ञानाभ्यासः, ततस्तरतमभावोऽपि ज्ञानस्य सकलवस्तुविषय एवेति प्रकर्षभावस्तद्विषयो न विरुध्यते, लङ्घनं तु सामान्यतोऽपि न सकललोकविषयमिति कथमभ्यासतस्तत्प्रकर्षः सकललोकविषयो भवेत् ?।

स्यादेतद्– यद्यपि सामान्यतः शास्त्रानुसारेण सकलवस्तुविषयं ज्ञानमुपजायते तथाप्यभ्यासतः तत्प्रकर्षः सकलवस्तुगताशेषविशेषविषय इति कथं ज्ञायते ?, न ह्यत्र किञ्चित् प्रमाणमस्ति, न चाप्रमाणकं वचो विपश्चित[2]ः प्रतिपद्यन्ते, विपश्चित्ताक्षितिप्रसङ्गात्, तदसत्, अनुमानप्रमाणसद्भावात्। तच्चानुमानमिदम्– जलधिजलपलप्रमाणादयो विशेषाः कस्यचित् प्रत्यक्षाः, ज्ञेयत्वात्, घटादिगतरूपादिविशेषवत्, ज्ञेयत्वं हि ज्ञानविषयतया व्याप्तम्, न च जलधिजलपलप्रमाणादिरूपेषु विशेषेषु प्रत्यक्षमन्तरेण शेषानुमानादि-

१. बध्नाति यथैव कर्म अज्ञानादिभिः कलुषितमनास्तु। तथैव तद्विपक्षे स्वभावतः मुच्यते येन॥ २. विद्वांसः - खंटि०॥

ज्ञानसम्भवः, तथाहि- न ते विशेषा अनुमानप्रमाणगम्याः, लिङ्गाभावात्, नाप्यागमगम्याः, तस्य विधि-प्रतिषेधमात्रविषयत्वात्, नाप्युपमानगम्याः, तस्य प्रत्यक्षपुरस्सरत्वात्। उक्तं च–

न चाऽऽगमेन यदसौ विध्यादिप्रतिपादकः।
अप्रत्यक्षत्वतो नैवोपमानस्यापि सम्भवः॥१॥ [*शास्त्रवार्ता० ५८२]

नाप्यर्थापत्तिविषयाः, सा हि दृष्टः श्रुतो वाऽर्थो यदन्तरेण नोपपद्यते,-यथा काष्ठस्य भस्मविकारोऽग्नेर्दाहकशक्तिमन्तरेण,– तद्विषया वर्ण्यते, न च दृष्टः श्रुतो वा कोऽप्यर्थस्तान् विशेषानन्तरेण नोपपद्यते, ततो नार्थापत्तिगम्याः, न च ते विशेषाः स्वरूपेण न सन्ति, विशेषान् विना सामान्यस्यैवासम्भवात्, न च वाच्यम्– अत एव सामान्यस्यान्यथानुपपत्तेरर्थापत्तिगम्याः, नियतरूपतयाऽनवगमात्[१], प्रातिनैयत्यमेव च विशेषाणां[२] स्वं स्वरूपम्, अन्यथा विशेषहानेः सामान्यरूपताप्रसङ्गात्। न च तेषां ज्ञेयत्वमेवासिद्धमिति वाच्यम्, अभावप्रमाणव्यभिचारप्रसङ्गात्, तथाहि-यदि केनापि प्रमाणेन न ज्ञायन्ते तर्हि–

प्रमाणपञ्चकं[३] यत्र, वस्तुरूपे न जायते।
वस्त्वसत्तावबोधार्थं[४] तत्राभावप्रमाणता॥१॥ [*मी० श्लो० वा० अभाव० १]

इति वचनादभावप्रमाणविषयाः स्युः, अभावाख्यं च प्रमाणमभावसाधनमिष्यते, अथ च ते विशेषाः स्वरूपेणावतिष्ठन्ते, ततोऽभावप्रमाणव्यभिचारप्रसङ्गः, तस्माद् विपक्षे व्यापकानुपलब्ध्या विशेषाणां ज्ञेयत्वं प्रत्यक्षविषयतया व्याप्यत इति प्रतिबन्धसिद्धिः।

स्यादेतत्–ज्ञेयत्वादिति हेतुर्विशेषविरुद्धः, तथाहि– घटादिगता रूपादिविशेषा इन्द्रियप्रत्यक्षेण प्रत्यक्षा उपलब्धाः, ततस्तज्ज्ञेयत्वमिन्द्रियप्रत्यक्षविषयतया प्रत्यक्षत्वेन व्याप्तं निश्चितं सद् जलधिजलपलप्रमाणादिष्वपि विशेषेषु प्रत्यक्षत्वमिन्द्रिय-प्रत्यक्षविषयतया साधयति, तच्चानिष्टमिति, तदयुक्तम्, विरुद्धलक्षणासम्भवात्, तथाहि– विरुद्धो हेतुः तदा भवति यदा बाधकं नोपजायते, **विरुद्धोऽसति बाधके** [ ] इति वचनात्, अत्र च बाधकं विद्यते, यदि हि इन्द्रियप्रत्यक्षविषयतया प्रत्यक्षत्वं भवेत्

---

१. °या तदनव° खंसं०॥ २. °णां स्वस्वरूपम् पा०॥ ३. दृश्यतां पृ०४१ ॥ ४. वस्तु सत्ता° पा०,जे१॥

ततोऽस्मादृशामपि ते प्रत्यक्षाः भवेयुः, न च भवन्ति, तस्मादस्मादृशैः प्रत्यक्षत्वेनासंवेदनमेव तेषामिन्द्रियप्रत्यक्षविषयत्वसाधने बाधकमिति न विशेषविरुद्धता।

अन्यः प्राह– न विशेषविरुद्धता हेतोर्दूषणम्, अन्यथा सकलानुमानोच्छेदप्रसङ्गात्। तथाहि– यथा धूमोऽग्निं साधयति, अग्निप्रतिबद्धतया महानसे निश्चितत्वात्, तथा तस्मिन् साध्यधर्मिण्यग्न्यभावमपि साधयति, तेनापि सह महानसे प्रतिबन्धनिश्चयात्, तद्यथा- नात्रत्येनाग्निना अग्निमान् पर्वतः, धूमवत्त्वात्, महानसवत्, ततश्चैवं न कश्चिदपि हेतुः स्यात्, तस्मान्न विशेषविरुद्धता हेतोर्दोषः। आह च **प्रज्ञाकरगुप्तो**ऽपि–

यदि विशेषविरुद्धतया क्षतिर्ननु न हेतुरिहास्ति न दूषितः।
निखिलहेतुपराक्रमरोधिनी, न हि न सा सकलेन विरुद्धता॥१॥

[वार्तिकालं० ३। श्लो० ९४९, पृ० ३८६]

यच्चोक्तम्[१]– 'अथवा अस्तु तदपि तथापि सर्वमेतावदेव जगति वस्त्विति न निश्चयः' इत्यादि, तदप्यसारम्, यतोऽवधिज्ञानं तदावरणकर्मदेशक्षयोत्थं ततोऽतीन्द्रियमपि तन्न सकलवस्तुविषयम्, केवलज्ञानं तु निर्मूलसकलज्ञानावरणकर्मपरमाण्वपगमसमुत्थं ततः कथमिव तन्न सकलवस्तुविषयं भवेत् ?, न ह्यतीन्द्रियस्य देशादिविप्रकर्षाः प्रतिबन्धकाः, न च केवलप्रादुर्भावे आवरणदेशस्यापि सम्भवः, ततो यद् वस्तु तत् सर्वं भगवतः प्रत्यक्षमेवेति भवति सर्वज्ञस्यैवमात्मनो निश्चयः– एतावदेव जगति वस्त्विति।

यदप्युक्तम्[२]– 'अशुच्यादिरसास्वादप्रसङ्गः' इति तदपि दुरन्तदीर्घपापोदयविजृम्भितम्, अज्ञानतो भगवत्यधिक्षेपकरणात्, यो हि यादृग्भूतोऽशुच्यादिरसो येषां च प्राणिनां यादृग्भूतां प्रीतिमुत्पादयति येषां च विद्वेषं तत् सर्वं तदवस्थतया भगवान् वेत्ति, ततः कथमशुच्यादिरसास्वादप्रसङ्गः ?। अथ यदि तटस्थतया वेत्ति तर्हि न सम्यक्, सम्यक् चेद् यथास्वरूपं वेत्ता तर्हि नियमात्[३] तदास्वादप्रसक्तिः। उक्तं च–

---

१. पृ०४१ पं०२०॥ २. पृ०४२ पं०५॥ ३. **नियमात्स्वाद**° खं०पा०। **नियमास्वाद**° जेमू०, **नियमात्तदास्वाद**° जेसं०। **नियमात् तत् स्वाद**° दे० ॥

तटस्थत्वेन वेद्यत्वे तत्त्वेनाऽवेदनं भवेत्।
तदात्मना तु वेद्यत्वेऽशुच्यास्वादः प्रसज्यते॥१॥

[वार्तिकालं० ३। श्लो० ५७२, पृ० ३३०]

तदसत्, भवान् हि सकर्मा करणाधीनज्ञानः[१] ततो रसं यथावस्थितमवश्यं जिह्वेन्द्रियव्यापारपुरस्सरमास्वादत एव जानाति, भगवांस्तु करणव्यापारनिरपेक्षोऽतीन्द्रियज्ञानी ततो जिह्वेन्द्रियव्यापारसम्पाद्यास्वादमन्तरेणैव रसं यथावस्थितं तटस्थतया सम्यग् वेत्तीति न कश्चिद्दोषः। एतेन पररागादिवेदने रागित्वादिप्रसङ्गापादनमपास्तमवसेयम्, पररागादीनामपि यथावस्थिततया तटस्थेन सता वेदनात्।

यदप्युक्तम्[२]– 'कालतोऽनाद्यनन्तः संसारः' इत्यादि तदप्यसम्यग्, युगपत् सर्ववेदनात्, न च युगपत् सर्ववेदनमसम्भवि, दृष्टत्वात्; तथाहि-सम्यग् जिनागमाभ्यासप्रवृत्तस्य बहुशो विचारितधर्मा-ऽधर्मास्तिकायादिस्वरूपस्य सामान्यतः पञ्चास्तिकायविज्ञानं युगपदपि जायमानमुपलभ्यते, एवमशेषविशेषकलितपञ्चास्तिकायविज्ञानमपि भविष्यति। तथा चायमर्थोऽन्यैरप्युक्तः–

यथा सकलशास्त्रार्थः स्वभ्यस्तः प्रतिभासते।
मनस्येकक्षणेनैव तथाऽनन्तादिवेदनम्॥१॥ [वार्तिकालं० ३। श्लो० ५७९, पृ० ३३०]

यदप्युच्यते– 'कथमतीतं भावि वा वेत्ति ?, विनष्टा-ऽनुत्पन्नत्वेन तयोरभावात्' इति, तदपि न सम्यक्, यतो यद्यपीदानीन्तनकालापेक्षया ते असती तथापि यथाऽतीतमतीते कालेऽवर्त्तिष्ट यथा च भावि वर्त्तिष्यते तथा ते साक्षात्करोति ततो न कश्चिद्दोषः।

स्यादेतत्– यथा भवद्भिर्ज्ञानस्य तारतम्यदर्शनात् प्रकर्षसम्भवोऽनुमीयते तथा तीर्थान्तरीयैरपि, ततो यथा भवत्सम्मततीर्थकरोपदर्शिताः पदार्थराशयः सत्यतामश्नुवते तथा तीर्थान्तरीयसम्मततीर्थकरोपदर्शिता अपि सत्यतामश्नुवीरन्, विशेषाभावाद्, अन्यथा भवत्सम्मततीर्थकरोपदर्शिता अपि असत्यतामश्नुवीरन्। अथ तीर्थान्तरीयसम्मततीर्थकरोपदिष्टाः पदार्थराशयोऽनुमानप्रमाणेन बाध्यन्ते ततो न ते सत्याः, तदयुक्तम्, अनुमानप्रमाणेनातीन्द्रियज्ञानस्य बाधितुमशक्यत्वात्, आह च–

---

१. इन्द्रिय - खंटि०॥ २. पृ०४२ पं०६॥

अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा।
ये भावान् वचनं तेषां नानुमानेन बाध्यते॥१॥

[वाक्यप० १।३८, वार्तिकालं० ३। श्लो० ५३१, पृ० ३२८]

अथ सम्भवन्ति जगति प्रज्ञालवोन्मेषदुर्विदग्धाः कुतर्कशास्त्राभ्याससम्पर्कतो वाचालाः तथाविधाद्भुतेन्द्रजालकौशलवशेन दर्शितामरागम[1]-नभोयान-चामरादिविभूतयः कीर्त्ति-पूजादिलब्धुकामाः स्वयमसर्वज्ञा अपि 'सर्वज्ञा वयम्' इति ब्रुवाणाः, तत एतावदेव न ज्ञायते यदुत-तेषां सर्वोत्तमप्रकर्षरूपमतीन्द्रियज्ञानमभूत्, यदि पुनर्यथोक्तस्वरूपमतीन्द्रियज्ञानमभविष्यत् तर्हि वचनमपि तेषां नाबाधिष्यत, अथ च दृश्यते बाधा ततस्ते कैत[2]वभूमयो न सर्वज्ञा इति प्रतिपत्तव्यम्। तदेतदर्हत्यपि समानम्, न समान[3]म्, अर्हद्वचसि प्रमासंवाददर्शनात्। उक्तं च–

जैनेश्वरे हि वचसि, प्रमासंवाद ईक्ष्यते।
प्रमाणबाधा त्वन्येषामतो द्रष्टा जिनेश्वरः॥१॥ [वार्तिका[4]लं०]

अथ पुरुषमात्रसमुत्थं प्रमाणमतीन्द्रियविषये न साधकं नापि बाधकम्, अविषयत्वात्, समानकक्षतायां हि बाध्य-बाधकभावः। तथा चोक्तम्–

समानविषया यस्माद् बाध्य-बाधकसंस्थितिः।
अतीन्द्रिये च संसारि प्रमाणं न प्रवर्त्तते॥१॥

[वार्तिकालं० ३। श्लो० ५३३, पृ० ३२८]

ततः कथमुच्यते–'अर्हतो वचसि प्रमासंवाददर्शनं प्रमाणबाधा त्वन्येषाम्' ? इति, तदपि न सम्यक्, यतो न भगवान् केवलमतीन्द्रियमस्मादृशामशक्यपरिच्छेदमेवोपदिशति, यदि पुनः तथाभूतमुपदिशेत् तर्हि न कोऽपि तद्वचनतः प्रवर्त्तेत, अतीन्द्रियार्थं वचः सर्वेषामेव विद्यते परस्परविरुद्धं च, ततः कथं तद्वचनतः प्रेक्षावतां प्रवृत्तिः ?, ततोऽवश्यं परान् प्रतिपादयता भगवता परैः शक्यपरिच्छेदमप्युपदेष्टव्यम्, शक्यपरिच्छेदेषु चार्थेषु भगवदुक्तेषु यत् तथा प्रमाणेन संवदनं तत् तद्विषयं साधकं प्रमाणमुच्यते, विपरीतं तु बाधकम्, अस्ति च भगवदुक्तेषु शक्यपरिच्छेदेष्वर्थेषु प्रमासंवादः, तथाहि–घटादयः

---

१. °तदेवागम° डे० सं० पु०॥ २. कपट - खंटि०॥ ३. °नम्, तद्वचसि खंसं०॥ ४. तुलना- "ताथागते हि वचसि प्रमासंवाद इष्यते । प्रमाणबाधा त्वन्येषामतो द्रष्टा तथागतः ॥" - **वार्तिकाल०** ३। श्लो० ५३२, पृ० ३२८॥

पदार्था अनेकान्तात्मका उक्ताः, ते च तथैव प्रत्यक्षतोऽनुमानतो वा निश्चीयन्ते, मोक्षोऽपि च परमानन्दरूपशाश्वतिकसौख्यात्मक उक्तः, ततः सोऽपि युक्त्या सङ्गतिमुपपद्यते, यतः संसारप्रतिपक्षभूतो मोक्षः, संसारे च जन्म-जरा-मरणादिदुःखहेतवो रागादयः, ते च निर्मूलमपगता मोक्षावस्थायामिति न मोक्षे दुःखलेशस्यापि सम्भवः, न च निर्मूलमपगता रागादयो भूयोऽपि जायन्ते, ततस्तत्सौख्यं शाश्वतिकमुपवर्ण्यते।

ननु यदि न तत्र रागादयस्तर्हि न तत्र मत्तकामिनीगाढालिङ्गन-पीनस्तनापीडन-वदनचुम्बन-कराघातादिप्रभवं रागनिबन्धनं सुखम्, नापि द्वेषनिबन्धनं प्रबलवैरितिरस्कारापादनप्रभवम्, नापि मोहनिबन्धनमहङ्कारसमुत्थमात्मीयविनीतपुत्र-भ्रातृप्रभृतिबन्धुवर्गसहवाससम्भवं च, ततः कथमिव स मोक्षो जन्मिनामुपादेयो भवति ?। आह च–

वीतरागस्य न सुखं योषिदालिङ्गनादिजम्।
वीतद्वेषस्य च कुतः शत्रुसेनाविमर्दजम् ?॥१॥
वीतमोहस्य न सुखमात्मीयाभिनिवेशजम्।
ततः किं तादृशा तेन कृत्यं मोक्षेण जन्मिनाम् ?॥२॥

[वार्तिकालं० ३। श्लो० ५६०-५६१, पृ० ३२९]

अपि च– क्षुदादयोऽपि तत्र सर्वथा निवृत्ता इष्यन्ते, ततोऽत्यन्तबुभुक्षाक्षामकुक्षेर्यद् विशिष्टाहारभोजनेन यद्वा ग्रीष्मादौ पिपासापीडितस्य पाटलाकुसुमादिवासितसुगन्धिशीतलसलिलपानेनोपजायते सुखं तदपि तत्र दूरतोऽपास्तप्रसरमिति न कार्यं तेन, तदेतदतीवासमीचीनम्, यतो यद्यपि रागादयः प्रथमतः क्षणमात्रसुखदायितया रमणीयाः प्रतिभासन्ते तथापि ते परिणामपरम्परयाऽनन्तदुःसहनरकादिदुःखसम्पातहेतवः, ततः पर्यन्तदारुणतया विषान्नभोजनसमुत्थमिव न रागादिप्रभवं सुखमुपादेयं प्रेक्षावतां भवति, प्रेक्षावन्तो हि बहुदुःखमपहाय यदेव बहुसुखं तदेव प्रतिपद्यन्ते, यस्तु स्तोकसुखनिमित्तं बहुदुःखमाद्रियते स प्रेक्षावानेव न भवति, किन्तु कुबुद्धिः, रागादिप्रभवमपि च सुखमुक्तनीत्या बहुदुःखहेतुकम्, अपवर्गसुखं चैकान्तिका-ऽऽत्यन्तिकपरमानन्दरूपम्, ततस्तदेव

तत्त्ववेदिनामुपादेयम्, न रागादिप्रभवमिति। यदि पुनर्यदपि तदपि सुखमभिलषणीयं भवतस्तर्हि पानशौण्डानां यद् मद्यपानप्रभवं यच्च गर्त्तासूकराणां पुरीषभक्षणसमुत्थं यच्च रक्षसां मानुषमांसाभ्यवहारसम्भवं यच्च दासस्य सतः स्वामिप्रसादादिहेतुकं यदपि च **पारसीक**देशवासिनो मात्रादिश्रोणीसङ्गमनिबन्धनं तत् सर्वं भवतो द्विजातिभवे सति न सम्पद्यते इति पानशौण्ड्याद्यप्यभिलषणीयम्। अपि च– नरकदुःखमप्राप्तस्य न तद्वियोगसम्भवं सुखमुपजायते ततो नरकदुःखमप्यभिलषणीयम्। अथ विशिष्टमेव सुखमभिलषणीयं न यत् किञ्चित् तर्हि विशिष्टमेकान्तेन[1] सुखं मोक्ष एव विद्यते न रागादौ क्षुदादौ वा, तस्मात् तदेवाभिलषणीयं न शेषमिति। योऽपि च सम्यग्दर्शन-ज्ञान-चारित्ररूपो मोक्षमार्ग उक्तः सोऽपि युक्त्या विचार्यमाणः प्रेक्षावतामुपादेयतामश्नुते। तथाहि– सकलमपि कर्मजालं मिथ्यात्वा-ऽज्ञान-प्राणिहिंसादिहेतुकम्, ततः सकलकर्मनिर्मूलनाय सम्यग्दर्शनाद्यभ्यास एव घटते, नान्यत्। तदेवं भगवदुपदिष्टेषु शक्यपरिच्छेदेष्वर्थेषु प्रत्यक्षेष्वनुमेयेषु च यथाक्रमं प्रत्यक्षा-ऽनुमानसंवाददर्शनाद् मोक्षादिषु च युक्त्योपपद्यमानत्वाद् 'भगवानेव सर्वज्ञः, न सुगतादिः' इति स्थितम्॥

तथा **भद्रं जिनस्य 'वीरस्य'** महावीरस्य। जयति रागादिशत्रुगणमिति जिनः, औणादिको[2] नक्प्रत्ययः, तस्य भद्रं भवतु, अनेनापायातिशयमाह। अपायः-विश्लेषः तस्यातिशयः-प्रकर्षभावोऽपायातिशयः, रागादिभिः सहाऽऽत्यन्तिको वियोग इत्यर्थः।

ननु रागादिभिः सहाऽऽत्यन्तिको वियोगोऽसम्भवी, प्रमाणबाधनात्, तच्च प्रमाणमिदम्– यदनादिमद् न तद् विनाशमाविशति, यथाऽऽकाशम्, अनादिमन्तश्च रागादय इति। किञ्च– रागादयो धर्माः, ते च धर्मिणो भिन्नाः ? अभिन्ना वा ?। यदि भिन्नास्तर्हि सर्वेषामविशेषेण वीतरागत्वप्रसङ्गः, रागादिभ्यो भिन्नत्वात्, विवक्षितपुरुषवत्। अथाभिन्नास्तर्हि तत्क्षये धर्मिणोऽप्यात्मनः क्षयः, तदभिन्नत्वात्, तत्स्वरूपवत्, तथा च कुतस्तस्य वीतरागत्वम् ?, तस्यैवाभावादिति, अत्रोच्यते, इह यद्यपि रागादयो दोषा जन्तोरनादिमन्तस्तथापि कस्यचित् स्त्रीशरीरादिषु यथावस्थितवस्तुतत्त्वावगमेन तेषां

१. °न तत् सुखं खं०॥ २. "**जीण्-शी-दी-बुध्यवि-मीभ्यः कित्॥२६१॥** एभ्यः किद् नः प्रत्ययो भवति। जिं अभिभवे, जिनः - अर्हन्, बुद्धश्च।.... ....॥२६१॥" इति स्वोपज्ञवृत्तिसहिते **हैमे उणादौ**॥

रागादीनां प्रतिपक्षभावनातः प्रतिक्षणमपचयो दृश्यते, ततः सम्भाव्यते विशिष्टकालादिसामग्रीसद्भावे भावनाप्रकर्षविशेषभावतो निर्मूलमपि क्षयः। अथ यद्यपि प्रतिपक्षभावनातः प्रतिक्षणमपचयो दृष्टस्तथापि तेषामात्यन्तिकोऽपि क्षयः सम्भवतीति कथमवसेयम् ?, उच्यते– अन्यत्र तथा प्रतिबन्धग्रहणात्, तथाहि–शीतस्पर्शसम्पाद्या रोमहर्षादयः शीतप्रतिपक्षस्य वह्नेर्मन्दतायां मन्दा उपलब्धाः उत्कर्षे च निरन्वयविनाशधर्माणः, ततोऽन्यत्रापि बाधकस्य मन्दतायां बाध्यस्य मन्दतादर्शनाद् बाधकोत्कर्षेऽवश्यं बाध्यस्य निरन्वयविनाशो वेदितव्यः, अन्यथा बाधकमन्दतायां मन्दताऽपि न स्यात्।

अथास्ति ज्ञानस्य ज्ञानावरणीयं कर्म बाधकम्, ज्ञानावरणीयकर्ममन्दतायां च ज्ञानस्यापि मनाग् मन्दता, अथ च प्रबलज्ञानावरणीयकर्मोदयोत्कर्षेऽपि न ज्ञानस्य निरन्वयो विनाशः, एवं प्रतिपक्षभावनोत्कर्षेऽपि न रागादीनामत्यन्ततयोच्छेदो भविष्यतीति, तदयुक्तम्, द्विविधं हि बाध्यम्-सहभूस्वभावभूतं सहकारिसम्पाद्यस्वभावभूतं च। तत्र यत् सहभूस्वभावभूतं तन्न कदाचिदपि निरन्वयं विनाशमाविशति, ज्ञानं चाऽऽत्मनः सहभूस्वभावभूतम्, आत्मा च परिणामिनित्यः, ततोऽत्यन्तप्रकर्षवत्यपि ज्ञानावरणीय-कर्मोदये न निरन्वयविनाशो ज्ञानस्य, रागादयस्तु लोभादिकर्मविपाकोदयसम्पादित-सत्ताकास्ततः कर्मणो निर्मूलमपगमे तेऽपि निर्मूलमपगच्छन्ति।

नन्वासतां कर्मसम्पाद्या रागादयः तथापि कर्मनिवृत्तौ ते निवर्त्तन्ते इति नावश्यं नियमः, न हि दहननिवृत्तौ तत्कृता काष्ठेऽङ्गारता निवर्त्तते, तदसत्, यत इह किञ्चित् क्वचिन्निवर्त्त्यविकारमापादयति, यथाऽग्निः सुवर्णे द्रवताम्, तथाहि– अग्निनिवृत्तौ तत्कृता सुवर्णे द्रवता निवर्त्तते; किञ्चित् पुनः क्वचिदनिवर्त्त्यविकारारम्भकम्, यथा स एवाग्निः काष्ठे, न खलु श्यामतामात्रमपि काष्ठे दहनकृतं तन्निवृत्तौ निवर्त्तते; कर्म चाऽऽत्मनि निवर्त्त्यविकारारम्भकम्, यदि पुनरनिवर्त्त्यविकारारम्भकं भवेत् तर्हि यदपि तदपि कर्मणा कृतं न कर्मनिवृत्तौ निवर्त्तेत, यथाऽग्निना श्यामतामात्रमपि काष्ठे कृतमग्निनिवृत्तौ; ततश्च यदेकदा कर्मणाऽऽपादितं मनुष्यत्वममरत्वं कृमि-कीटत्वम् अज्ञत्वं शिरोवेदनादि च तत् सर्वकालं तथैवावतिष्ठेत, न चैतद् दृश्यते, तस्मान्निवर्त्त्यविकारारम्भकं कर्म, ततः

कर्मनिवृत्तौ रागादीनामपि निवृत्तिः।

अत्राहु**र्बार्हस्पत्याः**– नैते रागादयो लोभादिकर्मविपाकोदयनिबन्धनाः, किन्तु कफादिप्रकृतिहेतुकाः, तथाहि-कफहेतुको रागः, पित्तहेतुको द्वेषः, वातहेतुकश्च मोहः, कफादयश्च सदैव सन्निहिताः, शरीरस्य तदात्मकत्वात्, ततो न वीतरागत्वसम्भवः, तदयुक्तम्, रागादीनां कफादिहेतुकत्वायोगात्, तथाहि– स तद्धेतुको यो यं न व्यभिचरति, यथा धूमोऽग्निम्, अन्यथा प्रतिनियतकार्य-कारणभावव्यवस्थानुपपत्तेः। न च रागादयः कफादीन् न व्यभिचरन्ति, व्यभिचारदर्शनात्, तथाहि-वातप्रकृतेरपि दृश्येते राग-द्वेषौ, कफप्रकृत्तेरपि द्वेष-मोहौ, पित्तप्रकृतेरपि मोह-रागौ, ततः कथं रागादयः कफादिहेतुकाः ?। अथ मन्येथाः-एकैकाऽपि प्रकृतिः सर्वेषामपि दोषाणां पृथक् पृथग् जनिका तेनायमदोष इति, तदयुक्तम्, एवं सति सर्वेषामपि जन्तूनां समरागादिदोषप्रसक्तेः, अवश्यं हि प्राणिनामेकतमया कयाचित् प्रकृत्या भवितव्यम्, सा चाविशेषेण रागादिदोषाणामुत्पादिकेति सर्वेषामपि समानरागादिताप्रसक्तिः।

अथास्ति प्रतिप्राणि पृथक् पृथगवान्तरः कफादीनां परिणतिविशेषः तेन न सर्वेषां समरागादिताप्रसङ्गः, तदपि न साधीयः, विकल्पयुगलानतिक्रमात्। तथाहि– सोऽप्यवान्तरः कफादीनां परिणतिविशेषः सर्वेषामपि रागादीनामुत्पादकः ? आहोश्विदेकतमस्यैव कस्यचित् ?। तत्र यद्याद्यः पक्षस्तर्हि यावत् स परिणतिविशेषस्तावदेककालं सर्वेषामपि रागादीनामुत्पादप्रसङ्गः, न चैककालमुत्पद्यमाना रागादयः संवेद्यन्ते, क्रमेण तेषां संवेदनात्, न खलु रागाध्यवसायकाले द्वेषाध्यवसायो मोहाध्यवसायो वा संवेद्यते। अथ द्वितीयपक्षः तत्रापि यावत् स कफादिपरिणतिविशेषः तावदेक एव कश्चिद् दोषः प्राप्नोति, अथ च तदवस्थ एव कफादिपरिणतिविशेषे सर्वेऽपि दोषाः क्रमेण परावृत्य परावृत्योपजायमाना उपलभ्यन्ते। अथादृश्यमान एव केवलकार्यविशेषदर्शनोन्नीयमानसत्ताकः तदा तदा तत्तद्रागादिदोषहेतुः कफादिपरिणतिविशेषो जायते तेन न पूर्वोक्तदोषावकाशः; ननु यदि स परिणतिविशेषः सर्वथाऽननुभूयमानस्वरूपोऽपि परिकल्प्यते तर्हि कर्मैव किं नाभ्युपगम्यते ?, एवं हि लोक-शास्त्रमार्गोऽप्याराधितो भवति।

अपि च– स कफादिपरिणतिविशेषः कुतस्तदा तदाऽन्यान्यरूपेणोपजायते ? इति

वक्तव्यम्, देहादिति चेत्, ननु तदवस्थेऽपि देहे भवद्भिः कार्यविशेषदर्शनतः तस्यान्यथाऽन्यथाभवनमिष्यते तत् कथं तद् देहनिमित्तम् ?। न हि यदविशेषेऽपि यद् विक्रियते स विकारस्तद्धेतुक इति वक्तुं शक्यम्, नाप्यन्यो हेतुरुपलभ्यते, तस्मात् तदप्यन्यथाऽन्यथाभवनं कर्महेतुकमेष्टव्यम्, तथा च सति कर्मैवैकमभ्युपगम्यताम्, किमन्तर्गडुना तद्धेतुतया कफादिपरिणतिविशेषाभ्युपगमेन ?।

किञ्च– अभ्यासजनितप्रसराः प्रायो रागादयः, तथाहि– यथा यथा रागादयः सेव्यन्ते तथा तथाऽभिवृद्धिरेव तेषामुपजायते, न प्रहाणिः, तेन समानेऽपि कफादिपरिणतिविशेषे तदवस्थेऽपि च देहे यस्येह जन्मनि परत्र वा यस्मिन् दोषेऽभ्यासः स तस्य प्राचुर्येण प्रवर्त्तते, शेषस्तु मन्दतया, ततोऽभ्याससम्पाद्यकर्मोपचयहेतुका एव रागादयो न कफादिहेतुका इति प्रतिपत्तव्यम्।

अन्यच्च– यदि कफहेतुको रागः स्यात् ततः कफवृद्धौ रागवृद्धिर्भवेत्, पित्तप्रकर्षे तापप्रकर्षवत्, न च भवति, तदुत्कर्षोत्थपीडाबाधिततया द्वेषस्यैव दर्शनात्। अथ पक्षान्तरं गृह्णीथाः, यदुत न कफहेतुको रागः किन्तु कफादिदोषसाम्यहेतुकः, तथाहि– कफादिदोषसाम्ये विरुद्धव्याध्यभावतो रागोद्भवो दृश्यते इति, तदपि न समीचीनम्, व्यभिचारदर्शनात्, न हि यावत् कफादिदोषसाम्यं तावत् सर्वदैव रागोद्भवोऽनुभूयते, द्वेषाद्युद्भवस्याप्यनुभवात्, न च यद्भावेऽपि यन्न भवति तत् तद्धेतुकं सचेतसा वक्तुं शक्यम्, अपि च- एवमभ्युपगमे ये विषमदोषास्ते रागिणो न प्राप्नुवन्ति, अथ च तेऽपि रागिणो दृश्यन्ते।

स्यादेतद्– अलं चसूर्या, तत्त्वं निर्वच्मि-शुक्रोपचयहेतुको रागो नान्यहेतुक इति, तदपि न युक्तम्, एवं ह्यत्यन्तस्त्रीसेवापरतया शुक्रक्षयतः क्षरत्क्षतजानां रागिता न स्यात्, अथ चैतेऽपि तस्यामप्यवस्थायां निकामं रागिणो दृश्यन्ते। किञ्च–यदि शुक्रस्य रागहेतुता तर्हि तस्य सर्वस्त्रीषु साधारणत्वान्नैकस्त्रीनियतो रागः कस्यापि भवेत्, दृश्यते च कस्याप्येकस्त्रीनियतोऽपि रागः। अथोच्येत-रूपस्यापि कारणत्वाद् रूपातिशय-लुब्धस्तस्यामेव रूपवत्यामभिरज्यते, न योषिदन्तरे, उक्तं च–

---

१. **निरर्थकेन** मुटि०॥

रूपातिशयपाशेन विवशीकृतमानसाः।
स्वां योषितं परित्यज्य[1], रमन्ते योषिदन्तरे॥१॥

[वार्तिकालं० २। श्लो० ६५३, पृ० १२३]

तदपि न मनोरमम्, रूपरहितायामपि क्वापि रागदर्शनात्। अथ तत्रोपचारविशेषः समीचीनो भविष्यति तेन तत्राभिरज्यते, उपचारोऽपि च रागहेतुर्न रूपमेव केवलं तेनायमदोष इति, तदपि व्यभिचारि, द्वयेनापि विमुक्तायां क्वचिद्[2] रागदर्शनात्। तस्मादभ्यासजनितोपचयपरिपाकं कर्मैव विचित्रस्वभावतया तदा तदा तत्तत्कारणापेक्षं तत्र तत्र रागादिहेतुरिति कर्महेतुका रागादयः।

एतेन यदपि कश्चिदाह– पृथिव्यादिभूतानां धर्मा एते रागादयः, तथाहि- पृथिव्यम्बुभूयस्त्वे रागः, तेजो-वायुभूयस्त्वे द्वेषः, जल-वायुभूयस्त्वे मोह इति, तदपि निराकृतमवसेयम्, व्यभिचारात्। तथाहि–यस्यामेवावस्थायां रागः सम्मतः तस्यामेवावस्थायां द्वेषो मोहोऽपि च दृश्यते, तत एतदपि यत्किञ्चित्, तस्मात् कर्महेतुका रागादयः, ततः कर्मनिवृत्तौ निवर्त्तन्ते। प्रयोगश्चात्र-ये सहकारिसम्पाद्या यदुपधानादपकर्षिणः ते तदत्यन्तवृद्धौ निरन्वयविनाशधर्माणः, यथा रोमहर्षादयो वह्निवृद्धौ, भावनोपधानादपकर्षिणश्च सहकारिकर्मसम्पाद्या रागादय इति। अत्र सहकारिसम्पाद्या इति विशेषणं सहभूस्वभावबोधादिव्यवच्छेदार्थम्।

यदपि च प्रागुपन्यस्तं[3] प्रमाणम्-'यदनादिमद् न तद् विनाशमाविशति यथाऽऽकाशम्' इति, तदप्यप्रमाणम्, हेतोरनैकान्तिकत्वात्, प्रागभावेन व्यभिचारात्। तथाहि- प्रागभावोऽनादिमानपि विनाशमाविशति, अन्यथा कार्यानुत्पत्तेः।

भावनाधिकारी च सम्यग्दर्शनादिरत्नत्रयसम्पत्समन्वितो वेदितव्यः, इतरस्य तदनुरूपानुष्ठानप्रवृत्त्यभावेन तस्या[4] मिथ्यारूपत्वात्। आह च–

नाणी तवम्मि निरओ, चारित्ती भावणाए जोगो त्ति। [धर्मसं० गा० ११६७] सा च रागादिदोषनिदान-स्वरूप-विषय-फलगोचरा यथाऽऽगममेवमवसेया–

---

१. "तिरस्कृत्य कामिनो योषिदन्तरे" इति **वार्तिकालंकारे** पाठः॥ २. **तत्कार**° खं०, जे१, मां०॥ ३. पृ०५३ पं०१८॥ ४. **तस्य** पा० खंसं० दे० ॥

जं कुच्छियाणुयोगो पयइविसुद्धस्स होइ जीवस्स।
एएसि मो नियाणं बुहाण न य सुंदरं एयं॥१॥
रूवं पि संकिलेसोऽभिस्संगा-ऽपीइमाइलिंगो उ।
परमसुहपच्चणीओ एयं पि असोहणं चेव॥२॥
विसओ य भंगुरो खलु गुणरहिओ तह य तह-ऽतहारूवो।
संपत्तिनिप्फलो केवलं तु मूलं अणत्थाणं॥३॥
जम्म-जरा-मरणाई विचित्तरूवो फलं तु संसारो।
बुहजणनिव्वेयकरो एसो वि तहाविहो चेव॥४॥ [*धर्मसङ्ग्रहणी गा० ११६९-७२]

अपि च- सूत्रानुसारेण ज्ञानादिषु यो नैरन्तर्येणाभ्यासः तद्रूपाऽपि भावना वेदितव्या, तस्या अपि रागादिप्रतिपक्षभूतत्वात्[१], न हि तत्त्ववृत्त्या सम्यग्ज्ञानाद्यभ्यासे व्यापृतमनस्कस्य स्त्रीशरीररामणीयकादिविषये चेतः प्रवृत्तिमातनोति, तथाऽनुपलम्भात्॥

शौद्धोदनीयाः पुनरेवमाहुः-नैरात्म्यादिभावना रागादिक्लेशप्रहाणिहेतुः, नैरात्म्यादिभावनायाः सकलरागादिप्रतिपक्षभूतत्वात्, तथाहि-नैरात्म्यावगतौ नाऽऽत्माभिनिवेशः, आत्मनोऽवगमाभावात्, आत्माभिनिवेशाभावाच्च न पुत्र-भ्रातृ-कलत्रादिष्वात्मीयाभिनिवेशः, आत्मनो हि य उपकारी स आत्मीयः, यश्च प्रतिघातकः स द्वेष्यः, यदा त्वात्मैव न विद्यते किन्तु पूर्वा-ऽपरक्षणत्रुटितानुसन्धानाः पूर्वपूर्वहेतुप्रतिबद्धा ज्ञानक्षणा एव तथा तथोत्पद्यन्ते तदा कः कस्योपकर्त्ता उपघातको वा ?, क्षणानां क्षणमात्रावस्थायितया परमार्थत उपकर्तुमपकर्तुं वा अशक्यत्वात्, तन्न तत्त्ववेदिनः पुत्रादिष्वात्मीयाभिनिवेशो नापि वैरिषु द्वेषः, यस्तु लोकानामात्मा-ऽऽत्मीयाद्यभिनिवेशः सोऽनादिवासनापरिपाकोपनीतो वेदितव्यः, अतत्त्वमूलत्वात्।

ननु यदि न परमार्थतः कश्चिदुपकार्योपकारकभावः तर्हि कथमुच्यते 'भगवान् सुगतः करुणया सकलसत्त्वोपकाराय देशनां कृतवान्' इति ?, क्षणिकत्वमपि च यद्येकान्तेन तर्हि तत्त्ववेदी 'क्षणानन्तरं विनष्टः सन् न कदाचनाप्यहं भूयो भविष्यामि' इति जानानः किमर्थं मोक्षाय यत्नमारभते ?, तदयुक्तम्, अभिप्रायापरिज्ञानात्, भगवान् हि प्राचीनायामवस्थायामवस्थितः सकलमपि जगद् राग-द्वेषादिदुःखसङ्कुलमभिजानानः

१. °पक्षत्वात् खं० जे१,२ देमू०॥

'कथमिदं सकलमपि जगद् मया दुःखादुद्धर्त्तव्यम् ?' इति समुत्पन्नकृपाविशेषो नैरात्म्य-क्षणिकत्वादिकमवगच्छन्नपि तेषामुपकार्यसत्त्वानां निष्क्लेशक्षणोत्पादनाय प्रजाहितो राजेव स्वसन्ततिशुद्धये[१] सकलजगत्साक्षात्करणसमर्थस्वसन्ततिगतविशिष्टक्षणोत्पत्तये[२] यत्नमारभते, सकलजगत्साक्षात्कारमन्तरेण सर्वेषामक्षूणविधानमुपकर्त्तुमशक्यत्वात्, ततः समुत्पन्नकेवलज्ञानः पूर्वाहितकृपाविशेषसंस्कारवशात् कृतार्थोऽपि देशनायां प्रवर्त्तते इति, तदेवं श्रुतमय्या[३] प्रज्ञया निर्दोषं नैरात्म्यादि वस्तुतत्वं परिभाव्य भावतस्तथैव भावयतो जन्तोर्भावनाप्रकर्षविशेषतो वैराग्यमुपजायते, ततो मुक्तिलाभः। यस्त्वात्मानमभिमन्यते न तस्य मुक्तिसम्भवः, यत आत्मनि परमार्थतया विद्यमाने तत्र स्नेहः प्रवर्त्तते, तत्स्नेहवशाच्च तत्सुखेषु परितर्षवान् भवति, तृष्णावशाच्च सुखसाधनेषु दोषान् सतोऽपि तिरस्कुरुते, गुणांस्त्वभूतानपि पश्यति, ततो गुणदर्शी सन् तानि ममत्वविषयीकरोति, तस्माद् यावदात्माभिनिवेशः तावत् संसारः, आह च–

यः[४] पश्यत्यात्मानं तत्रास्याहमिति शाश्वतः स्नेहः।
स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते॥१॥
गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते।
तेनाऽऽत्माभिनिवेशो यावत् तावत् स संसारे॥२॥ [प्रमाणवा० १।२१९-२२०]

तदेतत् सर्वमन्तःकरणकृतावासमहामोहमहीयस्ताविलसितम्, आत्माभावे बन्ध-मोक्षाद्येकाधिकरणत्वायोगात्। तथाहि– यदि नाऽऽत्माऽभ्युपगम्यते किन्तु पूर्वापरक्षणत्रुटितानुसन्धाना ज्ञानक्षणा एव, तथा सति अन्यस्य बन्धोऽन्यस्य मुक्तिः, अन्यस्य क्षुद् अन्यस्य तृप्तिः, अन्योऽनुभविता अन्यः स्मर्त्ता, अन्यश्चिकित्सादुःखमनुभवति अन्यो व्याधिरहितो जायते, अन्यस्तपःपरिक्लेशमधिसहते अपरः स्वर्गसुखमनुभवति, अपरः शास्त्रमभ्यसितुमारभते अन्योऽधिगतशास्त्रार्थो भवति, न चैतद् युक्तम्, अतिप्रसङ्गात्।

सन्तानापेक्षया बन्ध-मोक्षादेरैकाधिकरण्यमिति चेत्, न, सन्तानस्यापि भवन्मतेनाऽनुपपद्यमानत्वात्, सन्तानो हि सन्तानिभ्यो भिन्नो वा स्याद् ? अभिन्नो

---

१. °न्ततिषुद्धये जे१ । °न्ततिबुद्धये दे० विना॥ २. °र्थः स्व° पा० खं० दे० विना ॥ ३. **श्रुतमय्यात्मप्रज्ञया** पा० सं० पु० देसं०॥ ४. तुलना- धर्मसं० टीकायाम् पत्र ३९१-२॥

वा ?। यदि भिन्नः तर्हि पुनरपि विकल्पयुगलमुपढौकते– स किं नित्यः ? क्षणिको वा ?। यदि नित्यस्ततो न तस्य बन्ध-मोक्षादिसम्भवः, आकालमेकस्वभावतया तस्याऽवस्थावैचित्र्यानुपपत्तेः, न च नित्यं किमप्यभ्युपगम्यते, **सर्वं क्षणिकम्** [ ] इति वचनात्। अथ क्षणिकः तर्हि तदेव प्राचीनं बन्ध-मोक्षादिवैयधिकरण्यं प्रसक्तम्। अथाभिन्न इति पक्षः तर्हि सन्तानिन एव न सन्तानः, तदभिन्नत्वात्, तत्स्वरूपवत्, तथा च सति तदवस्थमेव प्राक्तनं दूषणमिति।

स्यादेतत्– न कश्चिदन्यः क्षणेभ्यः सन्तानः, किन्तु य एव कार्य-कारणभावप्रबन्धेन क्षणानां भावः स एव सन्तानः, ततो न कश्चिद्दोषः, तदप्ययुक्तम्, भवन्मते कार्य-कारणभावस्याप्यघटमानत्वात्, तथाहि–प्रतीत्यसमुत्पादमात्रं कार्यकारणभावः, ततो यथा विवक्षितघटक्षणानन्तरं घटक्षणस्तथा पटादिक्षणा अपि, यथा च घटक्षणात् प्रागनन्तरो विवक्षितो घटक्षणस्तथा पटादिक्षणा अपि, ततः कथं प्रतिनियतकार्य-कारणभावावगमः ?।

किञ्च– कारणादुपजायमानं कार्यं सतो वा जायेत ? असतो वा ?। यदि सतः तर्हि कार्योत्पत्तिकालेऽपि कारणं सदिति कार्य-कारणयोः समकालताप्रसङ्गः, न च समकालयोः कार्य-कारणभाव इष्यते, मात्रपत्याद्यविशेषात्[१], घट-पटादीनामपि परस्परं कार्य-कारणभावप्रसङ्गः। अथासत इति पक्षः, तदप्ययुक्तम्, असतः कार्योत्पादायोगात्, अन्यथा खरविषाणादपि तदुत्पत्ति- प्रसक्तेः, न चात्यन्ताभाव-प्रध्वंसाभावयोः कोऽपि विशेषः, उभयत्रापि वस्तुसत्त्वाभावात्। प्रध्वंसाभावे वस्त्वासीत् तेन हेतुरिति चेत्, यदाऽऽसीत् तदा न हेतुः अन्यदा च हेतुरिति साध्वी तत्त्वव्यवस्थितिः।

अन्यच्च-तद्भावे भाव इत्यवगमे कार्य-कारणभावावगमः, स च तद्भावे भावः किं प्रत्यक्षेण प्रतीयते ? उतानुमानेन ?। न तावत् प्रत्यक्षेण, पूर्ववस्तुगतेन हि प्रत्यक्षेण पूर्वं वस्तु परिच्छिन्नम् उत्तरवस्तुगतेन तूत्तरम्, न चैते परस्परं स्वरूपमवगच्छतः, नाप्यन्योऽनुसन्धाता कश्चिदेकोऽभ्युपगम्यते, तत एतदनन्तरमेतस्य भाव इति कथमवगमः ?। नाप्यनुमानेन, तस्य प्रत्यक्षपूर्वकत्वात्, तद्धि लिङ्ग-

---

१. **मात्रपत्याद्य**° नास्ति खंमू० ॥

लिङ्गिसम्बन्धग्रहणपूर्वकं प्रवर्त्तते, लिङ्ग-लिङ्गिसम्बन्धश्च प्रत्यक्षेण ग्राह्यो नानुमानेन, अनुमानेन ग्रहणेऽनवस्थाप्रसक्तेः; न च कार्य-कारणभावविषये प्रत्यक्षं प्रावर्त्तिष्ट, ततः कथं तत्रानुमानप्रवृत्तिः ?, एवं ज्ञानक्षणयोरपि परस्परं कार्य-कारणभावावगमः प्रत्यस्तो वेदितव्यः, तत्रापि स्वेन स्वेन संवेदनेन स्वस्य स्वस्य रूपस्य ग्रहणे परस्परस्वरूपानवधारणाद् 'एतदनन्तरमहमुत्पन्नम् एतस्य चाहं जनकम्' इत्यनवगतेः, तन्न भवन्मतेन कार्य-कारणभावो नापि तदवगमः, ततो याचितकमण्डनमेतद्– एकसन्ततिपतितत्वादेकाधिकरणं बन्ध-मोक्षादिकमिति। एतेन यदुच्यते– 'उपादेयोपादानक्षणानां परस्परं वास्य-वासकभावादुत्तरोत्तरविशिष्टविशिष्टतरक्षणोत्पत्तेः मुक्तिसम्भवः' इति, तदपि प्रतिक्षिप्तमवसेयम्, उपादानोपादेयभावस्यैवोक्तनीत्या-ऽनुपपद्यमानत्वात्। योऽपि च वास्य-वासकभाव उक्तः सोऽपि युगपद्भाविनामेवोपलभ्यते, यथा तिल-कुसुमानाम्। उक्तं चान्यैरपि– **अवस्थिता हि वास्यन्ते, भावा भावैरवस्थितैः।** [*मी० श्लो० वा० निरालम्बन० १८५] तत् कथमुपादेयोपादानक्षणयोर्वास्य-वासकभावः ?, परस्परमसाहित्यात्। उक्तं च–

वास्य-वासकयोश्चैवमसाहित्यान्न वासना।
पूर्वक्षणैरनुत्पन्नो वास्यते नोत्तरः क्षणः॥१॥
उत्तरेण विनष्टत्वान्न च पूर्वस्य वासना। [*मी० श्लो० वा० निरालम्बन० १८२-१८३]

अपि च– वासना वासकाद् भिन्ना वा स्याद् ? अभिन्ना वा ?। यदि भिन्ना तर्हि तया शून्यत्वान्नैवान्यं वासयति, वस्त्वन्तरवत्। अथाभिन्ना तर्हि न वास्ये वासनायाः सङ्क्रान्तिः[२], एवं वासकस्यापि सङ्क्रान्तिः, तदभिन्नत्वात्, तत्स्वरूपवत्, सङ्क्रान्तिश्चेत् तर्हि अन्वयप्रसङ्ग इति यत्किञ्चिदेतत्।

यदप्युक्तम्[३]– 'सकलमपि जगद् राग-द्वेषादिदुःखसङ्कुलमभिजानानः कथमिदं सकलमपि जगद् मया दुःखादुद्धर्तव्यम् ?' इत्यादि, तदपि पूर्वापरासम्बद्धं बन्धकी[४]-भाषितमिव केवलधाष्ट्यसूचकम्, यतो भवन्मतेन क्षणा एव पूर्वापरक्षणत्रुटितानुगमाः

---

१. **वार्तिकालंकारे**ऽपि [३।श्लो० ६६२, पृ० ३५८] इदं दृश्यते ॥ २. **संक्रान्तिः तदभिन्नत्वात्** जैमू१, पा०खं०॥
३. पृ०५८ पं०२५ ॥ ४. स्वैरिणीस्त्रीभाषितमिव - खंटि०॥

परमार्थसन्तः, क्षणानां चावस्थानकालमानमेकपरमाणुव्यतिक्रममात्रम्, अत एवोत्पत्तिव्यतिरेकेण नान्या तेषां क्रिया सङ्गतिमुपपद्यते, [१]**भूतिर्येषां क्रिया सैव, कारकं सैव चोच्यते।** [ ] इति वचनात्। ततो [२]ज्ञानक्षणानामुत्पत्त्यनन्तरं न मनागप्यवस्थानम्, नापि पूर्वापरक्षणाभ्यामनुगमः, तस्मान्न तेषां परस्परस्वरूपावधारणम्, नाप्युत्पत्त्यनन्तरं कोऽपि व्यापारः, ततः कथम् 'अर्थोऽयं मे पुरः साक्षात् प्रतिभासते' इत्येवमर्थनिश्चयमात्रमप्यनेकक्षणसम्भवि अनुस्यूतमुपपद्यते ?, तदभावाच्च कुतः सकलजगतो राग-द्वेषादिदुःखसङ्कुलतया परिभावनम् ? कुतो वा दीर्घतरकालानुसन्धानेन शास्त्रार्थचिन्तनम् ?, यत्प्रभावतः सम्यगुपायमभिज्ञाय कृपाविशेषाद् मोक्षाय घटनं भवेदिति।

ननु सर्वोऽयं व्यवहारो ज्ञानक्षणसन्तत्यपेक्षया, [३]नैकक्षणमधिकृत्य, तत् केयमनुपपत्तिरुद्भाव्यते ?, उच्यते– सुकुमारप्रज्ञो देवानाम्प्रियः सदैव सप्तघटिका-मध्यमिष्टान्नभोजन-मनोज्ञशयनीयशयनाभ्यासेन सुखैधितो न वस्तुयाथात्म्यावगमे चित्तपरिक्लेशमधिसहसे, तेनास्माभिरुक्तमपि न सम्यगवधारयसि। ननु ज्ञानक्षणसन्ततावपि तदवस्थैवानुपपत्तिः, तथाहि– वैकल्पिका अवैकल्पिका वा ज्ञानक्षणाः परस्परमनु-गमाभावादविदितपरस्परस्वरूपाः, न च क्षणादूर्द्ध्वमवतिष्ठन्ते, ततः कथमेष पूर्वापरानुसन्धानरूपो दीर्घकालिकः सकलजगद्दुःखितापरिभावन-शास्त्रविमर्शादिरूपो व्यवहार उपपद्यते ?, अक्षिणी निमील्य परिभाव्यतामेतत्।

यदप्युच्यते **स्वग्रन्थेषु**– **निर्विकल्पकमर्थाकारमुत्पन्नं पूर्वदर्शनाहितवासनाप्रबोधात् तं विकल्पं जनयति येन पूर्वापरानुसन्धानात्मकोऽर्थनिश्चयादि[४]व्यवहारः प्रवर्त्तते** [ ] तदप्येतेनापाकृतमवसेयम्, यतो विकल्[५]पोऽप्येकक्षणात्मकः, ततो विकल्पेऽपि यत् पूर्वक्षणे वृत्तं तदपरक्षणो न वेत्ति, यच्चापरक्षणे वृत्तं न तत् पूर्वक्षणः, तत् कथमेष दीर्घकालिकोऽनुस्यूतैकरूपतया प्रतीयमानोऽर्थनिश्चयादि[६]व्यवहारो घटते ?।

---

१. "क्षणिकाः सर्वसंस्काराः। अस्थिराणां कुतः क्रिया" इति पूर्वार्द्धम् ॥ २. **ज्ञानलक्षणानां क्षणाना**° जे१॥ ३. **नैकं क्षण**° पा० डे० सं० पु०॥ ४. °**दिर्व्यव**° पा० डे० सं०॥ ५. °**ल्पोऽप्यनेकक्षणा**° खंमू०॥ ६. °**दिर्व्यव**° जे१ डे० सं०॥

अपि च– भवन्मतेन ज्ञानस्यार्थपरिच्छेदव्यवस्थाऽपि नोपपद्यते, अर्थाभावे ज्ञानस्यानुत्पादात्[१], अर्थकार्यतया तस्याभ्युपगमात्, **नाकारणं विषयः** [ ] इति वचनात्। न च वाच्यं तत उत्पन्नमिति तस्य परिच्छेदकम्, इन्द्रियस्याप्यर्थवत् परिच्छेदप्रसक्तेः, ततोऽप्युत्पादात्[२], तदभावेऽभावात्। नापि सारूप्यात्, तस्यापि सर्वदेशविकल्पाभ्यामयोगात्। तथाहि– न सर्वात्मनाऽर्थेन सह सारूप्यम्, सर्वात्मनाऽर्थेन सह सारूप्ये ज्ञानस्य जडरूपताप्रसक्तेः, अन्यथा सर्वात्मना सारूप्यायोगात्। नाप्येकदेशेन, सर्वस्य सर्वार्थपरिच्छेदकत्वप्रसङ्गात्, सर्वस्यापि ज्ञानस्य सर्वैरपि वस्तुभिः सह केनचिदंशेनाऽन्ततः प्रमेयत्वादिना सारूप्यसम्भवात्। आह च भवदाचार्योऽपि **धर्मकीर्त्ति**र्ज्ञाननयप्रस्थाने–

सर्वात्मना हि सारूप्ये ज्ञानमज्ञानतां व्रजेत्।
साम्ये केनचिदंशेन[३] सर्वं सर्वस्य वेदनम्॥१॥ [*प्रमाणवा० २।४३५]

न च सारूप्यादर्थपरिच्छेदव्यवस्थितावर्थसाक्षात्कारो भवति, परमार्थतोऽर्थस्य परोक्षत्वात्। ततो योऽयं प्रतिप्राणि प्रसिद्धः सकलैरपीन्द्रियैर्यथायोगमर्थसाक्षात्कारो यच्च गुरूपदेशश्रवणं[४] शास्त्रनिरीक्षणं वा यद्वशात् तत्त्वं ज्ञात्वा मोक्षाय प्रवृत्तिस्तत् सर्वमेकान्तक्षणिकपक्षाभ्युपगमे विरुध्यते।

स्यादेतत्– परमार्थत एतदेव, तथाहि– न ज्ञानं कस्यचित् परिच्छेदकम्, उक्तनीत्या ग्राहकत्वायोगात्, नापि तत् कस्यचित् परिच्छेद्यम्, तत्रापि ग्राह्य-ग्राहकत्वायोगात्, ततो ग्राह्य-ग्राहकाकारातिरिक्तं ज्ञानमेव केवलं स्वसंविदितरूपत्वात् स्वयं प्रकाशते, तेनाद्वैतमेव तत्त्वम्, यस्तु तथाऽर्थनिश्चयादिको व्यवहारः सोऽनादिकालसंलीनवासनापरिपाकसम्पादितो द्रष्टव्यः, तदप्ययुक्तम्, वासनाया अपि विचार्यमाणाया अघटमानत्वात्। तथाहि– सा वासना असती ? सती वा ?। न तावदसती, असतः खरविषाणस्येव सकलोपाख्याविकलतया तथातथार्थप्रतिभासहेतुत्वायोगात्। अथ सती तर्हि सा ज्ञानाद् व्यत्यरैक्षीद् ? न वा ?, व्यत्यरैक्षीच्चेदद्वैतहानिः, द्वयस्याभ्युपगमात्।

---

१. **ज्ञानस्योत्पा**° जे१; खंसं० विना ॥ २. °त्पादाभावेऽभावात् खं० सं० मासं० विना ॥ ३. °न स्यात् सर्वं सर्ववेदनम् धर्मसं० टीकायां पत्र ६९-१॥ ४. °पदेशेन श्रवणं पा० ॥

अपि च– सा ज्ञानाद् व्यतिरिक्ता सती एकरूपा वा[१] स्यादनेकरूपा वा ?। न तावदेकरूपा एकरूपत्वे तस्या नील-पीताद्यनेकप्रतिभासहेतुत्वायोगात्, स्वभावभेदेन विना भिन्नभिन्नार्थक्रियाकरणविरोधात्। अथानेका तर्हि नामान्तरेणार्थ एव प्रतिपन्नः, तथाहि– सा वासना ज्ञानाद् व्यतिरिक्ता अनेकरूपा च, अर्थोऽप्येवंरूप एवेति। अथाव्यतिरिक्ता साऽपि च पूर्वविज्ञानजनिता विशिष्टज्ञानान्तरोत्पादनसमर्था शक्तिः, आह च **प्रज्ञाकरगुप्तः**– **वासनेति हि पूर्वविज्ञानजनितां शक्तिमामनन्ति वासनास्वरूपविदः**[२] **[वार्तिकालं० ३। श्लो० ६४५, पृ० ३५६]**। एवं तर्हि पूर्वपूर्वविज्ञानजनिताः कालभेदेन तत्तद्विशिष्टविशिष्टतर-ज्ञानोत्पादनसमर्थाः शक्तयोऽनेकाः प्रबन्धेनानुवर्तमानास्तिष्ठन्ति, तत एकस्मिन्नपि ज्ञानक्षणेऽनेका वासनाः सन्ति, शक्तीनामेव वासनात्वेनाभ्युपगमात्, तासां च ज्ञानक्षणादव्यतिरेकादेकस्याः प्रबोधे सर्वासामपि प्रबोधः प्राप्नोति, अन्यथा-ऽव्यतिरेकायोगात्, ततो युगपदनन्तविज्ञानानामुदयप्रसङ्गः, स चायुक्तः, प्रत्यक्ष-बाधितत्वात्। अन्यच्च– ज्ञाने विनश्यति तदव्यतिरेकात् ता अपि निरन्वयमेव विनष्टाः, ततः कथं तत्सामर्थ्यात् कालभेदेन तत्तद्विशिष्ट-विशिष्टतरज्ञानान्तरप्रसूतिः ?।

स्यादेतत्– पूर्वमेव विज्ञानं पाटवाधिष्ठितं वासना, न तज्जनिता शक्तिः, उक्तदोषप्रसङ्गात्, तच्च पूर्वं विज्ञानं किञ्चिदनन्तरं तथा तथा विशिष्टं ज्ञानं जनयति, किञ्चित् कालान्तरे, यथा जाग्रद्दशाभाविज्ञानं स्वप्नज्ञानम्, न च व्यवहितादु-त्पत्तिरसम्भाव्या, दृष्टत्वात्, तथाहि– अनुभवाच्चिरकालातीतादपि स्मृतिरुदयमासादयन्ती दृश्यते, तदप्ययुक्तम्, तत्राप्युक्तदोषानतिक्रमात्, तद्धि पूर्वविज्ञानं निरन्वयमेव विनष्टं न तस्य कोऽपि धर्मः क्षणान्तरेऽनुगच्छति, ततः कथं ततोऽनन्तरं कालान्तरे वा विशिष्टं ज्ञानमुदयते ?, एवं हि तन्निर्हेतुकमेव परमार्थतो भवेत्। अथ पूर्वं विज्ञानं प्रतीत्य तदुत्पद्यते तत् कथं तन्निर्हेतुकम् ?, क्रीडनशीलो देवानाम्प्रियो यदेवमेवास्मान् पुनः पुनरायासयति, ननु यदा यत् पूर्वं विज्ञानं न तदा तद् विशिष्टं ज्ञानमुपजायते यदा च तदुपजायते न तदा पूर्वविज्ञानस्य लेशोऽपि तत् कथं तन्न निर्हेतुकम् ?। यदप्युक्तम्[३]– 'किञ्चित् कालान्तरे' इति, तदपि न्यायबाह्यम्, चिरविनष्टस्य कार्यकरणायोगात्,

---

१. **वा** नास्ति खं० विना॥ २. °**विदः अनेन तर्हि** पा० मांसं० दे० विना ॥ ३. पं० १६॥

अन्यथा चिरविनष्टेऽपि शिखिनि केकायितं भवेत्। ननु चिरविनष्टादप्यनुभवात् स्मृतिरुदयमासादयन्ती दृश्यते, न च दृष्टेऽनुपपन्नता, तद्वद् ज्ञानान्तरमपि भविष्यति को दोषः ?, उच्यते– दृश्यते चिरविनष्टादप्यनुभवात् स्मृतिः, केवलं साऽपि भवन्मतेन नोपपद्यते, तत्राप्युक्तदोषप्रसङ्गात्, ततोऽयमपरो भवतो दोषः। न च दृष्टमित्येव यथाकथञ्चित् परिकल्पनामधिसहते, किन्तु प्रमाणोपपन्नम्, तत्र यथा भवत्परिकल्पना तथा न किमप्युपपद्यते, ततोऽवश्यमन्वयि ज्ञानमभ्युपगन्तव्यम्, तथा च सति न कश्चिद् दोषः, सर्वस्यापि स्मृत्यादेरुपपद्यमानत्वात्,

तथाहि– अनुभवेन पटीयसाऽविच्युतिरूपधारणासहितेनाऽऽत्मनि वासनापरपर्यायः संस्कार आधीयते, स च यावदवतिष्ठते तावत् तादृशार्थदर्शनादाभोगतो वा स्मृतिरुदयते, संस्काराभावे तु न, ततोऽन्वयिज्ञानाभ्युपगमे परमार्थतोऽनुसन्धातुरेकस्याभ्युपगमात्, कार्य-कारणभावावगमो निखिलजगद्दुःखितापरिभावनं शास्त्रपौर्वापर्यपर्यालोचनेन मोक्षोपायसमीचीनताविवेचनमित्यादि सर्वमुपपद्यते, तन्न नैरात्म्यादिभावना रागादिक्लेशप्रहाणिहेतुः, तस्या मिथ्यारूपत्वात्।

यदपि चोक्तम्– 'आत्मनि[१] परमार्थतया विद्यमाने तत्र स्नेहः प्रवर्त्तते' इति तत्रार्वाचीनावस्थायामेतदिष्यत एव, अन्यथा मोक्षायापि प्रवृत्त्यनुपपत्तेः, तथाहि– यत एवाऽऽत्मनि स्नेहः तत एव प्रेक्षावतामात्मनो दुःखपरिजिहीर्षया सुखमुपादातुं यत्नः, तत्र संसारे सर्वत्रापि दुःखमेव केवलम्। तथाहि– नरकगतौ कुन्ताग्रभेद-करपत्रशिरःपाटन-शूलारोप-कुम्भीपाका-ऽसिपत्रवनकृतकर्णनासिकादिच्छेद-कदम्बवालुका-पथगमनादिरूपमनेकप्रकारं दुःखमेव निरन्तरम्, नाक्षिनिमीलनमात्रमपि तत्र सुखम्; तिर्यग्गतावपि अङ्कुश-कशाभिघात-प्राजनकतोद-वध-बन्ध-रोग-क्षुत्पिपासादि-प्रभवमनेकं दुःखम्; मनुष्यगतावपि परप्रेष[२]-गुप्तिगृहप्रवेश-धनबन्धुवियोगा-ऽनिष्टसम्प्रयोग-रोगादिजनितं विविधमनेकं दुःखम्; देवगतावपि च परगतविशिष्टद्युति-विभवदर्शनात् मात्सर्यम्, आत्मनि तद्विहीने विषादः, च्युतिसमये चातिरमणीयविमान-

---

१. पृ० ५९ पं० ८॥ २. **परप्रेष्य०** जे२ मां० दे०। "**प्रस्यैषैष्योढोढ्यूहे स्वरेण** ।१।२।१४।..... प्रैषः प्रैष्यः..... कथं प्रेषः प्रेष्यः ? ईषे ईष्ये च भविष्यति... ॥ - **सिद्धहेम०** बृहद्वृत्तिः ॥

वन-वापी-स्तूप-देवाङ्गनावियोगमनिष्टजन्मसम्पातं चाऽवेक्षमाणस्य तप्तायो-भाजननिक्षिप्तशफरादप्यधिकतरं दुःखम्; यदपि च मनुष्यगतौ देवगतौ वा किमप्यापातरमणीयं कियत्कालभावि विषयोपभोगसुखं तदपि विषसम्मिश्रभोजनसुखमिव पर्यन्तदारुणत्वादतीव विदुषामनुपादेयम्; तन्न संसृतौ क्वापि विदुषामास्थोपनिबन्धो युक्तः। यत्तु निःश्रेयसपदमधिरूढस्य सुखं तत् परमानन्दरूपमपर्यवसानं च, तच्च प्रायो युक्तिलेशेन प्रागेवोपदर्शितम्, आगमतो वाऽनुसर्त्तव्यम्, आगमप्रमाणबलाद्धि सकलमपि परलोकादिस्वरूपं यथावदवगम्यते, नान्यतः, तेन यदुच्यते **प्रज्ञाकरगुप्तेन**– **दीर्घकालसुखादृष्टाविच्छा तत्र कथं भवेत् ?। [वार्तिकालं० २। श्लो० ८३३, पृ०१५३]** इति, तदपास्तमवसेयम्, आगमतो दीर्घकालसुखस्य दर्शनात्।

न चाऽऽगमस्य न प्रामाण्यम्, तदप्रामाण्ये सकलपरलोकानुष्ठानप्रवृत्त्यनुपपत्तेः, उपायान्तराभावात्, तत आगमबलादुक्तस्वरूपमोक्षसुखमवेत्य तत्राऽऽगमे सर्वात्मना निषण्णमानसः संसाराद् विरक्तो यद् यत् संसारहेतुः तत्तत् परिजिहीर्षुररक्तद्विष्टः सर्वकर्मनिर्मूलनाय प्रकर्षेण यतते। तस्य चैवं प्रयतमानस्य कालक्रमेण विशिष्टकालादिसामग्रीसम्प्राप्तौ प्रतनूभूतकर्मणः सकलमोहविकारप्रादुर्भावविनिवृत्ते-रणिमाद्यैश्वर्यलब्धावपि नौत्सुक्यमुपजायते, अत एव च तस्य मोक्षेऽपि न स्पृहाऽभिष्वङ्गापरपर्याया, तस्या अपि मोहविकारत्वात्, केवलं सा संसाराद् विरक्तिहेतुः स्वयमपि च परम्परानिरनुबन्धिनीत्यर्वाचीनावस्थायां प्रशस्यते।

ननु यदि मोक्षेऽपि न स्पृहा कथं तर्हि तदर्थं प्रवृत्त्युपपत्तिः ?, न, लोकेऽपि स्पृहाव्यतिरेकेणापि तत्तत्कार्यकरणाय प्रवृत्तिदर्शनात्। तथाहि– दृश्यन्ते केचिद् गम्भीराशया अभिष्वङ्गात्मिकां स्पृहामन्तरेणापि यथाकालं भोजनाद्यनुतिष्ठन्तः, तथाविधौत्सुक्य-लाम्पट्याद्यदर्शनात्। अपि च– यथा न मोक्षे स्पृहा तथा न संसारेऽपि, संसारादत्यन्तं विरक्तत्वात्, ततः सकलमपि संसारहेतुं परित्यजन्तः कथमिव संसारपरिक्षये मोक्षस्पृहाव्यतिरेकेणापि न मुक्तिभाजः ?। तदेवं सर्वत्र स्पृहारहितस्य सूत्रोक्तनीत्या

---

१. °सम्मिश्र° पा० विना॥ २. संसारे - खंटि०॥ ३. °दमुग° जे१,२ मां०॥ ४. °त्यन्तवि° पा० डे० सं० पु०॥ ५. °हेतुकं परि° जे१,२ मां०॥

ज्ञानादिषु यतमानस्य भावनाप्रकर्षे सति अशेषरागादिकर्मपरिक्षयतो भवति मुक्तिः। एतेन यदुक्तम्[१]– 'तत्स्नेहवशाच्च तत्सुखेषु परितर्षवान् भवति' इत्यादि, तदपि निर्विषयमवगन्तव्यम्, उक्तनीत्या तत्त्ववेदिनः परितर्षाद्यभावादिति स्थितम्॥

साङ्ख्याः पुनराहुः– प्रकृति-पुरुषान्तरपरिज्ञानान्मुक्तिः। तथाहि–

शुद्धचैतन्यरूपोऽयं[२] पुरुषः परमार्थतः।
प्रकृत्यन्तरमज्ञात्वा मोहात् संसारमाश्रितः॥१॥ [वार्तिकालं० २। श्लो० ८४६, पृ०१५६]

ततः प्रकृतेः सुखादिस्वभावाया यावन्न विवेकेन ग्रहणं तावन्न मुक्तिः, केवलज्ञानोदये तु मुक्तिः, तदप्यसत्, आत्मा ह्येकान्तनित्यः, सुखादयस्तूत्पाद-व्ययधर्माणः, ततो विरुद्धधर्मसंसर्गादात्मनः प्रकृतेर्भेदः प्रतीत एव, किं न मुक्तिः ?। अथैतदेव संसारी न पर्यालोचयति ततो न मुक्तिः, यद्येवं तर्हि सर्वदाऽप्यमुक्तिरेव प्राप्ता, विवेकाध्यवसायस्यासम्भवात्। तथाहि– यावत् संसारी तावन्न विवेकपरिभावनम्, अथ च विवेकपरिभावने संसारित्वव्यपगमः, ततो विवेकाध्यवसायासम्भवान्न कदाचिदपि संसाराद् विप्रमुक्तिः।

अपि च– सृष्टेरपि प्रागात्मा केवल इष्यते, ततस्तस्य कथं संसारः ?, कथं वा मुक्तस्य सतो न भूयोऽपि ?। अथ सृष्टेः प्रागात्मनो दिदृक्षा ततो दिदृक्षावशात्[३] प्रधानेन सहैकतामात्मनि पश्यतः संसारः, मुक्तिस्तु प्रकृतेर्दुष्टतामवधार्य प्रकृतिविरागतो भवति, ततो न पुनः प्रकृतिविषया दिदृक्षेति न भूयः संसारः, तदप्ययुक्तम्[४], स्वकृतान्तविरोधात्। तथाहि– दिदृक्षा नाम द्रष्टुमभिलाषः, स च पूर्वदृष्टेष्वर्थेषु तथास्मरणतो भवति, न च प्रकृतिः पूर्वं कदाचनाऽपि दृष्टा, तत् कथं तद्विषयौ स्मरणा-ऽभिलाषौ ?। अपि च– स्मरणा-ऽभिलाषौ प्रकृतिविकारत्वात् प्रकृतेर्भाविनौ, स्मरणा-ऽभिलाषाभ्यां च प्रकृत्यनुगम इत्यन्योन्याश्रयः। आह च–

अभिलाष-स्मरणयोः, प्रकृतेरेव वृत्तितः।
अभिलाषाच्च तद्वृत्तिरित्यन्योन्यसमाश्रयः॥१॥ [वार्तिकालं० २। श्लो० ८५१, पृ०१५६]

---

१. पृ० ५९ पं० ९॥ २. 'शुद्धबोधस्वभावोऽयं' इति **वार्तिकालङ्कारे** पाठः ॥ ३. प्रकृत्या सह - खंटि०॥ ४. स्वसिद्धान्त - खंटि०॥

अथानादिवासनावशात् प्रकृतिविषयौ स्मरणा-ऽभिलाषौ, तदप्यसत्, वासनाया अपि प्रकृतिविकारतया प्रकृतेः पूर्वमभावात्। अथाऽऽत्मस्वभावरूपा सा वासना तर्हि तस्याः कदाचनाऽप्यात्मन इवापगमासम्भवात् सर्वदाऽप्यमुक्तिरेवेति यत्किञ्चिदेतत्।

यदप्युक्तम्[१]– 'रागादयो धर्माः, ते च किं धर्मिणो भिन्नाः ? अभिन्ना वा ?' इत्यादि, तदप्ययुक्तम्, भेदा-ऽभेदपक्षस्य जात्यन्तरस्याभ्युपगमात्, केवलभेदा-ऽभेदपक्षे धर्म-धर्मिभावस्यानुपपद्यमानत्वात्। तथाहि– धर्म-धर्मिणोरेकान्तेन भेदेऽभ्युपगम्यमाने धर्मिणो निःस्वभावतापत्तिः, स्वभावस्य धर्मत्वात्, तस्य च ततोऽन्यत्वात्। स्वो भावः स्वभावः, तस्यैवाऽऽत्मीया सत्ता, न तु तदर्थान्तरं धर्मरूपम्, ततो न निःस्वभावतापत्तिरिति चेत्, न, इत्थं स्वरूपसत्ताभ्युपगमे तदपरसत्तासामान्ययोगकल्पनाया वैयर्थ्यप्रसङ्गात्। अपि च– यद्येकान्तेन धर्म-धर्मिणोर्भेदः ततो धर्मिणो ज्ञेयत्वादिभिः धर्मैरननुवेधात्[२] तस्य सर्वथाऽनवगमप्रसङ्गः, न ह्यज्ञेयस्वभावं ज्ञातुं शक्यत इति, तथा च सति तदभावप्रसङ्गः, कदाचिदप्यवगमाभावात्, तथापि तत्सत्त्वाभ्युपगमेऽतिप्रसङ्गः, अन्यस्यापि यस्य कस्यचित् कदाचिदप्यनवगतस्य षष्ठभूतादेर्भावापत्तेः। एवं च धर्म्यभावे धर्माणामपि ज्ञेयत्व-प्रमेयत्वादीनां निराश्रयत्वादभावापत्तिः, न हि धर्म्याधाररहिताः क्वापि धर्माः सम्भवन्ति, तथाऽनुपलब्धेः। अन्यच्च-परस्परमपि तेषां धर्माणामेकान्तेन भेदाभ्युपगमे सत्त्वाद्यननुवेधात् कथं भावाभ्युपगमः ?, तदन्यसत्त्वादिधर्माभ्युपगमे च धर्मित्वप्रसक्तिरनवस्था च, तन्नैकान्तभेदपक्षे धर्म-धर्मिभावः।

नाप्येकान्ताभेदपक्षे, यतस्तस्मिन्नभ्युपगम्यमाने धर्ममात्रं वा स्याद् धर्मिमात्रं वा, अन्यथैकान्ताभेदानुपपत्तेः, अन्यतराभावे चान्यतरस्याप्यभावः, परस्परनान्तरीयकत्वात्, धर्मनान्तरीयको हि धर्मी, धर्मिनान्तरीयकाश्च धर्माः, ततः कथमेकाभावेऽपरस्यावस्थानम् ? इति। कल्पितो धर्म-धर्मिभावः ततो न दूषणमिति चेत्, तर्हि वस्त्वभावप्रसङ्गः, न हि धर्म-धर्मिस्वभावरहितं किञ्चिद् वस्त्वस्ति, धर्म-धर्मिभावश्च कल्पित इति तदभावप्रसङ्गः। धर्मा एव कल्पिता न धर्मी तत् कथमभावप्रसङ्गः ? इति चेत्, न, धर्माणां कल्पनामात्रत्वाभ्युपगमेन परमार्थतोऽसत्त्वाभ्युपगमात्, तदभावे च

१. पृ० ५३ पं० १९, तुलना- आव० मल० पृ० ३३६ (गा०६४०) ॥ २. असबन्धात् - खंटि० ॥

धर्मिणोऽप्यभावापत्तेः।

अथ तदेवैकं स्वलक्षणं सकलसजातीय-विजातीयव्यावृत्त्येकस्वभावं धर्मि, व्यावृत्त्यनिबन्धनाश्च या व्यावृत्तयो भिन्ना इव [१]कल्पितास्ता धर्माः, ततो न कश्चिन्नो दोषः, तदप्ययुक्तम्, एवं कल्पनायां वस्तुनोऽनेकान्तात्मकताप्रसक्तेः, अन्यथा सकलसजातीय-विजातीयव्यावृत्त्ययोगात्, न हि येनैव स्वभावेन घटाद् व्यावर्त्तते पटस्तेनैव स्तम्भादपि, स्तम्भस्य घटरूपताप्रसक्तेः, तथाहि– घटाद् व्यावर्त्तते घटव्यावृत्तिस्वभावतया, स्तम्भादपि चेद् घटव्यावृत्तिस्वभावतयैव व्यावर्त्तते तर्हि बलात् स्तम्भस्य घटरूपताप्रसक्तिः, अन्यथा ततस्तत्स्वभावतया व्यावृत्त्ययोगात्। तस्माद् यतो यतो व्यावर्त्तते तत्तद्व्यावृत्तिनिमित्तभूताः स्वभावा अवश्यमभ्युपगन्तव्याः, ते च नैकान्तेन धर्मिणोऽभिन्नाः, तदभावप्रसङ्गात्, तथा च तदवस्थ एव पूर्वोक्तो दोषः, तस्माद् भिन्नाऽभिन्नाः। भेदा-ऽभेदोऽपि धर्म-धर्मिणोः कथम् ? इति चेत्, उच्यते, इह यद्यपि तादात्म्यतो [२]धर्मिणा धर्माः सर्वेऽपि लोलीभावेन व्याप्ताः तथाऽपि 'अयं धर्मी एते धर्माः' इति परस्परं भेदोऽप्यस्ति, अन्यथा तद्भावानुपपत्तिः, तथा च सति प्रतीतिबाधा; मिथो भेदेऽपि च विशिष्टान्योन्यानुवेधेन सर्वधर्माणां धर्मिणा व्याप्तत्वादभेदोऽप्यस्ति, अन्यथा तस्य धर्मा [३]इति सङ्गानुपपत्तेः। ततश्च न सर्वेषां वीतरागत्वप्रसङ्गः, केवलभेदस्यानभ्युपगमात्; नापि दोषक्षयवदात्मनोऽपि क्षयः, केवलाभेदस्याप्यनभ्युपगमादिति सर्वं सुस्थम्।

ननु येनैव क्रमेण भगवतोऽतिशयलाभस्तेनैव क्रमेण तदभिधानं युक्तिमत्, नान्यथा, भगवतश्च प्रथमतोऽपायापगमातिशयस्य लाभः पश्चाद् ज्ञानातिशयस्य, तत् किमर्थं व्युत्क्रमनिर्देशः ? उच्यते– **फलप्रधानाः समारम्भाः** इति ज्ञापनार्थम्। तथा **भद्रं** कल्याणं भवतु, **सुरैः** शक्रादिभिः **असुरैः** चमरादिभिर्नमस्कृतस्य, अनेन पूजातिशयमाह। न हि विभवानुरूपां भगवतः पूजामकृत्वा सुरा-ऽसुरा नमस्कृतिक्रियायां प्रवृत्तिमातेनुः, तथाकल्पत्वात्, पूजां च ते कृतवन्तोऽष्टमहाप्रातिहार्यलक्षणाम्। तानि च

---

१. **विकल्पि**° जेसं१, जे२, मां० दे० ॥ २. **धर्मिणो धर्मो**: खं० पु०। आव० मलय० टीकायां मूलनिष्टङ्कितपाठसमानः पाठः॥ ३. **इति प्रसंगा**° पा० खंमू० विना। **इति सम्बन्धानुपपत्तेः** आव० मलय० टीकायाम् पृ०३३७A॥

महाप्रातिहार्याण्यमूनि–

अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यो ध्वनिश्चामरमासनं च।
भामण्डलं दुन्दुभिरातपत्रं, सत्प्रातिहार्याणि जिनेश्वराणाम्॥१॥ [ ]

पूजातिशयश्चान्यथानुपपत्त्या वागतिशयमाक्षिपति, न हि वागतिशयमन्तरेण तथा पूजातिशयो भवति, सामान्यकेवलिनामदर्शनात्। तदेवं ज्ञानातिशयादयश्चत्वारो मूलातिशया उक्ताः। एते च देहसौगन्ध्यादीनामतिशयानामुपलक्षणम्, एतेषु सत्सु तेषामवश्यं भावात्।

तथा **भद्रं** कल्याणं भवतु **धूतरजसः**, **धूतं** कम्पितं स्फेटितं **रजः** बध्यमानं कर्म येन स धूतरजाः, तस्य। अनेन सकलसांसारिकक्लेशविनिर्मुक्तावस्थामाह, यतो बध्यमानकं कर्म रजो भण्यते, बध्यमानकर्माभावश्चायोगिसिद्धावस्थां गतस्य, नार्वाचीनावस्थायाम्। यत उक्तं सूत्रे– [1] **जाव णं एस जीवे एयइ वेयइ चलइ फंदइ घट्टइ खुब्भइ उदीरइ तं तं भावं परिणमइ ताव णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा, नो चेव णं अबंधए सिया [ ]** तत्र मिथ्यादृष्ट्यादयो मिश्रवर्जिता अप्रमत्तान्ता आयुर्बन्धकालेऽष्टानामपि कर्मणां बन्धकाः, शेषकालं त्वायुर्वर्जानां सप्तानाम्, एतेषामेव सप्तकर्मणां मिश्रा-ऽपूर्वकरणा-ऽनिवृत्तिबादरा अपि बन्धकाः, सूक्ष्मसम्पराया मोहा-ऽऽयुर्वर्जानां षण्णां कर्मणाम्, उपशान्तमोह-क्षीणमोह-सयोगिकेवलिनः सातवेदनीयस्यैवैकस्य, तच्च सातवेदनीयं तेषां द्विसामयिकम्, तृतीयसमये-ऽवस्थानाभावात्, शैलेशीप्रतिपत्तेरारभ्य पुनर्योगाभावादबन्धकाः। उक्तं च–

[2] सत्तविहबंधगा होंति पाणिणो आयुवज्जगाणं तु।
तह सुहुमसंपराया छव्विहबंधा विणिद्दिट्ठा॥१॥
मोहा-ऽऽउयवज्जाणं पयडीणं ते उ बंधगा भणिया।
उवसंत-खीणमोहा केवलिणो एगविहबंधा॥२॥

---

१. यावत् खलु एष जीवः एजते व्येजते चलति स्पन्दते घट्टयति क्षुभ्यति उदीरयति तं तं भावं परिणमते तावत् खलु अष्टविधबन्धको वा सप्तविधबन्धको वा षड्विधबन्धको वा एकविधबन्धको वा, नैव खलु अबन्धकः स्यात्॥

२. सत्तविधबन्धका भवन्ति प्राणिनः आयुर्वर्जानां तु। तथा सूक्ष्मसम्परायाः षड्विधबन्धा विनिर्दिष्टाः॥१॥ मोहायुर्वर्जानां प्रकृतीनां ते तु बन्धका भणिताः। उपशान्तक्षीणमोहौ केवलिनः एकविधबन्धाः॥२॥ ते पुनः द्विसमयस्थितिकस्य बन्धकाः, न पुनः सम्परायस्य। शैलेषीप्रतिपन्नाः अबन्धका भवन्ति विज्ञेयाः॥

ते पुण दुसमयठिइयस्स बंधगा, न उण संपरायस्स।
सेलेसीपडिवन्ना अबंधगा होंति विण्णेया॥३॥ [*श्रावकप्रज्ञप्ति गा० ३०६-८, *पञ्चाशक० १६ गा० ४०-४२]

अथ भगवान् संसारातीतत्वात् सदैव परमकल्याणरूपः तत् किमेवमुच्यते 'तस्य भद्रं भवतु' ?, न च [१]स्तोत्रा भणितं सर्वमेव तथा भवति, अन्यत्र तथाऽदर्शनात्, अत्रोच्यते, सत्यमेतत्, तथाप्येवमभिधानं कर्तृ-श्रोतॄणां कुशलमनो-वाक्कायप्रवृत्तिकारणम्, अतो न दोषः॥३॥

तदेवं वर्त्तमानतीर्थाधिपतित्वेनाऽऽसन्नोपकारित्वाद् **वर्द्धमानस्वामिनो** नमस्कारमभिधाय सम्प्रति 'तीर्थकरानन्तरं सङ्घः पूज्यः' इति परिभावयन् सङ्घस्य नगररूपकेण स्तवमाह–

[सू०२, गा०४-१७] गुणभवणगहण ! सुयरयणभरिय ! दंसणविसुद्धरच्छागा।
संघणगर ! भद्दं ते अक्खंडचरित्तपागारा !॥४॥

गुणभवणेत्यादि। **गुणा** इह उत्तरगुणा गृह्यन्ते, मूलगुणानामग्रे चारित्रशब्देन गृह्यमाणत्वात्, ते चोत्तरगुणाः पिण्डविशुद्ध्यादयः। यत उक्तम्–

पिंड[२]स्स जा विसोही समिईओ भावणा तवो दुविहो।
पडिमा अभिग्गहा वि य उत्तरगुण मो वियाणाहि॥१॥ [ ]

त एव भवनानि, **तैर्गहनं** गुपिलं प्रचुरत्वादुत्तरगु[३]णानां **गुणभवनगहनम्**, सङ्घनगरमभिसम्बध्यते, तस्याऽऽमन्त्रणं हे **गुणभवनगहन** !। तथा '**श्रुतरत्नभृत** !' **श्रुतान्ये**व आचारादीनि निरुपमसुखहेतुत्वाद् रत्नानि श्रुतरत्नानि, **तैर्भृतं** पूरितम्, तस्याऽऽमन्त्रणं हे **श्रुतरत्नभृत** !। तथा '**दर्शनविशुद्धरथ्याक** !', इह **दर्शनं** प्रशम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्यलिङ्गगम्यमात्मपरिणामरूपं सम्यग्दर्शनमभिगृह्यते। तच्च क्षायिकादिभेदात् त्रिधा। तद्यथा-क्षायिकं क्षायोपशमिकमौपशमिकं च। उक्तं च–

सम्मत्तं पि य तिविहं, खओवसमियं तहोवसमियं च। खइयं च
[*धर्मसङ्ग्रहणी गा० ७९६] इति।

---

१. स्तुतिकर्त्रा इत्यर्थः॥ २. पिण्डस्य या विशुद्धिः समितयः भावनाः तपो द्विविधम्। प्रतिमा अभिग्रहा अपि च उत्तरगुणा [इति] विजानीहि॥ ३. °गुणानां नास्ति पा० विना ॥

तत्र त्रिविधस्यापि दर्शनमोहनीयस्य क्षयेण-निर्मूलमपगमेन निर्वृत्तं **क्षायिकम्**। उदयावलिकाप्रविष्टस्यांशस्य[१] क्षयेण शेषस्य तूपशमेन निर्वृत्तं **क्षायोपशमिकम्**। उदयावलिकाप्रविष्टस्यांशस्य[२] क्षये सति शेषस्य भस्मच्छन्नाग्नेरिवानुद्रेकावस्था उपशमः, तेन निर्वृत्त**मौपशमिकम्**। आह-औपशमिक-क्षायोपशमिकयोः कः प्रतिविशेषः ?, उच्यते, क्षायोपशमिके तदावारकस्य कर्मणः प्रदेशतोऽनुभवोऽस्ति, न त्वौपशमिके इति।

दर्शनमेवासारमिथ्यात्वादिकचवररहिता विशुद्धा रथ्या यस्य तत्तथा, तस्याऽऽमन्त्रणं हे **दर्शनविशुद्धरथ्याक** !। **सेर्लोपः सम्बोधने ह्रस्वो वा** [प्रा० ल०[*]] इति **प्राकृतलक्षण**[३]सूत्रे वाशब्दस्य लक्ष्यानुसारेण दीर्घत्वसूचना[र्थत्वा]द् दीर्घनिर्देशः, यथा 'गोयमा' ! इत्यत्र। सङ्घः-चातुर्वर्णः श्रमणादिसङ्घातः, स नगरमिव सङ्घनगरम्, **व्याघ्रादिभिर्गौणैस्तदनुक्तौ** [मलय० ना० पा० ८ सू० ३७] इति समासः, यथा पुरुषो व्याघ्र इव पुरुषव्याघ्रः, तस्याऽऽमन्त्रणं हे **सङ्घनगर** !। **भद्रं** कल्याणं **ते** तव भवतु। **अखण्डचारित्रप्राकार** ! **चारित्रं** मूलगुणाः, **अखण्डम्** अविराधितं चारित्रमेव प्राकारो यस्य तत्तथा, **मांसादिषु वा** [प्रा० ल०[*]] इति **प्राकृतलक्षणा**[४]त् चारित्रशब्दस्यादौ ह्रस्वः, तस्यामन्त्रणं हे **अखण्डचारित्रप्राकार** !। दीर्घत्वं प्रागिव॥४॥ भूयोऽपि सङ्घस्यैव संसारोच्छेदकारित्वात् **चक्ररूपकेण** स्तवमाह–

संजम-तवतुंबारस्स णमो सम्मत्तपारियल्लस्स।
अप्पडिचक्कस्स जओ होउ सया संघचक्कस्स॥५॥

संजमेत्यादि। संयमः सप्तदशप्रकारः। यत उक्तम्–

पञ्चाश्रवाद् विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः।
दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः॥१॥ [प्रशमरति० का० १७२]

तपो द्विधा-बाह्यमाभ्यन्तरं च। तत्र बाह्यं षड्विधम्। यत उक्तम्–

अनशनमूनोदरता वृत्तेः सङ्क्षेपणं रसत्यागः।
कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम्॥१॥ [प्रशमरति० का० १७५]

---

१. °**वलिप्रवि**° जेमू१, जे२, मां० खं० देमू० ॥ २. °**वलिप्रवि**° जेमू०२, मांमू० देमू० ॥ ३. "**डो दीर्घो वा**" - हैम० प्रा० ३।३८॥ ४. "**मांसादेर्वा**" हैमे प्राकृतव्याकरणे १।२९ ॥

आभ्यन्तरमपि षोढा। यत उक्तम्–

प्रायश्चित्त-ध्याने वैयावृत्य-विनयावथोत्सर्गः।

स्वाध्याय इति तपः षट्प्रकारमाभ्यन्तरं भवति॥१॥ [*प्रशमरति० का० १७६]

संयमश्च तपांसि च संयम-तपांसि, तुम्बं च अराश्च-अरकाः तुम्बाराः, संयम-तपांस्येव यथासङ्ख्यं तुम्बारा यस्य तत् तथा, तस्मै **संयम-तपस्तुम्बाराय नमः**, सूत्रे च षष्ठी प्राकृतलक्षणाच्चतुर्थ्यर्थे वेदितव्या, उक्तं च– **छट्ठिविहत्तीए भन्नइ चउत्थी।**[१] [ ] तथा **सम्मत्तपारियल्लस्स** सम्यक्त्वमेव पारियल्लं-बाह्यपृष्ठस्य बाह्या भ्रमिर्यस्य तत् तथा, तस्मै नमः। गाथार्द्धं व्याख्यातम्। तथा न विद्यते प्रति-अनुरूपं समानं चक्रं यस्य **तदप्रतिचक्रम्**, चरकादिचक्रैरसमानमित्यर्थः, तस्य **जयो** भवतु **सदा** सर्वकालम्, सङ्घश्चक्रमिव सङ्घचक्रं तस्य॥५॥

सम्प्रति सङ्घस्यैव मार्गगामितया **रथरूपकेण** स्तवमभिधित्सुराह–

भद्दं सीलपडागूसियस्स तव-णियमतुरगजुत्तस्स।
संघरहस्स भगवओ, सज्झायसुणंदिघोसस्स॥६॥

भद्दं सीलेत्यादि। **भद्रं** कल्याणं सङ्घरथस्य भगवतो भवत्विति योगः। किंविशिष्टस्य सतः ? इत्याह– **शीलोच्छ्रितपताकस्य**, शीलमेव अष्टादशशीलाङ्गसहस्ररूपमुच्छ्रिता पताका यस्य स तथा। भार्योढादेराकृतिगणतया तन्मध्यपाठाभ्युपगमादुच्छ्रितशब्दस्य परनिपातः, प्राकृतशैल्या वा, न हि प्राकृते विशेषणपूर्वापरनिपातनियमोऽस्ति, यथाकथञ्चित् पूर्वर्षिप्रणीतेषु वाक्येषु विशेषणनिपातदर्शनात्। **तपो-नियमतुरगयुक्तस्य** तपः-संयमाश्वयुक्तस्य। तथा स्वाध्यायः पञ्चविधः, तद्यथा-वाचना प्रच्छना परावर्त्तना अनुप्रेक्षा धर्मकथा च, स्वाध्याय एव[२] **सु**-शोभनो **नन्दिघोषः**-द्वादशविधतूर्यनिनादो यस्य स तथा, तस्य। **सज्झायसुनेमिघोसस्स** इति **क्वचित्पाठः**, तत्र स्वाध्याय एव शोभनो नेमिघोषो यस्येति द्रष्टव्यम्। इह शीलाङ्गरूपणे सत्यपि तपो-नियमरूपणं तयोः प्रधानपरलोकाङ्गत्वख्यापनार्थम्, अस्ति चायं न्यायो यदुत- **सामान्योक्तावपि**

---

१. "बहुवयणेण दुवयणं छट्ठिविभत्तीए भन्नइ चउत्थी । जह हत्था तह पाया नमोत्थु देवाहिदेवाणं ॥" इति सम्पूर्णा गाथा ॥ २. **एव सच्छोभनो** दे०। **एव सन्-शोभनो** जे१ विना॥

प्राधान्यख्यापनार्थं विशेषाभिधानं क्रियते, यथा ब्राह्मणा आयाता वशिष्ठोऽप्यायातः [ ] इति, एवमन्यत्रापि यथायोगं परिभावनीयम्॥६॥

सङ्घस्यैव लोकमध्यवर्त्तिनोऽपि लोकधर्मासंश्लेषतः **पद्मरूपकेण** स्तवं प्रतिपिपादयिषुराह–

कम्मरयजलोहविणिग्गयस्स सुयरयणदीहणालस्स।
पंचमहव्वयथिरकण्णियस्स गुणकेसरालस्स॥७॥
सावगजणमहुयरिपरिवुडस्स जिणसूरतेयबुद्धस्स।
संघपउमस्स भद्दं समणगणसहस्सपत्तस्स॥८॥ [जुवलयं]॥

कम्मरयेत्यादि। **कर्म** ज्ञानावरणाद्यष्टप्रकारम्, तदेव जीवस्य गुण्डनेन मालिन्यापादनाद् रजो भण्यते, कर्मरज एव जन्मकारणत्वाज्जलौघः तस्माद् विनिर्गत इव विनिर्गतः **कर्मरजोजलौघविनिर्गतः**, तस्य। इह पद्मं जलौघाद् विनिर्गतं सुप्रतीतम्, जलौघस्योपरि तस्य व्यवस्थितत्वात्, सङ्घस्तु कर्मरजोजलौघाद् विनिर्गतोऽल्पसंसारित्वादवसेयः, तथा च अविरतसम्यग्दृष्टेरप्यपार्द्धपुद्गलपरावर्त्तमान एव संसारः, अत एव विनिर्गत इवेति व्याख्यातम्, न तु साक्षाद् विनिर्गतः, अद्यापि संसारित्वात्। तथा श्रुतरत्नमेव दीर्घो नालो यस्य स तथा, तस्य, दीर्घनालतया च श्रुतरत्नस्य रूपणं कर्मरजोजलौघतस्तद्बलाद् विनिर्गतेः। तथा पञ्च महाव्रतान्येव-प्राणातिपातादिविरमणलक्षणानि **स्थिरा** दृढा **कर्णिका** मध्यमण्डलिका यस्य तत्तथा तस्य। तथा **गुणाः** उत्तरगुणाः, त एव पञ्चमहाव्रतरूपकर्णिकापरिकरभूतत्वात् केसरा इव गुणकेसराः, ते विद्यन्ते यस्य तत्तथा, तस्य, अत्र **मंतुबत्थम्मि मुणिज्जह आलं इल्लं मणं तह य। [प्रा० ल०]** इति **प्राकृतलक्षणाद्** मत्वर्थे आलप्रत्ययः॥७॥

तथा–

[सावगजणेत्यादि।] ये अभ्युपेतसम्यक्त्वाः प्रतिपन्नाणुव्रता अपि प्रतिदिवसं

---

१. **वशिष्टो** जे१ विना॥ २. °**करण**° जे१,२, मां०॥ ३. **मध्यगण्डिका** दे०। **मध्यमण्डिका** पा०॥ ४. "आल्विल्लोल्लाल-वन्त-मन्तेत्तेर-मणा मतोः" हैम० प्रा० २।१५९॥ ५. "मणं च मणुयं च" इति **आवश्यकहारिभद्रीवृत्तौ** पाठः॥

यतिभ्यः साधूनामगारिणां चोत्तरोत्तरविशिष्टगुणप्रतिपत्तिहेतोः सामाचारीं शृण्वन्ति ते **श्रावकाः**।

उक्तं च–

[१]**संपत्तदंसणाई पइदियहं जइजणा सुणेई य।**
सामायारिं परमं जो खलु तं सावगं बिंति॥१॥ [ ] 5

श्रावकाश्च ते जनाश्च श्रावकजनाः, त एव मधुकर्यः, ताभिः परिवृतस्य। तथा **जिनसूर्यतेजोबुद्धस्य**, जिन एव सकलजगत्प्रकाशकतया सूर्य इव भास्कर इव जिनसूर्यस्तस्य **तेजः** विशिष्टसंवेदनप्रभवा धर्मदेशना तेन बुद्धस्य। तथा श्राम्यन्तीति श्रमणाः, **नन्द्यादिभ्योऽनः**। [*मलय० कृ०पा०१ सू० ४६] इति कर्त्तर्यनप्रत्ययः, **श्राम्यन्ति** तपस्यन्ति, किमुक्तं भवति ? प्रव्रज्यारम्भदिवसादारभ्य सकलसावद्ययोगविरता 10 गुरूपदेशाद् आ प्राणोपरमाद् यथाशक्त्यनशनादि तपश्चरन्ति। उक्तं च–

यः समः सर्वभूतेषु त्रसेषु स्थावरेषु च।
तपश्चरति शुद्धात्मा श्रमणोऽसौ प्रकीर्त्तितः॥१॥ [ ]

श्रमणानां गणः श्रमणगणः, स एव सहस्रं पत्राणां यस्य तत् श्रमणगणसहस्रपत्रं तस्य [श्रीसङ्घपद्मस्य भद्रं भवतु इति शेषः]॥८॥ भूयोऽपि सङ्घस्यैव सोमतया **चन्द्ररूपकेण** 15 स्तवमभिधित्सुराह–

तव-संजममयलंछण ! अकिरियराहुमुहदुद्धरिस ! णिच्चं।
जय संघचंद ! णिम्मलसम्मत्तविसुद्धजुण्हागा !॥९॥

तवसंजमेत्यादि। तपश्च संयमश्च तपःसंयमम्, समाहारो द्वन्द्वः, तपःसंयममेव **मृगलाञ्छनं** मृगरूपं चिह्नं यस्य तस्याऽऽमन्त्रणं हे **तपःसंयममृगलाञ्छन** !। तथा 20 न विद्यन्तेऽनभ्युपगमात् परलोकविषयाः क्रिया येषां ते **अक्रियाः** नास्तिकाः त एव जिनप्रवचनशशाङ्कग्रसनपरायणत्वाद् राहुमुखमिवाक्रियराहुमुखं तेन **दुष्प्रधृष्यः** अनभिभवनीयः, तस्याऽऽमन्त्रणं हे **अक्रियराहुमुखदुष्प्रधृष्य** !। सङ्घश्चन्द्र इव सङ्घचन्द्रः, तस्याऽऽमन्त्रणं हे **सङ्घचन्द्र** !। तथा **निर्मलं** मिथ्यात्वमलरहितं यत् सम्यक्त्वं तदेव

---

१. सम्प्राप्तदर्शनादिः प्रतिदिवसं यतिजनात् शृणोति च। सामाचारीं परमां यः खलु तं श्रावकं ब्रुवते॥१॥

विशुद्धा ज्योत्स्ना यस्य स तथा, **शेषाद्वा**[१] [ ] इति कः प्रत्ययः, तस्याऽऽमन्त्रणं हे **निर्मलसम्यक्त्वविशुद्धज्योत्स्नाक** !, दीर्घत्वं प्रागिव प्राकृतलक्षणादवसेयम्। **नित्यं** सर्वकालं **जय** सकलपरदर्शनतारकेभ्योऽतिशयवान् भव। यद्यपि भगवान् सङ्घचन्द्रः सदैव जयन् वर्त्तते तथाऽपीत्थं स्तोतुरभिधानं कुशलमनो-वाक्कायप्रवृत्ति-कारणमित्यदुष्टम्॥९॥ पुनरपि सङ्घस्यैव प्रकाशकतया **सूर्यरूपकेण** स्तवमाह–

परतित्थियगहपहणासगस्स तवतेयदित्तलेसस्स।
णाणुज्जोयस्स जए भद्दं दमसंघसूरस्स॥१०॥

परतित्थिएत्यादि। **परतीर्थिकाः** कपिल-कणभक्षा-ऽक्षपाद-सुगतादि-मतावलम्बिनः त एव ग्रहाः तेषां या **प्रभा** एकैकदुर्नयाभ्युपगमपरिस्फूर्त्तिलक्षणा तामनन्तनयसङ्कुलप्रवचनसमुत्थविशिष्टज्ञानभास्वरप्रभावितानेन **नाशयति** अपनयतीति **परतीर्थिकग्रहप्रभानाशकः**, तस्य। तथा तपस्तेज एव **दीप्ता** उज्ज्वला **लेश्या** भास्वरता यस्य स तथा, तस्य **तपस्तेजोदीप्तलेश्यस्य**। तथा ज्ञानमेवोद्द्योतः-वस्तुविषयः प्रकाशो यस्य स तथा, तस्य **ज्ञानोद्द्योतस्य**। **जगति** लोके **भद्रं** कल्याणं भवत्विति शेषः। **दमः** उपशमः, तत्प्रधानः सङ्घः सूर्य इव सङ्घसूर्यः, तस्य **दमसङ्घसूर्यस्य**॥१०॥ सम्प्रति सङ्घस्यैवाक्षोभ्यतया **समुद्ररूपकेण** स्तवं चिकीर्षुराह–

भद्दं धिइवेलापरिगयस्स सज्झायजोगमगरस्स।
अक्खोभस्स भगवओ संघसमुद्दस्स रुंदस्स॥११॥

भद्दं धिइवेलेत्यादि। सङ्घः समुद्र इव सङ्घसमुद्रः तस्य भद्रं भवत्विति क्रियाशेषः। किंविशिष्टस्य सतः ? इत्याह– **धृतिवेलापरिगतस्य**, **धृतिः** मूलोत्तरगुणविषयः प्रतिदिवसमुत्सहमान आत्मपरिणामविशेषः, सैव **वेला** जलवृद्धिलक्षणा तया परिगतस्य। तथा **स्वाध्याययोग** एव कर्मविदारणक्षमशक्तिसमन्विततया मकर इव **मकरो** यस्मिन् स तथा, तस्य। तथा **अक्षोभ्यस्य** परीषहोपसर्गसम्भवेऽपि निष्प्रकम्पस्य **'भगवतः'** समग्रैश्वर्य-रूप-यशो-धर्म-प्रयत्न-श्रीसम्भारसमन्वितस्य **रुन्दस्य** विस्तीर्णस्य॥११॥

---

१. **शेषाद्वा** - सिद्धहेम० ७।३।१७५॥ **शेषाद्विभाषा** - पा० ५।४।१५४।८९१। **शेषात् सिद्धनन्दिनः** - शाकटा० २।१।२२९॥

भूयोऽपि सङ्घस्यैव सदास्थायितया **मेरुरूपकेण** स्तवमाह–

सम्मद्दंसणवरवइरदढरूढगाढावगाढपेढस्स।
धम्मवररयणमंडियचामीयरमेहलागस्स॥१२॥
णियमूसियकणयसिलायलुज्जलजलंतचित्तकूडस्स।
णंदणवणमणहरसुरभिसीलगंधुद्धुमायस्स॥१३॥
जीवदयासुंदरकंदरुद्दरियमुणिवरमइंदइण्णस्स।
हेउसयधाउपगलंतरत्तदित्तोसहिगुहस्स॥१४॥
संवरवरजलपगलियउज्झरपविरायमाणहारस्स।
सावगजणपउररवंतमोरणच्चंतकुहरस्स॥१५॥
विणयणयपवरमुणिवरफुरंतविज्जुज्जलंतसिहरस्स।
विविहगुणकप्परुक्खगफलभरकुसुमाउलवणस्स॥१६॥
णाणवररयणदिप्पंतकंतवेरुलियविमलचूलस्स।
वंदामि विणयपणओ, संघमहामंदरगिरिस्स॥१७॥

[कुलयं]॥

सम्मद्दंसणेत्यादिगाथाषट्केन सम्बन्धः। **सम्यग्** अविपरीतं **दर्शनं** तत्त्वार्थश्रद्धानं सम्यग्दर्शनं तदेव प्रथममोक्षाङ्गतया सारत्वाद् वरवज्रमिव सम्यग्दर्शनवरवज्रम्, तदेव **दृढं** निष्प्रकम्पं **रूढं** चिरप्ररूढं **गाढं** निबिडम् **अवगाढं** निमग्नं **पीठं** प्रथमभूमिका यस्य स तथा। इह मन्दरगिरिपक्षे वज्रमयं पीठं दृढादिविशेषणं सुप्रतीतम्, सङ्घमन्दरगिरिपक्षे तु सम्यग्दर्शनवरवज्रमयं पीठं दृढं शङ्कादिदोषशुषिररहिततया परतीर्थिकवासनाजलेनान्तःप्रवेशाभावतश्चालयितुमशक्यम्; रूढं प्रतिसमयं विशुद्ध्यमानतया प्रशस्ताध्यवसायेषु चिरकालं वर्त्तनात्, गाढं तीव्रतत्त्वविषयरुच्यात्मकत्वात्, अवगाढं

---

१. °**वर**° खंमू० डे० शु० ल० विना नास्ति ॥ २. **गुणरयणुज्जलकडयं सीलसुयंधतवमंडिउद्देसं। सुयबारसंगसिहरं संघमहामंदरं वंदे॥१॥ नगर रह चक्क पउमे चंदे सूरे समुद्द मेरुम्मि। जो उवमिज्जइ सययं तं संघ गुणायरं वंदे॥२॥** इति गाथायुगलमधिकं ससूप्र०। अत्रार्थे **जेसलमेरुताडपत्रीयनन्दिसूत्रमूलादर्शे** "**गुणेत्यादि गाथा २ वृत्तावव्याख्यातम्**" इति टिप्पणी वर्त्तते। तथा नेदं गाथायुगलं **चूर्णिकृता** वृत्तिकृद्भ्यां वा व्याख्यातमस्ति॥ ३. °**वर**° दे० पा० विना नास्ति॥ ४. °**दिशुषिर**° खं० पा० मां० दे०॥

जीवादिषु पदार्थेषु सम्यगवबोधरूपतया प्रविष्टम्, तं वन्दे। सूत्रे प्राकृतत्वाद् द्वितीयार्थे षष्ठी, यदाह **पाणिनिः स्वप्राकृतलक्षणे**– **द्वितीयार्थे षष्ठी** [प्रा० ल०] अथवा सम्बन्धविवक्षया षष्ठी, यथा माषाणामश्नीयादित्यत्र, यद्वा इत्थम्भूतस्य सङ्घमन्दरगिरेर्यद् माहात्म्यं तद् वन्दे इति माहात्म्यशब्दाध्याहारापेक्षया षष्ठी। तथा दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः, स एव वररत्नमण्डिता चामीकरमेखला यस्य स **धर्मवररत्नमण्डितचामीकरमेखलाकः**, **शेषाद्वा** [ ] इति कप्रत्ययः, तस्य। इह धर्मो द्विधा-मूलगुणरूप उत्तरगुणरूपश्च, तत्रोत्तरगुणरूपो रत्नानि मूलगुणरूपस्तु मेखला, न खलु मूलगुणरूपधर्मात्मकचामीकरमेखला विशिष्टोत्तरगुणरूपवररत्न-विभूषणविकला शोभते॥१२॥

नियमेत्यादि। इहोच्छ्रितशब्दस्य व्यवहितः प्रयोगः, ततश्चायमर्थः-नियमा एव इन्द्रिय-नोइन्द्रियदमरूपाः कनकशिलातलानि, तेषु उच्छ्रितानि **उज्ज्वलानि ज्वलन्ति चित्तान्येव कूटा**नि यस्मिन् स तथा तस्य। इह मन्दरगिरौ कूटानामुच्छ्रितत्वमुज्ज्वलत्वं भासुरत्वं च सुप्रतीतम्, सङ्घमन्दरगिरिपक्षे तु चित्तरूपाणि कूटान्युच्छ्रितानि अशुभाध्यवसायपरित्यागात्, उज्जवलानि प्रतिसमयं कर्ममलविगमात्, ज्वलन्ति उत्तरोत्तरसूत्रार्थस्मरणेन भासुरत्वात्। तथा नन्दन्ति सुरा-ऽसुर-विद्याधरादयो यत्र तन्नन्दनम्, **वनम्** अशोक-सहकारादिपादपवृन्दम्, नन्दनं च तद् वनं च **नन्दनवनम्**, लतावितानगतविविधफल-पुष्प-प्रवालसङ्कुलतया मनो हरतीति **मनोहरम्**, **लिहादिभ्यः** [मलय० कृ० १।३३] इत्यच्प्रत्ययः, नन्दनवनं च तन्मनोहरं च नन्दनवनमनोहरम्, तस्य सुरभिस्वभावो यो गन्धस्तेन **उद्धुमायः** आपूर्णः, उद्धुमायशब्द आपूर्णपर्यायः, यत उक्तम**भिमानचिह्नेन**– **पडिहत्थ १ मुद्धुमायं २ अहिरेईयं ३ च जाण आउण्णे।** [ ] तस्य। सङ्घमन्दरगिरिपक्षे तु **नन्दनं** सन्तोषः, तथाहि-तत्र स्थिताः साधवो नन्दन्ति, तच्च विविधामर्षौषध्यादिलब्धिसङ्कुलतया **मनोहरम्**, तस्य सुरभिः शीलमेव गन्धस्तेन व्याप्तस्य, अथवा मनोहरत्वं सुरभिशीलगन्धविशेषणं द्रष्टव्यम्॥१३॥

---

१. क्वचिद् द्वितीयादेः - हैम० प्रा ३।१३।१३४॥ २. दृश्यतां पृ० ७६ टि० १ ॥ ३. **इन्द्रियादिदम°** जे१,२ दे० मांमू०। **इन्द्रियदम°** खंमू० ॥

जीवदयेत्यादि। जीवदया एव सुन्दराणि स्व-परनिर्वृतिहेतुत्वात् **कन्दराणि** तपस्विनामावासभूतत्वात्, तथा च लोकेऽपि प्रतीतम्– **अहिंसाव्यवस्थितः तपस्वी** [ ] इति **जीवदयासुन्दरकन्दराणि**, तेषु ये उत्-प्राबल्येन कर्मशत्रुजयं प्रति दर्पिताः-**उद्दर्पिताः** मुनिवरा एव शाक्यादिमृगपराजयाद् मृगेन्द्रा इव **मुनिवरमृगेन्द्राः तैराकीर्णः** व्याप्तस्तस्य। तथा मन्दरगिरेर्गुहासु निष्यन्दवन्ति चन्द्रकान्तादीनि रत्नानि भवन्ति कनकादिधातवो दीप्ताश्चौषधयः, सङ्घमन्दरगिरिपक्षे तु अन्वय-व्यतिरेकलक्षणा ये हेतवस्तेषां शतानि हेतुशतानि तान्येव धातवः, कुयुक्तिव्युदासेन तेषां स्वरूपेण भासुरत्वात्, तथा **प्रगलन्ति** निष्यन्दमानानि क्षायोपशमिकभावस्यन्दित्वाद् रत्नानि **दीप्ताः** जाज्वल्यमाना **ओषधयः** आमर्षौषध्यादयो **गुहासु** व्याख्यानशालारूपासु यस्य स तथा तस्य॥१४॥

संवरेत्यादि। **संवरः** प्राणातिपातादिरूपपञ्चाश्रवप्रत्याख्यानम्, तदेव कर्ममल-प्रक्षालनात् सांसारिकतृडपनोदकारित्वात् परिणामसुन्दरत्वाच्च वरजलमिव संवरवरजलम्, तस्य प्रगलितः-सातत्येन व्यूढः **उज्झरः** प्रवाहः स एव[1] प्रविराजमानो हारो यस्य[2] स तथा तस्य। श्रावकजना एव स्तुति-स्तोत्र-स्वाध्यायविधानमुखरतया प्रचुरा रवन्तो मयूराः तैर्नृत्यन्तीव कुहराणि-जिनमण्डपादिरूपाणि यस्य स तथा तस्य॥१५॥

विणयेत्यादि। विनयेन नता विनयनता ये प्रवरमुनिवराः त एव स्फुरन्त्यो विद्युतो विनयनतप्रवरमुनिवरस्फुरद्विद्युतः ताभिर्ज्वलन्ति-भासमानानि शिखराणि यस्य स तथा तस्य, इह शिखरस्थानीयाः प्रावचनिका विशिष्टा आचार्यादयो द्रष्टव्याः, विनयनतानां च प्रवरमुनिवराणां विद्युता रूपणम्, विनयादिरूपेण[3] तपसा तेषां भासुरत्वात्। तथा विविधा गुणा येषां ते विविधगुणाः, विशेषणान्यथानुपपत्त्या साधवो गृह्यन्ते, त एव विशिष्टकुलोत्पन्नत्वात् परमानन्दरूपसुखहेतुधर्मफलदानाच्च कल्पवृक्षा इव विविध-गुणकल्पवृक्षकाः, प्राकृतत्वात् स्वार्थे कप्रत्ययः, तेषां यः फलभरो यानि च कुसुमानि

---

१. **एव विरा**° देसं० विना॥ २. **यस्य तथा श्रावक**° खं० पा० ॥ ३. विणए बहुमाणेत्यादि आभ्यन्तरो(रं) तपः - खंटि०॥

तैराकुलानि वनानि यस्य स तथा तस्य, इह फलभरस्थानीयो मूलोत्तरगुणरूपो धर्मः, कुसुमानि नानाप्रकारा ऋद्धयः, वनानि तु गच्छाः॥१६॥ तथा–

नाणेत्यादि। ज्ञानमेव परमनिर्वृतिहेतुत्वाद् वरं रत्नं ज्ञानवररत्नम्, तदेव दीप्यमाना **कान्ता** विमला वैडूर्यमयी चूडा यस्य स तथा। तत्र मन्दरपक्षे वैडूर्यमयी चूडा कान्ता विमला च सुप्रतीता, सङ्घमन्दरपक्षे तु कान्ता भव्यजनमनोहारित्वाद् विमला यथावस्थितजीवादिपदार्थस्वरूपोपलम्भात्मकत्वात्। तस्य इत्थम्भूतस्य सङ्घमहामन्दरगिरेर्यन्माहात्म्यं तद् विनयप्रणतो वन्दे॥१७॥

तदेवं सङ्घस्यानेकधा स्तवोऽभिहितः। सम्प्रत्यावलिकाः प्रतिपादनीयाः, ताश्च तिस्रः, तद्यथा– तीर्थकरावलिका गणधरावलिका स्थविरावलिका च। तत्र प्रथमतस्तीर्थकरावलिकामाह–

[सू०३,गा०१८-१९] वंदे उसभं अजियं संभवमभिणंदणं सुमति सुप्पभ सुपासं।
ससि पुप्फदंत सीयल सिज्जंसं वासुपुज्जं च॥१८॥
विमलमणंतइं धम्मं संतिं कुंथुं अरं च मल्लिं च।
मुणिसुव्वय णमि णेमिं, पासं तह वद्धमाणं च॥१९॥

वंदे इत्यादिगाथाद्वयं निगदसिद्धम्॥१८॥१९॥ गणधरावलिका तु या यस्य तीर्थकृतः सा तस्य **प्रथमानुयोगतो** द्रष्टव्या। भगवद्वर्द्धमानस्वामिन आह–

[सू०४,गा०२०-२१] पढमेत्थ इंदभूती बितिओ पुण होति अग्गिभूइ त्ति।
तइओ य वाउभूती, ततो वियत्ते सुहम्मे य॥२०॥
मंडिय मोरियपुत्ते, अकंपिए चेव अयलभाया य।
मेयज्जे य पभासे, य गणहरा हुंति वीरस्स॥२१॥

पढमेत्थ इत्यादिगाथाद्वयम्। एतदपि निगदसिद्धम्॥२०॥२१॥ एते च गणभृतः सर्वेऽपि तथाकल्पत्वाद् भगवदुपदिष्टं **उप्पन्ने इ वा** इत्यादिमातृकापदत्रयमधिगम्य सूत्रतः सकलमपि प्रवचनं दृब्धवन्तः, तच्च प्रवचनं सकलसत्त्वानामुपकारकम्, विशेषत इदानीन्तनजनानाम्, अतस्तदेव सम्प्रत्यभिष्टुवन्नाह–

[सू० ५, गा० २२] णेव्वुइ[1]पहसासणयं जयइ सया सव्वभावदेसणयं।
कुसमयमयणासणयं जिणिंदवरवीरसासणयं॥२२॥

निव्वुइ इत्यादि। **निर्वृतेः** मोक्षस्य **पन्थाः** सम्यग्दर्शन-ज्ञान-चारित्राणि, तथा चाह भगवान् **उमास्वाति**वाचकः- **सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः** [*तत्त्वार्थ० १।१] इति, निर्वृतिपथः, [2]**ऋक्-पूः-पथ्यपोऽत्** [*मलय०] इति समासान्तोऽत् प्रत्ययः, यद्यपि निर्वृतिपथशब्देन ज्ञानादित्रयमभिधीयते तथाऽपीह सम्यग्दर्शन-चारित्रयोरेव परिग्रहः, ज्ञानस्योत्तरत्र विशेषेणाभिधानात्, निर्वृतिपथस्य **शासनं** शिष्यतेऽनेनेति शासनं प्रतिपादकं निर्वृतिपथशासनम्, ततः [3]**कश्च** [*प्रा०ल०] इति **प्राकृतलक्षणा**त् स्वार्थे [4]कप्रत्ययः, **निर्वृतिपथशासनकम्**, एवमन्यत्रापि यथायोगं कप्रत्ययभावना कार्या। **सदा** सर्वकालं **जयति** सर्वाण्यपि प्रवचनानि प्रभावातिशयेनातिक्रम्यातिशायि वर्त्तते। कथम्भूतं सत् ? इत्याह– **सर्वभावदेशनकम्**, सर्वे च ते भावाश्च सर्वभावाः तेषां **देशनं** प्ररूपकं सर्वभावदेशनम्, ततः स्वार्थिकः कप्रत्ययः, **सर्वभावदेशनकम्**। अत एव **कुसमयमदनाशनकम्**, कुत्सिताः समयाः-परतीर्थिकप्रवचनानि तेषां मदः-अवलेपस्तस्य नाशनम्, ततः स्वार्थिककप्रत्यये कुसमयमदनाशनकम्, कुसमयमदनाशना च कुसमयानां यथोक्तसर्वभावदेशकत्वायोगात्। इत्थम्भूतं **जिनेन्द्रवरवीरशासनकं** जयति॥२२॥ सम्प्रति यैरिदमविच्छेदेन स्थविरैः क्रमेणैदंयुगीनजन्तूनामुपकारार्थमानीतं तेषामावलिकामभिधित्सुराह–

[सू०६, गा०२३-४३] सुहम्मं अग्गिवेसाणं, जंबूणामं च कासवं।
पभवं कच्चायणं वंदे, वच्छं सेज्जंभवं तहा॥२३॥

सुहम्ममित्यादि। इह स्थविरावलिका **सुधर्मस्वामिनः** प्रवृत्ता, शेषगणधराणां सन्तानप्रवृत्तेरभावात्। उक्तं च– [5]**तित्थं च सुहम्माओ, निरवच्चा गणहरा सेसा।** [*आव० नि० ५९५] ततस्तमेवाऽऽदौ कृत्वा तामभिधत्ते। **सुधर्मं** सुधर्मस्वामिनं पञ्चमगणधरम्,

---

१. श्रीमता **चूर्णिकृता** नेयं गाथा व्याख्याताऽस्ति॥ २. **ऋक्-पूः-पथ्यपोऽत्** - सिद्धहेम० ७।३।७६।, शाकटा० २।१।१३९॥ ३. **स्वार्थे कश्च** - हैमप्रा० २।१६४॥ ४. **कः प्रत्ययः** खं० विना ॥ ५. तीर्थं च सुधर्मादं निरपत्या गणधराः शेषाः॥

अग्गिवेसाणं इति अग्निवेशस्यापत्यं वृद्धम् आग्निवेश्यः, गर्गादेर्यञ् [मलय०][1] इति यञ्प्रत्ययः, तस्याप्यपत्यमाग्निवेश्यायनः, तम् **आग्निवेश्यायनम्,** वन्दे इति क्रियाभिसम्बन्धः। तथा तच्छिष्यं **जम्बूनामानम्, चः** समुच्चये, **काश्यपं** कश्यपस्यापत्यं काश्यपः विदादेर्वृद्धे [मलय०][2] इत्यञ् प्रत्ययः, तं काश्यपगोत्रं वन्दे। तस्यापि जम्बूस्वामिनः शिष्यं प्रभवनामानं **कात्यायनम्,** कतस्यापत्यं कात्यः गर्गादेर्यञ् [मलय०] इति यञ्प्रत्ययः, तस्याप्यपत्यं कात्यायनस्तं **कात्यायनं** कात्यायनगोत्रं वन्दे। तच्छिष्यं **शय्यम्भवं वात्स्यं** वत्सस्यापत्यं वात्स्यः, गर्गादेर्यञ् [मलय०] इति यञ्प्रत्ययः, तं वन्दे। **तथा** इति समुच्चये॥२३॥

जसभद्दं तुंगियं वंदे संभूयं चेव माढरं।
भद्दबाहुं च पाइण्णं थूलभद्दं च गोयमं॥२४॥

जसभद्दमित्यादि। शय्यम्भवशिष्यं **यशोभद्रं 'तुङ्गिकं'** तुङ्गिकगणं व्याघ्रापत्यगोत्रं वन्दे, तस्य च द्वौ प्रधानशिष्यावभूताम्, तद्यथा– **सम्भूतविजयो माठरगोत्रो भद्रबाहुश्च प्राचीनगोत्रः,** तौ द्वावपि नमस्कुरुते– **सम्भूतं चेव माढरं। भद्दबाहुं च पाइण्णं** इति। तत्र सम्भूतविजयस्य विनेयः स्थूलभद्रो गौतम आसीत्, तमाह– **स्थूलभद्रं चः** समुच्चये **गौतमम्,** गोतमस्यापत्यं गौतमः ऋषिवृष्ण्यन्धककुरुभ्यः [मलय०][3] इति अण्प्रत्ययः, तम्, वन्दे इति क्रियायोगः॥२४॥ स्थूलभद्रस्यापि द्वौ प्रधानशिष्यौ बभूवतुः, तद्यथा– **ऐलापत्यगोत्रो महागिरिर्वसिष्ठगोत्रः सुहस्ती,** तौ द्वावपि प्रणिनंसुराह[4]–

एलावच्चसगोत्तं वंदामि महागिरिं सुहत्थिं च।
तत्तो कोसियगोत्तं बहुलस्स सरिव्वयं वंदे॥२५॥

एलावच्चेत्यादि। इह यः स्वापत्यसन्तानस्य स्वव्यपदेशकारणमाद्यः प्रकाशकः पुरुषः तदपत्यसन्तानो गोत्रम्, इलापतेरपत्यम् ऐलापत्यः, **पत्युत्तरपदयमादित्यादित्य-**

---

१. **गर्गादेर्यञ्** - शाकटा० २।४।३८ सिद्धहे० ६।१।४२ ॥ २. **विदादेर्वृद्धे** सिद्धहे० - ६।१।४१॥ **विदादेर्वृद्धेऽनृष्यानन्तर्ये** शाकटा० - २।४।३० ॥ ३. **ऋषिवृष्ण्यन्धककुरुभ्यः** सिद्धहे० - ६।१।६१॥ **शिवाद्यृष्यन्धकवृष्णि-कुरुभ्योऽपत्येऽण्** शाकटा० - ४।२।४६॥ ४. **प्रणिणंसु°** पा० खं०॥

दितेर्ज्योऽणपवादे चास्वे [*मलय० त०११।३] इति ज्यप्रत्ययः, ऐलापत्येन सह गोत्रेण वर्त्तते यः स **ऐलापत्यसगोत्रः** तं वन्दे **महागिरिम्, सुहस्तिनं** च प्रागुक्तगोत्रम्। तत्र सुहस्तिन आरभ्य **सुस्थित-सुप्रतिबद्धा**[१]दिक्रमेणावलिका विनिर्गता सा यथा **दशाश्रुतस्कन्धे** [अध्य० ८ सू० २१७] तथैव द्रष्टव्या, न तयेहाधिकारः, तस्यामावलिकायां प्रस्तुताध्ययनकारकस्य **देववाचक**स्याभावात्, तत इह **महागिर्या**वलिकयाऽधिकारः। तत्र महागिरेर्द्वौ प्रधानशिष्यावभूताम्, तद्यथा– **बहुलो बलिस्सहश्च**, तौ च द्वावपि यमलभ्रातरौ **कौशिकगोत्रौ** च, तयोरपि च मध्ये बलिस्सहः प्रवचनप्रधान आसीत्, ततस्तमेव निनंसुराह– **ततः** महागिरेरनन्तरं **कौशिकगोत्रं बहुलस्य 'सदृशवयसं'** समानवयसम्, द्वयोरपि यमलभ्रातृत्वात्, **वन्दे** नमस्करोमि॥२५॥

हारियगोत्तं साइं च वंदिमो हारियं च सामज्जं।
वंदे कोसियगोत्तं, संडिल्लं अज्जजीयधरं॥२६॥

हारियेत्यादि। बलिस्सहस्यापि शिष्यं **हारीतगोत्रं 'स्वातिं'** स्वातिनामानम्, **चः** समुच्चये, वन्दे। तथा स्वातिशिष्यं **'हारीतं' हारीतगोत्रम्, चः** समुच्चये, स च भिन्नक्रमः **श्यामार्य**शब्दानन्तरं द्रष्टव्यः, **श्यामार्यं** च वन्दे। तथा श्यामार्यशिष्यं **कौशिकगोत्रं 'शाण्डिल्यं'** शाण्डिल्यनामानं वन्दे। किम्भूतम् ? इत्याह– **आर्यजीतधरम्** आरात्-सर्वहेयधर्मेभ्योऽर्वाग् यातम् आर्यं **'जीतम्'** इति सूत्रमुच्यते, जीतं स्थितिः कल्पो मर्यादा व्यवस्थेति हि पर्यायाः, मर्यादाकारणं च सूत्रमुच्यते, तथा [२]**धृङ् धारणे** [**पा० धा० ९००**] ध्रियते धारयतीति धरः, **लिहादिभ्यः** [*मलय० कृ० १।२२] इत्यच्प्रत्ययः, आर्यजीतस्य धर आर्यजीतधरस्तम्। **अन्ये तु** व्याचक्षते-**शाण्डिल्य**स्यापि शिष्य आर्यगोत्रो **जीतधर**नामा सूरिरासीत् तं वन्दे इति॥२६॥

तिसमुद्दखायकित्तिं दीव-समुद्देसु गहियपेयालं।
वंदे अज्जसमुद्दं अक्खुभियसमुद्दगंभीरं॥२७॥

तिसमुद्देत्यादि। शाण्डिल्यशिष्य**मार्यसमुद्र**नामानं वन्दे। कथम्भूतम् ? इत्याह–

---

१. °**तिबुद्धा**° पा० डे० सं० ॥ २. "धृंग् धारणे" - हैम० धा० ८८७ ॥

त्रिसमुद्रख्यातकीर्त्तिम्, पूर्व-दक्षिणा-ऽपरदिग्विभागव्यवस्थितत्वात् पूर्वा-ऽपर-दक्षिणास्त्रयः समुद्रास्त्रिसमुद्रम्, उत्तरतस्तु **हिमवान् वैताढ्यो** वा, त्रिसमुद्रे ख्याता कीर्त्तिर्यस्यासौ त्रिसमुद्रख्यातकीर्त्तिस्तम्। तथा **द्वीप-समुद्रेषु** द्वीपेषु समुद्रेषु च गृहीतं **पेयालं** प्रमाणं येन स गृहीतपेयालस्तम्, अतिशयेन **द्वीपसागरप्रज्ञप्ति**विज्ञायकमिति भावः। तथा अक्षुभितसमुद्रवद् गम्भीरम्॥२७॥

भणगं करगं झरणं पभावगं णाण-दंसणगुणाणं।
वंदामि अज्जमंगुं सुयसागरपारगं धीरं॥२८॥[1]

भणगमित्यादि। आर्यसमुद्रस्यापि शिष्य**मार्यमङ्गुं** वन्दे। किम्भूतम् ? इत्याह- **भणकम्**, कालिकादिसूत्रार्थमनवरतं भणति-प्रतिपादयतीति भणः, भण एव भणकः,[2] **कश्च** [*मलय०] इति प्राकृतलक्षणसूत्रात् स्वार्थे कप्रत्ययः, तम्। तथा **कारकं** कालिकादिसूत्रोक्तमेवोपधिप्रत्युपेक्षणादिरूपं क्रियाकलापं करोति कारयतीति वा कारकस्तम्। तथा धर्मध्यानं ध्यायतीति ध्याता तं ध्यातारम्। इह यद्यपि सामान्यतः कारकमिति वचनाद् ध्यातारमिति विशेषणं गतार्थं तथापि तस्य विशेषतोऽभिधानं ध्यानस्य प्रधानपरलोकाङ्गताख्यापनार्थम्। तथा यत एव भणकं कारकं ध्यातारं वा अत एव प्रभावकं ज्ञान-दर्शनगुणानाम्, **एकग्रहणे तज्जातीयग्रहणम्** [ ] इति न्यायात् चरणगुणानामपि परिग्रहः। तथा धिया राजते इति धीरस्तम्। तथा श्रुतसागरपारगम्॥२८॥

णाणम्मि दंसणम्मि य तव विणए णिच्चकालमुज्जुत्तं।
अज्जाणंदिलखमणं सिरसा वंदे पसण्णमणं॥२९॥

नाणम्मीत्यादि। आर्यमङ्गोरपि शिष्य**मार्यनन्दिल**क्षपणं **प्रसन्नमनसम्** अरक्त-द्विष्टान्तःकरणं शिरसा वन्दे। कथम्भूतम् ? इत्याह– **ज्ञाने** श्रुतज्ञाने **दर्शने** सम्यक्त्वे,

---

१. एतद्गाथानन्तरं डे० सं० मो० ल० आदर्शेषु **चूर्णि-टीका**कृद्भिरव्याख्यातं गाथायुगलमधिकं वर्त्तते। तच्चेदम्-
वंदामि अज्जधम्मं वंदे तत्तो य भद्दगुत्तं तु। तत्तो य अज्जवइरं तव-नियम-गुणेहिं वयरसमं॥
वंदामि अज्जरक्खियखवणे रक्खियचरित्तसव्वस्से। रयणकरंडगभूओ अणुओगो रक्खिओ जेणं॥
अत्रार्थे **जेसलमेरु**तालपत्रीय**नन्दिमूलादर्शे** "वंदामि अज्जधम्म० एतदपि गाथाद्वयं न वृत्तौ विवृतम् आवलिकान्तरसम्बन्धित्वादिति सम्भाव्यते।" इति टिप्पणी वर्त्तते॥

२. "स्वार्थे कश्च" - **हैम० प्रा०** २।१६४ ॥

चशब्दात् चारित्रे च, तथा **तपसि** यथायोगमनशनादिरूपे **विनये** ज्ञानविनयादिरूपे **नित्यकालं** सर्वकालम् **उद्युक्तम्** अप्रमादिनम्॥२९॥

वड्ढउ वायगवंसो जसवंसो अज्जणागहत्थीणं।
वागरण-करण-भंगी-कम्मप्पयडीपहाणाणं॥३०॥

वड्ढउ० इत्यादि। पूर्वगतं सूत्रमन्यच्च विनेयान् वाचयन्तीति वाचकाः तेषां **वंशः** क्रमभाविपुरुषपर्वप्रवाहः सः **वर्द्धतां** वृद्धिमुपयातु, मा कदाचिदपि तस्य वृद्धिमुपगच्छतो विच्छेदो भूयादिति यावत्। वर्द्धतामित्यत्राऽऽशंसायां पञ्चमी[१]। कथम्भूतो **वाचकवंशः** ? इत्याह– **यशोवंशो** मूर्त्तो यशसो वंश इव-पर्वप्रवाह इव यशोवंशः। अनेनापयशः-प्रधानपुरुषवंश[२]व्यवच्छेदमाह, तथाहि– अपयशःप्रधानानामपारसंसारसरित्पति-श्रोतःपतितानां परममुनिजनोपधृतलिङ्गविडम्बकानामलं सन्तानपरिवृद्ध्येति। केषां सम्बन्धी **वाचकवंशः** परिवर्द्धताम् ? इत्याह– **आर्यनागहस्तिनाम्** **आर्यनन्दिल**क्षपण-शिष्याणाम्। कथम्भूतानाम् ? इत्याह– **'व्याकरण-करण-भङ्गी-कर्मप्रकृति-प्रधानानाम्'**, तत्र **व्याकरणं**-संस्कृतशब्दव्याकरणं प्राकृतशब्दव्याकरणं च प्रश्नव्याकरणं वा, **करणं** पिण्डविशुद्ध्यादि, उक्तं च–

पिंड[४]विसोही ४ समिई ५ भावण १२ पडिमा १२ य इंदियनिरोहो ५।
पडिलेहण २५ गुत्तीओ ३ अभिग्गहा ४ चेव करणं तु॥१॥

[ओघ[*]निर्युक्तिभाष्ये गा० ३]

भङ्गी भङ्गबहुलं श्रुतम्, **कर्मप्रकृतिः** प्रतीता, एतेषु प्ररूपणामधिकृत्य प्रधानानाम्॥३०॥

जच्चंजणधाउसमप्पहाणमुद्दीयकुवलयनिहाणं।
वड्ढउ वायगवंसो रेवइणक्खत्तणामाणं॥३१॥

जच्चंजणेत्यादि। **आर्यनागहस्ति**नामपि शिष्याणां **रेवतिनक्षत्र**नाम्नां वाचकानां

---

१. **पञ्चमी**। मलय० कृ० ४।९५॥ "आशिषि गम्यमानायां धातोः पञ्चमी भवति। जयतात्॥९५॥" **लिङ् लेडाशिषि**। शाकटा० ४।४।१३६। आसंशनमाशीः।... आशिषि गम्यमानायां धातोर्लेङ्लेटौ प्रत्ययौ भवतः। जीयात्...। जयतात्...॥४।४।१३६॥ २. **इत्यनेना°** दे० । **एतेना°** जे१,२ मां०॥ ३. **°वंशस्य व्य°** जे१॥ ४. पिण्डविशुद्धयः ४ समितयः ५ भावनाः १२ प्रतिमाः १२ च इन्द्रियनिरोधः ५। प्रतिलेखनाः २५ गुप्तयः ३ अभिग्रहाः ४ चैव करणं तु॥१॥

वाचकवंशो वर्द्धताम्। कथम्भूतानाम् ? इत्याह– **'जात्याञ्जनधातुसमप्रभाणाम्'** जात्यश्चासावञ्जनधातुश्च तेन **समा** सदृशी प्रभा देहकान्तिर्येषां ते तथा तेषाम्। मा भूदत्यन्तकालिम्नि सम्प्रत्यय इति विशेषणान्तरमाह– **'मुद्रिका-कुवलयनिभानाम्'** परिपाकागतरसद्राक्षया नीलोत्पलेन च समप्रभाणाम्। **अपरे पुनराहुः**– कुवलयमिति मणिविशेषः, तत्राप्यविरोधः॥३१॥

अयलपुरा णिक्खंते कालियसुयआणुओगिए धीरे।
बंभद्दीवगसीहे वायगपयमुत्तमं पत्ते॥३२॥

अयलेत्यादि। **रेवतिनक्षत्र**नामकवाचकानां शिष्यान् **'ब्रह्मद्वीपिकसिंहान्'**[१] **ब्रह्मद्वीपिक**शाखोपलक्षितान् **सिंहनामका**नाचार्यान् **अचलपुराद् निष्क्रान्तान्** अचलपुरे गृहीतदीक्षान्। **कालिकश्रुतानुयोगिकान्,** कालिकश्रुतस्य अनुयोगे-व्याख्याने नियुक्ताः कालिकश्रुतानुयोगिकास्तान्; अथवा कालिकश्रुतानुयोग एषां विद्यते इति कालिकश्रुतानुयोगिनः, ततः स्वार्थिककप्रत्ययविधानात् कालिकश्रुतानुयोगिकाः, तान्। धिया राजन्ते इति **धीराः**, तान्। तथा तत्कालापेक्षया **उत्तमं** प्रधानं वाचकपदं प्राप्तान्॥३२॥

जेसि इमो अणुओगो पयरइ अज्जावि अड्ढभरहम्मि।
बहुनगरनिग्गयजसे ते वंदे खंदिलायरिए॥३३॥

जेसिमित्यादि। येषाम् **अयं** श्रवणप्रत्यक्षत उपलभ्यमानो**ऽनुयोगोऽद्यापि 'अर्द्धभरते' वैताढ्या**दर्वाक् **प्रचरति** व्याप्रियते तान् **स्कन्दिलाचार्यान् सिंह-वाचकसूरि**शिष्यान् बहुषु नगरेषु **निर्गतं** प्रसृतं यशो येषां ते **बहुनगरनिर्गतयशस**स्तान् वन्दे।

अथ[२] येषामनुयोगोऽर्द्धभरते व्याप्रियमाणः कथं तेषां **स्कन्दिल**नाम्नामाचार्याणां सम्बन्धी ? उच्यते–

इह **स्कन्दिलाचार्य**प्रतिपत्तौ दुष्षमसुषमाप्रतिपन्थिन्याः तद्गतसकलशुभभाव-ग्रसनैकसमारम्भायाः दुष्षमायाः साहायकमाधातुं परमसुहृदिव द्वादशवार्षिकं

---

१. **'द्विपिकासिंहान्** पा० देसं० विना ॥ थेरेहिंतो णं अज्जसमिएहिंतो गोयमसगुत्तेहिंतो इत्थ णं बंभदीविया साहा निग्गया। (कल्पसू० व्या०८ पृ०५१३)॥ २. **अथायमनु**° पा० खंसं०॥

दुर्भिक्षमुदपादि। तत्र चैवंरूपे महति दुर्भिक्षे भिक्षालाभस्यासम्भवादवसीदतां साधूनामपूर्वार्थग्रहण-पूर्वार्थस्मरण-श्रुतपरावर्त्तनानि मूलत एवापजग्मुः, श्रुतमपि चातिशायि प्रभूतमनेशत्, अङ्गोपाङ्गादिगतमपि भावतो विप्रनष्टम्, तत्परावर्त्तनादेरभावात्। ततो द्वादशवर्षानन्तरमुत्पन्ने सुभिक्षे **मथुरापुरि स्कन्दिलाचार्य**प्रमुखश्रमणसङ्घेनैकत्र मिलित्वा यो यत् स्मरति स तत् कथयतीत्येवं कालिकश्रुतं पूर्वगतं च किञ्चिदनुसन्धाय घटितम्। यतश्चैतन्**मथुरापुरि** सङ्घटितमत इयं **वाचना माथुरी**त्यभिधीयते। सा च तत्कालयुगप्रधानानां **स्कन्दिलाचार्या**णामभिमता, तैरेव चार्थतः शिष्यबुद्धिं प्रापितेति तदनुयोगः तेषामाचार्याणां सम्बन्धीति व्यपदिश्यते। **अपरे पुनरे**वमाहुः-न किमपि श्रुतं दुर्भिक्षवशादनेशत्[१], किन्तु तावदेव तत्काले श्रुतमनुवर्त्तते स्म, केवलमन्ये प्रधाना येऽनुयोगधराः ते सर्वेऽपि दुर्भिक्षकालकवलीकृताः, एक एव **स्कन्दिलसूरि**यो विद्यन्ते स्म, ततस्तैर्दुर्भिक्षापगमे **मथुरापुरि** पुनरनुयोगः प्रवर्त्तित[२] इति **वाचना माथुरी** व्यपदिश्यते, अनुयोगश्च तेषामाचार्याणामिति॥३३॥

तत्तो हिमवंतमहंतविक्कमे धिइपरक्कममणंते।
सज्झायमणंतधरे हिमवंते वंदिमो सिरसा॥३४॥

तत्तो इत्यादि। **ततः** स्कन्दिलाचार्यानन्तरं तच्छिष्यान् '**हिमवतः**' **हिमवन्ना**मकान्, **हिमवन्महाविक्रमान्**, हिमवत इव महान् विक्रमः-विहारक्रमेण प्रभूतक्षेत्रव्याप्तिरूपो येषां ते तथा तान्। **धिइपरक्कममणंते** इति 'अनन्तधृतिपराक्रमान्' प्राकृतशैल्या चानन्तशब्दस्यान्यथोपन्यासः सूत्रे, अनन्तः-अपरिमितो धृतिप्रधानः पराक्रमः कर्मशत्रून् प्रति येषां ते तथाविधास्तान्। तथा **सज्झायमणंतधरे** त्ति अत्रापि प्राकृतशैल्या-ऽनन्तशब्दस्य परनिपातः, मकारस्त्वलाक्षणिकः, तत एवं तात्त्विको निर्देशः **अनन्तस्वाध्यायधरान्**, तत्रानन्तगम-पर्यायात्मकत्वाद् **अनन्तं** सूत्रम्, तस्य स्वाध्यायः, धरन्तीति धराः, अनन्तस्वाध्यायस्य धरा अनन्तस्वाध्यायधरास्तान्॥३४॥ भूयोऽपि **हिमवदा**चार्याणां स्तुतिमाह–

---

१. "नशेर्नेश् वाऽङि लिद्" [सिद्ध० ४-३-१०२] इत्यादिसूत्रेण अङ् प्रत्ययः" इति खंटि०॥ २. **इति माथुरी वाचना व्यप**° जे१,२ मां० दे०॥

कालियसुयअणुओगस्स धारए धारए य पुव्वाणं।
हिमवंतखमासमणे वंदे णागज्जुणायरिए॥३५॥

कालियेत्यादि। कालिकश्रुतानुयोगस्य **धारकान्, धारकांश्च पूर्वाणाम्** उत्पादादीनां **हिमवतः क्षमाश्रमणान् वन्दे**। ततस्तच्छिष्यान् **वन्दे नागार्जुनाचार्यान्** ॥३५॥

कथम्भूतान् ? इत्याह–

मिउ-मद्दवसंपण्णे अणुपुव्विं वायगत्तणं पत्ते।
ओहसुयसमायारे णागज्जुणवायए वंदे॥३६॥[१]

मिउ इत्यादि। **मृदुमार्दवसम्पन्नान्,** मृदु-कोमलं मनोज्ञं सकलभव्यजन-मनःसन्तोषहेतुत्वाद् यद् मार्दवं तेन सम्पन्नान्, मार्दवं चोपलक्षणम्, तेन क्षान्ति-मार्दवा-ऽऽर्जव-सन्तोषसम्पन्नानिति द्रष्टव्यम्। तथा **आनुपूर्व्या** वयः- पर्यायपरिपाट्या **वाचकत्वं प्राप्तान्,** इदं च विशेषणमैदंयुगीनसूरीणां सामाचारीप्रदर्शनपरमवसेयम्। तथाहि– **अपवादपदमप्यपुष्टमवलम्ब्य**[२] **नैवैदंयुगीनसाधूनामपि युज्यते कालोचितानुपूर्वीमपहाय गणधरपदाद्यारोपणम्**[३]**, मा प्रापत् महापुरुष-गौतमादीनामाशातनाप्रसङ्गः, तेषां चाऽऽशातना स्वल्पीयस्यपि प्रकृष्टदुरन्त-संसारोपनिपातकारणम्**। यत उक्तम्–

वूढो[४] **गणहरसद्दो गोयममाईहिं धीरपुरिसेहिं।**
जो तं ठवइ अपत्ते जाणंतो सो महापावो॥१॥ [ ]

तत एतत् परिभाव्य संसारभीरुणा कथञ्चिद् विनयादिना समावर्जितेनापि स्वशिष्ये गुणवति कालोचितवयः-पर्यायानुपूर्वीसम्पन्ने गणधरपदाध्यारोपः कर्त्तव्यः, न यत्र कुत्रचिदिति स्थितम्। तथा **ओघश्रुतसमाचारकान्** ओघश्रुतमुत्सर्गश्रुतमुच्यते, तत् समाचरन्ति ये ते ओघश्रुतसमाचारकाः, तान्

---

१. एतद्गाथानन्तरं डे० सं० मो० ल० शु० आदर्शेषु गाथायुगलमधिकं वर्तते। तच्चेदम्- **गोविंदाणं पि णमो अणुओगे विउलधारणिंदाणं। निच्चं खंति-दयाणं परूवणे दुल्लभिंदाणं॥ तत्तो य भूयदिन्नं निच्चं तव-संजमे अनिव्विन्नं। पंडियजणसामन्नं वंदामि य संजमविहन्नुं॥** अत्रार्थे **जेसलमेरुनन्दिसूत्रमूलादर्शे**ऽपि गाथाद्वयं वर्त्तते, किन्तु तत्र "इदमपि गाथाद्वयं न वृत्तौ कुतश्चित्" इति टिप्पणी वर्त्तते॥ २. °**मपुष्ट**° खं० विना॥ ३. °**पदारो**° खंमू० ॥ ४. व्यूढो गणधरशब्दो गौतमादिभिः धीरपुरुषैः। यः तं स्थापयति अपात्रे जानानः स महापापः॥१॥

नागार्जुनवाचकान् वन्दे॥३६॥

वरतवियकणगचंपगविमउलवरकमलगब्भसरिवण्णे।
भवियजणहिययदइए दयागुणविसारए धीरे॥३७॥
अड्ढभरहप्पहाणे बहुविहसज्झायसुमुणियपहाणे।
अणुओयियवरवसहे, णाइलकुलवंसणंदिकरे॥३८॥
भूयहिययप्पगब्भे वंदेऽहं भूयदिण्णमायरिए।
भवभयवोच्छेदकरे सीसे णागज्जुणरिसीणं॥३९॥

वरतवियेत्यादि गाथात्रयम्। वरं-प्रधानं सार्द्धषोडशवर्णिकारूपं तापितं यत् **कनकं** यत् सुवर्णं यच्च वरं **चम्पकं** सुवर्णचम्पकपुष्पं तथा यच्च **विमकुलं**[1] विकसितं **वरं** प्रधानं **कमलम्** अम्भोजं तस्य यो गर्भः तत्**सदृशवर्णान्** तत्समानदेहकान्तीन्। तथा **भव्यजनहृदयदयितान्** भव्यजनहृदयवल्लभान्। तथा **दयागुणविशारदान्** सकलजगज्जन्तुदयाविधि-विधापनयोरतीव कुशलान्। तथा धिया राजन्ते शोभन्ते इति **धीरास्तान्**॥३७॥ तथा–

'**अर्द्धभरतप्रधानान्**' तत्कालापेक्षया सकलार्द्धभरतमध्ये युगप्रधानान्। तथा **सुविज्ञातबहुविधस्वाध्यायप्रधानान्**, बहुविध[2] **आचारादि**भेदात् स्वाध्यायः, ततः सुविज्ञातो बहुविधः स्वाध्यायो यैस्ते तथोक्ताः, तेषां मध्ये प्रधानान्-उत्तमान्। तथा **अनुयोजिताः** प्रवर्त्तिता यथोचिते वैयावृत्त्यादौ **वरवृषभाः** सुसाधवो यैस्ते तथोक्तास्तान्। तथा **नागेन्द्रकुलवंशस्य नन्दिकरान्** प्रमोदकरानित्यर्थः॥३८॥

तथा **भूतहितप्रगल्भान्** अनेकधास कलसत्त्वहितोपदेशदानसमर्थान् **भवभयव्यवच्छेदकरान्** सदुपदेशादिना संसारभयव्यवच्छेदकरणशीलान्। **'नागार्जुनऋषीणां' नागार्जुन**महर्षिसूरीणां **शिष्यान्** **'भूतदिन्नाचार्यान्'** भूतदिन्ननामकान् आचार्यानहं वन्दे। सूत्रे च भूतदिन्नशब्दाद् मकारोऽलाक्षणिकः॥३९॥

---

१. मकुल-मुकुलशब्दावेकार्थौ शब्दकोशे। **विमुकुलं** दे० डे० सं० पु०॥ २. **बहुविध** इत्यत आरभ्य **प्रमोदकरानित्यर्थः**॥ इतिपर्यन्तः पाठः खंमू० पा० जे१ देमू० तालपत्रादर्शेषु नास्ति, केवलं खं० दे० मध्ये पत्रस्याधोभागे केनचित् पश्चात् पूरितः॥

सुमुणियणिच्चाणिच्चं सुमुणियसुत्तत्थधारयं णिच्चं।
वंदे हं लोहिच्चं सब्भावुब्भावणातच्चं॥४०॥

सुमुणिय इत्यादि। **सुष्ठु** यथावस्थिततया **मुणितं** ज्ञातम्, **ज्ञो जाण-मुणौ** [सिद्ध-हैमप्रा० ४।७] इति प्राकृतलक्षणाज्जानातेर्मुण आदेशः, **नित्या-ऽनित्यं** सामर्थ्याद् वस्त्विति गम्यते, येन स **सुज्ञातनित्यानित्यः**, तम्। यथा च वस्तुनो नित्या-ऽनित्यता तथा **धर्मसंग्रहणिटीकायां** सविस्तरमभिहितमिति नेह भूयोऽभिधीयते, मा भूद् ग्रन्थगौरवमिति कृत्वा, एतेन न्यायवेदिता तस्याऽऽवेदिता। तथा ['नित्यं' सर्वदा] सुष्ठु-अतिशयेन ज्ञातं यत् सूत्रमर्थश्च तस्य धारकम्, अनेन सदैवाभ्यस्तसूत्रार्थता तस्याऽऽवेद्यते। तथा सन्तः-यथावस्थिता विद्यमाना भावाः-सद्भावाः तेषामुद्भावना-प्रकाशनं सद्भावोद्भावना तस्यां तथ्यम्-अविसंवादिनं **सद्भावोद्भावनातथ्यम्**, एतेन तस्य सम्यक्प्ररूपकत्वमुक्तम्। इत्थम्भूतं **भूतदिन्नाचार्य**शिष्यं **'लौहित्यं' लौहित्य**नामान**महं वन्दे**॥४०॥

अत्थमहत्थक्खाणिं सुसमणवक्खाणकहणणेव्वाणिं।
पयतीए महुरवाणिं पयओ पणमामि दूसगणिं॥४१॥[१]

अत्थमहत्थेत्यादि। तत्र भाषाभिधेया अर्थाः, विभाषा-वार्त्तिकाभिधेया महार्थाः, तेषामर्थ-महार्थानां खानिरिव **अर्थ-महार्थखानिः** तम्, एतेन भाषा-विभाषा-वार्त्तिकरूपानुयोगविधावतिपटीयस्त्वमावेदयति। तथा सुश्रमणानां विशिष्टमूलोत्तर-गुणकलितसंयतानामपूर्वशास्त्रार्थव्याख्याने पृष्टार्थकथने च निर्वृतिः समाधिर्यस्य स तथा तम्। तथा **प्रकृत्या** स्वभावेन **मधुरवाचं** मधुरगिरम्, न शिष्यगतमनाक्प्रमादादि-रूपकोपहेतुसम्पत्तावपि कोपोदयवशतो निष्ठुरभाषिणम्। एतेन शिष्यानुवर्त्तनायामति-कौशलमाह, तथाहि– गुणसम्पद्योग्यान् कथञ्चित् प्रमादिनोऽपि दृष्ट्वा धर्मानुगतैः सुमधुरवचोभिराचार्यस्तान् शिक्षयेत्, यथा तेषां मनः प्रसादमेव विशिष्टगुणप्रति-पत्त्यभिमुखमश्नुते, न कोपं प्रतिपन्नगुणभ्रंशकारिणमिति। उक्तं च–

---

१. एतद्गाथानन्तरं जे० डे० सं० मो० शु० आदर्शेषु एका गाथाऽधिका उपलभ्यते। तथाहि- **तव-नियम-सच्च-संजम-विणय-ऽज्जव-खंति-महवरयाणं। सीलगुणगढियाणं अणुओगजुगप्पहाणाणं॥** अत्रार्थे **जेसलमेरुनन्दिसूत्र-मूला**दर्शेऽपि इयं गाथा वर्त्तते, किन्तु तत्र "एषाऽपि न **वृत्तौ** कुतश्चित् ?" इति टिप्पणी वर्त्तते॥

धम्ममइएहिं[१] अइसुंदरेहिं कारणगुणोवणीएहिं।
पल्हायंतो य मणं सीसं चोएइ आयरिओ॥१॥ [*उप० माला० गा० १०४]

तत इत्थं शिष्यानुवर्त्तनाकौशल्यख्यापनार्थमुक्तं **प्रकृत्या मधुरवाचम्** इति। तं **दूषगणिनं**[२] **प्रयतः** प्रयत्नपरः प्रणमामि॥४१॥ पुनरपि **दूषगणिन**[३] एव स्तुतिमाह–

सुकुमालकोमलतले तेसिं पणमामि लक्खणपसत्थे।
पादे पावयणीणं पाडिच्छगसएहिं पणिवइए॥४२॥

सुकुमालेत्यादि। **तेषां दूषगणिनां**[४] **प्रावचनिकानां** प्रवचने-प्रवचनार्थकथने नियुक्ताः प्रावचनिकास्तेषाम्, तत्कालापेक्षया युगप्रधानानामित्यर्थः, पादान् **लक्षणैः** शङ्ख-चक्रादिभिः **प्रशस्तान्** श्रेष्ठान्। तथा **सुकुमारम्** अकर्कशं **कोमलं** मनोज्ञं तलं येषां तान्। पुनः किम्भूतान् ? इत्याह– प्रातीच्छिकशतैः प्रणिपतितान्, इह ये गच्छान्तरवासिनः[५] स्वाचार्यं पृष्ट्वा गच्छान्तरेऽनुयोगश्रवणाय समागच्छन्ति अनुयोगाचार्येण च प्रतीच्छ्यन्ते अनुमन्यन्ते ते प्रातीच्छिका[६] उच्यन्ते, स्वाचार्यानुज्ञापुरःसर-मनुयोगाचार्यप्रतीच्छया चरन्तीति प्रातीच्छिका इति व्युत्पत्तेः तेषां शतैः **प्रणिपतितान्** नमस्कृतान् **प्रणिपतामि** नमस्करोमि॥४२॥ तदेवमावलिकाक्रमेण महापुरुषाणां स्तवमभिधाय सम्प्रति सामान्येन श्रुतधरनमस्कारमाह–

जे अण्णे भगवंते कालियसुयआणुओगिए धीरे।
ते पणमिऊण सिरसा णाणस्स परूवणं वोच्छं॥४३॥

जे अन्ने इत्यादि। ये अन्येऽतीता भाविनश्च **भगवन्तः** श्रुतरत्ननिकरपूरितत्वात् समग्रैश्वर्यादिमन्तः **कालिकश्रुतानुयोगिनो धीराः** विशिष्टधिया राजमानाः तान् **शिरसा** उत्तमाङ्गेन प्रणम्य **ज्ञानस्य** आभिनिबोधिकादेः **प्ररूपणां** प्ररूपणाकारक-मध्ययनं **वक्ष्ये**। क एवमाह ? उच्यते– **दूषगणि**शिष्यो **देववाचकः**॥४३॥ इह **ज्ञानस्य प्ररूपणां वक्ष्ये** इत्युक्तम्, सा च प्ररूपणा शिष्यानधिकृत्य कर्त्तव्या। शिष्याश्च द्विधा-योग्या अयोग्याश्च। तत्र 'योग्यानधिकृत्य कर्त्तव्या नायोग्यान्' इति प्रथमतो

---

१. धर्ममयैः अतिसुन्दरैः कारणगुणोपनीतैः। प्रह्लादयंश्च मनः शिष्यं चोदयत्याचार्यः॥१॥ २-३-४. **दूष्यग०** पु०॥ ५. °न्तरमनु° खंसं०॥ ६. **प्रतीच्छिका** जे१ देमू० विना॥

योग्याऽयोग्यविभागोपदर्शनार्थं तावदिदमाह–

[सू०७ (१)] सेलघण १ कुडग २ चालणि ३ परिपूणग ४ हंस ५ महिस ६ मेसे य ७। मसग ८ जलूग ९ बिराली १० जाहग ११ गो १२ भेरी १३ आभीरी १४॥४४॥

सेलघणेत्यादि। अत्र पर आह– ननु ये **देववाचक**नामानः सूरयस्ते महापुरुषाः सदैव समभावव्यवस्थिताः कृपालवः, अत एव सकलसत्त्वहितसम्पादनाय कृतोद्यमाः तत् कथमिदमध्ययनं दातुमुद्यता योग्या-ऽयोग्यविभागनिरीक्षणमारभन्ते ?, न हि परहितकरणप्रवृत्तमनसो महीयांसो महादानं दातुकामा मार्गणकगुणमपेक्ष्य दानक्रियायां प्रवर्त्तन्ते दयालवः, किन्तु प्रावृषेण्यजलभृत इवाविशेषेण, अत्रोच्यते– यत एव **देववाचक**सूरयः समभावव्यवस्थिताः सकलसत्त्वहितसम्पादनाय कृतोद्यमा महीयांसः कृपालवश्च अत एव शुभमिदमध्ययनं दातुमुद्यता योग्या-ऽयोग्यविनेय-विभागोपदर्शनमारभन्ते, मा भूदयोग्येभ्यः प्रदाने तेषामनर्थोपनिपात इति कृत्वा। अथ कथं तेषामेतदध्ययनप्रदाने महानर्थोपनिपातः ?, उच्यते-ते हि तथास्वाभाव्यादेव अचिन्त्यचिन्तामणिकल्पमज्ञानतमःसमूहभास्करमनेकभवशतसहस्रपरम्परासङ्कलित-कर्मराशिविच्छेदकमपीदमध्ययनमवाप्य न विधिवदासेवन्ते, नापि मनसा बहु मन्यन्ते, लाघवमपि चास्य यथाशक्ति सम्पादयन्ति, परेषामपि च यथायोगं बुद्धीर्भेदयन्ति, ततो विधिसमासेवकाः कल्याणमिव ते महदकल्याणमासादयन्ति। उक्तं च–

[१]आमे घडे निहित्तं जहा जलं तं घडं विणासेइ।
इय सिद्धंतरहस्सं, अप्पाहारं विणासेइ॥१॥ [ ]

ततोऽयोग्येभ्यः प्रकृताध्ययनप्रदाने तेषामनर्थोपनिपातः, स च वस्तुतो दातृकृत एवेति कृतं प्रसङ्गेन॥ प्रकृतं प्रस्तुमः– तत्राधिकृतगाथायां प्रथममयोग्यशिष्यविषये मुद्गशैल-घनदृष्टान्त उपात्तः, स च काल्पनिकः, मुद्गशैल-घनयोर्वक्ष्यमाणप्रकारो-ऽहङ्कारादिर्न सम्भवति, तयोरचेतनत्वात्, केवलं शिष्यमतिवितानाय तौ तथा कल्पयित्वा

---

१. आमे घटे निहितं यथा जलं तं घटं विनाशयति। इति सिद्धान्तरहस्यम् अल्पाधारं विनाशयति॥१॥

दृष्टान्तत्वेनोपात्तौ, न चैतदनुपपन्नम्, **आर्षे**ऽपि काल्पनिकदृष्टान्तस्याभ्यनुज्ञानात्। यदाह भगवान् **भद्रबाहुस्वामी**–

चरियं[1] च कप्पियं वा आहरणं दुविहमेव पन्नत्तं।
अत्थस्स साहणट्ठा, इंधणमिव ओयणट्ठाए॥१॥

[*पिण्डनि० गा० ६३० ओघनि० गा० ५४२]

ततो नानुपपन्नः **शैलघनदृष्टान्तः**। तद्भावना चेयम्–

इह क्वचिद् अगोष्पदायामरण्यान्यां मुद्गप्रमाणः क्षितिधरो **मुद्गशैला**भिधो वर्त्तते। इतश्च **जम्बूद्वीप**प्रमाणः **पुष्करावर्त्ता**भिधानो महामेघः। तत्र महर्षि**नारद**स्थानीयः कोऽपि कलहाभिनन्दी तयोः कलहमाधातुं प्रथमतो मुद्गशैलस्योपकण्ठमगमत्, गत्वा च तमेवमभाषिष्ट-भो **मुद्गशैल** ! क्वचिदवसरे महापुरुषसदसि 'जलेन भेत्तुमशक्यो मुद्गशैलः' इति मया त्वद्गुणवर्णनायां क्रियमाणायां नामापि तव **पुष्करावर्त्तो** न सहते स्म। यथा-अलमनेनालीकप्रशंसावचनेन, ये हि शिखरसहस्राग्रभागोल्लिखितनभोमण्डलतलाः कुलाचलादयः शिखरिणस्तेऽपि मदासारोपनिपातेन भिद्यमानाः शतशो भेदमुपयान्ति, किं पुनः स वराको यो मदेकधारोपनिपातमात्रमपि न सहते ?। तदेवमुत्प्रासितो **मुद्गशैल**ः समुज्ज्वलितकोपानलोऽहङ्कारपुरस्सरं तमेवमवादीत्-भो **नारद**महर्षे ! किमत्र तं प्रति परोक्षे बहुजल्पितेन ?, शृणु मे भाषितमेकम्, यदि तेन दुरात्मना सप्ताहोरात्रवर्षिणाऽपि मे तिलतुषसहस्रांशमात्रमपि भिद्यते ततोऽहं **मुद्गशैल**[2] इति नामापि नोद्वहामि। ततः स पुरुषोऽमूनि **मुद्गशैल**वचांसि चेतस्यवधार्य कलहोत्थानाय **पुष्करावर्त्त**मेघसमीपमुपागमत्, मुद्गशैलवचनानि च सर्वाण्यपि सोत्कर्षं तस्य पुरतोऽन्ववादीत्। स च श्रुत्वा तानि वचनानि कोपमतीवाशिश्रियत्, खर-परुषाणि च वचनानि वक्तुं प्रावर्त्तिष्ट, यथा-हा ! दुष्टः स वराकोऽनात्मज्ञो मामप्येवमधिक्षिपतीति। ततः सर्वादरेण सप्ताहोरात्रान् यावद् निरन्तरं मुसलप्रमाणधारोपनिपातेन वर्षितुमयतिष्ट। सप्ताहोरात्रनिरन्तरवृष्ट्या च सकलमपि विश्वम्भरामण्डलं जलप्लावितमासीत्। तत एकार्णवकल्पं विश्वमालोक्य चिन्तितवान्– हतः समूलघातं स वराक इति। ततः

१. चरितं च कल्पितं वा आहरणं द्विविधमेव प्रज्ञप्तम्। अर्थस्य साधनार्थम् इन्धनमिव ओदनार्थाय॥१॥ २. °**लनामापि** जे१,२, दे० मांमू० पु०॥

प्रतिनिवृत्तो वर्षात्। क्रमेण चापसृते जलसङ्घाते सहर्षं **पुष्करावर्त्तो नारद**मेवमवादीत्- भो ! **नारद** ! 'स वराकः सम्प्रति कामवस्थामुपागतो वर्त्तते ?' इति सहैव निरीक्ष्यताम्। ततस्तौ सहभूय **मुद्गशैल**स्य पार्श्वमगमताम्। स च **मुद्गशैलः** पूर्वं धूलीधूसर-शरीरत्वान्मन्दमन्दमकाशिष्ट, सम्प्रति तु तस्या अपि धूलेरपनयनादधिकतरमवभासमानो वर्त्तते। ततः स चाकचिक्यमादधानो हसन्निव **नारद-पुष्करावर्त्तौ** समागच्छन्तावेवमभाषिष्ट– समागच्छत समागच्छत, स्वागतं युष्माकम् !, अहो ! कृतकल्याणा वयम् यदतर्कितोपनीतकाञ्चनवृष्टिरिव युष्मद्दर्शनमकाण्ड एव मन्मनोमोदाधायि संवृत्तमिति। तत एवमुक्ते भ्रष्टप्रतिज्ञमात्मानमवबुध्य लज्जावनतकन्धरा-शिरो-नयनः पुष्करावर्त्तो यत्किञ्चिदाभाष्य स्वस्थानं गतः। एष दृष्टान्तः।१-१॥

उपनयस्त्वयम्– कोऽपि शिष्यो मुद्गशैलसमानधर्मा निरन्तरं यत्नतः पाठ्यमानोऽपि पदमप्येकं भावतो नावगाहते, ततः 'अयोग्योऽयम्' इति कृत्वा[१] स्वाचार्यैरुपेक्षितः। तं च तथोपेक्षितमवबुध्य कोऽप्यन्य आचार्योऽभिनवतरुणिमावेगवशोज्जृम्भितमहाबल-पराक्रमः अत एवागणितव्याख्याविधिपरिश्रमो यौवनिकमदवशतोऽपरिभावितगुणा-ऽगुणविवेको वक्तुमेवं प्रवृत्तः, यथा– एनमहं पाठयिष्यामि, पठति च लोकानां पुरतः सुभाषितम्–

आचार्यस्यैव तज्जाड्यं यच्छिष्यो नावबुध्यते।
गावो गोपालकेनेव कुतीर्थेनावतारिताः॥१॥ [ ]

ततस्तं सर्वादरेण पाठयितुं लग्नः। स च मुद्गशैल इव दृढप्रतिज्ञो न भावतः पदमप्येकं स्वचेतसि परिणमयति। ततः खिन्नशक्तिराचार्यो भ्रष्टप्रतिज्ञमात्मानं जानानो लज्जितो यत्किमप्युत्तरं कृत्वा[२] तत्स्थानादपसृत्य गतः॥

तत एवंविधाय नेदमध्ययनं दातव्यम्, यतो[३] न खलु वन्ध्या गौः शिरः-शृङ्ग-वदन-पृष्ठ-पुच्छोदरादौ सस्नेहं स्पृष्टाऽपि सती दुग्धप्रदायिनी भवति, तथास्वाभाव्यात्; एवमेषोऽपि सम्यक् पाठ्यमानोऽपि पदमप्येकं नावगाहते, ततो न तस्य तावदुपकारः।

---

१. **कृत्वा आचार्यै**° खं० ॥ २. **ततः स्था**° खंसं० पु०॥ ३. तुलना- दृश्यतां मलयगिरीयावश्यकवृत्तौ पृ० १४२A तः १४६A (गा०१३६) ॥

आस्तां तस्योपकाराभावः, प्रत्युत आचार्ये सूत्रे चापकीर्त्तिरुपजायते, यथा– न सम्यक्कौशलमाचार्यस्य व्याख्यायाम्, इदं वाऽध्ययनं न समीचीनम्, कथमयमन्यथा नावबुध्यते ? इति। अपि च - तथाविधकुशिष्यपाठने तस्यावबोधाभावाद् उत्तरोत्तरसूत्रा-ऽर्थानवगाहने सूरेः सकलावपि शास्त्रान्तरगतौ सूत्रा-ऽर्थौ भ्रंशमाविशतः, अन्येषामपि च पटुश्रोतॄणामुत्तरोत्तरसूत्रा-ऽर्थावगाहनहानिप्रसङ्गः। उक्तं च **भाष्यकारेण**– 5

आयरिए सुत्तम्मि य परिवाओ सुत्त-अत्थपलिमंथो।
अन्नेसिं पि य हाणी पुट्ठा वि न दुद्धया वंझा॥१॥

[कल्पभा० गा० ३३७, विशेषा० गा० १४५७]

मुद्गशैलप्रतिपक्षभूतो योग्यशिष्यविषयो दृष्टान्तः **कृष्णभूमप्रदेशः**-तत्र हि प्रभूतमपि जलं निपतितं तत्रैवान्तः परिणमति, न पुनः किञ्चिदपि ततो बहिरपगच्छति। एवं यो 10 विनेयः सकलसूत्रार्थग्रहण-धारणासमर्थः स कृष्णभूमप्रदेशतुल्यः, स च योग्यः, ततस्तस्मै दातव्यमिदमध्ययनमिति। आह च **भाष्यकृत्**–

वुट्ठे वि दोणमेहे न कण्हभोमाउ लोट्टए उदयं।
गहण-धरणासमत्थे इय देयमछित्तिकारिम्मि ॥१॥१-२॥

[कल्पभा० गा० ३३८, विशेषा० गा० १४५८] 15

सम्प्रति **कुटदृष्टान्तभावना** क्रियते– **कुटाः** घटाः, ते द्विधा-नवीना जीर्णाश्च। तत्र नवीना नाम ये सम्प्रत्येवाऽऽपाकतः[१] समानीताः। जीर्णा द्विधा[२]-भाविता अभाविताश्च। भाविता द्विधा-प्रशस्तद्रव्यभाविता अप्रशस्तद्रव्यभाविताश्च। तत्र ये कर्पूरा-ऽगरुचन्दनादिभिः प्रशस्तैर्द्रव्यैर्भावितास्ते प्रशस्तद्रव्यभाविताः, ये पुनः पलाण्डु-लशुन-सुरा-तैलादिभिर्भावितास्तेऽप्रशस्तद्रव्यभाविताः। [प्रशस्ता-ऽ] प्रशस्तद्रव्यभाविता अपि 20 द्विधा– वम्या अवम्याश्च। अभाविता नाम– ये केनापि द्रव्येण न वासिताः।

एवं शिष्या[३] अपि द्विधा– नवीना जीर्णाश्च। तत्र प्रथमतो ये बालभाव एवाद्यापि वर्त्तन्ते अज्ञानिनः सम्प्रत्येव च बोधयितुमारब्धास्ते नवीनाः। जीर्णा द्विधा-भाविता

---

१. आवाहात् - खंटि०॥ २. **द्विविधाः** पा० डे० सं०॥ ३. **शिष्या अपि प्रथमतो द्विधा नवीना जीर्णाश्च, तत्र ये बालभावः** खं० पा० ॥

अभाविताश्च। तत्राभाविता ये केनापि दर्शनेन न वासिताः। भाविता द्विधा-कुप्रावचनिक-पार्श्वस्थादिभिः संविग्नैश्च। कुप्रावचनिक-पार्श्वस्थादिभिरपि भाविता द्विधा-वम्या अवम्याश्च। संविग्नैरपि भाविता द्विधा– वम्या अवम्याश्च। तत्र ये नवीना ये जीर्णा अभाविता ये च कुप्रावचनिकादिभिर्भाविता अपि वम्याः ये च संविग्नभाविता अवम्याः ते सर्वेऽपि योग्याः, शेषा अयोग्याः॥२-१॥

अथवा अन्यथा **कुटदृष्टान्तभावना**-इह चत्वारः कुटाः, तद्यथा– छिद्रकुटः कण्ठहीनकुटः खण्डकुटः सम्पूर्णकुटश्च। तत्र यस्याधो बुध्ने छिद्रं स छिद्रकुटः १, यस्य पुनरोष्ठपरिमण्डलाभावः स कण्ठहीनकुटः २, यस्य पुनरेकपार्श्वे खण्डेन हीनः स खण्डकुटः ३, यः पुनः सम्पूर्णावयवः स सम्पूर्णकुटः ४। एवं शिष्या अपि चत्वारो वेदितव्याः-तत्र यो व्याख्यानमण्डल्यामुपविष्टः सर्वमवबुध्यते व्याख्यानादुत्थितश्च न किमपि स्मरति स छिद्रकुटसमानः। यथा हि छिद्रकुटो यावत् तदवस्थ एव गाढमवनितलसंलग्नोऽवतिष्ठते तावद् न किमपि जलं ततः स्रवति, स्तोकं वा किञ्चिदिति; एवमेषोऽपि यावदाचार्यः पूर्वापरानुसन्धानेन सूत्रार्थमुपदिशति तावदवबुध्यते, उत्थितश्चेद् व्याख्यानमण्डल्याः तर्हि स्वयं पूर्वापरानुसन्धानशक्तिविकलत्वाद् न किमप्यनुस्मरतीति १। यस्तु व्याख्यानमण्डल्यामप्युपविष्टोऽर्द्धमात्रं त्रिभागचतुर्भागहीनं[१] वा सूत्रार्थमवधारयति यथावधारितं च स्मरति स खण्डकुटसमानः २। यस्तु किञ्चिदूनं सूत्रार्थमवधारयति पश्चादपि तथैव स्मरति स कण्ठहीनकुटसमानः ३। यस्तु सकलमपि सूत्रार्थमाचार्योक्तं यथावदवधारयति पश्चादपि तथैव स्मृतिपथमवतारयति स सम्पूर्णकुटसमानः ४। अत्र छिद्रकुटसमान एकान्तेनायोग्यः, शेषास्तु योग्याः, यथोत्तरं च प्रधानाः प्रधानतरा इति २-२॥

सम्प्रति **चालनीदृष्टान्त**भावना-चालनी लोकप्रसिद्धा, यया कणिक्कादि चाल्यते। यथा चालन्यामुदकं प्रक्षिप्यमाणं तत्क्षणादेवाधो गच्छति न पुनः कियन्तमपि कालमवतिष्ठते, तथा यस्य सूत्रार्थः प्रदीयमानो यदैव कर्णे प्रविशति तदैव विस्मृतिपथमुपैति स चालनीसमानः ३॥ तथा च मुद्गशैल-च्छिद्रकुट-

१. **त्रिभागं चतुर्भागहीनं** जे१,२, मां०। **त्रिभागं चतुर्भागं हीनं** पा० दे०॥

चालनीसमानशिष्यभेदप्रदर्शनार्थमुक्तं भाष्यकृता–

सेले य छिड्डु चालिणि, मिहो कहा सोउ उट्ठियाणं तु।
छिड्डाऽऽह, तत्थ[1] बिट्ठो, सुमरिंसु, सरामि नेयाणिं॥१॥
एगेण विसइ बीएण नीइ कण्णेण चालणी आह।
धन्न त्थ आह सेलो, जं पविसइ नीइ वा तुज्झं॥२॥

[विशेषा० गा० १४६३-६४ कल्पभा०[*] गा० ३४३-४४] 5

तत एषोऽपि **चालिनी**[2]समानो न योग्यः ३-१॥ **चालिनी**[3]प्रतिपक्षभूतं च[4] वंशदलनिर्मापितं तापसभाजनम्, ततो हि बिन्दुमात्रमपि जलं न स्रवति। उक्तं च- **तावसखउरकढिणयं, चालणिपडिवक्खु न सवइ दवं पि। [कल्पभा०[*] गा० ३४५, विशेषा० गा० १४६५]**, ततस्तत्समानो योग्य इति[5] ३-२॥

सम्प्रति **परिपूणकदृष्टान्तो** भाव्यते– परिपूणको नाम घृत-क्षीरगालनकं सुगृहाभिधचटिकाकुलायो वा, तेन ह्याभीर्यो[6] घृतं गालयन्ति। ततो यथा स परिपूणकः कचवरं धारयति घृतमुज्झति, तथा शिष्योऽपि यो व्याख्या-वाचनादौ दोषानभिगृह्णाति गुणांस्तु मुञ्चति स परिपूणकसमानः, स चायोग्यः। आह च **आवश्यकचूर्णिकृत्**[7] –

वक्खाणाइसु दोसा हिययम्मि ठवेइ मुयइ गुणजालं।
सो सीसो उ अजोग्गो, भणिओ परिपूणगसमाणो॥१॥ [आव० हारि० १३९]

आह– सर्वज्ञमतेऽपि दोषाः सम्भवन्तीत्यश्रद्धेयमेतत्, सत्यम्, उक्तमत्र **भाष्यकृता**-

सव्वण्णुप्पामण्णा दोसा हु न संति जिणमए के वि।
जं अणुवउत्तकहणं अपत्तमासज्ज व हवंति॥१॥ ४॥

[कल्पभा०[*] गा० ३४६, विशेषा० गा० १४६६]

सम्प्रति **हंसदृष्टान्त**भावना– यथा हंसः क्षीरमुदकमिश्रितमप्युदकमपहाय क्षीरमापिबति तथा शिष्योऽपि यो गुरोरनुपयोगसम्भवान् दोषानवधूय गुणानेव केवलानादत्ते

---

१. **तत्थु विट्ठो** पा०, जेसं२, मासं० देसं० ॥ २. **चालनी°** जे१, जेसं२ विना॥ ३. **चालनी°** खं० पा०॥ ४. **च** नास्ति जे१,२, मां० देमू० ॥ ५. **इति** नास्ति जे१,२, मां० दे०॥ ६. **आभीर्यो** जे१,२ मां०॥ ७. **आवश्यक**-चूर्णौ इयं गाथा नास्ति, जेसलमेरुस्थचूर्णेः आदर्शेऽपि दृष्टम्, तत्रापि सा नास्ति। किन्तु आवश्यकहारिभद्र्यां परिपूणकोदाहरणे इयं गाथाऽस्ति॥ अन्यच्च आवश्यकसूत्रे मलयगिरिटीकायामपि (पृ०१४३ पं०६) "आह च **चूर्णिकृत्** वक्खाणाइसु...॥" ईदृशः पाठोऽस्ति। अत्र विद्वद्भिः विचारणीयम्। ८. व्याख्यानादिषु दोषान् हृदये स्थापयति मुञ्चति गुणजालम्। स शिष्यस्तु अयोग्यः भणितः परिपूणकसमानः॥१॥

स हंससमानः, स चैकान्तेन योग्यः। ननु हंसः क्षीरमुदकमिश्रितमपि कथं विभक्तीकरोति येन क्षीरमेव केवलमापिबति न तूदकम् ? इति, उच्यते, तज्जिह्वाया अम्लत्वेन क्षीरस्य कूर्चिकीभूय पृथग्भवनात्। उक्तं च–

अम्बत्तणेण जीहाए कूचिया होइ खीरमुदयम्मि।
हंसो मोत्तूण जलं आवियइ पयं तह सुसीसो॥१॥

[कल्पभा० गा० ३४७, विशेषा० गा०१४६७]

मोत्तूण दढं दोसे, गुरुणोऽणुवउत्तभासियाइं पि।
गिण्हइ गुणे उ जो सो, जोग्गो समयत्थसारस्स॥२॥ [ ] ५॥

इदानीं **महिषदृष्टान्त**भावना– यथा महिषो निपानस्थानमवाप्तः सन् उदकमध्ये प्रविश्य तदुदकं मुहुर्मुहुः शृङ्गाभ्यां ताडयन्नवगाहमानश्च सकलमपि कलुषीकरोति, ततो न स्वयं पातुं शक्नोति नापि यूथम्, तद्वत् शिष्योऽपि यो व्याख्यानप्रबन्धावसरेऽकाण्ड एव क्षुद्रपृच्छाभिः कलह-विकथादिभिर्वाऽऽत्मनः परेषां चानुयोगश्रवणविघातमाधत्ते स महिषसमानः, स चैकान्तेनायोग्यः। उक्तं च–

सयमवि न पियइ महिसो न य जूहं पिबति लोलियं उदयं।
विग्गह-विकहाहि तहा अथक्कपुच्छाहि य कुसीसो॥१॥ ६॥

[कल्पभा० गा० ३४८, विशेषा० गा० १४६८]

मेषोदाहरणभावना– यथा मेषो वदनस्य तनुत्वात् स्वयं च निभृतात्मा गोष्पदमात्रस्थितमपि जलमकलुषीकुर्वन् पिबति तथा शिष्योऽपि यः पदमात्रमपि विनयपुरस्सरमाचार्यचित्तं प्रसादयन् पृच्छति स मेषसमानः, स चैकान्तेन योग्यः॥७॥

मशक[१]दृष्टान्तभावना– यः शिष्यो मशक[२] इव जात्यादि[३]दोषमुद्भट्टयन् गुरोर्मनसि व्यथामुत्पादयति स मशक[४]समानः, स चायोग्यः॥८॥

जलौकादृष्टान्तभावना– यथा जलौका शरीरमदुन्वती रुधिरमाकर्षति, तथा शिष्योऽपि यो गुरुमदुन्वन् श्रुतज्ञानमापिबति स जलौका[५]समानः। उक्तं च-

जलुगा[६] व अदूमिंतो, पियइ सुसीसो वि सुयनाणं॥ [कल्पभा० गा० ३५०]॥९॥

१-२-४. **मसक** जे२, मां० दे० विना॥ ३. °**दिकमु**° खं० पा०। °**दिदोषानु**° दे०॥ ५. **जलूका**° जे१,२, मां० विना॥ ६. जलौका इव अदुन्वन् पिबति सुशिष्योऽपि श्रुतज्ञानम्॥

बिडालीदृष्टान्तभावना– यथा बिडाली भाजनसंस्थं क्षीरं भूमौ विनिपात्य पिबति, तथादुष्टस्वभावत्वात्, एवं शिष्योऽपि यो विनयकरणादिभीततया न साक्षाद् गुरुसमीपे गत्वा शृणोति, किन्तु व्याख्यानादुत्थितेभ्यः केभ्यश्चित् स बिडालीसमानः, स चायोग्यः ॥१०॥

तथा **जाहकः**– तिर्यग्विशेषः, **तद्दृष्टान्त**भावना– यथा जाहकः स्तोकं स्तोकं क्षीरं पीत्वा पार्श्वाणि लेढि, तथा शिष्योऽपि यः पूर्वगृहीतं सूत्रमर्थं वाऽतिपरिचितं कृत्वाऽन्यत् पृच्छति स जाहकसमानः, स च योग्यः ॥११॥

सम्प्रति **गोदृष्टान्त**भावना क्रियते, यथा– केनापि कौटुम्बिकेन कस्मिंश्चित् पर्वणि चतुर्भ्यश्चतुर्वेदपारगामिभ्यो विप्रेभ्यो गौर्दत्ता। ततस्ते परस्परमेवं चिन्तयामासुः, यथा इयमेका गौश्चतुर्णामस्माकं ततः कथं कर्त्तव्या ?। तत्रैकेनोक्तम्– परिपाट्या दुह्यतामिति। तच्च समीचीनं प्रतिभातमिति सर्वैः प्रतिपन्नम्। ततो यस्य प्रथमदिवसे गौरागता तेन चिन्तितम्– यथाऽहमद्यैव धोक्ष्यामि, कल्ये पुनरन्यो धोक्ष्यति, ततः किं निरर्थिकामस्याश्चारिं[1] वहामि ?। ततो न किञ्चिदपि तस्यै तेन दत्तम्, एवं शेषैरपि। ततः सा श्वपाककुलनिपतितेव तृण-सलिलादिविरहिता गतासुरभूत्। ततः समुत्थितस्तेषां धिग्जातीयानामवर्णवादो लोके शेषगोदानादिलाभव्यवच्छेदश्च। एवं शिष्या अपि ये चिन्तयन्ति-न खलु केवलानामस्माकमाचार्यो व्याख्यानयति किन्तु प्रातीच्छिकानामपि, ततस्त एव विनयादिकं करिष्यन्ति, किमस्माकम् ? इति। प्रातीच्छिका अप्येवं चिन्तयन्ति-निजशिष्याः सर्वं करिष्यन्ति, किमस्माकं कियत्कालावस्थायिनाम् ? इति। ततस्तेषामेवं चिन्तयतामपान्तराल एवाऽऽचार्योऽवसीदति, लोके च तेषामवर्णवादो जायते। अन्यत्रापि च गच्छान्तरे दुर्लभौ तेषां सूत्रार्थौ, ततस्ते गोप्रतिग्राहकचतुर्द्विजातय इवायोग्या द्रष्टव्याः। उक्तं च-

अन्नो[2] दोहिइ कल्लं निरत्थयं से वहामि किं चारिं ?।
चउचरणगवी उ, मया, अवण्ण हाणी उ बहुयाणं॥१॥
सीसा पडिच्छगाणं, भरो त्ति, ते वि य हु सीसगभरो त्ति।
न करेंति सुत्तहाणी, अन्नत्थ वि दुल्लहं तेसिं॥२॥ १२-१॥

[कल्पभाष्ये गा० ३५३,३५५, विशेषा० गा० १४७३,१४७५]

१. निरर्थका° जे१,२ विना ॥ २. अन्नो दुज्झइ खं० विना ॥

एष एव **गोदृष्टान्तः** प्रतिपक्षेऽपि योजनीयः, यथा– कश्चित् कौटुम्बिको धर्मश्रद्धया चतुर्भ्यश्चतुर्वेदपारगामिभ्यो गां दत्तवान्। तेऽपि च पूर्ववत् परिपाट्या दोग्धुमारब्धाः। तत्र यस्य प्रथमदिवसे सा गौरागता स चिन्तितवान्-यद्यहमस्याश्चारिं न दास्यामि ततः क्षुधा धातुक्षयादेषा प्राणानपहास्यति, ततो लोकेषु मे गोहत्याऽवर्णवादो भविष्यति, पुनरपि चास्मभ्यं न कोऽऽपि गवादिकं दास्यति; अपि च-यदि मदीयचारिचरणेन पुष्टा सती शैषैरपि ब्राह्मणैर्धोक्ष्यते ततो मे महाननुग्रहो भविष्यति, अहमपि च परिपाट्या पुनरप्येनां धोक्ष्यामि, ततोऽवश्यमस्यै दातव्या चारिरिति ददौ चारिम्। एवं शेषा अपि ददुः। ततः सर्वेऽपि चिरकालं दुग्धाभ्यवहारभाजिनो जाताः, लोके च समुच्छलितः साधुवादः, लभन्ते च प्रभूतमन्यदपि गवादिकम्। एवं येऽपि विनेयाश्चिन्तयन्ति-यदि वयमाचार्यस्य न किमपि विनयादिकं विधातारः तत एषोऽवसीदन्नवश्यमपगतासुर्भविष्यति, लोके च 'कुशिष्या एते' इत्यवर्णवादो विजृम्भिष्यते, ततो गच्छान्तरेऽपि न वयमवकाशं लप्स्यामहे; अपि च-अस्माकमेष प्रव्रज्या-शिक्षा-व्रतारोपणादिविधानतो महानुपकारी, सम्प्रति च जगति दुर्लभं श्रुतरत्नमुपयच्छन् वर्त्तते, ततोऽवश्यमेतस्य विनयादिकमस्माभिः कर्त्तव्यम्; अन्यच्च– यद्यस्मदीयविनयादिसाहायकबलेन प्रातीच्छिकानामप्याचार्यत उपकारः किमस्माभिर्न लब्धम् ?, द्विगुणतरपुण्यलाभश्चास्माकं भवेत्। प्रातीच्छिका अपि ये चिन्तयन्ति-अनुपकृतोपकारी भगवानाचार्योऽस्माकम्, को नामान्यो महान्तमेवं व्याख्याप्रयासमस्मन्निमित्तं विदधाति ?, ततः किमेतेषां वयं प्रत्युपकर्त्तुं शक्ताः ?, तथापि यत् कुर्मः सोऽस्माकं महान् लाभः-इति परनिरपेक्षं विनयादिकमादधते। तेषां नावसीदत्याचार्यः, अव्यवच्छिन्ना च सूत्रार्थप्रवृत्तिः, समुच्छलति च सर्वत्र साधुवादः, गच्छान्तरे च तेषां सुलभं श्रुतज्ञानं परलोके च सुगत्यादिलाभ इति॥१२-२॥

सम्प्रति **भेरीदृष्टान्त**भावना-इह शक्रादेशेन वैश्रवणयक्षनिर्मापितायां काञ्चनमयप्राकारादिपरिकरितायां पुरि **द्वारवत्यां** त्रिखण्डभरतार्द्धाधिपत्वमनुभवति[१] **केशवे** कदाचिदशिवमुपतस्थौ। इतश्च द्वात्रिंशद्विमानशतसहस्रसङ्कुले **सौधर्म**कल्पे सुधर्माभिधसभोपविष्टः सर्वतो दिवौकःपर्युपास्यमानः **शक्रा**भिधानो मघवा

१. °धिपत्यमनु° जे१। °धिपतित्वमनु° दे०॥

पुरुषगुणविचारणाधिकारे **केशव**मिहावस्थितमवधिना समधिगम्य सामान्यतः तत्प्रशंसामकार्षीत् - अहो ! महानुभावा **विष्णवो** यद् दोषबहुलेऽपि वस्तुनि स्वभावतो गुणमेव गृह्णन्ति, न दोषलेशमपि, न च नीचयुद्धेन युध्यन्ते इति। इत्थं च मघवता **केशव**स्तुतिमभिधीयमानामसहमानः कोऽपि दिवौकाः परीक्षार्थमिहावतीर्य येन पथा भगवद**रिष्टनेमि**नमस्करणाय **केशवो** यास्यति तस्मिन् पथि अपान्तराले क्वचित् प्रदेशे समुत्त्रासितसकलजनमहादुरभिगन्धसङ्कुलमतीव दीप्यमानमहाकालिमकलितं विवृतमुखमुद्घाटितश्वेतदन्तपङ्क्तिं गतप्राणमिव शुनो रूपं विधाय प्रातरवतस्थे। **केशवो**ऽपि **चोज्जयन्त**गिरिसमवसृतभगवद**रिष्टनेमि**नमस्कृतये तेन पथा गन्तुं प्रववृते। पुरोयायी च पदात्यादिवर्गः समस्तोऽपि तद्गन्धसमुत्त्रासितो वस्त्राञ्चलपिहितनासिकस्त्वरितमितस्ततो गन्तुमारेभे। ततः पृष्टं **केशवे**न किमिति पुरोयायिनः सर्वेऽपि पिहितनासिकाः समुत्त्रासमादधते ?। ततः कोऽपि विदितवेद्यो विज्ञपयामास-देव ! पुरो महापूतिगन्धिः श्वा मृतो वर्त्तते, ततस्तद्गन्धमसहमानः सर्वोऽपि त्रासमगमत्। **केशव**श्च महोत्तमतया तद्गन्धादनुत्त्रस्यन् तेन पथा गन्तुं प्रवृत्तः, अवैक्षिष्ट च तं मृतं श्वानम्, परिभावयामास च सकलमपि तस्य रूपम्, ततो गुणप्रशंसामकर्त्तुमशक्नुवन् प्रशंसितुमारभते स्म-अहो ! जात्यमरकतमयभाजनविनिवेशितमुक्तामणिश्रेणिरिव शोभते अस्य वपुषि कालिमकलिते श्वेतदन्तपङ्क्तिरिति। तां च प्रशंसां श्रुत्वा सविस्मयं सुरसद्मजन्मा चिन्तयामास-अहो ! यथोक्तं मघवता तथैवेति। ततो दूरं गते **केशवे** तद्रूपमुपसंहृत्य कियत्कालं स्थित्वा गृहमागते **केशवे** युद्धपरीक्षानिमित्तं मन्दुरागतमेकमश्वरत्नं सकललोकसमक्षमपहृतवान्। धावितश्च मार्गतः सर्वोऽप्युद्गीर्णखड्ग-कुन्तादिरङ्गरक्षकादिपदातिवर्गः, समुच्छलितश्च महान् कोलाहलः, ज्ञातश्चायं व्यतिकरः केशवेन, प्रधाविताश्च सकोपं दिशोदिशं सर्वेऽपि कुमाराः, मुञ्चन्ति च यथाशक्ति प्रहारान्। परं[1] स दिव्यशक्त्या तान् सर्वानपि लीलया विजित्य मन्दं मन्दं गन्तुं प्रवृत्तः। ततः प्राप्तः **केशवः**, पृष्टश्च तेनाश्वापहारी-भोः ! किं मदीयमश्वरत्नमपहरसि ?। तेनोक्तम्- शक्नोम्यपहर्तुम्, यदि पुनरस्ति ते काऽपि शक्तिस्तर्हि मां युद्धे विनिर्जित्य प्रतिगृहाण। ततः **केशवः** तत्पौरुषरञ्जितमनस्कः

१. परं सुरो दिव्य° खं० पा० ॥

सहर्षमेवमवादीत् - भो महापुरुष ! येन युद्धेन ब्रूषे तेन युध्येऽहम्। ततः सर्वाण्यपि युद्धानि **केशवो** नामग्राहं वक्तुं प्रवृत्तः, प्रतिषेधति च सर्वाण्यपि सुरसद्मजन्मा। ततो भूयः **केशवो** वदति- कथय तर्हि केन युद्धेन युध्येऽहम् ? इति। ततः स प्राह-पुतयुद्धेन। ततः कर्णौ पिधाय शल्यितहृदय इव हाशब्दव्याहारपुरस्सरं तं प्रत्येवमवादीत्-गच्छ गच्छाश्वरत्नमपि गृहीत्वा, नाहं नीचयुद्धेन युध्ये इति। तत एतत् श्रुत्वा हर्षवशोज्जृम्भितपुलकमालोपशोभितं वपुरादधानः सविस्मयं सुरसद्मजन्मा स्वचेतसि चिन्तयामास- अहो ! महोत्तमता **केशवा**नाम्, अत एव शतसहस्रसङ्ख्यनमदमर-किरीटकोटिसङ्घर्षमसृणीकृतपादपीठानां मघवतामप्येते प्रशंसार्हाः। तत एवं चिन्तयित्वा सानन्दमवेक्षमाणो वक्तुं प्रवृत्तः - भोः **केशव** ! नाहमश्वापहारी किन्तु त्वद्गुण-परीक्षानिमित्तमेवं कृतवान्। ततः सकलमपि शक्रप्रशंसादिकं पूर्ववृत्तान्तमचकथत्। ततः स्वगुणप्रशंसाश्रवणलज्जितोऽवनतमनाङ्कन्धरः कुड्मलितकरसम्पुटो **जनार्दनः** तमुदन्तपर्यन्ते मुत्कलयामास स्वस्थाने। सुरोऽपि च सकलविश्वासाधारण**केशव**गुणदर्शनतो हृष्टमनास्तं प्रत्येवमवादीत्- महापुरुष ! 'देवदर्शनममोघं मनुजजन्मनाम्' इति प्रवादो जगति प्रसिद्धो मा विफलतामापदिति वद किञ्चिदभीष्टं येन करोमीति। ततः **केशवो**ऽब्रवीत् - वर्त्तते सम्प्रति **द्वारवत्या**मशिवम्, ततस्तत्प्रतिविधानमातिष्ठ येन भूयोऽपि न भवति, ततो गोशीर्षचन्दनमयी**मशिवोपशमिनीं**[१] देवो भेरीमदात्, कल्पं चास्याः कथयामास-यथा षण्मासषण्मासपर्यन्ते निजास्थानमण्डपे वाद्यैषा भेरी, शब्दश्चास्याः सर्वतो द्वादशयोजनव्यापी जलभृतमेघध्वनिरिव गम्भीरो विजृम्भिष्यते, यश्च शब्दं श्रोष्यति तस्य प्राक्तनो व्याधिर्नियमतोऽपयास्यति, भावी च भूयः षण्मासादर्वाग् न भविष्यति। तत एवमुक्त्वा देवः स्वस्थानमगमत्। **वासुदेवो**ऽपि तां भेरीं सदैव भेरीताडननियुक्ताय समर्पितवान्, शिक्षां चास्मै ददौ, यथा–षण्मासषण्मासपर्यन्ते ममाऽऽस्थानमण्डपे वाद्यैषा त्वया भेरी, यत्नतश्चावनीया[२]। ततः सकलस्वलोक-सामन्तादिबलसमन्वितो निजप्रासादमायासीत्। मुत्कलितश्च प्रतीहारेण सर्वोऽपि लोकः। ततो द्वितीयदिवसे मुकुटोपशोभितानेकपार्थिवसहस्रपर्युपास्यमानो निजास्थानमण्डपे

१. °**शमनीं** जे१ विना ॥ २. रक्षणीया - खंटि०॥

विशिष्टसिंहासनोपविष्टः शक्र इव देवैः परिवृतो विराजमानस्तां भेरीमताडयत्। भेरी-शब्दश्रवणसमनन्तरमेव च दिनपतिकरनिकरताडितमन्धकारमिव **द्वारवती**पुरि सकलमपि रोगजालं विध्वंसमुपागमत्। ततः प्रमुदितः सर्वोऽपि पौरलोकः, आशास्ते च सदैवाधिपतित्वेन **जनार्दनम्**। तत एवं व्याधिविकले गच्छति काले कोऽपि दूरदेशान्तरवर्त्ती धनाढ्यो महारोगाभिभूतो भेरीशब्दमाहात्म्यमाकर्ण्य **द्वारवती**मागमत्। स च दैव[१]विनियोगाद् भेरीताडनदिवसातिक्रमे प्राप्तः, ततोऽचिन्तयत्-कथमिदानीमहं भविष्यामि ?, यतो भूयो भेरीताडनं षण्मासातिक्रमे, षड्भिश्च मासै[ग्रन्थाग्रं २०००]रेष प्रवर्द्धमानो व्याधिरसूनपि नियमात् कवलयिष्यति, ततः किं करोमि ? इति। तत इत्थं कतिपयदिनानि चिन्ता-शोकसागरनिमग्नः कथमपि शेमुषीपोतमासाद्योन्मङ्क्तुं लग्नः, यथा-यदि तस्याः शब्दतोऽपि रोगोऽपयाति ततस्तदेकदेशस्य घर्षित्वा पाने सुतरामपयास्यति, प्रभूतं च मे स्वम्, ततः प्रलोभयामि धनेन ढाक्किकम्, येन तच्छकलमेकं मे समर्पयति। ततः प्रलोभितो धनेन ढाक्किकः। **नीचसत्त्वा हि दुष्टदारा इव निरन्तरं धनादिभिः [२]सम्मान्यमाना अपि व्यभिचरन्ति निजपतेः।** ततस्तेन तच्छकलमेकं तस्मै व्यतीरिष्ट, तत्स्थाने च तस्यामन्यच्छकलं योजितम्। एवमन्यान्यदेशान्तरायातरोगिजनेभ्यो धनलुब्धतया खण्डखण्डप्रदाने सकलाऽपि भेरी कन्थेव खण्डसङ्घातात्मिका कृता तेन। ततोऽपगतो दिव्यप्रभावः, ततस्तदवस्थमेवाशिवं प्रावर्त्तिष्ट, समुत्थितश्चाऽऽरावोऽशिवप्रादुर्भावविषयः पौरजनानाम्। विज्ञप्तश्च महत्तरै**र्जनार्दनः**-देव ! भूयोऽपि विजृम्भते वर्षासु कृष्णशर्वर्यामन्धकारमिव पुरि **द्वारवत्यां** महदशिवम्। ततः प्रातरास्थानमण्डपे सिंहासने समुपविश्याऽऽकारितो भेरीताडनानियुक्तः पुमान्, दत्तश्चाऽऽदेशोऽस्मै भेरीताडने। ततस्ताडिता तेन भेरी। साऽपगतदिव्यप्रभावा न भाङ्कारशब्देनाऽऽस्थानमण्डपमात्रमपि पूरयति। ततो विस्मितो **जनार्दनो** यथा-किमेषा नाऽऽस्थानमण्डपमपि भाङ्कारशब्देन पूरयितुं शक्तवती ?। ततः स्वयं निभालयामास तां भेरीम्। दृष्टा च सा महादरिद्रकन्थेव लघु-लघुतरशकलसहस्रसङ्घातात्मिका। ततश्चुकोप तस्मै जनार्दनः- रे दुष्टाधम ! किमिदमकार्षीः ?। ततः स प्राणभयात् सकलमपि

१. **दैवयोगा**° जे१,२, मां० दे० डे० सं०॥ २. **सन्मा**° पा० विना॥

यथावस्थितमचीकथत्। ततो महानर्थकारित्वात् स तत्कालमेव निरोपितो विनाशाय। ततो भूयोऽपि **जनार्दनो** जनानुकम्पया पौषधशालामुपगम्याष्टमभक्तविधानतस्तं देवमाराधयामास। ततः प्रत्यक्षीबभूव स देवः, कथितवांश्च **जनार्दनः** प्रयोजनम्। ततो भूयोऽपि दत्तवान् **अशिवोपशमिनीं** भेरीम्। तां च आप्तत्वेन सुनिश्चिताय **कृष्णः** समर्पयामास। एष भेरी दृष्टान्तः॥१३-१॥

अयमर्थोपनयः-यथा भेरी तथा प्रवचनानुगतौ सूत्रार्थौ। यथा च भेरीशब्दश्रवणतो रोगापगमः तथा सिद्धान्तस्य भावतः श्रवणतो जन्तूनां कर्मविनाशः। ततो यः सूत्रार्थावपान्तराले विस्मृत्य विस्मृत्यान्यतः सूत्रमर्थं वा संयोज्य कन्थासमानौ करोति स भेरीताडननियुक्तप्रथमपुरुषसमानः, स चैकान्तेनायोग्यः। यस्त्वाचार्यप्रणीतौ सूत्रार्थौ यथावदवधारयति स भेरीताडननियुक्तपाश्चात्यपुरुष इव कल्याणसम्पदे योग्यः॥१३-२॥

सम्प्रत्या**भीरीदृष्टान्त**भावना– कश्चिदाभीरो निजभार्यया सह विक्रयाय घृतं गन्त्र्या गृहीत्वा पत्तनमवतीर्णः। चतुष्पथे च समागत्य वणिगापणेषु पणायितुं प्रवृत्तः, घटितश्च पणायासण्टङ्कः। ततः समारब्धे घृतमापे गन्त्र्या अधस्तादवस्थिता आभीरी घृतं **भर्त्रा**[१] वारकेण समर्प्यमाणं प्रतीच्छति। ततः कथमप्यर्पणे ग्रहणे वाऽनुपयोगतोऽपान्तराले वारकापरपर्यायो लघुघृतघटो भूमौ निपत्य खण्डशो भग्नः। ततो घृतहानिदूनमनाः पतिरुल्लपितुं खर-परुषवाक्यानि प्रावर्त्तत, यथा– हा पापीयसि ! दुःशीले ! कामविडम्बितमानसा[२] तरुणतरुणिमाभिरमणीयं पुरुषान्तरमवलोकसे, न सम्यग् घृतघटमभिगृह्णासि। ततः सा खर-परुषवाक्यश्रवणतः समुद्भूतकोपावेशवशोच्छलित-कम्पकम्पितपीनपयोधरा स्फुरदधरबिम्बोष्ठी दूरोत्पाटितभ्रूरेखाधनुरवष्टम्भतो नाराचश्रेणिमिव कृष्णकटाक्षसन्ततिमविरतं प्रतिक्षिपन्ती प्रत्युवाच-हा ग्रामेयकाधम ! घृतघटमप्यवगणय्य विदग्धमत्तकामिनीनां मुखारविन्दान्यवलोकसे, न चैतावताऽवतिष्ठसे, ततः खर-परुषवाक्यैर्मामप्यधिक्षिपसि। ततः स एवं प्रत्युक्तोऽतीव ज्वलितकोपानलो यत्किञ्चिदसम्बद्धं भाषितुं लग्नः, साऽप्येवम्। ततः समभूत् तयोः केशाकेशि, ततो विसंस्थुलपादादिन्यासतः सकलमपि प्रायो गन्त्रीघृतं भूमौ निपतितम्, तच्च

१. **भृत्वा** खं० ॥ २. °**मानसे** जे१,२, मां० खंसं०॥

किञ्चिच्छोषमुपगतम्[१], अवशेषं चावलीढं श्वभिः। गन्त्रीघृतमपि शेषीभूतमपहृतं पश्यतोहरैः। सार्थिका अपि स्वं स्वं घृतं विक्रीय स्वग्रामगमनं प्रपन्नाः। ततः प्रभूत-दिवसभागातिक्रमेणापसृते युद्धे स्वास्थ्ये च लब्धे यत् किञ्चित् प्रथमतो विक्रापयामास[२]तुर्घृतं तद्द्रव्यमादाय तयोः स्वग्रामं गच्छतोरपान्तरालेऽस्तङ्गते सहस्रभानौ सर्वतः प्रसरमभिगृह्णति तमोविताने परास्कन्दिनः समागत्य वासांसि द्रव्यं बलीवर्दौ चापहृतवन्तः। तत एवं तौ महतो दुःखस्य भाजनमजायेताम्। एष दृष्टान्तः॥१४-१॥

अयमर्थोपनयः— यो विनेयोऽन्यथा प्ररूपयन् अधीयानो वा कथमपि खर-परुषवाक्यैराचार्येण शिक्षितोऽधिक्षेपपुरस्सरं प्रतिवदति, यथा-त्वयैवेत्थमहं शिक्षितः, किमिदानीं निह्नुषे ? इत्यादि; स न केवलमात्मानं संसारे पातयति किन्त्वाचार्यमपि, खर-परुषप्रत्युच्चारणादिना तीव्र-तीव्रतरकोपानलज्वालनात्। भवन्ति च कुविनेया मृदोरपि गुरोः खर-परुषप्रत्युच्चारणादिना कोपप्रकोपकाः। यत उक्त**मुत्तराध्ययनेषु**—

अणासवा[३] थूलवया[४] कुसीला, मिउं[५] पि चंडं पकरेंति सीसा। [*उत्तरा० १।१३] इति।

अपि च- गुणगुरवो गुरवः, ततस्ते यदि कथमपि दुष्टशैक्षशिक्षापनेन कोपमुपागमन् तथापि तेषां [भगवदाज्ञावर्त्तित्वादल्पपापभाजां[६] मिथ्यादुष्कृतादिमात्रेणापि विशुद्धि-र्जायते, शिष्यस्तु] भगवदाज्ञाविलोपतो गुर्वाशातनातश्चोपचिताशुभगुरुकर्मा नियमतो दीर्घतरसंसारभागी। किञ्च-एवं स वर्त्तमानो मतिमानपि श्रुतरत्नाद् बहिर्भवति, अन्यत्रापि तस्य दुर्लभश्रुतत्वात्, को हि नाम सचेतनो दीर्घतरजीविताभिलाषी सर्पमुखे स्वहस्तेन पयोबिन्दून् प्रक्षिपतीति, स एकान्तेनायोग्यः॥

प्रतिपक्षभावनायामपीदमेव कथानकं परिभावनीयम्। केवलमिह घृतघटे भग्ने सति द्वावपि तौ दम्पती त्वरितत्वरितं कर्परे यथाशक्ति घृतं गृहीतवन्तौ, स्तोकमेव विननाश। निन्दति चाऽऽत्मानमाभीरः, यथा— हा ! न मया घृतघटस्ते सम्यक् समर्पितः। आभीर्यपि वदति-समर्पितस्त्वया सम्यक्, परं न मया सम्यग् गृहीतः। तत एवं तयोर्न कोपावेशदुःखम्,

१. °**षमपगतं** पा०, जेमू१, खं० दे० ॥ २. **विक्रययामास**° पा० देसं० विना॥ ३. अनाश्रवाः स्थूलवचसः कुशीला मृदुमपि चण्डं प्रकुर्वन्ति शिष्याः॥ ४. "[अनाश्रवाः] गुरुवचनाकारिणः" खंटि०। न आ-समन्ताद् ये गुरुवचनं शृण्वन्ति ते अनाश्रवा इत्यर्थः॥ ५. मृदुमपि गुरुम् - खंटि०॥ ६. एतच्च **मलयगिरीयावश्यकवृत्त्य**नुसारेणेदमनुसन्धितम् भाग १ पत्र १४६-१॥

नापि घृतहानिः, नापि सकाल एवान्यसार्थिकैः सह स्वग्राममभिसर्पतामपान्तराले तस्करावस्कन्दः, ततस्तौ सुखभाजनं जातौ। एवमिहापि कथञ्चिदनुपयोगादिनाऽन्यथारूपे व्याख्याने कृते सति पश्चादनुस्मृतयथावस्थितव्याख्यानेन सूरिणा शिष्यं पूर्वमुक्तं व्याख्यानं चिन्तयन्तं प्रति एवं वक्तव्यम्-वत्स ! मैवं व्याख्यः, मया तदानीमनुपयुक्तेन व्याख्यातम्, तत एवं व्याख्याहि। तत एवमुक्ते सति यो विनेयः कुलीनो विनीतात्मा स एवं प्रतिवदति यथा-भगवन्तः ! किमन्यथा प्ररूपयन्ति ?, केवलमहं मतिदौर्बल्यादन्यथाऽवगतवानिति। स एकान्तेन योग्यः॥ १४-२॥

एवंविधाश्च विनेयाः प्रह्लादितगुरुमनसः श्रुतार्णवपारगामिनो जायन्ते, चारित्रसम्पदश्च भागिनः॥ तदेवमेकैकं शिष्यमधिकृत्य योग्या-ऽयोग्यत्वविभागोपदर्शनं कृतम्। सम्प्रति सामान्यतः पर्षदो योग्या-ऽयोग्यरूपतया निरूपयति-

[सू०७ (२)] सा समासओ तिविहा पण्णत्ता, तंजहा– जाणिया १, अजाणिया २, दुव्वियड्ढा ३।

सा समासओ तिविहेत्यादि। **सा** पर्षत् **समासतः** सङ्क्षेपेण **त्रिविधा**[१] त्रिप्रकारा प्रज्ञप्ता, तीर्थकर-गणधरैरिति गम्यते। पर्षदिति कथं लभ्यते ? इति चेत्, उच्यते, इह प्रागुक्तम्-प्रारम्भणीयः प्रवचनानुयोग इति, अनुयोगश्च शिष्यमधिकृत्य प्रवर्त्तते, निरालम्बनस्य तस्याभावात्, ततः सामर्थ्यात् 'सा' इत्युक्ते पर्षदिति लभ्यते। **तद्यथा** इत्युदाहरणोपदर्शनार्थः। **जाणिय** त्ति ज्ञा अवबोधने [**मलय० धा० । पा०धा० १५०८**] जानातीति ज्ञा, [२]**इगुपान्त्यप्रीकृगृज्ञः कः** [*मलय० कृ० पा०१ सू०३४] इति कप्रत्ययः, [३]**इटि चाऽऽतो लोपः** [*शाकटा० ४।२।८४] इत्याकारलोपः, ततः [४]**अजाद्यतः** [*] इति स्त्रियामाप्, ज्ञैव ज्ञिका, स्वार्थिकः कप्रत्ययः, ततः **स्वज्ञाऽजभस्त्राऽधातुत्ययकात्** [*मलय० ना० ६।३६] इत्यापः स्थाने इकारादेशः, कप्रत्ययाच्च परतः स्त्रियामाप्, तत्

१. **त्रेधा** पा० विना ॥ २. "**ज्ञा-कृ-गृ-प्रीगुपान्त्यात्कः**" - शाकटा० ४।३।९४ । **नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः-कः** - सिद्धहेम० ५।१।५४। "ज्ञाश् अवबोधने" - हैं० धा० ८।३३ ॥ ३. "**इडेत्पुसि चातो लुक्** । [मल० आ० ६।७४] आदन्तस्य धातोः अशिति स्वरादौ क्ङिति इटि एति पुसि च परे लुक् भवति। पयुः। अदधत्। पपिथ। व्यतिरे। अयुः। अशितीति किम् ? यान्ति ।" - **मलय०** वृ० पृ० २१४ ॥ ४. **अजादेः** - मलय० ना० ५।६, सिद्धहेम० २।४।१६।, **अजाद्यताम्** - शाकटा० १।३।१३॥, **अजाद्यतष्टाप्** - पा० ४५४,४।१।४॥

सिद्धं ज्ञिकेति, ज्ञिका नाम परिज्ञानवती। किमुक्तं भवति ? कुपथप्रवृत्तपाषण्डमतेना-ऽदिग्धान्तःकरणा[1] गुण-दोषविशेषपरिज्ञानकुशला सतामपि दोषाणामपरिग्राहिका केवलगुणग्रहणयत्नवतीति। उक्तं च–

गुण-दोसविसेसण्णू अणभिग्गहिया य कुस्सुइ-मएसुं।
एसा जाणगपरिसा गुणतत्तिल्ला अगुणवज्जा॥१॥ [कल्पभाष्ये गा० ३६५]

अत्र **गुणतत्तिल्ले**ति गुणेषु यत्नवती, गुणग्रहणपरायणा इत्यर्थः। **अगुणवज्जे**ति अगुणान्-दोषान् वर्जयति, सतोऽपि न गृह्णातीत्यगुणवर्जा॥

तथा 'अज्ञिका' ज्ञिकाविलक्षणा,सम्यक्परिज्ञानरहिता। किमुक्तं भवति ? या ताम्रचूड-कण्ठीरव-कुरङ्गपोतवत् प्रकृत्या मुग्धस्वभावा असंस्थापितजात्य-रत्नमिवान्तर्विशिष्टगुणसमृद्धा सुखप्रज्ञापनीया पर्षत् सा अज्ञिका। उक्तं च–

पगईमुद्ध अयाणिय मिगछावग-सीह-कुक्कुडगभूया।
रयणमिव असंठविया सुहसण्णप्पा गुणसमिद्धा॥१॥ [कल्पभाष्ये गा० ३६७]

इह **मिगसावग-सीह-कुक्कुडगभूय** त्ति शावशब्दोऽग्रे सम्बध्यते, ततो मृग-सिंह-कुक्कुडशावभूता इत्यर्थः। **असंठविय** त्ति असंस्थापिता, असंस्कृता इत्यर्थः। 'सुखसंज्ञाप्या' सुखेन प्रज्ञापनीया॥

तथा **दुव्वियड्ढ** त्ति 'दुर्विदग्धा' मिथ्याऽहङ्कारविडम्बिता। किमुक्तं भवति ? या तत्तद्गुणज्ञपार्श्वोपगमनेन कतिपयपदान्युपजीव्य पाण्डित्याभिमानिनी किञ्चिन्मात्रमर्थपदं सारं पल्लवमात्रं वा श्रुत्वा तत ऊर्ध्वं निजपाण्डित्यख्यापनायाभिमानतोऽवज्ञया पश्यति, अर्द्धकथ्यमानं वाऽऽत्मनो बहुज्ञतासूचनाय याऽग्रे त्वरितं पठति सा पर्षद् दुर्विदग्धेत्युच्यते। उक्तं च–

किंचिम्मत्तग्गाही, पल्लवगाही य तुरियगाही य।
दुवियड्ढिया उ एसा भणिया तिविहा भवे परिसा॥१॥ [कल्पभाष्ये गा० ३६९]

अमूषां च तिसृणां पर्षदां मध्ये आद्ये द्वे पर्षदावनुयोगयोग्ये, तृतीया त्वयोग्या।

---

१. अलिप्तान्तःकरणा - खंटि० ॥

यदाह **चूर्णिकृत्**– [१]**एत्थ जाणिया अजाणिया य अरिहा, [२]दुव्वियड्ढा अणरिहा** [**नन्दीचू० सू० ६ पृ० १३**] इति। तत आद्ये एव द्वे अधिकृत्यानुयोगः प्रारम्भणीयः, न तु दुर्विदग्धाम्, मा भूदाचार्यस्य निष्फलः परिश्रमः, तस्याश्च दुरन्तसंसारोपनिपातः। सा हि तथास्वाभाव्याद् यत्किमप्यर्थपदं शृणोति तदप्यवज्ञया, श्रुत्वा च सारपदमन्यत्र सर्वजनातिशायिनिजपाण्डित्याभिमानतो महतो महीयसोऽवमन्यते, तदवज्ञया च दुरन्तसंसाराभिष्वङ्ग इति स्थितम्॥ तदेवमभीष्टदेवतास्तवादिसम्पादितसकलसौविहित्यो भगवान् **दूषगणि**पादोपसेवी पूर्वान्तर्गतसूत्रार्थधारको **देववाचको** योग्यविनेयपरीक्षां कृत्वा सम्प्रत्यधिकृताध्ययनविषयस्य ज्ञानस्य प्ररूपणां विदधाति–

[सू० ८] णाणं पंचविहं पण्णत्तं, तंजहा– आभिणिबोहियणाणं सुयणाणं ओहिणाणं मणपज्जवणाणं केवलणाणं।

नाणं पंचविहं पन्नत्तमित्यादि। ज्ञातिर्ज्ञानम्, भावे अनट् प्रत्ययः। अथवा ज्ञायते वस्तु परिच्छिद्यते अनेनेति ज्ञानम्, करणे अनट्। शेषास्तु व्युत्पत्तयो मन्दमतीनां सम्मोहहेतुत्वाद् नोपदिश्यन्ते। 'पञ्च' इति सङ्ख्यावाचकः, विधानं विधा, [३]**उपसर्गादातः** [***शाकटा० ४।४।८३ सिद्धहेम० ५।३।११०**] इत्यङ्प्रत्ययः, पञ्च विधाः-प्रकारा यस्य तत् **पञ्चविधं** पञ्चप्रकारं **प्रज्ञप्तं** प्ररूपितम्, तीर्थकर-गणधरैरिति सामर्थ्यादवसीयते, अन्यस्य स्वयं प्ररूपकत्वेन प्ररूपणाऽसम्भवात्। उक्तं च–

अत्थं भासइ अरहा, सुत्तं गंथंति गणहरा निउणं।
सासणस्स हियट्ठाए, तओ सुत्तं पवत्तइ ॥१॥ [*आव० नि०९२, विशेषा०१११९]

एतेन स्वमनीषिकाव्युदासमाह। अथवा **प्रज्ञा** बुद्धिः तया **आप्तं** प्राप्तं तीर्थकर-गणधरैरिति गम्यते, प्रज्ञाप्तम्। किमुक्तं भवति ? **सर्वं वाक्यं सावधारणं भवति** [ ] इति न्यायाद् अवश्यमिदं वाक्यमवधारणीयम्, ततोऽयमर्थः– ज्ञानं तीर्थकरैरपि सकलकालावलम्बिसमस्तवस्तुस्तोमसाक्षात्कारिकेवलप्रज्ञया पञ्चविधमेव प्राप्तम्, गणधरैरपि तीर्थकृद्भिरुपदिश्यमानं निजप्रज्ञया पञ्चविधमेव प्राप्तम्, न तु वक्ष्यमाणनीत्या

---

१. अत्र ज्ञिका अज्ञिका च अर्हा, दुर्विदग्धा अनर्हा॥ २. मुद्रितायां चूर्णौ '**दुव्वियड्ढा अणरिहा**' इति पाठो नोपलभ्यते॥ ३. **उपसर्गात् अः** - मलय० कृ० ५।६५ ॥

द्विभेदमेवेति। अथवा प्राज्ञात्-तीर्थकरादाप्तं प्राज्ञाप्तम्, गणधरैरिति गम्यते। अथवा प्राज्ञैः-गणधरैराप्तं प्राज्ञाप्तम्, तीर्थकरादित्यनुमीयते। **तद्यथा** इत्युदाहरणोपदर्शनार्थः। आभिनिबोधिकज्ञानं श्रुतज्ञानम् अवधिज्ञानं मनःपर्यायज्ञानं केवलज्ञानम्।

तत्रार्थाभिमुखो नियतः-प्रतिनियतस्वरूपो बोधः-बोधविशेषोऽभिनिबोधः, अभिनिबोध एवाऽऽभिनिबोधिकम्। अभिनिबोधशब्दस्य विनयादिपाठाभ्युपगमाद् **विनयादिभ्यः** [शाकटा० ३।४।१३६, **सिद्धहेम०** ७।२।१६९] इत्यनेन स्वार्थे इकण् प्रत्ययः, **अतिवर्त्तन्ते** [१]**स्वार्थप्रत्ययकाः** [२]**प्रकृति-लिङ्ग-वचनानि** [ ] इति वचनाद् अत्र नपुंसकता, यथा विनय एव वैनयिकमित्यत्र। अथवा अभिनिबुध्यते अनेन अस्माद् अस्मिन् वेति अभिनिबोधः-तदावरणकर्मक्षयोपशमः, तेन निर्वृत्तमाभिनिबोधिकम्। आभिनिबोधिकं च तद् ज्ञानं च आभिनिबोधिकज्ञानम्, इन्द्रिय-मनोनिमित्तो योग्यदेशावस्थितवस्तुविषयः स्फुटप्रतिभासो बोधविशेष इत्यर्थः १।

तथा श्रवणं **श्रुतं** वाच्य-वाचकभावपुरस्सरीकारेण शब्दसंस्पृष्टार्थग्रहणहेतुरुप-लब्धिविशेषः, एवमाकारं वस्तु जलधारणाद्यर्थक्रियासमर्थं घटशब्दवाच्यमित्यादिरूपतया प्रधानीकृतत्रिकालसाधारणसमानपरिणामः शब्दा-ऽर्थपर्यालोचनानुसारी इन्द्रिय-मनोनिमित्तोऽवगमविशेष इत्यर्थः। श्रुतं च तद् ज्ञानं च श्रुतज्ञानम् २।

तथाऽवशब्दोऽधःशब्दार्थः, अव-अधोऽधो विस्तृतं वस्तु धीयते-परिच्छिद्यतेऽनेनेत्यवधिः। अथवा अवधिः-मर्यादा, रूपिष्वेव द्रव्येषु परिच्छेदकतया प्रवृत्तिरूपा, तदुपलक्षितं ज्ञानमप्यवधिः। यद्वा अवधानम्- आत्मनोऽर्थसाक्षात्करण-व्यापारोऽवधिः। अवधिश्चासौ ज्ञानं चावधिज्ञानम् ३।

तथा परिः-सर्वतोभावे, अवनम् अवः, [३]**तुदादिभ्यो न क्कौ** [**मलय० उ०**] इत्यधिकारे **अकितौ च** [**मलय० उ०**] इत्यनेनौणादिकोऽकारप्रत्ययः, अवनं गमनं वेदनमिति पर्यायाः,

---

१. **स्वार्थे** पा० खंसं० ॥ २. **प्रकृति-वचन-लिङ्गानि** दे० ॥ ३. "तुदादि-विषि-गुहिभ्यः कित् - हैम० उ० ५॥" तुदादिभ्यो विष-गुहिभ्यां च कित् अः प्रत्ययो भवति। तुदः...॥ "ह्र-श्या-रुहि-शोणि-पलिभ्य इतः - हैम० उ०२१०॥" एभ्यः इतः प्रत्ययो भवति। ह्रंग् हरणे, हरितः वर्णः।... इति **सिद्ध० बृहद्०** उणादिसूत्रविवरणे॥ "**तुदादिभ्यो न क्कौ**त्यधिकारे **अकितौ च** इत्यनेन" - इति आव० मूल० पृ० १६A, पृ० ५२B, धर्मसं० पृ० २९२॥

परि अवः पर्यवः, मनसि मनसो वा पर्यवः मनःपर्यवः, सर्वतो मनोद्रव्यपरिच्छेद इत्यर्थः। अथवा मनःपर्यय **इति पाठः**, तत्र पर्ययणं पर्ययः, भावेऽल् प्रत्ययः, मनसि मनसो वा पर्ययो मनःपर्ययः, सर्वतस्तत्परिच्छेद इत्यर्थः; स[१] चासौ ज्ञानं च मनःपर्ययज्ञानम्। अथवा मनःपर्यायज्ञान**मिति पाठः**, तत्र मनांसि-मनोद्रव्याणि पर्येति-सर्वात्मना परिच्छिनत्ति मनःपर्यायम्, **कर्मणोऽण्** [*मलय० कृ० २।१५] इति अणप्रत्ययः, मनःपर्यायं च तद् ज्ञानं च मनः-पर्यायज्ञानम्; यद्वा मनसः पर्यायाः मनःपर्यायाः, पर्याया भेदा धर्मा बाह्यवस्त्वालोचनाप्रकारा इत्यर्थः, तेषु तेषां वा सम्बन्धि ज्ञानं मनःपर्यायज्ञानम् ४।

तथा **केवलम्**– एकमसहायम्, मत्यादिज्ञाननिरपेक्षत्वात्, केवलज्ञानप्रादुर्भावे मत्यादीनामसम्भवात्। ननु कथमसम्भवः ? यावता मतिज्ञानादीनि स्वस्वावरण-क्षयोपशमेऽपि प्रादुष्षन्ति, ततो निर्मूलस्वस्वावरणविलये तानि सुतरां भविष्यन्ति, चारित्रपरिणामवत्; उक्तं च–

[१]आवरणदेसविगमे जाइं विज्जंति मइ-सुयाईणि।
आवरणसव्वविगमे कह ताइं न होंति जीवस्स ?॥१॥ [ ]

उच्यते, इह यथा जात्यस्य मरकतादिमणेर्मलोपदिग्धस्य यावन्नाद्यापि समूलमलापगमस्तावद् यथा यथा देशतो मलविलयः तथा तथा देशतोऽभिव्यक्तिरुपजायते, सा च क्वचित् कदाचित् कथञ्चिद् भवतीत्यनेकप्रकारा, तथाऽऽत्मनोऽपि सकलकालकलाकलापावलम्बिनिखिलपदार्थपरिच्छेदकरणैकपारमार्थिकस्वरूपस्याप्यावरण-मलपटलतिरोहितस्वरूपस्य यावन्नाद्यापि निखिलकर्ममलापगमः तावद् यथा यथा देशतः कर्ममलोच्छेदः तथा तथा देशतस्तस्य विज्ञप्तिरुज्जृम्भते, सा च क्वचित् कदाचित् कथञ्चिदित्यनेकप्रकारा।

उक्तं च–

मलविद्धमणिव्यक्तिर्यथाऽनेकप्रकारतः।
कर्मविद्धात्मविज्ञप्तिस्तथाऽनेकप्रकारतः॥१॥ [*लघीयस्त्रये ५७]

सा चानेकप्रकारता मति-श्रुतादिभेदेनावसेया, ततो यथा मरकतादिमणेरशेष-

---

१. आवरणदेशविगमे यानि विद्यन्ते मति-श्रुतादीनि। आवरणसर्वविगमे कथं तानि न भवन्ति जीवस्य ?॥

मलापगमसम्भवे समस्तास्पष्टदेशव्यक्तिव्यवच्छेदेन परिस्फुटरूपा एकाभिव्यक्तिरुपजायते तद्वदात्मनोऽपि ज्ञान-दर्शन-चारित्रप्रभावतो निःशेषावरण-प्रहाणादशेषदेशज्ञान-व्यवच्छेदेनैकरूपा अतिपरिस्फुटा सर्ववस्तुपर्यायसाक्षात्कारिणी विज्ञप्तिरुल्लसति। तथा चोक्तम्–

यथा जात्यस्य रत्नस्य निःशेषमलहानितः।
स्फुटैकरूपाऽभिव्यक्तिर्विज्ञप्तिस्तद्वदात्मनः ॥१॥ [ ]

ततो मत्यादिनिरपेक्षं केवलज्ञानम्। अथवा शुद्धं केवलम्, तदावरणमलकलङ्कस्य निःशेषतोऽपगमात्। सकलं वा केवलम्, प्रथमत एवाशेषतदावरणापगमतः सम्पूर्णोत्पत्तेः। असाधारणं वा केवलम्, अनन्यसदृशत्वात्। अनन्तं वा केवलम्, ज्ञेयानन्तत्वात्। केवलं च तद् ज्ञानं च केवलज्ञानम्॥५॥

ननु सकलमपीदं ज्ञानं ज्ञप्त्येकस्वभावम्, ततो ज्ञप्त्येकस्वभावत्वाविशेषे किंकृत एष आभिनिबोधिकादिभेदः ?, ज्ञेयभेदकृत इति चेत्, तथाहि–वार्त्तमानिकं वस्तु आभिनिबोधिकज्ञानस्य ज्ञेयम्, त्रिकालसाधारणः [१]समानपरिणामो [२]ध्वनिगोचरः श्रुतज्ञानस्य, रूपिद्रव्याण्यवधिज्ञानस्य, मनोद्रव्याणि मनःपर्यायज्ञानस्य, समस्तपर्यायान्वितं सर्वं वस्तु केवलज्ञानस्य; तदेतदसमीचीनम्, एवं सति केवलज्ञानस्य भेदबाहुल्यप्रसक्तेः; तथाहि-ज्ञेयभेदाद् ज्ञानस्य भेदः, यानि च ज्ञेयानि प्रत्येकमाभिनिबोधिकादिज्ञानानामिष्यन्ते तानि सर्वाण्यपि केवलज्ञानेऽपि विद्यन्ते, अन्यथा केवलज्ञानेन तेषामग्रहणप्रसङ्गात्, अविषयत्वात्, तथा च सति केवलिनोऽप्यसर्वज्ञत्वप्रसङ्गः, आभिनिबोधिकादिज्ञान-चतुष्टयविषयजातस्य तेनाग्रहणात्, न चैतदिष्टमिति। अथोच्येत-प्रतिपत्तिप्रकारभेदत आभिनिबोधिकादिभेदः, तथाहि- न यादृशी प्रतिपत्तिराभिनिबोधिकज्ञानस्य तादृशी श्रुतज्ञानस्य किन्त्वन्यादृशी, एवमवध्यादिज्ञानानामपि प्रतिपत्तव्यम्, ततो भवत्येव प्रतिपत्तिभेदतो ज्ञानभेदः, तदप्ययुक्तम्, एवं सति एकस्मिन्नपि ज्ञानेऽनेकभेदप्रसक्तेः,

---

१. **समानः परि**° खं० जे१ देमू०॥ ३. **ध्वनिर्गोच**° खं० जे२, मासं०, देसं०, सं० विना। "वर्त्तमानकालभावि वस्तु आभिनिबोधिकज्ञानस्य ज्ञेयम्, त्रिकालवर्त्ति च शब्दगोचरः सामान्यं श्रुतज्ञानस्येत्यादि।" - इति **धर्म**संग्रहण्या **मलय**गिरीयावृत्तौ गा० ८२८॥

तथाहि- तत्तद्देश-काल-पुरुष-स्वरूपभेदेन विविच्यमानमेकैकं ज्ञानं प्रतिपत्तिप्रकारानन्त्यं प्रतिपद्यते, तन्नैषोऽपि पक्षः श्रेयान्।

स्यादेतत्– अस्त्यावारकं कर्म, तच्चानेकप्रकारम्, ततस्तद्भेदात् तदावार्यं ज्ञानमप्यनेकतां प्रतिपद्यते, ज्ञानावारकं च कर्म पञ्चधा, **प्रज्ञापनादौ** तथाऽभिधानात्, ततो ज्ञानमपि पञ्चधा प्ररूप्यते, तदेतदतीव युक्त्यसङ्गतम्, यत आवार्यापेक्षमावारकम्, अत आवार्यभेदादेव तद्भेदः, आवार्यं च ज्ञप्तिरूपापेक्षया सकलमप्येकरूपम्, ततः कथमावारकस्य पञ्चरूपता येन तद्भेदाद् ज्ञानस्यापि पञ्चविधो भेद उद्गीर्येत ?। अथ स्वभावत एवाऽऽभिनिबोधादिको ज्ञानस्य भेदः, न च स्वभावः पर्यनुयोगमश्नुते, न खलु 'किमिह दहनो दहति नाकाशम् ?' इति कोऽपि पर्यनुयोगमाचरति, अहो ! महती महीयसो भवतः शेमुषी, ननु यदि स्वभावत एवाऽऽभिनिबोधादिको ज्ञानस्य भेदस्तर्हि भगवतः सर्वज्ञत्वहानिप्रसङ्गः, तथाहि-ज्ञानमात्मनो धर्मः, तस्य चाऽऽभिनिबोधादिको भेदः स्वभावत एव व्यवस्थितः, ततः क्षीणावरणस्यापि तद्भावप्रसङ्गः, सति च तद्भावेऽस्मादृशस्येव भगवतोऽप्यसर्वज्ञत्वमापद्यते। केवलज्ञानभावतः समस्तवस्तुपरिच्छेदान्नासर्वज्ञत्वमिति चेत्, ननु यदा केवलोपयोगसम्भवः तदा भवतु भगवतः सर्वज्ञत्वम्, यदा त्वाभिनिबोधिकादिज्ञानोपयोगसम्भवः तदा देशतः परिच्छेदसम्भवादस्मादृशस्येव तस्यापि बलादसर्वज्ञत्वमापद्यते। न च वाच्यम्– तस्य तदुपयोग एव न भविष्यति, आत्मस्वभावत्वेन तस्यापि क्रमेणोपयोगस्य निवारयितुमशक्यत्वात्, केवलज्ञानानन्तरं केवलदर्शनोपयोगवत्, ततः केवलज्ञानोपयोगकाले सर्वज्ञत्वं शेषज्ञानोपयोगकाले चासर्वज्ञत्वमापद्यते, तच्च विरुद्धम्, अतोऽनिष्टमिति। आह च–

नत्तेगसहावत्ते[१] आभिणिबोहाइ किंकओ भेदो[२] ?।
नेयविसेसाओ चे, न, सव्वविसयं जओ चरिमं॥१॥
अह पडिवत्तिविसेसा नेगम्मि अणेगभेयभावाओ[३]।
आवरणविभेओ वि हु सभावभेयं विणा न भवे॥२॥
तम्मि य सइ सव्वेसिं खीणावरणस्स पावई भावो।
तद्धम्मत्ताओ च्चिय, जुत्तिविरोहा स चाणिट्ठो॥३॥

---

१. °वत्ता आ° धर्मसं०॥ २. 'चरिमं' केवलज्ञानम् इत्यर्थः॥ ३. वऽणेग° धर्मसं०॥

अरहा वि असव्वन्नू आभिणिबोहाइभावओ नियमा।
केवलभावाओ चे सव्वण्णू, नणु विरुद्धमिणं॥४॥ [*धर्मसं० गा० ८२८-३१]

तस्मादिदमेव युक्तियुक्तं पश्यामः-यदुतावग्रहज्ञानादारभ्य यावदुत्कर्षप्राप्तं परमावधिज्ञानं तावत् सकलमप्येकम्, तच्चासकलसंज्ञितम्, अशेषवस्तुविषयत्वाभावात्; अपरं च केवलिनः, तच्च सकलसंज्ञितमिति द्वावेव भेदौ। उक्तं च–

तम्हा अवग्गहाओ आरब्भ इहेगमेव नाणं ति।
जुत्तं छउमत्थस्साऽसगलं, इयरं च केवलिणो॥१॥ [*धर्मसं० गा० ८३५]

अत्र प्रतिविधीयते-तत्र यत्तावदुक्तम्-'[1]सकलमपीदं ज्ञानं ज्ञप्त्येकस्वभावम्, ततो ज्ञप्त्येकस्वभावत्वाविशेषे किंकृत एष आभिनि[2]बोधिकादिको भेदः ?' इति, तत्र ज्ञप्त्येकस्वभावता किं सामान्यतो भवताऽभ्युपगम्यते विशेषतो वा ?। तत्र न तावदाद्यः पक्षः क्षतिमाधत्ते, सिद्धसाध्यतया तस्य बाधकत्वायोगात्, बोधरूपतारूपसामान्यापेक्षया हि सकलमपि ज्ञानमस्माभिरेकमभ्युपगम्यत एव, ततः का नो हानिः ? इति। अथ द्वितीयः पक्षः, तदयुक्तम्, असिद्धत्वात्, न हि नाम विशेषतोऽपि ज्ञानमेकमेवोपलभ्यते, प्रतिप्राणि स्वसंवेदनप्रत्यक्षेणोत्कर्षा-ऽपकर्षदर्शनात्। अथ यद्युत्कर्षा-ऽपकर्षमात्र-भेददर्शनाद् ज्ञानभेदस्तर्हि तावुत्कर्षा-ऽपकर्षौ प्रतिप्राणि देश-कालाद्यपेक्षया शतसहस्रशो भिद्येते, ततः कथं पञ्चरूपता ?, नैष दोषः, परिस्थूरनिमित्तभेदतः पञ्चधात्वस्य प्रतिपादनात्, तथाहि– सकलघातिक्षयो निमित्तं केवलज्ञानस्य, मनःपर्यायज्ञानस्य त्वामर्षौषध्यादिलब्ध्युपेतस्य प्रमादलेशेनाप्यकलङ्कितस्य विशिष्टो विशिष्टाध्यवसायानुगतोऽप्रमादः, [3]**तं संजयस्स सव्वप्पमायरहियस्स विविहरिद्धिमतो। [विशेषा० ८१२]** इति वचनप्रामाण्याद्, अवधिज्ञानस्य पुनः तथाविधोऽनिन्द्रियरूपि-द्रव्यसाक्षादवगमनिबन्धनं क्षयोपशमविशेषः, मति-श्रुतज्ञानयोस्तु लक्षणभेदादिकम्, तच्चाग्रे वक्ष्यते। उक्तं च–

नत्तेगसहावत्तं ओहेण विसेसओ पुण असिद्धं।
एगंततस्सहावत्तणे उ कह हाणि-वुड्ढीओ ?॥१॥
जं अविचलियसहावे नत्ते एगंततस्सहावत्तं।
न य तं, तहोवलद्धा, उक्करिसा-ऽवगरिसविसेसा॥२॥

---

१. पृ० १११ पं० ११॥ २. °**बोधादिको** खं० पा० विना॥ ३. तत् संयतस्य सर्वप्रमादरहितस्य विविधर्द्धिमतः।

तम्हा परिथूराओ, निमित्तभेयाओ समयसिद्धाओ।
उववत्तिसंगओ च्चिय, आभिणिबोहाइओ भेओ॥३॥
घाइक्खओ निमित्तं केवलनाणस्स वण्णिओ समए।
मणपज्जवनाणस्स उ तहाविहो अप्पमाउ त्ति॥४॥
ओहिन्नाणस्स तहा [1]अणिंदिएसुं पि जो खओवसमो।
मइ-सुयनाणाणं पुण लक्खणभेया[2]दिओ भेओ॥५॥ [*धर्मसं० गा० ८३६-४०]

यदप्युक्तम्[3]– 'ज्ञेयभेदकृतः' इत्यादि, तदप्यनभ्युपगमतिरस्कृतत्वाद् दूरापास्तप्रसरम्, न हि वयं ज्ञेयभेदमात्रतो ज्ञानस्य भेदमिच्छामः, एकेनाप्यवग्रहादिना बहु-बहुविधवस्तुग्रहणोपलम्भात्।

यदपि च प्रत्यपादि[4]– 'प्रतिपत्तिप्रकारभेदकृतः' इत्यादि तदपि न नो बाधामाधातुमलम्, यतस्ते प्रतिपत्तिप्रकारा देश-कालादिभेदेनाऽऽनन्त्यमपि प्रतिपद्यमाना न परिस्थूरनिमित्तभेदेन व्यवस्थापितानाभिनिबोधिकादीन् जातिभेदानतिक्रामन्ति, ततः कथमेकस्मिन् अनेकभेदभावप्रसङ्गः ?। उक्तं च–

न य पडिवत्तिविसेसा एगम्मि अणेगभेयभावो वि।
जं ते तहाविसिट्ठे न जाइभेए विलंघेइ(घेंति)॥१॥ [*धर्मसं० गा० ८४२]

यदप्यवादीद्[5]– 'आवार्यापेक्षं ह्यावारकम्' इत्यादि तदपि न नो मनोबाधायै, यतः परिस्थूरनिमित्तभेदमधिकृत्य व्यवस्थापितो ज्ञानस्य भेदः, ततस्तदपेक्षमावारकमपि तथाभिद्यमानं न युष्मादृशदुर्जनवचनीयतामास्कन्दति। एवमुत्तेजितो भूयः सावष्टम्भं परः प्रश्नयति-ननु परिस्थूरनिमित्तभेदव्यवस्थापिता अप्यमी आभिनिबोधिकादयो भेदा ज्ञानस्याऽऽत्मभूताः ? उताऽनात्मभूताः ? किञ्चातः ? उभयथाऽपि दोषः; तथाहि– यद्यात्मभूतास्ततः क्षीणावरणेऽपि तद्भावप्रसङ्गः, तथा चाऽसर्वज्ञत्वं प्रागुक्तनीत्या तस्याऽऽपद्यते; अथाऽनात्मभूतास्तर्हि न ते पारमार्थिकाः, ततः कथमावार्यापेक्षो वास्तव आवारकभेदः ?; तदपि न मनोरमम्, सम्यग् वस्तुतत्त्वापरिज्ञानाद्, इह हि

---

१. अत्र ''अवधिज्ञानस्य, 'तथा' इति समुच्चये, यः 'अतीन्द्रियेष्वपि' रूपिद्रव्येषु क्षयोपशमः स निमित्तम्'' इति **मलयगिरिटीकादर्शनाद्** अतिंदिएसुं पि इति पाठः टीकाकृतां सम्मतः॥ २. **भेयादिणा भेदो** धर्मसं०॥ ३. पृ० १११ पं० १२॥ ४. पृ० १११ पं० १९॥ ५. पृ० ११२ पं० ५॥

सकलघनपटलविनिर्मुक्तशारददिनमणिरिव समन्ततः समस्तवस्तुस्तोमप्रकाशनैकस्वभावो जीवः, तस्य च तथाभूतः स्वभावः केवलज्ञानमिति व्यपदिश्यते, स च यद्यपि सर्वघातिना केवलज्ञानावरणेनाऽऽव्रियते तथापि तस्यानन्ततमो भागो नित्योद्घाटित एव [१]**अक्खरस्स अणंतो भागो निच्चुग्घाडिओ, जइ पुण सो वि आवरिज्जा तेणं जीवो अजीवत्तणं पावेज्जा** [सू०७७] इत्यादि वक्ष्यमाणवचनप्रामाण्यात्, ततस्तस्य केवलज्ञानावरणावृतस्य घनपटलाच्छादितस्येव सूर्यस्य यो मन्दः प्रकाशः सोऽपान्तरालावस्थितमति-ज्ञानाद्यावरणक्षयोपशमभेदसम्पादितं नानात्वं भजते, यथा घनपटलावृत[२]सूर्यमन्द-प्रकाशोऽपान्तरालावस्थितकट-कुड्याद्यावरणविवर[३]प्रवेशभेदतः, स च नानात्वं तत्तत्क्षयोपशमानुरूपं तथा तथा प्रतिपद्यमानः स्वस्वक्षयोपशमानुसारेणाभिधानभेदमश्नुते, यथा मतिज्ञानावरणक्षयोपशमजनितः स [४]मन्दप्रकाशो मतिज्ञानम्, श्रुतज्ञानावरण-क्षयोपशमजनितः श्रुतज्ञानमित्यादि, तत आत्मस्वभावभूता ज्ञानस्याऽऽभिनिबोधिकादयो भेदाः, ते च प्रवचनोपदर्शितपरिस्थूरनिमित्तभेदतः पञ्चसङ्ख्याः, ततस्तदपेक्षमावारकमपि पञ्चधोपवर्ण्यमानं न विरुध्यते, न चैवमात्मस्वभावभूतत्वे क्षीणावरणस्यापि तद्भावप्रसङ्गः, यत एते मतिज्ञानावरणादिक्षयोपशमरूपोपाधिसम्पादितसत्ताकाः, यथा सूर्यस्य घनपटलावृतस्य मन्दप्रकाशभेदाः कट-कुड्याद्यावरणविवरभेदोपाधिसम्पादिताः, ततः कथं ते[५] तथारूपक्षयोपशमाभावे भवितुमर्हन्ति ?, न खलु सकलघनपटल-कट-कुड्याद्यावरणापगमे सूर्यस्य ते तथारूपा मन्दप्रकाशभेदा भवन्ति। उक्तं च--

[६]**कडविवरागयकिरणा मेहंतरियस्स जह दिणेसस्स।**
ते कड-मेहावगमे न होंति जह तह इमाइं पि॥१॥ [ ]

ततो यथा जन्मादयो भावा जीवस्याऽऽत्मभूता अपि कर्मोपाधिसम्पादितसत्ताकत्वात् तदभावे न भवन्ति, तद्वदाभिनिबोधिकादयोऽपि भेदा ज्ञानस्याऽऽत्मभूता अपि मतिज्ञानावरणादिकर्मक्षयोपशमसापेक्षत्वात् तदभावे केवलिनो न भवन्ति, ततो

---

१. अक्षरस्य अनन्तो भागो नित्योद्घाटितः, यदि पुनः सोऽपि आव्रियेत तेन जीवोऽजीवत्वं प्राप्नुयात् ॥ २. **सूर्यस्य मन्द°** खंसं०॥ ३. **°प्रदेश°** डे० सं० पु० मु० आवमल०॥ ४. **मन्दः प्रका°** खं० मु० आवमल० विना॥ ५. **ते निःशेषावरणक्षयात् तथारूप°** आवमल०॥ ६. कटविवरागताः किरणा मेघान्तरितस्य यथा दिनेशस्य। ते कट-मेघापगमे न भवन्ति यथा तथा इमान्यपि॥

नासर्वज्ञत्वदोषभावः। उक्तं च–

जमिह छउमत्थधम्मा जम्माईया न होंति सिद्धाणं।
इय केवलीणमाभिणिबोहाभावम्मि को दोसो ?॥१॥ [*धर्मसं० ८४५] इति।

पर आह– प्रपन्ना वयमुक्तयुक्तितो ज्ञानस्य पञ्चभेदत्वम्, परममीषां भेदानामित्थमुपन्यासे किञ्चिदस्ति प्रयोजनम् ? उत यथाकथञ्चिदेष प्रवृत्तः ?, अस्तीति ब्रूमः। किं तत् ? इति चेद्, उच्यते, इह मति-श्रुते तावदेकत्र वक्तव्ये, परस्परमनयोः स्वामि-काल-कारण-विषय-परोक्षत्वसाधर्म्यात्। तथाहि– य एव मतिज्ञानस्य स्वामी स एव श्रुतज्ञानस्याधि, [१]**जत्थ मइनाणं तत्थ सुयनाणं, जत्थ सुयनाणं तत्थ मइनाणं** [सू०४३] इत्यादिवक्ष्यमाणवचनप्रामाण्यात्, ततः स्वामिसाधर्म्यम्। तथा यावानेव मतिज्ञानस्य स्थितिकालस्तावानेव श्रुतज्ञानस्यापि, तत्र प्रवाहापेक्षया अतीता-ऽनागत-वर्त्तमानरूपः सर्व एव कालः, अप्रतिपतितैकजीवापेक्षया तु षट्षष्टिसागरोपमाणि समधिकानि। उक्तं च–

दो वारे विजयाइसु गयस्स, तिन्नऽच्चुए अहव ताइं।
अइरेगं नरभवियं, नाणाजीवाण सव्वद्धा ॥१॥ [*विशेषा० गा० ४३६]

इति कालसाधर्म्यम्। यथा चेन्द्रियनिमित्तं मतिज्ञानं तथा श्रुतज्ञानमपीति कारणसाधर्म्यम्। तथा यथा मतिज्ञानमादेशतः सर्वद्रव्यादिविषयमेवं श्रुतज्ञानमपीति विषयसाधर्म्यम्। यथा च मतिज्ञानं परोक्षं तथा श्रुतज्ञानमपि परोक्षम्, परोक्षता चानयोरग्रे स्वयमेव सूत्रकृता वक्ष्यते इति परोक्षत्वसाधर्म्यम्। तत इत्थं स्वाम्यादिसाधर्म्यादेते मति-श्रुते नियमादेकत्र वक्तव्ये, ते चावध्यादिज्ञानेभ्यः प्रागेव, [२]तद्भाव एवा-ऽवध्यादिज्ञानसद्भावात्। उक्तं च–

जं सामि-काल-कारण-विसय-परोक्खत्तणेहिं तुल्लाइं।
तब्भावे सेसाणि य, तेणाऽऽईए मइ-सुयाइं॥१॥ [*विशेषा० गा० ८५]

ननु भवतामेकत्र मति-श्रुते प्रागेव चावध्यादिभ्यः, परमेतयोरेव मति-श्रुतयोर्मध्ये पूर्वं मतिः पश्चात् श्रुतमित्येतत् कथम् ?, उच्यते, मतिपूर्वत्वात् श्रुतज्ञानस्य, तथाहि–

---

१. यत्र मतिज्ञानं तत्र श्रुतज्ञानम्, यत्र श्रुतज्ञानं तत्र मतिज्ञानम्॥ २. **तद्भाव येवा**° खं०। अत्रार्थे खं० प्रतौ केनापि विदुषा टिप्पनं कृतमस्ति। तथाहि-"स्वरे वा" [सिद्ध० १-३-२४] इत्यनेन यकारस्य विकल्पेन लोपः" इति॥

सर्वत्रापि पूर्वमवग्रहादिरूपं मतिज्ञानमुदयते पश्चाच्छ्रुतम्। तथा चोक्तं **चूर्णा**वपि– **तेसु[1] वि य 'मइपुव्वयं सुयं' ति किच्चा पुव्वं मइणाणं कयं, तस्स पिट्ठओ सुयं [नन्दीचू० सू०७ पत्र १४]** ति। नन्वेते मति-श्रुते सम्यक्त्वोत्पादकाले युगपदुत्पत्तिमासादयतः, अन्यथा मतिज्ञानभावेऽपि श्रुताज्ञानभावप्रसङ्गः, स चानिष्टः, तथा मिथ्यात्वप्रतिपत्तौ युगपदेव चाज्ञानरूपतया परिणमतः, ततः कथं मतिपूर्वं श्रुतमुद्गीर्यते ?। उक्तं च–

णाणाणऽण्णाणाणि य समकालाइं जओ मइ-सुयाइं।
तो न सुयं मइपुव्वं, मइनाणे वा सुय[2]अनाणं॥१॥ [विशेषा० गा० १०७]

नैष दोषः, यतः सम्यक्त्वोत्पत्तिकाले समकालं मति-श्रुते लब्धिमात्रमेवाङ्गीकृत्य प्रोच्येते, न तूपयोगम्, उपयोगस्य तथाजीवस्वाभाव्यतः क्रमेणैव सम्भवात्, मतिपूर्वं च श्रुतमुच्यते उपयोगापेक्षया, न खलु मत्युपयोगेनासञ्चिन्त्य श्रुतग्रन्थानुसारि विज्ञानमासादयति जन्तुः, ततो न कश्चिद्दोषः। आह च **भाष्यकृत्**–

इह लद्धिमइ-सुयाइं समकालाइं न तूवओगो सिं।
मइपुव्वं सुयमिह पुण सुओवओगो मइप्पभवो॥१॥ [विशेषा० गा० १०८]

तथा काल-विपर्यय-स्वामित्व-लाभसाधर्म्याद् मति-श्रुतानन्तरमवधिज्ञानमुक्तम्। तत्र[3] प्रवाहापेक्षया अप्रतिपतितैकसत्त्वाधारापेक्षया वा यावान् मति-श्रुतयोः स्थितिकालः तावानेवावधिज्ञानस्यापि। तथा यथैव मति-श्रुते ज्ञाने मिथ्यादर्शनोदयतो विपर्ययरूपतामासादयतः तथाऽवधिज्ञानमपि; तथाहि– मिथ्यादृष्टेः सतः तान्येव मति-श्रुता-ऽवधिज्ञानानि मत्यज्ञान-श्रुताज्ञान-विभङ्गज्ञानानि भवन्ति। उक्तं च– **आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्तम् [प्रशमरति० का० २२७]** इति, तथा य एव मति-श्रुतज्ञानयोः स्वामी स एवावधिज्ञानस्यापि। तथा विभङ्गज्ञानिनस्त्रिदशादेः सम्यग्दर्शनावाप्तौ युगपदेव मति-श्रुता-ऽवधिज्ञानानां लाभसम्भवः ततो लाभसाधर्म्यम्।

अवधिज्ञानानन्तरं च छद्मस्थ-विषय-भाव-प्रत्यक्षत्वसाधर्म्याद् मनः-पर्यायज्ञानमुक्तम्। तथाहि– यथाऽवधिज्ञानं छद्मस्थस्य भवति तथा मनःपर्यवज्ञानमपीति छद्मस्थसाधर्म्यम्।

---

१. तेष्वपि च 'मतिपूर्वं श्रुतम्' इति कृत्वा पूर्वं मतिज्ञानं कृतम्, तस्य पृष्ठतः श्रुतम्॥ २. **सुयऽण्णाणं** पा० डे० सं०। **सुयअन्नाणं** खंमू० जे२, मां०॥ ३. **तत्र** दे० विना नास्ति॥

तथा यथाऽवधिज्ञानं रूपिद्रव्यविषयं तथा मनःपर्यायज्ञानमपि, तस्य मनः-पुद्गलालम्बनत्वादिति विषयसाधर्म्यम्। तथा यथाऽवधिज्ञानं क्षायोपशमिके भावे वर्त्तते तथा मनःपर्यायज्ञानमपीति भावसाधर्म्यम्। यथा चावधिज्ञानं प्रत्यक्षं तथा मनःपर्यायज्ञानमपीति प्रत्यक्षत्वसाधर्म्यम्। उक्तं च–

काल-विवज्जय-सामित्त-लाभसाहम्मओऽवही तत्तो।
माणसमेत्तो छउमत्थ-विसय-भावाइ[१]साहम्मा॥१॥ [**विशेषा*० गा० ८७**]

तथा मनःपर्यायज्ञानानन्तरं केवलज्ञानस्योपन्यासः सर्वोत्तमत्वाद् अप्रमत्त-यतिस्वामिसाधर्म्यात् सर्वावसाने लाभाच्च। तथाहि-सर्वाण्यपि मतिज्ञानादीनि ज्ञानानि देशतः परिच्छेदकानि, केवलज्ञानं तु सकलवस्तुस्तोमपरिच्छेदकं सर्वोत्तमम्, सर्वोत्तमत्वाच्चान्ते सर्वशिरःशेखर[२]कल्पे उपन्यस्तम्। तथा यथा मनःपर्यायज्ञानम-प्रमत्तयतेरेवोदयते तथा केवलज्ञानमप्यप्रमादभावमुपगतस्यैव यतेर्भवति, नान्यस्य, ततोऽप्रमत्तयतिसाधर्म्यम्। तथा यः सर्वाण्यपि ज्ञानानि समासादयितुं योग्यः स नियमात् सर्वज्ञानावसाने केवलज्ञानमवाप्नोति ततः सर्वान्ते केवलमुक्तम्। उक्तं च– **अंते केवलमुत्तम-जइसामित्ता-ऽवसाणलाभाओ** [**विशेषा*० गा० ८८**] इति। तथा यथा मनःपर्यायज्ञानं न विपर्ययमासादयति तथा केवलज्ञानमपीति विपर्ययाभावसाधर्म्याच्च मनःपर्यायज्ञानानन्तरं केवलज्ञानमुक्तमिति। कृतं प्रसङ्गेन॥

[सू० ९] तं समासओ दुविहं पण्णत्तं, तंजहा– पच्चक्खं च परोक्खं च।

तं समासओ दुविहं पन्नत्तं इत्यादि सूत्रम्। **तत्** पञ्चप्रकारमपि ज्ञानं **समासतः** संक्षेपेण **द्विविधं** द्विप्रकारं प्रज्ञप्तम्। **तद्यथा** इत्युदाहरणोपन्यासार्थः। प्रत्यक्षं च परोक्षं च। तत्र [३]**अशूङ् व्याप्तौ** [**मलय० धा०**] अश्नुते-ज्ञानात्मना सर्वान् अर्थान् व्याप्नोतीत्यक्षः, अथवा [४]**अश् भोजने** [**मलय० धा०**] अश्नाति-सर्वान् अर्थान् यथायोगं भुङ्क्ते पालयति चेति अक्षः-जीवः; उभयत्राप्यौणादिकः सक्प्रत्ययः, तम् अक्षं-जीवं प्रति साक्षाद् वर्त्तते यद् ज्ञानं तत् प्रत्यक्षम्, इन्द्रिय-मनोनिरपेक्षमात्मनः साक्षात् प्रवृत्तिमद् अवध्यादिकं

---

१. °**सामण्णा** - वि० भाष्ये॥ २. **कल्पमुप**° डे० सं० मु०॥ ३. अशौटि व्याप्तौ। [हैम० धा० ४।२९] अशू व्याप्तौ। [पा० धा० १२६५] ४. अशश् भोजने। [हैम० धा० ८।५१] अश भोजने। [पा० धा० १५२४]॥

त्रिप्रकारम्। उक्तं च–

जीवो अक्खो अत्थव्वावण-भोयणगुणन्निओ जेण।
तं पइ वट्टइ नाणं, जं पच्चक्खं तयं तिविहं॥१॥ [विशेषा० गा० ८९]

चशब्दः स्वगतानेकावध्यादिभेदसूचकः। तथा अक्षस्य-आत्मनो द्रव्येन्द्रियाणि द्रव्यमनश्च पुद्गलमयत्वात् पराणि वर्त्तन्ते, पृथग् वर्त्तन्ते इत्यर्थः, तेभ्यो यदक्षस्य ज्ञानमुदयते तत्परोक्षम्, [१]पृषोदरादयः* [मलय०] इति रूपसिद्धिः, अथवा परैः-इन्द्रियादिभिः सह [२]उक्षा सम्बन्धो विषय-विषयिभावलक्षणो यस्मिन् ज्ञाने, न तु साक्षादात्मना धूमादग्नि[३]ज्ञान इव, तत् परोक्षम्, उभयत्रापि इन्द्रिय-मनोनिमित्तं ज्ञानमभिधेयम्। आह-इन्द्रिय-मनोनिमित्ताधीनं कथं परोक्षम् ?, उच्यते, पराश्रयत्वात्, तथाहि– पुद्गलमयत्वाद् द्रव्येन्द्रिय-मनांस्यात्मनः पृथग्भूतानि, ततः तदाश्रयेणोपजायमानं ज्ञानमात्मनो न साक्षात्, किन्तु परम्परया, इति इन्द्रिय-मनोनिमित्तं ज्ञानं धूमादग्निज्ञानमिव परोक्षम्, उक्तं च–

अक्खस्स पोग्गल[४]मया जं दव्विंदिय-मणा परा होंति।
तेहिंतो जं नाणं, परोक्खमिह तमणुमाणं व॥१॥ [विशेषा० गा० ९०]

अत्र **वैशेषिकादयः** [५]प्राहुः– नन्वक्षमिन्द्रियं श्रोतो हृषीकं करणं स्मृतम्, ततोऽक्षाणाम् इन्द्रियाणां या साक्षादुपलब्धिः सा प्रत्यक्षम्, अक्षम्– इन्द्रियं प्रति वर्त्तते इति प्रत्यक्षमिति व्युत्पत्तेः, तथा च सति सकललोके प्रसिद्धं साक्षादिन्द्रियाश्रितं घटादिज्ञानं प्रत्यक्षमिति सिद्धम्, तदेतदयुक्तम्, इन्द्रियाणामुपलब्धृत्वासम्भवात्, तदसम्भवश्चाचेतनत्वात्। तथा चात्र प्रयोगः- यदचेतनं तद् नोपलब्धृ, यथा घटः, अचेतनानि च द्रव्येन्द्रियाणि, न चायमसिद्धो हेतुः, यतो नाम द्रव्येन्द्रियाणि निर्वृत्त्युपकरणरूपाणि, **निर्वृत्त्युपकरणे द्रव्येन्द्रियम्** [तत्त्वार्थ० २।१७] इति वचनात्, निर्वृत्त्युपकरणे च पुद्गलमये, यथा चानयोः पुद्गलमयता तथाऽग्रे वक्ष्यते, पुद्गलमयं च सर्वमचेतनम्, पुद्गलानां काठिन्या-ऽबोधरूपतया चैतन्यं प्रति धर्मित्वायोगात्, धर्मानुरूपो

---

१. **पृषोदरादयः** - शाकटा० २।२।९७२। सिद्धहेम० ३।२।१५५॥ २. **उक्षः** दे० खंसं०॥ ३. °**ज्ञानमिव** खं० मु०॥ ४. °**लकया** - वि० भाष्ये॥ ५. **प्राहुः- नन्वक्षाणि इन्द्रियाण्युच्यन्ते, ''खमक्षमिन्द्रियं प्रोक्तं [श्रोतो] हृषीकं करणं स्मृतम्।' [ ] इति वचनात्, ततोऽक्षाणां** - आव० मलय०॥

हि सर्वत्रापि धर्मी, यथा काठिन्यं प्रति पृथिवी, यदि पुनरनुरूपत्वाभावेऽपि धर्म-धर्मिभावो भवेत् ततः काठिन्य-जलयोरपि स भवेत्, न च भवति, तस्मादचेतनाः पुद्गलाः। उक्तं च–

बोहसहावममुत्तं[1] विसयपरिच्छेयगं च चेयन्नं।
विवरीयसहावाणि य भूयाणि जगप्पसिद्धाणि॥१॥
ता धम्म-धम्मिभावो कहमेएसिं[2] ? तहऽब्भुवगमे य।
अणुरूवत्ताभावे, काठिन्न-जलाण किन्न भवे ?॥२॥ [धर्मसं० गा० ५०-५१]

इति। नापि सन्दिग्धानैकान्तिकता हेतोः शङ्कनीया, अचेतनस्योपलम्भकत्व-शक्त्ययोगात्, उपलम्भकत्वं हि चेतनाया धर्मः, ततः स कथं तदभावे भवितुमर्हति ?। आह– प्रत्यक्षबाधितेयं प्रतिज्ञा, साक्षादिन्द्रियाणामुपलम्भकत्वेन प्रतीतेः, तथाहि– चक्षू रूपं गृह्णदुपलभ्यते, शब्दं कर्णौ, नासिका गन्धमित्यादि, तदेतद् मोहावष्टब्धान्तः-करणताविलसितम्, तथाहि– आत्मा शरीरेन्द्रियैः सहान्योन्यानुवेधेन व्यवस्थितः, ततोऽयमात्मा अमूनि चेन्द्रियाणीति विवेक्तुमशक्नुवन्तो बालिशजन्तवः, तत्रापि युष्मादृशां कुशास्त्रसम्पर्कतः कुवासनासङ्गमः, ततः साक्षादुपलम्भकानीन्द्रियाणीति मन्यन्ते, परमार्थतः पुनरुपलब्धा तत्राऽऽत्मैव। कथमेतदवसीयते ? इति चेत्, उच्यते, तद्विगमेऽपि तदुपलब्धार्थानुस्मरणात्, तथाहि– कोऽपि पूर्वं चक्षुषा विवक्षितमर्थं गृहीतवान्, ततः कालान्तरे दैवविनियोगतः चक्षुषोऽपगमेऽपि स तमर्थमनुस्मरति, तत्र यदि चक्षुरेव द्रष्टृ स्यात् ततः चक्षुषोऽभावे तदुपलब्धार्थानुस्मरणं न भवेत्, न ह्यात्मना सोऽर्थोऽनुभूतः, किन्तु चक्षुषा, चक्षुष एव साक्षाद् द्रष्टृत्वेनोपगमात्, न चान्येनानुभूतेऽर्थेऽन्यस्य स्मरणम्, मा प्रापदतिप्रसङ्गः। अपि च– मा भूच्चक्षुषोऽपगमः तथापि यदि चक्षुरेव द्रष्टृ ततः स्मरणमात्मनो न भवेत्, अन्येनानुभूतेऽर्थेऽन्यस्य स्मरणायोगात्, भवति च स्मरणमात्मनः, चक्षुषः स्मर्तृत्वेनाप्रतीतेरनभ्युपगमाच्च, तस्मादात्मैवोपलब्धा नेन्द्रियमिति। तथा चात्र प्रयोगः-यो येषूपरतेष्वपि तदुपलब्धानर्थान् स्मरति स तत्रोपलब्धा, यथा गवाक्षोपलब्धानामर्थानामनुस्मर्त्ता देवदत्तः, अनुस्मरति च द्रव्येन्द्रियोपलब्धानर्थान्

१. अमूर्त्तम् - खंटि०॥ २. **कहमेसिं तहं°** खंमू०, दे०। **कहमेसिं घडई ? तह** पा० मांसं०॥

द्रव्येन्द्रियापगमेऽप्यात्मा, इह स्मरणमनुभवपूर्वकतया व्याप्तम्, व्याप्य-व्यापकभावश्चानुभव-स्मरणयोः प्रत्यक्षेणैव प्रतिपन्नः, तथाहि– योऽर्थोनुभूतः स स्मर्यते, न शेषः, तथा स्वसंवेदनप्रत्यक्षेण प्रतीतेः, विपक्षे चातिप्रसङ्गो बाधकं प्रमाणम्, अननुभूतेऽपि विषये यदि स्मरणं भवेत् ततोऽननुभूतत्वाविशेषात् खरविषाणादेरपि स्मरणं भवेदित्यतिप्रसङ्गः, तस्माद् द्रव्येन्द्रियापगमेऽपि तदुपलब्धार्थानुस्मरणादात्मा उपलब्धेति स्थितम्। उक्तं च–

केसिंचि इंदियाइं अक्खाइं, तदुवलद्धि पच्चक्खं।
तन्नो, ताइं जमचेयणाइं जाणंति न घडो व्व॥१॥
उवलद्धा तत्थाऽऽया, तव्विगमे तदुवलद्धसरणाओ।
गेहगवक्खोवरमे वि तदुवलद्धाणुसरिया वा॥२॥ [विशेषा० गा० ९१-९२]

अत्र वाशब्दः उपमार्थः।

अपरे पुनराहुः-न वयमिन्द्रियाणामुपलब्धृत्वं प्रतिजानीमहे किन्त्वेतदेव ब्रूमः-यद् इन्द्रियद्वारेण प्रवर्त्तते ज्ञानमात्मनि तत् प्रत्यक्षम्, न चेन्द्रियव्यापारव्यवहितत्वादात्मा साक्षान्नोपलब्धेति वक्तव्यम्, इन्द्रियाणामुपलब्धिं प्रति करणतया व्यवधायकत्वायोगात्, न खलु देवदत्तो हस्तेन भुञ्जानो हस्तव्यापारव्यवहितत्वात् साक्षान्न भोक्तेति व्यपदेष्टुं शक्यम्, तदेतदसमीचीनम्, सम्यग्वस्तुतत्त्वापरिज्ञानात्, इह हि यदाऽऽत्मा चक्षुरादिकमपेक्ष्य बाह्यमर्थमवबुध्यते तदाऽवश्यं चक्षुरादेः सादृगुण्याद्यपेक्षते, तथाहि– यदा सद्गुणं चक्षुः तदा बाह्यमर्थं स्पष्टं यथावस्थितं चोपलभते, यदा तु तिमिरा-ऽऽशुभ्रमण-नौयान-पित्तादिसंक्षोभ-देशदवीयस्ताद्यापादितविभ्रमं तदा विपरीतं संशयितं वा, ततोऽवश्यमात्मा अर्थोपलब्धौ पराधीनः, तथा च सति यथा राजा निजराजदौवारिकेणोपदर्शितं परराष्ट्रराजकीयं पुरुषं पश्यन्नपि समीचीनमसमीचीनं वा निजराजदौवारिकवचनत एव प्रत्येति न साक्षात्, तद्वदात्माऽपि चक्षुरादिनोपदर्शितं बाह्यमर्थं चक्षुरादिप्रत्ययत एव समीचीनमसमीचीनं वा वेत्ति, न साक्षात्। तथाहि– चक्षुरादिना दर्शितेऽपि बाह्येऽर्थे यदि संशयमधिरूढो भवति तर्हि चक्षुरादिसादृगुण्यमेव प्रतीत्य निश्चयं विदधाति यथा-न मे चक्षुस्तिमिरोपप्लुतं नौयाना-ऽऽशुभ्रमणाद्यापादितविभ्रमं वा, ततोऽयमर्थः समीचीन

इति। ततो यथा राज्ञो 'नायं मम राजदौवारिकोऽसत्यालापी, कदाचनाप्यस्य व्यभिचारानुपलम्भात्' इति निजदौवारिकस्य सादृगुण्यमवगम्य परराष्ट्रराजकीय-पुरुषसमीचीनतावधारणं परमार्थतः परोक्षम्, तद्वदात्मनोऽपि चक्षुरादिसादृगुण्यावधारणतो वस्तुयाथात्म्यावधारणं परमार्थतः परोक्षम्।

नन्विदमिन्द्रियसादृगुण्यावधारणतो वस्तुयाथात्म्यावधारणमनभ्यासदशामापन्न-स्योपलभ्यते नाभ्यासदशामुपगतस्य, अभ्यासदशामापन्नो ह्यभ्यासप्रकर्षसामर्थ्यादिन्द्रिय-सादृगुण्यमनपेक्ष्यैव साक्षादवबुध्यते, ततस्तस्येन्द्रियाश्रितं ज्ञानं कथं प्रत्यक्षं न भवति ?, तदयुक्तम्, अभ्यासदशापन्नस्यापि साक्षादनवबोधात्, तस्यापीन्द्रियद्वारेणावबोध-प्रवृत्तेरवश्यमिन्द्रियसादृगुण्यापेक्षणात्, केवलमभ्यासप्रकर्षवशात् तदिन्द्रियसादृगुण्यं झटित्येवावधारयति, पूर्वावधृतं वा झटित्येव निश्चिनोति, ततः कालसौक्ष्म्यात् तन्नोपलभ्यते। इत्थं चैतदङ्गीकर्त्तव्यम्, यतोऽवश्यमवायज्ञानमवग्रहेहापूर्वम्, ईहा च विचारणात्मिका, विचारश्चेन्द्रियसादृगुण्यसद्भूतवस्तुधर्माश्रितः, अन्यथैकतरविचाराभावे-ऽवायज्ञानस्य सम्यग्ज्ञानत्वायोगात्, न खल्विन्द्रिये वस्तुनि वा सम्यगविचारितेऽवायज्ञानं समीचीनं भवति, ततोऽभ्यासदशापन्नेऽपीन्द्रियसादृगुण्यावधारणमवसेयम्।

यदपि [१]चोक्तम्– 'न खलु देवदत्तो हस्तेन भुञ्जानो हस्तव्यापारव्यवहितत्वात् साक्षान्न भोक्तेति व्यपदेष्टुं शक्यम्' इति तदप्ययुक्तम्, दृष्टान्त-दार्ष्टान्तिकार्थवैषम्यात्, भोक्ता हि भुजिक्रियानुभवभागी भण्यते, भुजिक्रियाऽनुभवश्च देवदत्तस्य न हस्तेन व्यवधीयते, किन्तु साक्षात्, हस्तो हि कवलप्रक्षेप एव व्याप्रियते, न परिच्छेदक्रियायामिन्द्रियमिवाऽऽहारक्रियानुभवेऽपि येन व्यवधानं भवेत्, ततो देवदत्तः साक्षाद् भोक्तेति व्यवह्रियते; इह तु वस्तूनामुपलब्धिरुक्तनीत्या चक्षुरादीन्द्रिय-सादृगुण्यावगमानुसारेणोपजायते, ततो व्यवधानान्न साक्षादुपलम्भक आत्मेति।

नन्विदं सर्वमप्युत्सूत्रप्ररूपणम्, सूत्रे ह्यनन्तरमेवेन्द्रियाश्रितं ज्ञानं प्रत्यक्षमुपदेक्ष्यते-[२]**पच्चक्खं दुविहं पन्नत्तं, तंजहा-इंदियपच्चक्खं नोइंदियपच्चक्खं च [सू०९]** इति, सत्यमेतत्,

---

१. पृ० १२१ पं० १५ ॥ २. प्रत्यक्षं द्विविधं प्रज्ञप्तम्, तद् यथा-इन्द्रियप्रत्यक्षं नोइन्द्रियप्रत्यक्षं च॥

किन्त्विदं लोकव्यवहारमधिकृत्योक्तम्, न परमार्थतः। तथाहि– यद् इन्द्रियाश्रितमपरव्यवधानरहितं ज्ञानमुदयते तद् लोके प्रत्यक्षमिति व्यवहृतम्, अपरधूमादिलिङ्गनिरपेक्षतया साक्षादिन्द्रियमधिकृत्य प्रवर्त्तनात्; यत् पुनरिन्द्रिय-व्यापारेऽप्यपरं धूमादिकमपेक्ष्याग्न्यादिविषयं ज्ञानमुदयते तद् लोके परोक्षम्, तत्र साक्षादिन्द्रियव्यापारासम्भवात्; यत् पुनरात्मनः इन्द्रियमप्यनपेक्ष्य साक्षादुपजायते तत् परमार्थतः प्रत्यक्षम्, तच्चावध्यादिकं त्रिप्रकारम्। ततो लोकव्यवहारमधिकृत्येन्द्रियाश्रितं ज्ञानमनन्तरसूत्रे प्रत्यक्षमुक्तम्, न परमार्थतः। अथोच्यते-अनन्तरसूत्रे न किमपि विशेषसूचकं पदमीक्षामहे ततः कथमिदमवसीयते-संव्यवहारमधिकृत्येन्द्रियाश्रितं ज्ञानं प्रत्यक्षमुक्तम्, न परमार्थतः ? इति, उच्यते, उत्तरसूत्रार्थपर्यालोचनात्, प्रत्यक्ष-भेदाभिधानानन्तरं हि सूत्रमाचार्यो वक्ष्यति- **परोक्खं दुविहं पन्नत्तं, तंजहा- आभिणिबोहियनाणं सुयनाणं [सू० ४२]** इत्यादि, तत्राऽऽभिनिबोधिकमवग्रहादिरूपम्, अवग्रहादयश्च श्रोत्रेन्द्रियाद्याश्रिता वर्णयिष्यन्ते, तद् यदि श्रोत्रादीन्द्रियाश्रितं ज्ञानं परमार्थतः प्रत्यक्षं तत् कथमवग्रहादयः परोक्षज्ञानत्वेनाग्रेऽभिधीयन्ते ?, तस्मादुत्तरत्रेन्द्रियाश्रितज्ञानस्य परोक्षत्वेनाभिधानाद-वसीयते-अनन्तरसूत्रेणोच्यमानमिन्द्रियाश्रितं ज्ञानं व्यवहारतः प्रत्यक्षमुक्तम्, न परमार्थत इति स्थितम्। आह च–

एगंतेण परोक्खं लिंगियमोहाईयं च पच्चक्खं।
इंदिय-मणोभवं जं तं संववहारपच्चक्खं॥१॥ [विशेषा० गा० ९५]

अकलङ्कोऽप्याह– **द्विविधं प्रत्यक्षज्ञानम्-सांव्यवहारिकं मुख्यं च, तत्र सांव्यवहारिकमिन्द्रिया-ऽनिन्द्रियप्रत्यक्षम्, मुख्यमतीन्द्रियज्ञानम् [लघीयस्त्रय० स्वो० ४]** इति। केवलमनोमात्रनिमित्तं श्रुतज्ञानं च लोकेऽपि परोक्षमिति प्रतीतम्, नापि सूत्रे क्वचिदपि प्रत्यक्षमिति व्यवहृतम्, ततो न तत्र कश्चिद् विवादः॥ तदेवं प्रत्यक्षं परोक्षं चेति भेदद्वयोपन्यासे कृते सति शिष्योऽनवबुध्यमानः प्रश्नं विधत्ते–

---

१. अवध्यादिकम् - खंटि०॥ २. "प्रत्यक्षं विशदं ज्ञानं मुख्य-संव्यवहारतः। परोक्षं शेषविज्ञानं प्रमाणे इति संग्रहः ॥३॥.. अनुमानाद्यतिरेकेण विशेषप्रतिभासनम्। तद् वैशद्यं मतं बुद्धेरवैशद्यमतः परम् ॥४॥ तत्र सांव्यवहारिकम् इन्द्रियानिन्द्रियप्रत्यक्षम्, मुख्यमतीन्द्रियज्ञानम्" इति स्वोपज्ञवृत्तिसहिते **अकलङ्क**विरचिते **लघीयस्त्रये**। विशेषजिज्ञासुभिः अस्य **प्रभाचन्द्र**विरचिता **न्यायकुमुदचन्द्रा**ख्या वृत्तिर्विलोकनीया पृ० २०,७४॥ ३. **प्रत्यक्षं ज्ञानम्** खं० ॥ ४. **नात्र** जे१,२, मांमू० डे० सं०॥

[सू०१०] से किं तं पच्चक्खं ? पच्चक्खं दुविहं पण्णत्तं, तंजहा-इंदियपच्चक्खं च णोइंदियपच्चक्खं च।

से किं तं पच्चक्खं ति। **'से'** शब्दो मागधदेशीप्रसिद्धो निपातोऽथशब्दार्थे वर्त्तते, अथशब्दश्च प्रक्रियाद्यर्थाभिधायी। यत उक्तम्– **अथ प्रक्रिया-प्रश्ना-ऽऽनन्तर्य-मङ्गलोपन्यास-प्रतिवचन-समुच्चयेषु** [ ] इति। इह चोपन्यासार्थे वेदितव्यः, **किम्** इति परप्रश्ने, **तत्** प्रागुपदिष्टं **प्रत्यक्षम्** ? इति। एवं शिष्येण प्रश्ने कृते सति न्यायमार्गोपदर्शनार्थमाचार्यः शिष्यपृष्टपदानुवादपुरस्सरीकारेण प्रतिवचनमभिधातुकाम आह- **पच्चक्खं दुविहं पन्नत्तं** इत्यादि। एवमन्यत्रापि यथायोगं प्रश्न-निर्वचनसूत्राणां[१] पातनिका भावनीया। प्रत्यक्षं द्विविधं प्रज्ञप्तम्, तद्यथा-इन्द्रियप्रत्यक्षं नोइन्द्रियप्रत्यक्षं च। तत्र **इंदु परमैश्वर्ये** [**मलय० धा०**] **उदितो नम्** [**मलय० आ० पा० ५ सू० २४**] इति नम्, इन्दनाद् इन्द्रः-आत्मा सर्वद्रव्योपलब्धिरूपपरमैश्वर्ययोगात्, तस्य लिङ्गं-चिह्नमविनाभावि इन्द्रियम्, **इन्द्रियम्**[२] [**मलय० त० २।६**] इति निपातनसूत्राद् रूपनिष्पत्तिः।

तद् द्विधा-द्रव्येन्द्रियं भावेन्द्रियं च। तत्र द्रव्येन्द्रियं द्विधा-निर्वृत्तिरुपकरणं च। निर्वृत्तिर्नाम प्रतिविशिष्टः[३] संस्थानविशेषः। साऽपि द्विधा-बाह्या अभ्यन्तरा च।

तत्र बाह्या कर्णपर्पटकादिरूपा[४], साऽपि विचित्रा, न प्रतिनियतरूपतया[५] ऽपदेष्टुं शक्यते, तथाहि-मनुष्यस्य श्रोत्रे भ्रूसमे नेत्रयोरुभयपार्श्वतः संस्थिते, वाजिनो मस्तके नेत्रयोरुपरिष्टाद् भाविनी तीक्ष्णे चाग्रभागे इत्यादिजातिभेदान्नानाविधा।

अभ्यन्तरा तु निर्वृत्तिः सर्वेषामपि जन्तूनां समाना। तामेव चाधिकृत्यामूनि सूत्राणि प्रावर्त्तिषत–

सोइंदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते ?, गोयमा ! कलंबुयासंठाणसंठिए पन्नत्ते।[५] **चक्खुंदिए णं भंते ! किंसंठाणंसंठिए पण्णत्ते ?, गोयमा ! मसूरचंदसंठाणसंठिए पण्णत्ते।**[६]

---

१. "इदु परमैश्वर्ये" - हैम० धा० ३०९ "इदि परमैश्वर्ये" - पा० धा० ६३ ॥ २. **इन्द्रियम्** - सिद्धहेम० ७।१।१७४ ।, शाकटा० ३।३।९२ ॥ ३. °**शिष्टाः संस्थानविशेषाः** जे० डे० सं०॥ ४. °**पर्पटादि**° खं० विना॥ ५. श्रोत्रेन्द्रियं भदन्त ! किंसंस्थानसंस्थितं प्रज्ञप्तम् ? गौतम ! कलम्बुका- [कदम्बक]संस्थानसंस्थितं प्रज्ञप्तम्। चक्षुरिन्द्रियं भदन्त ! किंसंस्थानसंस्थितं प्रज्ञप्तम् ? गौतम ! मसूरचन्द्रसंस्थानसंस्थितं प्रज्ञप्तम्। घ्राणेन्द्रियं भदन्त ! किंसंस्थानसंस्थितं प्रज्ञप्तम् ? गौतम ! अतिमुक्तकसंस्थानसंस्थितं प्रज्ञप्तम्। जिह्वेन्द्रियं भदन्त ! किंसंस्थानसंस्थितं प्रज्ञप्तम् ? गौतम ! क्षुरप्रसंस्थानसंस्थितं प्रज्ञप्तम्। स्पर्शनेन्द्रियं भदन्त ! किंसंस्थानसंस्थितं प्रज्ञप्तम् ? गौतम ! नानासंस्थानसंस्थितं प्रज्ञप्तम्॥ [प्रज्ञा० पद १५, उ०१; सू० १९१, पत्र २९३-१] ६. **चक्खुइंदिए** जे१,२, मां०॥

घाणिंदिए णं भंते ! किंसंठाणसंठिए पण्णत्ते ?, गोयमा ! अइमुत्तगसंठाणसंठिए पण्णत्ते। जिब्भिंदिए णं भंते ! किंसंठाणसंठिए पण्णत्ते ?, गोयमा ! खुरप्पसंठाणसंठिए पण्णत्ते। फासिंदिए णं भंते ! किंसंठाणसंठिए पण्णत्ते ? गोयमा ! नाणासंठाणसंठिए पण्णत्ते।''
[प्रज्ञा० १५।१।९७४]

इह स्पर्शनेन्द्रियनिर्वृत्तेः प्रायो न बाह्याभ्यन्तरभेदः, **तत्त्वार्थमूलटीकायां**[1] तथाभिधानात्। उपकरणं-खड्गस्थानीयाया बाह्यनिर्वृत्तेर्या खड्गधारासमाना स्वच्छतरपुद्गलसमूहात्मिका अभ्यन्तरा निर्वृत्तिः तस्याः शक्तिविशेषः। इदं चोपकरणरूपं द्रव्येन्द्रियमान्तरनिर्वृत्तेः कथञ्चिदर्थान्तरम्, शक्ति-शक्तिमतोः कथञ्चिद् भेदात्, कथञ्चिद् भेदश्च सत्यामपि तस्यामान्तरनिर्वृत्तौ द्रव्यादिनोपकरणस्य विघातसम्भवात्। तथाहि- सत्यामपि कदम्बपुष्पाद्याकृतिरूपायामान्तरनिर्वृत्तावतिकठोरतरघनगर्जितादिना शक्त्युपघाते सति न परिच्छेत्तुमीशते जन्तवः शब्दादिकमिति। भावेन्द्रियमपि द्विधा-लब्धिः उपयोगश्च। तत्र लब्धिः श्रोत्रेन्द्रियादिविषयः सर्वात्मप्रदेशानां तदावरणकर्मक्षयोपशमः। उपयोगः स्वस्वविषये लब्धिरूपेन्द्रियानुसारेण आत्मनो व्यापारः। इह च द्विविधमपि द्रव्य-भावरूपमिन्द्रियं गृह्यते, एकतरस्याप्यभावे इन्द्रियप्रत्यक्षत्वानुपपत्तेः। तत्र इन्द्रियस्य प्रत्यक्षं इन्द्रियप्रत्यक्षम्। नोइन्द्रियप्रत्यक्षं यद् इन्द्रियप्रत्यक्षं न भवति। नोशब्दः सर्वनिषेधवाची, तेन मनसोऽपि कथञ्चिदिन्द्रियत्वाभ्युपगमात् तदाश्रितं ज्ञानं प्रत्यक्षं न भवतीति सिद्धम्॥

[सू० ११] से किं तं इंदियपच्चक्खं ?, इंदियपच्चक्खं पंचविहं पण्णत्तं, तंजहा- सोइंदियपच्चक्खं १ चक्खिंदियपच्चक्खं २ घाणिंदियपच्चक्खं ३ रसणेंदियपच्चक्खं ४ फासिंदियपच्चक्खं ५। सेत्तं इंदियपच्चक्खं।

से किं तमित्यादि। अथ किं तदिन्द्रियप्रत्यक्षम् ? इन्द्रियप्रत्यक्षं पञ्चविधं प्रज्ञप्तम्, तद्यथा– **श्रोत्रेन्द्रियप्रत्यक्ष**मित्यादि। तत्र श्रोत्रेन्द्रियस्य प्रत्यक्षं श्रोत्रेन्द्रियप्रत्यक्षम्, श्रोत्रेन्द्रियं निमित्तीकृत्य यदुत्पन्नं ज्ञानं तत् श्रोत्रेन्द्रियप्रत्यक्षमिति भावः, एवं शेषेष्वपि भावनीयम्। एतच्च व्यवहारत उच्यते, न परमार्थत इत्यनन्तरमेव प्रागुक्तम्। आह-

---

१. ''नानाकारं कायेन्द्रियम्, असंख्येयभेदत्वाद्, अस्य चान्तर्बहिर्भेदो निर्वृत्तेर्न कश्चित् प्रायः'' - **तत्त्वार्थ० सिद्ध०** २।१७ ॥ ''बाह्या पुनर्निर्वृत्तिश्चित्राकारत्वाद् नोपनिबद्धुं शक्या'' - **तत्त्वार्थ० हारि०** २।१७ ॥

स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्राणीन्द्रियाणि [**तत्त्वा***० अ० २ सू०२०] इति क्रमः, अयमेव च समीचीनः, पूर्वपूर्वलाभ एवोत्तरोत्तरलाभसम्भवात्, ततः किमर्थमुत्क्रमोपन्यासः कृतः ?, उच्यते, अस्ति पूर्वानुपूर्वी अस्ति पश्चानुपूर्वी[1]ति न्यायप्रदर्शनार्थम्, अपि च– शेषेन्द्रियापेक्षया श्रोत्रेन्द्रियं पटु, ततः श्रोत्रेन्द्रियस्य यत् प्रत्यक्षं तच्छेषेन्द्रियप्रत्यक्षापेक्षया स्पष्टसंवेदनम्, स्पष्टसंवेदनं चोपवर्ण्यमानं विनेयः सुखेनावबुध्यते, ततः सुखप्रतिपत्तये श्रोत्रेन्द्रियादिक्रम उक्तः॥

[सू० १२] से किं तं णोइंदियपच्चक्खं ?, णोइंदियपच्चक्खं तिविहं पण्णत्तं, तंजहा-ओहिणाणपच्चक्खं १ मणपज्जवणाणपच्चक्खं २ केवलणाण-पच्चक्खं ३।

[सू० १३] से किं तं ओहिणाणपच्चक्खं ?, ओहिणाणपच्चक्खं दुविहं पण्णत्तं, तंजहा-भवपच्चतियं च खयोवसमियं च। दोण्हं भवपच्चतियं, तंजहा– देवाणं च णेरतियाणं च। दोण्हं खयोवसमियं, तंजहा- मणुस्साणं च पंचेंदियतिरिक्खजोणियाणं च।

[सू० १४(१)] को हेऊ खायोवसमियं ?, खायोवसमियं तयावरणिज्जाणं कम्माणं उइण्णाणं खएणं अणुदियाणं उवसमेण ओहिणाणं समुप्पज्जति।

से किं तं नोइंदियपच्चक्खमित्यादि। अथ किं तद् नोइन्द्रियप्रत्यक्षम् ?, नोइन्द्रियप्रत्यक्षं त्रिविधं प्रज्ञप्तम्, तद्यथा– **अवधिज्ञानप्रत्यक्ष**मित्यादि॥ अथ किं तदवधिज्ञानप्रत्यक्षम् ?, अवधिज्ञानप्रत्यक्षं द्विविधं प्रज्ञप्तम्, तद्यथा– भवप्रत्ययं च क्षायोपशमिकं च। तत्र भवन्ति कर्मवशवर्त्तिनः प्राणिनोऽस्मिन्निति भवः-नारकादिजन्म, **पुंनाम्नि** [**मलय***० कृ० ६।५] इति अधिकरणे घप्रत्ययः, भव एव **प्रत्ययः** कारणं यस्य तद् भवप्रत्ययम्, प्रत्ययशब्दश्चेह कारणपर्यायः, वर्त्तते च प्रत्ययशब्दः कारणत्वे, यत उक्तम्– **प्रत्ययः शपथ-ज्ञान-हेतु-विश्वास-निश्चये।** [ ] **च**शब्दः स्वगतदेव-नारकाश्रितभेदद्वयसूचकः। तौ च द्वौ भेदौ अनन्तरमेव वक्ष्यति। तथा क्षयश्चोपशमश्च

---

१. **पश्चानुपूर्वी अस्ति अनानुपूर्वीति** खंसं०॥ २. **पुंनाम्नि घः प्रायः** - शाकटा० ४।४।९१।, **पुंनाम्नि घः** - मलय० कृ० ६।५, सिद्धहेम० ५।३।१३०॥

क्षयोपशमौ ताभ्यां निर्वृत्तं क्षायोपशमिकम्। **च**शब्दः स्वगतानेकभेदसूचकः। तत्र यद् येषां भवति तत् तेषामुपदर्शयति-**दोण्ह**मित्यादि। द्वयोर्जीवसमूहयोः भवप्रत्ययम्, तद्यथा– देवानां नारकाणां च। तत्र दीव्यन्ति-निरुपमक्रीडामनुभवन्तीति देवाः तेषाम्, तथा नरान् कायन्ति-शब्दयन्ति योग्यताया अनतिक्रमेणाऽऽकारयन्ति जन्तून् स्वस्थाने इति नरकाः, तेषु भवा नारकाः तेषाम्। **च**शब्द उभयत्रापि स्वगतानेकभेदसूचकः, ते च संस्थानचिन्तायामग्रे दर्शयिष्यन्ते।

अत्राऽऽह परः- नन्ववधिज्ञानं क्षायोपशमिके भावे वर्त्तते नारकादिभवश्चौदयिके तत् कथं देवादीनामवधिज्ञानं भवप्रत्ययमिति व्यपदिश्यते ?, नैष दोषः, यतस्तदपि परमार्थतः क्षायोपशमिकमेव, केवलं स क्षयोपशमो देव-नारकभवेष्ववश्यम्भावी, पक्षिणां गगनगमनलब्धिरिव, ततो भवप्रत्ययमिति व्यपदिश्यते। उक्तं च **चूर्णौ**– [१]**णणु ओही खाओवसमिए भावे, नरगाइभवो से उदइए भावे, तओ कहं भवपच्चइओ भण्णइ ?, उच्यते, सोऽवि खओवसमिओ चेव, किंतु सो खओवसमो नारग-देवभवेसु अवस्सं भवइ, को दिट्ठंतो ?, पक्खीणं आगासगमणं व, तओ भवपच्चइओ भन्नइ [नन्दीचू० सू० १२ पृ०१५]** त्ति॥

तथा द्वयोः क्षायोपशमिकम्, तद्यथा- मनुष्याणां च पञ्चेन्द्रियतिर्यग्योनिजानां च। अत्रापि चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ। पञ्चेन्द्रियतिर्यग्-मनुष्याणां चावधिज्ञानं नावश्यम्भावि, ततः समानेऽपि क्षायोपशमिकत्वे भवप्रत्ययादिदं भिद्यते, परमार्थतः पुनः सकलमप्यवधिज्ञानं क्षायोपशमिकम्॥

सम्प्रति [२]क्षायोपशमिकस्वरूपं प्रतिपादयति **को हेतू खओवसमियं ? [नन्दी० सू०१४]** ति **को हेतुः** किं निमित्तं यद्वशादवधिज्ञानं क्षायोपशमिकमित्युच्यते ?। अत्र निर्वचनमभिधातुकाम आह- **खओवसमिय**मित्यादि। क्षायोपशमिकं येन कारणेन **तदावरणीयानाम्** अवधिज्ञानावरणीयानां कर्मणामुदीर्णानां क्षयेण **अनुदीर्णानाम्** उदयावलिकामप्राप्तानाम् **उपशमेन** विपाकोदयविष्कम्भणलक्षणेनावधिज्ञानमुत्पद्यते,

१. ननु अवधिः क्षायोपशमिके भावे, नारकादिभवोऽथ औदयिके भावे, ततः कथं भवप्रत्ययिको भण्यते ? उच्यते- सोऽपि क्षायोपशमिक एव, किन्तु स क्षयोपशमो नारक-देवभवयोः अवश्यं भवति, को दृष्टान्तः ? पक्षिणामाकाशगमनमिव, ततो भवप्रत्ययिको भण्यते॥ २. **क्षयोपशमस्व**° खं० जे१,२, दे० पु०॥

तेन कारणेन क्षायोपशमिकमित्युच्यते। क्षयोपशमश्च देशघातिरसस्पर्द्धकानामुदये सति भवति, न सर्वघातिरसस्पर्द्धकानाम्॥

अथ किमिदं देशघातीनि सर्वघातीनि वा रसस्पर्द्धकानि ? इति, उच्यते, इह कर्मणां प्रत्येकमनन्तानन्तानि रसस्पर्द्धकानि भवन्ति। रसस्पर्द्धकस्वरूपं च **कर्मप्रकृति-टीकायां** सप्रपञ्चमुपदर्शितमिति न भूयो दर्श्यते। तत्र केवलज्ञानावरणीयादिरूपाणां सर्वघातिनीनां प्रकृतीनां सर्वाण्यपि रसस्पर्द्धकानि सर्वघातीनि, देशघातिनीनां पुनः कानिचित् सर्वघातीनि कानिचिद् देशघातीनि। तत्र यानि चतुःस्थानकानि त्रिस्थानकानि वा रसस्पर्द्धकानि तानि नियमतः सर्वघातीनि, द्विस्थानकानि पुनः कानिचिद् देशघातीनि कानिचित् सर्वघातीनि, एकस्थानकानि तु सर्वाण्यपि देशघातीन्येव। उक्तं च–

चउ-तिट्ठाणरसाणि य सव्वग्घाईणि होंति फड्डाणि।
दुट्ठाणियाणि मीसाणि, देसघाईणि सेसाणि॥१॥ [**पञ्चसं० गा० ३।२८**]

अथ किमिदं रसस्य चतुःस्थानक-त्रिस्थानकत्वादि ?, उच्यते, इह शुभप्रकृतीनां रसः क्षीरखण्डादिरसोपमः अशुभप्रकृतीनां तु निम्ब-घोषातक्यादिरसोपमः। उक्तं च- **घोसाडइ-निंबुवमो असुभाण, सुभाण खीर-खंडुवमो।** [**पञ्चसं० गा० ३।३२**] क्षीरादिरसश्च स्वाभाविक एकस्थानकः, द्वयोस्तु कर्षयोरावर्त्तने कृते सति योऽवशिष्यते एकः कर्षः स द्विस्थानकः, त्रयाणां कर्षाणामावर्त्तने कृते सति एकः कर्षोऽवशिष्टः त्रिस्थानकः, चतुर्णां कर्षाणामावर्त्तने कृते सति उद्वरति य एकः कर्षः स चतुःस्थानकः। एकस्थानकोऽपि च रसो जललव-बिन्दु-चुलुकार्ध-चुलुक-प्रसृत्यञ्जलि-करक-कुम्भ-द्रोणादिप्रक्षेपाद् मन्द-मन्दतरादिबहुभेदत्वं प्रतिपद्यते, एवं द्विस्थानकादयोऽपि; एवं कर्मणामपि चतुःस्थानकादयो रसा भावनीयाः प्रत्येकमनन्तभेदभाजश्च, कर्मणां चैकस्थानकरसाद् द्विस्थानकादयो रसाः यथोत्तरमनन्तगुणा वेदितव्याः। उक्तं च– **अणंतगुणिया कमेणियरे।** [**पञ्चसं० गा० ३।३२**] तत्राशुभप्रकृतीनां चतुःस्थानकरसबन्धः प्रस्तररेखासदृशैः अनन्तानुबन्धिभिः क्रोधादिकैः क्रियते, दिनकरातपशोषिततडागभूरेखासदृशैरप्रत्याख्यानसंज्ञैः क्रोधादिभिः त्रिस्थानकरसबन्धः, सिकताकणसंहतिगतरेखासदृशैः प्रत्याख्यानावरणसंज्ञैर्द्विस्थानकरसबन्धः, जलरेखासदृशैस्तु सञ्ज्वलनसंज्ञैरेकस्थानकरसबन्धः।

शुभप्रकृतीनां पुनरेतदेव व्यत्यासेन योजनीयम्, नवरं द्विस्थानकरसादारभ्य। तद्यथा- प्रस्तररेखासदृशैरनन्तानुबन्धिभिः क्रोधादिकैः द्विस्थानकरसबन्धः क्रियते, दिनकरातप-शोषिततडागभूरेखासदृशैस्त्रिस्थानकरसबन्धः, सिकता-जलरेखासदृशैः पुनश्चतुःस्थानकर-सबन्धः। तथा चोक्तम्–

उप्पल-भूमी-वालुय-जलरेहासरिससंपराएसु।
चउठाणाई असुभाण, सेसयाणं तु वच्चासो॥१॥ [*पञ्चसं० गा० ३।३१]

अत्र **सेसयाणं तु वच्चासो** इति शेषकाणां शुभप्रकृतीनां व्यत्यासो द्रष्टव्यः, स च द्विस्थानकादारभ्य, यथोक्तं प्राक्।

अथ कथमवसीयते यदुत– द्विस्थानकादारभ्य व्यत्यासो नैकस्थानकादारभ्य ?, उच्यते, शुभप्रकृतीनामेकस्थानकरसबन्धस्यासम्भवात्, असम्भवः कथम् ? इति चेत्, उच्यते, इहात्यन्तविशुद्धौ वर्त्तमानः शुभप्रकृतीनां चतुःस्थानकमेव रसमाबध्नाति, ततो मन्द-मन्दतरविशुद्धौ त्रिस्थानकं द्विस्थानकं वा, सङ्क्लेशाद्धायां तु वर्त्तमानस्य शुभप्रकृतयो बन्धमेव नाऽऽयान्ति, कुतस्तस्यामवस्थायां तद्गतरसस्थानकचिन्ता ?, या अपि नरकगतिप्रायोग्यं बध्नतोऽतिसङ्क्लिष्टस्यापि वैक्रिय-तैजसादिकाः प्रकृतयो बन्धमायान्ति तासामपि स्वभावतो द्विस्थानकस्यैव रसस्य बन्धो नैकस्थानकस्य, ततः शुभप्रकृतीनां व्यत्यासयोजना द्विस्थानकरसबन्धादारभ्य कर्त्तव्या।

अथाशुभप्रकृतीनामेकस्थानकस्यापि रसस्य बन्धो भवतीति कथमवसेयम् ?, उच्यते, इह द्विधा घातिन्योऽशुभप्रकृतयः, तद्यथा– सर्वघातिन्यो देशघातिन्यश्च। तत्र याः सर्वघातिन्यस्तासां जघन्यपदेऽपि द्विस्थानक एव रसो बन्धमायाति, नैकस्थानकः, तथास्वाभाव्यात्। तथाहि– क्षपकश्रेण्यारोहेऽपि सूक्ष्मसम्परायगुणस्थानकचरमसमयेऽपि वर्त्तमानस्य केवलज्ञानावरण-केवलदर्शनावरणयोः रसबन्धो द्विस्थानक एव भवति, नैकस्थानकः, यास्तु देशघातिन्यस्तासां श्रेण्यारोहाभावे बन्धमागतानां नियमात् सर्वघातिनमेव रसं बध्नाति। यत उक्तं **कर्मप्रकृतौ**- [१]**असेढिया य बंधंति उ सव्वघाईणि।**

---

१. "सुयभोगाचक्खूओ चक्खू य ततो मई सपरिभोगा। विरियं च असेढिगया बंधंति ऊ सव्वघाईणि ॥४१॥" - इति **कर्मप्रकृतौ** उपशमनाकरणे संपूर्णा गाथा। "अश्रेणिगताः क्षपकश्रेणिमुपशमश्रेणिं वाऽप्राप्ताः पूर्वोक्तान्यपि

[गा० ४१] सर्वघाती च रसो जघन्यपदेऽपि द्विस्थानकः, **दुट्ठाणियाणि मीसाणि, सेसाणि उ देसघाईणि** [पं॰ सं॰ गा० ३।२८] इति वचनात्। ततो न श्रेण्यारोहाभावे तासामेकस्थानकरसबन्धसम्भवः, श्रेण्यारोहे त्वनिवृत्तिबादरसम्परायगुणस्थानकाद्भागाः सङ्ख्येयेषु भागेषु गतेषु सत्सु तत ऊर्द्ध्वमेकस्थानकरसबन्धसम्भवः, तदानीं च ज्ञानावरणचतुष्टय-दर्शनावरणत्रितय-पुरुषवेदा-ऽन्तरायपञ्चक-सञ्ज्वलनचतुष्टयरूपाः सप्तदश प्रकृतीर्व्यतिरिच्य शेषा बन्धमेव नाऽऽयान्ति, तद्बन्धहेतुव्यवच्छेदात्, ततो न तासामेकस्थानकरसबन्धसम्भवः, सप्तदशानां तु प्रकृतीनां तदा बन्धसम्भवादेकस्थानको रसबन्धः प्राप्यते। उक्तं च–

आवरणमसव्वग्घं पुं-संजलणंतरायपयडीओ।
चउठाणपरिणयाओ दु-ति-चउठाणाउ सेसाओ॥१॥ [पं॰ सं॰ गा० ३।३०]

अत्र **चउठाणपरिणयाउ** त्ति एकस्थानकपरिणता द्विस्थानकपरिणताः त्रिस्थानकपरिणताश्चतुःस्थानकपरिणताश्चेत्यर्थः, शेषं सुगमम्। ततः सप्तदशप्रकृतीनामेकस्थानकरसबन्धसम्भवात् तदपेक्षयाऽशुभप्रकृतीनामेकस्थानकरसबन्धादारभ्य योजना कृता।

सर्वघातीनि च रसस्पर्द्धकानि सकलमपि स्वघात्यं ज्ञानादिगुणमुपघ्नन्ति, तानि च स्वरूपेण ताम्रभाजनवद् निश्छिद्राणि घृतमिवातिशयेन स्निग्धानि द्राक्षेव तनुप्रदेशोपचितानि स्फटिका-ऽभ्रकहारवच्चातीव निर्मलानि। उक्तं च–

जो घाएइ सविसयं सयलं सो होइ सव्वघाइरसो।
सो निच्छिड्डो निद्धो तणुओ फलिह-ऽब्भहरविमलो॥१॥ [पं॰ सं॰ गा० ३।३९]

यानि च देशघातीनि रसस्पर्द्धकानि तानि स्वघात्यं ज्ञानादिगुणं देशतो घ्नन्ति, तदुदयेऽवश्यं क्षयोपशमसम्भवात्, तानि च स्वरूपेणानेकविधविवरसङ्कुलानि, तथाहि– कानिचित् कट इवातिस्थूरच्छिद्रशतसङ्कुलानि, कानिचित् कम्बल इव मध्यमविवरशतसङ्कुलानि, कानिचित् पुनरतिसूक्ष्मविवरशतसङ्कुलानि, यथा वासांसि; तथा तानि देशघातीनि रसस्पर्द्धकानि स्तोकस्नेहानि भवन्ति वैमल्यरहितानि च। उक्तं

दानान्तरायादीनि कर्माणि सर्वघातीनि बध्नन्ति, तेषामनुभागं सर्वघातिनं बध्नन्तीत्यर्थः ॥" - इति उपशमनाकरणे मलयगिरीया वृत्तिः॥ १. यद्यपि मुद्रिते पञ्चसंग्रहे **देसघाईणि सेसाणि** इति पाठ उपलभ्यते तथापि मलयगिरिसूरीणां **'सेसाणि उ देसघाईणि'** इति पाठ एव अभिप्रेतः, तथाहि- "**शेषाणि** तु एकस्थानकरसानि स्पर्धकानि सर्वाण्यपि **देशघातीन्येव**" इति मलयगिरिविरचितायां पञ्चसङ्ग्रहवृत्तौ॥

च–

देसविघाइत्तणओ, इयरो कड-कंबलंसुसंकासो।
विविहबहुछिड्डभरिओ, अप्पसिणेहो अविमलो य॥१॥ [*पञ्चसं० गा० ३।४०]

अघातिनीनां तु रसस्पर्द्धकानि स्वरूपेण न सर्वघातीनि नापि देशघातीनि, केवलं सर्वघातिरसस्पर्द्धकसङ्घर्षतः सर्वघातिरससदृशानि भवन्ति, यथा स्वयमचौरा अपि चौरसम्पर्कतः चौरप्रतिभागाः[१]। उक्तं च-

जाण न विसओ घाइत्तणम्मि ताणं पि सव्वघाइरसो।
जायइ घाइसगासेण, चोरया वेहऽचोराणं॥१॥ [*पञ्चसं० गा० ३।४१]

तदेवमुक्तानि सर्वघातीनि देशघातीनि च रसस्पर्द्धकानि।

सम्प्रति यथा क्षयोपशमो भवति तथा भाव्यते-तत्र देशघातिनीनां मतिज्ञानावरणीयादिकर्मप्रकृतीनां सर्वघातीनि[२] रसस्पर्द्धकानि अध्यवसायविशेषतो देशघातीनि कर्तुं शक्यन्ते, तथास्वाभाव्यात्। कथमेतदवसेयम् ? इति चेत्, उच्यते, इह यदि बन्धत एव देशघातीनि रसस्पर्द्धकानि भवेयुः नाध्यवसायविशेषतः तथापरिणमनेनापि तर्हि मतिज्ञानादीनामभाव एव सर्वथा प्राप्नोति, तथाहि– मत्यादीनि ज्ञानानि क्षायोपशमिकानि। यत उक्तम्**अनुयोगद्वारेषु– खओवसमिया**[३] **आभिणिबोहियनाणलद्धी, खओवसमिया सुयनाणलद्धी, खओवसमिया ओहिनाणलद्धी** [**अनु० सू० २४७**] इत्यादि। क्षयोपशमश्च विपाकोदयवतीनां प्रकृतीनां देशघातिनामेव रसस्पर्द्धकानामुदये भवति, न सर्वघातिनाम्, देशघातीनि च रसस्पर्द्धकानि बन्धमधिकृत्यानिवृत्तिबादरसम्परायाद्धायाः सङ्ख्येयेषु भागेषु गतेषु सत्सु तत ऊर्द्ध्वं प्राप्यन्ते, ततस्तस्या अवस्थाया अर्वाक् सर्वथा मतिज्ञानादीनि न प्राप्नुवन्ति, सर्वघातिरसस्पर्द्धकविपाकोदयभावतः तेषां क्षयोपशमासम्भवात्। अथ च मतिज्ञानादिबलप्रभावतः तस्या अवस्थायाः सम्प्राप्तिस्तत इतरेतराश्रयदोषवैवस्वत[१]-

---

१. °प्रतिभासाः संसं० मु०॥ २. **सर्वघातीनि [रसस्पर्धकानि-** खंसं०] **कर्तुं शक्यन्ते** खंमू०। **सर्वघातीनि [रसस्पर्धकानि अध्यवसायविशेषतो देशघातीनि** - जेसं१] **कर्तुं शक्यन्ते** जेमू१। **सर्वघातीनि रसस्पर्धकानि देशघातीनि कर्तुं शक्यन्ते** दे०॥ ३. क्षायोपशमिकी आभिनिबोधिकज्ञानलब्धिः, क्षायोपशमिकी श्रुतज्ञानलब्धिः, क्षायोपशमिकी अवधिज्ञानलब्धिः॥

मुखोपनिपातित्वान्न कदाचिदपि मतिज्ञानादिसम्भवः, अपि च मति-श्रुताज्ञाना-ऽचक्षुर्दर्शनान्यपि क्षायोपशमिकानि, क्षयोपशमश्च यदि विपाकोदये भवति तर्हि देशघातिरसस्पर्द्धकानामेव न सर्वघातिरसस्पर्द्धकानाम्, देशघातीनि च रसस्पर्द्धकानि अनिवृत्तिबादरसम्परायाद्धायाम्, ततस्तेषामपि ततोऽर्वागभावः प्राप्नोति। अथ च सर्वजीवानामपि तामवस्थामप्राप्तानाममूनि विद्यन्ते ततोऽवश्यमेतदुररीकर्त्तव्यम्– भवन्ति देशघातिनीनां प्रकृतीनां सर्वघातीन्यपि रसस्पर्द्धकान्यध्यवसायविशेषतो देशघातीनीति। अथ यथा देशघातिनीनां सर्वघातीनि रसस्पर्द्धकानि अध्यवसायविशेषतो देशघातीनि भवन्ति तथा सर्वघातिनोः केवलज्ञानावरण-केवलदर्शनावरणयोरपि कस्मान्नोपजायन्ते ?, उच्यते, तथास्वाभाव्यात्। तथाहि-तथारूपा एव ते पुद्गलाः केवलज्ञानावरण-केवलदर्शनावरणयोर्योग्या ये द्विस्थानकरसपरिणता अपि न देशघातिनो भवन्ति, नापि तेषां विपाकोदयनिरोधसम्भवः। शेषाणां तु सर्वघातिप्रकृतीनां रसस्पर्द्धकानि भवन्त्येवाध्यवसायविशेषतो विपाकोदयविष्कम्भभाञ्जि, तथास्वाभाव्यात्। एतच्चावसीयते तथाकार्यदर्शनात्, तथाहि– सम्यक्त्व-सम्यग्मिथ्यात्व-देशविरति-सामायिक-च्छेदोपस्थापन-परिहारविशुद्धिक-सूक्ष्मसम्परायसंयमाः क्षायोपशमिका उपवर्ण्यन्ते। यत उक्तम्– [२]**खओवसमिया सम्मद्दंसणलद्धी, खओवसमिया सम्मामिच्छद्दंसणलद्धी, खओवसमिया सामाइयलद्धी, खओवसमिया छेओवट्ठावणलद्धी, एवं परिहारविसुद्धियलद्धी सुहुमसंपराइयलद्धी, खओवसमिया चरित्ताचरित्तलद्धी** [अनुयो० सू० २४७] इति। अन्यत्राप्युक्तम्–

मिच्छत्तं जमुइन्नं तं खीणं, अणुइयं च उवसंतं।
मीसीभावपरिणयं वेइज्जंतं खओवसमं॥१॥ [**विशेषा०** गा० ५३२]

तथा-

क्षपयत्युपशमयति वाऽप्रत्याख्यानावृतः कषायांस्तान्।
स ततो येन भवेत् तस्य विरमणे बुद्धिरल्पाऽल्पा॥१॥

---

१. °**वैवश्चत**° सर्वासु प्रतिषु ॥ २. क्षायोपशमिकी सम्यग्दर्शनलब्धिः, क्षायोपशमिकी सम्यग्मिथ्यादर्शनलब्धिः, क्षायोपशमिकी सामायिकलब्धिः, क्षायोपशमिकी छेदोपस्थापनलब्धिः, एवं परिहारविशुद्धिकलब्धिः सूक्ष्मसम्परायलब्धिः, क्षायोपशमिकी चरित्राचरित्रलब्धिः॥

छेदोपस्थाप्यं वा वृत्तं सामायिकं चरित्रं वा।
स ततो लभते प्रत्याख्यानावरणक्षयोपशमात्॥२॥ [ ]

क्षयोपशमश्च भवति विपाकोदयनिरोधे, ततोऽवसीयते- भवन्ति मिथ्यात्वा-ऽप्रत्याख्यान-प्रत्याख्यानावरणादीनां सर्वघातिप्रकृतीनां सर्वघातीनि रसस्पर्द्धकान्यध्यवसायविशेषतो विपाकोदयाभावयुक्तानीति कृतं प्रसङ्गेन।

तत्रावधिज्ञानावरणप्रकृतीनां तथाविधविशुद्धाध्यवसायभावतः सर्वघातिषु रसस्पर्द्धकेषु देशघातिरूपतया परिणमितेषु देशघातिरसस्पर्द्धकेष्वपि चातिस्निग्धेष्वल्परसीकृतेषु उदयावलिकाप्राप्तस्यांशस्य क्षयेऽनुदीर्णस्य चोपशमे विपाकोदयविष्कम्भरूपे जीवस्यावध्यादयो गुणाः प्रादुष्षन्ति। उक्तं च–

[1]निहिएसु सव्वघाईरसेसु फड्डेसु देसघाईणं।
जीवस्स गुणा जायन्ति ओहि-मण-चक्खुमाईया॥१॥ [पञ्चसं० गा० ३।२९]

अत्र 'निहितेषु' इति देशघातिरसस्पर्द्धकतया व्यवस्थापितेषु, शेषं सुगमम्।

सर्वघातीनि च रसस्पर्द्धकानि अवधिज्ञानावरणीयस्य देशघातिरसस्पर्द्धकतया परिणमयति, कदाचिद् विशिष्टगुणप्रतिपत्तिमन्तरेण कदाचित् पुनर्विशिष्टगुणप्रतिपत्त्या। विशिष्टगुणप्रतिपत्तिमन्तरेण कथम् ? इति चेद्, उच्यते, इह यथा दिवसकरमण्डलस्य घनपटलाच्छादितस्य कथञ्चिद् विस्रसापरिणामेन घनपटलपुद्गलानां निःस्नेहीभूय परिक्षयतः समुपजातेन रन्ध्रेण तिमिरनिकरोपसंहारहेतवो भानवः स्वावपातदेशास्पदं द्रव्यमुद्द्योतयन्ति तथा प्रकृतिभासुरस्याऽऽत्मनो मिथ्यात्वादिहेतूपचयोपजनितावधिज्ञानावरणपटलतिरस्कृतस्वरूपस्य संसारे परिभ्रमतः कथञ्चिदेवमेव तथाविधशुभाध्यवसायप्रवृत्तितोऽवधिज्ञानावरणसम्बन्धिनां सर्वघातिरसस्पर्द्धकानां देशघातिरसस्पर्द्धकतया जातानामुदयावलिकाप्राप्तस्यांशस्य परिक्षयतोऽनुदयावलिकाप्राप्तस्योपशमतः समुद्भूतेन क्षयोपशमरूपेण रन्ध्रेण विनिर्गतोऽवधिज्ञानालोकः प्रसाधयति स्वकार्यम्। कदाचित् पुनर्विशिष्टगुणप्रतिपत्तितः सर्वघातीनि रसस्पर्द्धकानि देशघातीनि भवन्ति। तथा चाऽऽह–

[सू० १४(२)] अहवा गुणपडिवण्णस्स अणगारस्स ओहिणाणं समुप्पज्जति।

[सू० १५] तं समासओ छव्विहं पण्णत्तं, तंजहा-आणुगामियं १

१. निहएसु खंमू० जे१। पञ्चसंग्रहेऽपि।

अणाणुगामियं २ वड्ढमाणयं ३ हायमाणयं ४ पडिवाति ५ अपडिवाति ६।

अहवेत्यादि। 'अथवा' इति प्रकारान्तरोपदर्शने, प्रकारान्तरता च गुणप्रतिपत्तिमन्तरेणेत्यपेक्ष्य द्रष्टव्या। गुणाः-मूलोत्तररूपाः तान् प्रतिपन्नो गुणप्रतिपन्नः, अथवा गुणैः प्रतिपन्नः– पात्रमिति कृत्वा गुणैराश्रितो गुणप्रतिपन्नः, अनेन पात्रतायां सत्यां स्वयमेव गुणा भवन्तीति प्रतिपादयति। उक्तं च–

नोदन्वानर्थितामेति, न चाम्भोभिर्न पूर्यते।
आत्मा तु पात्रतां नेयः, पात्रमायान्ति सम्पदः॥१॥ [ ]

अगारं– गृहम्, न विद्यते अगारं यस्यासावनगारः, परित्यक्तद्रव्य-भावगृह इत्यर्थः, तस्य। प्रशस्तेष्वध्यवसायेषु वर्त्तमानस्य सर्वघातिरसस्पर्द्धकेषु देशघातिरसस्पर्द्धकतया जातेषु पूर्वोक्तक्रमेण क्षयोपशमभावतोऽवधिज्ञानमुपजायते। मनःपर्यायज्ञानावरणीयस्य तु विशिष्टसंयमा-ऽप्रमादादिप्रतिपत्तावेव सर्वघातीनि रसस्पर्द्धकानि देशघातीनि भवन्ति, तथास्वाभाव्यात्, तच्च तथास्वाभाव्यं बन्धकाले तथारूपाणामेव तेषां बन्धनात्, ततो मनःपर्यवज्ञानं विशिष्टगुणप्रतिपन्नस्यैव वेदितव्यम्। मति-श्रुतावरणा-ऽचक्षुर्दर्शनावरणा-ऽन्तरायप्रकृतीनां पुनः सर्वघातीनि रसस्पर्द्धकानि येन तेन वाऽध्यवसायेनाध्यवसायानुरूपं देशघातीनि स्पर्द्धकानि भवन्ति, तेषां तथास्वाभाव्यात्, ततो [१]मत्यावरणादीनां सदैव देशघातिनामेव रसस्पर्द्धकानामुदयः, सदैव च क्षयोपशमः। उक्तं च **पञ्चसङ्ग्रहमूलटीका**याम्– [१]**मति-श्रुतावरणा-ऽचक्षुर्दर्शनावरणा-ऽन्तरायप्रकृतीनां च सदैव देशघातिरसस्पर्द्धकानामेवोदयः, ततस्तासां सदैवौदयिक-क्षायोपशमिकौ भावौ [पञ्च० टी० गा० ३।२९]** इति कृतं प्रसङ्गेन॥छ॥

तं समासओ इत्यादि। **तद्** अवधिज्ञानं **समासतः** सङ्क्षेपेण **षड्विधं** षट्प्रकारं प्रज्ञप्तम्। तद्यथा– **आनुगामिकम्** इत्यादि। तत्र गच्छन्तं पुरुषम् आ समन्तादनुगच्छतीत्येवंशीलमानुगामि, आनुगामि एव आनुगामिकम्, स्वार्थे कप्रत्ययः।

---

१. **मतिज्ञानाव**° खं० पा० विना॥ 'मतिश्रुतज्ञानाचक्षुर्दर्शनावरणान्तरायप्रकृतीनां सदैवोदयं प्रति देशघातिरसस्पर्धकानामेवोदयः, ततो भावद्वयं भावितमेव' इति **पञ्चसंग्रहस्य** स्वोपज्ञवृत्तौ पाठः। ''मतिश्रुतावरणाचक्षुर्दर्शनावरणान्तरायप्रकृतीनां तु सदैव देशघातिनामेव रसस्पर्धकानामुदयः, न सर्वघातिनाम्, तेन सर्वदापि तासामौदयिक-क्षायोपशमिकौ भावौ संमिश्रौ प्राप्येते, न केवल औदयिकः'' इति **पञ्चसंग्रहस्य** मलयगिरीयवृत्तौ पाठः।

अथवा अनुगमः-प्रयोजनं यस्य तदानुगामिकम्, यद् लोचनवद् गच्छन्तमनुगच्छति तदवधिज्ञानमानुगामिकमिति भावः। तथा न आनुगामिकम् अनानुगामिकम्, शृङ्खलाप्रतिबद्धप्रदीप इव यद् न गच्छन्तमनुगच्छति तदवधिज्ञानमनानुगामिकम्। उक्तं च–

अणुगामिओऽणुगच्छइ गच्छंतं लोयणं जहा पुरिसं।
इयरो उ नाणुगच्छइ ठियप्पईवो व्व गच्छंतं॥१॥ [विशेषा० गा० ७१४]

तथा वर्द्धत इति वर्द्धमानम्, ततः संज्ञायां कन् प्रत्ययः, बहु-बहुतरेन्धनप्रक्षेपादभिवर्द्धमानदहनज्वालाकलाप इव पूर्वावस्थातो यथायोगं प्रशस्त-प्रशस्ततराध्यवसायभावतोऽभिवर्द्धमानमवधिज्ञानं वर्द्धमानकम्, तच्चासकृद्विशिष्टगुणविशुद्धिसापेक्षत्वात्। तथा हीयते तथाविधसामग्र्यभावतो हानिमुपगच्छति हीयमानम्, कर्मकर्तृविवक्षायामानश् प्रत्ययः, हीयमानमेव हीयमानकम्, [१]कुत्सिताल्पाज्ञाते [*मलय०] इति [२]कप्प्रत्ययः, पूर्वावस्थातो यदधोऽधो ह्रासमुपगच्छत्यवधिज्ञानं तद् हीयमानकमिति भावः। उक्तं च– [३]हीयमाणं पुव्वावत्थाओ अहोऽहो ह्रस्समाणं [नन्दीचू० सू०२४] इति। तथा प्रतिपतनशीलं प्रतिपाति, यद् उत्पन्नं सत् क्षयोपशमानुरूपं कियत्कालं स्थित्वा प्रदीप इव सामस्त्येन विध्वंसमुपयाति तत् प्रतिपातीत्यर्थः।

हीयमानक-प्रतिपातिनोः कः प्रतिविशेषः ? इति चेद्, उच्यते, हीयमानकं पूर्वावस्थातोऽधोऽधो ह्रासमुपगच्छदभिधीयते, यत् पुनः प्रदीप इव निर्मूलमेककालमपगच्छति तत् प्रतिपाति। तथा न प्रतिपाति– यत् न केवलज्ञानादर्वाग् भ्रंशमुपयाति तदप्रतिपातीत्यर्थः। आह– आनुगामिका-ऽनानुगामिकरूपभेदद्वये एव शेषभेदा वर्द्धमानकादयोऽन्तर्भावयितुं शक्यन्ते तत् किमर्थं तेषामुपादानम् ?, उच्यते, यद्यप्यन्तर्भावयितुं शक्यन्ते तथाप्यानुगामिकमनानुगामिकं चेत्युक्ते न वर्द्धमानकादयो विशेषा अवगन्तुं शक्यन्ते, विशेषावगमकारणाय च महतां शास्त्रारम्भप्रयासः, ततो विशेषज्ञापनार्थं विशेषभेदोपन्यास[४]करणम्॥

---

१. **कुत्सिताल्पाज्ञाते** - सिद्धहेम० ७।३।३३। शाकटा० ३।४।८६॥ २. **कन्प्र°** दे० विना॥ ३. हीयमानं पूर्वावस्थातोऽधोऽधो ह्रसत्॥ ४. °**न्यासः कृतः** जे१,२, दे० मांमू०॥

[सू०१६] से किं तं आणुगामियं ओहिणाणं ?, आणुगामियं ओहिणाणं दुविहं पण्णत्तं, तंजहा- अंतगयं च मज्झगयं च।

[सू०१७] से किं तं अंतगयं ?, अंतगयं तिविहं पण्णत्तं, तंजहा- पुरओ अंतगयं १ मग्गओ अंतगयं २ पासतो अंतगयं ३।

[सू०१८] से किं तं पुरतो अंतगयं ?, पुरतो अंतगयं– से जहानामए केइ पुरिसे उक्कं वा चडुलियं वा अलायं वा मणिं वा जोतिं वा पदीवं वा पुरओ काउं पणोल्लेमाणे पणोल्लेमाणे गच्छेज्जा, सेत्तं पुरओ अंतगयं १।

[सू०१९] से किं तं मग्गओ अंतगयं ?, मग्गओ अंतगयं-से जहाणामए केइ पुरिसे उक्कं वा चडुलियं वा अलायं वा मणिं वा जोइं वा पईवं वा मग्गओ काउं अणुकड्ढेमाणे अणुकड्ढेमाणे गच्छेज्जा सेत्तं मग्गओ अंतगयं २।

[सू०२०] से किं तं पासओ अंतगयं ?, पासओ अंतगयं-से जहाणामए केइ पुरिसे उक्कं वा चडुलिअं वा अलायं वा मणिं वा जोइं वा पईवं वा पासओ काउं परिकड्ढेमाणे परिकड्ढेमाणे गच्छेज्जा। सेत्तं पासओ अंतगयं ३। सेत्तं अंतगयं।

[सू०२१] से किं तं मज्झगयं ?, मज्झगयं से जहानामए केइ पुरिसे उक्कं वा चडुलियं वा अलायं वा मणिं वा जोइं वा पईवं वा मत्थए काउं गच्छेज्जा सेत्तं मज्झगयं।

से किं तमित्यादि। अथ किं तद् आनुगामिकमवधिज्ञानम् ?। आनुगामिकमवधिज्ञानं द्विविधं प्रज्ञप्तम्, तद्यथा– अन्तगतं च मध्यगतं च। इहान्तशब्दः पर्यन्तवाची, यथा वनान्ते इत्यत्र, ततश्च अन्ते-पर्यन्ते गतं-व्यवस्थितमन्तगतम्। इहार्थत्रयव्याख्या–

'अन्ते गतम्' आत्मप्रदेशानां पर्यन्ते स्थितमन्तगतम्। इयमत्र भावना- इहावधिरुत्पद्यमानः कोऽपि स्पर्द्धकरूपतयोत्पद्यते, स्पर्द्धकं च नाम अवधिज्ञानप्रभाया गवाक्षजालादिद्वारविनिर्गतप्रदीपप्रभाया इव प्रतिनियतो विच्छेदविशेषः। तथा चाऽऽह **जिनभद्रगणिक्षमाश्रमणः स्वोपज्ञभाष्यटीकायाम्– स्पर्द्धकमवधिविच्छेदविशेषः** [गा० ७३४ पृ० १४२] इति। तानि चैकजीवस्य सङ्ख्येयान्यसङ्ख्येयानि वा भवति। यत

उक्तं **मूलावश्यकप्रथमपीठिकायाम्– फड्डा य असंखेज्जा, संखेज्जेया वि एगजीवस्स।** [आव० पी० ६०, विशे*षा० ७३८] इति, तानि च विचित्ररूपाणि, तथाहि– कानिचित् पर्यन्तवर्त्तिष्वात्मप्रदेशेषूत्पद्यन्ते, तत्रापि कानिचित् पुरतः कानिचित् पृष्ठतः कानिचिदधोभागे कानिचिदुपरितनभागे तथा कानिचिन्मध्यवर्त्तिष्वात्मप्रदेशेषु, [तत्र[1] यदन्तवर्त्तिष्वात्मप्रदेशेषु] अवधिज्ञानमुपजायते तद् आत्मनोऽन्ते-पर्यन्ते स्थितमिति कृत्वा अन्तगतमित्युच्यते, तैरेव पर्यन्तवर्त्तिभिरात्मप्रदेशैः साक्षादवधिरूपेण ज्ञानेन ज्ञानाद् न शेषैरिति१।

अथवा औदारिकशरीरस्यान्ते गतं-स्थितम् अन्तगतम्, कयाचिदेकदिशोपलम्भात्, इदमपि स्पर्द्धकरूपमवधिज्ञानम्। अथवा सर्वेषामप्यात्मप्रदेशानां क्षयोपशमभावेऽपि औदारिकशरीरान्तेनैकया दिशा यद्वशादुपलभते तदप्यन्तगतम्। आह– यदि सर्वात्मप्रदेशानां क्षयोपशमस्ततः सर्वतः किं न पश्यति ?, उच्यते, एकदिशैव क्षयोपशमसम्भवात्, विचित्रो हि क्षयोपशमः, ततः सर्वेषामप्यात्मप्रदेशानामित्थम्भूत एव स्वसामग्रीवशात् क्षयोपशमः संवृत्तो यदौदारिकशरीरमपेक्ष्य कयाचिद् विवक्षितयैकया दिशा पश्यतीति। उक्तं च **चूर्णौ– [2]ओरालियसरीरंते ठियं गयं ति एगट्ठं, तं चाऽऽयप्पएसफड्डगावहिएगदिसोवलम्भाओ य अंतगयमोहिनाणं भन्नइ, अहवा सव्वायप्पएसविसुद्धेसु वि ओरालियसरीरगन्तेण एगदिसिपासणागयं ति अन्तगयं भन्नइ [सू० १५ पृ० १६] २।**

तृतीयोऽर्थः– एकदिग्भाविना तेन अवधिज्ञानेन यदुद्द्योतितं क्षेत्रं तस्यान्ते वर्त्तते तदवधिज्ञानम्, अवधिज्ञानवतः तदन्ते वर्त्तमानत्वात्, ततोऽन्ते-एकदिग्रूपस्यावधिज्ञानविषयस्य पर्यन्ते व्यवस्थितमन्तगतम् ३। **च**शब्दो देश-कालाद्यपेक्षया स्वगतानेकभेदसूचकः।

तथा **मध्यगतं च** इति, इह मध्यं-प्रसिद्धं दण्डादिमध्यवत्, ततो मध्ये गतं मध्यगतम्। इदमपि त्रिधा व्याख्येयम्–

---

१. [ ] एतदन्तर्गतः पाठो जेसं१ मध्ये एव विद्यते॥ २. औदारिकशरीरान्ते स्थितं गतम् इति एकार्थौ, तच्चाऽऽत्मप्रदेशस्पर्धकावध्येकदिशोपलम्भाच्च अन्तगतमवधिज्ञानं भण्यते, अथवा सर्वात्मप्रदेशविशुद्धेष्वपि औदारिकशरीरकान्तेन एकदिग्दर्शनगतमिति अन्तगतं भण्यते॥

आत्मप्रदेशानां मध्ये-मध्यवर्त्तिष्वात्मप्रदेशेषु गतं-स्थितं मध्यगतम्, इदं च स्पर्द्धकरूपमवधिज्ञानं सर्वदिगुपलम्भकारणं मध्यवर्त्तिनामात्मप्रदेशानामवसेयम् १। अथवा सर्वेषामप्यात्मप्रदेशानां क्षयोपशमभावेऽप्यौदारिकशरीरमध्यभागेनोपलब्धेः तद् मध्ये गतं मध्यगतम्। उक्तं च **चूर्णौ**– [१]**ओरालियसरीरमज्झे फड्डगविसुद्धीओ सव्वायप्पएस-विसुद्धीओ वा सव्वदिसोवलम्भत्तणओ मज्झगतो त्ति भन्नइ** [**सू० १५ पृ० १६**] इति २।

अथवा तेनावधिज्ञानेन यदुद्द्योतितं क्षेत्रं सर्वासु दिक्षु तस्य मध्ये-मध्यभागे गतं-स्थितं मध्यगतम्, अवधिज्ञानिनः तदुद्द्योतितक्षेत्रमध्यवर्त्तित्वात्। आह च **चूर्णिकृत्**– [२]**अहवा उवलद्धिखेत्तस्स अवहिपुरिसो मज्झगतो त्ति अतो वा मज्झगओ ओही भन्नइ** [**सू० १५ पृ० १६**] इति ३। **च**शब्दः स्वगतानेकभेदसूचकः।

से किं तमित्यादि। अथ किं तदन्तगतम् ?, अन्तगतं **त्रिविधं** त्रिप्रकारं प्रज्ञप्तम्। तद्यथा– **पुरतो अंतगत**मित्यादि। तत्र **पुरतः** अवधिज्ञानिनः स्वव्यपेक्षया अग्रभागेऽन्तगतं पुरतोऽन्तगतम्। तथा **मार्गतः** पृष्ठतः अन्तगतं मार्गतोऽन्तगतम्। तथा पार्श्वतः द्वयोः पार्श्वयोरेकतरपार्श्वतो वाऽन्तगतं पार्श्वतोऽन्तगतम्। अथ किं तत् पुरतोऽन्तगतम् ?, **'से जहा'** इत्यादि, 'सः' विवक्षितो यथानामकः कश्चित् पुरुषः, अत्र सर्वेष्वपि पदेष्वेकारान्तत्वम् [३]**एत्त्वमतः सौ पुंसि*** [ ] इति मागधिकभाषालक्षणात्, सर्वमपि हि प्रवचनमर्द्धमागधिकभाषात्मकम्, अर्द्धमागधिकभाषया तीर्थकृतां देशनाप्रवृत्तेः, ततः प्रायः सर्वत्रापि मागधिकभाषालक्षणमनुसरणीयम्। **उक्कं वा** इति **उल्का** दीपिका, **वा**शब्दः सर्वोऽपि विकल्पार्थः, [४]**चडुलीं वा**, [५]**चडुली** पर्यन्तज्वलिततृणपूलिका, **अलातं वा, अलातम्** उल्मुकम्, अग्रभागे ज्वलत् काष्ठमित्यर्थः, **मणिं वा, मणिः** प्रतीतः, **ज्योतिर्वा, ज्योतिः** शरावाद्याधारो ज्वलन्नग्निः, आह च **चूर्णिकृत्**– [६]**जोइ त्ति मल्लगाइट्ठिओ अगणी जलंतो** [**नन्दीचू० सू० १६ पृ० १६**] इति, **प्रदीपं वा, प्रदीपः** प्रतीतः, **पुरतः** अग्रतो हस्ते दण्डादौ वा कृत्वा **पणोल्लेमाणे पणोल्लेमाणे** त्ति प्रणुदन्

---

१. औदारिकशरीरमध्ये स्पर्धकविशुद्धितः सर्वात्मप्रदेशविशुद्धितो वा सर्वदिशोपलम्भत्वाद् मध्यगत इति भण्यते॥
२. अथवा उपलब्धिक्षेत्रस्य अवधिपुरुषो मध्यगत इति अतो वा मध्यगतमवधिर्भण्यते॥ ३. "अत एत् सौ पुंसि" - **हैम० पा०** ४।२८७ ॥ ४. **चटुलीं** जे१,२, मां० दे०॥ ५. **चटुली** जे१,२, मां० दे०॥ ६. ज्योतिरिति मल्लकादिस्थितोऽग्निः ज्वलन्॥

प्रणुदन् हस्तस्थितं दण्डाग्राद्यवस्थितं[१] वा क्रमेण स्वगत्यनुसारतः प्रेरयन् प्रेरयन् **गच्छेत्** यायात्। एष दृष्टान्तः, उपनयस्तु स्वयमेव भावनीयः। तत उपसंहरति– **सेत्तं पुरओ अंतगयं,** से शब्दः प्रतिवचनोपसंहारदर्शने, तदेतत् पुरतोऽन्तगतम्। इयमत्र भावना– यथा स पुरुष उल्कादिभिः पुरत एव पश्यति, नान्यत्र, एवं येनावधिज्ञानेन तथाविधक्षयोपशमभावतः पुरत एव पश्यति, नान्यत्र, तदवधिज्ञानं पुरतोऽन्तगत- मभिधीयते। एवं मार्गतोऽन्तगत-पार्श्वतोऽन्तगतसूत्रं भावनीयम्, नवरं **अणुकड्ढेमाणे अणुकड्ढेमाणे** त्ति हस्तगतं दण्डाग्रादिस्थितं वा **अनु**-पश्चात् **कर्षन्** अनुकर्षन्, पृष्ठतः पश्चात् कृत्वा समाकर्षन् समाकर्षन्नित्यर्थः। तथा **पासओ परिकड्ढेमाणे परिकड्ढेमाणे** त्ति पार्श्वतो दक्षिणपार्श्वतोऽथवा वामपार्श्वतो यद्वा द्वयोरपि पार्श्वयोरुल्कादिकं हस्तस्थितं दण्डाग्रादिस्थितं वा **परिकर्षन् परिकर्षन्** पार्श्वभागे कृत्वा समाकर्षन् समाकर्षन्नित्यर्थः।

से किं तं मज्झगतमित्यादि। निगदसिद्धम्, नवरं **मस्तके** शिरसि कृत्वा गच्छेत् तदेतद् मध्यगतम्। इयमत्र भावना-यथा तेन मस्तकस्थेन सर्वासु दिक्षु पश्यति एवं येनावधिज्ञानेन सर्वासु दिक्षु पश्यति तद् मध्यगतमिति॥ इत्थम्भूतां च व्याख्यां सम्यगनवबुध्यमानः शिष्यः प्रश्नं करोति-

[सू० २२] अंतगयस्स मज्झगयस्स य को पइविसेसो ?, पुरओ अंतगएणं ओहिनाणेणं पुरओ चेव संखेज्जाणि वा असंखेज्जाणि वा जोयणाणि जाणइ पासइ, मग्गओ अंतगएणं ओहिनाणेणं मग्गओ चेव संखेज्जाणि वा असंखेज्जाणि वा जोयणाणि जाणइ पासइ, पासओ अंतगएणं ओहिणाणेणं पासओ चेव संखेज्जाणि वा असंखेज्जाणि वा जोयणाइं जाणइ पासइ, मज्झगएणं ओहिणाणेणं सव्वओ समंता संखेज्जाणि वा असंखेज्जाणि वा जोयणाइं जाणइ पासइ, सेत्तं आणुगामियं ओहिनाणं १।

अंतगयस्स मज्झगयस्स य इत्यादि। अन्तगतस्य मध्यगतस्य च परस्परं कः

---

१. °ग्रावस्थितं खं० पा० दे० ॥

प्रतिविशेषः प्रतिनियतो विशेषः ?। सूरिराह- **पुरतो** इत्यादि। पुरतोऽन्तगतेनावधिज्ञानेन 'पुरत एव' अग्रत एव 'सङ्ख्येयानि' एकादीनि शीर्षप्रहेलिकापर्यन्तानि असङ्ख्येयानि वा योजनानि, एतावत्सु योजनेष्ववगाढं द्रव्यमित्यर्थः, **जानाति पश्यति**, ज्ञानं विशेषग्रहणात्मकम्, दर्शनं सामान्यग्रहणात्मकम्। तदेवं पुरतोऽन्तगतस्य शेषावधिज्ञानेभ्यो भेदः। एवं शेषाणामपि परस्परं भावनीयः, नवरं **सव्वओ समंता** इति **सर्वतः** सर्वासु दिग्विदिक्षु **समन्तात्** सर्वैरेवाऽऽत्मप्रदेशैः सर्वैर्वा विशुद्धस्पर्द्धकैः। उक्तं च **चूर्णौ**– [१]**सव्वउ त्ति सव्वासु दिसिविदिसासु, समंता इति सव्वायप्पएसेसु सव्वेसु वा विसुद्धफड्डगेसु** [**नन्दीचू० सू० २१ पृ० १७**] इति। अत्र **सव्वायप्पएसेसु** इत्यादौ तृतीयार्थे सप्तमी, भवति च तृतीयार्थे सप्तमी। यदाह– **पाणिनिः स्वप्राकृतलक्षणे** [२]**व्यत्ययोऽप्यासाम्** [ ] इत्यत्र सूत्रे तृतीयार्थे सप्तमी यथा– [३]**तिसु तेसु अलंकिया पुहवी** इति। अथवा **स मन्ता** इत्यत्र **सः** इत्यवधिज्ञानी परामृश्यते, **मन्ता** इति ज्ञाता, शेषं तथैव। अथ किमवधिज्ञानं केषामसुमतां भवति ? इति चेद्, उच्यते, देव-नारक-तीर्थकृतामवश्यं मध्यगम्, तिरश्चामन्तगतम्, मनुष्याणां तु यथाक्षयोपशममुभयम्। तथा चोक्तं **प्रज्ञापनायाम्**–

[४]**नेरइयाणं भंते ! किं देसोही ? सव्वोही ?, गोयमा ! नो देसोही सव्वोही। एवं जाव थणियकुमाराणं। पंचेंदियतिरिक्खजोणियाणं पुच्छा, गोयमा ! देसोही न सव्वोही। मणुस्साणं पुच्छा, गोयमा ! देसोही वि सव्वोही वि। वाणमंतर-जोइसिय-वेमाणियाणं जहा नेरइयाणं।** [**प्रज्ञा० ३३।२०२२-२०२६**]

वक्ष्यति च–

नेरइय-देव तित्थंकरा य ओहिस्सऽबाहिरा होंति।
पासंति सव्वओ खलु, सेसा देसेण पासंति॥१॥ [**सुत्तं गा०५४, पृ०१६०**]

---

१. सर्वत इति सर्वासु दिग्विदिक्षु समन्तादिति सर्वात्मप्रदेशेषु सर्वेषु वा विशुद्धस्पर्धकेषु॥ २. **द्वितीया-तृतीययोः सप्तमी** - हैमप्रा० ३।१३५ ॥ ३. "विहलं जो अवलंबइ आवइपडियं च जो समुद्धरइ। सरणागयं च रक्खइ तिसु तेसु अलंकिया पुहवी ॥" इति सम्पूर्णा गाथा । विफलं योऽवलम्बते आपत्पतितं च यः समुद्धरति। शरणागतं च रक्षति त्रिभिः तैः अलङ्कृता पृथ्वी॥ ४. नैरयिकाणां भदन्त ! किं देशावधिः ? सर्वावधिः ? गौतम ! नो देशावधिः, सर्वावधिः। एवं यावत् स्तनितकुमाराणाम्। पञ्चेन्द्रियतिर्यग्योनिकानां पृच्छा, गौतम ! देशावधिः, न सर्वावधिः। मनुष्याणां पृच्छा, गौतम ! देशावधिरपि सर्वावधिरपि। वानव्यन्तर-ज्योतिष्क-वैमानिकानां यथा नैरयिकाणाम्॥

देव-नारकाणां च मध्यगतरूपमवधिज्ञानमाभववर्त्ति, भवप्रत्ययत्वात् तस्य, तीर्थकृतां त्वाकेवलज्ञानम्, केवलज्ञानोत्पत्तौ तस्य व्यवच्छेदात्। ननु 'सङ्ख्येयानि असङ्ख्येयानि वा योजनानि पश्यन्ति' इत्युक्तं तत्र के जीवाः कति योजनानि पश्यन्ति' इति, उच्यते, इह तिर्यग्मनुष्या अनियतपरिमाणावधयः। तथाहि– केचिदङ्गुला-सङ्ख्येयभागम्, केचिदङ्गुलसङ्ख्येयभागम्, केचिदङ्गुलम्, केचिद् वितस्तिम्, यावत् केचित् सङ्ख्येयानि योजनानि, केचिदसङ्ख्येयानि; मनुष्यास्तु केचित् परिपूर्णं लोकम्, केचिदलोकेऽपि लोकमात्राणि खण्डानि। ये तु देव-नारकास्ते प्रतिनियतावधिपरिमाणाः, ततस्तेषां प्रतिनियतं क्षेत्रपरिमाणमुच्यते– तत्र रत्नप्रभानारका जघन्यतोऽर्द्धचतुर्थानि गव्यूतानि क्षेत्रमवधिज्ञानतः पश्यन्ति, उत्कर्षतश्चत्वारि गव्यूतानि १, शर्करप्रभानारका जघन्यतस्त्रीणि गव्यूतानि उत्कर्षतोऽर्द्धचतुर्थानि २, वालुकप्रभानारका जघन्यतोऽर्द्धतृतीयानि गव्यूतानि उत्कर्षतस्त्रीणि ३, पङ्कप्रभानारका जघन्यतो द्वे गव्यूते, उत्कर्षतोऽर्द्धतृतीयानि ४, धूमप्रभानारका जघन्यतोऽर्द्धाधिकं गव्यूतम् उत्कर्षतो द्वे गव्यूते ५, तमःप्रभानारका जघन्येनैकं गव्यूतमुत्कर्षतः सार्द्धम् ६, तमस्तमप्रभानारका जघन्यतोऽर्द्धगव्यूतम् उत्कर्षतो गव्यूतम् ७। तथा चोक्तं **प्रज्ञापनायाम्**–

[1]रयणप्पभापुढविनेरइया णं भंते ! केवइयं खेत्तं ओहिणा जाणंति पासंति ? गोयमा ! जहन्नेणं अद्धट्ठाइं गाउयाइं उक्कोसेणं चत्तारि गाउयाइं जाणंति पासंति। सक्करप्पभापुढविनेरइया णं पुच्छा, गोयमा ! जहन्नेणं तिन्नि गाउयाइं उक्कोसेणं अद्धट्ठाइं गाउयाइं जाणंति पासंति। वालुयप्पभापुढविनेरइया णं पुच्छा, गोयमा ! जहन्नेणं अड्ढाइज्जाइं गाउयाइं उक्कोसेणं तिन्नि गाउयाइं जाणंति पासंति। पंकप्पभापुढविनेरइया णं पुच्छा, गोयमा ! जहन्नेणं दोन्नि गाउयाइं उक्कोसेणं अड्ढाइज्जाइं गाउयाइं जाणंति पासंति। धूमप्पभापुढविनेरइया णं पुच्छा, गोयमा !

१. रत्नप्रभापृथ्वीनैरयिकाः भदन्त ! कियत् क्षेत्रमवधिना जानन्ति पश्यन्ति ? गौतम ! जघन्येन अर्धचतुर्थानि गव्यूतानि, उत्कर्षेण चत्वारि गव्यूतानि जानन्ति पश्यन्ति। शर्कराप्रभापृथ्वीनैरयिकाः पृच्छा, गौतम ! जघन्येन त्रीणि गव्यूतानि, उत्कर्षेण अर्धचतुर्थानि गव्यूतानि जानन्ति पश्यन्ति। वालुकाप्रभापृथ्वीनैरयिकाः पृच्छा, गौतम ! जघन्येन अर्धतृतीयानि गव्यूतानि, उत्कर्षेण त्रीणि गव्यूतानि जानन्ति पश्यन्ति। पङ्कप्रभापृथ्वीनैरयिकाः पृच्छा, गौतम ! जघन्येन द्वे गव्यूते, उत्कर्षेण अर्धतृतीयानि गव्यूतानि जानन्ति पश्यन्ति। धूमप्रभापृथ्वीनैरयिकाः पृच्छा, गौतम ! जघन्येन द्वितीयार्द्धं गव्यूतम् उत्कर्षेण द्वे गव्यूते जानन्ति पश्यन्ति। तमःपृथ्वीनैरयिकाः पृच्छा, गौतम ! जघन्येन गव्यूतम् उत्कर्षेण द्वितीयार्धं गव्यूतं जानन्ति पश्यन्ति। अधः सप्तम्यां पृच्छा, गौतम ! जघन्येन अर्धगव्यूतम् उत्कर्षेण गव्यूतं जानन्ति पश्यन्ति॥

जहन्नेणं दिवड्ढं गाउयं उक्कोसेणं दो गाउयाइं जाणंति पासंति। तमापुढविनेरइया णं पुच्छा, गोयमा ! जहन्नेणं गाउयं उक्कोसेणं दिवड्ढं गाउयं जाणंति पासंति। अहसत्तमाए पुच्छा, गोयमा ! जहन्नेणं अद्धगाउयं उक्कोसेणं गाउयं जाणंति पासंति। [प्रज्ञा० ३३।१९८४-१९९०]

असुरकुमाराः पुनरवधिज्ञानतो जघन्यतः क्षेत्रं पञ्चविंशतियोजनानि पश्यन्ति उत्कर्षतोऽसङ्ख्येयान् द्वीप-समुद्रान्। नागकुमारादयः पुनः सर्वेऽपि स्तनितकुमारपर्यन्ता जघन्यतः पञ्चविंशतियोजनानि पश्यन्ति उत्कर्षतः सङ्ख्येयान् द्वीप-समुद्रान्। एवं व्यन्तरा अपि। तथा चोक्तम्–

[१]**असुरकुमारा णं भंते ! ओहिणा केवइयं खेत्तं जाणंति पासंति ?, गोयमा ! जहन्नेणं पणुवीसं जोयणाइं उक्कोसेणं असंखेज्जे दीव-समुद्दे ओहिणा जाणंति पासंति। नागकुमारा णं पुच्छा, गोयमा ! जहन्नेणं पणुवीसं जोयणाइं उक्कोसेणं संखेज्जे दीव-समुद्दे जाणंति पासंति। एवं जाव थणियकुमारा। वाणमंतरा जहा नागकुमारा।** [प्रज्ञा० १९९१-१९९६]

इह पञ्चविंशतियोजनानि भवनपतयो व्यन्तरा वा जघन्यतस्ते पश्यन्ति येषामायुर्दशवर्षसहस्रप्रमाणम्, न शेषाः। आह च **भाष्यकृत्**– **पणुवीस जोयणाइं दसवाससहस्सिया ठिई जेसिं।** [**विशेषा०** गा० ७०१] इति।

ज्योतिष्काः पुनर्देवा जघन्यतोऽपि सङ्ख्येयान् द्वीप-समुद्रानवधिज्ञानतः पश्यन्ति, उत्कर्षतोऽपि सङ्ख्येयान् द्वीप-समुद्रान्, केवलमधिकतरान्। यदाह– [२]**जोइसिया णं भंते ! केवइयं खेत्तं ओहिणा जाणंति पासंति ?, गोयमा ! जहन्नेणावि संखेज्जे दीव-समुद्दे उक्कोसेणावि संखेज्जे दीव-समुद्दे** [प्रज्ञा० ३३। १९९७]।

सौधर्मकल्पवासिनो देवाः पुनरवधिज्ञानतो जघन्येनाङ्गुलासङ्ख्येयभागमात्रं पश्यन्ति। उत्कर्षतोऽधस्ताद् रत्नप्रभायाः पृथिव्याः सर्वान्तिममधस्तनं भागं यावत्, तिर्यक् तु असङ्ख्येयान् द्वीप-समुद्रान्, ऊर्ध्वं तु स्वकल्पविमानस्तूप-ध्वजादिकम्, एवमीशानदेवा अपि। अत्राऽऽह– नन्वङ्गुलासङ्ख्येयभागमात्रक्षेत्रपरिमितोऽवधिः

---

१. असुरकुमारा भदन्त ! अवधिना कियत् क्षेत्रं जानन्ति पश्यन्ति ? गौतम ! जघन्येन पञ्चविंशतिं याजनानि उत्कर्षेण असंख्यातान् द्वीप-समुद्रान् अवधिना जानन्ति पश्यन्ति। नागकुमाराः पृच्छा, गौतम ! जघन्येन पञ्चविंशतिं योजनानि उत्कर्षेण संख्यातान् द्वीप-समुद्रान् जानन्ति पश्यन्ति। एवं यावत् स्तनितकुमाराः। वानव्यन्तरा यथा नागकुमाराः॥

२. ज्योतिष्का भदन्त ! कियत् क्षेत्रमवधिना जानन्ति पश्यन्ति ? गौतम ! जघन्येनापि संख्यातान् द्वीप-समुद्रान् उत्कर्षेणापि संख्यातान् द्वीप-समुद्रान्॥

सर्वजघन्यो भवति, सर्वजघन्यश्चावधिस्तिर्यग्मनुष्येष्वेव, न शेषेषु, यत आह **भाष्यकृत् स्वकृतभाष्य-टीकायाम्– उत्कृष्टो मनुष्येष्वेव, नान्येषु, मनुष्य-तिर्यग्योनिष्वेव जघन्यः, नान्येषु, शेषाणां मध्यम एव [विशेषा० स्वो० ।५२।६९०। पृ०१३७]** इति, तत् कथमिह सर्वजघन्य उक्तः ?, उच्यते सौधर्मादिदेवानां पारभविकोऽप्युपपातकालेऽवधिः सम्भवति, स च सर्वजघन्योऽपि कदाचिदवाप्यते, उपपातान्तरं तु तद्भवजः, ततो न कश्चिद् दोषः। आह च दुष्षमान्धकारनिमग्नजिनप्रवचनप्रदीपो **जिनभद्रगणिक्षमाश्रमणः**–

वेमाणियाणमंगुलभागमसंखं जहन्नओ होइ ।
उववाए परभविओ, तब्भवजो होइ तो पच्छा॥१॥ [विशेषा० गा० ७०२]

एवं सनत्कुमारादिदेवानामपि द्रष्टव्यम्, नवरमधोभागदर्शने विशेषः, ततः स प्रदर्श्यते– सनत्कुमार-माहेन्द्रदेवा अधस्तात् शर्कराप्रभायाः सर्वान्तिममधस्तनं भागं यावत् पश्यन्ति, ब्रह्मलोक-लान्तकदेवास्तृतीयपृथिव्याः, महाशुक्र-सहस्रारकल्प-देवाश्चतुर्थपृथिव्याः, आनत-प्राणता-ऽऽरणा-ऽच्युतदेवाः पञ्चमपृथिव्याः, अधस्तन-मध्यमग्रैवेयकदेवाः षष्ठपृथिव्याः, उपरितनग्रैवेयकदेवाः सप्तमपृथिव्याः, अनुत्तरोपपातिनः सम्पूर्णां लोकनालिं चतुर्दशरज्ज्वात्मिकामिति। उक्तं च **प्रज्ञापनायाम्**–

सोहम्मगदेवा णं भंते ! केवइयं खेत्तं ओहिणा जाणंति पासंति ?, गोयमा ! जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणं जाव इमीसे रयणप्पभाए पुढवीए हिट्ठिल्ले चरिमंते, तिरियं जाव असंखेज्जे दीव-समुद्दे, उड्ढं जाव सगाइं विमाणाइं ओहिणा जाणंति पासंति। एवं ईसाणगदेवा वि। सणंकुमारदेवा एवं चेव, नवरं अहे जाव दोच्चाए सक्करप्पभाए पुढवीए

---

१. सौधर्मदेवाः भदन्त ! कियत् क्षेत्रम् अवधिना जानन्ति पश्यन्ति ? गौतम ! जघन्येन अङ्गुलासंख्येयभागम् उत्कर्षेण यावद् अस्या रत्नप्रभायाः पृथ्व्या अधस्तनश्चरमान्तः, तिर्यग् यावद् असंख्येयान् द्वीप-समुद्रान्, ऊर्ध्वं यावत् स्वकानि विमानानि अवधिना जानन्ति पश्यन्ति। एवम् ईशानदेवा अपि। सनत्कुमारदेवा एवमेव, नवरम् अधो यावत् द्वितीयस्याः शर्कराप्रभायाः पृथ्व्या अधस्तनः चरमान्तः। एवं माहेन्द्रदेवा अपि। ब्रह्मलोक-लान्तकदेवाः तृतीयस्याः पृथ्व्याः अधस्तनश्चरमान्तः। महाशुक्र-सहस्रारदेवाः चतुर्थ्याः पङ्कप्रभायाः पृथ्व्याः अधस्तनश्चरमान्तः। आनत-प्राणता-ऽऽरणा-ऽच्युतदेवा अधः पञ्चम्याः धूमप्रभायाः पृथ्व्या अधस्तनश्चरमान्तः। अधस्तन-मध्यमग्रैवेयकदेवा अधः यावत् षष्ठ्याः तमायाः पृथ्व्या अधस्तनश्चरमान्तः। उपरितनग्रैवेयकदेवा भदन्त ! कियत् क्षेत्रम् अवधिना जानन्ति पश्यन्ति ? गौतम ! जघन्येन अङ्गुलस्य असंख्येयं भागम्, उत्कर्षेण अधः सप्तम्याः पृथ्व्या अधस्तनश्चरमान्तः, तिर्यग् यावद् असंख्येयद्वीपसमुद्रान्, ऊर्ध्वं यावत् स्वकानि विमानानि अवधिना जानन्ति पश्यन्ति। अनुत्तरौपपातिका देवा भदन्त ! कियत् क्षेत्रम् अवधिना जानन्ति पश्यन्ति ? गौतम ! सम्भिन्नां लोकनालीं जानन्ति पश्यन्ति॥

हिट्ठिल्ले चरिमंते। एवं माहिंददेवा वि। बंभलोग-लंतगदेवा तच्चाए पुढवीए हिट्ठिल्ले चरिमंते। महासुक्क-सहस्सारदेवा चउत्थीए पंकप्पभाए पुढवीए हिट्ठिल्ले चरिमंते। आणय-पाणय-आरण-अच्चुयदेवा अहे [जाव] पंचमाए धूमप्पभाए पुढवीए हिट्ठिल्ले चरिमन्ते। हेट्ठिम-मज्झिमगेवेज्जगदेवा अहे जाव छट्ठाए तमाए पुढवीए हिट्ठिल्ले चरिमंते। उवरिमगेवेज्जगदेवा णं भंते ! केवइयं खेत्तं ओहिणा जाणंति पासंति ?, गोयमा ! जहन्नेणं अंगुलस्स असंखेज्जइभागं, उक्कोसेणं अहे सत्तमाए पुढवीए हिट्ठिल्ले चरिमंते, तिरियं जाव असंखेज्जदीव-समुद्दे, उड्ढं जाव सगाइं विमाणाइं ओहिणा जाणंति पासंति। अणुत्तरोववाइया[१] देवा णं भंते ! केवइयं खेत्तं ओहिणा जाणंति पासंति ?, गोयमा ! संभिन्नं लोगनालिं जाणंति पासंति [प्रज्ञा० ३३।१९९७-२००७]

सम्प्रति नारकादीनामेवावधेः संस्थानं चिन्त्यते– तत्र नारकाणामवधिः तप्राकारः, तप्रो नाम काष्ठसमुदायविशेषो यो नदीप्रवाहेण प्लाव्यमानो दूरादानीयते, स चाऽऽयतस्त्र्यस्रश्च भवति, तदाकारोऽवधिर्नारकाणाम्। भवनपतीनां सर्वेषामपि पल्लकसंस्थानसंस्थितः, पल्लको नाम **लाटदेशे** धान्याधारविशेषः, स चोद्ध्वायत उपरि च किञ्चित्संक्षिप्तः। व्यन्तराणां पटहसंस्थानसंस्थितः, पटहः-आतोद्यविशेषः, स च किञ्चिदायतः उपर्यधश्च समप्रमाणः। ज्योतिष्कदेवानां झल्लरीसंस्थानसंस्थितः, झल्लरी[२] चर्मावनद्धविस्तीर्णवलयाकारा आतोद्यविशेषरूपा देशविशेषप्रसिद्धा। सौधर्मदेवादी-नामच्युतदेवपर्यन्तानां मृदङ्गसंस्थानसंस्थितः, मृदङ्गः वाद्यविशेषः, स चाधस्ताद् विस्तीर्ण उपरि च तनुकः सुप्रतीतः। ग्रैवेयकदेवानां ग्रथितपुष्पसशिखाकभृतचङ्गेरीसंस्थानसंस्थितः। अनुत्तरोपपातिकदेवानां कन्याचोलकापरपर्यायजवनालक[३]संस्थानसंस्थितः। उक्तं च–

नेरइयाणं[४] भंते ! ओही किंसंठाणसंठिए पण्णत्ते ?, गोयमा ! तप्पागारसंठिए पण्णत्ते।

---

१. °**या णं भंते केव**° जे१,२, मां० दे० ।। २. "उभयतो विस्तीर्णा चर्मावनद्धमुखा मध्ये संक्षिप्ता ढक्काकारा **झल्लरी**-आतोद्यविशेषरूपा" इति आव० मलय० पत्र ६८-१॥ ३. "**यवनालको** नाम कन्याचोलकः, स च **मरुमण्डलादि**प्रसिद्धः चरणकरूपेण कन्यापरिधानेन सह सीवितो भवति येन परिधानं न खसति, कन्यानां चैष मस्तकप्रदेशेन प्रक्षिप्यते, अत एवायमूर्ध्वः **सरकञ्चुक** इति व्यपदिश्यते।" इति आव० मलय० पत्र ६८-१॥ ४. नैरयिकाणां भदन्त ! अवधिः किंसंस्थानसंस्थितः प्रज्ञप्तः ? गौतम ! तप्राकारसंस्थितः प्रज्ञप्तः। असुरकुमाराणां पृच्छा, गौतम ! पल्यकसंस्थानसंस्थितः प्रज्ञप्तः। एवं यावत् स्तनितकुमाराणाम्। वानव्यन्तराणां पृच्छा, गौतम ! पटहसंस्थानसंस्थितः प्रज्ञप्तः। ज्योतिष्काणां पृच्छा, गौतम ! झल्लरीसंस्थानसंस्थितः प्रज्ञप्तः। सौधर्मदेवानां पृच्छा, गौतम ! मृदङ्गसंस्थानसंस्थितः प्रज्ञप्तः। एवं यावद् अच्युतदेवानाम्। ग्रैवेयकदेवानां पृच्छा, गौतम ! पुष्पचङ्गेरीसंस्थानसंस्थितः प्रज्ञप्तः। अनुत्तरौपपातिकदेवानां पृच्छा, गौतम ! यवनालकसंस्थानसंस्थितः प्रज्ञप्तः॥

असुरकुमाराणं पुच्छा, गोयमा ! पल्लगसंठाणसंठिए पण्णत्ते, एवं जाव थणियकुमाराणं। वाणमंतराणं पुच्छा, गोयमा ! पडहसंठाणसंठिए पण्णत्ते। जोइसियाणं पुच्छा, गोयमा ! झल्लरिसंठाणसंठिए पण्णत्ते। सोहम्मगदेवाणं पुच्छा, गोयमा ! मुइंगसंठाणसंठिए पण्णत्ते, एवं जाव अच्चुयदेवाणं। गेवेज्जगदेवाणं पुच्छा, गोयमा ! पुप्फचंगेरीसंठाणसंठिए पण्णत्ते। अणुत्तरोववाइयदेवाणं पुच्छा, गोयमा ! जवनालगसंठाणसंठिए पन्नत्ते। [प्रज्ञा० ३३।२००८-२००९, २०१२-२०१६] तप्राकारादीनां च व्याख्यानमिदं **भाष्यकृदाह**–

तप्पेण समागारो तप्पागारो, स चाऽऽयय-त्तंसो।
उद्धाययो उ पल्लो, उवरिं च स किंचि संखित्तो॥१॥
नऽच्चायओ समो वि य पडहो हेट्ठोवरिं पईओ सो।
चम्मावणद्धविच्छिन्नवलयरूवा य झल्लरिया॥२॥
उद्धायओ मुइंगो, हेट्ठा रुंदो, तहोवरिं तणुओ।
पुप्फसिहावलिरइया चंगेरी पुप्फचंगेरी॥३॥
जवनालउ त्ति भन्नइ उब्भो सरकंचुओ कुमारीए। [विशेषा०* गा० ७०८-११] इति।

तिर्यग्मनुष्याणां चावधिर्नानासंस्थानसंस्थितो यथा स्वयम्भूरमणोदधौ मत्स्याः, अपि च– तत्र मत्स्यानां वलयाकारं संस्थानं निषिद्धम्, तिर्यग्-मनुष्यावधेस्तु तदपि भवति। उक्तं च–

नाणागारो तिरिय-मणुएसु, मच्छा सयंभुरमणे व्व।
तत्थ वलयं निसिद्धं, तस्स पुण तयं पि होज्जाहि॥१॥ [विशेषा०* गा० ७१२]

तथा भवनपति-व्यन्तराणामूर्द्ध्वं प्रभूतोऽवधिर्भवति, वैमानिकानामधः, ज्योतिष्क-नारकाणां तिर्यग्, विचित्रो नर-तिरश्चाम्। आह च–

भवणवइ-वणयराणं उड्ढं बहुगो, अहो उ सेसाणं।
नारग-जोइसियाणं तिरियं, ओरालिओ चित्तो॥१॥ [विशेषा०* गा० ७१३]

तदेवमुक्तमानुगामिकमवधिज्ञानम्, तथा चाह– **सेत्तं आणुगामियं॥** सम्प्रत्य-नानुगामिकं शिष्यः पृच्छन्नाह–

[सू० २३] से किं तं अणाणुगामियं ओहिणाणं ?, अणाणुगामियं ओहिणाणं से जहाणामए केइ पुरिसे एगं महंतं जोइट्ठाणं काउं तस्सेव जोइट्ठाणस्स

परिपेरंतेहिं परिपेरंतेहिं परिघोलेमाणे परिघोलेमाणे तमेव जोइट्ठाणं पासइ, अण्णत्थ गए ण पासइ, एवमेव अणाणुगामियं ओहिणाणं जत्थेव समुप्पज्जइ तत्थेव संखेज्जाणि वा असंखेज्जाणि वा संबद्धाणि वा असंबद्धाणि वा जोयणाइं जाणइ पासइ, अण्णत्थ गए ण पासइ, सेत्तं अणाणुगामियं ओहिणाणं २।

से किं तमित्यादि। अथ किं तद् अनानुगामिकमवधिज्ञानम् ?। सूरिराह– अनानुगामिकमवधिज्ञानं **सः** विवक्षितो यथानामकः कश्चित् **पुरुषः** पूर्णः सुख-दुःखानामिति पुरुषः पुरि शयनाद्वा पुरुषः, एकं महद् **ज्योतिःस्थानम्** अग्निस्थानं कुर्यात्, कस्मिंश्चित् स्थानेऽनेकज्वालाशतसङ्कुलमग्निं प्रदीपं वा स्थूलवर्त्ति-ज्वालानुरूपमुत्पादयेदित्यर्थः, ततस्तत् कृत्वा तस्यैव ज्योतिःस्थानस्य **परिपर्यन्तेषु परिपर्यन्तेषु** परितः सर्वासु दिक्षु पर्यन्तेषु **परिघूर्णन् परिघूर्णन्** परिभ्रमन् परिभ्रमन्नित्यर्थः, तदेव **ज्योतिःस्थानं** ज्योतिःस्थानप्रकाशितं क्षेत्रं पश्यति, अन्यत्र गतो न पश्यति। एष दृष्टान्तः, उपनयमाह– **एवमेव** अनेनैव प्रकारेणाऽनानुगामिकमवधिज्ञानं यत्रैव क्षेत्रे व्यवस्थितस्य सतः समुत्पद्यते तत्रैव व्यवस्थितः सन् सङ्ख्येयानि असङ्ख्येयानि वा योजनानि स्वावगाढक्षेत्रेण सह सम्बद्धानि असम्बद्धानि वा, अवधिर्हि कोऽपि जायमानः स्वावगाढदेशादारभ्य निरन्तरं प्रकाशयति, कोऽपि पुनरपान्तरालेऽन्तरं कृत्वा परतः प्रकाशयति, तत उच्यते– सम्बद्धान्यसम्बद्धानि वेति, **जानाति** विशेषाकारेण परिच्छिनत्ति **पश्यति** सामान्याकारेणावबुध्यते, **अन्यत्र** देशान्तरे गतो नैव पश्यति, अवधिज्ञानावरणक्षयोपशमस्य तत्क्षेत्रसापेक्षत्वात्॥ तदेवमुक्तमनानुगामिकम्। सम्प्रति वर्द्धमानकमनवबुध्यमानः शिष्यः प्रश्नं करोति–

[सू० २४, गा०४५-५२] से किं तं वड्ढमाणयं ओहिणाणं ?, वड्ढमाणयं ओहिणाणं पसत्थेसु अज्झवसाणट्ठाणेसु वट्टमाणस्स वट्टमाणचरित्तस्स विसुज्झमाणस्स विसुज्झमाणचरित्तस्स सव्वओ समंता ओही वड्ढइ–

जावतिया तिसमयाहारगस्स सुहुमस्स पणगजीवस्स।[१]
ओगाहणा जहण्णा, ओहीखेत्तं जहन्नं तु॥४५॥

---

१. इमा अष्टावपि सूत्रगाथा विशेषावश्यकभाष्येऽपि [५८८,५९८,६०८,६०९,६१०,६१५,६१७,६२१ इति अङ्केषु] संगृहीताः सन्ति॥

सव्वबहुअगणिजीवा, णिरंतरं जत्तियं भरेज्जंसु।
खेत्तं सव्वदिसागं, परमोही खेत्तनिद्दिट्ठो॥४६॥
अंगुलमावलियाणं, भागमसंखेज्ज दोसु संखेज्जा।
अंगुलमावलियंतो, आवलिया अंगुलपुहत्तं॥४७॥
हत्थम्मि मुहुत्तंतो, दिवसंतो गाउयम्मि बोद्धव्वो।
जोयण दिवसपुहत्तं, पक्खंतो पण्णवीसाओ॥४८॥
भरहम्मि अद्धमासो, जंबुद्दीवम्मि साहिओ मासो।
वासं च मणुयलोए, वासपुहत्तं च रुयगम्मि॥४९॥
संखेज्जम्मि उ काले, दीव-समुद्दाऽवि होंति संखेज्जा।
कालम्मि असंखेज्जे, दीव-समुद्दा उ भइयव्वा॥५०॥
काले चउण्ह वुड्ढी कालो भइयव्वु खेत्तवुड्ढीए।
वुड्ढीए दव्वपज्जव, भइयव्वा खेत्त-काला उ॥५१॥
सुहुमो य होइ कालो, तत्तो सुहुमयरयं हवइ खेत्तं।
अंगुलसेढीमेत्ते, ओसप्पिणिओ असंखेज्जा॥५२॥
सेत्तं वड्ढमाणयं ओहिणाणं ३।

से किं तमित्यादि। अथ किं तद् वर्द्धमानकमवधिज्ञानम् ?। सूरिराह– वर्द्धमानकमवधिज्ञानं प्रशस्तेष्वध्यवसायस्थानेषु वर्त्तमानस्य, इह सामान्यतो द्रव्यलेश्योपरञ्जितं चित्तमध्यवसायस्थानमुच्यते, तच्चानवस्थितम्, तत्तल्लेश्याद्रव्यसाचिव्ये विशेषसम्भवात्, ततो बहुवचनमुक्तम् **प्रशस्तेषु** इति, अनेन चाप्रशस्तकृष्णादि-द्रव्यलेश्योपरञ्जितव्यवच्छेदमाह। प्रशस्तेष्वध्यवसायस्थानेषु वर्त्तमानस्येति किमुक्तं भवति ?-प्रशस्ताध्यवसायस्थानकलितस्य। सर्वतः समन्तादवधिः परिवर्द्धते इति सम्बन्धः, अनेनाविरतसम्यग्दृष्टेरपि परिवर्द्धमानकोऽवधिर्भवतीत्याख्यायते। तथा **वट्टमाणचरित्तस्स** प्रशस्तेष्वध्यवसायस्थानेषु वर्त्तमानचारित्रस्य, एतेन देशविरत-सर्वविरतयोर्वर्द्धमानकमवधिमभिधत्ते। वर्द्धमानकश्चावधिरुत्तरोत्तरां विशुद्धिमासादयतो भवति नान्यथा तत आह– **विशुद्ध्यमानस्य** तदावरणमलकलङ्कविगमत

उत्तरोत्तरविशुद्धिमासादयतः, अनेनाविरतसम्यग्दृष्टेर्वर्द्धमानकावधेः शुद्धिजन्यत्वमाह। तथा **विशुद्ध्यमानचारित्रस्य** इदं च विशेषणं देशविरत-सर्वविरतयोर्वेदितव्यम्। 'सर्वतः' सर्वासु दिक्षु समन्तादवधिः परिवर्द्धते॥ स च कस्यापि सर्वजघन्यादारभ्य प्रवर्द्धते, ततः प्रथमतः सर्वजघन्यमवधिं प्रतिपादयति॥

जावइया इत्यादि। **त्रिसमयाहारकस्य**, आहारयति-आहारं गृह्णातीत्याहारकः, त्रयः समयाः समाहृतास्त्रिसमयम्, त्रिसमयमाहारकस्त्रिसमयाहारकः, **नाम नाम्नैकार्थ्ये समासो बहुलम्** [*मलय० ना० पा० ८ सू० १] इति समासः, तस्य त्रिसमयाहारकस्य **सूक्ष्मस्य** सूक्ष्मनामकर्मोदयवर्त्तिनः **पनकजीवस्य** पनकश्चासौ जीवश्च पनकजीवः-वनस्पतिविशेषः, तस्य **यावती** यावत्परिमाणा अवगाहन्ते क्षेत्रं यस्यां स्थिता जन्तवः साऽ**वगाहना** तनुरित्यर्थः, **जघन्या** त्रिसमयाहारकशेषसूक्ष्मपनकजीवापेक्षया सर्वस्तोका, एतावत्परिमाणमवधेर्जघन्यं क्षेत्रम्। **तु**शब्द एवकारार्थः, स चावधारणे, तस्य चैवं प्रयोगः-जघन्यमवधिक्षेत्रमेतावदेवेति।

अत्र चायं **सम्प्रदायः**- यः किल योजनसहस्रपरिमाणायामो मत्स्यः स्वशरीरबाह्यैकदेश एवोत्पद्यमानः प्रथमसमये सकलनिजशरीरसम्बद्धमात्मप्रदेशानामायामं संहृत्याङ्गुलासङ्ख्येयभागबाहल्यं स्वदेहविष्कम्भा-ऽऽयामविस्तारं प्रतरं करोति, तमपि द्वितीयसमये संहृत्याङ्गुलासङ्ख्येयभागविष्कम्भां मत्स्यदेहविष्कम्भायामामात्मप्रदेशानां सूचीं विरचयति, ततस्तृतीयसमये तामपि संहृत्याङ्गुलासङ्ख्येयभागमात्र एव स्वशरीरबहिष्प्रदेशे सूक्ष्मपरिणामपनकरूपतयोत्पद्यते, तस्योपपातसमयादारभ्य तृतीये समये वर्त्तमानस्य यावत्प्रमाणं शरीरं भवति तावत्परिमाणं जघन्यमवधेः क्षेत्रमालम्बनवस्तुभाजनमवसेयम्। उक्तं च-

योजनसहस्रमानो मत्स्यो मृत्वा स्वकायदेशे यः।
उत्पद्यते हि पनकः, सूक्ष्मत्वेनेह स ग्राह्यः॥१॥
संहृत्य चाऽऽद्यसमये, स ह्यायामं करोति च प्रतरम्।
सङ्ख्यातीताख्याङ्गुलविभागबाहल्यमानं तु॥२॥
स्वतनुपृथुत्वमात्रं, दीर्घत्वेनापि जीवसामर्थ्यात्।
तमपि द्वितीयसमये, संहृत्य करोत्यसौ सूचिम्॥३॥

सङ्ख्यातीताख्याङ्गुलविभागविष्कम्भमाननिर्दिष्टाम्।
निजतनुपृथुत्वदीर्घां तृतीयसमये तु संहृत्य॥४॥
उत्पद्यते च पनकः, स्वदेहदेशे स सूक्ष्मपरिणामः।
समयत्रयेण तस्यावगाहना यावती भवति॥५॥
तावज्जघन्यमवधेरालम्बनवस्तुभाजनं क्षेत्रम्।
इदमित्थमेव मुनिगणसुसम्प्रदायात् समवसेयम्॥६॥ [ ]

आह– किमिति योजनसहस्रायामो मत्स्यः ? किं वा तस्य तृतीयसमये स्वदेहदेशे सूक्ष्मपनकत्वेनोत्पादः ? किं वा त्रिसमयाहारकत्वं परिगृह्यते ?, उच्यते, इह योजनसहस्रायामो मत्स्यः स किल त्रिभिः समयैरात्मानं संक्षिपति महतः प्रयत्नविशेषात्, महाप्रयत्नविशेषाधिरूढश्चोत्पत्तिदेशेऽवगाहनामारभमाणोऽतीव सूक्ष्मामारभते, ततो महामत्स्यस्य ग्रहणम्; सूक्ष्मपनकश्चान्यजीवापेक्षया सूक्ष्मतमावगाहनो भवति, ततः सूक्ष्मपनकग्रहणम्; तथा उत्पत्तिसमये द्वितीयसमये चातिसूक्ष्मो भवति, चतुर्थादिषु च समयेष्वतिस्थूरः, त्रिसमयाहारकस्तु योग्यः, ततः त्रिसमयाहारकग्रहणम्। उक्तं च–

मच्छो महल्लकायो, संखेत्तो जो उ तीहिं समएहिं।
स किर पयत्तविसेसेण सण्हमोगाहणं कुणइ॥१॥
सण्हयरा सण्हयरो, सुहुमो पणओ जहण्णदेहो य।
सुबहुविसेसविसिट्ठो, सण्हयरो सव्वदेहेसु॥२॥
पढम-बीएऽतिसण्हो, जमइत्थूलो चउत्थयाईसुं।
तइयसमयम्मि जोग्गो, गहिओ तो तिसमयाहारो॥३॥ [विशेषा० गा० ५९३-५९५]

अन्ये तु व्याचक्षते– 'त्रिसमयाहारकस्य' इति आयाम-प्रतरसंहरणे समयद्वयं तृतीयश्च समयः सूचीसंहरणोत्पत्तिदेशागमविषयः, एवं त्रयः समयाः, विग्रहगत्यभावाच्चैतेषु त्रिष्वपि समयेष्वाहारकः, तत उत्पादसमय एव त्रिसमयाहारकः सूक्ष्मपनकजीवो जघन्यावगाहनश्च, ततस्तच्छरीरमानं जघन्यमवधेः क्षेत्रम्, तच्चायुक्तम्, यतस्त्रिसमयाहारकस्येति विशेषणं पनकस्य, न च मत्स्यायाम-प्रतरसंहरणसमयौ पनकभवस्य सम्बन्धिनौ, किन्तु मत्स्यभवस्य, तत उत्पादसमयादारभ्य त्रिसमयाहारकस्येति द्रष्टव्यम्, नान्यथा।

एतावत्प्रमाणजघन्यक्षेत्रश्चावधिः तैजस-भाषाप्रायोग्यवर्गणापान्तरालवर्त्तिद्रव्य-

मालम्बते, **तेया-भासादव्वाणमंतरा एत्थ लहइ पट्ठवओ।** [**विशेषा*** ० ६२७] इति वचनात्। तदपि चाऽऽलम्ब्यमानं द्रव्यं द्विधा– गुरुलघु अगुरुलघु च, तत्र तैजसप्रत्यासन्नं गुरुलघु भाषाप्रत्यासन्नं चागुरुलघु, तद्गतांश्च पर्यायान् चतुःसंख्यानेव वर्ण-रस-गन्ध-स्पर्शलक्षणान् पश्यति, न शेषान्। यत आह–

दव्वाइं अंगुलावलिसंखेज्जातीतभागविसयाइं।
पेच्छइ चउग्गुणाइं, जहन्नओ मुत्तिमंताइं॥१॥ [**विशेषा*** ० ८०७]

अत्र **जघन्यतः** इति जघन्यावधिज्ञानी। तदेवं जघन्यमवधेः क्षेत्रमभिधाय साम्प्रतमुत्कृष्टमभिधातुकाम आह– **सव्वबहु** इत्यादि। **सव्वबहुत्ति** यत ऊर्द्ध्वमन्य एकोऽपि जीवो न कदाचनापि प्राप्यते ते सर्वबहवः, सर्वबहवश्च ते अग्निजीवाश्च सूक्ष्म-बादररूपाः सर्वबह्वग्निजीवाः। कदा सर्वबह्वग्निजीवाः ? इति चेद्, उच्यते, यदा सर्वासु कर्मभूमिषु निर्व्याघातमग्निकायसमारम्भकाः सर्वबहवो मनुष्याः, ते च प्रायोऽ**जितस्वामि**तीर्थकरकाले प्राप्यन्ते, यदा चोत्कृष्टपदवर्त्तिनः सूक्ष्मानलजीवाः तदा सर्वबह्वग्निजीवाः। उक्तं च–

अव्वाघाए सव्वासु कम्मभूमिसु जया तदारंभा ।
सव्वबहवो मणुस्सा, होंतऽजियजिणिंदकालम्मि ॥१॥
उक्कोसया य सुहुमा, जया तया सव्वबहुअगणिजीवा। [**विशेषा*** ० ५९९-६००]

इति। **निरन्तरम्** इति क्रियाविशेषणम्, **यावत्** यावत्परिमाणं क्षेत्रं भृतवन्तः, एतदुक्तं भवति- नैरन्तर्येण विशिष्टसूचीरचनया यावद् भृतवन्तः। **भृतवन्तः** इति च भूतकालनिर्देशः '**अजितस्वामि**काल एव प्रायः सर्वबहवोऽनलजीवा अस्यामवसर्पिण्यां सम्भवन्ति स्म' इति ख्यापनार्थः। इदं चानन्तरोदितं क्षेत्रमेकदिक्कमपि भवति तत आह– सर्वदिक्कम्, अनेन सूचीभ्रमणप्रमितत्वं क्षेत्रस्य सूचयति। परमश्चासाववधिश्च परमावधिः, एतावदनन्तरोदितं सर्वबह्वनलजीवसूचीपरिक्षेपप्रमितं क्षेत्रमङ्गीकृत्य **निर्दिष्टः**– प्रतिपादितो गणधरादिभिः क्षेत्रनिर्दिष्टः, एतावत् क्षेत्रं परमावधेर्भवतीत्यर्थः। किमुक्तं भवति ?– सर्वबह्वग्निजीवा निरन्तरं यावत् क्षेत्रं सूचीभ्रमणेन[१] सर्वदिक्कं भृतवन्तः एतावति क्षेत्रे

१. **सूचीपरिमाणेन** जे१,२, मां, दे०॥

यान्यवस्थितानि द्रव्याणि तत्परिच्छेदसामर्थ्ययुक्तः परमावधिः क्षेत्रमधिकृत्य निर्दिष्टो गणधरादिभिः।

अयमिह **सम्प्रदायः**– सर्वबह्वग्निजीवाः प्रायोऽ**जितस्वामि**तीर्थकरकाले प्राप्यन्ते, तदारम्भकमनुष्यबाहुल्यसम्भवात्, सूक्ष्माश्चोत्कृष्टपदवर्त्तिनः तत्रैव विवक्ष्यन्ते, ततश्च सर्वबहवोऽनलजीवा भवन्ति, तेषां स्वबुद्ध्या षोढाऽवस्थानं परिकल्प्यते-एकैकक्षेत्रप्रदेशे एकैकजीवावगाहनया सर्वतश्चतुरस्रो घन इति प्रथमम्, स एव घनो जीवैः स्वावगाहनाभिरिति द्वितीयम्, एवं प्रतरोऽपि द्विभेदः, श्रेणिरपि द्विधा, तत्राऽऽद्याः पञ्च प्रकारा अनादेशाः, तेषु क्षेत्रस्याल्पीयस्तया प्राप्यमाणत्वात्, षष्ठस्तु प्रकारः सूत्रादेशः। उक्तं च–

एक्केक्कागासपएसजीवरयणाए सावगाहे य।
चउरंसं घण पयरं, सेढी छट्ठो सुयादेसो॥१॥ [विशेषा* ० ६०१]

ततश्चासौ श्रेणिः स्वावगाहनासंस्थापितसकलानलजीवावलीरूपा अवधिज्ञानिनः सर्वासु दिक्षु शरीरपर्यन्तेन भ्राम्यते, सा च भ्राम्यमाणा असङ्ख्येयान् लोकमात्रान् क्षेत्रविभागानलोके व्याप्नोति, एतावत् क्षेत्रमवधेरुत्कृष्टमिति। उक्तं च–

नियया वगाहणागणिजीवसरीरावली समन्तेणं।
भामिज्जइ ओहिन्नाणिदेहपज्जंतओ सा य॥१॥
अइगंतूणमलोगे, लोगागासप्पमाणमेत्ताइं।
ठाइ असंखेज्जाइं, इदमोहिक्खेत्तमुक्कोसं॥२॥ [विशेषा* ० ६०३-६०४]

इदं च सामर्थ्यमात्रमुपवर्ण्यते, एतावति क्षेत्रे यदि द्रष्टव्यं भवति तर्हि पश्यति, यावता तन्न विद्यते, अलोके रूपिद्रव्याणामसम्भवात्, रूपिद्रव्यविषयश्चावधिः। केवलमयं विशेषः– यावदद्यापि परिपूर्णमपि लोकं पश्यति तावदिह स्कन्धानेव पश्यति, यदा पुनरलोके प्रसरमवधिरधिरोहति तदा यथा यथाऽभिवृद्धिमासादयति तथा तथा लोके सूक्ष्मान् सूक्ष्मतरान् स्कन्धान् पश्यति, यावदन्ते परमाणुमपि। उक्तं च–

सामत्थमेत्तमुत्तं, दट्ठव्वं जइ हवेज्ज पेच्छेज्जा।
न उ तं तत्थऽत्थि जओ, सो रूविनिबंधणो भणिओ॥१॥

वड्ढंतो पुण बाहिं, लोगत्थं चेव पासई दव्वं।
सुहुमयरं सुहुमयरं परमोही जाव परमाणू॥२॥ [**विशेषा०** ६०५-६०६]

परमावधिकलितश्च नियमादन्तर्मुहूर्त्तमात्रेण केवलालोकलक्ष्मीमालिङ्गति। उक्तं च–

परमोहिन्नाणठिओ, केवलमंतोमुहुत्तमेत्तेणं। [**विशेषा०** ६८९] एवं तावज्जघन्यमुत्कृष्टं चावधिक्षेत्रमुक्तम्। सम्प्रति मध्यमं प्रतिपिपादयिषुः 'एतावत्क्षेत्रोपलम्भे एतावत्कालोपलम्भः, एतावत्कालोपलम्भे चैतावत्क्षेत्रोपलम्भः' इत्यस्यार्थस्य प्रकटनार्थं गाथाचतुष्टयमाह॥

अंगुलेत्यादि। अङ्गुलमिह क्षेत्राधिकारात् तावत् प्रमाणाङ्गुलमभिगृह्यते, **अन्ये** त्वाहुः-अवध्यधिकारादुत्सेधाङ्गुलमिति, आवलिका असङ्ख्येयसमयात्मिका, अङ्गुलं च आवलिका च अङ्गुलावलिके, तयोरङ्गुला-ऽऽवलिकयोर्भागमसङ्ख्येयमसङ्ख्येयं पश्यत्यवधिज्ञानी। इदमुक्तं भवति-क्षेत्रतोऽङ्गुलासङ्ख्येयभागमात्रं पश्यन् कालत आवलिकाया असङ्ख्येयमेव भागमतीतमनागतं च पश्यति। उक्तं च–

खेत्तमसंखेज्जंगुलभागं पासं तमेव कालेणं।
आवलियाए भागं, तीयमणायं च जाणाइ॥१॥ [**विशेषा०** ६११]

आवलिकायाश्चासङ्ख्येयं भागं पश्यन् क्षेत्रतोऽङ्गुलासङ्ख्येयभागं पश्यति। एवं सर्वत्रापि क्षेत्र-कालयोः परस्परं योजना कर्त्तव्या। क्षेत्र-कालदर्शनं चोपचारेण द्रष्टव्यम्, न साक्षात्, न खलु क्षेत्रं कालं वा साक्षादवधिज्ञानी पश्यति, तयोरमूर्त्तत्वात्, रूपिद्रव्यविषयश्चावधिः, तत एतदुक्तं भवति– एतावति क्षेत्रे काले च यानि द्रव्याणि तेषां च द्रव्याणां ये पर्यायास्तान् पश्यतीति। उक्तं च–

तत्थेव य जे दव्वा, तेसिं चिय जे हवंति पज्जाया।
इय खेत्ते कालम्मि य, जोएज्जा दव्व-पज्जाए॥१॥ [**विशेषा०** ६१२]

एवं सर्वत्रापि भावनीयम्। क्रिया च गाथाचतुष्टये स्वयमेव योजनीया। तथा द्वयोरङ्गुला-ऽऽवलिकयोः सङ्ख्येयौ भागौ पश्यति, अङ्गुलस्य सङ्ख्येयं भागं पश्यन् आवलिकाया अपि सङ्ख्येयमेव भागं पश्यतीत्यर्थः। तथा **अङ्गुलम्** अङ्गुलमात्रं

क्षेत्रं पश्यन् **आवलिकान्तः** किञ्चिदूनामावलिकां पश्यति। आवलिकां चेत् कालतः पश्यति तर्हि क्षेत्रतः **अङ्गुलपृथक्त्वम्** अङ्गुलपृथक्त्वपरिमाणं क्षेत्रं पश्यति। उक्तं च–

संखेज्जंगुलभागे, आवलियाए वि मुणइ तइभागं।
अंगुलमिह पेच्छंतो, आवलियंतो मुणइ कालं॥१॥ [विशेषा० ६१३]
आवलियं मुणमाणो, संपुन्नं खेत्तमंगुलपुहत्तं। [विशेषा० ६१४]

इति। पृथक्त्वं द्विप्रभृतिरा नवभ्य इति॥ तथा–

हस्ते हस्तमात्रे क्षेत्रे ज्ञायमाने कालतो मुहूर्त्तान्तः पश्यति, अन्तर्मुहूर्त्तप्रमाणं कालं पश्यतीत्यर्थः। तथा कालतः **दिवसान्तः** किञ्चिदूनं दिवसं पश्यन् क्षेत्रतः **गव्यूते** गव्यूतविषयो द्रष्टव्यः। तथा **योजनं** योजनमात्रं क्षेत्रं पश्यन् कालतो दिवसपृथक्त्वं पश्यति, दिवसपृथक्त्वमानं कालं पश्यतीत्यर्थः। तथा **पक्षान्तः** किञ्चिदूनं पक्षं पश्यन् क्षेत्रतः पञ्चविंशतियोजनानि पश्यति॥

'भरहम्मि' इत्यादि। **भरते** सकलभरतप्रमाणे क्षेत्रेऽवधौ कालतोऽर्द्धमास उक्तः, भरतप्रमाणं क्षेत्रं पश्यन् कालतोऽतीतमनागतं चार्द्धमासं पश्यतीत्यर्थः। एवं जम्बूद्वीपविषयेऽवधौ साधिको मासः कालतो विषयत्वेन बोद्धव्यः। तथा **मनुष्यलोके** मनुष्यलोकप्रमाणक्षेत्रविषयेऽवधौ **वर्षं** संवत्सरमतीतमनागतं च पश्यति। तथा **रुचकाख्ये** रुचकाख्यबाह्यद्वीपप्रमाणक्षेत्रविषयोऽवधिर्वर्षपृथक्त्वं पश्यति॥ तथा–

संखेज्ज इत्यादि। सङ्ख्यायत इति सङ्ख्येयः, स च वर्षमात्रोऽपि भवति, ततः **तु**शब्दो विशेषणार्थः, किं विशिनष्टि ?– सङ्ख्येयः कालो वर्षसहस्रात् परो वेदितव्यः, तस्मिन् सङ्ख्येये कालेऽवधिगोचरे सति क्षेत्रतः तस्यैवावधेर्गोचरतया द्वीपाश्च समुद्राश्च द्वीपसमुद्राः तेऽपि सङ्ख्येयाः भवन्ति। **अपि**शब्दाद् महानेकोऽपि, महत एकदेशोऽपि। किमुक्तं भवति ?– सङ्ख्येये कालेऽवधिना परिच्छिद्यमाने क्षेत्रमप्यत्रत्यप्रज्ञापकापेक्षया सङ्ख्येयद्वीप-समुद्रपरिमाणं परिच्छेद्यं भवति, ततो यदि नामात्रत्यस्यावधिरुत्पद्यते तर्हि जम्बूद्वीपादारभ्य सङ्ख्येया द्वीप-समुद्रास्तस्य परिच्छेद्याः; अथ बाह्ये द्वीपे समुद्रे वा सङ्ख्येययोजनविस्तृते कस्यापि तिरश्चः सङ्ख्येयकाल-विषयोऽवधिरुत्पद्यते तदा स यथोक्तक्षेत्रपरिमाणं तमेवैकं द्वीपं समुद्रं वा पश्यति,

यदि पुनरसङ्ख्येययोजनविस्तृते स्वयम्भूरमणादिके द्वीपे समुद्रे वा सङ्ख्येयकाल-विषयोऽवधिः कस्याप्युत्पद्यते तदानीं स प्रागुक्तपरिमाणं तस्य द्वीपस्य समुद्रस्य वा एकदेशं पश्यति इहत्यमनुष्यबाह्यावधिरिव कश्चित्।

तथा काले **असङ्ख्येये** पल्योपमादिलक्षणे अवधेर्विषये सति तस्यैवासङ्ख्येयकालपरिच्छेदकस्यावधेः क्षेत्रतया परिच्छेद्या द्वीप-समुद्राः **भाज्याः** विकल्पनीया भवन्ति, कस्यचिदसङ्ख्येयाः कस्यचित्सङ्ख्येयाः [कस्यचिद् महान् एकः] कस्यचिदेकदेश इत्यर्थः। यदा इह मनुष्यस्यासङ्ख्येयकालविषयोऽवधिरुत्पद्यते तदानीमसङ्ख्येया द्वीप-समुद्रास्तस्य विषयः, यदा पुनर्बहिर्द्वीपे समुद्रे वा वर्त्तमानस्य कस्यचित् तिरश्चोऽसङ्ख्येयकालविषयोऽवधिरुत्पद्यते तर्हि तस्य सङ्ख्येया द्वीप-समुद्राः, अथवा यस्य मनुष्यस्यासङ्ख्येयकालविषयो बाह्यद्वीप-समुद्रालम्बनो बाह्योऽवधिरुत्पद्यते तस्य सङ्ख्येयाः द्वीपाः, यदा पुनः स्वयम्भूरमणे द्वीपे समुद्रे वा कस्यचित् तिरश्चोऽवधिरसङ्ख्येयकालविषयो जायते तदानीं तस्य स्वयम्भूरमणस्य द्वीपस्य समुद्रस्य वा एकदेशो विषयः, स्वयम्भूरमणविषयमनुष्यबाह्यावधेर्वा तदेकदेशो विषयः, क्षेत्रपरिमाणं पुनर्योजनापेक्षया सर्वत्रापि जम्बूद्वीपादारभ्यासङ्ख्येय-द्वीपसमुद्रप्रमाणमवसेयम्॥ तदेवं यथा क्षेत्रवृद्धौ कालवृद्धिः कालवृद्धौ च यथा क्षेत्रवृद्धिः तथा प्रतिपादितम्। सम्प्रति द्रव्य-क्षेत्र-काल-भावानां मध्ये यद्वृद्धौ यस्य वृद्धिरुपजायते यस्य च न तदभिधित्सुराह–

काले इत्यादि। **काले** अवधिगोचरे वर्द्धमाने **चतुर्णां** द्रव्य-क्षेत्र-काल-भावानां वृद्धिर्भवति। तथा क्षेत्रस्य वृद्धिः क्षेत्रवृद्धिस्तस्यां सत्यां कालो **भजनीयः** विकल्पनीयः कदाचिद् वर्द्धते कदाचिद् न, क्षेत्रं ह्यत्यन्तसूक्ष्मम्, कालस्तु तदपेक्षया परिस्थूरः, ततो यदि प्रभूता क्षेत्रवृद्धिस्ततो वर्द्धते शेषकालं नेति, द्रव्य-पर्यायौ तु नियमतो वर्द्धेते। आह च **भाष्यकृत्**–

काले पवड्ढमाणे, सव्वे दव्वादओ पवड्ढंति।
खेत्ते कालो भइओ, वड्ढंति उ दव्व-पज्जाया॥१॥ [विशेषा० ६१८]

तथा द्रव्यं च पर्यायश्च द्रव्य-पर्यायौ तयोर्वृद्धौ सत्याम्, सूत्रे विभक्तिलोपः

प्राकृतशैल्या, भजनीयावेव क्षेत्र-कालौ। तुशब्द एवकारार्थः, स च भिन्नक्रमः, तथैव च योजितः। विकल्पश्चायम्– कदाचित् तयोर्वृद्धिर्भवति कदाचिन्न, यतो द्रव्यं क्षेत्रादपि सूक्ष्मम्, एकस्मिन्नपि नभःप्रदेशेऽनन्तस्कन्धावगाहनात्, द्रव्यादपि सूक्ष्मः पर्यायः, एकस्मिन्नपि द्रव्येऽनन्तपर्यायसम्भवात्, ततो द्रव्य-पर्यायवृद्धौ क्षेत्र-कालौ भजनीयावेव भवतः, द्रव्ये च वर्द्धमाने पर्याया नियमतो वर्द्धन्ते, प्रतिद्रव्यं सङ्ख्येयानामसङ्ख्येयानां वाऽवधिना परिच्छेदसम्भवात्, पर्याये तु वर्द्धमाने द्रव्यं भाज्यम्, एकस्मिन्नपि द्रव्ये पर्यायविषयावधिवृद्धिसम्भवात्। आह च **भाष्यकृत्**– 5

भयणाए खेत्त-काला, परिवड्ढंतेसु दव्व-भावेसु।
दव्वे वड्ढइ भावो, भावे दव्वं तु भयणिज्जं॥१॥ [विशेषा० ६१९]

अत्राऽऽह– ननु जघन्य-मध्यमोत्कृष्टभेदभिन्नयोः अवधिज्ञानसम्बन्धिनोः क्षेत्र-कालयोरङ्गुला-ऽऽवलिकाऽसङ्ख्येयभागादिरूपयोः परस्परं समय-प्रदेशसङ्ख्यया किं तुल्यत्वमुत हीनाधिकत्वम् ?, उच्यते, हीनाधिकत्वम्। तथाहि-आवलिकाया असङ्ख्येयभागे जघन्यावधिविषये यावन्तः समयाः तदपेक्षया अङ्गुलस्यासङ्ख्येयभागे जघन्यावधिविषय एव ये नभःप्रदेशास्ते असङ्ख्येयगुणाः, एवं सर्वत्रापि अवधिविषयात् कालादसङ्ख्येयगुणत्वमवधिविषयस्य क्षेत्रस्यावगन्तव्यम्। उक्तं च– 10 15

सव्वमसंखेज्जगुणं, कालाओ खेत्तमोहिविसयं ति।
अवरोप्परसंबद्धं, समयपएसप्पमाणेणं॥१॥ [विशेषा० ६२४]

अथ क्षेत्रस्येत्थं कालादसङ्ख्येयगुणता कथमवसीयते ?, उच्यते, सूत्रप्रामाण्यात्, तदेव सूत्रमुपदर्शयति–

सुहुमो य इत्यादि। **सूक्ष्मः** श्लक्ष्णो भवति कालः, **च**शब्दो वाक्यभेद-क्रमोपदर्शनार्थः, यथा-सूक्ष्मस्तावत्कालो भवति, यस्मादुत्पलपत्रशतभेदे प्रतिपत्रम-सङ्ख्येयाः समयाः प्रतिपाद्यन्ते ततः सूक्ष्मः कालः। तस्मादपि कालात् सूक्ष्मतरं क्षेत्रं भवति, यस्मादङ्गुलश्रेणिमात्रे क्षेत्रे-प्रमाणाङ्गुलैकमात्रे श्रेणिरूपे नभःखण्डे प्रतिप्रदेशं समयगणनया असङ्ख्येया अवसर्पिण्यस्तीर्थकृद्भिराख्याताः। इदमुक्तं भवति-प्रमाणा-ङ्गुलैकमात्रे एकैकप्रदेशश्रेणिरूपे नभःखण्डे यावन्तोऽसङ्ख्येयास्ववसर्पिणीषु समयाः 20 25

तावत्प्रमाणाः प्रदेशा वर्त्तन्ते। ततः सर्वत्रापि कालादसङ्ख्येयगुणं क्षेत्रम्। क्षेत्रादपि चानन्तगुणं द्रव्यम्, द्रव्यादपि चावधिविषयाः पर्यायाः सङ्ख्येयगुणा असङ्ख्येयगुणा वा। उक्तं च–

खेत्तविसेसेहिंतो, दव्वमणंतगुणियं पएसेहिं।
दव्वेहिंतो भावो, संखगुणोऽसंखगुणिओ वा॥१॥ [विशेषा० ६२५]

सेत्तमित्यादि। तदेतद्वर्द्धमानकमवधिज्ञानम्।

[सू० २५] से किं तं हायमाणयं ओहिणाणं ?, हायमाणयं ओहिणाणं अप्पसत्थेहिं अज्झवसायट्ठाणेहिं वट्टमाणस्स वट्टमाणचरित्तस्स संकिलिस्समाणस्स संकिलिस्समाणचरित्तस्स सव्वओ समंता ओही परिहायति सेत्तं हायमाणयं ओहिनाणं ४।

से किं तमित्यादि। अथ किं तद् हीयमानकमवधिज्ञानम् ?। सूरिराह– हीयमानकमवधिज्ञानं कथञ्चिदवाप्तं सद् अप्रशस्तेष्वध्यवसायस्थानेषु वर्त्तमानस्याविरतसम्यग्दृष्टेर्**वर्त्तमानचारित्रस्य** देशविरतादेः **संक्लिश्यमानस्य** उत्तरोत्तरसंक्लेशमासादयतः, इदं च विशेषणमविरतसम्यग्दृष्टेरवसेयम्, तथा **संक्लिश्यमानचारित्रस्य** देशविरतादेः सर्वतः समन्तादवधिः **परिहीयते** पूर्वावस्थातो हानिमुपगच्छति, तदेतद् हीयमानकमवधिज्ञानम्।

[सू० २६] से किं तं पडिवाति ओहिणाणं ?, पडिवाति ओहिणाणं जण्णं जहण्णेणं अंगुलस्स असंखेज्जतिभागं वा संखेज्जतिभागं वा वालग्गं वा वालग्गपुहत्तं वा लिक्खं वा लिक्खपुहत्तं वा जूयं वा जूयपुहत्तं वा जवं वा जवपुहत्तं वा अंगुलं वा अंगुलपुहत्तं वा पायं वा पायपुहत्तं वा वियत्थिं वा वियत्थिपुहत्तं वा रयणिं वा रयणिपुहत्तं वा कुच्छिं वा कुच्छिपुहत्तं वा धणुयं वा धणुयपुहत्तं वा गाउयं वा गाउयपुहत्तं वा जोयणं वा जोयणपुहत्तं वा जोयणसयं वा जोयणसयपुहत्तं वा जोयणसहस्सं वा जोयणसहस्सपुहत्तं वा जोयणसतसहस्सं वा जोयणसतसहस्सपुहत्तं वा जोयणकोडिं वा जोयणकोडिपुहत्तं वा जोयणकोडाकोडिं वा जोयणकोडाकोडिपुहत्तं वा

उक्कोसेणं लोगं वा पासित्ता णं पडिवएज्जा, सेत्तं पडिवाति ओहिणाणं ५।

से किं तमित्यादि। अथ किं तत् प्रतिपाति अवधिज्ञानम् ?। सूरिराह– प्रतिपात्यवधिज्ञानं यदवधिज्ञानं जघन्यतः सर्वस्तोकतया अङ्गुलस्यासङ्ख्येयभागमात्रं सङ्ख्येयभागमात्रं वा वालाग्रं वा वालाग्रपृथक्त्वं वा, **लिक्षां वा** वालाग्राष्टकप्रमाणाम्, लिक्षापृथक्त्वं वा, **यूकां वा** लिक्षाष्टकमानाम्, यूकापृथक्त्वं वा, **यवं वा** यूकाष्टकमानम्, यवपृथक्त्वं वा, अङ्गुलं वा अङ्गुलपृथक्त्वं वा, एवं यावदुत्कर्षेण सर्वप्रचुरतया लोकं **दृष्ट्वा** उपलभ्य **प्रतिपतेत्** प्रदीप इव नाशमुपयायात्, तस्य तथाविधक्षयोपशमजन्यत्वात्, तदेतत् प्रतिपात्यवधिज्ञानम्। शेषं सुगमम्। नवरं 'कुक्षिः' द्विहस्तप्रमाणा, **धनुः** चतुर्हस्तप्रमाणम्। पृथक्त्वं सर्वत्रापि द्विप्रभृतिरा नवभ्य इति सैद्धान्तिक्या परिभाषया द्रष्टव्यम्॥

[सू० २७] से किं तं अपडिवाति ओहिणाणं ?, अपडिवाति ओहिणाणं जेणं अलोगस्स एगमवि आगासपदेसं पासेज्जा, तेण परं अपडिवाति ओहिणाणं, सेत्तं अपडिवाति ओहिणाणं ६।

से किं तमित्यादि। अथ किं तदप्रतिपात्यवधिज्ञानम् ?। सूरिराह– अप्रतिपाति अवधिज्ञानं येनावधिज्ञानेन अलोकस्य सम्बन्धिनमेकमप्याकाशप्रदेशम्, आस्तां बहूनाकाशप्रदेशानित्यपिशब्दार्थः, पश्येत्, एतच्च सामर्थ्यमात्रमुपवर्ण्यते, न त्वलोके किञ्चिदप्यवधिज्ञानस्य द्रष्टव्यमस्ति, एतच्च प्रागेवोक्तम्, तत आरभ्याप्रतिपाति आ केवलप्राप्तेरवधिज्ञानम्। अयमत्र भावार्थः– एतावति क्षयोपशमे सम्प्राप्ते सति आत्मा विनिहतप्रधानप्रतिपक्षयोधसंघातनरपतिरिव न भूयः कर्मशत्रुणा परिभूयते, किन्तु समासादितैतावदालोकजयोऽप्रतिनिवृत्तः शेषमपि कर्मशत्रुसङ्घातं विनिर्जित्य प्राप्नोति केवलराज्यश्रियमिति। तदेतदप्रतिपाति अवधिज्ञानम्॥ तदेवमुक्ताः षडप्यवधिज्ञानस्य भेदाः। सम्प्रति द्रव्याद्यपेक्षयाऽवधिज्ञानस्य भेदान् चिन्तयति–

[सू० २८] तं समासओ चउव्विहं पण्णत्तं, तंजहा-दव्वओ खेत्तओ कालओ भावओ। तत्थ दव्वओ णं ओहिणाणी जहण्णेणं अणंताणि रूविदव्वाइं जाणइ पासइ उक्कोसेणं सव्वाइं रूविदव्वाइं जाणइ पासइ १। खेत्तओ णं ओहिणाणी

जहण्णेणं अंगुलस्स असंखेज्जतिभागं जाणइ पासइ, उक्कोसेणं असंखेज्जाइं अलोये लोयप्पमाणमेत्ताइं खंडाइं जाणइ पासइ २। कालओ णं ओहिणाणी जहण्णेणं आवलियाए असंखेज्जतिभागं जाणइ पासइ, उक्कोसेणं असंखेज्जाओ उस्सप्पिणीओ अवसप्पिणीओ अतीतं च अणागयं च कालं जाणइ पासइ ३। भावओ णं ओहिणाणी जहण्णेणं अणंते भावे जाणइ पासइ उक्कोसेणं पि अणंते भावे जाणइ पासइ, सव्वभावाणं अणंतभागं जाणइ पासइ ४।

तं समासओ इत्यादि। **तद्** अवधिज्ञानं **समासतः** सङ्क्षेपेण **चतुर्विधं** चतुष्प्रकारं प्रज्ञप्तम्। तद्यथा– द्रव्यतः क्षेत्रतः कालतो भावतश्च। तत्र द्रव्यतः **णं** इति वाक्यालङ्कारे अवधिज्ञानी **जघन्येनाऽपि** भावप्रधानोऽयं निर्देशः सर्वजघन्यतयाऽपि अनन्तानि [रूपि]द्रव्याणि जानाति पश्यति, तानि च तैजस-भाषाप्रायोग्यवर्गणापान्तरालवर्त्तीनि द्रष्टव्यानि, उत्कर्षतः पुनः सर्वाणि रूपिद्रव्याणि बादर-सूक्ष्माणि जानाति पश्यति। तत्र ज्ञानं विशेषग्रहणात्मकं दर्शनं सामान्यपरिच्छेदात्मकम्। आह च **चूर्णिकृत्**– [१]**जाणइ त्ति णाणं, तत्थ जं विसेसग्गहणं तं नाणं, सागारं** इत्यर्थः, **पासइ त्ति दंसणं, जं सामन्नग्गहणं तं दंसणं, अणागारं, [नन्दीचू० सू० २७ पृ० २०]** इत्यर्थः।

आह– आदौ दर्शनं ततो ज्ञानमिति च क्रमः, तत एनं क्रमं परित्यज्य किमर्थं प्रथमं जानातीत्युक्तम् ?, उच्यते, इह सर्वा लब्धयः साकारोपयोगोपयुक्तस्योत्पद्यन्ते, अवधिरपि लब्धिरुपवर्ण्यते, ततः स प्रथममुत्पद्यमानो ज्ञानरूप एवोत्पद्यते न दर्शनरूपः, ततः क्रमेणोपयोगप्रवृत्तेर्ज्ञानोपयोगानन्तरं दर्शनरूपोऽपीति प्रथमतो ज्ञानमुक्तं पश्चाद् दर्शनम्; अथवा इहाध्ययने सम्यग्ज्ञानं प्ररूपयितुमुपक्रान्तम्, यतोऽनुयोगप्रारम्भेऽवश्यं मङ्गलाय ज्ञानपञ्चकरूपो भावनन्दिर्वक्तव्य इति तत्प्ररूपणार्थमिदमध्ययनमारब्धम्, ततः सम्यग्ज्ञानमिह प्रधानम्, न मिथ्याज्ञानम्, तस्य [२]माङ्गल्यहेतुत्वायोगात्, दर्शनं त्ववधिज्ञान-विभङ्गसाधारणमिति तदप्रधानम्, प्रधानानुयायी च लौकिको लोकोत्तरश्च मार्गः, ततः प्रधानत्वात् प्रथमं ज्ञानमुक्तं पश्चाद् दर्शनमिति।

---

१. जानातीति ज्ञानम्, तत्र यद् विशेषग्रहणं तद् ज्ञानं साकारमित्यर्थः, पश्यतीति दर्शनम्, यत् सामान्यग्रहणं तद्दर्शनमनाकारम्॥ २. **मंगल्य°** पा० जे१ देसं० ॥

तथा क्षेत्रतोऽवधिज्ञानी जघन्येनाङ्गुलासङ्ख्येयभागमुत्कर्षतोऽसङ्ख्येयानि अलोके लोकप्रमाणानि चतुर्दशरज्ज्वात्मकानि खण्डानि जानाति पश्यति। कालतोऽवधिज्ञानी जघन्येनाऽऽवलिकाया असङ्ख्येयभागमुत्कर्षतः **असङ्ख्येया उत्सर्पिण्यवसर्पिणीः** असङ्ख्येयोत्सर्पिण्यवसर्पिणीप्रमाणमतीतमनागतं च कालं जानाति पश्यति। भावतोऽवधिज्ञानी जघन्येनानन्तान् **भावान्** पर्यायान् आधारद्रव्यानन्तत्वात्, न तु प्रतिद्रव्यम्, प्रतिद्रव्यं सङ्ख्येयानामसङ्ख्येयानां वा पर्यायाणां दर्शनात्। उक्तं च–

एगं दव्वं पेच्छं, खंधमणुं वा स पज्जवे तस्स।
उक्कोसमसंखेज्जे, संखेज्जे पेच्छई कोइ॥१॥ [विशेषा० ७६१]

उत्कर्षतोऽप्यनन्तान् भावान् जानाति पश्यति, केवलं जघन्यपदादुत्कृष्टपदमनन्तगुणम्। आह च **चूर्णिकृत्**– **जहन्नपयाओ उक्कोसपयमणंतगुणं [नन्दीचू० सू० २७ पृ० २०]** इति। 'सव्वभावाणमणंतं भागं जाणइ पासइ' त्ति तानपि चोत्कृष्टपदवर्त्तिनो भावान् **सर्वभावानां** सर्वपर्यायाणाम् **अनन्तभागम्** अनन्तभागकल्पान् जानाति पश्यति॥ तदेवमवधिज्ञानं द्रव्यादिभेदतोऽप्यभिधाय साम्प्रतं सङ्ग्रहगाथामाह–

[सू०२९ गा०५३-५४] ओही भवपच्चतिओ, गुणपच्चतिओ य वण्णिओ एसो।
तस्स य बहू वियप्पा, दव्वे खेत्ते य काले य॥५३॥

ओही इत्यादि। **एषः** अनन्तरोक्तोऽवधिर्भवप्रत्ययतो गुणप्रत्ययतश्च **वर्णितो** व्याख्यातः। **पाठान्तरं 'वण्णिओ दुविहो'** त्ति वर्णितः **द्विविधः** द्विप्रकारः। **तस्य च** भव-गुणप्रत्ययतो द्विविधस्यापि बहवः **विकल्पाः** भेदाः। तद्यथा– **द्रव्ये** द्रव्यविषयाः कस्यापि कियद् द्रव्यं विषय इति द्रव्यभेदाद् भेदः, तथा **क्षेत्रे** क्षेत्रविषया अङ्गुलासङ्ख्येयभागादिक्षेत्रभेदात्, **काले** कालविषया आवलिकाऽसङ्ख्येय-भागादिकालभेदात्, **च**शब्दाद् भावविषयाश्च कस्यापि कियन्तः पर्याया विषय इति भावभेदाद् भेदः। तत्र जघन्यपदे प्रतिद्रव्यं चत्वारो वर्ण-गन्ध-रस-स्पर्शलक्षणाः पर्यायाः **दो पज्जवे दुगुणिए, सव्वजहन्नेण पेच्छए ते उ। वन्नाईया चउरो [विशेषा० ७६२]** इति वचनप्रामाण्यात्, मध्यमतोऽनेकसङ्ख्यभेदभिन्नाः, उत्कर्षतः प्रतिद्रव्यमसङ्ख्येयान् न तु कदाचनाप्यनन्तान्। यत आह **भाष्यकृत्**– **नाणंते पेच्छइ कयाइ॥ [विशेषा०**

७६२] तदेवमवधिज्ञानमभिधाय साम्प्रतं ये बाह्यावधयो ये चाबाह्यावधयः तानुपदर्शयति–

णेरतिय-देव-तित्थंकरा य ओहिस्सऽबाहिरा होंति ।
पासंति सव्वओ खलु, सेसा देसेण पासंति॥५४॥
सेत्तं ओहिणाणं ।

नेरइयेत्यादि। नैरयिकाश्च देवाश्च तीर्थङ्कराश्च नैरयिक-देव-तीर्थङ्कराः, तीर्थङ्करा इत्यत्र **तीर्थाच्चैके** [**मलय०**] इतिवचनात् खप्रत्यये तीर्थशब्दान्मन्, **च**शब्दोऽवधारणे, तस्य च व्यवहितः प्रयोगः, तं च दर्शयिष्यामः, नैरयिक-देव-तीर्थङ्कराः **अवधेः** अवधिज्ञानस्याबाह्या एव भवन्ति, बाह्या न कदाचनापि भवन्तीति भावः, सर्वतोऽवभासकावध्युपलब्धक्षेत्रमध्यवर्त्तिनः सदैव भवन्तीत्यर्थः। तथा पश्यन्ति **सर्वतः** सर्वासु दिक्षु विदिक्षु च, **खलु**शब्दोऽवधारणार्थः, सर्वास्वेव दिग्-विदिक्ष्विति। आह– **अवधेरबाह्या भवन्ति** इत्यस्मादेव सर्वत इत्यस्यार्थस्य लब्धत्वात् 'सर्वतः'-शब्दग्रहणमतिरिच्यते, नातिरिच्यते, अभ्यन्तरत्वाभिधानेऽपि सर्वतो दर्शनाप्रतीतेः, न खलु सर्वाभ्यन्तरावधिः सर्वतः पश्यति, कस्यचिद् दिगन्तरालादर्शनात्, विचित्रत्वादवधेः, ततः सर्वतोदर्शनख्यापनार्थं 'पासंति सव्वओ खलु' इत्युक्तम्। आह च **भाष्यकृत्**–

अब्भिंतर त्ति भणिए, भन्नइ पासंति सव्वओ कीस ?।
[१]उदइ जमसंतयदिसो, अंतो वि ठिओ न सव्वत्तो॥१॥ [**विशेषा*० ७६८**]

शेषाः तिर्यङ्-नराः, **देशेन** एकदेशेन पश्यन्ति, "सर्वं वाक्यं सावधारणम्, इष्टितश्चावधारणविधिः", तत एवमवधारणीयम्– शेषा एव देशतः पश्यन्ति, न तु शेषा देशत एवेति।

अथवा अन्यथा व्याख्यायते– तदेवमवधिज्ञानमभिधाय साम्प्रतं ये नियतावधयो ये चानियतावधयस्तान् प्रतिपादयति– **नेरइए**त्यादि। नैरयिक-देव-तीर्थङ्करा एवावधेरबाह्या भवन्ति, किमुक्तं भवति ?-नियतावधयो भवन्ति, नियमेनैषामवधिर्भवतीत्यर्थः। एवं चाभिहिते सति संशयः-किं ते देशेन पश्यन्ति ? उत सर्वतः ?, ततः संशयापनोदार्थमाह–

---

१. **आउदयजमसंतवेदिसो** खं०। **आउदयजमसंततिदिसो** पा०। **आओदइ जमसंततदिसो** जेमू१, दे०। **ओदइ जमसंततदिसो** जेसं१।

पासंति इत्यादि, 'सर्वतः खलु' सर्वत एव तेनावधिना ते नैरयिकादयः पश्यन्ति, न तु देशतः। अत्र पर आह– ननु 'पश्यन्ति सर्वतः खलु' इत्येतावदेवास्ताम्, 'अवधेरबाह्या भवन्ति' इत्येतन्न युक्तम्, यतो नियतावधित्वप्रतिपादनार्थमिदमुच्यते, तच्च नियतावधित्वं देव-नारकाणां **दोण्हं भवपच्चइयं, तंजहा-देवाणं नेरइयाणं च** [नन्दीसू० १२] इति वचनसामर्थ्यात् सिद्धम्, तीर्थकृतां तु पारभविकावधिसमन्वितागमस्यातिप्रसिद्धत्वादिति, अत्रोच्यते, इह यद्यपि **दोण्हं भवपच्चइयं** इत्यादिवचनतो नैरयिकादीनां नियतावधित्वं लब्धं तथापि सर्वकालं तेषां नियतोऽवधिरिति न लभ्यते, ततः सर्वकालं नियतावधित्वख्यापनार्थम् 'अवधेरबाह्या भवन्ति' इत्युक्तम्। आह– यद्येवं तीर्थकृतामवधेः सर्वकालावस्थायित्वं विरुध्यते, न, छद्मस्थकालस्यैव तेषां विवक्षितत्वात्, शेषं प्राग्वत्। **सेत्तं ओहिनाणं** ति। तदेतदवधिज्ञानम्॥

[सू० ३०(१)] से किं तं मणपज्जवणाणं ?, मणपज्जवणाणे णं भंते ! किं मणुस्साणं उप्पज्जइ अमणुस्साणं ?, गोयमा ! मणुस्साणं, णो अमणुस्साणं।

(२) जति मणुस्साणं किं सम्मुच्छिममणुस्साणं गब्भवक्कंतियमणुस्साणं ?, गोयमा ! णो सम्मुच्छिममणुस्साणं गब्भवक्कंतियमणुस्साणं।

(३) जइ गब्भवक्कंतियमणुस्साणं किं कम्मभूमगगब्भवक्कंतियमणुस्साणं अकम्मभूमगगब्भवक्कंतियमणुस्साणं अंतरदीवगगब्भवक्कंतियमणुस्साणं ?, गोयमा ! कम्मभूमगगब्भवक्कंतियमणुस्साणं, णो अकम्मभूमगगब्भवक्कंतियमणुस्साणं, णो अंतरदीवगगब्भवक्कंतियमणुस्साणं।

(४) जइ कम्मभूमगगब्भवक्कंतियमणुस्साणं किं संखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं असंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं ?, गोयमा ! संखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं, णो असंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं।

(५) जइ संखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं किं पज्जत्तग-

---

१. संभवंति खं० पा० ॥

संखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं अपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं ?, गोयमा ! पज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं, णो अपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं।

(६) जइ पज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं किं सम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं मिच्छदिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं सम्मामिच्छदिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं ?, गोयमा ! सम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं, णो मिच्छदिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं, णो सम्मामिच्छदिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं।

(७) जइ सम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं किं संजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं असंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं संजयासंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं ?, गोयमा ! संजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं, णो असंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं, णो संजयासंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं।

(८) जति संजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं किं पमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं अपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं ?, गोयमा ! अपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं, णो पमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं।

(९) जइ अपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं किं इड्ढिपत्तअपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतिअमणुस्साणं अणिड्ढिपत्तअपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं ?, गोयमा ! इड्ढिपत्तअपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं, णो अणिड्ढिपत्तअपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखेज्जवासाउयकम्मभूमगगब्भवक्कंतियमणुस्साणं मणपज्जवणाणं समुप्पज्जइ।

से किं तमित्यादि। अथ किं तद् मनःपर्यायज्ञानम् ?। एवं शिष्येण प्रश्ने कृते सति ये गौतमप्रश्न-भगवन्निर्वचनरूपा मनःपर्यायज्ञानोत्पत्ति-विषय-स्वामिमार्गणाद्वारेण पूर्वसूत्रालापकास्तान् वितथप्ररूपणाशङ्काव्युदासाय प्रवचनबहुमानिविनेयजनश्रद्धाभिवृद्धये च तदवस्थानेव **देववाचकः** पठति, **जावइया तिसमयाहारगस्स** [ ] इत्यादि**निर्युक्ति**गाथासूत्रमिव। **मणपज्जवना[णे] णं भंते** ! इत्यादि। **मनःपर्यायज्ञानं** प्राग्निरूपितशब्दार्थम्, **णं** इति वाक्यालङ्कारे, **भदन्त** ! इति गुर्वामन्त्रणे, **किं** इति परप्रश्ने, मनुष्याणामुत्पद्यते इति प्रकटार्थम्, 'अमनुष्याणामुत्पद्यते' इति अमनुष्याः-देवादयः तेषामुत्पद्यते ?। एवं भगवता गौतमेन प्रश्ने कृते सति परमार्हन्त्यमहिम्ना विराजमानस्त्रिलोकीपतिर्भगवान् **वर्द्धमानस्वामी** निर्वचनमभिधत्ते– **गोयमा** ! **मणुस्साण**मित्यादि। हे गौतम !, सूत्रे दीर्घत्वं **सेर्लोपः सम्बोधने ह्रस्वो वा**[१] [ ] इति **प्राकृतलक्षण**सूत्रे वाशब्दस्य लक्ष्यानुसारेण दीर्घत्वसूचनादवसेयम्, यथा 'भो वयस्सा !' इत्यादौ, मनुष्याणामुत्पद्यते नाऽमनुष्याणाम्, तेषां विशिष्टचारित्रप्रतिपत्त्यभावात्। अत्राऽऽह– ननु गौतमोऽपि चतुर्दशपूर्वधरः सर्वाक्षरसन्निपाती सम्भिन्नश्रोताः सकलप्रज्ञापनीयभावपरिज्ञानकुशलः प्रवचनस्य प्रणेता सर्वज्ञदेशीय एव, उक्तं च–

संखातीते वि भवे, साहइ जं वा परो उ पुच्छेज्जा।
न य णं अणाइसेसी, वियाणई एस छउमत्थो॥१॥ [आव० नि० गा० ५९०]

ततः किमर्थं पृच्छति ?, उच्यते, शिष्यसम्प्रत्ययार्थम्, तथाहि– तमर्थं स्वशिष्येभ्यः

---

१. डो दीर्घो वा - हैम० प्रा० ३।३८ ॥

प्ररूप्य तेषां सम्प्रत्ययार्थं तत्समक्षं भूयोऽपि भगवन्तं पृच्छति, अथवा इत्थमेव सूत्ररचनाकल्पः, ततो न कश्चिद्दोष इति॥

पुनरपि गौतम आह-यदि मनुष्याणामुत्पद्यते तर्हि किं सम्मूर्च्छिममनुष्याणामुत्पद्यते ? किं वा गर्भव्युत्क्रान्तिकमनुष्याणामुत्पद्यते ?, तत्र मुच्छा[1] मोह-समुच्छ्राययोः [मलय० धा०] सम्मूर्च्छनं सम्मूर्च्छः, भावे[2] घञ्प्रत्ययः, तेन निर्वृत्ताः सम्मूर्च्छिमाः, ते च वान्तादिसमुद्भवाः, तथा चोक्तं **प्रज्ञापनायाम्**–

कहि णं भंते ! सम्मुच्छिममणुस्सा सम्मुच्छंति ?, गोयमा ! अंतो मणुस्सखेत्ते पणयालीसाए जोयणसयसहस्सेसु अड्ढाइज्जेसु दीव-समुद्देसु पन्नरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छप्पण्णाए अंतरदीवेसु गब्भवक्कंतियमणुस्साणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणेसु वा वंतेसु वा पित्तेसु वा पूएसु वा सुक्केसु वा सोणिएसु वा सोक्कपोग्गलपरिसाडेसु वा विगयजीवकलेवरेसु वा थी-पुरिससंजोएसु वा [गामनिद्धमणेसु वा] नगरनिद्धमणेसु वा सव्वेसु चेव असुइट्ठाणेसु एत्थ णं सम्मुच्छिममणुस्सा सम्मुच्छंति अंगुलस्स असंखेज्जइभागमेत्ताए ओगाहणाए असण्णी मिच्छादिट्ठी अण्णाणी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अंतमुहुत्ताउया चेव कालं करेंति [प्रज्ञा० १।९३] इति। तथा गर्भे व्युत्क्रान्तिः-उत्पत्तिर्येषां ते गर्भव्युत्क्रान्तिकाः, अथवा गर्भाद् व्युत्क्रान्तिः– व्युत्क्रमणं निष्क्रमणं येषां ते गर्भव्युत्क्रान्तिकाः, उभयत्रापि गर्भजा इत्यर्थः। भगवानाह– नो सम्मूर्च्छिममनुष्याणामुत्पद्यते, तेषां विशिष्टचारित्रप्रतिपत्त्यसम्भवात्, किन्तु गर्भव्युत्क्रान्तिकमनुष्याणाम्। एवं सर्वेषामपि प्रश्ननिर्वचनसूत्राणां भावार्थो भावनीयः। नवरं कृषि-वाणिज्य-तपः-संयमानुष्ठानादिकर्मप्रधाना भूमयः कर्मभूमयः भरतपञ्चकै-रावतपञ्चक-महाविदेहपञ्चकलक्षणाः पञ्चदश, तासु जाताः कर्मभूमिजाः। कृष्यादिकर्मरहिताः कल्पपादपफलोपभोगप्रधाना भूमयो हैमवतपञ्चक-हरिवर्षपञ्चक-देवकुरुपञ्चकोत्तरकुरुपञ्चक-रम्यकपञ्चकैरण्यवतपञ्चकरूपास्त्रिंशद् अकर्मभूमयः, तासु जाता अकर्मभूमिजाः। तथा अन्तरे लवणसमुद्रस्य मध्ये द्वीपा अन्तरद्वीपाः-एकोरुकादयः षट्पञ्चाशत्, तेषु जाताः अन्तरद्वीपजाः।

अथ लवणसमुद्रस्य मध्ये ये षट्पञ्चाशदन्तरद्वीपा वर्त्तन्ते किंप्रमाणा वा ते ?

---

१. पा० धा० २१२, हैमधा० १२६॥ २. **भावा-ऽकर्त्रोः** - सिद्ध० ५।३।१८॥

किंस्वरूपा वा तत्र मनुष्याः ? इति, उच्यते, इह जम्बूद्वीपे भरतस्य हैमवतस्य च क्षेत्रस्य सीमाकारी भूमिनिमग्नपञ्चविंशतियोजनो योजनशतोच्छ्रायप्रमाणो भरतक्षेत्रापेक्षया द्विगुणविष्कम्भो हेममयश्चीनपट्टवर्णो नानावर्णविशिष्टद्युतिमणिनिकरपरिमण्डितपार्श्वः सर्वत्र तुल्यविस्तारो गगनमण्डलोल्लेखिरत्नमयैकादशकूटोपशोभितः तपनीयमयतल-विविध-मणिकनकमण्डिततटदशयोजनावगाढ-पूर्वपश्चिमयोजनसहस्रायाम-दक्षिणोत्तरयोजन- पञ्चशतविस्तृतपद्महृदोपशोभितशिरोमध्यभागः कल्पपादपश्रेणिरमणीयः पूर्वापरपर्यन्ताभ्यां लवणार्णवजलसंस्पर्शी हिमवान्नाम पर्वतः, तस्य लवणार्णवजलसंस्पर्शादारभ्य पूर्वस्यां पश्चिमायां च दिशि प्रत्येकं द्वे द्वे गजदन्ताकारे दंष्ट्रे विनिर्गते, तत्र [१]ऐशान्यां दिशि या विनिर्गता दंष्ट्रा तस्यां हिमवतः पर्यन्तादारभ्य त्रीणि योजनशतानि लवणसमुद्रमवगाह्य अत्रान्तरे योजनशतत्रयायाम-विष्कम्भः किञ्चिन्न्यूनैकोनपञ्चाशदधिकनवयोजनशतपरिरय एकोरुकनामा द्वीपो वर्त्तते, अयं च पञ्चधनुःशतप्रमाणविष्कम्भया गव्यूतद्वयोच्छ्रितया पद्मवरवेदिकया वनखण्डेन च सर्वतः परिमण्डितः, एवं तस्यैव हिमवतः पर्वतस्य पर्यन्तादारभ्य दक्षिणपूर्वस्यां दिशि त्रीणि योजनशतानि लवणसमुद्रमवगाह्य द्वितीयदंष्ट्रायामुपरि एकोरुकद्वीपप्रमाण आभासिकनामा द्वीपो वर्त्तते, तथा तस्यैव हिमवतः पश्चिमायां दिशि पर्यन्तादारभ्य दक्षिणपश्चिमायां नैर्ऋतकोणानुसारेण इत्यर्थः त्रीणि योजनशतानि लवणसमुद्रे दंष्ट्रामतिक्रम्यात्रान्तरे यथोक्तप्रमाणो वैषाणिकनामा द्वीपोऽवतिष्ठते, तथा तस्यैव हिमवतः पश्चिमायामेव दिशि पर्यन्तादारभ्य पश्चिमोत्तरस्यां दिशि वायव्यकोणानुसारेण इत्यर्थः त्रीणि योजनशतानि लवणसमुद्रमध्ये चतुर्थीं दंष्ट्रामतिक्रम्यात्रान्तरे पूर्वोक्तप्रमाणो नङ्गोलिकनामा द्वीपो वर्त्तते। एवमेते चत्वारो द्वीपा हिमवतः चतसृष्वपि विदिक्षु तुल्यप्रमाणा अवतिष्ठन्ते। उक्तं च–

चुल्लहिमवंतपुव्वावरेण विदिसासु सागरं तिसए।
गंतूणंतरदीवा, तिन्नि सए होंति वित्थिण्णा॥१॥
अउणापन्ननवसए, किंचूणे परिहि एसिमे नामा।
एगोरुय आभासिय, वेसाणी चेव नंगूली॥२॥ [बृहत्क्षेत्र० २।५५-५६]

१. **चैशान्यां** खं० ॥

तत एतेषामेकोरुकादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं चत्वारि चत्वारि योजनशतान्यतिक्रम्य चतुर्योजनशतायामविष्कम्भाः किञ्चिन्न्यूनपञ्चषष्ट्यधिकद्वादशयोजनशतपरिक्षेपाः यथोक्तपद्मवरवेदिका-वनखण्ड-मण्डितपरिसराः हयकर्ण-गजकर्ण-गोकर्ण-शष्कुलीकर्णनामानश्चत्वारो द्वीपाः। तद्यथा— एकोरुकस्य परतो हयकर्णः, आभासिकस्य परतो गजकर्णः, वैषाणिकस्य परतो गोकर्णः, नङ्गोलिकस्य परतः शष्कुलीकर्ण इति। तत एतेषामपि हयकर्णादीनां चतुर्णां द्वीपानां परतः पुनरपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं पञ्च पञ्च योजनशतानि व्यतिक्रम्य पञ्चयोजनशतायाम-विष्कम्भा एकाशीत्यधिकपञ्चदशयोजनशतपरिक्षेपाः पूर्वोक्तप्रमाणपद्मवरवेदिका-वनखण्डमण्डितबाह्यप्रदेशा आदर्शमुख-मेण्ढमुखा-ऽयोमुख-गोमुखनामानश्चत्वारो द्वीपाः, तद्यथा-हयकर्णस्य परत आदर्शमुखः, गजकर्णस्य परतो मेण्ढमुखः, गोकर्णस्य परतो अयोमुखः, शष्कुलीकर्णस्य परतो गोमुख इति। एवमग्रेऽपि भावना कार्या। तत एतेषामप्यादर्शमुखादीनां चतुर्णां द्वीपानां परतो भूयोऽपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं षट् षड् योजनशतान्यतिक्रम्य षड्योजनशतायामविष्कम्भाः सप्तनवत्यधिकाष्टादशयोजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिका-वनखण्ड-मण्डितपरिसरा अश्वमुख-हस्तिमुख-सिंहमुख-व्याघ्रमुखनामानश्चत्वारो द्वीपाः। तत एतेषामप्यश्वमुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं सप्त सप्त योजनशतानि अतिक्रम्य सप्तयोजनशतायाम-विष्कम्भास्त्रयोदशाधिक-द्वाविंशतियोजनशतपरिधयः पूर्वोक्तप्रमाणपद्मवरवेदिका-वनखण्डसमवगूढा अश्वकर्ण-हरिकर्णा-ऽकर्ण-कर्णप्रावरणनामानश्चत्वारो द्वीपाः। तत एतेषामप्यश्वकर्णादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकमष्टावष्टौ योजनशतान्यतिक्रम्य अष्टयोजनशतायामविष्कम्भा एकोनत्रिंशदधिकपञ्चविंशतियोजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिका-वनखण्डमण्डितपरिसरा मूकमुख-मेघमुख-विद्युन्मुख-विद्युद्दन्ताभिधानाश्चत्वारो द्वीपाः। ततोऽमीषामपि मूकमुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं नव नव योजनशतान्यतिक्रम्य नवयोजन-शतायामविष्कम्भाः पञ्चचत्वारिंशदधिकाष्टाविंशतियोजनशतपरिक्षेपा यथोक्तप्रमाण-

पद्मवरवेदिका-वनखण्डसमवगूढाः समदन्त-लष्टदन्त-गूढदन्त-शुद्धदन्तनामानश्चत्वारो द्वीपाः। एवमेते हिमवति पर्वते चतसृषु विदिक्षु व्यवस्थिताः सर्वसङ्ख्यया अष्टाविंशतिसङ्ख्या द्वीपाः। एवं हिमवत्तुल्यवर्णप्रमाणे पद्महृदप्रमाणायाम-विष्कम्भा-ऽवगाहपुण्डरीकह्रदोपशोभिते शिखरिण्यपि पर्वते लवणार्णवजलसंस्पर्शादारभ्य चतसृषु विदिक्षु व्यवस्थिताः एकोरुकादिनामानोऽक्षूणापान्तरालायाम-विष्कम्भा अष्टाविंशति-सङ्ख्या द्वीपा वक्तव्याः। ततः सर्वसङ्ख्यया षट्पञ्चाशदन्तरद्वीपाः।

एतेषु च वर्त्तमाना मनुष्या अपि एतन्नामानो भवन्ति, भवति च निवासयोगतः तथाव्यपदेशः, यथा– पञ्चालजनपदनिवासिनः पुरुषाः पञ्चाला इति। तेऽपि चान्तरद्वीपवासिनो मनुष्या वज्रर्षभनाराचसंहनिनः समचतुरस्रसंस्थानसंस्थिताः समग्रशुभलक्षण-तिलक-मषपरिकलिता देवलोकानुकारिरूप-लावण्या-ऽलङ्कार-शोभितविग्रहा अष्टधनुःशतप्रमाणशरीरोच्छ्रयाः, स्त्रीणां त्विदमेव किञ्चिन्न्यूनं द्रष्टव्यम्, तथा पल्योपमासङ्ख्येयभागप्रमाणायुषः स्त्रीपुरुषयुगलव्यवस्थिताः दशविधकल्प-पादपसम्पाद्योपभोगसम्पदः प्रकृत्यैव शुभचेतसो विनीताः प्रतनुक्रोध-मान-माया-लोभाः सन्तोषिणो निरौत्सुक्याः कामचारिणो वायुवेगाः सत्यपि मनोहारिणि मणि-कनक-मौक्तिकादिके ममत्वकारणे ममत्वाभिनिवेशरहिताः सर्वथापगतवैरानुबन्धाः परस्परप्रैषादिभावविनिर्मुक्ता अत एवाहमिन्द्रा हस्त्यश्व-करभ-गो-महिष्यादीनां सद्भावेऽपि तत्परिभोगपराङ्मुखाः पादविहारचारिणो रोगवेदनादिविकला वर्त्तन्ते, चतुर्थाच्चाऽऽहारमेते गृह्णन्ति, चतुःषष्टिश्च पृष्ठकरण्डकास्तेषाम्, षण्मासावशेषायुषश्चामी स्त्री-पुरुषयुगलं प्रसुवते, एकोनाशीतिदिनानि च तत् परिपालयन्ति, स्तोकस्नेह-कषायतया च ते मृत्वा देवलोकमुपसर्पन्ति। उक्तं च–

अंतरदीवेसु नरा, धणुसयअट्ठूसिया सया मुइया।
पालंति मिहुणधम्मं, पल्लस्स असंखभागाऊ॥१॥

चउसट्ठीपिट्ठकरंडयाण मणुयाण तेसिमाहारो।
भत्तस्स चउत्थस्स य, उणसीतिदिणाणि पालणया॥२॥ [बृहत्क्षेत्र० २।७३-७४]

इत्यादि। तिर्यञ्चोऽपि च तत्र व्याघ्र-सिंह-सर्पादयो रौद्रभावरहिततया न परस्परं हिंस्य-हिंसकभावे वर्त्तन्ते, तत एव तेऽपि देवलोकगामिनो भवन्ति। तेषु च द्वीपेषु शाल्यादीनि धान्यानि विस्रसात एव समुत्पद्यन्ते परं न तानि मनुष्यादीनां परिभोगाय जायन्ते, यतो भूमिमृत्तिका कल्पपादपानां पुष्प-फलानि च शर्करातोऽप्यतीव-माधुर्यादिगुणोपेतानि, ततस्तान्येव मनुष्यादीनां परिभोगाय कल्पन्ते। तेषु च द्वीपेषु दंश-मशक-यूका-मत्कुणादयः शरीरोपद्रवकारिणोऽनिष्टसूचकाश्च चन्द्र-सूर्योपरागादयो न भवन्ति। भूमिरपि तत्र रेणु-पङ्क-कण्टकादिरहिता सकलदोषपरित्यक्ता सर्वत्र समतला रमणीया च वर्त्तत इति।

तथा **संखेज्जवासाउय** त्ति सङ्ख्येयवर्षायुषः-पूर्वकोट्यादिजीविनः, असङ्ख्येय-वर्षायुषः-पल्योपमादिजीविनः। तथा **पज्जत्तग** त्ति पर्याप्तिः-आहारादिपुद्गलग्रहण-परिणमनहेतुरात्मनः शक्तिविशेषः, स च पुद्गलोपचयात्, किमुक्तं भवति ?- उत्पत्ति-देशमागतेन ये गृहीता आहारादिपुद्गलास्तेषां तथा अन्येषां च प्रतिसमयं गृह्यमाणानां तत्सम्पर्कतः तद्रूपतया जातानामुपष्टम्भेन यः शक्तिविशेषो जीवस्याऽऽहारादिपुद्गलानां खल-रसादिरूपतया परिणमनहेतुः, यथा– उदरान्तर्गतानां पुद्गलविशेषाणामवष्टम्भेना-ऽऽहारपुद्गलखल-रसरूपतापादनहेतुः शक्तिविशेषः, सा पर्याप्तिः। सा च षोढा, तद्यथा– आहारपर्याप्तिः शरीरपर्याप्तिः इन्द्रियपर्याप्तिः प्राणापानपर्याप्तिः भाषापर्याप्तिः मनःपर्याप्तिश्चेति। तत्र यया बाह्यमाहारमादाय खल-रसरूपतया परिणमयति साऽऽहारपर्याप्तिः १। यया रसीभूतमाहारं रसा-ऽसृग्मांस-मेदो-ऽस्थि-मज्ज-शुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः २। यया धातुरूपतया परिणमितमाहारमिन्द्रियरूपतया परिणमयति सा इन्द्रियपर्याप्तिः ३। यया पुनरुच्छ्वासप्रायोग्यवर्गणादलिकमादायोच्छ्वासरूपतया परिणमय्याऽऽलम्ब्य च मुञ्चति सा उच्छ्वासपर्याप्तिः ४। यया तु भाषाप्रायोग्य-वर्गणादलिकमादाय भाषात्वेन परिणमय्याऽऽलम्ब्य च मुञ्चति सा भाषापर्याप्तिः ५। यया पुनर्मनोयोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमय्याऽऽलम्ब्य च मुञ्चति सा मनःपर्याप्तिः ६। एताश्च यथाक्रममेकेन्द्रियाणां संज्ञिवर्जानां द्वीन्द्रियादीनां संज्ञिनां च चतुः-पञ्च-षट्सङ्ख्या भवन्ति। उत्पत्तिप्रथमसमय एव चैता यथायथं सर्वा अपि

युगपन्निष्पादयितुमारभ्यन्ते क्रमेण च निष्ठामुपयान्ति, तद्यथा– प्रथममाहारपर्याप्तिः ततः शरीरपर्याप्तिः तत इन्द्रियपर्याप्तिरित्यादि, आहारपर्याप्तिश्च प्रथमसमय एव निष्पत्तिमुपपद्यते, शेषास्तु प्रत्येकमन्तर्मुहूर्त्तेन कालेन।

अथाऽऽहारपर्याप्तिः प्रथमसमय एव निष्पद्यते इति कथमवसीयते ?, उच्यते, इह भगवता **आर्यश्यामेन प्रज्ञापनायामाहारपदे** द्वितीयोद्देशके सूत्रमिदमपाठि– **आहारपज्जत्तीए[1] अपज्जत्तए णं भंते ! किं आहारए अणाहारए ?, गोयमा ! नो आहारए अणाहारए** [**प्रज्ञापना० २८।२।१९०५**] त्ति, तत आहारपर्याप्त्या अपर्याप्तो विग्रहगतावेवोपपद्यते, नोपपातक्षेत्रमागतोऽपि, उपपातक्षेत्रमागतस्य प्रथमसमय एवाऽऽहारकत्वात्, तत एकसामायिकी आहारपर्याप्तिनिर्वृत्तिः, यदि पुनरुपपातक्षेत्रमागतोऽपि आहारपर्याप्त्या अपर्याप्तः स्यात् तत एवं सति व्याकरणसूत्रमित्थं पठेत्– 'सिय आहारए सिय अणाहारए' यथा शरीरादिपर्याप्तिषु 'सिय आहारए सिय अणाहारए' इति। सर्वासामपि च पर्याप्तीनां परिसमाप्तिकालोऽन्तर्मुहूर्त्तप्रमाणः। पर्याप्तयो विद्यन्ते येषां ते पर्याप्ताः **अभ्रादिभ्यः** [**मलय० त० पा० ७ सू० ४१**] इति मत्वर्थीयोऽप्रत्ययः।

ये पुनः स्वयोग्यपर्याप्तिपरिसमाप्तिविकलास्ते अपर्याप्ताः। ते च द्विधा-लब्ध्या करणैश्च। तत्र येऽपर्याप्तका एव सन्तो म्रियन्ते न पुनः स्वयोग्यपर्याप्तीः सर्वा अपि समर्थयन्ते ते लब्ध्यपर्याप्तकाः, तेऽपि नियमादाहार-शरीरेन्द्रियपर्याप्तिपरिसमाप्तावेव म्रियन्ते, नार्वाक्, यस्मादागामिभवायुर्बद्ध्वा म्रियन्ते सर्व एव देहिनः, तच्चाऽऽहार-शरीरेन्द्रियपर्याप्तिपर्याप्तानामेव बध्यत इति। ये पुनः करणानि शरीरेन्द्रियादीनि न तावन्निर्वर्त्तयन्ति अथ चावश्यं निर्वर्त्तयिष्यन्ति ते करणापर्याप्तकाः। इहोभयेषामप्यपर्याप्तानां प्रतिषेधः, उभयेषामपि विशिष्टचारित्रप्रतिपत्त्यसम्भवात्।

तथा **सम्मद्दिट्ठि** त्ति **सम्यग्** अविपरीता **दृष्टिः** जिनप्रणीतवस्तुप्रतिपत्तिर्येषां ते सम्यग्दृष्टयः। **मिथ्या** विपरीता दृष्टिर्येषां ते मिथ्यादृष्टयः। सम्यक् च मिथ्या च दृष्टिर्येषां ते सम्यग्मिथ्यादृष्टयः, येषामेकस्मिन्नपि वस्तुनि तत्पर्याये वा मतिदौर्बल्यादिना एकान्तेन सम्यक्परिज्ञान-मिथ्याज्ञानाभावतो न सम्यक्श्रद्धानं नाप्येकान्ततो विप्रतिपत्तिः ते

१.आहारपर्याप्त्या अपर्याप्तो भदन्त ! किमाहारकोऽनाहारको ?, गौतम ! नो आहारकः अनाहारकः।

सम्यग्मिथ्यादृष्टयः। उक्तं च **शतकबृहच्चूर्णौ**– [१]**जहा नालिकेरदीववासिस्स खुहाइयस्स वि एत्थ समागयस्स ओयणाइए अणेगविहे ढोइए तस्स आहारस्स उवरिं न रुई न य निंदा, जओ तेण सो ओयणाइओ आहारो न कयाइ दिट्ठो नावि सुओ, एवं सम्मामिच्छद्दिट्ठिस्स वि जीवाइपयत्थाणं उवरिं न य रुई नावि निंद [ ] त्ति।**

तथा **संजय** त्ति [२]यम् उपरमे [मलय० धा०] संयच्छन्ति स्म-सर्वसावद्ययोगेभ्यस्सम्यगुपरमन्ते स्मेति संयताः, [३]गत्यकर्मण्याधारे च [*शाकटा० ४।३।५३] इति कर्त्तरि क्तप्रत्ययः, संयताः– सकलचारित्रिणः। असंयताः– अविरतसम्यग्दृष्टयः। संयतासंयताः– देशविरतिमन्तः। तथा **पमत्त** त्ति प्रमाद्यन्ति स्म मोहनीयादिकर्मोदयप्रभावतः सञ्ज्वलनकषाय-निद्राद्यन्यतमप्रमादयोगतः संयमयोगेषु सीदन्ति स्मेति प्रमत्ताः, पूर्ववत् कर्त्तरि क्तप्रत्ययः, ते च प्रायो गच्छवासिनः, तेषां क्वचिदनुपयोगसम्भवात्। तद्विपरीता अप्रमत्ताः, ते च प्रायो जिनकल्पिक-परिहारविशुद्धिक-यथालन्दकल्पिकप्रतिमाप्रतिपन्नाः, तेषां सततोपयोगसम्भवात्; इह तु ये गच्छवासिनः तन्निर्गता वा प्रमादरहिताः तेऽप्रमत्ता द्रष्टव्याः। तथा **इड्ढिपत्तस्स** इति, ऋद्धीः– आमर्षौषध्यादिलक्षणाः प्राप्ता ऋद्धिप्राप्ताः, तद्विपरीता अनृद्धिप्राप्ताः। ऋद्धीश्च प्राप्नुवन्ति विशिष्टमुत्तरोत्तरमपूर्वापूर्वार्थप्रतिपादकं श्रुतमवगाहमानाः श्रुतसामर्थ्यतस्तीव्रां तीव्रतरां शुभभावनामधिरोहन्तोऽप्रमत्तयतयः। तथा चोक्तम्–

अवगाहते च स श्रुतजलधिं प्राप्नोति चावधिज्ञानम्।
मानसपर्यायं वा, ज्ञानं कोष्ठादिबुद्धीर्वा॥१॥
चारण-वैक्रिय-सर्वौषधताद्या वा[ऽपि ?] लब्धयस्तस्य।
प्रादुर्भवन्ति गुणतो, बलानि वा मानसादीनि॥२॥ [ ]

अत्र 'सः' इति अप्रमत्तयतिः। 'मानसपर्यायम्' इति मानसाः- मनःसम्बन्धिनः पर्याया विषयो यस्य तन्मानसपर्यायम्, मनःपर्यायज्ञानमित्यर्थः। 'कोष्ठादिबुद्धीर्वा' इति,

---

१. यथा नालिकेरद्वीपवासिनः क्षुधार्दितस्यापीहागतस्यौदनादिकेऽनेकविधे ढौकिते तस्योपरि न रुचिः नापि निन्दा, यतस्तेन स ओदनादिक आहारो न कदाचित् दृष्टो नापि श्रुतः, एवं सम्यग्मिथ्यादृष्टेरपि जीवादिपदार्थानामुपरि न च रुचिर्नापि निन्देति॥ २. "यमूं उपरमे।" हैमधा० ३८६। "यम उपरमे ।" पा० धा० ९८४ ॥ ३. **गत्यर्थ-नित्याकर्मकात् ॥ अद्यर्थात् च आधारे ॥** [मलय० कृ० पा० १ सू० ७-८] **गत्यर्था-ऽकर्मक-पिब-भुजेः।। अद्यर्थाच्चाऽऽधारे** - सिद्धहेम० ५।१।११-१२॥

अत्राऽऽदिशब्दात् पदानुसारि-बीजपरिग्रहः। तिस्रो हि बुद्धयः परमातिशयरूपाः प्रवचने प्रतिपाद्यन्ते, तद्यथा– कोष्ठबुद्धिः पदानुसारिणी बुद्धिः बीजबुद्धिश्च। तत्र कोष्ठ इव धान्यं या बुद्धिराचार्यमुखाद् विनिर्गतौ तदवस्थावेव सूत्रार्थौ धारयति, न किमपि तयोः सूत्रार्थयोः कालान्तरेऽपि गलति सा कोष्ठबुद्धिः। या पुनरेकमपि सूत्रपदमवधार्य शेषमश्रुतमपि तदवस्थमेव श्रुतमवगाहते सा पदानुसारिणी। या पुनरेकमर्थपदं तथाविधमनुसृत्य शेषमश्रुतमपि यथावस्थितप्रभूतमर्थमवगाहते सा बीजबुद्धिः, सा च सर्वोत्तमप्रकर्षप्राप्ता भगवतां गणभृताम्, ते हि उत्पादादिपदत्रयमवधार्य सकलमपि द्वादशाङ्गात्मकं प्रवचनमभिसूत्रयन्ति॥१॥

तथा चारणश्च वैक्रियं च सर्वौषधश्च चारण-वैक्रिय-सर्वौषधाः, तद्भावः चारण-वैक्रिय-सर्वौषधता। तत्र चरणं गमनं तद् विद्यते येषां ते चारणाः, **ज्योत्स्नादिभ्योऽण्** [*मलय० त० पा०७ सू०९] इति मत्वर्थीयोऽण्प्रत्ययः, तत्र गमनमन्येषामपि मुनीनां विद्यते ततो विशेषणान्यथानुपपत्त्या चरणमिह विशिष्टं गमनमभिगृह्यते, अत एवातिशायने मत्वर्थीयः, यथा रूपवती कन्येत्यत्र, ततोऽयमर्थः– अतिशयचरणसमर्थाश्चारणाः। तथा चाह **भाष्यकृत् स्वभाष्यटीकायाम्**– **अतिशयचरणाच्चारणाः, अतिशयगमनादित्यर्थः।** [**विशेषा० स्व० गा० ७८२ पृ० १५०**] ते च द्विधा-जङ्घाचारणा विद्याचारणाश्च। तत्र ये चारित्र-तपोविशेषप्रभावतः समुद्भूत[गगन]गमनविषयलब्धिविशेषास्ते जङ्घाचारणाः। ये पुनर्विद्यावशतः समुत्पन्नगगनगमनलब्ध्यतिशयाः ते विद्याचारणाः। जङ्घाचारणास्तु रुचकवरद्वीपं यावद् गन्तुं समर्थाः, विद्याचारणा नन्दीश्वरम्। तत्र जङ्घाचारणा यत्र कुत्रापि गन्तुमिच्छवः तत्र रविकरानपि निश्रीकृत्य गच्छन्ति, विद्याचारणास्त्वेवमेव। जङ्घाचारणश्च रुचकवरद्वीपं गच्छन्नेकेनैवोत्पातेन गच्छति, प्रतिनिवर्त्तमानस्त्वेकेनोत्पातेन नन्दीश्वरमायाति द्वितीयेन स्वस्थानम्; यदि पुनर्मेरुशिखरं जिगमिषुस्तर्हि प्रथमेनैवोत्पातेन पण्डकवनमधिरोहति, प्रतिनिवर्त्तमानतु प्रथमेनोत्पातेन नन्दनवनमागच्छति द्वितीयेन स्वस्थानमिति। जङ्घाचारणो हि चारित्रातिशयप्रभावतो भवति, ततो लब्ध्युपजीवने औत्सुक्यभावतः प्रमादसम्भवाच्चारित्रातिशयनिबन्धना लब्धिरपहीयते, ततः

१. सद्भूतगगनविषय° खं० ॥

प्रतिनिवर्त्तमानो द्वाभ्यामुत्पाताभ्यां स्वस्थानमायाति। विद्याचारणः पुनः प्रथमेनोत्पातेन मानुषोत्तरं पर्वतं गच्छति द्वितीयेन तु नन्दीश्वरम्, प्रतिनिवर्त्तमानस्त्वेकेनैवोत्पातेन स्वस्थानमायाति; तथा मेरुं गच्छन् प्रथमेनोत्पातेन नन्दनवनं गच्छति द्वितीयेन पण्डकवनम्, प्रतिनिवर्त्तमानस्त्वेकेनैवोत्पातेन स्वस्थानमायाति। विद्याचारणो हि विद्यावशाद् भवति, विद्या च परिशील्यमाना स्फुटा स्फुटतरोपजायते, ततः प्रतिनिवर्त्तमानस्य शक्त्यतिशय-सम्भवादेकेनोत्पातेन स्वस्थानागमनमिति। उक्तं च–

अइसयचरणसमत्था, जंघा-विज्जाहि चारणा मुणओ।
जंघाहिं जाइ पढमो, नीसं काउं रविकरे वि॥१॥
एगुप्पाएण गओ, रुयगवरम्मि उ तओ पडिनियत्तो।
बिइएणं नंदिस्सरमिहं ततो एइ तइएणं॥२॥
पढमेण पंडगवणं, बिइउप्पाएण नंदणं एइ।
तइउप्पाएण ततो, इह जंघाचारणो एइ॥३॥
पढमेण माणुसोत्तरनगं स णंदिस्सरं तु बिइएणं।
एइ तओ तइएणं, कयचेइयवंदणो इहइं॥४॥
पढमेण नंदणवणे, बिइउप्पाएण पंडगवणम्मि।
एइ इहं तइएणं, जो विज्जाचारणो होइ॥५॥ [**विशेषा* ७८६-७९०**]

तथा सर्वं विण्मूत्रादिकमौषधं यस्य स सर्वौषधः। किमुक्तं भवति ? यस्य मूत्रं विट् श्लेष्मा शरीरमलो वा रोगोपशमसमर्थो भवति स सर्वौषधः। आद्यशब्दादामर्षौषध्यादिलब्धिपरिग्रहः। तथा आमर्षौषध्यादीनामन्यतमामृद्धिमवध्यृद्धिं वा प्राप्तस्य मनःपर्यायज्ञानमुत्पद्यते, नानृद्धिप्राप्तस्य। **अन्ये** त्ववध्यृद्धिप्राप्तस्यैवेति नियममाचक्षते, तदयुक्तम्, **सिद्धप्राभृता**दावविधिमन्तरेणापि मनःपर्यायज्ञानस्यानेकशोऽभिधानात्॥२॥

अत्राऽऽह– मनुष्याणामुत्पद्यते इत्युक्ते सामर्थ्यादमनुष्याणां नोत्पद्यते इत्यवसीयते, ततः कथमुच्यते 'नो अमणुस्साणं उप्पज्जइ' इत्यादि, निरर्थकत्वात् ? उच्यते, इह त्रिधा विनेयाः, तद्यथा– उद्घटितज्ञा मध्यमबुद्धयः प्रपञ्चितज्ञाश्च, तत्र ये उद्घटितज्ञा मध्यमबुद्धयो वा ते यथोक्तं सामर्थ्यमवबुध्यन्ते, ये पुनरद्याप्यव्युत्पन्नत्वाद् न यथोक्तसामर्थ्यावगमकुशलाः ते प्रपञ्चितमेवावगन्तुमीशते ततस्तेषामनुग्रहाय सामर्थ्यलब्धस्यापि विपक्षनिषेधस्याभिधानम्, **महीयांसो हि परमकरुणापरीत-**

त्वादविशेषेण सर्वेषामनुग्रहाय प्रवर्त्तन्ते, ततो न कश्चिद्दोषः।

[सू० ३१] तं च दुविहं उप्पज्जइ, तंजहा– उज्जुमती य विउलमती य।

[सू० ३२] तं समासओ चउव्विहं पण्णत्तं, तंजहा-दव्वओ खेत्तओ कालओ भावओ। तत्थ दव्वओ णं उज्जुमती अणंते अणंतपदेसिए खंधे जाणइ पासइ, ते चेव विउलमती अब्भहियतराए विउलतराए विसुद्धतराए वितिमिरतराए जाणति पासति १। खेत्तओ णं उज्जुमती अहे जाव इमीसे रयणप्पभाए पुढवीए उवरिमहेट्ठिल्ले खुड्डागपयरे, उड्ढं जाव जोतिसस्स उवरिमतले, तिरियं जाव अंतोमणुस्सखित्ते अड्ढाइज्जेसु दीव-समुद्देसु सण्णीणं पंचेंदियाणं पज्जत्तगाणं मणोगते भावे जाणइ पासइ, तं चेव विउलमती अड्ढाइज्जेहिं अंगुलेहिं अब्भहियतरं विउलतरं विसुद्धतरं वितिमिरतरं खेत्तं जाणति पासति २। कालओ णं उज्जुमती जहण्णेणं पलिओवमस्स असंखेज्जतिभागं उक्कोसेण वि पलिओवमस्स असंखेज्जतिभागं अतीयमणागयं वा कालं जाणति पासति, तं चेव विउलमती अब्भहियतरागं विउलतरागं विसुद्धतरागं वितिमिरतरागं जाणइ पासइ ३। भावओ णं उज्जुमती अणंते भावे जाणइ पासइ सव्वभावाणं अणंतभागं जाणइ पासइ, तं चेव विउलमती अब्भहियतरागं विउलतरागं विसुद्धतरागं वितिमिरतरागं जाणइ पासइ ४।

[सू० ३३, गा०५५] मणपज्जवणाणं पुण, जणमणपरिचिंतियत्थपायडणं।
माणुसखेत्तणिबद्धं, गुणपच्चइयं चरित्तवओ [५५]॥
सेत्तं मणपज्जवणाणं।

तत्र मनः पर्यायज्ञानम् ऋद्धिप्राप्तानामप्रमत्तसंयतानामुत्पद्यमानं द्विधोत्पद्यते। तद्यथा– ऋजुमतिश्च विपुलमतिश्च। तत्र मननं मतिः, संवेदनमित्यर्थः, **ऋज्वी** सामान्यग्राहिणी मतिः ऋजुमतिः, घटोऽनेन चिन्तित इत्यादिसामान्याकाराध्यवसायनिबन्धनभूता कतिपयपर्यायविशिष्टमनोद्रव्यपरिच्छित्तिरित्यर्थः। उक्तं च **भाष्यकृता**–

रिजु सामन्नं तम्मत्तगाहिणी रिजुमई मणोणाणं।
पायं विसेसविमुहं, घडमेत्तं चिंतियं मुणइ॥१॥ [विशेषा० ७८४]

चूर्णिकृदप्याह– **उस्सण्णं विसेसविमुहं उवलहइ, नाईव बहुविसेसविसिट्ठं अत्थं उवलभइ त्ति भणियं होइ, घडोऽणेण चिंतिओ त्ति जाणइ [नन्दीचू० सू० ३० पत्रं २२]** त्ति। चशब्दः स्वगतानेकद्रव्य-क्षेत्रादिभेदसूचकः। तथा **विपुला** विशेषग्राहिणी मतिः विपुलमतिः, घटोऽनेन चिन्तितः, स च सौवर्णः पाटलिपुत्रकोऽद्यतनो महान् अपवरकस्थितः फलपिहित इत्याद्यवसायहेतुभूता प्रभूतविशेषविशिष्टमनोद्रव्य-परिच्छित्तिरित्यर्थः। आह च **भाष्यकृत्**–

विपुलं वत्थुविसेसणनाणं तग्गाहिणी मई विपुला।
चिंतियमणुसरइ घडं, पसंगओ पज्जवसएहिं॥१॥ [विशेषा* ० ७८५]

चूर्णिकृदप्याह– **विपुला मई विपुलमई, बहुविसेसगाहिणि त्ति भणियं होइ, दिट्ठंतो जहाऽणेण घडो चिंतिओ, तं च देस-कालाइअणेगपज्जायविसेसविसिट्ठं जाणइ [नन्दीचू० ३० पत्रं २२]** त्ति। **च**शब्दः पूर्ववत्। अस्यां च व्युत्पत्तौ स्वतन्त्रमेव ज्ञानमभिधेयम्। यदा पुनस्तद्वानभिधेयो विवक्ष्यते तदैवं व्युत्पत्तिः– **ऋज्वी** सामान्यग्राहिणी मतिरस्य स ऋजुमतिः, तथा **विपुला** विशेषग्राहिणी मतिरस्य स विपुलमतिः।

तं समासओ इत्यादि। **तद्** मनःपर्यायज्ञानं द्विविधमपि **समासतः** सङ्क्षेपेण चतुर्विधं प्रज्ञप्तम्, तद्यथा– द्रव्यतः क्षेत्रतः कालतो भावतश्च। तत्र द्रव्यतः **णं** इति वाक्यालङ्कारे, ऋजुमतिरनन्तान् **अनन्तप्रादेशिकान्**[1] अनन्तपरमाण्वात्मकान् **स्कन्धान्** विशिष्टैकपरिणामपरिणतान् अर्द्धतृतीयद्वीप-समुद्रान्तर्वर्त्तिपर्याप्तसञ्ज्ञिपञ्चेन्द्रियैर्मनस्त्वेन परिणा(ण)मितान् **पुद्गलान्** पुद्गलसमूहानित्यर्थः **जानाति** साक्षात्कारेणावगच्छति **पासइ** त्ति इह मनस्त्वपरिणतैः स्कन्धैरालोचितं बाह्यमर्थं घटादिलक्षणं साक्षादध्यक्षतो मनःपर्यायज्ञानी न जानाति, किन्तु मनोद्रव्याणामेव तथारूपपरिणामान्यथानुपपत्तितो-ऽनुमानतः। आह च **भाष्यकृत्**– **जाणइ बज्झेऽणुमाणेणं। [विशेषा* ० गा० ८१४]**, इत्थं चैतदङ्गीकर्त्तव्यम्, यतो मूर्त्तद्रव्यालम्बनमेवेदं मनःपर्यायज्ञानमिष्यते, मन्तारस्त्वमूर्त्तमपि धर्मास्तिकायादिकं मन्यन्ते, ततोऽनुमानत एव चिन्तितमर्थमवबुध्यन्ते नान्यथेति प्रतिपत्तव्यम्, ततस्तमधिकृत्य पश्यतीत्युच्यते, तत्र मनोनिमित्तस्याचक्षुर्दर्शनस्य सम्भवात्।

---

१. °प्रदेशिकान् जे१ ॥

आह च **चूर्णिकृत्**— **मणियमत्थं पुण पच्चक्खओ न पेक्खइ, जेण मणोदव्वालंबणं मुत्तममुत्तं वा, सो य छउमत्थो तं अणुमाणओ पेक्खइ, अतो पासणया भणिया [नन्दीचू० सू० ३१-३२ पृ० २४]** इति।

अथवा सामान्यत एकरूपेऽपि ज्ञाने क्षयोपशमस्य तत्तद्द्रव्याद्यपेक्षवैचित्र्य-सम्भवादनेकविध उपयोगः सम्भवति, यथाऽत्रैव ऋजुमति-विपुलमतिरूपः, ततो विशिष्टतरमनोद्रव्याकारपरिच्छेदापेक्षया जानातीत्युच्यते, सामान्यरूपमनोद्रव्याकार-परिच्छेदापेक्षया तु पश्यतीति। तथा चाह **चूर्णिकृत्**— **अहवा छउमत्थस्स एगविहखओवसमलंभे वि विविहोवओगसंभवो भवइ, जहा एत्थेव ऋजुमइ-विपुलमईणं उवओगो, अतो विसेससामन्नत्थेसु उवजुज्जओ जाणइ पासइ त्ति भणियं, न दोसो [नन्दीचू० सू० ३१-३२ पृ० २४]** इति। अत्र 'एगविहखओवसमलंभे वि' त्ति सामान्यत एकरूपेऽपि क्षयोपशमलम्भेऽपान्तराले द्रव्याद्यपेक्षया क्षयोपशमस्य विशेषसम्भवाद् विविधो-पयोगसम्भवो भवतीति।

तदेवं विशिष्टतरमनोद्रव्याकारपरिच्छेदापेक्षया सामान्यरूपमनोद्रव्याकारपरिच्छेदो व्यवहारतो दर्शनरूप उक्तः, परमार्थतः पुनः सोऽपि ज्ञानमेव, यतः सामान्यरूपमपि मनोद्रव्याकारं प्रतिनियतमेव पश्यति, प्रतिनियतविशेषग्रहणात्मकं च ज्ञानम्, न दर्शनम्। अत एव सूत्रेऽपि दर्शनं चतुर्विधमेवोक्तम्, न पञ्चविधमपि, मनःपर्यायदर्शनस्य परमार्थतोऽसम्भवादिति। तथा तानेव मनस्त्वेन परिणमितान् स्कन्धान् विपुलमतिः **अभ्यधिकतरान्** अर्द्धतृतीयाङ्गुलप्रमाणभूमिक्षेत्रवर्त्तिभिः स्कन्धैरधिकतरान्। सा चाधिकतरता देशतोऽपि भवति ततः सर्वासु दिक्षु अधिकतराप्रतिपादनार्थमाह— **विपुलतरकान्** प्रभूततरकान् तथा **विशुद्धतरान्** निर्मलतरान् ऋजुमत्यपेक्षयाऽतीव स्फुटतरप्रकाशानित्यर्थः। स च स्फुटः प्रतिभासो भ्रान्तोऽपि सम्भवति, यथा द्विचन्द्रप्रतिभासः, ततो भ्रान्ततताशङ्काव्युदासाय विशेषणान्तरमाह— **वितिमिरतरकान्** विगतं **तिमिरं** तिमिरसम्पाद्यो भ्रमो येषु ते वितिमिराः, ततः द्वयोः[१] प्रकृष्टे तरप्* [मलय०] इति तरप्प्रत्ययः, ततः प्राकृतलक्षणात् स्वार्थे कप्रत्ययः, एवं पूर्वेष्वपि पदेषु यथायोगं व्युत्पत्तिर्द्रष्टव्या, वितिमिरतरकान् सर्वथा भ्रमरहितान्। अथवा

१. **द्वयोर्विभज्ये च तरप्** - सिद्धहेम० ॥७।३।६॥, शाकटा० ३।४।७२ ॥

अभ्यधिकतरकान् विपुलतरकानिति द्वावपि शब्दावेकार्थौ, विशुद्धतरकान् वितिमिरतरकानित्यपि एकार्थौ, नानादेशजा हि विनेया भवन्ति, ततः कोऽपि कस्यापि प्रसिद्धो भवतीति तेषामनुग्रहार्थमेकार्थिकपदोपन्यासः। तथा क्षेत्रतः **णं** इति वाक्यालङ्कारे ऋजुमतिरधो यावदस्या रत्नप्रभायाः पृथिव्या उपरितनाधस्तनान् क्षुल्लकप्रतरान्।

अथ किमिदं क्षुल्लकप्रतरः इति ?, उच्यते, इह लोकाकाशप्रदेशा उपरितनाऽधस्तनप्रदेशरहिततया विवक्षिता मण्डकाकारतया व्यवस्थिताः प्रतरमित्युच्यन्ते, तत्र तिर्यग्लोकस्योर्ध्वाधोऽपेक्षयाऽष्टादशयोजनशतप्रमाणस्य मध्यभागे द्वौ सर्वलघू क्षुल्लकप्रतरौ, तयोर्मध्यभागे जम्बूद्वीपे रत्नप्रभाया बहुसमे भूमिभागे मेरुमध्येऽष्टप्रादेशिको रुचकः, तत्र गोस्तनाकाराश्चत्वार उपरितनाः प्रदेशाश्चत्वारश्चाधस्तनाः, एष एव च रुचकः सर्वासां दिशां विदिशां वा प्रवर्त्तकः, एतदेव च सकलतिर्यग्लोकमध्यम्, तौ च द्वौ सर्वलघू प्रतरावङ्गुलासङ्ख्येयभागबाहल्यावलोकसंवर्त्तितौ रज्जुप्रमाणौ, तत एतयोरुपर्यन्येऽन्ये प्रतरास्तिर्यगङ्गुलासङ्ख्येयभागवृद्ध्या वर्द्धमानास्तावद् द्रष्टव्या यावदूर्द्ध्वलोकमध्यम्, तत्र पञ्चरज्जुप्रमाणः प्रतरः, तत उपर्यन्येऽन्ये प्रतरास्तिर्यगङ्गुलासङ्ख्येयभागहान्या हीयमाना हीयमानास्तावदवसेया यावल्लोकान्ते रज्जुप्रमाणः प्रतरः, इह ऊर्द्ध्वलोकमध्यवर्त्तिनं सर्वोत्कृष्टं पञ्चरज्जुप्रमाणं प्रतरमवधीकृत्यान्ये उपरितना अधस्तनाश्च क्रमेण हीयमाना हीयमानाः सर्वेऽपि प्रतराः क्षुल्लकप्रतरा इति व्यवह्रियन्ते यावल्लोकान्ते तिर्यग्लोके च रज्जुप्रमाणः प्रतर इति, तथा तिर्यग्लोकमध्यवर्त्तिसर्वलघुक्षुल्लकप्रतरस्याधस्तिर्यग् अङ्गुलासङ्ख्येयभागवृद्ध्या वर्धमाना वर्द्धमानाः प्रतरास्तावद् वक्तव्या यावदधोलोकान्ते सर्वोत्कृष्टः सप्तरज्जुप्रमाणः प्रतरः, तं च सप्तरज्जुप्रमाणं प्रतरमपेक्ष्यान्ये उपरितनाः सर्वेऽपि क्रमेण हीयमानाः क्षुल्लकप्रतरा अभिधीयन्ते यावत्तिर्यग्लोकमध्यवर्त्ती सर्वलघुः क्षुल्लकप्रतरः, एषा क्षुल्लकप्रतरप्ररूपणा।

तत्र तिर्यग्लोकमध्यवर्त्तिनः सर्वलघो रज्जुप्रमाणात् क्षुल्लकप्रतरादारभ्य यावदधो नव योजनशतानि तावदस्यां रत्नप्रभायां पृथिव्यां ये प्रतरास्ते उपरितनक्षुल्लकप्रतरा भण्यन्ते, तेषामपि चाधस्ताद् ये प्रतरा यावदधोलौकिकग्रामेषु सर्वान्तिमः प्रतरः तेऽधस्तनक्षुल्लकप्रतराः, तान् यावदधः क्षेत्रत ऋजुमतिः पश्यति। अथवा अधोलोकस्यो-

परितनभागवर्त्तिनः क्षुल्लकप्रतरा उपरितना उच्यन्ते, ते चाधोलौकिकग्रामवर्त्तिप्रतरादारभ्य तावदवसेया यावत्तिर्यग्लोकस्यान्तिमोऽधस्तनप्रतरः, तथा तिर्यग्लोकस्य मध्यभागादारभ्याधोभागवर्त्तिनः क्षुल्लकप्रतरा अधस्तना उच्यन्ते, तत उपरितनाश्चाधस्तनाश्च उपरितना-ऽधस्तनाः, तान् यावद् ऋजुमतिः पश्यति।

अन्ये त्वाहुः– अधोलोकस्योपरिवर्त्तिन उपरितनाः, ते च सर्वतिर्यग्लोकवर्त्तिनः यदि वा तिर्यग्लोकस्याधो नवयोजनशतवर्त्तिनो द्रष्टव्याः,ततस्तेषामेवोपरितनानां क्षुल्लकप्रतराणां सम्बन्धिनो ये सर्वान्तिमाधस्तनाः क्षुल्लकप्रतराः तान् यावत् पश्यति। अस्मिंश्च व्याख्याने 'तिर्यग्लोकं यावत् पश्यति' इत्यापद्यते, तच्च न युक्तम्, अधोलौकिक-ग्रामवर्त्तिसंज्ञिपञ्चेन्द्रियमनोद्रव्यापरिच्छेदप्रसङ्गात्, अथ चाधोलौकिकग्रामेष्वपि संज्ञिमनोद्रव्याणि परिच्छिनत्ति। यत उक्तम्–

इहाधोलौकिका ग्रामा न तिर्यग्लोकवर्त्तिनः।
मनोगतांस्त्वसौ भावान् वेत्ति तद्वर्त्तिनामपि॥१॥ [ ]

तथा– **उड्ढं जावे**त्यादि। ऊर्द्ध्वं यावज्ज्योतिश्चक्रस्योपरितलस्तिर्यग् यावदन्तो मनुष्यक्षेत्रे मनुष्यलोकपर्यन्त इत्यर्थः, एतदेव व्याचष्टे– अर्द्धतृतीयेषु द्वीप-समुद्रेषु पञ्चदशसु कर्मभूमिषु त्रिंशति चाकर्मभूमिषु षट्पञ्चाशत्सङ्ख्येषु चान्तरद्वीपेषु संज्ञिनाम्। ते चापान्तरालगतावपि तदायुष्कसंवेदनादभिधीयन्ते, न च तैरिहाधिकारः, ततो विशेषणमाह– **पञ्चेन्द्रियाणाम्**। पञ्चेन्द्रियाश्चोपपातक्षेत्रमागता इन्द्रियपर्याप्तिपरिसमाप्तौ मनःपर्याप्त्या अपर्याप्ता अपि भवन्ति, न च तैः प्रयोजनम्, अतो विशेषणान्तरमाह– **पर्याप्तानाम्**। अथवा संज्ञिनो हेतुवादोपदेशेन विकलेन्द्रिया अपि भण्यन्ते ततस्तद्व्यवच्छेदार्थं पञ्चेन्द्रियग्रहणम्, ते चापर्याप्तका अपि भवन्ति ततस्तद्व्यवच्छेदार्थं पर्याप्तग्रहणम्, तेषां मनोगतान् भावान् जानाति पश्यति। तदेव मनोलब्धिसमन्वितजीवाधारं क्षेत्रं विपुलमतिरर्द्धं तृतीयं येषु तान्यर्द्धतृतीयानि अङ्गुलानि, तानि च ज्ञानाधिकारादुच्छ्रयाङ्गुलानि द्रष्टव्यानि, यत उक्तं **चूर्णिकृता**– **अड्ढाइयंगुलग्गहणमुस्सेहंगुलमाणओ, नाणविसयत्तणओ य न दोसो [नन्दीचू० सू० ३१-३२ पत्र-२४]** त्ति, तैरर्द्धतृतीयैरङ्गुलैरभ्यधिकतरम्, तच्चैकदेशमपि भवति तत आह– **विपुलतरं**

विस्तीर्णतरम्, अथवा आयामविष्कम्भाभ्यामभ्यधिकतरं बाहल्यमाश्रित्य विपुलतरम्, तथा **विशुद्धतरं वितिमिरतर**मिति च प्राग्वत् जानाति पश्यति, 'तात्स्थ्यात् तद्व्यपदेशः' इति तावत्क्षेत्रगतानि मनोद्रव्याणि जानाति पश्यतीत्यर्थः।

कालओ णमित्यादि सुगमं यावद् उक्तस्वरूपमनःपर्यायज्ञानप्रतिपादिका गाथा। तस्या व्याख्या– 'मनःपर्यायज्ञानं' प्राग्निरूपितशब्दार्थम्। **पुनः**शब्दो विशेषणार्थः, स च रूपिविषयत्व-क्षायोपशमिकत्व-प्रत्यक्षत्वादिसाम्येऽप्यवधिज्ञानादिदं मनःपर्यायज्ञानं स्वाम्यादिभेदाद् भिन्नमिति विशेषयति। तथाहि– अवधिज्ञानमविरतसम्यग्दृष्टेरपि भवति द्रव्यतोऽशेषरूपिद्रव्यविषयं क्षेत्रतो लोकविषयं कतिपयलोकप्रमाणक्षेत्रापेक्षया अलोकविषयं च कालतोऽतीता-ऽनागतासङ्ख्येयोत्सर्पिण्यवसर्पिणीविषयं भावतो-ऽशेषेषु रूपिद्रव्येषु प्रतिद्रव्यमसङ्ख्येयपर्यायविषयम्, मनःपर्यायज्ञानं पुनः संयतस्याप्रमत्तस्याऽऽमर्षौषध्याद्यन्यतमर्द्धिप्राप्तस्य द्रव्यतः संज्ञिमनोद्रव्यविषयं क्षेत्रतो मनुष्यक्षेत्रगोचरं कालतोऽतीता-ऽनागतपल्योपमासङ्ख्येयभागविषयं भावतो मनोद्रव्यगतानन्तपर्यायालम्बनम्, ततोऽवधिज्ञानाद् भिन्नम्। एतदेव लेशतः सूत्रकृदाह– **जनमनःपरिचिन्तितार्थप्रकटनं** जायन्ते इति जनास्तेषां मनांसि जनमनांसि तैः परिचिन्तितश्चासावर्थश्च जनमनःपरिचिन्तितार्थः तं **प्रकटयति** प्रकाशयति जनमनः-परिचिन्तितार्थप्रकटनम्। तथा **मानुषक्षेत्रनिबद्धम्**, न तद्बहिर्व्यवस्थितप्राणिद्रव्य-मनोविषयमित्यर्थः। तथा **गुणाः** क्षान्त्यादयस्ते **प्रत्ययः** कारणं यस्य तद् **गुणप्रत्ययम्**। **चारित्रवतः** अप्रमत्तसंयतस्य॥ **सेत्तं मणपज्जवनाणं** तदेतद् मनःपर्यायज्ञानम्॥

[सू० ३४] से किं तं केवलणाणं ? केवलणाणं दुविहं पण्णत्तं, तंजहा– भवत्थकेवलणाणं च सिद्धकेवलणाणं च।

[सू० ३५] से किं तं भवत्थकेवलणाणं ? भवत्थकेवलणाणं दुविहं पण्णत्तं, तंजहा– सजोगिभवत्थकेवलणाणं च अजोगिभवत्थकेवलणाणं च।

[सू० ३६] से किं तं सजोगिभवत्थकेवलणाणं ? सजोगिभवत्थकेवलणाणं दुविहं पण्णत्तं, तंजहा– पढमसमयसजोगिभवत्थकेवलणाणं च अपढमसमय-सजोगिभवत्थकेवलणाणं च, अहवा चरिमसमयसजोगिभवत्थकेवलणाणं च

अचरिमसमयसजोगिभवत्थकेवलणाणं च, सेत्तं सजोगिभवत्थकेवलणाणं।

[सू० ३७] से किं तं अजोगिभवत्थकेवलणाणं ? अजोगिभवत्थकेवलणाणं दुविहं पण्णत्तं, तंजहा– पढमसमयअजोगिभवत्थकेवलणाणं च अपढमसमय-अजोगिभवत्थकेवलणाणं च, अहवा चरिमसमयअजोगिभवत्थकेवलणाणं च अचरिमसमयअजोगिभवत्थकेवलणाणं च, सेत्तं अजोगिभवत्थकेवलणाणं।

से किं तमित्यादि। अथ किं तत् केवलज्ञानम् ?। सूरिराह– केवलज्ञानं द्विविधं प्रज्ञप्तम्। तद्यथा– भवस्थकेवलज्ञानं च सिद्धकेवलज्ञानं च। भवन्ति कर्मवशवर्त्तिनः प्राणिनोऽस्मिन्निति **भवो** नारकादिजन्म, तत्रेह भवो मनुष्यभव एव ग्राह्योऽन्यत्र केवलोत्पादाभावात्, भवे तिष्ठतीति **भवस्थः**, [१]**स्थादिभ्यः कः** [*मलय०] इति कः प्रत्ययः, तस्य केवलज्ञानं भवस्थकेवलज्ञानम्। चशब्दः स्वगतानेकभेदसूचकः। तथा [२]**षिधू संराद्धौ** [मलय० धा०], सिध्यति स्म सिद्धः-यो येन गुणेन परिनिष्ठितो न पुनः साधनीयः स सिद्ध उच्यते, यथा सिद्ध ओदनः, स च कर्मसिद्धादिभेदादनेकविधः। उक्तं च–

कम्मे सिप्पे य विज्जाए, मंते जोगे य आगमे।
अत्थ जत्ता अभिप्पाए, तवे कम्मक्खए इ य॥१॥ [**विशेषा०** ३०२८]

अत्र कर्मक्षयसिद्धेनाधिकारः, अन्यस्य केवलज्ञानासम्भवात्। अथवा सितं-बद्धं ध्मातं भस्मीकृतमष्टप्रकारं कर्म येन स सिद्धः, [३]**पृषोदरादयः** [*मलय०] इति रूपसिद्धिः, सकलकर्मविनिर्मुक्तो मुक्तावस्थामुपागत इत्यर्थः, तस्य केवलज्ञानं सिद्धकेवलज्ञानम्। अत्रापि **च**शब्दः स्वगतानेकभेदसूचकः॥

से किं तमित्यादि। अथ किं तद् भवस्थकेवलज्ञानम् ?, भवस्थकेवलज्ञानं द्विविधं प्रज्ञप्तम्, तद्यथा– सयोगिभवस्थकेवलज्ञानं च अयोगिभवस्थकेवलज्ञानं च। तत्र योजनं **योगः** व्यापारः, उक्तं च– **काय-वाङ्-मनःकर्म योगः** [*तत्त्वा० ६।१]। इह

---

१. **स्थादिभ्यः कः** - सिद्धहे० ५।३।८२॥, शाकटा० ४।४।५६ ॥ २. **षिधूंच् संराद्धौ** - हैम० धा० ३।४२। **षिधु संराद्धौ** - पा० धा० ११९२ ॥ ३. **पृषोदरादयः** - **शाकटा०** २।२।१७२। **सिद्धहेम०** ३।२।१५५॥

औदारिकादिशरीरयुक्तस्याऽऽत्मनो वीर्यपरिणतिविशेषः कायोगः। औदारिक-वैक्रिया-ऽऽहारकशरीरव्यापाराहृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारो वाग्योगः। उक्तं च–

अहवा तणुजोगाहियवइदव्वसमूहजीववावारो।
सो वइजोगो भन्नइ, वाया निसिरिज्जए तेणं॥१॥ [विशेषा० ३६३]

तथा औदारिक-वैक्रिया-ऽऽहारकशरीरव्यापाराहृतमनोद्रव्यसाचिव्याज्जीवव्यापारो मनोयोगः। उक्तं च–

तह तणुवावाराहियमणदव्वसमूहजीववावारो।
सो मणजोगो भण्णइ, मन्नइ नेयं जओ तेणं॥१॥ [विशेषा० ३६४]

ततः सह योगेन वर्त्तन्ते ये ते सयोगाः, मनो-वाक्कायाः, ते यथासम्भवमस्य विद्यन्ते इति सयोगी, सयोगी चासौ भवस्थश्च **सयोगिभवस्थः**, तस्य केवलज्ञानं सयोगिभवस्थकेवलज्ञानम्। तथा योगोऽस्य विद्यते इति योगी, न योगी अयोगी, अयोगी चासौ भवस्थश्च **अयोगिभवस्थः**, शैलेश्यवस्थामुपगत इत्यर्थः, तस्य केवलज्ञानमयोगिभवस्थकेवलज्ञानम्। अथ किं तत् सयोगिभवस्थकेवलज्ञानम् ?, सयोगिभवस्थकेवलज्ञानं द्विविधं प्रज्ञप्तम्, तद्यथा– प्रथमसमयसयोगिभवस्थकेवलज्ञानं च अप्रथमसमयसयोगिभवस्थकेवलज्ञानं च। तत्रेह **प्रथमसमयः** केवलज्ञानोत्पत्तिसमयः, **अप्रथमसमयः** केवलोत्पत्तिसमयादूर्ध्वं द्वितीयादिकः सर्वोऽपि समयो यावत् सयोगित्वचरमसमयः।

अथवेति प्रकारान्तरे, एष एवार्थः समयविकल्पनेनान्यथा प्रतिपाद्यते इत्यर्थः। **चरमसमये**त्यादि, तत्र **चरमसमयः** सयोग्यवस्थान्तिमसमयः, न चरमसमयः **अचरमसमयः** सयोग्यवस्थाचरमसमयादर्वाक्तनः सर्वोऽप्या केवलप्राप्तेः। **सेत्तं** इत्यादि निगमनं सुगमम्।

से किं तमित्यादि। अथ किं तद् अयोगिभवस्थकेवलज्ञानम् ?, अयोगि-भवस्थकेवलज्ञानं द्विविधं प्रज्ञप्तम्, तद्यथा– प्रथमसमयायोगिभवस्थकेवलज्ञानमप्रथम-समयायोगिभवस्थकेवलज्ञानं च। अत्र प्रथमसमयोऽयोगित्वोत्पत्तिसमयो वेदितव्यः, शैलेश्यवस्थाप्रतिपत्तिप्रथमसमय इत्यर्थः, प्रथमसमयादन्यः सर्वोऽप्यप्रथमसमयो

यावच्छैलेश्यवस्थाचरमसमयः।

अथवेति प्रकारान्तरे। **चरमसमये**त्यादि, इह चरमसमयः शैलेश्यवस्थान्तिमसमयः, चरमसमयादन्यः सर्वोऽप्यचरमसमयो यावच्छैलेश्यवस्थाप्रथमसमयः। **सेत्तं अजोगिभवत्थकेवलनाणं** तदेतदयोगिभवस्थकेवलज्ञानम्॥

[सू० ३८] से किं तं सिद्धकेवलणाणं ? सिद्धकेवलणाणं दुविहं पण्णत्तं, तंजहा-अणंतरसिद्धकेवलणाणं च परंपरसिद्धकेवलणाणं च।

से किं तमित्यादि। अथ किं तत् सिद्धकेवलज्ञानम् ?, सिद्धकेवलज्ञानं द्विविधं प्रज्ञप्तम्, तद्यथा-अनन्तरसिद्धकेवलज्ञानं च परम्परसिद्धकेवलज्ञानं च। तत्र न विद्यते **अन्तरं** समयेन व्यवधानं यस्य सो**ऽनन्तरः**, स चासौ सिद्धश्चानन्तरसिद्धः, सिद्धत्वप्रथमसमये वर्त्तमान इत्यर्थः, तस्य केवलज्ञानमनन्तरसिद्धकेवलज्ञानम्। **च**शब्दः स्वगतानेकभेदसूचकः। तथा विवक्षिते प्रथमसमये यः सिद्धः तस्य यो द्वितीयसमयसिद्धः स परः, तस्यापि यः तृतीयसमयसिद्धः स परः, एवमन्येऽपि वाच्याः, परे च परे चेति वीप्सायां पृषोदरादयः* [मलय०] इति परम्परशब्दनिष्पत्तिः, परम्परे च ते सिद्धाश्च परम्परसिद्धाः, विवक्षितसिद्धत्वप्रथमसमयात् प्राग् द्वितीयादिषु समयेष्वनन्तामतीताद्धां यावद् वर्त्तमाना इत्यर्थः, तेषां केवलज्ञानं परम्परसिद्धकेवलज्ञानम्। अत्रापि चशब्दः स्वगतानेकभेदसूचकः।

इहानन्तरसिद्धाः सत्पद[ग्रन्थाग्रम् ३५००]प्ररूपणा १ द्रव्यप्रमाण २ क्षेत्र ३ स्पर्शना ४ काला ५ ऽन्तर ६ भावा ७ ऽल्पबहुत्व ८ रूपैरष्टभिरनुयोगद्वारैः परम्परसिद्धाः सत्पदप्ररूपणा १ द्रव्यप्रमाण २ क्षेत्र ३ स्पर्शना ४ काला ५ ऽन्तर ६ भावा ७ ऽल्पबहुत्व ८ सन्निकर्ष ९ रूपैर्नवभिरनुयोगद्वारैः क्षेत्रादिषु पञ्चदशसु द्वारेषु **सिद्धप्राभृते** चिन्तिताः, ततस्तदनुसारेण वयमपि विनेयजनानुग्रहार्थं लेशतश्चिन्तयामः। क्षेत्रादीनि च पञ्चदश द्वाराण्यमूनि—

खेत्ते १ काले २ गइ ३ वेय ४ तित्थ ५ लिंगे ६ चरित्त ७ बुद्धे ८ य।
नाणो ९ गाहु १० क्कस्से ११ अंतर १२ मणुसमय १३ गणण १४ ऽप्पबहू १५॥१॥

[सिद्धप्रा० ११]

१. दृश्यतां पृ० १७९ टी० ३ ॥

तत्र प्रथमत एषु द्वारेषु सत्पदप्ररूपणया अनन्तरसिद्धाश्चिन्त्यन्ते। **क्षेत्रद्वारे** त्रिविधेऽपि लोके सिध्यन्तः प्राप्यन्ते, तद्यथा-ऊर्द्ध्वलोके अधोलोके तिर्यग्लोके च। तत्रोर्द्ध्वलोके पण्डकवनादौ, अधोलोके अधोलौकिकेषु ग्रामेषु, तिर्यग्लोके मनुष्यक्षेत्रे, तत्रापि निर्व्याघातेन पञ्चदशसु कर्मभूमिषु, व्याघातेन समुद्र-नदी-वर्षधरपर्वतादावपि। व्याघातो नाम संहरणम्। उक्तं च-

दीवसमुद्देसऽड्ढाइएसु वाघाय खेत्तओ सिद्धा।
निव्वाघाएण पुणो, पन्नरससु कम्मभूमीसु॥१॥ [सिद्धप्रा० २२]

तीर्थकृतः पुनरधोलोके तिर्यग्लोके वा, तत्राधोलोकेऽधोलौकिकेषु ग्रामेषु तिर्यग्लोके पञ्चदशसु कर्मभूमिषु, न शेषेषु स्थानेषु, शेषेषु हि स्थानेषु संहरणतः सम्भवन्ति, न च भगवतां संहरणसम्भवः १। तथा **कालद्वारे**ऽवसर्पिण्यां जन्म चरमशरीरिणां नियमतः तृतीय-चतुर्थारकयोः, सिद्धिगमनं तु केषाञ्चित् पञ्चमेऽप्यरके, यथा **जम्बूस्वामिनः**, उत्सर्पिण्यां तु जन्म चरमशरीरिणां दुष्षमादिषु द्वितीय-तृतीय-चतुर्थारकेषु, सिद्धिगमनं तु तृतीय-चतुर्थयोरेव। उक्तं च-

दोसु वि समासु जाया, सिज्झंतोसप्पिणीए कालतिगे।
तीसु य जाया उस्सप्पिणीए सिज्झंति कालदुगे॥१॥ [सिद्धप्रा० २५]

महाविदेहेषु पुनः कालः सर्वदैव सुषमदुष्षमाप्रतिरूपः, ततस्तद्वक्तव्यताभणनेनैव तत्र वक्तव्यता भणिता द्रष्टव्या। संहरणमधिकृत्य पुनरुत्सर्पिण्यामवसर्पिण्यां च षट्स्वप्यरकेषु सिध्यन्तो द्रष्टव्याः। तीर्थकृतः पुनरवसर्पिण्यामुत्सर्पिण्यां च जन्म सिद्धिगमनं च सुषमदुष्षमा-दुष्षमसुषमारूपयोरेवारकयोर्वेदितव्यम्, न शेषेष्वरकेषु। तथाहि- भगवान् **ऋषभस्वामी** सुषमदुष्षमारकपर्यन्ते समुदपादि, एकोननवतिपक्षेषु शेषेषु सिद्धिमगमत्, **वर्द्धमानस्वामी** तु भगवान् दुष्षमसुषमारकपर्यन्ते एकोननवतिपक्षेषु शेषेषु मुक्तिसौधमध्यमध्यास्त। तथा चोक्तम्- **समणे भयवं महावीरे तीसं वासाइं अगारवासमज्झे वसित्ता साइरेगाइं दुवालस संवच्छराइं छउमत्थपरियागं पाउणित्ता बायालीसं वासाइं सामन्नपरियागं पाउणित्ता बावत्तरिं वासाणि सव्वाउयं पालइत्ता खीणवेयणिज्ज-आउय-नाम-गोए दूसमसुसमाए बहुविइक्कंताए तिहिं वासेहिं अद्धनवमेहिं य मासेहिं सेसेहिं**

पावाए मज्झिमाए जाव सव्वदुक्खप्पहीणे [कल्पसू० १४७][1]। उत्सर्पिण्यामपि च प्रथमतीर्थकरो दुष्षमसुषमायामेकोननवतिपक्षेषु व्यतिक्रान्तेषु जायते, यतो भगवद्व-**र्द्धमानस्वामि**सिद्धिगमनस्य भविष्य**न्महापद्म**तीर्थकरोत्पादस्य चान्तरं चतुरशीतिवर्ष-सहस्राणि सप्त वर्षाणि पञ्च [च] मासाः पठ्यन्ते। तथा चोक्तम्–

चुलसीइ[2] वाससहस्सा, वासा सत्तेव पंच मासा य।
वीर-महापउमाणं, अंतरमेयं जिणुद्दिट्ठं॥१॥ [ ]

तत उत्सर्पिण्यामपि प्रथमतीर्थकरो यथोक्तकालमान एव जायते। तथा उत्सर्पिण्यां चतुर्विंशतितमस्तीर्थकरः सुषमदुष्षमायामेकोननवतिपक्षेषु व्यतिक्रान्तेषु जन्माऽऽसादयति, एकोननवतिपक्षाधिकचतुरशीतिपूर्वलक्षातिक्रमे च सिध्यति, तत उत्सर्पिण्यामवसर्पिण्यां वा दुष्षमसुषमा-सुषमदुष्षमयोरेव तीर्थकृतां जन्म निर्वाणं चेति २।

गतिद्वारे प्रत्युत्पन्ननयमधिकृत्य मनुष्यगतावेव सिध्यन्तः प्राप्यन्ते, न शेषासु गतिषु। पाश्चात्यमनन्तरं भवमधिकृत्य पुनः सामान्यतश्चतसृभ्योऽपि गतिभ्य आगताः सिध्यन्ति; विशेषचिन्तायां पुनश्चतसृभ्यो नरकपृथिवीभ्यो न शेषाभ्यः, तिर्यग्गतेः पृथिव्यम्बुवनस्पति-पञ्चेन्द्रियेभ्यो न शेषेभ्यः, मनुष्यगतेः स्त्रीभ्यः पुरुषेभ्यो वा, देवगतेश्चतुर्भ्योऽपि देवनिकायेभ्यः। तथा चाह भगवान**आर्यश्यामः**–

नेरइया णं भंते ! अणंतरागया अंतकिरियं करेंति ? परंपरागया अंतकिरियं करेंति ?, गोयमा ! अणंतरागया वि अंतकिरियं करेंति परंपरागया वि अंतकिरियं करेंति। एवं रयणप्पभापुढविनेरइया वि जाव पंकप्पभापुढविनेरइया। धूमप्पभापुढविनेरइयाणं पुच्छा,

---

१. "ते णं काले णं समए णं समणे भगवं महावीरे तीसं वासाइं अगारवासमज्झे वसित्ता, साइरेगाइं दुवालस वासाइं छउमत्थपरियागं पाउणित्ता, देसूणाइं तीसं वासाइं केवलिपरियागं पाउणित्ता, बायालीसं वासाइं सामण्ण-परियागं पाउणित्ता, बावत्तरिं वासाइं सव्वाउयं पालइत्ता खीणे वेयणिज्जाउय-नाम-गुत्ते इमीसे ओसप्पिणीए दुसम-सुसमाए समाए बहुविइक्कंताए तीहिं वासेहिं अद्धनवमेहि य मासेहिं सेसेहिं पावाए मज्झिमाए हत्थिवालस्स रण्णो रज्जुगसभाए एगे अबीए छट्ठेणं भत्तेणं अपाणएणं साइणा नक्खत्तेणं जोगमुवागएणं पच्चूसकालसमयंसि संपलिअंकनिसण्णे पणपन्नं अज्झयणाइं कल्लाणफलविवागाइं, पणपन्नं अज्झयणाइं पावफलविवागाइं, छत्तीसं च अपुट्ठवागरणाइं वागरित्ता पहाणं नाम अज्झयणं विभावेमाणे विभावेमाणे कालगए विइक्कंते समुज्जाए छिन्नजाइ-जरा-मरणबंधणए सिद्धे बुद्धे मुत्ते अंतगडे परिनिव्वुडे सव्वदुक्खप्पहीणे ॥ सू.१४७॥" - इति **पर्युषणाकल्पसूत्रे** पाठः ॥ २. चतुरशीतिर्वर्षसहस्राणि वर्षाणि सप्तैव पञ्च मासाश्च। वीरमहापद्मयोरन्तरमेतत् जिनोद्दिष्टम्॥

गोयमा ! नो अणंतरागया अंतकिरियं करेंति, परंपरागया अंतकिरियं करेंति। एवं जाव अहे सत्तमपुढविनेरइया। असुरकुमारा जाव थणियकुमारा पुढवि-आउ-वणस्सइकाइया य अणंतरागया वि अंतकिरियं करेंति परंपरागया वि अंतकिरियं करेंति। तेउ-वाउ-बेइंदिय-तेइंदिय-चउरिंदिया नो अणंतरागया अंतकिरियं करेंति परंपरागया अंतकिरियं करेंति। सेसा अणंतरागया वि अंतकिरियं करेंति परंपरागया वि। [प्रज्ञा० प० २० सू० १४१०-१४१३] तीर्थकृतः पुनर्देवगतेर्नरकगतेर्वाऽनन्तरागताः सिध्यन्ति, न शेषगतेः। तत्रापि नरकगतेः तिसृभ्यो नरकपृथिवीभ्यो न शेषाभ्यः, देवगतेर्वैमानिकदेवनिकायेभ्यो न शेषनिकायेभ्यः। तथा च भगवान**आर्यश्याम** आह–

रयणप्पभापुढविनेरइए णं भंते ! रयणप्पभापुढविनेरइएहिंतो अणंतरं उव्वट्टित्ता तित्थयरत्तं लभेज्जा ?, गोयमा ! अत्थेगइए[१] लभेज्जा अत्थेगइए नो लभेज्जा। से केणट्ठेणं भंते ! एवं वुच्चइ अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा ?, गोयमा ! जस्स रयणप्पभापुढविनेरइयस्स तित्थयरनाम-गोत्ताइं कम्माइं बद्धाइं पुट्ठाइं [निधत्ताइं] कडाइं [पट्ठवियाइं] निविट्ठाइं अभिनिविट्ठाइं अभिसमन्नागयाइं उइन्नाइं नो उवसंताइं भवंति से णं रयणप्पभापुढविनेरइए रयणप्पभापुढविनेरइएहिंतो [अणंतरं] उव्वट्टित्ता तित्थयरत्तं लभेज्जा, जस्स णं रयणप्पभापुढविनेरइयस्स तित्थयरनाम-गोत्ताइं कम्माइं नो बद्धाइं जाव नो उइन्नाइं उवसंताइं भवंति से णं रयणप्पभापुढविनेरइए रयणप्पभापुढविनेरइएहिंतो [अणंतरं] उवट्टित्ता तित्थयरत्तं नो लभेज्जा, से एएणं गोयमा ! एवं वुच्चइ-अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा। एवं जाव वालुयप्पभापुढविनेरइएहिंतो तित्थयरत्तं लभेज्जा। पंकप्पभापुढविनेरइए णं भंते ! पंकप्पभापुढविनेरइएहिंतो अणंतरं उवट्टित्ता तित्थयरत्तं लभेज्जा ?, गोयमा ! णो इणट्ठे समट्ठे, अंतकिरियं पुण करेज्जा। धूमप्पभापुढविनेरइए णं पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, [सव्व]-विरइं पुण लभेज्जा। तमापुढविपुच्छा, गोयमा ! नो इणट्ठे समट्ठे, विरयाविरइं लभेज्जा। अहे सत्तमाए पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, सम्मत्तं पुण लभेज्जा। असुरकुमाराणं पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, अंतकिरियं पुणो करेज्जा, एवं निरंतरं जाव आउक्काइया। तेउक्काइए णं भंते ! तेउक्काइएहिंतो अणंतरं उव्वट्टित्ता तित्थयरत्तं लभेज्जा ?, गोयमा ! नो इणट्ठे समट्ठे, केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए। एवं वाउक्काइए वि। वणप्फइकाइए णं पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, अंतकिरियं पुण करेज्जा। बेइंदिय-तेइंदिय-चउरिंदियाणं पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, मणपज्जवनाणं पुण उप्पाडेज्जा। पंचेंदियतिरिक्खजोणिय-मणूस-वाणमंतर-जोइसिएसु पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, अंतकिरियं पुण करेज्जा। सोहम्मगदेवे

१. हस्तलिखितादर्शेषु क्वचित् °गइए क्वचित् °गईए इति उभयविधः पाठ उपलभ्यते॥

णं भंते ! अणंतरं चइत्ता तित्थयरत्तं लभेज्जा ?, गोयमा ! अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा, एवं जहा रयणप्पभापुढविनेरइयस्स। एवं जाव सव्वट्ठगदेवे [प्रज्ञा० प० २० सू० १४४४-१४५८] ३।

वेदद्वारे प्रत्युत्पन्ननयमधिकृत्यापगतवेद एव सिध्यति, तद्भवानुभूतपूर्ववेदापेक्षया तु सर्वेष्वपि वेदेषु। उक्तं च–

अवगयवेओ सिज्झइ, पच्चुप्पण्णं नयं पडुच्चा उ।
सव्वेहि वि वेएहिं, सिज्झइ समईयनयवाया॥१॥ [सिद्धप्रा० ३०]

तीर्थकृतः पुनः स्त्रीवेदे पुरुषवेदे वा, न नपुंसकवेदे ४।

तथा **तीर्थद्वारे** तीर्थकरतीर्थे तीर्थकरीतीर्थे [अतीर्थे] च सिध्यन्ति ५। लिङ्गद्वारे अन्यलिङ्गे गृहिलिङ्गे स्वलिङ्गे च, एतच्च द्रव्यलिङ्गापेक्षया द्रष्टव्यम्, संयमरूपभावलिङ्गापेक्षया तु स्वलिङ्ग एव। उक्तं च–

लिंगेण अन्नलिंगे, गिहत्थलिंगे तहेव य सलिंगे।
सव्वेहिं दव्वलिंगे, भावेण सलिंग संजमओ॥१॥ [सिद्धप्रा० ३२] ६।

चारित्रद्वारे प्रत्युत्पन्ननयापेक्षया यथाख्यातचारित्रे, तद्भावानुभूतपूर्वचरणापेक्षया तु केचित् सामायिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणः, केचित् सामायिक-च्छेदोपस्थापन-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणः, केचित् सामायिक-परिहारविशुद्धिक-सूक्ष्मसम्परायययथाख्यातचारित्रिणः केचित् सामायिक-च्छेदोपस्थापन-परिहारविशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणः। उक्तं च–

चरणम्मि अहक्खाए, पच्चुप्पन्नेण सिज्झइ नएणं।
पुव्वाणंतरचरणे, ति-चउक्कग-पंचगगमेणं॥१॥ [सिद्धप्रा० ३३]

तीर्थकृतः पुनः सामायिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रिण एव ७।

बुद्धद्वारे प्रत्येकबुद्धाः स्वयम्बुद्धा बुद्धबोधिता बुद्धीबोधिता वा सिध्यन्ति ८। **ज्ञानद्वारे** प्रत्युत्पन्ननयमपेक्ष्य केवलज्ञाने, तद्भवानुभूतपूर्वानन्तरज्ञानापेक्षया तु केचिन्मति-श्रुतज्ञानिनः केचिन्मति-श्रुता-ऽवधिज्ञानिनः केचिन्मति-श्रुत-मनःपर्यायज्ञानिनः केचिन्मति-श्रुता-ऽवधि-मनःपयार्यज्ञानिनः, तीर्थकृतस्तु मति-श्रुता-ऽवधि-मनःपर्यायज्ञानिन एव ९।

अवगाहनाद्वारे जघन्यायामप्यवगाहनायां सिध्यन्ति उत्कृष्टायां मध्यमायां च। तत्र द्विहस्तप्रमाणा जघन्या, पञ्चविंशत्यधिकपञ्चधनुःशतप्रमाणा उत्कृष्टा, सा च **मरुदेवी**कालवर्त्तिनामवसेया, **मरुदेव्यप्यादेशान्तरेण नाभिकुलकरतुल्या**। तदुक्तं **सिद्धप्राभृतटीकायाम्**– '**मरुदेवी** वि **आएसंतरेण नाभितुल्ल**' [गा० ३७, पृ० १०A] त्ति। तत आदेशान्तरापेक्षया मरुदेव्यामपि यथोक्तप्रमाणावगाहना द्रष्टव्या। उक्तं च–

ओगाहणा जहन्ना, रयणिदुगं अह पुण उ उक्कोसा।
पंचेव धणुसयाइं, धणुहपुहत्तेण अहियाइं॥१॥ [सिद्धप्रा० ३७]

अत्र पृथक्त्वशब्दो बहुत्ववाची, बहुत्वं चेह पञ्चविंशतिरूपं द्रष्टव्यम्, **सिद्धप्राभृतटीकायां** तथाव्याख्यानात्, तेन पञ्चविंशत्यधिकानीत्यवसेयम्। शेषा त्वजघन्योत्कृष्टावगाहना। तीर्थकृतां तु जघन्यावगाहना सप्तहस्तप्रमाणा, उत्कृष्टा पञ्चधनुःशतमाना, शेषा त्वजघन्योत्कृष्टा १०।

उत्कृष्टद्वारे सम्यक्त्वपरिभ्रष्टा उत्कर्षतः कियता कालेन सिध्यन्ति ?, उच्यते, देशोनापार्द्धपुद्गलपरावर्त्तसंसारातिक्रमे, अनुत्कर्षतस्तु केचित् सङ्ख्येयकालातिक्रमे केचिदसङ्ख्येयकालातिक्रमे केचिदनन्तेन कालेन ११। **अन्तरद्वारे** जघन्यत एकः समयोऽन्तरम् उत्कर्षतः षण्मासाः १२। **निरन्तरद्वारे** जघन्यतो द्वौ समयौ निरन्तरं सिध्यन्तः प्राप्यन्ते, उत्कर्षतोऽष्टौ समयान् १३। **गणनाद्वारे** जघन्यत एकस्मिन् समये एकः सिध्यति, उत्कर्षतोऽष्टाधिकं शतम्; तथा चास्मिन् **भरतक्षेत्रे**ऽस्यामवसर्पिण्यां भगवतः **श्रीनाभेयस्य** निर्वाणसमये श्रूयतेऽष्टोत्तरं शतमेकसमयेन सिद्धम्। तथा चोक्तं **सङ्घदासगणिना वसुदेवचरिते**– **भयवं च उसभसामी जयगुरु पुव्वसयसहस्सं वाससहस्सूणयं विहरिऊणं केवली अट्ठावयपव्वए सह दसहिं समणसहस्सेहिं परिनिव्वाणमुवगतो चोद्दसेणं भत्तेणं माघबहुले पक्खे तेरसीए अभीइणा नक्खत्तेणं एगूणपुत्तसएणं अट्ठहि य नत्तुएहिं सह एगसमएणं निव्वुओ, सेसाण वि अणगाराणं दस सहस्साणि अट्ठसयऊणगाणि सिद्धाणि तम्मि चेव रिक्खे समयंतरेसु बहूसु** [[1]**वसुदेवहिण्डौ १।५**] इति १४।

---

१. वसुदेवहिण्डौ प्रथम खण्डे पञ्चमे सोमसिरिलम्भे पृ० १८५॥

अल्पबहुत्वद्वारे युगपद् द्वित्रादिकाः सिद्धाः स्तोकाः, एककाः सिद्धाः सङ्ख्येयगुणाः। उक्तं च–

संखाए जहन्नेणं एक्को उक्कोसएण अट्ठसयं।
सिद्धाऽणेगा थोवा एगगसिद्धा उ संखगुणा ॥१॥ [सिद्धप्रा० ४०] १५॥

तदेवं कृता पञ्चदशस्वपि द्वारेषु सत्पदप्ररूपणा॥१॥

सम्प्रति द्रव्यप्रमाणमभिधीयते– तत्र क्षेत्रद्वारे ऊर्ध्वलोके युगपदेकसमयेन चत्वारः सिध्यन्ति, द्वौ समुद्रे, चत्वारः सामान्यतो जलमध्ये, तिर्यग्लोकेऽष्टशतम्, विंशतिपृथक्त्वमधोलोके। उक्तं च–

चत्तारि उड्ढलोए, जले चउक्कं दुवे समुद्दम्मि।
अट्ठसयं तिरिलोए, वीसपुहुत्तं अहोलोए ॥१॥ [सिद्धप्रा० ४४]

तथा नन्दनवने चत्वारः, **नंदणे चत्तारि [सिद्धप्रा० टी० गा० ४५, पृ० ११]** इति वचनात्। एकतमस्मिंस्तु विजये विंशतिः, उक्तं च **सिद्धप्राभृतटीकायाम्– वीसा एगयरे विजये [गा० ४४, पृ० ११]**। तथा सर्वास्वप्यकर्मभूमिषु प्रत्येकं संहरणतो दश दश, पण्डकवने द्वौ, पञ्चदशस्वपि कर्मभूमिषु प्रत्येकमष्टशतम्। उक्तं च–

संकामणाए दसगं, दो चेव हवंति पंडगवणम्मि।
समएण य अट्ठसयं, पण्णरससु कम्मभूमीसु॥१॥ [सिद्धप्रा० ४५] १।

कालद्वारे– उत्सर्पिण्यामवसर्पिण्यां च प्रत्येकं तृतीये चतुर्थके चारकेऽष्टशतम्, अवसर्पिण्यां पञ्चमारके विंशतिः, शेषेष्वरकेषु प्रत्येकमुत्सर्पिण्यामवसर्पिण्यां च संहरणतो दश दश, तथा चोक्तं **सिद्धप्राभृतटीकायाम्– सेसेसु अरएसु दस सिज्झंति दोसु वि उस्सप्पिणी-ओसप्पिणीसु संहरणतो। [गा० ४६, पृ० १२A] सिद्धप्राभृतसूत्रेऽप्युक्तम्–**

उस्सप्पिणि-ओसप्पिणि तइय-चउत्थयसमासु अट्ठसयं।
पंचमियाए वीसं, दसगं दसगं च सेसेसु॥१॥ [सिद्धप्रा० ४६] २।

गतिद्वारे– देवगतेरागतानामष्टशतम्, शेषगतिभ्य आगताः प्रत्येकं दश दश। उक्तं च **सिद्धप्राभृते– सेसाण गईण दस दसगं [सिद्धप्रा० ४८]**। भगवांस्त्वार्यश्यामः पुनरेवमाह– नरकगतेरागता दश, तत्रापि विशेषचिन्तायां रत्नप्रभापृथिव्याः शर्कराप्रभाया वालुकप्रभायाश्च पृथिव्या आगताः प्रत्येकं दश दश, पङ्कप्रभायाः पृथिव्या आगताश्चत्वारः।

तथा तिर्यग्गतेरागताः सामान्यतो दश, विशेषचिन्तायां पुनः पृथिवीकायेभ्यो-ऽपूकायेभ्यश्चाऽऽगताः प्रत्येकं चत्वारश्चत्वारः, वनस्पतिकायेभ्य आगताः षट्, पञ्चेन्द्रियतिर्यग्योनिपुरुषेभ्य आगता दश, पञ्चेन्द्रियतिर्यग्योनिस्त्रीभ्योऽप्यागता दश। तथा सामान्यतो मनुष्यगतेरागता विंशतिः, विशेषचिन्तायां मनुष्यपुरुषेभ्य आगता दश, मनुष्यस्त्रीभ्य आगता विंशतिः। तथा सामान्यतो देवगतेरागता अष्टशतम्, विशेषचिन्तायामसुरकुमारेभ्यो नागकुमारेभ्यो यावत् स्तनितकुमारेभ्यः प्रत्येकमागता दश दश, असुरकुमारीभ्यो यावत् स्तनितकुमारीभ्यः प्रत्येकमागताः पञ्च पञ्च, व्यन्तरदेवेभ्य आगता दश, व्यन्तरीभ्य आगताः पञ्च, ज्योतिष्कदेवेभ्य आगता दश, ज्योतिष्कदेवीभ्य आगता विंशतिः, वैमानिकदेवेभ्य आगता अष्टशतम्, वैमानिकदेवीभ्य आगता विंशतिः। तथा च **प्रज्ञापना**ग्रन्थः— **अणंतरागया णं भंते ! नेरइया एगसमएणं केवइया अंतकिरियं पकरेंति ?, गोयमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं दस। रयणप्पभापुढविनेरइया वि एवं चेव, जाव वालुयप्पभापुढविनेरइया। अणंतरागया णं भंते ! पंकप्पभापुढविनेरइया एगसमएणं केवइया अंतकिरियं पकरेंति ?, गोयमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं चत्तारि। अणंतरागया णं भंते ! असुरकुमारा एगसमएणं केवइया अंतकिरियं पकरेंति ?, गोयमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं दस। अणंतरागया णं भंते ! असुरकुमारीओ एगसमएणं केवइयाओ अंतकिरियं पकरेंति ?, गोयमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं पंच। एवं जहा असुरकुमारा सदेवीया तहा जाव थणियकुमारा। अणंतरागया णं भंते ! पुढविक्काइया एगसमएणं केवइया अंतकिरियं पकरेंति ?, गोयमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं चत्तारि। एवं आउक्काइया वि। वणप्फइकाइया छ, पंचेंदियतिरिक्खजोणिया दस, पंचेंदियतिरिक्खजोणिणीओ वि दस, मणूसा दस, मणुस्सीओ वीसं, वाणमंतरा दस, वाणमंतरीओ पंच, जोइसिया दस, जोइसिणीओ वीसं, वेमाणिया अट्ठसयं, वेमाणिणीओ वीसं** [प्रज्ञा० प० २० सू० १४१४-१४१६] इति। तत्त्वं पुनः केवलिनो बहुश्रुता वा विदन्ति ३।

वेदद्वारे-पुरुषाणामष्टशतम्, स्त्रीणां विंशतिः, दश नपुंसकाः। उक्तं च— **अट्ठसयं पुरिसाणं, वीसं इत्थीण दस नपुंसाणं।** [सिद्धप्रा० ४९], तथा इह पुरुषेभ्य उद्वृत्ता जीवाः केचित् पुरुषा एव जायन्ते केचित् स्त्रियः केचिन्नपुंसकाः, एवं स्त्रीभ्योऽप्युद्वृत्तानां भङ्गत्रयम्, एवं नपुंसकेभ्योऽपि, सर्वसङ्ख्यया भङ्गा नव। तत्र ये पुरुषेभ्य उद्वृत्ताः पुरुषा

एव जायन्ते तेषामष्टशतम्, शेषेषु चाष्टसु भङ्गेषु दश दश। तथा चोक्तं **सिद्धप्राभृते**– **सेसा उ अट्ठ भंगा, दसगं दसगं तु होइ एक्केक्कं।** [सिद्धप्रा० ५०] ४।

तीर्थद्वारे– तीर्थकृतो युगपदेकसमयेन उत्कर्षतश्चत्वारः सिध्यन्ति, दश प्रत्येकबुद्धाः, चत्वारः स्वयम्बुद्धाः, अष्टशतमतीर्थकृताम्, विंशतिः स्त्रीणाम्, द्वे तीर्थकर्यौ ५। लिङ्गद्वारे– गृहिलिङ्गे चत्वारः, दश अन्यलिङ्गे, स्वलिङ्गे अष्टशतम्। उक्तं च– **चउरो दस अट्ठसयं, गिहऽन्नलिंगे सलिंगे य।** [सिद्धप्रा० ५१] ६। चारित्रद्वारे– सामायिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणां सामायिक-च्छेदोपस्थापन-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणां च प्रत्येकमष्टशतम्, सामायिक-परिहारविशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणां सामायिकच्छेदोपस्थापन-परिहारविशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणां च दशकं दशकम्। उक्तं च–

पच्छाकडं चरित्तं, तिगं चउक्कं च तेसिमट्ठसयं।
परिहारिएहि सहिए, दसगं दसगं च पंचगडे॥१॥ [सिद्धप्रा० ५२] ७॥

बुद्धद्वारे– प्रत्येकबुद्धानां दशकम्, बुद्धबोधितानां पुरुषाणामष्टशतम्, बुद्धबोधितानां स्त्रीणां विंशतिः, नपुंसकानां दशकम्, बुद्धीभिर्बोधितानां स्त्रीणां विंशतिः, बुद्धीभिर्बोधितानामेव सामान्यतः पुरुषादीनां विंशतिपृथक्त्वम्। उक्तं च **सिद्धप्राभृत-टीकायाम्**– **बुद्धीहिं चेव बोहियाणं पुरिसाईणं सामन्नेण वीसपुहुत्तं सिज्झइ** [गा० ५४, पृ० १३A] त्ति। बुद्धी च **मल्लिस्वामिनी**प्रभृतिका तीर्थकरी सामान्यसाध्व्यादिका वा वेदितव्या, यतः **सिद्धप्राभृतटीकायामेवोक्तम्**– **बुद्धीओ वि मल्लीपमुहाओ अन्नाओ य सामन्नसाहुणीपमुहाओ बोहंति** [गा० ५४, पृ० १३A] त्ति ८। ज्ञानद्वारे– पूर्वभावमपेक्ष्य मति-श्रुतज्ञानिनो युगपदेकसमयेनोत्कर्षतश्चत्वारः सिध्यन्ति, मति-श्रुत-मनःपर्यायज्ञानिनो दश, मति-श्रुता-ऽवधिज्ञानिनां मति-श्रुता-ऽवधि-मनःपर्यायज्ञानिनां वा अष्टशतम् ९। अवगाहनाद्वारे-जघन्यायामवगाहनायां युगपदेकसमयेनोत्कर्षतश्चत्वारः सिध्यन्ति, उत्कृष्टायां द्वौ, अजघन्योत्कृष्टायामष्टशतम्, यवमध्येऽष्टौ। उक्तं च–

उक्कोसगाहणाए, दो सिद्धा होंति एगसमएणं।
चत्तारि जहन्नाए, अट्ठसयं मज्झिमाए उ॥१॥ [सिद्धप्रा० ५६]

अत्र च **टीकाकारेण** व्याख्या कृता– गाथापर्यन्तवर्त्तिनस्तुशब्दस्याधिकार्थसंसूचनाद् 'जवमज्झे अट्ठ' इति १०। उत्कृष्टद्वारे– येषां सम्यक्त्वपरिभ्रष्टानामनन्तः कालोऽगमत् तेषामष्टशतम्, सङ्ख्यातकालपतितानामसङ्ख्यातकालपतितानां च दशकं दशकम्, अप्रतिपतितसम्यक्त्वानां चतुष्टयम्। उक्तं च–

जेसिं अणंतकालो, पडिवाओ तेसि होइ अट्ठसयं।
अप्पडिवडिए चउरो, दसगं दसगं च सेसाणं॥१॥ [सिद्धप्रा० ५७] ११।

अन्तरद्वारे– एको वा सान्तरः सिध्यति बहवो वा, तत्र बहवो यावदष्टशतम् १२।

अनुसमयद्वारे– प्रतिसमयमेको वा सिध्यति बहवो वा। तत्र बहूनां सिध्यतामियं प्ररूपणा– एकादयो द्वात्रिंशत्पर्यन्ता निरन्तरमुत्कर्षतोऽष्टौ समयान् यावत् प्राप्यन्ते। इयमत्र भावना– प्रथमसमये जघन्यतः एको द्वौ वा उत्कर्षतो द्वात्रिंशत् सिध्यन्तः प्राप्यन्ते, द्वितीयसमयेऽपि जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशद्, एवं तृतीयसमयेऽपि, एवं चतुर्थसमयेऽपि, एवं यावदष्टमेऽपि समये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत्, ततः परमवश्यमन्तरम्। तथा त्रयस्त्रिंशदादयोऽष्टचत्वारिंशत्पर्यन्ता निरन्तरं सिध्यन्तः सप्त समयान् यावत् प्राप्यन्ते, भावना प्राग्वत्, परतो नियमादन्तरम्। तथा एकोनपञ्चाशदादयः षष्टिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतः षट् समयान् यावदवाप्यन्ते, परतोऽवश्यमन्तरम्। तथा एकषष्ट्यादयो द्विसप्ततिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतः पञ्च समयान् यावत् प्राप्यन्ते, ततः परमन्तरम्। तथा त्रिसप्तत्यादयश्चतुरशीतिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतश्चतुरस्समयान् यावत् प्राप्यन्ते, तत ऊर्द्ध्वमन्तरम्। तथा पञ्चाशीत्यादयः षण्णवतिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतस्त्रीन् समयान् यावदवाप्यन्ते, परतोऽवश्यमन्तरम्। तथा सप्तनवत्यादयो द्व्युत्तरशतपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतो द्वौ समयौ यावदवाप्यन्ते, परतो नियमादन्तरम्। तथा त्र्युत्तरशतादयोऽष्टोत्तरशतपर्यन्ताः सिध्यन्तो नियमादेकमेव समयं यावदवाप्यन्ते, न द्वि-त्र्यादिसमयानिति। एतदर्थसङ्ग्राहिका चेयं गाथा–

बत्तीसा अडयाला, सट्ठी बावत्तरी य बोद्धव्वा।
चुलसीई छन्नउई, दुरहियमट्ठुत्तरसयं च॥१॥ [विंशतिर्वि० ३६२]

---

१. "तुशब्दाद् जवमज्झे अट्ठ" - **सिद्धप्रा० टी०॥**

अत्राष्टसामयिकेभ्य आरभ्य द्विसामयिकपर्यन्ता निरन्तरं सिद्धाः, एकैकस्मिंश्च विकल्पे उत्कर्षतः शतपृथक्त्वं सङ्ख्यापरिमाणम् १३। गणनाद्वारमल्पबहुत्वद्वारं च प्रागिव द्रष्टव्यम्। तथा च **सिद्धप्राभृते**ऽपि द्रव्यप्रमाणचिन्तायामेतयोर्द्वारयोः सत्पदप्ररूपणोक्तैव गाथा भूयोऽपि परावर्त्तिता–

संखाए जहन्नेणं, एक्को उक्कोसएण अट्ठसयं।
सिद्धा णेगा थोवा, एक्कगसिद्धा उ संखगुणा॥१॥ [सिद्धप्रा० ४०]

तदेवमुक्तं द्रव्यप्रमाणम् २॥

सम्प्रति क्षेत्रप्ररूपणा कर्त्तव्या– तत्र पूर्वभावमपेक्ष्य सत्पदप्ररूपणायामेव कृता। सम्प्रति प्रत्युत्पन्ननयमतेन क्रियते– तत्र पञ्चदशस्वप्यनुयोगद्वारेषु पृच्छा, इह सकलकर्मक्षयं कृत्वा कुत्र गतो भगवान् सिध्यति ?, उच्यते, ऋजुगत्या मनुष्यक्षेत्रप्रमाणे सिद्धिक्षेत्रे गतः सिध्यति। यत उक्तम्– **इहं बोंदिं चइत्ता णं, तत्थ गंतूण सिज्झइ [आव० नि० ९५९]**। गतं क्षेत्रद्वारम् ३॥

सम्प्रति स्पर्शनाद्वारम्– स्पर्शना च क्षेत्रावगाहादतिरिक्ता, यथा परमाणोः, तथाहि– परमाणोरेकस्मिन् प्रदेशेऽवगाहः, सप्तप्रादेशिकी च स्पर्शना। उक्तं च–

एगपएसोगाढं सत्तपएसा य से फुसणा। [ ]

सिद्धानां तु स्पर्शना एवमवगन्तव्या–

फुसइ अणंते सिद्धे, सव्वपएसेहिं नियमसो सिद्धो।
ते उ असंखेज्जगुणा, देस-पएसेहिं जे पुट्ठा॥१॥ [आव० नि० ९७६, विशेषा० ३१७७]

गतं स्पर्शनाद्वारम् ४॥

सम्प्रति कालद्वारम्, तत्र चेयं परिभाषा– सर्वेष्वपि द्वारेषु यत्र यत्र स्थाने-ऽष्टशतमेकसमयेन सिध्यदुक्तं तत्र तत्राष्टौ समया निरन्तरं कालो वक्तव्यः, यत्र यत्र पुनर्विंशतिर्दश वा तत्र तत्र चत्वारः समयाः, शेषेषु स्थानेषु द्वौ समयौ। उक्तं च–

जहिं अट्ठसयं सिज्झइ, अट्ठ उ समया निरंतरं कालो।
वीस-दसएसु चउरो, सेसा सिज्झंति दो समए॥१॥ [सिद्धप्रा० ६१]

सम्प्रति एतदेव मन्दविनेयजनानुग्रहाय विभाव्यते, तत्र क्षेत्रद्वारे– जम्बूद्वीपे

धातकीखण्डे पुष्करवरद्वीपे च प्रत्येकं भरतैरावत-महाविदेहेषूत्कर्षतोऽष्टौ समयान् यावन्निरन्तरं सिध्यन्तः प्राप्यन्ते, हरिवर्षादिष्वधोलोके च चतुरश्चतुरः समयान्, नन्दनवने पण्डकवने लवणसमुद्रे च द्वौ द्वौ समयौ। कालद्वारे– उत्सर्पिण्यामवसर्पिण्यां च प्रत्येकं तृतीय-चतुर्थारकयोरष्टावष्टौ समयान्, शेषेषु चारकेषु चतुरश्चतुरः समयान्। गतिद्वारे-देवगतेरागता उत्कर्षतोऽष्टौ समयान्, शेषगतिभ्य आगताश्चतुरश्चतुरः समयानिति। वेदद्वारे-पश्चात्कृतपुरुषवेदा अष्टौ समयान्, पश्चात्कृतस्त्रीवेद-नपुंसकवेदाः प्रत्येकं चतुरश्चतुरः समयान्। पुरुषवेदेभ्य उद्वृत्त्य पुरुषा एव सन्तः सिध्यन्तोऽष्टौ समयान्, शेषेषु चाष्टसु भङ्गेषु चतुरश्चतुरः समयानिति। तीर्थद्वारे– तीर्थकरतीर्थे तीर्थकरीतीर्थे वाऽतीर्थकरसिद्धा उत्कर्षतोऽष्टौ समयान् यावत्, तीर्थकराः तीर्थकर्यश्च द्वौ द्वौ समयौ। लिङ्गद्वारे– स्वलिङ्गेऽष्टौ समयान्, अन्यलिङ्गे चतुरः समयान्, गृहिलिङ्गे द्वौ समयौ। चारित्रद्वारे– अनुभूतपरिहारविशुद्धिकचारित्राश्चतुरः समयान्, शेषा अष्टावष्टौ समयान्। बुद्धद्वारे– स्वयम्बुद्धा द्वौ समयौ, बुद्धबोधिता अष्टौ समयान्, प्रत्येकबुद्धा बुद्धीबोधिताः स्त्रियो बुद्धीबोधिता एव सामान्यतः पुरुषादयो वा प्रत्येकं चतुरश्चतुरः समयान्। ज्ञानद्वारे मति-श्रुतज्ञानिनो द्वौ समयौ, मति-श्रुत-मनःपर्यायज्ञानिनश्चतुरस्समयान्, मति-श्रुता-ऽवधिज्ञानिनो मति-श्रुता-ऽवधि-मनःपर्यायज्ञानिनो वाऽष्टावष्टौ समयान्। अवगाहनाद्वारे-उत्कृष्टायां जघन्यायां चावगाहनायां द्वौ द्वौ समयौ, यवमध्ये चतुरः समयान्। उक्तं च **सिद्धप्राभृतटीकायाम्**– **जवमज्झाए चत्तारि समया** [गा० ६१, पृ० १५] इति। अजघन्योत्कृष्टायां पुनरवगाहनायामष्टौ समयान्। उत्कृष्टद्वारे– अप्रतिपतितसम्यक्त्वा द्वौ समयौ, सङ्ख्येयकालप्रतिपतिता असङ्ख्येयकालप्रतिपतिताश्चतुरश्चतुरः समयान्, अनन्तकालप्रतिपतिता[१] अष्टौ समयान्, अन्तरादीनि चत्वारि द्वाराणि नेहावतरन्ति। गतं मौलं पञ्चमं काल इति द्वारम् ५॥

सम्प्रति षष्ठमन्तरद्वारम्– अन्तरं नाम सिद्धिगमनविरहकालः, स च सकल-मनुष्यक्षेत्रापेक्षया सत्पदप्ररूपणायामेवोक्तः, यथा जघन्यत एकः समयः उत्कर्षतः षण्मासा इति, तत इह क्षेत्रविभागतः सामान्यतो विशेषतश्चोच्यते– तत्र जम्बूद्वीपे

१. **अनन्तकालप्रतिपतिता अष्टौ समयान्** इति पाठः खं० पा० जेमू० दे० मध्ये नास्ति॥

धातकीखण्डे च प्रत्येकं सामान्यतो वर्षपृथक्त्वमन्तरम्, जघन्यत एकः समयः, विशेषचिन्तायां जम्बूद्वीपविदेहे धातकीखण्डविदेहयोश्चोत्कर्षतः प्रत्येकं वर्षपृथक्त्वमन्तरम्, जघन्यत एकः समयः। तथा सामान्यतः पुष्करवरद्वीपे विशेषचिन्तायां च तत्रत्ययोर्द्वयोरपि विदेहयोः प्रत्येकमुत्कर्षतः साधिकं वर्षमन्तरम्, जघन्यत एकः समयः। उक्तं च–

जंबुद्दीवे धायइ, ओह विभागे य तिसु विदेहेसु।
वासपुहुत्तं अंतर, पुक्खरमुभयं पि वासहियं॥१॥ [सिद्धप्रा० ६२]

कालद्वारे– भरतेष्वैरावतेषु च जन्मत उत्कृष्टमन्तरं किञ्चिदूना अष्टादश सागरोपमकोटीकोट्यः, संहरणतः सङ्ख्येयानि वर्षसहस्राणि, जघन्यत उभयत्राप्येकः समयः। गतिद्वारे– निरयगतेरागत्योपदेशेन सिध्यतामुत्कृष्टमन्तरं वर्षसहस्रम्, हेतुमाश्रित्य प्रतिबोधसम्भवेन सिध्यतां सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः पुनरुभयत्राप्येकः समयः। तिर्यग्योनिकेभ्य आगत्योपदेशतः सिध्यतां वर्षशतपृथक्त्वम्, हेतुमाश्रित्य प्रतिबोधतः सिध्यतां सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः पुनरुभयत्राप्येकः समयः। तिर्यग्योनिकस्त्रीभ्यो मनुष्येभ्यो मनुष्यस्त्रीभ्यः सौधर्मेशानवर्जदेवेभ्यो देवीभ्यश्च पृथक् पृथक् समागत्योपदेशतः सिध्यतां प्रत्येकमुत्कर्षतोऽन्तरं सातिरेकं वर्षम्, हेतुमाश्रित्य प्रतिबोधतः सिध्यतां सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः पुनरुभयत्राप्येकः समयः। तथा पृथिव्यब्वनस्पतिभ्यो गर्भव्युत्क्रान्तेभ्यः प्रथम-द्वितीयनरकपृथिवीभ्यामीशानदेवेभ्यः सौधर्मदेवेभ्यश्च समागत्योपदेशेन हेतुना च सिध्यतां प्रत्येकमुत्कृष्टमन्तरं सङ्ख्येयानि वर्षसहस्राणि, जघन्यत एकः समयः। वेदद्वारे– पुरुषवेदानामुत्कर्षतोऽन्तरं साधिकं वर्षम्, स्त्री-नपुंसकवेदानां प्रत्येकं सङ्ख्येयानि वर्षसहस्राणि, पुरुषेभ्य उद्वृत्त्य पुरुषत्वेन सिध्यतां साधिकं वर्षम्, शेषेषु चाष्टसु भङ्गकेषु प्रत्येकं सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः सर्वत्राप्येकः समयः। तीर्थद्वारे– तीर्थकृतां पूर्वसहस्रपृथक्त्वम् उत्कर्षतोऽन्तरम्, तीर्थकरीणामनन्तः कालः, अतीर्थकराणां साधिकं वर्षम्, नोतीर्थसिद्धानां सङ्ख्येयानि वर्षसहस्राणि, नोतीर्थसिद्धाः प्रत्येकबुद्धाः, जघन्यतः सर्वत्रापि समयः। उक्तं च–

पुव्वसहस्सपुहत्तं, तित्थगराणंतकाल तित्थगरी।
नोतित्थगरा वासाहिगं तु सेसेसु संखसमा॥१॥ [सिद्धप्रा० ६९]

एएसिं च जहन्नं, समओ [सिद्धप्रा०७०]। अत्र **संखसम** त्ति सङ्ख्येयानि वर्षसहस्राणि। लिङ्गद्वारे– स्वलिङ्गादिषु सर्वेष्वपि जघन्यत एकः समयोऽन्तरम्, उत्कर्षतोऽन्यलिङ्गे गृहिलिङ्गे च प्रत्येकं सङ्ख्येयानि वर्षसहस्राणि, स्वलिङ्गे साधिकं वर्षम्। चारित्रद्वारे– पूर्वभावमपेक्ष्य सामायिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणामुत्कृष्टमन्तरं साधिकं वर्षम्, सामायिक-च्छेदोपस्थापन-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणां सामायिक-परिहार-विशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणां सामायिक-च्छेदोपस्थापन-परिहार-विशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रिणां च किञ्चिदूना अष्टादशसागरोपम-कोटीकोट्यः, जघन्यतः सर्वत्राप्येकः समयः। बुद्धद्वारे– बुद्धबोधितानामुत्कर्षतोऽन्तरं सातिरेकं वर्षम्, बुद्धबोधितानां स्त्रीणां प्रत्येकबुद्धानां च सङ्ख्येयानि वर्षसहस्राणि, स्वयम्बुद्धानां पूर्वसहस्रपृथक्त्वम्, जघन्यतः पुनः सर्वत्रापि समयः। उक्तं च–

बुद्धेहिं बोहियाणं, वासहियं सेसयाण संखसमा।
पुव्वसहस्सपुहत्तं, होइ सयंबुद्ध समइयरं॥१॥ [सिद्धप्रा० ७२]

समइयरं इति **इतरद्** जघन्यमन्तरं **समयः**। ज्ञानद्वारे– मति-श्रुतज्ञानिनामुत्कृष्ट-मन्तरं पल्योपमासङ्ख्येयभागः, मति-श्रुता-ऽवधिज्ञानिनां साधिकं वर्षम्, मति-श्रुत-मनःपर्यायज्ञानिनां मति-श्रुता-ऽवधि-मनःपर्यायज्ञानिनां च सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः सर्वत्रापि समयः। अवगाहनाद्वारे– जघन्यायामुत्कृष्टायां चावगाहनायां यवमध्ये चोत्कृष्टमन्तरं श्रेण्यसङ्ख्येयभागः, अजघन्योत्कृष्टायां साधिकं वर्षम्, जघन्यतः पुनः सर्वत्रापि समयः। उत्कृष्टद्वारे– अप्रतिपतितसम्यक्त्वानां सागरोपमासङ्ख्येयभागः, सङ्ख्येयकालप्रतिपतितानामसङ्ख्येयकालप्रतिपतितानां च सङ्ख्येयानि वर्षसहस्राणि, अनन्तकालप्रतिपतितानां साधिकं वर्षम्, जघन्यतः सर्वत्रापि समयः। उक्तं च–

उयहिअसंखो भागो, अपडियपडियाण सेस संखसमा।
वासमहियं अणंते, समओ य जहन्नओ होइ॥१॥ [सिद्धप्रा० ७५]

अन्तरद्वारे– सान्तरं सिध्यताम् अनुसमयद्वारे– निरन्तरं सिध्यतां गणनाद्वारे– एककानामनेकेषां च सिध्यतामुत्कृष्टमन्तरं सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः पुनः सर्वत्रापि समयः। गतमन्तरद्वारम् ६॥

सम्प्रति भावद्वारम्– तत्र सर्वेष्वपि क्षेत्रादिषु द्वारेषु पृच्छा, कतमस्मिन् भावे वर्त्तमानाः सिध्यन्तीति ?, उत्तरम्– क्षायिके भावे। उक्तं च– **खेत्ताइएसु पुच्छा, वागरणं सव्वहिं खइए [सिद्धप्रा० ७७]** । गतं भावद्वारम् ७॥

सम्प्रत्यल्पबहुत्वद्वारम्– तत्र ये तीर्थकरा ये च जले ऊर्ध्वलोकादौ च चतुष्काः सिध्यन्ति ये च हरिवर्षादिषु सुषमसुषमादिषु च संहरणतो दश दश सिध्यन्ति ते परस्परं तुल्याः, तथैवोत्कर्षतो युगपदेकसमयेन प्राप्यमाणत्वात्। तेभ्यो विंशतिसिद्धाः स्तोकाः, तेषां स्त्रीषु दुष्षमायामेकतमस्मिन् विजये वा प्राप्यमाणत्वात्। तथा चोक्तम्– **वीसगसिद्धा इत्थी अहलोगेगविजयादिसु, अओ चउ-दसगेहिंतो थोवा [सिद्धप्रा० टी० गा० ७९]** । तैस्तुल्या विंशतिपृथक्त्वसिद्धाः, यतस्ते सर्वाधोलौकिकग्रामेषु बुद्धीबोधितस्त्र्यादिषु वा लभ्यन्ते ततो विंशतिसिद्धैस्तुल्याः। तदुक्तम्– **वीसपुहुत्तसिद्धा सव्वाहोलोगबुद्धीबोहियाइ अओ वीसगेहिं तुल्ला [सिद्धप्रा० टी० गा० ७९]** क्षेत्र-कालयोः स्वल्पत्वात् कादाचित्कत्वेन च सम्भवादिति। तेभ्योऽष्टशतसिद्धाः सङ्ख्येयगुणाः। उक्तं च–

चउ-दसगा तह वीसा, वीसपुहुत्ता य जे य अट्ठसया।
तुल्ला थोवा तुल्ला, संखेज्जगुणा भवे सेसा॥१॥ [सिद्धप्रा० ७९]

गतमल्पबहुत्वद्वारम् ८॥ कृताऽनन्तरसिद्धप्ररूपणा॥ सम्प्रति परम्परसिद्धप्ररूपणा क्रियते– तत्र सत्पदप्ररूपणा पञ्चदशस्वपि क्षेत्रादिषु द्वारेष्वनन्तरसिद्धवदविशेषेण द्रष्टव्या। द्रव्यप्रमाणचिन्तायां सर्वेष्वपि द्वारेषु सर्वत्रैवानन्ता वक्तव्याः। क्षेत्र-स्पर्शने प्रागिव। कालः पुनः सर्वत्रापि अनादिरूपोऽनन्तो वक्तव्यः। अत एवान्तरमसम्भवान्न वक्तव्यम्। तदुक्तं द्रव्यप्रमाणं कालमन्तरं चाधिकृत्य **सिद्धप्राभृते**–

परिमाणेण अणंता, कालोऽणाई अणंतओ तेसिं।
नत्थि य अंतरकालो [सिद्धप्रा० ८४] इति। भावद्वारमपि प्रागिव।

सम्प्रत्यल्पबहुत्वं **सिद्धप्राभृत**क्रमेणोच्यते– समुद्रसिद्धाः स्तोकाः, तेभ्यो द्वीपसिद्धाः सङ्ख्येयगुणाः। तथा जलसिद्धाः स्तोकाः, तेभ्यः स्थलसिद्धाः सङ्ख्येयगुणाः। तथा ऊर्ध्वलोकसिद्धाः स्तोकाः, तेभ्योऽधोलोकसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि तिर्यग्लोकसिद्धाः सङ्ख्येयगुणाः। उक्तं च–

सामुद्द-दीव जल-थल, दोण्हं दोण्हं तु थोव संखगुणा।
उड्ढ-अह-तिरियलोए, थोवा संखागुणा संखा॥१॥ [सिद्धप्रा० ८५]

तथा लवणसमुद्रसिद्धाः सर्वस्तोकाः, तेभ्यः कालोदसमुद्रसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि जम्बूद्वीपसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि धातकीषण्ड[१]सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि पुष्करवरद्वीपार्द्धसिद्धाः सङ्ख्येयगुणाः। उक्तं च–

लवणे कालोए वा, जंबुद्दीवे य धायईसंडे।
पुक्खरवरे य दीवे, कमसो थोवा य संखगुणा॥१॥ [सिद्धप्रा० ८७]

तथा जम्बूद्वीपे संहरणतो हिमवच्छिखरिसिद्धाः सर्वस्तोकाः १, तेभ्यो हैमवतैरण्यवत[२]सिद्धाः सङ्ख्येयगुणाः २, तेभ्योऽपि महाहिमवद्रूप्पिसिद्धाः सङ्ख्येयगुणाः ३, तेभ्योऽपि देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः ४, तेभ्योऽपि हरिवर्षरम्यकसिद्धाः सङ्ख्येयगुणाः, क्षेत्रबाहुल्यात् ५, तेभ्योऽपि निषधनीलवत्सिद्धाः सङ्ख्येयगुणाः ६, तेभ्योऽपि भरतैरावतसिद्धाः सङ्ख्येयगुणाः, स्वस्थानत्वात् ७, तेभ्योऽपि महाविदेहसिद्धाः सङ्ख्येयगुणाः, सदाभावात् ८। सम्प्रति धातकीषण्ड[३]े क्षेत्रविभागेनोच्यते– धातकीषण्ड[४]े संहरणतो हिमवत्शिखरिसिद्धाः सर्वस्तोकाः १, तेभ्योऽपि महाहिमवद्रूप्पिसिद्धाः सङ्ख्येयगुणाः २, तेभ्योऽपि निषधनीलवत्सिद्धाः सङ्ख्येयगुणाः ३, तेभ्योऽपि हैमवतैरण्यवतसिद्धा विशेषाधिकाः ४, तेभ्योऽपि देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः ५, तेभ्योऽपि हरिवर्षरम्यकसिद्धा विशेषाधिकाः ६, तेभ्योऽपि भरतैरावतसिद्धाः सङ्ख्येयगुणाः ७, तेभ्योऽपि महाविदेहसिद्धाः सङ्ख्येयगुणाः ८। तथा पुष्करवरद्वीपार्द्धे हिमवच्छिखरिसिद्धाः सर्वस्तोकाः १, तेभ्योऽपि महाहिमवद्रूप्पिसिद्धाः सङ्ख्येयगुणाः २, तेभ्योऽपि निषधनीलवंतसिद्धाः सङ्ख्येयगुणाः ३, तेभ्योऽपि हैमवतैरण्यवतसिद्धाः सङ्ख्येयगुणाः ४, तेभ्योऽपि देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः ५, तेभ्योऽपि हरिवर्षरम्यकसिद्धाः विशेषाधिकाः ६, तेभ्योऽपि भरतैरावतसिद्धाः सङ्ख्येयगुणाः स्वस्थानमिति कृत्वा ७, तेभ्योऽपि महाविदेहसिद्धाः सङ्ख्येयगुणाः, क्षेत्रबाहुल्यात्

---

१. °खंड° जे१,२ विना ॥ २. °वत-हैरण्य° खं०। °वतऐरण्य° पा० जे१,२। °वत-हिरण्य° दे० ॥ ३. °खंडे खं० दे० ॥ ४. °खंडे खं० दे० ॥

स्वस्थानत्वाच्च ८। सम्प्रति त्रयाणामपि समवायेनाल्पबहुत्वमुच्यते सर्वस्तोका जम्बूद्वीपे हिमवच्छिखरिसिद्धाः १, तेभ्योऽपि हैमवतैरण्यवतसिद्धाः सङ्ख्येयगुणाः २, तेभ्योऽपि महाहिमवद्रूप्यिसिद्धाः सङ्ख्येयगुणाः ३, तेभ्योऽपि देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः ४, तेभ्योऽपि हरिवर्षरम्यकसिद्धाः सङ्ख्येयगुणाः ५, तेभ्योऽपि निषधनीलवत्सिद्धाः सङ्ख्येयगुणाः ६, तेभ्योऽपि धातकीषण्डे हिमवच्छिखरिसिद्धा विशेषाधिकाः, स्वस्थाने तु परस्परं तुल्याः ७, ततो धातकीषण्डमहाहिमवद्रूप्पि-पुष्करवरद्वीपार्द्धहिमवच्छिखरिसिद्धाः सङ्ख्येयगुणाः, स्वस्थाने तु चत्वारोऽपि परस्परं तुल्याः ८, ततो धातकीषण्डनिषधनीलवत्सिद्धाः पुष्करवरद्वीपार्द्धे महाहिमवद्रूप्पिसिद्धाश्च सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः ९, ततो धातकीषण्डहैमवतैरण्यवतसिद्धा विशेषाधिकाः १०, तेभ्योऽपि पुष्करवरद्वीपार्द्धनिषधनीलवत्सिद्धाः सङ्ख्येयगुणाः ११, ततो धातकीषण्डे देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः १२, तेभ्योऽपि धातकीषण्ड एव हरिवर्षरम्यकसिद्धा विशेषाधिकाः १३, ततः पुष्करवरदीपार्द्धे हैमवतरैण्यवतसिद्धाः सङ्ख्येगुणाः १४, तेभ्योऽपि पुष्करवरदीपार्द्धे एव देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः १५, तेभ्योऽपि तत्रैव हरिवर्षरम्यकसिद्धा विशेषाधिकाः १६, तेभ्योऽपि जम्बूद्वीपे भरतैरावतसिद्धाः सङ्ख्येयगुणाः १७, तेभ्योऽपि धातकीषण्डसत्कभरतैरावतसिद्धाः सङ्ख्येयगुणाः १८, तेभ्योऽपि पुष्करवरद्वीपार्द्धे भरतैरावतसिद्धाः सङ्ख्येयगुणाः १९, तेभ्योऽपि जम्बूद्वीपे विदेहसिद्धाः सङ्ख्येयगुणाः २०, ततो धातकीषण्डविदेहसिद्धाः सङ्ख्येयगुणाः २१, [1]ततोऽपि पुष्करवरद्वीपार्द्धविदेहसिद्धाः सङ्ख्येयगुणाः २२। इदं च क्षेत्रविभागेनाल्पबहुत्वं **सिद्धप्राभृतटीका**तो लिखितम्। गतं क्षेत्रद्वारम् १।

अधुना कालद्वारम्– तत्रावसर्पिण्यां संहरणत एकान्तदुष्षमासिद्धाः सर्वस्तोकाः, [2]इतो दुष्षमासिद्धाः सङ्ख्येयगुणाः, तेभ्यः सुषमदुष्षमासिद्धा असङ्ख्येयगुणाः, कालस्यासङ्ख्येयत्वात्, ततः सुषमासिद्धा विशेषाधिकाः, तेभ्योऽपि सुषमसुषमासिद्धा विशेषाधिकाः, तेभ्योऽपि दुष्षमसुषमासिद्धाः सङ्ख्येयगुणाः। उक्तं च–

---

१. **तेभ्योऽपि** पा०॥ २. **ततो** खं० ॥

अइदूसमाइ थोवा, संख असंखा दुवे विसेसहिया।
दुस्समसुसमा संखागुणा उ ओसप्पिणीसिद्धा॥१॥ [सिद्धप्रा० ८९]

एवमुत्सर्पिण्यामपि द्रष्टव्यम्। तथा चोक्तम्–

अइदूसमाइ थोवा, संख असंखा उ दोन्नि सविसेसा।
दुस्समसुसमा संखागुणा उ उस्सप्पिणीसिद्धा॥१॥ [सिद्धप्रा० ९०]

सम्प्रत्युत्सर्पिण्यवसर्पिण्योः समुदायेनाल्पबहुत्वमुच्यते– तत्र द्वयोरप्युत्सर्पिण्यवसर्पिण्योरेकान्तदुष्षमासिद्धाः सर्वस्तोकाः १, तत उत्सर्पिण्यां दुष्षमासिद्धा विशेषाधिकाः २, ततोऽवसर्पिण्यां दुष्षमासिद्धाः सङ्ख्येयगुणाः ३, ततो द्वयोरपि सुषमदुष्षमासिद्धा असङ्ख्येयगुणाः ४, तेभ्योऽपि द्वयोरपि सुषमासिद्धा विशेषाधिकाः ५, तेभ्योऽपि द्वयोरपि सुषमसुषमासिद्धा विशेषाधिकाः ६, तेभ्योऽपि द्वयोरपि दुष्षमसुषमासिद्धाः सङ्ख्येयगुणाः ७, ततोऽवसर्पिण्यां सर्वसिद्धाः सङ्ख्येयगुणाः ८, तेभ्योऽप्युत्सर्पिणीसर्वसिद्धा विशेषाधिकाः ९। गतं कालद्वारम् २।

सम्प्रति गतिद्वारम्– तत्र मानुषीभ्योऽनन्तरागताः सिद्धाः सर्वस्तोकाः १, ततो मानुषेभ्योऽनन्तरागताः [सिद्धाः] सङ्ख्येयगुणाः २, तेभ्योऽपि नैरयिकेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ३, तेभ्योऽपि तिर्यग्योनिस्त्रीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ४, तेभ्योऽपि तिर्यग्योनिकेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ५, तेभ्योऽपि देवीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ६, [१]तेभ्योऽपि देवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः। उक्तं च–

मणुई मणुया नारय, तिरिक्खिणी तह तिरिक्ख देवीओ।
देवा य जहाकमसो, संखेज्जगुणा मुणेयव्वा॥१॥ [सिद्धप्रा० ९४]

तथा एकेन्द्रियेभ्योऽनन्तरागताः सिद्धाः सर्वस्तोकाः १, ततः पञ्चेन्द्रियेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २। तथा वनस्पतिकायेभ्योऽनन्तरागताः सिद्धाः सर्वस्तोकाः १, ततः पृथिवीकायेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २, ततोऽप्यप्कायेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ३, तेभ्योऽपि त्रसकायेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ४। उक्तं च–

---

१. **ततोऽपि** खं० दे० ॥

एगिंदिएहिं थोवा, सिद्धा पंचेंदिएहिं संखगुणा।

तरु-पुढवि-आउ-तसकाइएहिं संखागुणा कमसो॥१॥ [सिद्धप्रा० ९५]

तथा चतुर्थनरकपृथिवीतोऽनन्तरागताः सिद्धाः सर्वस्तोकाः १, तेभ्यस्तृतीय-पृथिवीतोऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २, तेभ्योऽपि द्वितीयपृथिवीतोऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ३, तेभ्योऽपि पर्याप्तबादरप्रत्येकवनस्पतिभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ४, तेभ्योऽपि पर्याप्तबादरपृथिवीकायेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ५, तेभ्योऽपि पर्याप्तबादराप्कायेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ६, तेभ्योऽपि भवनपतिदेवीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ७, तेभ्योऽपि भवनवासिदेवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ८, ततोऽपि व्यन्तरीभ्यो-ऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ९, तेभ्योऽपि व्यन्तरदेवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः १०, तेभ्योऽपि ज्योतिष्कदेवीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः ११, तेभ्योऽपि ज्योतिष्कदेवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः १२, तेभ्योऽपि मनुष्यस्त्रीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः १३, तेभ्योऽपि मनुष्येभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः १४, तेभ्योऽपि प्रथमनरकपृथिवीतोऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः १५, तेभ्योऽपि तिर्यग्योनिस्त्रीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः १६, तेभ्योऽपि तिर्यग्योनिकेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः १७, तेभ्योऽपि अनुत्तरोपपातिदेवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः १८, तेभ्योऽपि ग्रैवेयकेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः १९, तेभ्योऽप्यच्युतदेवलोकादनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २०, तेभ्योऽपि आरणदेवलोकादनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २१, एवमधोमुखं तावन्नेयं यावत् सनत्कुमारादनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २२, तत ईशानदेवीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २३, ततोऽपि सौधर्मदेवीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २४, तेभ्योऽपि ईशान-देवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २५, तेभ्योऽपि सौधर्मदेवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः २६। उक्तं च–

नरगचउत्था पुढवी, तच्चा दोच्चा तरु पुढवि आऊ।

भवणवइदेवि-देवा, एवं वण-जोइसाणं पि॥१॥

मणुई मणुस्स नारयपढमा तत्तो तिरिक्ख तिरिया य।
देवा अणुत्तराई, सव्वे वि सणंकुमारंता॥२॥
ईसाणदेवि सोहम्मदेवि ईसाणदेव सोहम्मा।
सव्वे वि जहाकमसो, अणंतराया उ संखगुणा॥३॥ [सिद्धप्रा० ९६-९८]

गतं गतिद्वारम् ३। सम्प्रति वेदद्वारम्– तत्र सर्वस्तोका नपुंसकसिद्धाः, [तेभ्यः] स्त्रीसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि पुरुषसिद्धाः सङ्ख्येयगुणाः। उक्तं च–

थोवा नपुंस इत्थी, संखा संखागुणा तओ पुरिसा। [सिद्धप्रा० ९९] ४॥

तीर्थद्वारे– सर्वस्तोकाः तीर्थकरीसिद्धाः, ततः तीर्थकरीतीर्थे प्रत्येकबुद्धसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि तीर्थकरीतीर्थेऽतीर्थकरीसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि तीर्थकरीतीर्थे एवातीर्थकरसिद्धाः सङ्ख्येयगुणाः, तेभ्यः तीर्थकरसिद्धा अनन्तगुणाः, तेभ्योऽपि तीर्थकरतीर्थे प्रत्येकबुद्धसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि तीर्थकरतीर्थ एव साध्वीसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि तीर्थकरतीर्थ एवातीर्थकरसिद्धाः सङ्ख्येयगुणाः ५। लिङ्गद्वारे– गृहिलिङ्गसिद्धाः सर्वस्तोकाः, तेभ्योऽप्यन्यलिङ्गसिद्धा असङ्ख्येयगुणाः, तेभ्योऽपि स्वलिङ्गसिद्धा असङ्ख्येयगुणाः। उक्तं च–

गिहि-अन्न-सलिंगेहिं, सिद्धा थोवा दुवे असंखगुणा। [सिद्धप्रा० १०१] ६।

चारित्रद्वारे– सर्वस्तोकाश्छेदोपस्थापन-परिहारविशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रसिद्धाः, तेभ्यः सामायिक-च्छेदोपस्थापन-परिहारविशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि छेदोपस्थापन-सूक्ष्मसम्पराय-यथाख्यातचारित्रसिद्धा असङ्ख्येयगुणाः, सामायिकरहितं च छेदोपस्थापनं भग्नचारित्रस्यावगन्तव्यम्, तेभ्योऽपि सामायिक-च्छेदोपस्थापन-सूक्ष्मसम्पराय-यथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि सामायिक-सूक्ष्मसम्पराय-यथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः। उक्तं च–

थोवा परिहारचऊ, पंचग [1]संखा असंख छेयतिगं।
छेयचउक्कं संखे, सामायितिगं च संखगुणं॥१॥ [सिद्धप्रा० १०२] ७।

---

१. अस्मत्सविधवर्तिषु सर्वेषु हस्तलिखितादर्शेषु **संखा** इत्यस्य स्थाने **सिद्धा** इति पाठः। **सिद्धप्राभृते**ऽपि **संखा** इति पाठः।

बुद्धद्वारे-सर्वस्तोकाः स्वयम्बुद्धसिद्धाः, तेभ्यः प्रत्येकबुद्धसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि बुद्धीबोधितसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि बुद्धबोधितसिद्धाः सङ्ख्येयगुणाः ८। ज्ञानद्वारे– मति-श्रुत-मनःपर्यायज्ञानिसिद्धाः सर्वस्तोकाः, तेभ्यो मति-श्रुतज्ञानिसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि मति-श्रुता-ऽवधि-मनःपर्यवज्ञानिसिद्धा असङ्ख्येयगुणाः, तेभ्योऽपि मति-श्रुता-ऽवधिज्ञानिसिद्धाः सङ्ख्येयगुणाः। उक्तं च– 5

मणपज्जवनाणतिगे, दुगे चउक्के मणस्स नाणस्स।

थोवा संख असंखा, ओहितिगे हुंति संखेज्जा॥१॥ [सिद्धप्रा० १०४] ९।

अवगाहनाद्वारे– सर्वस्तोका द्विहस्तप्रमाणजघन्यावगाहनासिद्धाः, तेभ्यो धनुःपृथक्त्वाभ्यधिकपञ्चधनुःशतप्रमाणोत्कृष्टावगाहनासिद्धाः असङ्ख्येयगुणाः, ततो मध्यमावगाहनासिद्धा असङ्ख्येयगुणाः। उक्तं च– 10

ओगाहणा जहन्ना, थोवा उक्कोसिया असंखगुणा।

तत्तो वि असंखगुणा, नायव्वा मज्झिमाए वि ॥१॥ [सिद्धप्रा० १०५]

अत्रैव **सिद्धप्राभृतटीकाकारो**पदर्शितो विशेषो दर्श्यते– सर्वस्तोकाः सप्त-हस्तावगाहनासिद्धाः १, तेभ्यः पञ्चधनुःशतप्रमाणावगाहनासिद्धाः [अ]सङ्ख्येयगुणाः २, [तेभ्योऽपि न्यूनसप्तहस्तप्रमाणावगाहनासिद्धा असङ्ख्येयगुणाः ३, ततः सातिरेक- 15 पञ्चधनुःशतप्रमाणावगाहनासिद्धा असङ्ख्येयगुणाः ४], ततोऽप्यूनपञ्चधनुःशतप्रमाणा-वगाहनासिद्धाः सङ्ख्येयगुणाः ५, तेभ्योऽपि सातिरेकसप्तहस्तप्रमाणावगाहनासिद्धा विशेषाधिकाः ६-१०।

उत्कृष्टद्वारे– सर्वस्तोकाः अप्रतिपतितसिद्धाः, तेभ्यः सङ्ख्येय-कालप्रतिपतितसिद्धा असङ्ख्येयगुणाः, तेभ्योऽप्यसङ्ख्येयकालप्रतिपतितसिद्धाः सङ्ख्येयगुणाः, 20 तेभ्योऽप्यनन्तकालप्रतिपतितसिद्धा असङ्ख्येयगुणाः। उक्तं च–

अप्पडिवइया सिद्धा, संखाऽसंखा अणंतकाला य।

थोव असंखेज्जगुणा, संखेज्जगुणा असंखगुणा॥१॥ [सिद्धप्रा० १०६] ११।

अन्तरद्वारे– सर्वस्तोकाः षण्मासान्तरसिद्धाः, ततः एकसमयान्तरसिद्धाः सङ्ख्येयगुणाः, ततो द्विसमयान्तरसिद्धाः सङ्ख्येयगुणाः, ततोऽपि त्रिसमयान्तरसिद्धाः 25

सङ्ख्येयगुणाः, एवं तावद् वाच्यं यावद् यवमध्यम्, ततः सङ्ख्येयगुणहीनाः सङ्ख्येयगुणहीनास्तावद् वक्तव्या यावदेकसमयहीनषण्मासान्तरसिद्धेभ्यः षण्मासान्तरसिद्धाः सङ्ख्येयगुणहीनाः १२। अनुसमयद्वारे– सर्वस्तोका अष्टसमयसिद्धाः, ततः सप्तसमयसिद्धाः सङ्ख्येयगुणाः, तेभ्यः षट्समयसिद्धाः सङ्ख्येयगुणाः, एवं समयसमयहान्या तावद् वाच्यं यावद् द्विसमयसिद्धाः सङ्ख्येयगुणाः। उक्तं च–

अट्ठसमयम्मि थोवा, संखेज्जगुणा उ सत्तसमया उ।
एवं पडिहायंते, जाव पुणो दोन्नि समया उ॥१॥ [सिद्धप्रा० १०८]

अत्र 'अट्ठसमयम्मि' इत्यादौ द्विगुसमाहारत्वादेकवचनम् १३। गणनाद्वारे– सर्वस्तोका अष्टशतसिद्धाः, ततः सप्ताधिकशतसिद्धा अनन्तगुणाः, तेभ्योऽपि षडधिकशतसिद्धाः अनन्तगुणाः, तेभ्योऽपि पञ्चाधिकशतसिद्धा अनन्तगुणाः, एवमेकैकहान्या अनन्तगुणास्तावद् वाच्या यावदेकपञ्चाशत्सिद्धेभ्यः पञ्चाशत्सिद्धा अनन्तगुणाः, ततस्तेभ्य एकोनपञ्चाशत्सिद्धा असङ्ख्येयगुणाः, तेभ्योऽप्यष्टचत्वारिंशत्सिद्धा असङ्ख्येयगुणाः, एवमेकैकपरिहान्या तावद् वाच्यं यावत् षड्विंशतिसिद्धेभ्यः पञ्चविंशतिसिद्धा असङ्ख्येयगुणाः, ततः तेभ्यश्चतुर्विंशतिसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि त्रयोविंशतिसिद्धाः सङ्ख्येयगुणाः, एवमेकैकहान्या सङ्ख्येयगुणाः तावद् वाच्या यावद् द्विसिद्धेभ्य एकैकसिद्धाः सङ्ख्येयगुणाः। उक्तं च–

अट्ठसयसिद्ध थोवा, सत्तहियसया अणंतगुणिया य।
एवं परिहायंते, सयगाओ जाव पन्नासं॥१॥
तत्तो पण्णासाओ, असंखगुणिया उ जाव पणुवीसं।
पणुवीसा आरब्भा, संखगुणा होंति एगं ता॥२॥ [सिद्धप्रा० १०९-११०] १४।

सम्प्रति अस्मिन्नेवाल्पबहुत्वद्वारे यो विशेषः **सिद्धप्राभृते** दर्शितः स विनेयजनानुग्रहाय दर्श्यते– तत्र सर्वस्तोका अधोमुखसिद्धाः, ते च पूर्ववैरिभिः पादेनोत्पाट्य नीयमाना अधोमुखकायोत्सर्गस्थिता वा वेदितव्याः, तेभ्य ऊर्ध्वस्थितकायोत्सर्गसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि उत्कुटुकासनसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि वीरासनसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि न्युब्जासनसिद्धाः सङ्ख्येयगुणाः, न्युब्ज उपविष्ट एवाधोमुखो

द्रष्टव्यः, तेभ्योऽपि पार्श्वस्थितसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽप्युत्तानस्थितसिद्धाः सङ्ख्येयगुणाः। तथा चैतदेव पश्चानुपूर्व्याऽभिहितम्–

उत्तानग पासिल्लग, निउज्ज वीरासणे य उक्कुडिए।
उद्धट्ठिय ओमंथिय, संखेज्जगुणेण हीणा उ॥१॥ [सिद्धप्रा० १११]

तदेवमुक्तमल्पबहुत्वद्वारम्॥१५॥

सम्प्रति सर्वद्वारगताल्पबहुत्वविशेषोपदर्शनाय सन्निकर्षद्वारमुच्यते–

सन्निकर्षो नाम संयोगः, ह्रस्व-दीर्घयोरिव विवक्षितं किञ्चित् प्रतीत्य विवक्षितस्याल्पतया बहुत्वेन वाऽवस्थानरूपः सम्बन्धः। उक्तं च–

संजोग सन्निगासो, पडुच्चसम्बन्ध एगट्ठा। [सिद्धप्रा० ११२]

तत्रेयं व्याप्तिः– यत्र यत्राष्टशतमुपलभ्यते तत्र तत्रोपरितनमष्टकरूपमङ्कमपनीय शेषस्य शतस्य चतुर्भिर्भागो ह्रियते, हृते च भागे लब्धा पञ्चविंशतिः, तत्र पञ्चविंशतिसङ्ख्येयप्रथमचतुर्भागे क्रमेण सङ्ख्येयगुणहानिर्वक्तव्या। तद्यथा– सर्वबहव एककसिद्धाः, ततो द्विक-द्विकसिद्धाः सङ्ख्येयगुणहीनाः, तेभ्योऽपि त्रिक-त्रिकसिद्धाः सङ्ख्येयगुणहीनाः, एवं तावद् वाच्यं यावत् पञ्चविंशतिसिद्धाः सङ्ख्येयगुणहीनाः। तदुक्तम्– **पढमो चउत्थभागो पणुवीसा, तत्थ संखेज्जगुणहाणी दट्ठव्व [सिद्धप्रा० टी० गा०११५]** त्ति। द्वितीये पुनश्चतुर्थे[१] भागे क्रमेणासङ्ख्येयगुणहानिर्वक्तव्या, तद्यथा– पञ्चविंशति- पञ्चविंशतिसिद्धेभ्यः षड्विंशति-षड्विंशतिसिद्धाः असंख्येयगुणहीनाः, एवमैकैकवृद्ध्या असङ्ख्येयगुणहानिः तावद् वक्तव्या यावत् पञ्चाशत्। तदुक्तम्–

बिइए चउत्थभागे असंखगुणहाणी जाव पन्नासं [सिद्धप्रा०टी०गा०११५, पृ०२६A] ति।

तृतीयस्माच्चतुर्थभागादारभ्य सर्वत्रापि अनन्तगुणहानिर्वक्तव्या, तद्यथा– पञ्चाशत्-पञ्चाशत्सिद्धेभ्य एकपञ्चाशदेकपञ्चाशत्सिद्धा अनन्तगुणहीनाः, तेभ्योऽपि द्वि-पञ्चाशत्सिद्धा अनन्तगुणहीनाः, एवमेकैकवृद्ध्या अनन्तगुणहानिस्तावद् वक्तव्या यावदष्टाधिकशतसिद्धा अनन्तगुणहीनाः। उक्तं च– **तइयपयं आइं काऊण चउत्थपयं जाव अट्ठसयं ताव अणंतगुणहाणी एगवन्नाओ आरब्भ दट्ठव्वा। [सिद्धप्रा० टी० गा० ११५,**

---

१. °**श्चतुर्थभागे** जे१,२ मां० दे० ॥

पृ० २६A] **सिद्धप्राभृतसूत्रेऽप्युक्तम्–**

पढमे भागे संखा, बिइए असंख अणंत तइयाई। [सिद्धप्रा० ११५]

तथा यत्र यत्र विंशतिसिद्धाः तत्र तत्रापि व्याप्तिरियमनुसर्त्तव्या– प्रथमे चतुर्थभागे सङ्ख्येयगुणहानिः, द्वितीये असङ्ख्येयगुणहानिः, तृतीये चतुर्थे चानन्तगुणहानिः। तद्यथा– एककसिद्धाः सर्वबहवः, तेभ्योऽपि द्विक-द्विकसिद्धाः सङ्ख्येयगुणहीनाः, एवं तावद् वाच्यं यावत् पञ्च; ततः षडादिसिद्धा असङ्ख्येयगुणहीना यावद् दश, तत एकादशादयः सर्वेऽप्यनन्तगुणहीनाः। एवमधोलोकादिष्वपि विंशतिपृथक्त्वसिद्धौ प्रथमे चतुर्थभागे सङ्ख्येयगुणहानिः, द्वितीये चतुर्थभागेऽसङ्ख्येयगुणहानिः, तृतीयस्माच्चतुर्थभागादारभ्य पुनः सर्वत्राप्यनन्तगुणहानिः।

येषु तु हरिवर्षादिषु स्थानेषूत्कर्षतो दश दश सिध्यन्ति तत्रैवं व्याप्तिः– त्रिकं यावत् सङ्ख्येयगुणहानिः, ततश्चतुष्के पञ्चके चासङ्ख्येयगुणहानिः, ततः षट्कादारभ्य सर्वत्रापि अनन्तगुणहानिः। तद्यथा– एककसिद्धाः सर्वबहवः, ततो द्विक-द्विकसिद्धाः सङ्ख्येयगुणहीनाः, तेभ्योऽपि त्रिक-त्रिकसिद्धाः सङ्ख्येयगुणहीनाः, तेभ्योऽपि चतुश्चतुःसिद्धाः असङ्ख्येयगुणहीनाः, तेभ्योऽपि पञ्च-पञ्चसिद्धा असङ्ख्येयगुणहीनाः, ततः षडादयः सर्वेऽप्यनन्तगुणहीनाः।

यत्र पुनरवगाहनायवमध्यादावुत्कर्षतोऽष्टौ सिध्यन्तः प्राप्यन्ते तत्रैवं व्याप्तिः– चतुष्कं यावत् सङ्ख्येयगुणहानिः, ततः परमनन्तगुणहानिः, तद्यथा– एककसिद्धाः सर्वबहवः, तेभ्योऽपि द्विक-द्विकसिद्धाः सङ्ख्येयगुणहीनाः, तेभ्योऽपि त्रिक-त्रिकसिद्धाः सङ्ख्येयगुणहीनाः, तेभ्योऽपि चतुश्चतुःसिद्धाः सङ्ख्येयगुणहीनाः, ततः परं पञ्चादयोऽनन्तगुणहीनाः, अत्रासङ्ख्येयगुणहानिर्न विद्यते।

यत्र पुनरूर्ध्वलोकादावुत्कर्षतश्चत्वारः सिध्यन्तः प्राप्यन्ते तत्र एवं व्याप्तिः– एककसिद्धाः सर्वबहवः, तेभ्यो द्विक-द्विकसिद्धा असङ्ख्येयगुणहीनाः, तेभ्योऽपि त्रिक-त्रिकसिद्धा अनन्तगुणहीनाः, तेभ्योऽपि चतुश्चतुस्सिद्धा अनन्तगुणहीनाः, अत्र सङ्ख्येयगुणहानिर्न विद्यते। तदुक्तम्– **जत्थ चत्तारि सिद्धा दिट्ठा तत्थ संखेज्जगुणहाणी नत्थि, संखेज्जविवज्जिय चउक्के [सिद्धप्रा० टी० गा० ११५ पृ० २६]** इति वचनादिति। यत्र

पुनर्लवणादौ द्वौ द्वावुत्कर्षतः सिध्यन्तौ दृष्टौ तत्रैवं व्याप्तिः– एककसिद्धाः सर्वबहवः, ततो द्विक-द्विकसिद्धा अनन्तगुणहीनाः। तदुक्तम्– **लवणे दो दो सिद्धा दिट्ठा, तत्थ एक्कगसिद्धा बहुगा, दुगसिद्धा अणंतगुणहीणा। [सिद्धप्रा० टी० गा० ११५ पृ० २६]** तदेवमिह सन्निकर्षो द्रव्यप्रमाणे सप्रपञ्चं चिन्तितः, शेषेषु तु द्वारेषु **सिद्धप्राभृतटीका**तो भावनीयः॥ इह तु ग्रन्थगौरवभयान्नोच्यते।

सिद्धप्राभृतसूत्रम्, तद्वृत्तिं चोपजीव्य **मलयगिरिः**।

सिद्धस्वरूपमेतन्निरवोचच्छिष्यहितबुद्धिः॥१॥

सम्प्रति विशेषान्तरं जिज्ञासुरनन्तरसिद्धस्वरूपं शिष्यः प्रश्नयन्नाह–

[सू० ३९] से किं तं अणंतरसिद्धकेवलणाणं ? अणंतरसिद्धकेवलणाणं पण्णरसविहं पण्णत्तं, तंजहा-तित्थसिद्धा १, अतित्थसिद्धा २, तित्थगरसिद्धा ३, अतित्थगरसिद्धा ४, सयंबुद्धसिद्धा ५, पत्तेयबुद्धसिद्धा ६, बुद्धबोहियसिद्धा ७, इत्थिलिंगसिद्धा ८, पुरिसलिंगसिद्धा ९, णपुंसगलिंगसिद्धा १०, सलिंगसिद्धा ११, अण्णलिंगसिद्धा १२, गिहिलिंगसिद्धा १३, एगसिद्धा १४, अणेगसिद्धा १५, सेत्तं अणंतरसिद्धकेवलणाणं।

से किं तमित्यादि। अथ किं तद् अनन्तरसिद्धकेवलज्ञानम् ?। सूरिराह– अनन्तरसिद्धकेवलज्ञानं पञ्चदशविधं प्रज्ञप्तम्, पञ्चदशविधता च तस्याऽनन्तरसिद्धानामनन्तरपाश्चात्त्यभवरूपोपाधिभेदापेक्षया पञ्चदशविधत्वात्। ततोऽनन्तरसिद्धानामेवानन्तरभवोपाधिभेदतः पञ्चदशविधतां मुख्यत आह– **तद्यथा** इत्युपप्रदर्शने। **तित्थसिद्धा** इत्यादि, तीर्यते संसारसागरोऽनेनेति तीर्थम्– यथावस्थितसकलजीवाऽजीवादिपदार्थसार्थप्ररूपकं परमगुरुप्रणीतं प्रवचनम्, तच्च निराधारं न भवतीति कृत्वा सङ्घः प्रथमगणधरो वा वेदितव्यम्, उक्तं च– **तित्थं[1] भंते ! तित्थं ? तित्थंकरे तित्थं ?, गोयमा ! अरहा ताव नियमा[2] तित्थंकरे, तित्थं पुण चाउव्वण्णो समणसंघो पढमगणहरो वा। [भगवतीसू० श०२० उ०८।१४]**, तस्मिन् उत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः १। तथा

---

१. तीर्थं भदन्त ! तीर्थं तीर्थकरस्तीर्थम् ? गौतम ! अर्हन् तावत् नियमात् तीर्थकरः, तीर्थं पुनश्चातुर्वर्णः श्रमणसङ्घः प्रथमगणधरो वा॥ २. **नियमा** नास्ति जेसं० विना ॥

तीर्थस्याभावोऽतीर्थम्, तीर्थस्याभावश्चानुत्पादोऽपान्तराले व्यवच्छेदो वा, तस्मिन् ये सिद्धास्तेऽतीर्थसिद्धाः। तत्र तीर्थस्यानुत्पादे सिद्धा **मरुदेवी**प्रभृतयः, न हि **मरुदेव्या**दिसिद्धिगमनकाले तीर्थमुत्पन्नमासीत्। तथा तीर्थस्य व्यवच्छेदश्चन्द्रप्रभस्वामि-**सुविधिस्वाम्य**पान्तराले, तत्र ये जातिस्मरणादिनाऽपवर्गमवाप्य[१] सिद्धाः ते तीर्थव्यवच्छेदसिद्धाः २। तथा तीर्थकराः सन्तो ये सिद्धास्ते तीर्थकरसिद्धाः ३। अतीर्थकरसिद्धाः तीर्थकरेभ्योऽन्ये सामान्यकेवलिनः ४। तथा स्वयम्बुद्धाः सन्तो ये सिद्धाः ते स्वयम्बुद्धसिद्धाः ५। प्रत्येकबुद्धाः सन्तो ये सिद्धाः ते प्रत्येकबुद्धसिद्धाः ६।

अथ स्वयम्बुद्ध-प्रत्येकबुद्धानां कः प्रतिविशेषः ?, उच्यते, बोध्युपधि-श्रुत-लिङ्गकृतो विशेषः। तथाहि– स्वयम्बुद्धा बाह्यप्रत्ययमन्तरेणैव बुध्यन्ते, **स्वय**मेव बाह्यप्रत्ययमन्तरेणैव निजजातिस्मरणादिना **बुद्धाः** स्वयम्बुद्धा इति व्युत्पत्तेः। ते च द्विधा– तीर्थकराः तीर्थकरव्यतिरिक्ताश्च, इह तीर्थकरव्यतिरिक्तैरधिकारः। आह च **चूर्णिकृत्**– **ते दुविहा– तित्थयरा तित्थयरवइरित्ता वा, इह वइरित्तेहिं अहिगारो [नन्दीचू० सू० ३८ पृ० २६]** इति। प्रत्येकबुद्धास्तु बाह्यप्रत्ययमपेक्ष्य बुध्यन्ते, **प्रत्येकं** बाह्यं वृषभादिकं कारणमभिसमीक्ष्य **बुद्धाः** प्रत्येकबुद्धा इति व्युत्पत्तेः; तथा च श्रूयते– बाह्यवृषभादिप्रत्ययसापेक्षा करकण्ड्वादीनां बोधिः। बहिःप्रत्ययमपेक्ष्य च बुद्धाः सन्तो नियमतः प्रत्येकमेव विहरन्ति, न गच्छवासिन इव संहताः। आह च **चूर्णिकृत्**– **पत्तेयं-बाहां वृषभादिकारणमभिसमीक्ष्य बुद्धाः प्रत्येकबुद्धाः, बहिः प्रत्ययं प्रति बुद्धानां च पत्तेयं नियमा विहारो जम्हा तम्हा य ते पत्तेयबुद्धा [नन्दीचू० सू० ३८ पृ० २६]** इति। तथा स्वयम्बुद्धानामुपधिर्द्वादशविध एव पात्रादिकः। प्रत्येकबुद्धानां तु द्विधा– जघन्यत उत्कर्षतश्च। तत्र जघन्यतो द्विविधः, उत्कर्षतो नवविधः प्रावरणवर्जः। आह च **चूर्णिकृत्**– **पत्तेयबुद्धाणं जहन्नेणं दुविहो उक्कोसेणं नवविहो नियमा पाउरणवज्जो भवइ। [नन्दीचू० सू० ३८ पृ० २६]**, तथा स्वयम्बुद्धानां पूर्वाधीतं श्रुतं भवति वा न वा, यदि भवति ततो लिङ्गं देवता वा प्रयच्छति गुरुसन्निधौ वा गत्वा प्रतिपद्यन्ते, यदि चैकाकी

---

१. °वर्गमार्गमवाप्य खंसं० ॥

विहरणसमर्थ इच्छा च तस्य तथारूपा जायते तत एकाकी विहरति अन्यथा गच्छवासेऽवतिष्ठते; अथ पूर्वाधीतं श्रुतं न भवति तर्हि नियमाद् गुरुसन्निधौ गत्वा लिङ्गं प्रतिपद्यते, गच्छं चावश्यं न मुञ्चति। उक्तं च **चूर्णिकृता**– [ग्रं.४०००] **पुव्वाधीतं से सुयं हवइ वा न वा, जइ से नत्थि तो लिंगं नियमा गुरुसन्निधे पडिवज्जइ, गच्छे य विहरइ त्ति, अह पुव्वाधीतसुयसंभवो अत्थि तो से लिंगं देवया पयच्छइ गुरुसन्निधे वा पडिवज्जइ, जइ य एगविहारविहरणजोग्गो इच्छा च से तो एक्को चेव विहरइ, अन्नहा गच्छे विहरइ [नन्दीचू० सू० ३८ पृ० २६]** त्ति। प्रत्येकबुद्धानां तु पूर्वाधीतं श्रुतं नियमतो भवति, तच्च जघन्यत एकादशाङ्गानि उत्कर्षतः किञ्चिन्न्यूनानि दश पूर्वाणि। तथा लिङ्गं तस्मै देवता प्रयच्छति, लिङ्गरहितो वा कदाचिद् भवति, तथा चाऽऽह **चूर्णिकृत्**– **पत्तेयबुद्धाणं पूर्वाधीतं सुयं नियमा भवइ, जहन्नेणं एक्कारस अंगा, उक्कोसेणं भिन्नदसपुव्वी, लिङ्गं च से देवया पयच्छइ लिंगवज्जिओ वा भवति, जतो भणियं- रुप्पं पत्तेयबुद्धा [नन्दीचू० सू० ३८ पृ० २६]** इति।

तथा बुद्धाः-आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते बुद्धबोधितसिद्धाः ७। एते च सर्वेऽपि केचित् स्त्रीलिङ्गसिद्धाः, स्त्रिया लिङ्गं स्त्रीलिङ्गम्, स्त्रीत्वस्योपलक्षणमित्यर्थः। तच्च त्रिधा, तद्यथा– वेदः शरीरनिर्वृत्तिः नेपथ्यं च; तत्रेह शरीरनिर्वृत्त्या प्रयोजनम्, न वेद-नेपथ्याभ्याम्, वेदे सति सिद्धत्वाभावात्, नेपथ्यस्य चाप्रमाणत्वात्,। आह च **चूर्णिकृत्**– **इत्थीए लिंगं इत्थिलिंगं, इत्थीए उवलक्खणं ति वुत्तं भवति, तं च तिविह-वेयो सरीरनिव्वत्ती नेवत्थं च, इह सरीरनिव्वत्तीए अहिगारो, न वेय-नेवत्थेहिं [नन्दीचू० सू० ३८ पृ० २६]** ति। तस्मिन् स्त्रीलिङ्गे वर्त्तमानास्सन्तो ये सिद्धास्ते स्त्रीलिङ्गसिद्धाः ८। एतेन यदाहु**राशाम्बराः**– न स्त्रीणां निर्वाणमिति तदपास्तं द्रष्टव्यम्, स्त्रीनिर्वाणस्य साक्षादनेन सूत्रेणाभिधानात्, तत्प्रतिषेधस्य च युक्त्यनुपपन्नत्वात्। तथाहि–

मुक्तिपथो ज्ञान-दर्शन-चारित्राणि, **सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः [तत्त्वा० अ० १ सू० १]** इति वचनात्। सम्यग्दर्शनादीनि च पुरुषाणामिव स्त्रीणामपि अविकलानि। तथाहि– दृश्यन्ते स्त्रियोऽपि सकलमपि प्रवचनार्थमभिरोचयमानाः, जानते च षडावश्यक-कालिकोत्कालिकादिभेदभिन्नं श्रुतम्, परिपालयन्ति च सप्तदशविधमकलङ्कं संयमम्, धारयन्ति च देवा-ऽसुराणामपि दुर्द्धरं ब्रह्मचर्यम्, तप्यन्ते च तपांसि मासक्षपणादीनि,

ततः कथमिव तासां न मोक्षसम्भवः ?। स्यादेतद्– अस्ति स्त्रीणां सम्यग्दर्शनं ज्ञानं च, न पुनश्चारित्रम्, संयमाभावात्। तथाहि– स्त्रीणामवश्यं वस्त्रपरिभोगेन भवितव्यम्, अन्यथा विवृताङ्ग्यस्ताः तिर्यक्स्त्रिय इव पुरुषाणामभिभवनीया भवेयुः, लोके च गर्होपजायते, ततोऽवश्यं ताभिर्वस्त्रं परिभोक्तव्यम्, वस्त्रपरिभोगे च सपरिग्रहता, सपरिग्रहत्वे च संयमाभाव इति, तदसमीचीनम्, सम्यक् सिद्धान्तापरिज्ञानात्, परिग्रहो हि परमार्थतो मूर्च्छाऽभिधीयते, [१]**मुच्छा परिग्गहो वुत्तो** [*दशवै० ६।२१] इतिवचनप्रामाण्यात्, तथाहि– मूर्च्छारहितो भरतश्चक्रवर्त्ती सान्तःपुरोऽप्यादर्शकगृहेऽवतिष्ठमानो निष्परिग्रहो गीयते, अन्यथा केवलोत्पादासम्भवात्; अपि च– यदि मूर्च्छाया अभावेऽपि वस्त्रसंसर्गमात्रं परिग्रहो भवेत् ततो जिनकल्पं प्रतिपन्नस्य कस्यचित् साधोस्तुषारकणानुषक्ते प्रपतति शीते केनापि 'अविषह्योपनिपातमद्य शीतम्' इति विभाव्य धर्मार्थिना शिरसि वस्त्रे प्रक्षिप्ते तस्य सपरिग्रहता भवेत्, न चैतदिष्टम्, तस्मान्न संसर्गमात्रं परिग्रहः, किन्तु मूर्च्छा, सा च स्त्रीणां वस्त्रादिषु न विद्यते, धर्मोपकरणमात्रतया तस्योपादानात्, न खलु ता वस्त्रमन्तरेणाऽऽत्मानं रक्षितुमीशते, नापि शीतकालादिषु अर्वाग्दशायां (व्यग्रदशायां) स्वाध्यायादिकं कर्त्तुम्, ततो दीर्घतरसंयमपरिपालनाय [२]यतनया वस्त्रं परिभुञ्जाना न ताः परिग्रहवत्यः। अथोच्यते– सम्भवति नाम स्त्रीणामपि सम्यग्दर्शनादिकं रत्नत्रयम्, परं न तत् सम्भवमात्रेण मुक्तिपदप्रापकं भवति, किन्तु प्रकर्षप्राप्तम्, अन्यथा दीक्षानन्तरमेव सर्वेषामप्यविशेषेण मुक्तिपदप्राप्तिप्रसक्तेः, सम्यग्दर्शनादिरत्नत्रयप्रकर्षश्च स्त्रीणामसम्भवी, ततो न निर्वाणमिति, तदप्ययुक्तम्, स्त्रीषु रत्नत्रयप्रकर्षासम्भवग्राहकस्य प्रमाणस्याभावात्, न खलु सकलदेश-कालव्याप्त्या स्त्रीषु रत्नत्रयप्रकर्षासम्भवग्राहकं प्रत्यक्षमनुमानं वा प्रमाणं विजृम्भते, देश-कालविप्रकृष्टतया तत्र प्रत्यक्षस्याप्रवृत्तेः, तदप्रवृत्तौ चानुमानस्याप्यसम्भवात्; नापि तासु रत्नत्रयप्रकर्षासम्भवप्रतिपादकः कोऽप्यागमो विद्यते, प्रत्युत सम्भवप्रतिपादकः स्थाने स्थानेऽस्ति, यथा इदमेव प्रस्तुतं सूत्रम्, ततो न तासां रत्नत्रयप्रकर्षासम्भवः। अथ मन्येथाः-स्वभावत एवाऽऽतपेनेव छाया विरुध्यते स्त्रीत्वेन

---

१. न सो परिग्गहो वुत्तो, नायपुत्तेण ताइणा। मुच्छा परिग्गहो वुत्तो, इइ वुत्तं महेसिणा॥६।२१॥ २. **यतनतया** जे२ मां० विना॥

रत्नत्रयप्रकर्षः ततस्तदसम्भवोऽनुमीयते, तदयुक्तम्, युक्तिविरोधात्, तथाहि– रत्नत्रयप्रकर्षः स उच्यते यतोऽनन्तरं मुक्तिपदप्राप्तिः, स चायोग्यवस्थाचरमसमये, अयोग्यवस्था चास्मादृशामप्रत्यक्षा, ततः कथं विरोधगतिः ?, न हि अदृष्टेन सह विरोधः प्रतिपत्तुं शक्यते, मा प्रापत् पुरुषेष्वप्यतिप्रसङ्गः। ननु जगति सर्वोत्कृष्टपदप्राप्तिः सर्वोत्कृष्टेनाध्यवसायेनावाप्यते, नान्यथा, एतच्चोभयोरप्यावयोरागमप्रामाण्यबलतः सिद्धम्, सर्वोत्कृष्टे च द्वे पदे– सर्वोत्कृष्टं दुःखस्थानं सर्वोत्कृष्टं सुखस्थानं च, तत्र सर्वोत्कृष्टदुःखस्थानं सप्तमनरकपृथिवी, अतः परं परमदुःखस्थानस्याभावात्, सर्वोत्कृष्टसुखस्थानं तु निःश्रेयसम्, ततः परमन्यस्य सुखस्थानस्यासम्भवात्, तत्र स्त्रीणां सप्तमनरकपृथिवीगमनमागमे निषिद्धम्, निषेधस्य च कारणं तद्गमनयोग्यतथाविध-सर्वोत्कृष्टमनोवीर्यपरिणत्यभावः, ततः सप्तमनरकपृथिवीगमननिषेधादवसीयते– नास्ति स्त्रीणां निर्वाणम्, निर्वाणहेतोः तथारूपसर्वोत्कृष्टमनोवीर्यपरिणामस्यासम्भवात्; तथा चात्र प्रयोगः– असम्भवन्निर्वाणाः स्त्रियः, सप्तमपृथिवीगमनवत्त्वाभावात्, सम्मूर्च्छिमादिवत्, तदेतदयुक्तम्, यतो यदि नाम स्त्रीणां सप्तमनरकपृथिवीगमनं प्रति सर्वोत्कृष्टमनोवीर्यपरिणत्यभावः, तत एतावता कथमवसीयते निःश्रेयसमपि प्रति तासां सर्वोत्कृष्टमनोवीर्यपरिणत्यभावः ?, न हि यो भूमिकर्षणादिकं कर्म कर्त्तुं न शक्नोति स शास्त्राण्यप्यवगाढुं न शक्नोतीति प्रत्येतुं शक्यम्, प्रत्यक्षविरोधात्। अथ सम्मूर्च्छिमादिषूभयमपि प्रति सर्वोत्कृष्टमनोवीर्यपरिणत्यभावो दृष्टः ततोऽत्राप्यवसीयते, ननु यदि तत्र दृष्टस्तर्हि कथमत्रावसीयते ?, न खलु बहिर्व्याप्तिमात्रेण हेतुर्गमको भवति, किन्त्वन्तर्व्याप्त्या, अन्तर्व्याप्तिश्च प्रतिबन्धबलेन सिध्यति, न चात्र प्रतिबन्धो विद्यते; न खलु सप्तमपृथिवीगमनं निर्वाणगमनस्य कारणम्, नाप्येवमेवाविनाभावप्रतिबन्धतः सप्तमपृथिवीगमनाविनाभावि निर्वाणगमनम्, चरमशरीरिणां सप्तमपृथिवीगमनमन्तरेणैव निर्वाणगमनभावात्; न च प्रतिबन्धमन्तरेण एकस्याभावेऽन्यस्याभावः, मा प्रापद् यस्य तस्य वा कस्यचिदेकस्याभावे सर्वस्याभावप्रसङ्गः। यद्येवं तर्हि कथं सम्मूर्च्छिमादिषु निर्वाणगमनाभावः ? इति, उच्यते, तथाभवस्वाभाव्यात्, तथाहि– ते सम्मूर्च्छिमादयो भवस्वभावत एव न सम्यग्दर्शनादिकं यथावत् प्रतिपत्तुं शक्नुवन्ति ततो न तेषां निर्वाणसम्भवः, स्त्रियस्तु प्रागुक्तप्रकारेण यथावत् सम्यग्दर्शनादिरत्नत्रयसम्पद्योग्याः

ततस्तासां न निर्वाणाभावः। अपि च– भुजपरिसर्पा द्वितीयामेव पृथिवीं यावद् गच्छन्ति, न परतः परपृथिवीगमनहेतुतथारूपमनोवीर्यपरिणत्यभावात्, तृतीयां यावत् पक्षिणः, चतुर्थीं चतुष्पदाः, पञ्चमीमुरगाः, अथ च सर्वेऽप्यूर्द्ध्वमुत्कर्षतः सहस्रारं यावद् गच्छन्ति, तन्नाधोगतिविषये मनोवीर्यपरिणतिवैषम्यदर्शनादूर्द्ध्वगतावपि तद्वैषम्यम्; तथा च सति सिद्धं स्त्री-पुंसानामधोगतिवैषम्येऽपि निर्वाणं सममिति कृतं प्रसङ्गेन॥

तथा पुँल्लिङ्गे शरीरनिर्वृत्तिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते पुँल्लिङ्गसिद्धाः ९। एवं नपुंसकलिङ्गसिद्धाः १०। तथा स्वलिङ्गेरजोहरणादिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते स्वलिङ्गसिद्धाः ११। तथा अन्यलिङ्गे– परिव्राजकादिसम्बन्धिनि वल्कल-कषायादिवस्त्रादिरूपे द्रव्यलिङ्गे व्यवस्थिताः सन्तो ये सिद्धास्तेऽन्यलिङ्गसिद्धाः १२। गृहिलिङ्गे सिद्धा गृहिलिङ्गसिद्धा[1] **मरुदेवी**प्रभृतयः १३। तथा एकसिद्धा इति एकस्मिन्नेकस्मिन् समये एककाः सन्तो ये सिद्धास्ते एकसिद्धाः १४। 'अणेगसिद्धा' इति एकस्मिन् समये अनेके सिद्धाः अनेकसिद्धाः, अनेके चैकस्मिन् समये सिध्यन्त उत्कर्षतोऽष्टोत्तरशतसङ्ख्या वेदितव्याः १५। आह– ननु तीर्थसिद्धा-ऽतीर्थसिद्धरूपभेदद्वये एव शेषभेदा अन्तर्भवन्ति तत् किमर्थं शेषभेदोपादानम् ? उच्यते, सत्यमन्तर्भवन्ति, परं न तीर्थसिद्धा-ऽतीर्थसिद्धभेदद्वयोपादानमात्रात् शेषभेदपरिज्ञानं भवति, विशेषपरिज्ञानार्थं चैष शास्त्रारम्भप्रयास इति शेषभेदोपादानम्। **सेत्त**मित्यादि॥

[सू० ४०] से किं तं परंपरसिद्धकेवलणाणं ? परंपरसिद्धकेवलणाणं अणेगविहं पण्णत्तं, तंजहा-अपढमसमयसिद्धा दुसमयसिद्धा तिसमयसिद्धा चउसमयसिद्धा जाव दससमयसिद्धा संखेज्जसमयसिद्धा असंखेज्जसमयसिद्धा अणंत-समयसिद्धा, सेत्तं परंपरसिद्धकेवलणाणं। सेत्तं सिद्धकेवलणाणं।

[सू० ४१] तं समासओ चउव्विहं पण्णत्तं, तंजहा-दव्वओ खेत्तओ कालओ भावओ। तत्थ दव्वओ णं केवलणाणी सव्वदव्वाइं जाणइ पासइ १। खेत्तओ णं केवलणाणी सव्वं खेत्तं जाणइ पासइ २। कालओ णं केवलणाणी सव्वं कालं जाणइ पासइ ३। भावओ णं केवलणाणी सव्वे भावे जाणइ पासइ ४।

---

१. **गृहिलिंगसिद्धा** खं० पा० जेमू०१ मध्ये नास्ति॥

[सू०४२ गा०५६-५७] अह सव्वदव्वपरिणामभावविण्णत्तिकारणमणंतं।
सासयमप्पडिवाती एगविहं केवलं णाणं॥५६॥
केवलणाणेणऽत्थे, णाउं जे तत्थ पण्णवणजोग्गे।
ते भासइ तित्थयरो, वइजोग तयं हवइ सेसं॥५७॥
सेत्तं केवलणाणं। सेत्तं पच्चक्खणाणं।

से किं तं परम्पर इत्यादि। न प्रथमसमयसिद्धा अप्रथमसमयसिद्धाः परम्परसिद्धविशेषणं प्रथमसमयवर्त्तिनः, सिद्धत्वसमयाद् द्वितीयसमयवर्त्तिन इत्यर्थः, त्र्यादिषु तु द्वितीयसमयसिद्धादय उच्यन्ते, यद्वा सामान्यतः प्रथमम् अप्रथमसमयसिद्धा इत्युक्तं तत एतदेव विशेषेण व्याचष्टे– द्विसमयसिद्धाः त्रिसमयसिद्धा इत्यादि। **सेत्तं** इत्यादि निगमनम्।

तं समासतो इत्यादि, तदिदं सामान्येन केवलज्ञानमभिगृह्यते, **समासतः** सङ्क्षेपेण चतुर्विधं प्रज्ञप्तम्, तद्यथा– द्रव्यतः क्षेत्रतः कालतो भावतश्च। तत्र द्रव्यतो **णं** इति वाक्यालङ्कारे केवलज्ञानी **सर्वद्रव्याणि** धर्मास्तिकायादीनि साक्षाज्जानाति पश्यति। क्षेत्रतः केवलज्ञानी **सर्वं क्षेत्रं** लोका-ऽलोकभेदभिन्नं जानाति पश्यति। इह यद्यपि सर्वद्रव्यग्रहणेनाऽऽकाशास्तिकायोऽपि गृह्यते तथापि तस्य क्षेत्रत्वेन रूढत्वाद् भेदेनोपन्यासः। कालतः केवलज्ञानी **सर्वं कालम्** अतीता-ऽनागत-वर्त्तमानभेदभिन्नं जानाति पश्यति। भावतः केवलज्ञानी सर्वान् जीवा-ऽजीवगतान् भावान् गति-कषाया-ऽगुरुलघुप्रभृतीन् जानाति पश्यति॥

इह केवलज्ञान-केवलदर्शनोपयोगचिन्तायां क्रमोपयोगा-ऽक्रमोपयोगादिविषया सूरीणामनेकधा विप्रतिपत्तिः, सा च [१]**चूर्णिकृता** [२]**मूलटीकाकृता** च दर्शिता ततो वयमपि सङ्क्षेपतो विनेयजनानुग्रहाय तां प्रदर्शयामः-

[३]**केई भणंति जुगवं, जाणइ पासइ य केवली नियमा।**
अन्ने एगंतरियं, इच्छंति सुओवएसेणं॥१॥

---

१. नन्दीचू० सू० ४० पृ० २८ ॥ २. नन्दी० हारि० सू० ४१ पृ० ४० ॥ ३. एता एव चतुर्विंशतिगाथाः श्रीहरिभद्रसूरिपादैर्धर्मसंग्रहण्यां गा० १३३६ तः १३५९ गाथात्वेनाऽऽदृताः सन्ति। अत्रत्या **मलयगिरीया** वृतिरपि धर्मसंग्रहणिसत्कमलयगिरिविरचितया वृत्त्या अक्षरशः समानप्रायैव ॥

अन्ने न चेव वीसुं, दंसणमिच्छंति जिणवरिंदस्स।
जं चिय केवलनाणं, तं चिय से दंसणं बिंति॥२॥ [विशेषणवती गा० १५३-१५४]

व्याख्या– **केचन सिद्धसेना**चार्यादयो **भणंति** ब्रुवते, किम् ? इत्याह– **युगपद्** एकस्मिन् काले **केवली** केवलज्ञानवान् न त्वन्यश्छद्मस्थो **जानाति पश्यति च नियमात्** नियमेन। **अन्ये** पुनराचार्या **जिनभद्रगणिक्षमाश्रमण**प्रभृतयः **इच्छंति** मन्यन्ते, किम् ? इत्याह– **एकान्तरितं** केवली जानाति पश्यति चेति, एकस्मिन् समये जानाति एकस्मिन् समये पश्यतीत्यर्थः। कथमेतदिच्छन्ति ? इति, अत आह– **श्रुतोपदेशेन** आगमानुसारेणेत्यर्थः॥१॥

अन्ने इत्यादि। **अन्ये** केचिद् वृद्धाचार्या **न चैव** ज्ञानाद् **दर्शनं विष्वक्** पृथगिच्छन्ति **जिनवरेन्द्रस्य** जिनाः-उपशान्तरागादिदोषसमूहाः तेषां वराः-प्रधाना निर्मूलत एव क्षीणसकलरागादिदोषोद्भवनिबन्धनमोहनीयकर्माणः, क्षीणमोहा इत्यर्थः, तेषामिन्द्रः-भगवान् उत्पन्नकेवलज्ञानः तस्य, न त्वन्यस्य, किन्तु यदेव केवलज्ञानं तदेव **से** तस्य केवलिनो दर्शनं ब्रुवते, क्षीणसकलावरणस्य देशज्ञानाभाववत् केवलदर्शनस्याप्यभावात्, तस्यापि वस्त्वेकदेशभूतसामान्यमात्रग्राहितया देशज्ञानकल्पत्वादिति भावना॥२॥ तत्र 'यथोद्देशं निर्देशः' इति न्यायात् प्रथमं युगपदुपयोगवादिमतं प्रदर्श्यते–

जं केवलाइं सादी-अपज्जवसियाइं दो वि भणियाइं।
तो बिंति केइ जुगवं, जाणइ पासइ य सव्वन्नू॥३॥ [विशेषणवती गा० १९३]

यत् यस्मात् कारणाद् **द्वे अपि** केवलज्ञान-केवलदर्शने समये-सिद्धान्ते साद्यपर्यवसिते भणिते, ततो ब्रुवते केचन **सिद्धसेना**चार्यादयः। किम् ? इत्याह– **युगपद्** एकस्मिन् काले जानाति पश्यति च सर्वज्ञ इति॥३॥ विपक्षे बाधामाह–

इहराऽऽईनिहणत्तं, मिच्छाऽऽवरणक्खओ त्ति व जिणस्स।
इयरेयरावरणया, अहवा निक्कारणावरणं॥४॥ [विशेषणवती गा० १९४]

इतरथा युगपत्केवलज्ञान-दर्शनभावानभ्युपगमे **आदिनिधनत्वं** सादि[१]-

१. सादिपर्यव° खं० पा० जेमू०१ दे० ॥

सपर्यवसितत्वं केवलज्ञान-केवलदर्शनयोः प्राप्नोति। तथाहि– उत्पत्तिसमयभावि-केवलज्ञानोपयोगानन्तरमेव केवलदर्शनोपयोगसमये केवलज्ञानाभावः, पुनस्तदनन्तरं केवलज्ञानोपयोगसमये केवलदर्शनाभाव इति द्वे अपि केवलज्ञान-केवलदर्शने सादि-सपर्यवसिते। तथा **मिथ्या** अलीकः **आवरणक्षयः** केवलज्ञानावरण-केवल-दर्शनावरणक्षयो जिनस्य इति प्राप्नोति, न हि अपनीतावरणौ द्वौ प्रदीपौ क्रमेण प्रकाश्यं प्रकाशयतः, [१]तद्वद् यदि इहापि केवलज्ञान-दर्शने युगपन्निर्मूलतोऽपनीतस्वस्वावरणे ततः कथं ते क्रमेण स्वप्रकाश्यं प्रकाशयतः ?। क्रमेणेति चेदभ्युपगमः तर्हि मिथ्या तदावरणक्षय इति। तथा इतरेतरावरणता प्राप्नोति। तथाहि– यदि स्वावरणे निःशेषतः क्षीणेऽपि अन्यतरभावेऽन्यतरभावो नेष्यते तर्हि ते एव परस्परमावरणे जाते, तथा च सति सिद्धान्तपक्षक्षितिरिति। अथवा निष्कारणावरणम्, यदि हि साकल्येन स्वा-वरणापगमेऽप्यन्यतरोपयोगकालेऽन्यतरस्य भावो नेष्यते तर्हि तस्यान्यतरस्यावरण-मकारणमेव जातम्, कारणस्य कर्मलक्षणस्य प्रागेव सर्वथाऽपगमात्। तथा च सति सदैव भावा-ऽभावप्रसङ्गः। तथा चोक्तम्– **नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात्।** [*प्रमाणवा० ३।३५] इति॥४॥

तह य असव्वन्नुत्तं, असव्वदरिसत्तणप्पसंगो य।
एगंतरोवओगे, जिणस्स दोसा बहुविहा य॥५॥ [विशेषणवती गा० १९५]

तथा चेति समुच्चये। यदि क्रमेणोपयोग इष्यते तर्हि भगवतोऽसर्वज्ञत्वम-सर्वदर्शित्वप्रसङ्गश्च प्राप्नोति। तथाहि– यदि क्रमेण केवलज्ञान-केवलदर्शनोप-योगाभ्युपगमस्तर्हि न कदाचिदपि भगवान् सामान्य-विशेषावेककालं जानाति पश्यति वा, ततोऽसर्वज्ञत्वा-ऽसर्वदर्शित्वप्रसङ्गः। पाक्षिकं वा सर्वज्ञत्वं सर्वदर्शित्वं च प्रसज्यते, तथाहि– यदा सर्वज्ञो न तदा सर्वदर्शी, दर्शनोपयोगाभावात्, यदा तु सर्वदर्शी न तदा सर्वज्ञः, ज्ञानोपयोगाभावादिति। एवमेकान्तरोपयोगेऽभ्युपगम्यमाने सति जिनस्य दोषा बहुविधाः प्राप्नुवन्ति॥५॥ एवं परेणोक्ते सति आगमवादी **जिनभद्रगणिक्षमाश्रमण** आह–

---

१. **तद्वदिहापि** जे१,२, मां० देमू० । **तद् यदीहापि** खं० पा० ॥

भण्णइ भिन्नमुहुत्तोवओगकाले वि तो तिंनाण[१](णि)स्स।
मिच्छा छावट्ठीसागरोवमाइं खओवसमो॥६॥ [विशेषणवती गा० २०२]

यदुक्तम्[२]– 'इतरथा आदिनिधनत्वं प्राप्नोति' [इति], तदसमीचीनम्, उपयोगमनपेक्ष्य लब्धिमात्रापेक्षया केवलज्ञान-केवलदर्शनयोः साद्यपर्यवसितत्वस्याभिधानात्, मत्यादिषु षट्षष्टिसागरोपमाणामिव। यदप्युक्तम्[३]– 'मिथ्या आवरणक्षयः' इति तत्रापि भण्यते, यदि साद्यपर्यवसितं कालमुपयोगाभावत आवरणक्षयस्य मिथ्यात्वमापद्यते **तो** त्ति ततः **त्रिज्ञानिनः** मति-श्रुता-ऽवधिज्ञानवतो भिन्नमुहूर्त्तलक्षणोपयोगकालेऽपि यो नाम मत्यादीनां षट्षष्टिसागरोपमाणि यावत् क्षयोपशमः सूत्रेऽभिहितः स मिथ्या प्राप्नोति, तावन्तं कालं मत्यादीनामुपयोगासम्भवाद् युगपद्भावासम्भवाच्च। याऽपि इतरेतरावरणता पूर्वमासञ्जिता[४] साऽप्यसमीचीना, यतो जीवस्वाभाव्यादेव मत्यादीनामिव केवलज्ञान-केवलदर्शनयोर्युगपदुपयोगासम्भवः ततः सा कथमुपपद्यते ?, मा प्रापदन्यथा मत्यादीनामपि परस्परमावरणत्वप्रसङ्गः। योऽपि निष्कारणावरणदोष[५] उद्भावितः सोऽपि जीवस्वाभाव्यादेव तथोपयोगप्रवृत्तेरपास्तो द्रष्टव्यः, अन्यथा मत्यादीनामपि प्रसज्येत, तेषामप्युत्कर्षतः षट्षष्टिसागरोपमाणि यावत् क्षयोपशमस्याभिधानात्, तावत्कालं चोपयोगाभावादिति॥६॥ वादिमतमाशङ्क्य दूषयति–

अह न वि एवं तो सुण, जहेव खीणंतरायओ अरिहा।
संते वि अंतरायक्खयम्मि पंचप्पयारम्मि॥७॥
सययं न देइ लहइ व, भुंजइ उवभुंजई व[६] सव्वण्णू।
कज्जम्मि देइ लहइ व, भुंजइ व तहेव इहयं[७] पि॥८॥ [विशेषणवती गा० २०३-२०४]

अपिः अवधारणे। अथ नैव **एवम्** उक्तेन प्रकारेण मन्यसे क्षायोपशमिक-क्षायिकयोर्दृष्टान्त-दार्ष्टान्तिकभावासम्भवात्, असम्भवश्च परस्परवैलक्षण्यात्, ततः शृणु यथा क्षयकार्यमपि ज्ञानं दर्शनं चावश्यमनवरतं न प्रवर्त्तते इति, यथैव खलु क्षीणान्तरायकोऽर्हन् सत्यप्यन्तरायक्षये पञ्चप्रकारे, इहान्तरायकर्मणो दानान्तरायादिभेदेन पञ्चप्रकारत्वात्, तत्क्षयोऽपि पञ्चप्रकार उक्तः, सततं न ददाति लभते वा भुङ्क्ते वा

---

१. नन्दिसूत्रस्य चूर्णौ हारिभद्र्यां च वृत्तौ तिनाणिस्स इति पाठः॥ २. पृ० २१२ पं० २३॥ ३. पृ० २१३ पं० ४॥ ४. पृ० २१३ पं० ८॥ ५. पृ० २१३ पं० १० ॥ ६. **य** पा० खं० दे० ॥ ७. **इहइं** पा० ॥

उपभुङ्क्ते वा सर्वज्ञः, किन्तु कार्ये समुत्पन्ने सति ददाति लभते वा भुङ्क्ते वा उपलक्षणमेतद् उपभुङ्क्ते वा, तथैव **इहापि** केवलज्ञान-दर्शनविषये सत्यपि तदावरणक्षये न युगपत् तदुपयोगसम्भवः, तथाजीवस्वाभाव्यादिति॥७॥८॥ स्यादेतद्, यदि पञ्चविधान्तरायक्षयेऽपि भगवान् न सततं दानादिक्रियासु प्रवर्त्तते ततः किं तत्क्षयस्य फलम् ? इत्यत आह–

दिंतस्स लभंतस्स व, भुंजंतस्स व जिणस्स एस गुणो।
खीणंतराययत्ते, जं से विग्घं न संभवइ॥९॥ [विशेषणवती गा० २०५]

जिनस्य क्षीणसकलघातिकर्मणः क्षीणान्तरायत्वे सत्येष गुणो जायते, यदुत **से** तस्य जिनस्य ददतो लभमानस्य वा भुञ्जानस्य **व**कारस्यानुक्तसमुच्चयार्थत्वादुपभुञ्जानस्य च यद् विघ्नो न भवति। प्राकृतत्वाच्च विघ्नशब्दस्य नपुंसकनिर्देशः॥९॥ अमुमेव गुणं प्रकृतेऽपि योजयन्नाह–

उवउत्तस्सेमेव य णाणम्मि व दंसणम्मि व जिणस्स।
खीणावरणगुणोऽयं, जं कसिणं मुणइ पासइ वा॥१०॥ [विशेषणवती गा० २०६]

एवमेव दानादिक्रियासु प्रवृत्तस्येव ज्ञाने दर्शने वा उपयुक्तस्य **जिनस्य** केवलिनोऽयं क्षीणावरणत्वे सति गुणो यत् कृत्स्नं लोका-ऽलोकात्मकं जगद् जानाति पश्यति वा, न तु जानतः पश्यतो वा विघ्नः सम्भवतीति॥१०॥ वाद्याह–

पासंतो वि न जाणइ, जाणं व न पासई जइ जिणिंदो।
एवं न कयाऽवेसो, सव्वण्णू सव्वदरिसी य॥११॥ [विशेषणवती गा० २१५]

यदि पश्यन्नपि भगवान् न जानाति, दर्शनकाले ज्ञानोपयोगानभ्युपगमात्, जानन् वा यदि न पश्यति, ज्ञानोपयोगकाले दर्शनोपयोगानभ्युपगमात्, तत एवं सति न कदाचिदप्यसौ सर्वज्ञः सर्वदर्शी च प्राप्नोतीति॥११॥ सिद्धान्तवाद्याह–

जुगवमजाणंतोऽवि हु, चउहि वि नाणेहिं जह व चउनाणी।
भण्णइ तहेव अरिहा, सव्वण्णू सव्वदरिसी य॥१२॥ [विशेषणवती गा० २१६]

यथा मत्यादिभिः मनःपर्यायान्तैश्चतुर्भिर्ज्ञानैर्युगपदजानन्नपि जीवस्वाभाव्यादेव युगपदुपयोगाभावाद् लब्ध्यपेक्षया चतुर्ज्ञानी भण्यते, तथैवार्हन्नपि युगपत्केवलज्ञान-दर्शनोपयोगाभावेऽपि निःशेषतदावरणक्षयात् शक्त्यपेक्षया सर्वज्ञः सर्वदर्शी चोच्यते

इत्यदोषः॥१२॥ पुनरप्यत्र वाद्याह–

तुल्ले उभयावरणक्खयम्मि पुव्वं समुब्भवो कस्स ?।
दुविहुवयोगाभावे, जिणस्स जुगवं ति चोएइ॥१३॥ [**विशेषणवती गा० २१७**]

तुल्ये समाने, एककालमित्यर्थः, **उभयावरणक्षये** केवलज्ञान-केवल-दर्शनावरणक्षये **पूर्वं** प्रथमं **समुद्भवः** उत्पादः कस्य भवेत् ? किं ज्ञानस्य ? उत दर्शनस्य ?। यदि ज्ञानस्य स किंनिबन्धनः ? इति वाच्यम्, तदावरणक्षयनिबन्धन इति चेत्, ननु स दर्शनेऽपि तुल्य इति तस्याप्युद्भवप्रसङ्गः, एवं दर्शनपक्षेऽपि वाच्यम्, अतः प्रथमसमये स्वावरणक्षयेऽपि अन्यतरस्याभावेऽन्यतरस्याप्यभाव एव विपर्ययो वा प्राप्नोतीति युगपद् द्विविधोपयोगाभावाभ्युपगमे जिनस्य वादी चोदयतीति॥१३॥ अत्र सिद्धान्तवाद्याह–

भन्नइ न एस नियमो, जुगवुप्पन्नेण जुगवमेवेह।
होयव्वं उवयोगेण, एत्थ सुण ताव दिट्ठंतं॥१४॥ [**विशेषणवती गा० २१८**]

भण्यते अत्रोत्तरं दीयते, न एष नियमो यदुत शक्त्यपेक्षया युगपदुत्पन्नेनापि ज्ञानेन युगपदेवेह **उपयोगेन** उपयोगरूपतयाऽपि भवितव्यमिति। कुतः ? इति चेत्, तथाऽदर्शनात्। आह च– **एत्थ सुण ताव दिट्ठंतं अत्र** अस्मिन् विचारप्रक्रमे शृणु तावद् दृष्टान्तम्॥१४॥ तमेव दर्शयति–

जह जुगवुप्पत्तीए वि, सुत्ते सम्मत्त-मइ-सुयाईणं।
नत्थि जुगवोवओगो, सव्वेसु तहेव केवलिणो॥१५॥ [**विशेषणवती गा० २१९**]

यथा सम्यक्त्व-मति-श्रुतादीनाम्, आदिशब्दादवधिज्ञानपरिग्रहः, युगपदुत्पत्तावपि **सूत्रे** आगमेऽभिहितायां न **सर्वेष्वेव** मत्यादिषु युगपदुपयोगो भवति, **जुगवं दो नत्थि उवओगा** [आव० नि० ९७९][1] इति वचनप्रामाण्यात्; तथैव केवलिनोऽपि शक्त्यपेक्षया युगपत् केवलज्ञान-केवलदर्शनोत्पत्तावपि न द्वयोरपि युगपदुपयोगो भवति॥१५॥ अमुमेवार्थं सूत्रेण संवादयन्नाह–

भणियं चिय पण्णत्ती-पण्णवणाईसु जह जिणो समयं।
जं जाणइ न वि पासइ, तं अणु-रयणप्पभाईणं॥१६॥ [**विशेषणवती गा० २२०**]

१. विशेषाव० ३११२ ॥

भणितं चैतदनन्तरोदितं **प्रज्ञप्तौ प्रज्ञापनादिषु** च, यथा– यं समयं केवली जानाति अण्वादिकं रत्नप्रभादिकं च न तमेव समयं पश्यतीति। **अणु-रयणप्पभाईणं** इत्यत्र प्राकृतत्वाद् द्वितीयार्थे षष्ठी। ततः 'क्रमेणैव केवलज्ञान-केवलदर्शनयोरुपयोगः, न युगपत्' इति स्थितम्।१६॥ साम्प्रतं ये केवलज्ञान-केवलदर्शनाभेदवादिनस्तन्मत-मुपन्यस्यन्नाह–

जह किर खीणावरणे, देसन्नाणाण संभवो न जिणे।
उभयावरणातीते, तह केवलदंसणस्सावि॥१७॥ [विशेषणवती गा० १५५]

यथा **किल** इत्याप्तोक्तौ क्षीणावरणे भगवति जिने **देशज्ञानानां** मत्यादीनां न सम्भवः तथा **उभयावरणातीते** केवलज्ञानावरण-केवलदर्शनावरणातीते भगवति केवलदर्शनस्यापि न सम्भवः। कथम् ? इति चेद्, उच्यते– इह तावद् युगपदुपयोगद्वयं न जायते, सूत्रे तत्र तत्र प्रदेशे निषेधात्, न चैतदपि समीचीनम्– यत् तदावरणं क्षीणं तथापि तन्न प्रादुर्भवति, ऊर्ध्वमपि तदभावप्रसङ्गात्, ततः केवलदर्शनावरणक्षया-दुपजायमानं केवलदर्शनं सामान्यमात्रग्राहकं केवलज्ञान एव सर्वात्मना सर्ववस्तु-ग्राहकेऽन्तर्भवतीति तदेवैकं केवलज्ञानं चकास्ति, न ततः पृथग्भूतं केवलदर्शनमिति॥१७॥ अत्र सिद्धान्तवादी केवलदर्शनस्य स्वरूपतः पार्थक्यं सिसाधयिषुरिदमाह–

देसन्नाणोवरमे, जह केवलणाणसंभवो भणिओ।
देसदंसणविगमे, तह केवलदंसणं होउ॥१८॥ [विशेषणवती गा० १५६]

यथा भगवति मत्यादिदेशज्ञानोपरमे केवलज्ञानसम्भवः स्वरूपेण भणितस्त्वया तथा चक्षुर्दर्शनादिदेशदर्शनविगमे सति केवलदर्शनमपि ततः पृथक् स्वरूपतो भवतु, न्यायस्य समानत्वात्, अन्यथा पृथक् तदावरणकल्पनानैरर्थक्यापत्तेः॥१८॥

अह देसनाण-दंसणविगमे तव केवलं मयं नाणं।
न मयं केवलदंसणमिच्छामेत्तं नणु तवेदं॥१९॥ [विशेषणवती गा० १५७]

अथ देशज्ञान-दर्शनविगमे तव केवलज्ञानमेवैकं मतम्, न मतं केवलदर्शनमिति, अत्राह– ननु तवेदम् **इच्छामात्रम्** अभिप्रायमात्रम्, न त्वत्र काचनाऽपि युक्तिः। न चेच्छामात्रतो वस्तुसिद्धिः, सर्वस्य सर्वेष्वर्थेषु सिद्धिप्रसक्तेः॥१९॥ यदप्युक्तं 'न[1] चैतदपि

१. पं० ११॥

समीचीनम्' इत्यादि तदपि न समीचीनम्, क्षयोपशमाविशेषेऽपि मत्यादीनामिव जीवस्वाभाव्यादेव केवलज्ञानावरण-केवलदर्शनावरणक्षयेऽपि सततं तयोरप्रादुर्भावाविरोधात्। अथोच्येत **दव्वतो णं केवलनाणी सव्वदव्वाइं जाणइ पासइ** इत्यादि सूत्रं केवलज्ञान-केवलदर्शनाभेदप्रतिपादनपरम्, केवलज्ञानिन एव सतो ज्ञान-दर्शनयोरभेदेन विषयनिर्देशात्, सूत्रं च युष्माकमपि प्रमाणम्, तत् कथमत्र विप्रतिपद्यते ? इति, तत्राऽऽह–

भण्णइ जहोहिनाणी, जाणइ पासइ य भासियं सुत्ते।
न य नाम ओहिदंसणणाणेगत्तं तह इहं पि॥२०॥ [विशेषणवती गा० १७८]

भण्यते अत्रोत्तरं दीयते– यथा'अवधिज्ञानी जानाति पश्यति च' इति सूत्रे भाषितम्, तदुक्तम्– **दव्वओ णं ओहिनाणी उक्कोसेणं सव्वाइं रूविदव्वाइं जाणइ पासइ** [[1]नन्दीसू० २८] इत्यादि, न च तथा सूत्रे भणितमपि नाम अवधिज्ञानाऽवधिदर्शनयोरेकत्वम्, तथा इहापि केवलज्ञान-केवलदर्शनयोरेकत्वं सूत्रवशादासज्यमानं न भविष्यति, सूत्रस्य सामान्यतः प्रवृत्तेः॥२०॥ अपि च जानाति पश्यति चेति द्वावपि शब्दावेकार्थौ न भवतः, नापि तत्र सूत्रे एकार्थिकवक्तव्यताधिकारः, किन्तु सामान्यविशेषविषयावगमाभिधानपरौ। ततश्च–

जह पासइ तह पासउ, पासइ जेणेह दंसणं तं से।
जाणइ य जेण अरिहा, तं से नाणं ति घेत्तव्वं॥२१॥ [विशेषणवती गा० १९२]

यथा येन प्रकारेण ज्ञानादभेदेन भेदेन वा पश्यति तथा पश्यतु, एतावत्तु वयं ब्रूमः-येन सामान्यावगमाकारेणार्हन् पश्यति तद् दर्शनमिति ज्ञातव्यम्, येन पुनर्विशेषावगमरूपेणाऽऽकारेण जानाति तत् **से** तस्यार्हतो ज्ञानमिति॥२१॥ न च युगपदुपयोगद्वयम्, अनेकशः सूत्रे निषेधात्, ततः क्रमेण भगवतो ज्ञानं दर्शनं चेति॥ एतदेव सूत्रेण दर्शयति–

[[2]नाणम्मि दंसणम्मि व, एत्तो एगयरयम्मि उवउत्ता।
सव्वस्स केवलिस्सा, जुगवं दो नत्थि उवओगा॥२२॥
[आव० नि० ९७९, विशेषणवती गा० २२९]

---

१. दृश्यतां पृ०१५७ पं०२५॥ २. विशेषाव० ३०९६ ॥

ज्ञाने तथा दर्शने, **वा**शब्दो विकल्पार्थः, अनयोरेककालम् एकतरस्मिन् कस्मिंश्चिदुपयुक्ताः केवलिनः, न तु द्वयोः; यतः सर्वस्य केवलिनो युगपद् द्वावुपयोगौ न स्त इति। तस्मादेतत्सूत्रबलादपि क्रमेण ज्ञानं दर्शनं च सिद्धम्॥२२॥ अपि च–

उवओगो एगयरो[1], पणुवीसइमे सए सिणायस्स।
भणिओ वियडत्थो च्चिय, छट्ठुद्देसे विसेसेणं॥२३॥ [**विशेषणवती गा० २३२**]

भगवत्यां पञ्चविंशतितमे **शते** अध्ययनापरपर्याये षष्ठोद्देशके **स्नातकस्य** केवलिनः **विशेषेण** विशेषत एकतर उपयोगो भणितः, तत् कथमेवमागमार्थमुपलभ्याऽऽत्मानं विप्रलभेमहि ?॥२३॥ साम्प्रतं सिद्धान्तवाद्येव **जिनभद्रगणिक्षमाश्रमण** आत्मनोऽनुद्धतत्वमागमभक्तिं च परां ख्यापयन्नाह–

कस्स व नाणुमयमिणं, जिणस्स जइ होज्ज दोन्नि उवओगा।
नूणं न होंति जुगवं, जओ निसिद्धा सुए बहुसो॥२४॥
[**विशेषा० ३१३२, विशेषणवती गा० २४६**]

निगदसिद्धेति॥२४॥ अलं प्रसङ्गेन। प्रकृतं प्रस्तुमः–

अहेत्यादि। **अथ**शब्द इहोपन्यासार्थः, पूर्वमुद्देशसूत्रे मनःपर्यवज्ञानानन्तरं केवलज्ञानमुक्तं तत् सम्प्रति तात्पर्यनिर्देशार्थमुपन्यस्यते इत्यर्थः। सर्वाणि च तानि द्रव्याणि **सर्वद्रव्याणि** जीवादिलक्षणानि तेषां **परिणामाः** प्रयोग-विस्रसोभयजन्या उत्पादादयः पर्यायाः सर्वद्रव्यपरिणामाः, तेषां **भावः** सत्ता स्वलक्षणं [वा] स्वं स्वमसाधारणं रूपं तस्य विशेषेण ज्ञापनं **विज्ञप्तिः** विज्ञानं वा विज्ञप्तिः, परिच्छेद इत्यर्थः, तस्याः **कारणं**-हेतुः सर्वद्रव्यपरिणाम[भाव]विज्ञप्तिकारणं केवलज्ञानमिति सम्बध्यते। उक्तं च–

सव्वदव्वाण पओग-वीससा-मीसया जहाजोगं।
परिणामा पज्जाया जम्म-विणासादयो ते उ॥१॥
तेसिं भावो सत्ता, सलक्खणं वा विसेसओ तस्स।
नाणं विन्नत्ती[2]तीए, कारणं केवलन्नाणं॥२॥ [**विशेषा*० ८२५-८२६**]

तच्च ज्ञेयानन्तत्वादनन्तम्। तथा शश्वद्भवं **शाश्वतम्**, सदोपयोगवदिति भावार्थः।

---

१. विशेषाव० ३१२० ॥ २. **विन्नत्तीए** पा० ॥

तथा प्रतिपतनशीलं प्रतिपाति, न प्रतिपाति **अप्रतिपाति**, सदाऽवस्थायीत्यर्थः। ननु यत् शाश्वतं तदप्रतिपात्येव ततः किमनेन विशेषणेन ?, तदयुक्तम्, सम्यक्शब्दार्थापरिज्ञानात्, शाश्वतं हि नाम अनवरतं भवदुच्यते, तच्च कियत्कालमपि भवति, यावद् भवति तावन्निरन्तरं भवनात्, ततः सकलकालभावप्रतिपत्त्यर्थमप्रतिपाति-विशेषणोपादानम्; ततोऽयं तात्पर्यार्थः– अनवरतं सकलकालं भवतीति। अथवा **एकपदव्यभिचारेऽपि विशेषण-विशेष्यभावो भवति** इति ज्ञापनार्थं विशेषणद्वयोपादानम्, तथाहि– शाश्वतमप्रतिपात्येव, अप्रतिपाति तु शाश्वतमशाश्वतं च भवति, यथा अप्रतिपात्यवधिज्ञानमिति। तथा **एकविधम्** एकप्रकारम्, तदावरणक्षयस्यैकरूपत्वात्। केवलं च तज्ज्ञानं च [केवलज्ञानम्]॥ इह तीर्थकृत् समुपजातकेवलालोकः तीर्थकरनामकर्मोदयतस्तथा-स्वाभाव्यादुपकार्यकृतोपकारानपेक्षं सकलसत्त्वानुग्रहाय सवितेव प्रकाशं देशनामातनोति, तत्राव्युत्पन्नविनेयानां केषाञ्चिदेवमाशङ्का भवेत्– भगवतोऽपि तीर्थकृतस्तावद् द्रव्यश्रुतं ध्वनिरूपं वर्त्तते, द्रव्यश्रुतं च भावश्रुतपूर्वकम्, ततो भगवानपि श्रुतज्ञानीति, ततस्तदाशङ्कापनोदार्थमाह–

केवलेत्यादि। इह तीर्थकरः **केवलज्ञानेन** 'सर्वं वाक्यं सावधारणम्' इति न्यायात् केवलज्ञानेनैव, न श्रुतज्ञानेन, तस्य क्षायोपशमिकत्वात्, केवलिनश्च क्षायोपशमिक-भावातिक्रमात्, सर्वक्षये देशक्षयाभावादिति भावः, **अर्थान्** धर्मास्तिकायादीन् अभिलाप्या-ऽनभिलाप्यान् **ज्ञात्वा** विनिश्चित्य ये **तत्र** तेषामर्थानामभिलाप्या-ऽनभिलाप्यानां मध्ये प्रज्ञापनायोग्याः, अभिलाप्या इत्यर्थः, तान् भाषते, नेतरान्। तानपि **प्रज्ञापनायोग्यान्** भाषते न सर्वान्, तेषामनन्तत्वेन सर्वेषां भाषितुमशक्यत्वात्, आयुषस्तु परिमितत्वात्, किन्तु कतिपयानेव अनन्तभागमात्रान्। आह च **भाष्यकृत्**–

पन्नवणिज्जा भावा, अणंतभागो तु अणभिलप्पाणं।
पन्नवणिज्जाणं पुण, अणंतभागो सुयनिबद्धो॥१॥ [**विशेषा* ० १४१**]

तत्र केवलज्ञानोपलब्धार्थाभिधायकः शब्दराशिः प्रोच्यमानस्तस्य भगवतो वाग्योग एव भवति, न श्रुतम्, तस्य भाषापर्याप्त्यादिनामकर्मोदयनिबन्धनत्वात्, श्रुतस्य च क्षायोपशमिकत्वात्, स च वाग्योगो भवति श्रुतं **शेषम्** अप्रधानं द्रव्यश्रुतमित्यर्थः,

श्रोतृणां भावश्रुतकारणतया द्रव्यश्रुतं व्यवह्रियते इति भावः। अन्ये त्वेवं पठन्ति- **वइजोग सुयं हवइ तेसिं**, तत्रायमर्थः– 'तेषां श्रोतृणां भावश्रुतकारणत्वात् स वाग्योगः श्रुतं भवति, श्रुतमिति व्यवह्रियते इत्यर्थः। **सेत्तं** इत्यादि निगमनम्, तदेतत् केवलज्ञानम्, तदेतत् प्रत्यक्षम्॥ एवं प्रत्यक्षे प्रतिपादिते सति परोक्षस्य स्वरूपमनवगच्छन्नाह शिष्यः–

[सू० ४३] से किं तं परोक्खणाणं ? परोक्खणाणं दुविहं पण्णत्तं, तंजहा- आभिणिबोहियणाणपरोक्खं च सुयणाणपरोक्खं च।

[सू० ४४] जत्थाऽऽभिणिबोहियणाणं तत्थ सुयणाणं, जत्थ सुयणाणं तत्थाऽऽभिणिबोहियणाणं। दो वि एयाइं अण्णमण्णमणुगयाइं तह वि पुण एत्थाऽऽयरिया णाणत्तं पण्णवेंति अभिणिबुज्झइ त्ति आभिणिबोहियं, सुणतीति सुतं।

मतिपुव्वं सुयं, ण मती सुयपुव्विया।

'से किं तं' इत्यादि। अथ किं तत् परोक्षम् ?। सूरिराह– परोक्षं द्विविधं प्रज्ञप्तम्, तद्यथा– आभिनिबोधिकज्ञानपरोक्षं च श्रुतज्ञानपरोक्षं च। **च**शब्दौ स्वगतानेकभेदसूचकौ परस्परसहभावसूचकौ च। परस्परसहभावमेवानयोर्दर्शयति– **जत्थ** इत्यादि, **यत्र** पुरुषे आभिनिबोधिकज्ञानं तत्रैव श्रुतज्ञानमपि, तथा यत्र श्रुतज्ञानं तत्रैवाभिनिबोधिकज्ञानम्। आह– यत्राऽऽभिनिबोधिकज्ञानं तत्र श्रुतज्ञानमित्युक्ते यत्र श्रुतज्ञानं तत्राऽऽभिनिबोधिकज्ञानमिति गम्यत एव ततः किमनेनोक्तेन ? इति, उच्यते, नियमतो न गम्यते ततो नियमावधारणार्थमेतदुच्यते इत्यदोषः। नियमावधारणमेव स्पष्टयति- **द्वे अप्येते** आभिनिबोधिक-श्रुते **अन्योन्यानुगते** परस्परप्रतिबद्धे। स्यादेतत्– अनयोर्यदि परस्परमनुगमस्तर्हि अभेद एव प्राप्नोति कथं भेदेन व्यवहारः ? तत आह– **तह वि** इत्यादि, **तथापि** परस्परमनुगमेऽपि पुनः **अत्र** आभिनिबोधिक-श्रुतयोः **आचार्याः** पूर्वसूरयः **नानात्वं** भेदं प्ररूपयन्ति। कथम् ? इति चेद्, उच्यते– लक्षणभेदात्; दृष्टश्च परस्परमनुगतयोरपि लक्षणभेदाद् भेदः, यथैकाकाशस्थयोर्धर्मास्तिकाया-ऽधर्मास्तिकाययोः। तथाहि– धर्मा-ऽधर्मास्तिकायौ परस्परं लोलीभावेनैकस्मिन्नाकाशदेशे व्यवस्थितौ तथापि यो गतिपरिणामपरिणतयोर्जीव-पुद्गलयोर्गत्युपष्टम्भहेतुर्जलमिव मत्स्यस्य

स खलु धर्मास्तिकायः, यः पुनः स्थितिपरिणामपरिणतयोर्जीव-पुद्गलयोरेव स्थित्युपष्टम्भहेतुः क्षितिरिव ऋषभस्य स खलु अधर्मास्तिकाय इति लक्षणभेदाद् भेदो भवति, एवमाभिनिबोधिक-श्रुतयोरपि लक्षणभेदाद् भेदो वेदितव्यः। लक्षणभेदमेव दर्शयति– **अभिनिबुज्झइ** इत्यादि, **अभिमुखं** योग्यदेशावस्थितं नियतमर्थमिन्द्रिय-मनोद्वारेण **बुध्यते** परिच्छिनत्ति आत्मा येन परिणामविशेषेण स परिणामविशेषो ज्ञानापरपर्याय आभिनिबोधिकम्, तथा **शृणोति** वाच्य-वाचकभावपुरस्सरं श्रवणविषयेण शब्देन सह संसृष्टमर्थं परिच्छिनत्त्यात्मा येन परिणामविशेषेण स परिणामविशेषः श्रुतम्।

ननु यद्येवंलक्षणं श्रुतं तर्हि य एव श्रोत्रेन्द्रियलब्धिमान् भाषालब्धिमान् वा तस्यैव श्रुतमुपपद्यते, न शेषस्यैकेन्द्रियस्य, तथाहि– यः श्रोत्रेन्द्रियलब्धिमान् भवति स विवक्षितं शब्दं श्रुत्वा तेन शब्देन वाच्यमर्थं प्रतिपत्तुमीष्टे, न शेषः, शेषस्य तथारूपशक्त्यभावात्, योऽपि च भाषालब्धिमान् भवति द्वीन्द्रियादिरपि सोऽपि प्रायः स्वचेतसि किमपि विकल्प्य तदभिधानाभिमानतः शब्दमुद्गिरति, नान्यथा, ततस्तस्यापि श्रुतं सम्भाव्यते, यस्त्वेकेन्द्रियः स न श्रोत्रेन्द्रियलब्धिमान् नापि भाषालब्धिमान् ततः कथं तस्य श्रुतसम्भवः ?, अथ च प्रवचने तस्यापि श्रुतमुपवर्ण्यते, तत् कथं प्राक्तनं श्रुतलक्षणं समीचीनम् ? इति, नैष दोषः, यत इह तावदेकेन्द्रियाणामाहारादिसंज्ञा विद्यन्ते, तथा सूत्रेऽनेकशोऽभिधानात्, संज्ञा चाभिलाष उच्यते; यत उक्तमा**वश्यकटीका**याम्– **आहारसंज्ञा आहाराभिलाषः क्षुद्वेदनीयप्रभवः खल्वात्मपरिणामविशेषः** [आव[1]० हारि०] इति; अभिलाषश्च 'ममैवंरूपं वस्तु पुष्टिकारि, तद् यदीदमवाप्यते ततः समीचीनं भवति' इत्येवं शब्दार्थोल्लेखानुविद्धः स्वपुष्टिनिमित्तभूतप्रतिनियतवस्तुप्राप्त्यध्यवसायः, स च श्रुतमेव[2], तस्य शब्दार्थपर्यालोचनात्मकत्वात्, शब्दार्थपर्यालोचनात्मकत्वं च 'ममैवंरूपं वस्तु पुष्टिकारि, तद् यदीदमवाप्यते' इत्येवमादीनां शब्दानामन्तर्जल्पाकाररूपाणामपि विवक्षितार्थवाचकतया प्रवर्त्तमान[3]त्वात्, श्रुतस्य चैवंलक्षणत्वात्।

उक्तं च–

---

१. आवश्यकसूत्रे प्रतिक्रमणाध्ययने 'पडिक्कमामि चउहिं सण्णाहिं आहारसण्णाए' इति सूत्रस्य हारिभद्र्यां वृत्तौ॥

२. °**मेव च। तस्य** खं० पा० जेमू१ देमू० ॥ ३. **प्रवर्त्यमा**° खं० पा० जेमू१ ॥

इंदिय-मणोनिमित्तं, जं विन्नाणं सुयाणुसारेणं।
नियतत्थोत्तिसमत्थं, तं भावसुयं मई सेसं॥१॥ [विशेषा० १००]

'सुयाणुसारेणं' ति शब्दार्थपर्यालोचनानुसारेण, शब्दार्थपर्यालोचनं च नाम वाच्य-वाचकभावपुरस्सरीकारेण शब्दसंस्पृष्टस्यार्थस्य प्रतिपत्तिः, केवलमेकेन्द्रियाणामव्यक्तमेव किञ्चनाप्यनिर्वचनीयं तथारूपक्षयोपशमभावतो वाच्य-वाचकभावपुरस्सरीकारेण शब्दसंस्पृष्टार्थग्रहणमवसेयम्, अन्यथाऽऽहारादिसंज्ञाऽनुपपत्तेः। यदप्युच्यते[1]– यद्येवंलक्षणं श्रुतं तर्हि य एव श्रोत्रेन्द्रियलब्धिमान् भाषालब्धिमान् वा तस्यैव श्रुतमुपपद्यते न शेषस्यैकेन्द्रियस्येति, तदप्यसमीक्षिताभिधानम्, सम्यक् प्रवचनार्थापरिज्ञानात्, तथाहि– बकुलादीनां स्पर्शनेन्द्रियातिरिक्तद्रव्येन्द्रियलब्धिविकलत्वेऽपि[2] किमपि सूक्ष्मं भावेन्द्रियपञ्चकविज्ञानमभ्युपगम्यते, **पंचेंदिओ वि बउलो [विशेषा० ३००१]** इत्यादि**भाष्यकार**वचनप्रामाण्यात्, तथा भाषा-श्रोत्रेन्द्रियलब्धिविकलत्वेऽपि तेषां किमपि सूक्ष्मं श्रुतं भविष्यति,अन्यथाऽऽहारादिसंज्ञाऽनुपपत्तेः; आह च **भाष्यकृत्**–

जह सुहुमं भाविंदियनाणं दव्विंदियावरोहेऽवि।
तह दव्वसुयाभावे, भावसुयं पत्थिवाईणं॥१॥ [विशेषा० १०३]

ततः प्राक्तनमेव श्रुतलक्षणं समीचीनम्, नान्यदिति स्थितम्।

तदेवं लक्षणभेदाद् भेदमभिधाय सम्प्रति प्रकारान्तरेण भेदमभिधित्सुराह– **मइपुव्वं** इत्यादि, **पॄ**[3] **पालन-पूरणयोः [मल० धा०, पा० धा० १४९०]** इत्यस्य धातोः **पूर्यते** प्राप्यते पाल्यते च येन कार्यं तत् पूर्वम्, औणादिको वक्प्रत्ययः, कारणमित्यर्थः, मतिः पूर्वं यस्य तद् मतिपूर्वं **श्रुतं** श्रुतज्ञानम्। तथाहि– मत्या पूर्यते-प्राप्यते श्रुतम्, न खलु मतिपाटवविभवमन्तरेण श्रुतविभवमुत्तरोत्तरमासादयति जन्तुः, तथाऽदर्शनात्; यच्च यदुत्कर्षा-ऽपकर्षवशादुत्कर्षा-ऽपकर्षभाक् तत् तस्य कारणम्, यथा घटस्य मृत्पिण्डः, मत्युत्कर्षा-ऽपकर्षवशाच्च श्रुतस्योत्कर्षा-ऽपकर्षौ, ततः कारणं मतिः श्रुतज्ञानस्य। तथा पाल्यते-अवस्थितिं प्राप्यते मत्या श्रुतम्, श्रुतस्य हि दलं मतिर्यथा घटस्य मृत्, तथाहि– श्रुतेष्वपि बहुषु ग्रन्थेषु यद्विषयं स्मरणमीहा-ऽपोहादि वा अधिकतरं प्रवर्त्तते स ग्रन्थः

---

१. पृ०२२२ पं०८॥ २. °पि तेषां किम° खं० पा० विना ॥ ३. "पॄंक् पालन-पूरणयोः" - हैम० धा० २।७६।

स्फुटतरः[१] प्रतिभाति, न शेषाः, एतच्च प्रतिप्राणि स्वसंवेदनप्रमाणसिद्धम्। ततो यथोत्पन्नोऽपि घटो मृदभावे न भवति तथास्वभावायां च मृदि तिष्ठन्त्यामवतिष्ठते इति सा तस्य कारणम्, एवं श्रुतस्यापि मतिः कारणम्, ततो युक्तमुक्तं मतिपूर्वं श्रुतमिति। मतिपूर्वकता च श्रुतस्योपयोगापेक्षया द्रष्टव्या, न तु लब्ध्यपेक्षया, लब्धेः समकालतया भवनात्, एतच्च प्रागेवोक्तम्। तथा[२] न **मतिः श्रुतपूर्विका**, तथानुभवाभावात्; ततो महान् मति-श्रुतयोर्भेदः। इतश्च भेदो भेदभेदात्, तथाहि– चतुर्द्धाव्यञ्जनावग्रह-षोढाऽर्थावग्रहेहा-ऽपाय-धारणाभेदादष्टाविंशतिविधमाभिनिबोधिकज्ञानम्, अङ्गा-ऽनङ्गप्रविष्टादिभेदभिन्नं च श्रुतज्ञानमिति। तथा इन्द्रियविभागतश्च भेदः, तत्प्रतिपादिका चेयं पूर्वान्तर्गता गाथा–

सोइंदियउवलद्धी, होइ सुयं सेसयं तु मइनाणं।
मोत्तूणं दव्वसुयं, अक्खरलंभो य सेसेसु॥१॥ [विशेषा* ११७]

अस्या व्याख्या– श्रोत्रेन्द्रियेणोपलब्धिः श्रोत्रेन्द्रियोपलब्धिर्भवति श्रुतम्। **सर्वं वाक्यं सावधारणम्, इष्टितश्चावधारणविधिः**, तत एवमिहावधारणं द्रष्टव्यम्– श्रुतं श्रोत्रेन्द्रियोपलब्धिरेव, न तु श्रोत्रेन्द्रियोपलब्धिः श्रुतमेव। कस्मात् ? इति चेत्, उच्यते, इह श्रोत्रेन्द्रियोपलब्धिरपि या श्रुतग्रन्थानुसारिणी सैव श्रुतमुच्यते, या पुनरवग्रहेहा-ऽपायरूपा सा मतिः, ततो यदि श्रोत्रेन्द्रियोपलब्धिः श्रुतमेवेत्युच्यते तर्हि मतेरपि श्रुतत्वमापद्यते तच्चायुक्तम्, अतः श्रोत्रेन्द्रियोपलब्धिरेव श्रुतमित्यवधारणीयम्। आह च **भाष्यकृत्**–

सोइंदियोवलद्धी, चेव सुयं न उ तई सुयं चेव।
सोइंदियोवलद्धी वि काइ जम्हा मईणाणं॥१॥ [विशेषा* १२२]

तथा 'सेसयं[३] तु मइणाणं' इति 'शेषं' यत् चक्षुरादीन्द्रियोपलब्धिरूपं विज्ञानं तद् मतिज्ञानं भवतीति सम्बध्यते। तुशब्दोऽनुक्तसमुच्चयार्थः, तत आस्तां शेषं विज्ञानं श्रोत्रेन्द्रियोपलब्धिरपि काचिदवग्रहेहा-ऽवायरूपा मतिज्ञानमिति समुच्चिनोति। उक्तं च–

तुसमुच्चयवयणाओ, काई सोइंदियोवलद्धी वि।
मइ एवं सइ सोउवग्गहादयो होंति मइभेया॥१॥ [विशेषा* १२३]

---

१. °तरं खं० ॥ २. **तथा** नास्ति खं० विना॥ ३. पं० १० ॥

तदेवं सर्वस्याः शेषेन्द्रियोपलब्धेरुत्सर्गेण मतिज्ञानत्वे प्राप्ते सति अपवादमाह– **मोत्तूणं दव्वसुयं** मुक्त्वा द्रव्यश्रुतम्, किमुक्तं भवति ?– मुक्त्वा पुस्तक-पत्रकादिन्यस्ताक्षररूपद्रव्यश्रुतविषयां शब्दार्थपर्यालोचनात्मिकां शेषेन्द्रियोपलब्धिम्, तस्याः श्रुतज्ञानरूपत्वात्, यश्च द्रव्यश्रुतव्यतिरेकेणान्योऽपि शेषेन्द्रियेष्वक्षरलाभः शब्दार्थपर्यालोचनात्मकः सोऽपि श्रुतम्, न तु केवलोऽक्षरलाभः, केवलो ह्यक्षरलाभो मतावपीहादिरूपायां भवति, न च सा श्रुतज्ञानम्। अत्राऽऽह– ननु यदि शेषेष्विन्द्रियेष्वक्षरलाभः श्रुतं तर्हि यदादाववधारणमुक्तं 'श्रोत्रेन्द्रियोपलब्धिरेव श्रुतम्' इति तद् विघटते, शेषेन्द्रियोपलब्धेरपि सम्प्रति श्रुतत्वेन प्रतिपन्नत्वात्, नैष दोषः, यतः शेषेन्द्रियाक्षरलाभः स इह गृह्यते यः शब्दार्थपर्यालोचनात्मकः, शब्दार्थपर्यालोचनानुसारी चाक्षरलाभः श्रोत्रेन्द्रियोपलब्धिकल्प इति न कश्चिद् दोषः॥

इतश्च मति-श्रुतयोर्भेदः, वल्कसमं मतिज्ञानम्, कारणत्वात्, शुम्बसमं श्रुतज्ञानम्, तत्कार्यत्वात्, ततो यथा वल्क-शुम्बयोर्भेदस्तथा मति-श्रुतयोरपि। इतश्च भेदः– मतिज्ञानमनक्षरं साक्षरं च; तथाहि– अवग्रहज्ञानमनक्षरम्, तस्यानिर्देश्यसामान्य-मात्रप्रतिभासात्मकतया निर्विकल्पकत्वात्; ईहादिज्ञानं तु साक्षरम्, तस्य परामर्शादिरूपतयाऽवश्यं वर्णारूषितत्वात्; श्रुतज्ञानं पुनः साक्षरमेव, अक्षरमन्तरेण शब्दार्थपर्यालोचनस्यानुपपत्तेः। इतश्च मति-श्रुतयोर्भेदः– मूककल्पं मतिज्ञानम्, स्वमात्रप्रत्यायनफलत्वात्, अमूककल्पं श्रुतज्ञानम्, स्व-परप्रत्यायकत्वात्। तथा चामूनेव भेदहेतून् **भाष्यकृत्** संगृहीतवान्–

लक्खणभेया हेउ-फलभावओ भेय-इंदियविभागा।
वागऽक्खरमूयेयरभेया भेओ मइ-सुयाणं॥१॥ [विशेषा० ९७]

यथा च मति-श्रुतयोः कार्य-कारणभावाद् मिथो भेदस्तथा सम्यग्दर्शन-मिथ्यादर्शनपरिग्रहभेदात् स्वरूपतोऽपि तयोः प्रत्येकं भेदः, तथा चाह–

[सू० ४५] अविसेसिया मती मतिणाणं च मतिअण्णाणं च। विसेसिया सम्मद्दिट्ठिस्स मती मतिणाणं, मिच्छादिट्ठिस्स मती मतिअण्णाणं। एवं अविसेसियं सुयं सुयणाणं च सुयअण्णाणं च। विसेसियं सम्मद्दिट्ठिस्स सुयं

सुयणाणं, मिच्छद्दिट्ठिस्स सुयं सुयअण्णाणं।

अविसेसिएत्यादि। स्वामिना **अविशेषिता** स्वामिविशेषपरिग्रहमन्तरेण विवक्ष्यमाणा मतिर्मतिज्ञानं मत्यज्ञानं चोच्यते, सामान्येनोभयत्रापि मतिशब्दप्रवृत्तेः। **विशेषिता** स्वामिना विशेष्यमाणा सम्यग्दृष्टेर्मतिर्मतिज्ञानमुच्यते, तस्या यथावस्थितार्थग्राहकत्वात्; मिथ्यादृष्टेर्मत्यज्ञानम्, तस्या एकान्तावलम्बितया यथावस्थितार्थग्रहणाभावात्। एवं श्रुतसूत्रमपि व्याख्येयम्। आह– मिथ्यादृष्टेरपि मति-श्रुते सम्यग्दृष्टेरिव तदावरणकर्मक्षयोपशमसमुद्भवे सम्यग्दृष्टेरिव च पृथुबुध्नोदराद्याकारं घटादिकं च संविदाते तत् कथं मिथ्यादृष्टेरज्ञाने ? उच्यते, सदसद्विशेषपरिज्ञानाभावात्। तथाहि– मिथ्यादृष्टिः सर्वमप्येकान्तपुरस्सरं प्रतिपद्यते, न भगवदुक्तस्याद्वादनीत्या, ततः 'घट एवायम्' इति यदा ब्रूते तदा तस्मिन् घटे घटपर्यायव्यतिरेकेण शेषान् सत्त्व-ज्ञेयत्व-प्रमेयत्वादीन् सतोऽपि धर्मानपलपति, अन्यथा 'घट एवायम्' इत्येकान्तेनावधारणानुपपत्तेः, 'घटः सन्नेव' इति च ब्रुवाणः पररूपेण नास्तित्वस्यानभ्युपगमात् पररूपतामसतीमपि तत्र प्रतिपद्यते, ततः सन्तमसन्तं प्रतिपद्यते असन्तं च सन्तमिति सदसद्विशेषपरिज्ञानाभावादज्ञाने मिथ्यादृष्टेर्मति-श्रुते। इतश्च ते मिथ्यादृष्टेरज्ञाने, भवहेतुत्वात्; तथाहि– मिथ्यादृष्टीनां मति-श्रुते पशुवध-मैथुनादीनां धर्मसाधकत्वेन परिच्छेदके, ततो दीर्घतरसंसारपथप्रवर्त्तिनी। तथा यदृच्छोपलम्भादुन्मत्तकविकल्पवत्, यथा हि उन्मत्तकविकल्पा वस्त्वनपेक्ष्यैव यथाकथञ्चित् प्रवर्त्तन्ते, यद्यपि च ते क्वचिद् यथावस्थितवस्तुसंवादिनस्तथापि सम्यग्यथावस्थितवस्तुतत्त्वपर्यालोचनाविरहेण प्रवर्त्तमानत्वात् परमार्थतोऽपारमार्थिकाः, तथा मिथ्यादृष्टीनां मति-श्रुते यथावस्थितं वस्त्वविचार्यैव प्रवर्त्तेते, ततो यद्यपि च ते क्वचिद् 'रसोऽयं स्पर्शोऽयम्' इत्याद्यवधारणाध्यवसायभावे संवादिनी तथापि न ते स्याद्वादमुद्रापरिभावनातस्तथाप्रवृत्ते, किन्तु यथाकथञ्चिद्, अतस्ते अज्ञाने। तथा ज्ञानफलाभावात्, ज्ञानस्य हि फलं हेयस्य हानिः उपादेयस्य चोपादानम्, न च संसारात् परं किञ्चिद् हेयमस्ति न च मोक्षात् परं किञ्चिदुपादेयम्, ततो भव-मोक्षावेकान्तेन हेयोपादेयौ, भव-मोक्षयोश्च हान्युपादाने सर्वसङ्गविरतेर्भवतः, ततः साऽवश्यं तत्त्ववेदिना कर्तव्या, सैव च परमार्थतो ज्ञानस्य

फलम्, तथा चाह भगवान्**उमास्वातिवाचकः**– **ज्ञानस्य फलं विरतिः** [प्रशम० गा० ७२] इति, सा च मिथ्यादृष्टेर्न विद्यते इति ज्ञानफलाभावादज्ञाने मिथ्यादृष्टेर्मति-श्रुते। तथा चामूनेवाज्ञानत्वे हेतून् **भाष्यकृदपि** पठति–

सयसयविसेसणाओ, भवहेउ-जहिच्छिओवलंभाओ।
नाणफलाभावाओ, मिच्छद्दिट्ठिस्स अन्नाणं॥१॥ [**विशेषा०** ११५,३१९,५२१,२८४४]

इह मतिपूर्वं श्रुतमित्युक्तं ततो मतिज्ञानमेवाधिकृत्य शिष्यः प्रश्नयति–

[सू० ४६] से किं तं आभिणिबोहियणाणं ? आभिणिबोहियणाणं दुविहं पण्णत्तं, तंजहा– सुयणिस्सियं च असुयणिस्सियं च।

[सू० ४७ गा० ५८-७१] से किं तं असुयणिस्सियं ? असुयणिस्सियं चउव्विहं पण्णत्तं, तंजहा–

उप्पत्तिया १ वेणइया २, कम्मया ३ पारिणामिया ४।
बुद्धी चउव्विहा वुत्ता, पंचमा नोवलब्भइ॥५८॥
पुव्वं अदिट्ठमसुयमवेइयतक्खणविसुद्धगहियत्था।
अव्वाहयफलजोगा, बुद्धी उप्पत्तिया णाम॥५९॥
भरहसिल १ पणिय २ रुक्खे ३,
खुड्डग ४ पड ५ सरड ६ काय ७ उच्चारे ८।
गय ९ घयण १० गोल ११ खंभे १२,
खुड्डग १३ मग्गि १४ त्थि १५ पति १६ पुत्ते १७॥६०॥
भरहसिल १ मिंढ २ कुक्कुड ३,
वालुय ४ हत्थी ५ य अगड ६ वणसंडे ७।
पायस ८ अइया ९ पत्ते १०,
खाडहिला ११ पंच पियरो १२ य॥६१॥
महुसित्थ १८ मुद्दि १९ यंके २०,
य णाणए २१ भिक्खु २२ चेडगणिहाणे २३।

सिक्खा २४ य अत्थसत्थे २५,
इच्छा य महं २६ सतसहस्से २७॥६२॥ १।
भरणित्थरणसमत्था, तिवग्गसुत्तत्थगहियपेयाला।
उभयोलोगफलवती, विणयसमुत्था हवति बुद्धी॥६३॥
णिमित्ते १ अत्थसत्थे २ य,
लेहे ३ गणिए ४ य कूव ५ अस्से ६ य।
गद्दभ ७ लक्खण ८ गंठी ९,
अगए १० रहिए य गणिया य ११॥६४॥
सीया साडी दीहं, च तणं अवसव्वयं च कुंचस्स १२।
निव्वोदए १३ य गोणे, घोडग पडणं च रुक्खाओ १४॥६५॥ २।
उवओगदिट्ठसारा, कम्मपसंगपरिघोलणविसाला।
साहुक्कारफलवती, कम्मसमुत्था हवति बुद्धी॥६६॥
हेरण्णिए १ करिसए २, कोलिय ३
डोए ४ य मुत्ति ५ घय ६ पवए ७।
तुण्णाग ८ वड्ढती ९ पूविए य
१० घड ११ चित्तकारे १२ य॥६७॥ ३।
अणुमाण-हेउ-दिट्ठंतसाहिया वयविवागपरिणामा।
हिय-णीसेसफलवती, बुद्धी परिणामिया णाम॥६८॥
अभए १ सेट्ठि २ कुमारे ३,
देवी ४ उदिओदए हवति राया ५।
साहू य णंदिसेणे ६, धणदत्ते ७ सावग ८ अमच्चे ९॥६९॥
खमए १० अमच्चपुत्ते ११, चाणक्के १२ चेव थूलभद्दे १३ य।
णासिक्कसुंदरीनंदे १४, वइरे १५ परिणामिया बुद्धी॥७०॥
चलणाहण १६ आमंडे १७,
मणी १८ य सप्पे १९ य खग्गि २० थूभिंदे २१-२२।

परिणामियबुद्धीए एवमादी उदाहरणा॥७१॥ ४।

सेत्तं असुयनिस्सियं।

से किं तं इत्यादि। अथ किं तदाभिनिबोधिकं ज्ञानम् ?। सूरिराह-आभिनिबोधिकं ज्ञानं द्विविधं प्रज्ञप्तम्, तद्यथा– श्रुतनिश्रितं च अश्रुतनिश्रितं च। तत्र शास्त्रपरिकर्मित-मतेरुत्पादकाले शास्त्रार्थपर्यालोचनमनपेक्ष्यैव यदुपजायते मतिज्ञानं तत् श्रुतनिश्रितम्, अवग्रहादि। यत् पुनः सर्वथा शास्त्रसंस्पर्शरहितस्य तथाविधक्षयोपशमभावत एवमेव यथावस्थितवस्तुसंस्पर्शि मतिज्ञानमुपजायते तद् अश्रुतनिश्रितम्, औत्पत्तिक्यादि। तथा चाऽऽह **भाष्यकृत्**–

पुव्वं सुयपरिकम्मियमइस्स जं संपयं सुयाईयं।
तन्निस्सियमियरं पुण, अणिस्सियं मइचउक्कं तं॥१॥ [विशेषा० १६९]

आह– औत्पत्तिक्यादिकमप्यवग्रहादिरूपमेव तत् कोऽनयोर्विशेषः ?, उच्यते, अवग्रहादिरूपमेव, परं शास्त्रानुसारमन्तरेणोत्पद्यते इति भेदेनोपन्यस्तम्। तत्राल्पतर-वक्तव्यत्वात् प्रथममश्रुतनिश्रितमतिज्ञानप्रतिपादनायाह– **से किं तं** इत्यादि, अथ किं तद् अश्रुतनिश्रितम् ?, सूरिराह-अश्रुतनिश्रितं चतुर्विधं प्रज्ञप्तम्, तद्यथा– **उप्पत्तिया य** गाहा, उत्पत्तिरेव न शास्त्राभ्यास-कर्मपरिशीलनादिकं प्रयोजनं कारणं यस्याः सा औत्पत्तिकी, **तदस्य प्रयोजनम्** [मलय०] इति इकण्, ननु सर्वस्या बुद्धेः कारणं क्षयोपशमः तत् कथमुच्यते 'उत्पत्तिरेव प्रयोजनमस्याः' ? इति, उच्यते, क्षयोपशमः सर्वबुद्धिसाधारणः, ततो नासौ भेदेन प्रतिपत्तिनिबन्धनं भवति; अथ च बुद्ध्यन्तराद् भेदेन प्रतिपत्त्यर्थं व्यपदेशान्तरं कर्तुमारब्धम्, तत्र व्यपदेशान्तरनिमित्तमत्र न किमपि विनयादिकं विद्यते, केवलमेवमेव तथोत्पत्तिरिति सैव साक्षान्निर्दिष्टा १। तथा विनयः-गुरुशुश्रूषा, स प्रयोजनमस्या इति वैनयिकी २। तथा अनाचार्यकं कर्म, साचार्यकं शिल्पम्; अथवा कादाचित्कं शिल्पम्, सर्वकालिकं कर्म; कर्मणो जाता कर्मजा ३। तथा परि समन्ताद् नमनं परिणामः-सुदीर्घकालपूर्वापरपर्यालोचनजन्य आत्मनो

१. "प्रयोजनम्" - **पाणिनी०** ५।१।१०९।, **मलय०** त ९।९४।, **शाकटा०** ३।२।११७।, **सिद्धहेम०** ६।४।११७ ॥

धर्मविशेषः, स प्रयोजनमस्याः पारिणामिकी ४। बुध्यतेऽनयेति बुद्धिः, सा चतुर्विधा उक्ता तीर्थकर-गणधरैः। किमिति ?, यस्मात् पञ्चमी केवलिनाऽपि नोपलभ्यते, सर्वस्याप्यश्रुतनिश्रितमतिविशेषस्यौत्पत्तिक्यादिबुद्धिचतुष्टय एवान्तर्भावात्॥५८॥ तत्र **यथोद्देशं निर्देशः** [ ] इति न्यायात् प्रथममौत्पत्तिक्या लक्षणमाह–

पुव्वं इत्यादि। **पूर्वं** बुद्ध्युत्पादात् प्राक् स्वयं चक्षुषा न दृष्टो नाप्यन्यतः श्रुतो मनसाऽप्यविदितः-अपर्यालोचितः तस्मिन् क्षणे-बुद्ध्युत्पादकाले विशुद्धः-यथावस्थितो गृहीतः-अवधारितोऽर्थो यया सा तथा। **पुव्वमदिट्ठ** इत्यादौ मकारा अलाक्षणिकाः। तथा अव्याहतेन-अबाधितेन फलेन-परिच्छेद्येनार्थेन योगो यस्याः सा अव्याहतफलयोगा बुद्धिरौत्पत्तिकी नाम॥५९॥

सम्प्रति विनेयजनानुग्रहायाऽस्या एव स्वरूपप्रतिपादनार्थमुदाहरणान्याह– **भरहसिल-पणिय०** गाहा। **भरहसिल०** गाथा। **महुसित्थ०** गाथा। आसामर्थः कथानकेभ्योऽवसेयः। तानि च कथानकानि विस्तरतोऽभिधीयमानानि ग्रन्थगौरवमापादयन्ति ततः सङ्क्षेपेणोच्यन्ते-**उज्जयनी** नाम पुरी। तस्याः समीपवर्त्ती कश्चिन्नटानामेको ग्रामः। तत्र च **भरतो** नाम नटः, तस्य भार्या परासुरभूत्, तनयश्चास्य **रोहक**ाभिधोऽद्याप्यल्पवयाः, ततः सत्वरमेव स्वस्य स्वतनयस्य च शुश्रूषाकरणायान्या समानिन्ये वधूः। सा च रोहकस्य सम्यग् न वर्त्तते। ततो रोहकेण सा प्रत्यपादि– मातः ! न मे त्वं सम्यग् वर्त्तसे ततो ज्ञास्यसीति। ततः सा सेर्ष्यमाह-रे रोहक ! किं करिष्यसि ? **रोहको**ऽप्याह– तत् करिष्यामि येन त्वं मम पादयोरागत्य लगिष्यसीति। ततः सा तमवज्ञाय तूष्णीमतिष्ठत्। रोहकोऽपि तत्कालादारभ्य गाढसञ्जाताभिनिवेशोऽन्यदा निशि सहसा पितरमेवमभाणीत् - भो भोः पितः! एष पलायमानो गोहो याति। तत एवं बालकवचः श्रुत्वा पितुराशङ्का समुदपादि-नूनं विनष्टा मे महेलेति। तत एवमाशङ्कावशात् तस्यामनुरागः शिथिलीबभूव, ततो न तां सम्यक् संभाषते, नापि विशेषतस्तस्यै पुष्प-ताम्बूलादिकं प्रयच्छति, दूरतः पुनरपास्तं शयनादि। ततः सा चिन्तयामास नूनमिदं बालकविचेष्टितम्, अन्यथा कथमकाण्ड एवैष दोषाभावे पराङ्मुखो जातः ?। ततो बालकमेवमवादीत्– वत्स **रोहक** ! किमिदं त्वया

चेष्टितम् ?, तव पिता मे सम्प्रति दूरं पराङ्मुखीभूतः। **रोहक** आह– किमिति तर्हि न सम्यग् मे वर्त्तसे ?। तयोक्तम्– इत ऊर्ध्वं सम्यग् वर्त्तिष्ये। ततो बालक आह– भव्यम्, तर्हि मा खेदं कार्षीः, तथा करिष्ये यथा मे पिता तथैव त्वयि वर्त्तते इति। ततः सा तत्कालादारभ्य सम्यग् वर्त्तितुं प्रवृत्ता। रोहकोऽप्यन्यदा निशि निशाकरप्रकाशितायां प्राक्तनकदाशङ्कापनोदाय बालभावं प्रकटयन् निजच्छायामङ्गुल्यग्रेण दर्शयन् पितरमेवमाह– भोः पितः ! एष गोहो याति गोहो यातीति। तत एवमुक्ते स पिता परपुरुषप्रवेशाभिमानतो निष्प्रत्याकारं कृपाणमुद्गीर्य प्राधावत्– रे कथय कुत्र यातीति ?। ततः स **रोहको** बालको बालक्रीडां प्रकटयन्नङ्गुल्यग्रेण निजच्छायां दर्शयति पितः! एष गोहो यातीति। ततः स पिता व्रीडित्वा प्रत्यावृत्तः, चिन्तयति स्म च स्वचेतसि– प्राक्तनोऽपि पुरुषो नूनमेवंविध एवाऽऽसीदिति, धिग् मया बालकवचनादलीकं सम्भाव्य विप्रियमेतावन्तं कालं कृतमस्यां भार्यायाम्– इति पश्चात्तापाद् गाढतरमस्यामनुरक्तो बभूव। सोऽपि **रोहकः** 'मया विप्रियं कृतमास्तेऽस्या इति कदाचिदेषा मां विषादिना मारयिष्यति' इति विचिन्त्य सदैव पित्रा सह भुङ्क्ते, न कदाचिदपि केवलः।

अन्यदा च पित्रा **सहोज्जयनीं** पुरीमगमत्, दृष्टा च तेन त्रिदशपुरी**वोज्जयनी**, सविस्मयचेतसा च सकलाऽपि यथावत् परिभाविता। ततः पित्रैव सह नगर्या निर्यातुमारेभे। पिता च 'किमपि मे विस्मृतम्' इति **रोहकं सिप्रा**नदीतटेऽवस्थाप्य तदानयनाय भूयोऽपि नगरीं प्राविक्षत्। **रोहको**ऽपि च तत्र **सिप्रा**भिधसिन्धुसैकते बालचापलवशात् सप्राकारां परिपूर्णामपि पुरीं सिकताभिरालिखत्। इतश्च राजा अश्ववाहनिकायामश्वं वाहयन् कथञ्चिदेकाकीभूतस्तेन पथा समागन्तुं प्रावर्त्तत। तं च स्वालिखितनगरीमध्येन समागच्छन्तं **रोहको**ऽवादीत्– भो राजपुत्र ! माऽनेन पथा समागमः। तेनोक्तम्– किमिति ?। **रोहक** आह– किं त्वं राजकुलमिदं न पश्यसि ?। ततः स राजा कौतुकवशात् सकलामपि नगरीं तदालिखितामवैक्षत, पप्रच्छ च तं बालकम्– रे ! अन्यदाऽपि त्वया नगरी दृष्टाऽऽसीद् ? न वा ? **रोहक** आह– नैव कदाचित्, केवलमहमद्यैव ग्रामादिहागतः। ततश्चिन्तयामास राजा– अहो ! बालकस्य

प्रज्ञातिशय इति। ततः पृष्टो **रोहकः**– वत्स ! किं ते नाम ? क्व वा ग्रामे ? इति। तेनोक्तम्– **रोहक** इति मे नाम, प्रत्यासन्ने च पुरो ग्रामे वसामीति। अत्रान्तरे समागतो **रोहकस्य** पिता, चलितौ च स्वग्रामं प्रति द्वावपि।

राजा च स्वस्थानमगमत्, चिन्तयति स्म च– ममैकोनानि मन्त्रिणां पञ्च शतानि विद्यन्ते, तद् यदि सकलमन्त्रिमण्डलमूर्धाभिषिक्तो महाप्रज्ञातिशायी परमो मन्त्री सम्पद्यते ततो मे राज्यं सुखेनैधते, **बुद्धिबलोपेतो हि राजा प्रायः शेषबलैरल्पबलोऽपि न पराजयस्थानं भवति, परांश्च राज्ञो लीलया विजयते**। एवं च चिन्तयित्वा कतिपयदिनानन्तरं **रोहक**बुद्धिपरीक्षानिमित्तं सामान्यतो ग्रामप्रधानपुरुषानुद्दिश्यैवमादिष्टवान्, यथा– युष्मद्ग्रामस्य बहिरतीव महती शिला वर्त्तते तामनुत्पाट्य राजयोग्यमण्डपाच्छादनं कुरुत। तत एवमादिष्टे सकलोऽपि ग्रामो राजादेशं कर्त्तुमशक्यं परिभावयन्नाकुलीभूतमानसो बहिःसभायामेकत्र मिलितवान्, पृच्छति स्म परस्परम्– किमिदानीं कर्त्तव्यम् ?, दुष्टो राजादेशोऽस्माकमापतितः, राजादेशाकरणे च महाननर्थोपनिपातः। एवं च चिन्तया व्याकुलीभूतानां तेषां मध्यन्दिनमागतम्। **रोहकश्च** पितरमन्तरेण न भुङ्क्ते, पिता च ग्राममेलापके मिलितो वर्त्तते, ततः स क्षुधा पीडितः पितुः समीपे समागत्य रोदितुं प्रावर्त्तत– पीडितोऽहमतीव क्षुधा, ततः समागच्छ गृहे भोजनायेति। **भरतः** प्राह– वत्स ! सुखितोऽसि त्वम्, न किमपि ग्रामकष्टं जानासि। स प्राह– पितः ! किं किं तद् ? इति। ततो **भरतो** राजादेशं सविस्तरमचकथत्। ततो निजबुद्धिप्रागल्भ्यवशाद् झटिति कार्यस्य साध्यतां परिभाव्य तेनोक्तम्– माऽऽकुलीभवत यूयम्, खनत शिलाया राजोचितमण्डपनिष्पादनायाधस्तात्, स्तम्भांश्च यथास्थानं निवेशयत, भित्तीश्चोप**लेपना**दिना प्रकारेणातीव रमणीयाः प्रगुणीकुरुत। तत एवमुक्ते सर्वैरपि ग्रामप्रधानपुरुषैः 'भव्यम्' इति प्रतिपन्नम्। गतः सर्वोऽपि ग्रामलोकः स्वस्वगृहे भोजनाय, भुक्त्वा च समागतः शिलाप्रदेशे, प्रारब्धं तत्र कर्म, कतिपयदिनैश्च निष्पादितः परिपूर्णो मण्डपः, कृता च शिला तस्याच्छादनम्। निवेदितं च राज्ञो राजनियुक्तैः पुरुषैः-देव ! निष्पादितो ग्रामेण देवादेशः। राजा प्राह–

कथमिति ?। ततस्ते सर्वमपि मण्डपनिष्पादनप्रकारं कथयामासुः। राजा पप्रच्छ कस्येयं बुद्धिः ?। तेऽवादिषुः-देव ! **भरत**पुत्रस्य **रोहक**स्य। एषा **रोहक**स्यौत्पत्तिकी बुद्धिः। एवं सर्वेष्वपि संविधानकेषु योजनीयम् १।

ततो भूयोऽपि राजा **रोहक**बुद्धिपरीक्षार्थं मेण्ढकमेकं प्रेषितवान्-एष यावत्पलप्रमाणः सम्प्रति वर्त्तते पक्षातिक्रमेऽपि तावत्पलप्रमाण एव समर्पणीयः, न न्यूनो नाप्यधिक इति। तत एवं राजादेशे समागते सति सर्वोऽपि ग्रामो व्याकुलीभूतचेता बहिःसभायामेकत्र मिलितवान्, सगौरवमाकारितो **रोहक**ः, आभाषितश्च ग्रामप्रधानैः पुरुषैः-वत्स ! प्राचीनमपि दुष्टराजादेशसिन्धुं त्वयैव निजबुद्धिसेतुबन्धेन समुत्तारितः सर्वोऽपि ग्रामः, ततः सम्प्रत्यपि प्रगुणीकुरु निजबुद्धिसेतुबन्धं येनास्यापि दुष्टाराजादेशसिन्धोः पारमधिगच्छाम इति। तत उवाच **रोहक**ः-वृकं प्रत्यासन्नं धृत्वा मेण्ढकमेनं यवसदानेन पुष्टीकुरुत, यवसं हि भक्षयन्नेष न दुर्बलो भविष्यति, वृकं च दृष्ट्वा न बलवृद्धिमाप्स्यतीति। ततस्ते तथैव कृतवन्तः। पक्षातिक्रमे च तं राज्ञः समर्पयामासुः, तोलने च स तावत्पलप्रमाण एव जातः॥२॥

ततो भूयोऽपि कतिपयदिनानन्तरं राज्ञा कुक्कुटः प्रेषितः - एष द्वितीयं कुक्कुटं विना योधयितव्य इति। एवं सम्प्राप्ते राजादेशे मिलितः सर्वोऽपि ग्रामो बहिःसभायाम्, आकारितो **रोहक**ः, कथितश्च तस्य राजादेशः। ततो **रोहके**णाऽऽदर्शको महाप्रमाण आनायितो निर्मृष्टश्च भूत्या सम्यक् ततो धृतः पुरो राजकुक्कुटस्य। ततः स राजकुक्कुटः प्रतिबिम्बमात्मीयमादर्शे दृष्ट्वा 'मत्प्रतिपक्षोऽयमपरः कुक्कुटः' इति मत्वा साहङ्कारं योद्धुं प्रवृत्तः। जडचेतसो हि प्रायस्तिर्यञ्चो भवन्ति। एवं चापरकुक्कुटमन्तरेण योधिते राजकुक्कुटे विस्मितः सर्वोऽपि ग्रामलोकः, सम्पादितो राजादेशः। निवेदितं च राज्ञो निजपुरुषैः ३॥

[ततः पुनरपि कतिपयदिनातिक्रमे राज्ञा तिलाः प्रेषिताः, आदिष्टं च- तिलसमं तैलं दातव्यमिति। तत एवं समागते राजादेशे मिलितो बहिःसभायां सर्वोऽपि ग्रामलोकः। पृष्टश्च रोहकः। ततो रोहकेण आदर्शेन तिलाः मापिताः, तैलमपि तथैव मापितम्। ततः सम्पादितो राजादेश इति विस्मितः सर्वोऽपि ग्रामलोकः। निवेदितं राज्ञो नियुक्तैः

पुरुषैरिति ॥४॥]

ततो भूयोऽपि कतिपयदिवसातिक्रमे राजा निजादेशं प्रेषितवान्– युष्मद्ग्रामस्य सर्वतः समीपे अतीव रमणीया वालुका विद्यते, ततः स्थूला वालुकामयाः कतिपये दवरकाः कृत्वा शीघ्रं प्रेषणीया इति। एवं च राजादेशे समागते मिलितः सर्वोऽपि बहिःसभायां ग्रामः, पृष्टश्च **रोहकः**। ततो **रोहकेण** प्रत्युत्तरमदायि-नटा वयम्, ततो नृत्तमेव वयं कर्त्तुं जानीमः, न दवरकादि, राजादेशश्चावश्यं कर्त्तव्यः, ततः 'बृहद् राजकुलमिति चिरन्तना अपि कतिचिद् वालुकामया दवरका भविष्यन्ति' इति तन्मध्यादेकः कश्चित् प्रतिच्छन्दभूतः प्रेषणीयो येन तदनुसारेण वयमपि वालुकामयान् दवरकान् कुर्म इति। ततो निवेदितमेतद् राज्ञो नियुक्तपुरुषैः। राजा च निरुत्तरीकृतस्तूष्णीमास्ते ५॥

ततः पुनरपि कतिचिद्दिनानन्तरं जीर्णहस्ती रोगग्रस्तो मुमूर्षुर्ग्रामे राज्ञा प्रेषितः-यथा 'अयं हस्ती मृतः' इति न निवेदनीयः, अथ च प्रतिदिवसमस्य वार्त्ता कथनीया, अकथने च महान् ग्रामस्य दण्डः। एवं च राजादेशे समागते तथैव मिलितः सर्वोऽपि बहिःसभायां ग्रामः, पृष्टश्च **रोहकः**। ततो रोहकेणोक्तम्-दीयतामस्मै यवसः, पश्चाद् यद् भविष्यति तत् करिष्यामः। ततो **रोहका**देशेन दत्तो यवसस्तस्मै। रात्रौ च स हस्ती पञ्चत्वमुपागतः। ततो **रोहक**वचनतो ग्रामेण गत्वा राज्ञो निवेदितम्-देव ! अद्य हस्ती न निषीदति नोत्तिष्ठति न कवलं गृह्णाति नापि नीहारं करोति नाप्युच्छ्वास-निश्वासौ विदधाति, किं बहुना ? देव ! कामपि सचेतनचेष्टां न करोति। ततो राज्ञा भणितम्-किं रे मृतो हस्ती ?। ततो ग्राम आह-देव ! देवपादा एवं ब्रुवते, न वयमिति। तत एवमुक्ते राजा मौनमाधाय स्थितः। आगतो ग्रामलोकः स्वग्रामे ६॥

ततो भूयोऽपि कतिपयदिनातिक्रमे राजा समादिष्टवान्-अस्ति यौष्माके ग्रामे सुस्वादुजलसम्पूर्णः कूपः, स इह सत्वरं प्रेषितव्यः। तत एवमादिष्टो ग्रामो **रोहकं** पृष्टवान्। **रोहक**श्चोवाच– एष ग्रामेयकः कूपः, ग्रामेयकश्च स्वभावाद् भीरुर्भवति, न च सजातीयमन्तरेण विश्वासमुपगच्छति, ततो नागरिकः कश्चिदेकः कूपः प्रेष्यतां येन तत्रैष विश्वस्य तेन सह समागच्छतीति। एवं निरुत्तरीकृत्य मुत्कलिता राजनियुक्ताः

पुरुषाः, तैश्च राज्ञो निवेदितम्। राजा च स्वचेतसि रोहकस्य बुद्ध्यतिशयं परिभाव्य मौनमवलम्ब्य स्थितः ७॥

ततो भूयोऽपि कतिपयवासरातिक्रमेऽभिहितवान्-वनषण्डो ग्रामस्य पूर्वस्यां दिशि वर्त्तमानः पश्चिमायां दिशि कर्त्तव्य इति। अस्मिन्नपि राजादेशे समागते ग्रामो **रोहक**बुद्धिमुपजीव्य वनषण्डस्य पूर्वस्यां दिशि व्यवतिष्ठत। ततो जातो ग्रामस्य पश्चिमायां दिशि वनषण्डः। निवेदितं राज्ञो राजनियुक्तैः पुरुषैः ८॥

ततः पुनरपि कालान्तरे राजा समादिष्टवान्-वह्निसम्पर्कमन्तरेण पायसं पक्तव्यमिति। तत्रापि सर्वो ग्राम एकत्र मिलित्वा **रोहक**मपृच्छत्। **रोहक**श्चोक्तवान्– तन्दुलानतीव जलेन भिन्नान् कृत्वा दिनकरकरनिकरसन्तप्तकरीष-पलालादीनामूष्मणि तन्दुल-पयोभृता स्थाली निवेश्यतां येन परमान्नं सम्पद्यते। तथैव कृतम्, जातं परमान्नम्, निवेदितं राज्ञः, विस्मितं तस्य चेतः ९॥

ततो राज्ञा रोहकस्य बुद्ध्यतिशयमवगम्य तदाकारणाय समादिष्टम्– येन बालकेन ममाऽऽदेशाः सर्वेऽपि प्रायः स्वबुद्धिवशात् सम्पादिताः तेन चावश्यमागन्तव्यम्, परं न शुक्लपक्षे नापि कृष्णपक्षे, न रात्रौ न दिवा, न छायया नाप्यातपेन, नाऽऽकाशेन नापि [च्छत्रेण, न] पादाभ्यां [नापि वाहनेन,] न पथा नाप्युत्पथेन, न स्नातेन नास्नातेन। तत एवमादिष्टे स **रोहकः** कण्ठस्नानं कृत्वा गन्त्रीचक्रस्य मध्यभूमिभागेन ऊरणमारूढो धृतचालनीरूपातपत्रः सन्ध्यासमयेऽमावास्या-प्रतिपत्सङ्गमे नरेन्द्रपार्श्वमगमत्। स च **रिक्तहस्तो न पश्येत्, राजानं देवतां गुरुम्।** इति लोकश्रुतिं परिभाव्य पृथिवीपिण्डमेकमादाय गतः, प्रणतो राजा, मुक्तश्च तत्पुरतः पृथिवीपिण्डः। ततः पृष्टो राज्ञा **रोहकः**– रे **रोहक** ! किमेतत् ?। **रोहको**ऽवादीत्-देव ! देवपादाः पृथिवीपतयस्ततो मया पृथिवी समानीता। श्रुत्वा चेदं प्रथमदर्शने मङ्गलवचस्तुतोष राजा, मुत्कलितः शेषो ग्रामलोकः, **रोहकः** पुनरात्मपार्श्वे शायितः। गते च यामिन्याः प्रथमे यामे **रोहकः** शब्दितो राज्ञा-रे ! जागर्षि ? किं वा स्वपिषि ?। स प्राह देव ! जागर्मि। रे ! तर्हि किं चिन्तयसि ?। स प्राह– देव ! अश्वत्थपत्राणां किं दण्डो महान् ? उत शिखा ? इति। तत एवमुक्ते राजा संशयमापन्नो वदति-साधु चिन्तितम्, कोऽत्र निर्णयः ?। ततो राजा तमेव

पृष्टवान्– रे ! कथय कोऽत्र निर्णयः ? इति। तेनोक्तम्-देव ! यावदद्यापि शिखाग्रभागो न शोषमायाति तावद् द्वे अपि समे। ततो राज्ञा पार्श्ववर्त्ती लोकः पृष्टः, तेन च सर्वेणाप्यविगानतः प्रतिपन्नम्। ततो भूयोऽपि **रोहकः** सुप्तवान् १०॥

पुनरपि द्वितीये यामेऽपगते राज्ञा शब्दितः पृष्टश्च-किं रे ! जागर्षि ? किं वा स्वपिषि ?। स प्राह– देव ! जागर्मि। किं रे ! चिन्तयसि ?। देव ! छागिकाया उदरे कथं भ्रम्युत्तीर्णा इव वर्त्तुलगुलिका जायन्ते ?। तत एवमुक्ते राजा संशयापन्नस्तमेव पृष्टवान्-कथय रे **रोहक** ! कथमिति ?। स प्राह-देव ! संवर्त्तकाभिधवातविशेषात्। ततः पुनरपि **रोहकः** सुष्वाप ११॥

तृतीये च रजन्या यामेऽपगते भूयोऽपि राज्ञा शब्दितः - किं रे ! जागर्षि ? किं वा स्वपिषि ?। सोऽवादीत् देव ! जागर्मि। किं रे ! चिन्तयन् वर्तसे ?। देव ! खाडहिलाजीवस्य यावन्मात्रं शरीरं तावन्मात्रं पुच्छम् ? उत हीनाधिकमिति ?। तत एवमुक्ते राजा निर्णयं कर्त्तुमशक्तस्तमेवापृच्छत्– को रे ! अत्र निर्णयः ?। सोऽवादीत्-देव ! सममिति। ततो **रोहकः** सुप्तः १२॥

प्राभातिके च मङ्गलपटहनिस्वने सर्वत्र प्रसरमधिरोहति राजा प्रबोधमुपजगाम, शब्दितवांश्च **रोहकम्**। स च निद्राभरमुपारूढो न प्रतिवाचं दत्तवान्, ततो राजा लीलाकम्बिकया मनाक् तं स्पृष्टवान्। ततः सोऽपगतनिद्रो जातः, पृष्टश्च-किं रे ! स्वपिषि ?। स प्राह– देव ! जागर्मि। किं रे तर्हि कुर्वंस्तिष्ठसि ?। देव ! चिन्तयन्। किं चिन्तयसि ?। देव ! एतच्चिन्तयामि– कतिभिर्जातो देवः ? इति। तत एवमुक्ते राजा सव्रीडं मनाक् तूष्णीमतिष्ठत्। ततः क्षणानन्तरं पृष्टवान्-कथय रे ! कतिभिरहं जातः ? इति। स प्राह-देव ! पञ्चभिः। राजा भूयोऽपि पृष्टवान्-केन केन ? इति। **रोहक** आह-देव ! एकेन तावद् वैश्रवणेन, वैश्रवणस्येव भवतो दानशक्तेर्दर्शनात् १, द्वितीयेन चाण्डालेन, वैरिसमूहं प्रति चाण्डालस्येव कोपदर्शनात् २, तृतीयेन रजकेन, यतो रजक इव वस्त्रं परं निष्पीड्य[1] तस्य सर्वस्वमपहरन् दृश्यसे ३, चतुर्थेन वृश्चिकेन, यन्मामपि बालकं निद्राभरसुप्तं लीलाकम्बिकाग्रेण वृश्चिक इव निर्दयं तुदसि ४, पञ्चमेन

१. **निष्पील्य** पा० विना॥

निजपित्रा, येन यथावस्थितं न्यायं सम्यक् परिपालयसि ५। एवमुक्ते राजा तूष्णीमास्थाय प्राभातिकं कृत्यमकार्षीत्, जननीं च नमस्कृत्यैकान्ते पृष्टवान्– कथय मातः! कतिभिरहं जातः ? इति। सा प्राह-वत्स ! किमेतत् प्रष्टव्यम् ?, निजपित्रा त्वं जातः। ततो राजा **रोहकोक्तं** कथितवान्, वदति च-मातः ! स **रोहकः** प्रायोऽलीकबुद्धिर्न भवति ततः कथय सम्यक् तत्त्वमिति। तत एवमतिनिर्बन्धे कृते सति सा कथयामास-यदा त्वद्गर्भाधानमासीत् तदाऽहं बहिरुद्याने **वैश्रवण**पूजनाय गतवती, **वैश्रवणं** च यक्षमतिशायिरूपं दृष्ट्वा हस्तसंस्पर्शेन सञ्जातमन्मथोन्मादा भोगाय तं स्पृहितवती, अपान्तराले च समागच्छन्ती चाण्डालयुवानमेकमतिरूपमपश्यं ततस्तमपि भोगाय स्पृहयामि स्म, ततोऽर्वाक्तने भागे समागच्छन्ती तथैव रजकं दृष्ट्वाऽभिलषितवती, ततो गृहमागता सती तथाविधोत्सववशाद् वृश्चिकं कणिक्कामयं भक्षणाय हस्ते न्यस्तवती, ततस्तत्संस्पर्शतो जातकामोद्रेका तमपि भोगायाऽऽशंसितवती, तत एवं यदि स्पृहामात्रेण तेऽपि पितरः सम्भवन्ति तन्न जाने, परमार्थतः पुनरेक एव ते पिता सकलजगत्प्रसिद्ध इति १३। तत एवमुक्ते राजा जननीं प्रणम्य **रोहक**बुद्धिविस्मितचेताः स्वावास-प्रासादमगमत्, रोहकं च सर्वेषां मन्त्रिणां मूर्द्धाभिषिक्तं मन्त्रिणमकार्षीत् १॥ तदेवं **'भरहसिल'** इति व्याख्यातम्।

सम्प्रति **'पणिय'** त्ति व्याख्यायते द्वौ पुरुषौ– एको ग्रामेयकोऽपरो नागरिकः। तत्र ग्रामेयकः स्वग्रामाच्चिर्भिटिका आनयन् प्रतोलीद्वारे वर्त्तते, तं प्रति नागरिकः प्राह– यद्येताः सर्वा अपि तव चिर्भिटिका भक्षयामि ततः किं मे प्रयच्छसि ? इति। ग्रामेयक आह-योऽनेन प्रतोलीद्वारेण मोदको न याति तं प्रयच्छामि। ततो बद्धं द्वाभ्यामपि पणितम्, कृताः साक्षिणो जनाः। ततो नागरिकेण ताः सर्वा अपि चिर्भिटिका मनाग् मनाक् भक्षयित्वा मुक्ताः, उक्तं च ग्रामेयकं प्रति– भक्षिताः सर्वा अपि त्वदीयाश्चिर्भिटिकाः, ततो मे प्रयच्छ यथाप्रतिज्ञातं मोदकमिति। ग्रामेयक आह– न मे चिर्भिटिका भक्षिताः, ततः कथं ते प्रयच्छामि मोदकमिति ?। नागरिकः प्राह– भक्षिता मया सर्वा अपि तव चिर्भिटिकाः, यदि न प्रत्येषि तर्हि प्रत्ययमुत्पादयामि ते। तेनोक्तम्– उत्पादय प्रत्ययम्। ततो द्वाभ्यामपि विपणिवीथ्यां विस्तारिता विक्रयाय

चिर्भिटिकाः, समागतो लोकः क्रयाय। ताश्च चिर्भिटिका निरीक्ष्य लोको वक्ति– ननु भक्षितास्त्वदीयाः सर्वा अपि चिर्भिटिकास्तत् कथं वयं गृह्णीमः ?। एवं च लोकेनोक्ते साक्षिणां ग्रामेयकस्य च प्रतीतिरुदपादि। क्षुभितो ग्रामेयकः– हा ! कथं नु नाम मया तावत्प्रमाणो मोदको दातव्यः ?। ततः स भयेन कम्पमानो विनयनम्रो रूपकमेकं प्रयच्छति, नागरिको नेच्छति, ततो द्वे रूपके दातुं प्रवृत्तस्तथापि नेच्छति, एवं यावत् शतमपि रूपकाणां नेच्छति। ततस्तेन ग्रामेयकेण चिन्तितम्– हस्ती हस्तिना प्रेर्यते, ततो धूर्त्त एष नागरिको वचनेन मां छलितवान्, नापरनागरिकधूर्त्तमन्तरेण पश्चात्कर्तुं शक्यते-इत्यनेन सह कतिपयदिनानि व्यवस्थां कृत्वा नागरिकधूर्त्तानवलगामि। तथैव कृतम्, दत्ता चैकेन नागरिकधूर्त्तेन तस्मै बुद्धिः। ततस्तद्बुद्धिबलेनापूपिकापणे मोदकमेकमादाय प्रतिद्वन्द्विनं धूर्त्तमाकारितवान्, साक्षिणश्च सर्वेऽप्याकारिताः। ततस्तेन सर्वसाक्षिसमक्षमिन्द्रकीलके मोदकोऽस्थाप्यत, भणितश्च मोदकः– याहि याहि मोदक ! स न प्रयाति। ततस्तेन साक्षिणोऽधिकृत्योक्तम्-मयैवं युष्मत्समक्षं प्रतिज्ञातम्-यद्यहं जितो भविष्यामि तर्हि स मोदको मया दातव्यो यः प्रतोलीद्वारेण न निर्गच्छति, एषोऽपि न याति, तस्मादहं मुत्कल इति। एतच्च साक्षिभिरन्यैश्च पार्श्ववर्त्तिभिर्नागरिकैः प्रतिपन्नमिति प्रतिजितः प्रतिद्वन्द्वी धूर्त्तः द्यूतकारः। नागरिकधूर्त्तस्यौत्पत्तिकी बुद्धिः २॥

'**रुक्खे**'त्ति **वृक्षोदाहरणम्**। तद्भावना– क्वचित् पथि पथिकानां सहकार-फलान्यादातुं प्रवृत्तानामन्तरायं मर्कटका विदधते। ततः पथिकाः स्वबुद्धिवशाद् वस्तुतत्त्वं पर्यालोच्य मर्कटानां सम्मुखं लोष्टकान् प्रेषयामासुः। ततो रोषाबद्धचेतसो मर्कटाः पथिकानां सहकारफलानि प्रचिक्षिपुः। पथिकानामौत्पत्तिकी बुद्धिः ३॥

तथा '**खुड्डग**' त्ति अङ्गुलीयकाभरणम्, तदुदाहरणभावना-**राजगृहं** नगरम्। तत्र प्रसेनरिपुसमूहविजेता राजा **प्रसेनजित्**। भूयांसस्तस्य सूनवः। तेषां च सर्वेषामपि मध्ये **श्रेणिको** राज्ञा नृपलक्षणसम्पन्नः स्वचेतसि परिभावितः। अत एव तस्मै न किञ्चिदपि ददाति, नापि च वचसाऽपि संस्पृशति, 'मा शेषैरेष परासुर्विधीयेत' इति बुद्ध्या। स च किञ्चिदप्यलभमानो मन्युभरवशात् प्रस्थितो देशान्तरम्, जगाम क्रमेण **बेन्नातटं** नगरम्, तत्र च क्षीणविभवस्य श्रेष्ठिनो विपणौ समुपविष्टः। तेन च श्रेष्ठिना तस्यामेव

रात्रौ स्वप्ने रत्नाकरो निजदुहितरं परिणयन् दृष्ट आसीत्, तस्य च **श्रेणिक**पुण्यप्रभावतस्तस्मिन् दिवसे चिरसञ्चितप्रभूतक्रयाणकविक्रयेण महान् लाभः समुदपादि, म्लेच्छहस्ताच्चानर्घाणि महारत्नानि स्वल्पमूल्येन समपद्यन्त, ततः सोऽचिन्तयत्– अस्य महात्मनो मम समीपमुपविष्टस्य पुण्यप्रभाव एषः, यद् मया महती विभूतिरेतावती समासादिता, आकृतिं च तस्यातीवसुमनोहरामवलोक्य स्वचेतसि कल्पयामास-स एष रत्नाकरो यो मया रात्रौ स्वप्ने दृष्टः। ततस्तेन कृतकराञ्जलिसम्पुटेन विनयपुरस्सरमाभाषितः **श्रेणिक**:– कस्य यूयं प्राघूर्णकाः ?। **श्रेणिक** उवाच– भवतामिति। ततः स एवंभूतवचनश्रवणतो धाराहतकदम्बपुष्पमिव पुलकितसमस्ततनुयष्टिः सबहुमानं स्वगृहं नीतवान् **श्रेणिक**म्, भोजनादिकं च सकलमप्यात्मनोऽधिकतरं सम्पादयामास, पुण्यप्रभावं च तस्य प्रतिदिवसमात्मनो धनलाभवृद्धिसम्भवेनासाधारण-मभिसमीक्षमाणः कतिपयदिनातिक्रमे तस्मै स्वदुहितरं **नन्दा**नामानं दत्तवान्। **श्रेणिको**ऽपि तया सह पुरन्दर इव पौलोम्या मन्मथमनोरथानापूरयन् पञ्चविधभोगलालसो बभूव। कतिपयवासरातिक्रमे च **नन्दा**या गर्भाधानमभूत्। इतश्च **प्रसेनजित्** स्वान्तसमयं विभाव्य **श्रेणिक**स्य परम्परया वार्त्तामधिगम्य तदाकारणाय सत्वरमुष्ट्रवाहनान् पुरुषान् प्रेषयामास। ते च समागत्य **श्रेणिकं** विज्ञप्तवन्तः-देव ! शीघ्रमागम्यताम्, देवः सत्वरमाकारयति, ततो **नन्दा**मापन्नसत्त्वामापृच्छ्य **अम्हे रायगिहे पंडरकुड्डा गोपाला जइ अम्हेहिं कज्जं तो एज्जह** त्ति एतद्वाक्यं क्वचिल्लिखित्वा **श्रेणिको राजगृहं** प्रति चलितवान्। **नन्दा**याश्च देवलोकच्युतमहानुभावगर्भसत्त्वप्रभावत एवं दौहृदमुदपादि यद्-अहं यदि प्रवरकुञ्जरमधिरूढा निखिलजनेभ्यो धनदानपुरस्सरमभयप्रदानं करोमीति। पिता च तदित्थम्भूतं दौहृदमुत्पन्नं ज्ञात्वा राजानं विज्ञप्य पूरितवान्। कालक्रमेण च प्रवृत्ते प्रसवसमये प्रातरादित्यबिम्बमिव दश दिशः प्रकाशयन्नजायत परमसूनुः। तस्य च दौहृदानुसारे**णाभय** इति नाम चक्रे। सोऽपि **चाभयकुमारो** नन्दनवनान्तर्गतकल्पपादप इव तत्र सुखेन परिवर्द्धते, शास्त्रग्रहणादिकमपि यथाकालं कृतवान्। अन्यदा च स्वमातरं पप्रच्छ-मातः! कथं मे पिताऽभूद् ? इति। ततः सा कथयामास मूलत आरभ्य सर्वं यथावस्थितं वृत्तान्तम्, दर्शयामास च लिखितान्यक्षराणि। ततो

मातृवचनतात्पर्यावगमतो लिखिताक्षरार्थावगमतश्च ज्ञातम**भयकुमारे**ण-यथा मे पिता **राजगृहे** राजा वर्त्तत इति। एवं च ज्ञात्वा मातरमभाणीत्-व्रजामो **राजगृहे** सार्थेन सह वयमिति। सा प्रत्यवादीत्-वत्स ! यद् भणसि तत् करोमीति। ततोऽ**भयकुमारः** स्वमात्रा सह सार्थेन समं चलितः, प्राप्तो राजगृहस्य बहिःप्रदेशम्। ततोऽ**भयकुमार**स्तत्र मातरं विमुच्य 'किं [१]वर्त्तते सम्प्रति पुरे ? कथं [२]वा राजा दर्शनीयः ?' इति विचिन्त्य **राजगृह**पुरं प्रविष्टः। तत्र च पुरप्रवेश एव निर्जलकूपतटे समन्ततो लोकः समुदायेनावतिष्ठते, पृष्टं **चाभयकुमारे**ण-किमित्येष लोकमेलापकः ?। ततो लोकेनोक्तम्-अस्य मध्ये राज्ञोऽङ्गुल्याभरणमास्ते, तद् यो नाम तटे स्थितः स्वहस्तेन गृह्णाति तस्मै राजा महतीं वृत्तिं प्रयच्छतीति। तत एवं श्रुते पृष्टाः प्रत्यासन्नवर्त्तिनो राजनियुक्ताः पुरुषाः। तैरप्येवमेव कथितम्। ततोऽ**भयकुमारे**णोक्तम्– अहं तटे स्थितो ग्रहीष्यामि। राजनियुक्तैः पुरुषैरुक्तम्– गृहाण त्वम्, यत् प्रतिज्ञातं राज्ञा तदवश्यं करिष्यते। ततोऽ**भयकुमारे**ण परिभावितमङ्गुल्याभरणं दृष्ट्वा सम्यक्, तत आर्द्रगोमयेनाहतम्, संलग्नं तत् तत्र। ततस्तस्मिन् शुष्के मुक्तं कूपान्तरात् पानीयम्, भृतो जलेन परिपूर्णः स कूपः, तरति चोपरि साङ्गुल्याभरणः शुष्कगोमयः, ततस्तटस्थेन सता गृहीतमङ्गुल्याभरणम**भयकुमारेण**, कृतश्चानन्दकोलाहलो लोकेन, निवेदितं राज्ञो राजनियुक्तैः पुरुषैः। आकारितोऽ**भयकुमारो** राज्ञा, गतो राज्ञः समीपम्, मुमोच पुरतोऽङ्गुल्याभरणम्। पृष्टश्च राज्ञा-वत्स ! कोऽसि त्वम् ?। **अभयकुमारे**णोक्तम्-देव ! युष्मदपत्यम्। राजा प्राह-कथम् ?। ततः प्राक्तनं वृत्तान्तं कथितवान्। ततो जगाम महाप्रमोदं राजा, चकारोत्सङ्गेऽ**भयकुमार**म्, चुम्बितवान् सस्नेहं शिरसि, पृष्टश्च **श्रेणिकेनाभयकुमारः**– वत्स ! क्व ते माता वर्त्तते ?। तेनोक्तम्-देव ! बहिःप्रदेशे। ततो राजा सपरिच्छदस्तस्याः सम्मुखमुपागमत्। **अभयकुमार**श्चाग्रे समागतः कथयामास सर्वं **नन्दा**यः। ततः साऽऽत्मानं मण्डयितुं प्रवृत्ता, निषिद्धा **चाभयकुमारे**ण-मातर्न कल्पते कुलस्त्रीणां निजपतिविरहितानां निजपतिदर्शनमन्तरेण भूषणं कर्त्तुमिति। समागतो राजा, पपात राज्ञः पादयोः **नन्दा**, सम्मानिता च भूषणादिप्रदानेनातीव राज्ञा, सस्नेहं

१. **प्रवर्त्तते** जे१,२, दे० मां० ॥ २. **च** खं० ॥

प्रवेशिता महाविभूत्या नगरं सपुत्रा। स्थापितश्चाभयकुमारोऽमात्यपदे। अभय-कुमारस्यौत्पत्तिकी बुद्धिः ४॥

तथा **'पड'**त्ति **पटोदाहरणम्**, तद्भावना-द्वौ पुरुषौ, एकस्याऽऽच्छादनपटः सौत्रिकः अपरस्योर्णामयः, तौ च सह गत्वा युगपत् स्नातुं प्रवृत्तौ। तत्रोर्णामयपटस्वामी स्वपटं विमुच्य द्वितीयस्य सत्कं सौत्रिकं पटं गृहीत्वा गन्तुं प्रस्थितः, द्वितीयो याचते स्वपटम्, स न प्रयच्छति। ततो राजकुले व्यवहारो जातः। ततः कारणिकैर्द्वयोरपि शिरसी कङ्कतिकयाऽवलेखिते। ततोऽवलेखने कृते ऊर्णामयपटस्वामिनः शिरस ऊर्णावयवा विनिर्जग्मुः, ततो ज्ञातम्– नूनमेष न सौत्रिकपटस्य स्वामी-इति निगृहीतः। अपरस्य समर्पितः सौत्रिकः पटः। कारणिकानामौत्पत्तिकी बुद्धिः ५॥

'सरड' त्ति **सरटोदाहरणम्**, तद्भावना-कस्यचित् पुरुषस्य पुरीषमुत्सृजतः सरटो गुदस्याधस्ताद् बिलं प्रविशन् पुच्छेन गुदं स्पृष्टवान्। ततस्तस्यैवमजायत शङ्का-नूनमुदरे मे सरटः प्रविष्टः। ततो गृहं गतो महतीमधृतिं कुर्वन्नतीव दुर्बलो बभूव, वैद्यं च पप्रच्छ। वैद्यश्च ज्ञातवान्– असम्भवमेतत्। केवलमस्य कथञ्चिदाशङ्का समुदपादि ततः सोऽवादीत्– यदि मे शतं रूपकाणां प्रयच्छसि ततोऽहं त्वां निराकुलीकरोमि। तेन प्रतिपन्नम्। ततो वैद्यो विरेकौषधं तस्य प्रदाय लाक्षारसखरण्टितं सरटं घटे प्रक्षिप्य तस्मिन् घटे पुरीषोत्सर्गं कारितवान्। ततो दर्शितो वैद्येन तस्य पुरीषखरण्टितो घटे सरटः, व्यपगता तस्य शङ्का, जातो बलिष्ठशरीरः। वैद्यस्यौत्पत्तिकी बुद्धिः ६॥

'काय'त्ति **काकोदाहरणम्**, तद्भावना– **बेन्नातटे**[१] पुरे केनापि सौगतेन कोऽपि श्वेतपटक्षुल्लकः पृष्टः-भोः क्षुल्लक ! सर्वज्ञाः किल तवार्हन्तः, तत्पुत्रकाश्च यूयम्, तत् कथय– कियन्तोऽत्र पुरे वसन्ति वायसाः ?। ततः क्षुल्लकश्चिन्तयामास-शठोऽयं प्रतिशठाचरणेन निर्लोठनीयः। ततः स्वबुद्धिवशादिदं पठितवान्–

सट्ठिं कागसहस्सा, इहयं विन्नायडे परिवसंति।
जइ ऊणगा पवसिया, अब्भहिया पाहुणा आया॥१॥

ततः स भिक्षुः प्रत्युत्तरं दातुमशक्नुवन् लकुटाहतशिरस्क इव शिरः कण्डूयन्

---

१. **नगरे** खं० पा० विना॥

मौनमाधाय गतः। क्षुल्लकस्यौत्पत्तिकी बुद्धिः॥

अथवा अपरो **वायसदृष्टान्तः**– कोऽपि क्षुल्लकः केनापि भागवतेन दुष्टबुद्ध्या पृष्टः-भोः क्षुल्लक ! किमेष काको विष्ठामितस्ततो विक्षिपति ?। क्षुल्लकोऽपि तस्य दुष्टबुद्धितामवगम्य तन्मर्मवित् प्रत्युत्तरं दत्तवान्– युष्मत्सिद्धान्ते हि जले स्थले च सर्वत्र व्यापी विष्णुरभ्युपगम्यते ततो यौष्माकीणं सिद्धान्तमुपश्रुत्य एषोऽपि वायसोऽचिन्तयत्– किमस्मिन् पुरीषे समस्ति विष्णुः ? किं वा न ? इति। ततः स एवमुक्तो बाणाहत-मर्मप्रदेश इव घूर्णितचेतनो मौनमवलम्ब्य रुषा धूमायमानो गतः। क्षुल्लकस्यौत्पत्तिकी बुद्धिः ७॥

'**उच्चारे**' त्ति **उच्चारोदाहरणम्**, तद्भावना-क्वचित् पुरे कोऽपि धिग्जातीयः। तस्य भार्याऽभिनवयौवनोद्भेदरमणीया लोचनयुगलवक्रिमावलोकनमहाभल्लीनिपाततताडित-सकलकामिकुरङ्गहृदया प्रबलकामोन्मत्तमानसा। सोऽन्यदा धिग्जातीयस्तया भार्यया सह देशान्तरं गन्तुं प्रवृत्तः, अपान्तराले च धूर्त्तः कोऽपि पथिको मिलितः, सा च धिग्जातीयभार्या तस्मिन् रतिं बद्धवती। ततो धूर्त्तः प्राह-मदीया एषा भार्या। धिग्जातीयः प्राह– मदीयेति। ततो राजकुले व्यवहारो जातः। ततः कारणिकैर्द्वयोरपि पृथक्कृत्य ह्यस्तनदिनभुक्त आहारः पृष्टः। धिग्जातीयेनोक्तम्-मया ह्यस्तनदिने तिलमोदका भक्षिता मद्भार्यया च। धूर्तेनान्यत् किमप्युक्तम्। ततो दत्तं तस्याः कारणिकैर्विरेकौषधम्, जातो विरेकः, दृष्टाः पुरीषान्तर्गतास्तिलाः, दत्ता सा धिग्जातीयाय, निर्धाटितो धूर्त्तः। कारणिकानामौत्पत्तिकी बुद्धिः ८॥

'**गय**' त्ति **गजोदाहरणम्**, तद्भावना **वसन्तपुरे** नगरे कोऽपि राजा बुद्ध्यतिशयसम्पन्नं मन्त्रिणमेकमन्वेषमाणश्चतुष्पथे हस्तिनमालानस्तम्भे बन्धयित्वा घोषणामचीकरत् योऽमुं हस्तिनं तोलयति तस्मै राजा महतीं वृत्तिं प्रयच्छतीति। इमां च घोषणां श्रुत्वा कश्चिदेकः पुमान् तं हस्तिनं महासरसि नावमारोहयामास, तस्मिंश्चाऽऽरूढे यावत्प्रमाणा नौर्जले निमग्ना तावति प्रमाणे रेखामदात्, ततः समुत्तारितो हस्ती तटे प्रक्षिप्ता गण्डशैलकल्पा नावि ग्रावाणः, ते च तावत्प्रक्षिप्ता यावद्रेखां मर्यादीकृत्य जले निमग्ना नौः, ततस्तोलिताः सर्वे ते पाषाणाः, कृतमेकत्र पलपरिमाणम्, निवेदितं राज्ञः-

देव ! एतावत्पलपरिमाणो हस्ती वर्त्तते। ततस्तुतोष राजा, कृतो मन्त्रिमण्डलमूर्द्धाभिषिक्तः परममन्त्री। तस्यौत्पत्तिकी बुद्धिः ॥९॥

'घयण'त्ति भण्डः, तदुदाहरणम्– विटो नाम कोऽपि पुरुषो राज्ञः प्रत्यासन्नवर्त्ती। तं प्रति राजा निजदेवीं प्रशंसति– अहो ! निरामया मे देवी या न कदाचिदपि वातनिसर्गं विदधाति। विटः प्राह– देव ! न भवतीदं जातुचित्। राजाऽवादीत्– कथम् ?। विट आह– देव ! धूर्त्ता देवी, ततो यदा सुगन्धीनि पुष्पाणि चूर्णयित्वा वासान् त्वां समर्पयति नासिकाग्रे तदा ज्ञातव्यम्– वातं विमुञ्चतीति। ततोऽन्यदा राज्ञा तथैव परिभावितम्, सम्यगवगते च हसितम्। ततो देवी हसननिमित्तकथनाय निर्बन्धं कृतवती। ततो राजाऽतिनिर्बन्धे कृते पूर्ववृत्तान्तमचकथत्। ततश्चुकोप देवी तस्मै विटाय, आज्ञप्तो देशत्यागेन। तेनापि जज्ञे-नूनमकथयत् पूर्वं वृत्तान्तं देवो देव्याः, तेन मे चुकोप देवी। ततो महान्तमुपानहां भरमादाय गतो देवीसकाशम्, विज्ञपयामास देवीम्-देवि! यामो देशान्तराणि। देवी उपानहां भरं पार्श्वे स्थितं दृष्ट्वा पृष्टवती-रे किमेष उपानहां भरः ?। सोऽवादीत्– देवि ! यावन्ति देशान्तराण्येतावतीभिरुपानद्भिर्गन्तुं शक्ष्यामि तावत्सु देव्याः कीर्त्तिर्विस्तारणीया। तत एवमुक्ते 'मा मे सर्वत्रापकीर्त्तिर्जायेत' इति परिभाव्य देवी बलात् तं धारयामास। विटस्यौत्पत्तिकी बुद्धिः १०॥

'गोल'त्ति गोलकोदाहरणम्, तद्भावना– लाक्षागोलकः कस्यापि बालकस्य कथमपि नासिकामध्ये प्रविष्टः, ततस्तन्मातापितरावतीवार्त्तौ बभूवतुः। दर्शितो बालकः सुवर्णकारस्य, तेन च सुवर्णकारेण प्रतप्ताग्रभागया लोहशलाकया शनैः शनैर्यत्नतो लाक्षागोलको मनाक् प्रताप्य सर्वोऽपि समाकृष्टः। सुवर्णकारस्यौत्पत्तिकी बुद्धिः ११॥

'खंभे'त्ति स्तम्भोदाहरणम्, तद्भावना-राजा मन्त्रिणमेकं गवेषयन् महाविस्तीर्णतटाकमध्ये स्तम्भमेकं निक्षेपयामास, तत एवं घोषणां कारितवान्– यो नाम तटे स्थितोऽमुं स्तम्भं दवरकेण बध्नाति तस्मै राजा शतसहस्रं प्रयच्छतीति। तत एवं घोषणां श्रुत्वा कोऽपि पुमान् एकस्मिन् तटप्रदेशे कीलकं भूमौ निक्षिप्य दवरकेण बद्ध्वा तेन दवरकेण सह सर्वतस्तटे परिभ्रमन् मध्यस्थितं तं स्तम्भं बद्धवान्। लोकेन च बुद्ध्यतिशयसम्पन्नतया प्रशंसितः, निवेदितश्च राज्ञो राजनियुक्तैः पुरुषैः। तुतोष

राजा, ततस्तं मन्त्रिणमकार्षीत्। तस्य पुरुषस्यौत्पत्तिकी बुद्धिः १२॥

'खुड्डग'त्ति क्षुल्लकोदाहरणम्, तद्भावना-कस्मिंश्चित् पुरे काचित् परिव्राजिका। सा 'यो यत् करोति तदहं कुशलकर्मा सर्वं करोमि' इति राज्ञः समक्षं प्रतिज्ञां कृतवती। राजा च तत्प्रतिज्ञासूचकं पटहमुद्घोषयामास। तत्र च कोऽपि क्षुल्लको भिक्षार्थमटन् पटहशब्दं श्रुतवान्, श्रुतश्च प्रतिज्ञार्थः, ततो धृतवान् पटहम्, प्रतिपन्नो राजसमक्षं व्यवहारः। गतो राजकुलं क्षुल्लकः। ततस्तं लघुं दृष्ट्वा सा परिव्राजिकाऽऽत्मीयं मुखं विकृत्यावज्ञयाऽभिधत्ते कथय कुतो गिलामि ?। तत एवमुक्ते क्षुल्लकः स्वं मेढ्रं दर्शितवान्। ततो हसितं सर्वैरपि जनैः, उद्घुष्टं च-जिता जिता परिव्राजिका, तस्या एवं कर्त्तुमशक्यत्वात्। ततः क्षुल्लकः कायिक्या पद्ममालिखितवान्। सा कर्त्तुं न शक्नोति। ततो जिता परिव्राजिका। क्षुल्लकस्यौत्पत्तिकी बुद्धिः १३॥

'मग्ग' त्ति मार्गोदाहरणम्, तद्भावना-कोऽपि पुरुषो निजभार्यां गृहीत्वा वाहनेन ग्रामान्तरं व्रजति। अपान्तराले च क्वचित् प्रदेशे शरीरचिन्तानिमित्तं तद्भार्या वाहनादुत्तीर्णवती। तस्यां च शरीरचिन्तानिमित्तं कियद्भूभागं गतायां तत्प्रदेशवर्त्तिनी काचिद् व्यन्तरी पुरुषस्य रूप-सौभाग्यादिकमवलोक्य कामातुरा तद्रूपेणाऽऽगत्य वाहनं विलग्ना। सा च तद्भार्या शरीरचिन्तां विधाय यावद् वाहनसमीपमागच्छति तावदन्यां स्त्रियमात्मसमानरूपां वाहनमधिरूढां पश्यति। सा च व्यन्तरी पुरुषं प्रत्याह-एषा काचिद् व्यन्तरी मदीयं रूपमारचय्य तव सकाशमभिलषति ततः खेटय सत्वरं सौरभेयाविति। ततः स पुरुषस्तथैव कृतवान्। सा चाऽऽरटन्ती पश्चाल्लग्ना समागच्छति। पुरुषोऽपि तामारटन्तीं दृष्ट्वा मूढचेता मन्दं मन्दं खेटयामास। ततः प्रावर्त्तत तयोस्तद्भार्या-व्यन्तर्योर्निष्ठुरभाषणादिकः परस्परं कलहः। ग्रामे च प्राप्ते जातस्तयो राजकुले व्यवहारः, पुरुषश्च निर्णयमकुर्वन्नुदासीनो वर्त्तते। ततः कारणिकैः पुरुषो दूरे व्यवस्थापितः, भणिते च ते द्वे अपि स्त्रियौ-युवयोर्मध्ये या काचिदमुं प्रथमं हस्तेन संस्प्रक्ष्यति तस्याः पतिरेषः, न शेषायाः। ततो व्यन्तरी हस्तं दूरतः प्रसार्य प्रथमं स्पृष्टवती। ततो ज्ञातं कारणिकैः-एषा व्यन्तरीति। ततो निर्द्धाटिता, द्वितीया च समर्पिता स्वपतेः। कारणिकानामौत्पत्तिकी बुद्धिः १४॥

'इत्थि'त्ति **स्त्र्युदाहरणम्**, तद्भावना– **मूलदेव-कण्डरीकौ** सह पन्थानं गच्छतः। इतश्च कोऽपि सभार्याकः पुरुषस्तेनैव पथा गन्तुं प्रावर्त्तत। **कण्डरीक**श्च दूरस्थितस्तद्भार्यागतमतिशायि रूपं दृष्ट्वा साभिलाषो जातः, कथितं च तेन **मूलदेव**स्य-यदीमां मे सम्पादयसि तदहं जीवामि, नान्यथेति। ततो **मूलदेवो**ऽवादीत्-मा आतुरीभूः, अहं ते नियमतः सम्पादयिष्यामि। ततस्तौ द्वावप्यलक्षितौ सत्वरं दूरतो गतौ। ततो **मूलदेवः कण्डरीक**मेकस्मिन् वननिकुञ्जे संस्थाप्य पथि ऊर्द्ध्वस्थितो वर्त्तते। ततः पश्चादायातः सभार्याकः स पुरुषो भणितो मूलदेवेन-भो महापुरुष ! महेलाया मेऽस्मिन् वननिकुञ्जे प्रसवो वर्त्तते, ततः क्षणमात्रं निजमहेलां विसर्जय। विसर्जिता तेन, गता सा कण्डरीकपार्श्वम्। ततः क्षणमात्रं स्थित्वा समागता–

'आगंतूण य तत्तो, पडयं घेत्तूण **मूलदेवस्स**।
धुत्ती भणइ हसन्ती, पियं खु णे दारओ जाओ॥१॥'

द्वयोरपि तयोरौत्पत्तिकी बुद्धिः १५॥

'पइ'त्ति **पतिदृष्टान्तः**, तद्भावना-द्वयोर्भ्रात्रोरेका भार्या, लोके च महत् कौतुकम्-अहो ! द्वयोरप्येषा समानुरागेति। एतच्च श्रुतिपरम्परया राज्ञाऽपि श्रुतम्, परं विस्मयमुपागतो राजा। मन्त्री ब्रूते-देव ! न भवति कदाचिदप्येतद्, अवश्यं विशेषः कोऽपि भविष्यति। राज्ञोक्तम्-कथमेतदवसेयम् ?। मन्त्री ब्रूते-देव ! अचिरादेव यथा ज्ञास्यते तथा यतिष्यते। ततो मन्त्रिणा तस्याः स्त्रिया लेखः प्रेषितो यथा– तौ द्वावपि निजपती ग्रामद्वये प्रेषणीयौ-एकः पूर्वस्यां दिशि विवक्षिते ग्रामेऽपरोऽपरस्यां दिशि, तस्मिन्नेव च दिने द्वाभ्यामपि स्वगृहे समागन्तव्यम्। ततस्तया यो मन्दवल्लभः स पूर्वस्यां दिशि प्रेषितोऽपरोऽपरस्यां दिशि, पूर्वस्यां च दिशि यो गतस्तस्य गच्छत आगच्छतश्च सम्मुखः सूर्यः, यः पुनरपरस्यां गतस्तस्य गच्छत आगच्छतश्च पृष्ठतः। एवं च कृते मन्त्रिणा ज्ञातम्-अयं मन्दवल्लभः अपरोऽत्यन्तवल्लभः। ततो निवेदितं राज्ञः। राज्ञा च न प्रतिपन्नम्-यतोऽवश्यमेकः पूर्वस्यां दिशि प्रेषणीयोऽपरोऽपरस्याम्, ततः कथमेष विशेषो गम्यते ?। ततः पुनरपि मन्त्रिणा लेखप्रदानेन सा महेलोक्ता-द्वावपि निजपती तयोरेव ग्रामयोः समकं प्रेषणीयौ। तया च तौ तथैव प्रेषितौ। मन्त्रिणा च द्वौ पुरुषौ

तस्याः समीपे समकं तयोः शरीरापाटवनिवेदकौ प्रेषितौ, द्वाभ्यामपि च सा समकमाकारिता। ततो यो मन्दवल्लभशरीरापाटवनिवेदकः पुरुषस्तं प्रत्याह-सदैव मन्दशरीरी। द्वितीयः अत्यातुरश्च वर्त्तते ततस्तं प्रत्यहं गमिष्यामि। तथैव कृतम्। ततो निवेदितं राज्ञो मन्त्रिणा। प्रतिपन्नं राज्ञा तथेति। मन्त्रिण औत्पत्तिकी बुद्धिः १६॥

'**पुत्त**'त्ति **पुत्रदृष्टान्तः**, तद्भावना-कोऽपि वणिक्, तस्य द्वे पत्न्यौ-एकस्याः पुत्रः, अपरा वन्ध्या, परं साऽपि तं पुत्रं सम्यक् पालयति, ततः स पुत्रो विशेषं न जानीते-यथा इयं मे जननी इयं नेति। सोऽपि वणिक् सभार्यापुत्रो देशान्तरं गतो, गतमात्र एव च परासुरभूत्, ततो द्वयोरपि तयोः कलहोऽजायत। एका भणति-ममैष पुत्रस्ततोऽहं गृहस्वामिनी। द्वितीया तु ब्रूते-का त्वम् ?, ममैष पुत्रः ततोऽहमेव गृहस्वामिनीति। एवं च तयोः परस्परं कलहे जाते राजकुले व्यवहारो बभूव। ततोऽमात्यः प्रतिपादयामास निजपुरुषान् भोः! पूर्वं द्रव्यं समस्तं विभजत[1], विभज्य ततो दारकं द्वौ भागौ करपत्रेण कुरुत, कृत्वा चैकं खण्डमेकस्यै समर्पयत, द्वितीयं द्वितीयस्यै। तत एतदमात्यवाक्यं शिरसि महाज्वालासहस्रावलीढवज्रोपनिपातकल्पं पुत्रमाता श्रुत्वा सोत्कम्पहृदया हृदयान्तःप्रविष्टतिर्यक्शल्येव सदुःखं वक्तुं प्रवृत्ता-हा स्वामिन् महामात्य ! न ममैष पुत्रः, न मे किञ्चिदर्थेन प्रयोजनम्, एतस्या एव पुत्रो भवतु गृहस्वामिनी च, अहं पुनरमुं पुत्रं दूरस्थिताऽपि परगृहेषु दारिद्र्यमपि कुर्वती जीवन्तं द्रक्ष्यामि, तावता च कृतकृत्यमात्मानं प्रपत्स्ये, पुत्रेण विना पुनरधुनाऽपि समस्तोऽपि मे जीवलोकोऽस्तमुपयाति। इतरा च न किमपि वक्ति। ततोऽमात्येन तां सदुःखां परिभाव्योक्तम्-एतस्याः पुत्रः, नास्या इति। सैव सर्वस्य स्वामिनी कृता, द्वितीया तु निर्द्धाटिता। अमात्यस्यौत्पत्तिकी बुद्धिः १७॥६०॥

'**भरहसिलमेंढ**' इत्यादिका च गाथा रोहकसंविधानसूचिका, सा च प्रागुक्त-कथानकानुसारेण स्वयमेव व्याख्येया॥६१॥

'**मधुसित्थ**' इत्यादि। मधुयुक्तं सिक्थं मधुसिक्थम्, तद्दृष्टान्तभावना-कश्चित् कौलिकः, तस्य भार्या स्वैरिणी। सा चान्यदा केनापि पुरुषेण सह क्वचित् प्रदेशे

---

१. **विभजत** पा० मध्ये नास्ति ॥

जालिमध्ये मैथुनं सेवितवती। मैथुनस्थितया च तया उपरि भ्रामरमुत्पन्नं दृष्टम्, क्षणमात्रानन्तरं च समागता गृहे। द्वितीये च दिवसे स्वभर्त्ता मदनं क्रीणंस्तया निवारितः-मा क्रीणीहि मदनम्, अहं ते भ्रामरमुत्पन्नं दर्शयिष्यामि। ततः स क्रयाद् विनिवृत्तः। गतौ च तौ द्वावपि तां जालिम्, न पश्यति सा कथमपि कौलिकी भ्रामरम्। ततो येन संस्थानेन मैथुनं सेवितवती तेनैव संस्थानेन स्थिता, ततो दृष्टवती भ्रामरम्, दर्शयामास च कौलिकाय। कौलिकोऽपि तथारूपं संस्थानमवलोक्य ज्ञातवान्-नूनमेषा दुश्चारिणीति। कौलिकस्यौत्पत्तिकी बुद्धिः १८॥

'मुद्दिय' त्ति **मुद्रिकोदाहरणम्**, तद्भावना-क्वचित् पुरे कोऽपि पुरोधाः सर्वत्र ख्यातसत्यवृत्तिः-यथा परकीयान् निक्षेपानादायाऽऽदाय प्रभूतकालातिक्रमेऽपि तथास्थितानेव समर्पयतीति। एतच्च ज्ञात्वा कोऽपि द्रमकस्तस्मै स्वनिक्षेपं समर्प्य देशान्तरमगमत्, प्रभूतकालातिक्रमे च भूयोऽपि तत्रागतो याचते च स्वं निक्षेपं पुरोधसम्। पुरोधाश्च मूलत एवापलपति-कस्त्वम् ? कीदृशो वा तव निक्षेपः ? इति। ततः स रङ्को वराकः स्वं निक्षेपमलभमानः शून्यचित्तो बभूव। अन्यदा च तेनामात्यो गच्छन् दृष्टो याचितश्च-देहि मे पुरोहित ! सुवर्णसहस्रप्रमाणं निक्षेपमिति। तत एतदाकर्ण्य अमात्यस्तद्विषयकृपापरीतचेता बभूव, ततो गत्वा निवेदितं राज्ञः, कारितश्च दर्शनं द्रमकः। राज्ञाऽपि भणितः पुरोधाः-देहि तस्मै द्रमकाय स्वं निक्षेपमिति। पुरोहितोऽवादीत्-देव ! न किमपि तस्याहं गृह्णामि। ततो राजा मौनमधात्। पुरोधसि च स्वगृहं गते राजा विजने तं द्रमकमाकार्य पृष्टवान्– रे ! कथय सत्यमिति। ततस्तेन सर्वं दिवस-मुहूर्त्त-स्थान-पार्श्ववर्त्तिमानुषादिकं कथितम्। ततोऽन्यदा राजा पुरोधसा समं रन्तुं प्रावर्त्तत, परस्परं नाममुद्रा च सञ्चारिता। ततो राजा यथा पुरोधा न वेत्ति तथा कस्यापि मानुषस्य हस्ते नाममुद्रां समर्प्य तं प्रति बभाण-रे ! पुरोधसो गृहं गत्वा तद्भार्यामेवं ब्रूहि-यथाऽहं पुरोधसा प्रेषितः, इयं च नाममुद्राऽभिज्ञानम्, तस्मिन् दिने तस्यां वेलायां यः सुवर्णसहस्रनवलको द्रमकसत्कस्त्वत्समक्षममुकप्रदेशे मुक्तोऽस्ति तं झटिति मे समर्पय। तेन पुरुषेण तथैव कृतम्। साऽपि च पुरोधसो भार्या नाममुद्रां दृष्ट्वाऽभिज्ञानमिलनतश्च 'सत्यमेष पुरोधसा प्रेषितः' इति प्रतिपन्नवती, ततः समर्पयामास

तं द्रमकनिक्षेपम्। तेन च पुरुषेणाऽऽनीय राज्ञः समर्पितः। राज्ञा चान्येषां बहूनां नवलकानां मध्ये स द्रमकनवलकः प्रक्षिप्तः, आकारितो द्रमकः, पार्श्वे चोपवेशितः पुरोधाः। द्रमकोऽपि तमात्मीयं नवलकं दृष्ट्वा प्रमुदितहृदयो विकसितलोचनो-ऽपगतचित्तशून्यताभावः सहर्षं राजानं विज्ञपयितुं प्रवृत्तः– देव ! देवपादानां पुरत एवमाकारो मदीयो नवलकः। ततो राजा तं तस्मै समर्पयामास, पुरोधसश्च जिह्वाच्छेदमचीकरत्। राज्ञ औत्पत्तिकी बुद्धिः १९॥

'**अंके**'त्ति **अङ्कदृष्टान्तभावना**-कोऽपि कस्यापि पार्श्वे रूपकसहस्रनवलकं निक्षिप्तवान्। तेन च निक्षेपग्राहिणा तं नवलकमधः प्रदेशे छित्त्वा कूटरूपकाणां[१] स भृतः, तथैव च सीवितः। ततः कालान्तरे तस्य पार्श्वान्निक्षेपस्वामिना स्वनिक्षेपो गृहीतः, परिभावितः सर्वतः, तथैव दृश्यते मुद्रादिकम्। तत उद्घाटिता मुद्रा, यावद् रूपकान् परिभावयति तावत् सर्वानपि कूटान् पश्यति। ततो जातो राजकुले तयोर्व्यवहारः। पृष्टः कारणिकैर्निक्षेपस्वामी-भोः ! कतिसङ्ख्यास्तव नवलके रूपका आसीरन् ?। स प्राह– सहस्रम्। ततो गणयित्वा रूपकाणां सहस्रं तेन भृतः स नवलकः, स च परिपूर्णं भृतः, केवलं यावन्मात्रमधस्ताच्छिन्नस्तावता न्यून इत्युपरि सीवितुं न शक्यते। ततो ज्ञातं कारणिकैः-नूनमस्यापहृता रूपकाः। ततो दापितो रूपकसहस्रमितरो नवलकस्वामिनः। कारणिकानामौत्पत्तिकी बुद्धिः २०॥

'**नाण**' त्ति कोऽपि कस्यापि पार्श्वे सुवर्णपणभृतं नवलकं निक्षिप्तवान्, ततो गतो देशान्तरम्। प्रभूते च कालेऽतिक्रान्ते निक्षेपग्राही तस्मान्नवलकाद् जात्यसुवर्णमयान् पणान् गृहीत्वा हीनवर्णिकसुवर्णपणान् तावत्सङ्ख्याकान् तत्र प्रक्षिप्तवान्, तथैव च स नवलकस्तेन सीवितः। ततः कतिपयदिनानन्तरं स नवलकस्वामी देशान्तरादागतः, स्वं च नवलकं तस्य पार्श्वे याचितवान्, सोऽपि नवलकं समर्पयामास, परिभावितं तेन मुद्रादिकम्, तथैव दृष्टम्। ततो मुद्रां स्फेटयित्वा यावत् पणान् परिभावयति तावद् हीनवर्णिकसुवर्णमयान् पश्यति। ततो बभूव राजकुले व्यवहारः। ततः पृष्टं कारणिकैः-कः कालः स आसीद् यत्र त्वया नवलको मुक्तः ? इति। नवलकस्वामी प्राह-अमुक

---

१. °**काणां सहस्रेण स भृतः** पा० मांसं० देसं० ॥

इति। ततः कारणिकैरुक्तम्– स चिरन्तनः कालः, अधुनातनकालकृताश्च दृश्यन्तेऽमी पणाः। ततः 'मिथ्याभाषी नूनमेष निक्षेपग्राही' इति दण्डितः, दापितश्चेतरस्य तावतः पणानिति। कारणिकानामौत्पत्तिकी बुद्धिः २१॥

'भिक्खु' त्ति **भिक्षूदाहरणम्**, तद्भावना-कोऽपि कस्यापि भिक्षोः पार्श्वे सुवर्णसहस्रं निक्षिप्तवान् कालान्तरे च याचते। स च भिक्षुर्न प्रयच्छति, केवलम् 'अद्य कल्ये वा ददामि' इति विप्रतारयति। ततस्तेन द्यूतकारा अवलगिताः। तैः प्रतिपन्नम्-निश्चितं तव दापयिष्यामः। ततो द्यूतकारा रक्तपटवेषेण सुवर्णखुट्टिकां गृहीत्वा[1] भिक्षुसकाशं गताः, वदन्ति च- वयं चैत्यवन्दनाय देशान्तरं यियासवः, यूयं च परमसत्यतापात्रम्, अत एताः सुवर्णखोटिका युष्मत्पार्श्वे स्थास्यन्ति। एतावति चावसरे पूर्वसङ्केतितः स पुरुष आगतः, याचते स्म च-भिक्षो ! समर्पय मदीयां स्थापनिकामिति। ततो भिक्षुणाऽभिनवमुच्यमानसुवर्णखुट्टिकालम्पटतया समर्पिता तस्य स्थापनिका तस्मै 'मा एतासामहमनाभागी जायेय' इति बुद्ध्या। तेऽपि च द्यूतकाराः किमपि मिषान्तरं कृत्वा स्वसुवर्णखुट्टिका गृहीत्वा गताः। द्यूतकाराणामौत्पत्तिकी बुद्धिः २२॥

'चेडगनिहाण' त्ति चेटकाः-बालकाः, निधानं-प्रतीतम्, तद्दृष्टान्तभावना-द्वौ पुरुषौ परस्परं प्रतिपन्नसखिभावावन्यदा क्वचित् प्रदेशे ताभ्यां निधानमुपलेभे। तत एको मायावी ब्रूते-श्वस्तनदिने शुभे नक्षत्रे ग्रहीष्यामः। द्वितीयेन च सरलमनस्कतया तथैव प्रतिपन्नम्। ततस्तेन मायाविना तस्मिन् प्रदेशे रात्रावागत्य निधानं हृत्वा तत्राङ्गारकाः प्रक्षिप्ताः। ततो द्वितीये दिने तौ द्वावपि सह भूत्वा गतौ, दृष्टवन्तौ तत्राङ्गारकान्। ततो मायावी मायया सोरस्ताडमाक्रन्दितुं प्रावर्त्तत, वदति च- हा ! हीनपुण्या वयम्, दैवेन चक्षुषी दत्त्वाऽस्माकं समुत्पाटिते, यन्निधानमुपदिश्याङ्गारका दर्शिताः। पुनः पुनश्च द्वितीयस्य मुखमवलोकते। ततो द्वितीयेन जज्ञे-नूनमनेन हृतं निधानमिति। ततस्तेनाप्याकारसंवरणं कृत्वा तस्यानुशासनार्थमूचे-मा वयस्य ! खेदं कार्षीः, न खलु खेदः पुनर्निधानप्रत्यागमनहेतुः। ततो गतौ द्वावपि स्वं स्वं गृहम्। ततो द्वितीयेन तस्य मायाविनो लेप्यमयी सजीवेव प्रतिमा कारिता, द्वौ च गृहीतौ मर्कटकौ, प्रतिमायाश्चोत्सङ्गे

---

१. °त्वा **समागताः** खं० पा० देसं० विना॥

हस्ते शिरसि स्कन्धे चान्यत्र च यथायोगं तयोर्मर्कटयोर्योग्यं भक्ष्यं मुक्तवान्, तौ च मर्कटकौ क्षुधापीडितौ तत्राऽऽगत्य प्रतिमाया उत्सङ्गादौ भक्ष्यं भक्षितवन्तौ। एवं च प्रतिदिनं करणे तयोस्तादृश्येव शैली समजनि। ततोऽन्यदा किमपि पर्वाधिकृत्य मायाविनो द्वावपि पुत्रौ भोजनाय निमन्त्रितौ, समागतौ च भोजनवेलायां तद्गृहे, भोजितौ च तौ तेन महागौरवेण। भोजनानन्तरं च तौ महता सुखेनान्यत्र सङ्गोपितौ। ततः स्तोकदिनावसाने मायावी स्वपुत्रसाराकरणाय तद्गृहमागतः। ततो द्वितीयस्तं प्रति ब्रूते– मित्र ! तौ तव पुत्रौ मर्कटावभूताम्। ततः सखेदं विस्मितचेताः गृहमध्यं प्राविशत्। ततो लेप्यमयीं प्रतिमामुत्सार्य तत्स्थाने समुपवेशितः, मुक्तौ स्वस्थानाद् मर्कटकौ। तौ च किलकिलायमानौ तस्योत्सङ्गे शिरसि स्कन्धे हस्ते चाऽऽगत्य विलग्नौ। ततो मित्रमवादीत्– भो ! वयस्य ! तावेतौ तव पुत्रौ, तथा च पश्य तव स्नेहमात्मीयं दर्शयतः। ततः स मायावी प्राह– वयस्य ! किं मानुषावकस्माद् मर्कटौ भवतः ?। वयस्य आह– भवतः कर्मप्रातिकूल्यवशात्, तथाहि– किं सुवर्णमङ्गारीभवति ?, परमावयोः कर्मप्रातिकूल्यादेतदपि जातम्, तथा पुत्रावपि तव मर्कटावभूतामिति। ततो मायावी चिन्तयामास– नूनमहं ज्ञातोऽनेन, ततो यद्युच्चैः शब्दं करिष्ये ततोऽहं राजग्राह्यो भविष्यामि, पुत्रौ चान्यथा मे न भवतः। ततस्तेन सर्वं यथावस्थितं तस्मै निवेदितम्, दत्तश्च भागः। इतरेण च समर्पितौ पुत्रौ। तस्यौत्पत्तिकी बुद्धिः २३॥

'सिक्ख' त्ति शिक्षा धनुर्वेदे, तदुदाहरणभावना-कोऽपि पुमान् अतीव धनुर्वेदकुशलः। स परिभ्रमन् एकत्रेश्वरपुत्रान् शिक्षयितुं प्रावर्त्तत, तेभ्यश्चेश्वरपुत्रेभ्यः प्रभूतं द्रव्यं प्राप्तवान्। ततः पित्रादयस्तेषां चिन्तयामासुः-प्रभूतमेतस्मै कुमारा दत्तवन्तः, ततो यदाऽसौ यास्यति तदैनं मारयित्वा सर्वं ग्रहीष्यामः। एतच्च कथमपि तेन ज्ञातम्, ततः स्वबन्धूनां ग्रामान्तरवासिनां कथमपि ज्ञापितम्, भणितं च, यथा-अहममुकस्यां रात्रौ नद्यां गोमयपिण्डान् प्रक्षेप्स्यामि, भवद्भिस्ते ग्राह्या इति। ततस्तैस्तथैव प्रतिपन्नम्। ततो द्रव्येण संवलिता गोमयपिण्डास्तेन कृताः, आतपे च शोषिताः। तत ईश्वरपुत्रान् प्रत्युवाच-यथैषोऽस्माकं विधिः-विवक्षिततिथिपर्वणि स्नान-मन्त्रपुरस्सरं गोमयपिण्डा

नद्यां प्रक्षिप्यन्ते इति तैरपि यथा गुरवो व्याचक्षते तथेति प्रतिपन्नम्। ततो विवक्षिततिथिरात्रौ तैरीश्वरपुत्रैः समं स्नान-मन्त्रपुरस्सरं ते सर्वेऽपि गोमयपिण्डा नद्यां प्रक्षिप्ताः, ततः समागतो गृहम्। तेऽपि गोमयपिण्डा नीता बन्धुभिः स्वग्रामे। ततः कतिपयदिनातिक्रमे तानीश्वरपुत्रान् तेषां च पित्रादीन् प्रत्येकं मुत्कलाप्याऽऽत्मानं[1] च वस्त्रमात्रपरिग्रहोपेतं दर्शयन् सर्वजनसमक्षं स्वग्रामं जगाम। पित्रादिभिश्च परिभावितः 'नास्य पार्श्वे किमप्यस्ति' इति न मारितः। तस्यौत्पत्तिकी बुद्धिः २४॥

'**अत्थसत्थे**'त्ति 'अर्थशास्त्रम्' अर्थविषयं नीतिशास्त्रम्, तद्दृष्टान्तभावना-कोऽपि वणिक्, तस्य द्वे पत्न्यौ-एकस्याः पुत्रः, अपरा वन्ध्या, परं साऽपि पुत्रं सम्यक् पालयति, ततः स पुत्रो विशेषं नावबुध्यते-यथेयं मे जननी, नेयमिति। सोऽपि वणिक् सभार्या-पुत्रो देशान्तरमगमद् यत्र **सुमतिस्वामि**नस्तीर्थकृतो जन्मभूमिः, तत्र च गतमात्र एव दिवङ्गतः। सपत्न्योश्च परस्परं कलहोऽभूत्। एका ब्रूते-ममैष पुत्रस्ततोऽहं गृहस्वामिनी। द्वितीया च ब्रूते– अहमिति। ततो राजकुले व्यवहारो जातः, तथापि न निर्वलति। एतच्च भगवति तीर्थकरे **सुमतिस्वामिनि** गर्भस्थे तज्जनन्या **मङ्गलादेव्या** जज्ञे, तत आकारिते द्वे अपि ते सपत्न्यौ। ततो देव्या प्रत्यपादि-कतिपयदिनानन्तरं मे पुत्रो भविष्यति, स च वृद्धिमधिरूढोऽस्याशोकपादपस्याधस्तादुपविष्टो युष्माकं व्यवहारं छेत्स्यति, तत एतावन्तं कालं यावदविशेषेण खादतां पिबतामिति। ततो न यस्याः पुत्रः साऽचिन्तयत्-लब्धस्तावदेतावान् कालः, पश्चात् किमपि यद् भविष्यति तन्न जानीमः। ततो हृष्टवदनया तया प्रतिपन्नम्। ततो देव्या जज्ञे -'नैषा पुत्रस्य माता' इति निर्भर्त्सिता, द्वितीया च गृहस्वामिनी कृता। देव्या औत्पत्तिकी बुद्धिः २५॥

'**इच्छाए महं**' ति काचित् स्त्री, तस्या भर्त्ता पञ्चत्वमधिगतः। सा च वृद्धिप्रयुक्तं द्रव्यं लोकेभ्यो न लभते, ततः पतिमित्रं भणितवती-मम दापय लोकेभ्यो धनमिति। ततस्तेनोक्तम्-यदि मम भागं प्रयच्छसि। तयोक्तम्-यदिच्छसि तद् मह्यं दद्या इति। ततस्तेन लोकेभ्यः सर्वं द्रव्यमुद्ग्राहितम्, तस्यै स्तोकं प्रयच्छति, सा नेच्छति। ततो जातो राजकुले व्यवहारः। ततः कारणिकैर्यदुद्ग्राहितं द्रव्यं तत्सर्वमानायितम्, कृतौ

१. **मुत्कलय्या**° खं० ॥

द्वौ भागौ-एको महान् द्वितीयोऽल्प इति। ततः पृष्टः कारणिकैः स पुरुषः-कं भागं त्वमिच्छसि ?। स प्राह-महान्तमिति। ततः कारणिकैरक्षरार्थो विचारितः-यदिच्छसि तन्मह्यं दद्या इति, त्वं चेच्छसि महान्तं भागं ततो महान् भाग एतस्याः, द्वितीयस्तु तवेति। कारणिकानामौत्पत्तिकी बुद्धिः २६॥

'**सयसहस्से**'त्ति कोऽपि परिव्राजकः, तस्य रूप्यमयं महाप्रमाणं भाजनं खोरयसंज्ञम्। स च यदेकवारं शृणोति तत् सर्वं तथैवावधारयति, ततः स निजप्रज्ञागर्वमुद्वहन् सर्वत्र प्रतिज्ञां कृतवान्-यो नाम मामपूर्वं श्रावयति तस्मै ददामीदं निजभाजनमिति। न च कोऽप्यपूर्वं श्रावयितुं शक्नोति। स हि यत् किमपि शृणोति तत् सर्वमस्खलितं तथैवानुवदति, वदति च-अग्रेऽपीदं मया श्रुतम्, कथमन्यथाऽहमस्खलितं भणामि ? इति। एतत् सर्वत्र ख्यातिमगमत्। ततः केनापि सिद्धपुत्रकेण ज्ञाततत्प्रतिज्ञेन तं प्रत्युक्तम्– अहमपूर्वं श्रावयिष्यामि। ततो मिलितो भूयान् लोकः, राजसमक्षं व्यवहारो बभूव। ततः सिद्धपुत्रोऽपाठीत्–

तुज्झ पिया मह पिउणो, धारेइ अणूणगं सयसहस्सं।
जइ सुयपुव्वं दिज्जउ, अह न सुयं खोरयं देसु॥१॥

जितः परिव्राजकः। सिद्धपुत्रस्यौत्पत्तिकी बुद्धिः २७॥६२॥

तदेवमुक्ता बुद्धिरौत्पत्तिकी॥१॥ सम्प्रति वैनयिक्या लक्षणं प्रतिपादयति– **भरेत्यादि**। इहातिगुरु कार्यं दुर्निर्वहत्वाद् भर इव भरः तन्निस्तरणे समर्था भरनिस्तरणसमर्था। त्रयो वर्गास्त्रिवर्गाः-लोकरूढ्या धर्मा-ऽर्थ-कामाः तदर्जनोपायप्रतिपादकं यत् सूत्रं यश्च तदर्थस्तौ त्रिवर्गसूत्रार्थौ तयोर्गृहीतं पेयालं-प्रमाणं सारो वा यया सा तथाविधा। अत्राऽऽह-नन्वश्रुतनिश्रिता बुद्धयो वक्तुमभिप्रेताः, ततो यद्यस्यास्त्रिवर्गसूत्रार्थगृहीतसारत्वं ततोऽश्रुतनिश्रितत्वं नोपपद्यते, न हि श्रुताभ्यासमन्तरेण त्रिवर्गसूत्रार्थगृहीतसारत्वं सम्भवति, अत्रोच्यते, इह प्रायोवृत्तिमाश्रित्याऽश्रुतनिश्रितत्वमुक्तम्, ततः स्वल्पश्रुतभावेऽपि न कश्चिद् दोषः। तथा '**उभयलोकफलवती**' ऐहिके आमुष्मिके च लोके फलदायिनी **विनयसमुत्था भवति बुद्धिः**॥६३॥

सम्प्रत्यस्या एव विनेयजनानुग्रहार्थमुदाहरणैः स्वरूपं दर्शयति–

निमित्ते० गाहा। **सीया**० गाहा। गाथाद्वयार्थः कथानकेभ्योऽवसेयः। तानि च ग्रन्थगौरवभयात् सङ्क्षेपेणोच्यन्ते– तत्र **'निमित्ते'** इति, क्वचित् पुरे कोऽपि सिद्धपुत्रकः, तस्य द्वौ शिष्यौ निमित्तशास्त्रमधीतवन्तौ-एको बहुमानपुरस्सरं गुरोर्विनयपरायणो यत् किमपि गुरुरुपदिशति तत् सर्वं तथेति प्रतिपद्य स्वचेतसि निरन्तरं विमृशति, विमृशतश्च यत्र क्वापि सन्देह उपजायते तत्र भूयोऽपि विनयेन गुरुपादमूलमागत्य पृच्छति, एवं निरन्तरं विमर्शपूर्वं शास्त्रार्थं तस्य चिन्तयतः प्रज्ञा प्रकर्षमुपजगाम, द्वितीयस्त्वेतद्-गुणविकलः। तौ चान्यदा गुरुनिदेशात् क्वचित् प्रत्यासन्ने ग्रामे गन्तुं प्रवृत्तौ। पथि च कानिचित् महान्ति पदानि तावदर्शताम्, तत्र विमृश्यकारिणा पृष्टम्– भोः ! कस्यामूनि पदानि ?। तेनोक्तम्– किमत्र प्रष्टव्यम्, हस्तिनोऽमूनि पदानि। ततो विमृश्यकारी प्राह– मैवं भाषिष्ठाः, हस्तिन्या अमूनि पदानि, सा च हस्तिनी वामेन चक्षुषा काणा, तां चाधिरूढा गच्छति काचिद् राज्ञी, सा च सभर्तृका गुर्वी च प्रजने च काल्या, अद्य श्वो वा प्रसविष्यते, पुत्रश्च तस्या भविष्यति। तत एवमुक्ते सोऽविमृश्यकारी ब्रूते-कथमेतदवसीयते ?। विमृश्यकारी प्राह– 'ज्ञानं प्रत्ययसारम्' इत्यग्रे प्रत्ययतो व्यक्तं भविष्यति। ततः प्राप्तौ तौ विवक्षितं ग्रामम्, दृष्टा चाऽऽवासिता तस्य ग्रामस्य बहिः-प्रदेशे महासरस्तटे राज्ञी, परिभाविता च हस्तिनी वामेन चक्षुषा काणा। [ग्रन्थाग्रम् ५०००] अत्रान्तरे च काचिद् दासचेडी महत्तमं प्रत्याह– वर्द्धाप्यसे राज्ञ्याः पुत्रलाभेनेति। ततः शब्दितो विमृश्यकारिणा द्वितीयः– परिभावय दासचेडीवचनमिति। तेनोक्तम्– परिभावितं मया सर्वम्, नान्यथा तव ज्ञानमिति।

ततस्तौ हस्त-पादान् प्रक्षाल्य तस्मिन् महासरस्तटे न्यग्रोधतरोरधो विश्रामाय स्थितौ। दृष्टौ च कयाचिच्छिरोन्यस्तजलभृतघटया वृद्धस्त्रिया, परिभाविता च तयोराकृतिः, ततश्चिन्तयामास– नूनमेतौ विद्वांसौ, ततः पृच्छामि देशान्तरगतनिज-पुत्रागमनमिति। पृष्टं तया, प्रश्नसमकालमेव च शिरसो निपत्य भूमौ घटः शतखण्डशो भग्नः। ततो झटित्येवाविमृश्यकारिणा प्रोचे-गतस्ते पुत्रो घट इव व्यापत्तिमिति। विमृश्यकारी ब्रूते स्म– मा वयस्य ! एवं वादीः, पुत्रोऽस्या गृहे समागतो वर्त्तते, याहि मातर्वृद्धे स्त्रि ! स्वपुत्रमुखमवलोकय। तत एवमुक्ता सा प्रत्युज्जीवितेवाऽऽशीर्वादशतानि

विमृश्यकारिणः प्रयुञ्जाना स्वगृहं जगाम, दृष्टश्चोद्धूलितजङ्घः स्वपुत्रो गृहमागतः। ततः प्रणता स्वपुत्रेण, सा चाऽऽशीर्वादं निजपुत्राय प्रायुङ्क्त, कथयामास च नैमित्तिकवृत्तान्तम्। ततः पुत्रमापृच्छ्य वस्त्रयुगलं रूपकांश्च कतिपयानादाय विमृश्यकारिणः समर्पयामास। अविमृश्यकारी च खेदमावहन् स्वचेतसि अचिन्तत्– नूनमहं गुरुणा न सम्यक् पाठितः, कथमन्यथाऽहं न जानामि, एष जानाति ? इति। गुरुप्रयोजनं च कृत्वा समागतौ तौ गुरोः पार्श्वे। तत्र विमृश्यकारी दर्शनमात्र एव शिरो नमयित्वा कृताञ्जलिपुटः सबहुमानमानन्दाश्रुप्लावितलोचनो गुरोः पादावन्तरा शिरः प्रक्षिप्य प्रणिपपात। द्वितीयोऽपि च शैलस्तम्भ इव मनागप्यनमितगात्रयष्टिर्मात्सर्यवह्निसम्पर्कतो धूमायमानोऽवतिष्ठते। ततो गुरुस्तं प्रत्याह– रे ! किमिति पादयोर्न पतसि ?। स प्राह– य एव सम्यक् पाठितः स एव पतिष्यति, नाहमिति। गुरुराह– कथं त्वं न सम्यक् पाठितः ?। ततः स प्राचीनं वृत्तान्तं सकलमचकथत्, यावदेतस्य ज्ञानं सर्वं सत्यम्, न ममेति। ततो गुरुणा विमृश्यकारी पृष्टः-कथय वत्स ! कथं त्वयेदं ज्ञातम् ? इति।

ततः स प्राह-मया युष्मत्पादादेशेन विमर्शः कर्तुमारब्धः, यथा-एतानि हस्तिरूपस्य पदानि सुप्रतीतान्येव, विशेषचिन्तायां तु 'किं हस्तिनः ? उत हस्तिन्याः ?, तत्र कायिकीं दृष्ट्वा हस्तिन्या इति निश्चितम्। दक्षिणे च पार्श्वे वृतिसमारूढवल्लीवितान आलूनविशीर्णो हस्तिनीकृतो दृष्टो न वामपार्श्वे ततो निश्चिक्ये-नूनं वामेन चक्षुषा काणेति। तथा नान्य एवंविधपरिकरोपेतो हस्तिन्यामधिरूढो गन्तुमर्हति ततोऽवश्यं राजकीयं किमपि मानुषं यातीति निश्चितम्। तच्च मानुषं क्वचित् प्रदेशे हस्तिन्या उत्तीर्य शरीरचिन्तां कृतवत्, कायिकीं दृष्ट्वा राज्ञीति निश्चितम्। वृक्षावलग्नरक्तवस्त्रदशालेश-दर्शनात् सभर्तृका, भूमौ हस्तं विनिवेश्योत्थानाकारदर्शनाद् गुर्वी दक्षिणचरण-निस्सहमोचननिवेशदर्शनात् प्रजने काल्येति। वृद्धस्त्रियाः प्रश्नानन्तरं घटनिपाते चैवं विमर्शः कृतः-यथैष घटो यत उत्पन्नस्तत्रैव मिलितस्तथा पुत्रोऽपीति।

तत एवमुक्ते गुरुणा स विमृश्यकारी चक्षुषा सानन्दमीक्षितः प्रशंसितश्च। द्वितीयं प्रत्युवाच-तव दोषो यन्न विमर्शं करोषि, न मम, वयं हि शास्त्रार्थमात्रोपदेशेऽधिकृताः, विमर्शे तु यूयमिति। विमृश्यकारिणो वैनयिकी बुद्धिः १॥

'**अत्थसत्थे**' त्ति अर्थशास्त्रे **कल्पको** मन्त्री दृष्टान्तः, **दहिकुंडग उच्छुकलावओ** य इति संविधानके २॥

'**लेहे**'त्ति लिपिपरिज्ञानं '**गणिए**' त्ति गणितपरिज्ञानम्, एते च द्वे अपि वैनयिक्यौ बुद्धी ३-४॥

'**कूवे**' त्ति खातपरिज्ञानकुशलेन केनाप्युक्तम्, यथा-एतद्दूरे जलमिति। ततस्तावत्प्रमाणं खातं परं नोत्पन्नं जलम्। ततस्ते खातपरिज्ञाननिष्णाताय निवेदयामासुः-नोत्पन्नं जलमिति। ततस्तेनोक्तम्– पार्ष्णिप्रहारेण पार्श्वान्याहत। आहतानि तैः। ततः पार्ष्णिप्रहारसमकालमेव समुच्छलितं तत्र जलम्। खातपरिज्ञानकुशलस्य पुंसो वैनयिकी बुद्धिः ५॥

'**आसे**'त्ति बहवोऽश्ववणिजो **द्वारवतीं** जग्मुः। तत्र सर्वे कुमाराः स्थूलान् बृहतश्चाश्वान् गृह्णन्ति। **वासुदेवेन** पुनर्यो लघीयान् दुर्बलो लक्षणसम्पन्नः स गृहीतः। स च कार्यनिर्वाही प्रभूताश्वावहश्च जातः। **वासुदेवस्य** वैनयिकी बुद्धिः ६॥

'**गद्दभे**'ति कोऽपि राजा प्रथमयौवनिकामधिरूढस्तरुणिमानमेव रमणीयं सर्वकार्यक्षमं च मन्यमानस्तरुणानेव निजकटके धारितवान्, वृद्धांस्तु सर्वानपि निषेधयामास। सोऽन्यदा कटकेन गच्छन्नपान्तरालेऽटव्यां पतितवान्। तत्र च समस्तोऽपि जनस्तृषा पीड्यते। ततः किं कर्त्तव्यतामूढचेता राजा केनाप्युक्तः– देव ! न वृद्धपुरुष-शेमुषीपोतमन्तरेणायमापत्समुद्रस्तरीतुं शक्यते, ततो गवेषयन्तु देवपादाः क्वापि वृद्धमिति। ततो राज्ञा सर्वस्मिन्नपि कटके पटह उद्घोषितः। तत्र चैकेन पितृभक्तेन प्रच्छन्नो निजपिता समानीतो वर्त्तते, ततस्तेनोक्तम्– मम पिता वृद्धोऽस्तीति। ततो नीतो राज्ञः पार्श्वम्। राज्ञा च सगौरवं पृष्टः-कथय महापुरुष ! कथं मे कटके पानीयं भविष्यति ?। तेनोक्तम्– देव ! रासभाः स्वैरं मुच्यन्ताम्, ततो यत्र ते भूमिमुज्जिघ्रन्ति तत्र पानीयमतिप्रत्यासन्नमवगन्तव्यम्। तथैव कारितं राज्ञा, समुत्पादितं पानीयम्, स्वस्थीबभूव समस्तं कटकमिति। स्थविरस्य वैनयिकी बुद्धिः ७॥

'**लक्खण**'त्ति **पारसीकः** कोऽप्यश्वस्वामी कस्याप्यश्वरक्षकस्य कालनियमनं कृत्वा अश्वरक्षणमूल्यं द्वावश्वौ प्रतिपन्नवान्। सोऽपि चाश्वस्वामिनो दुहित्रा समं वर्त्तते, ततः

सा तेन पृष्टा-कावश्वौ भव्यौ ? इति। तयोक्तम्– अमीषामश्वानां विश्वस्तानां मध्ये यौ पाषाणभृतकुतपानां वृक्षशिखरान्मुक्तानामपि शब्दमाकर्ण्य नोत्रस्यतस्तौ भव्यौ। तेन तथैव तौ परीक्षितौ। ततो वेतनप्रदानकाले सोऽभिधत्ते-मह्यममुकममुकं चाश्वं देहि। अश्वस्वामी प्राह– सर्वानप्यन्यान् अश्वान् गृहाण, किमेताभ्यां तव ? इति। स नेच्छति। ततोऽश्वस्वामिना स्वभार्याया न्यवेदि, भणितं च-गृहजामाता क्रियतामेष इति, अन्यथा प्रधानावश्वावेष गृहीत्वा यास्यति। सा नैच्छत्। ततोऽश्वस्वामी प्राह– लक्षणयुक्तेनाश्वेनान्येऽपि बहवोऽश्वाः सम्पद्यन्ते, कुटुम्बं च परिवर्द्धते, लक्षणयुक्तौ चेमावश्वौ, तस्मात् क्रियतामेतदिति। ततः प्रतिपन्नं तया, दत्ता तस्मै स्वदुहिता, कृतो गृहजामातेति। अश्वस्वामिनो वैनयिकी बुद्धिः ८॥

'**गंठि**'त्ति **पाटलिपुत्रे** नगरे **मुरुण्डो** राजा। तत्र परराष्ट्रराजेन त्रीणि कौतुकनिमित्तं प्रेषितानि, तद्यथा– मूढं सूत्रम् १, समा यष्टिः २, अलक्षितद्वारः समुद्गको जतुना घोलितः ३। तानि च **मुरुण्डेन** राज्ञा सर्वेषामप्यात्मपुरुषाणां दर्शितानि, परं न केनापि ज्ञातानि। तत आकारिताः **पादलिप्ता**चार्याः, पृष्टं राज्ञा-भगवन् ! यूयं जानीत। सूरय उक्तवन्तः-बाढम्। ततः सूत्रमुष्णोदके क्षिप्तम्, उष्णोदकसम्पर्काच्च विलीनं मदनमिति लब्धः सूत्रस्यान्तः। यष्टिरपि पानीये क्षिप्ता, ततो गुरुभागो मूलमिति ज्ञातम्। समुद्गकेऽप्युष्णोदके क्षिप्ते जतु सर्वं गलितमिति द्वारं प्रकटं बभूव। ततो राजा सूरीन् प्रत्यवादीत्– भगवन् ! यूयमपि दुर्विज्ञेयं किमपि कौतुकं कुरुत येन तत्र प्रेषयामि। ततः सूरिभिस्तुम्बमेकस्मिन् प्रदेशे खण्डमेकमपहाय रत्नानां भृतम्, ततस्तथा तत्खण्डं सीवितं यथा न केनापि लक्ष्यते, भणिताश्च परराष्ट्रराजकीयाः पुरुषाः-एतदभङ्क्त्वा इतो रत्नानि ग्रहीतव्यानि, न शक्तं तैरेवं कर्तुम्। **पादलिप्तसूरी**णां वैनयिकी बुद्धिः ९॥

'**अगए**'त्ति क्वचित् पुरे कोऽपि राजा, स च परचक्रेण सर्वतो रोद्धुमारब्धः। ततस्तेन राज्ञा 'सर्वाण्यपि पानीयानि विनाशयितव्यानि' इति विषकरः सर्वत्र पातितः। ततः कोऽपि कियद् विषमानयति। तत्रैको वैद्यो यवमात्रं विषमानीय राज्ञः समर्पितवान्-देव ! गृहाण विषमिति। राजा च स्तोकं विषं दृष्ट्वा चुकोप तस्मै। वैद्यो विज्ञपयामास-

देव ! सहस्रवेधीदं विषं तस्मादप्रसादं मा कार्षीः। राजाऽवादीत्– कथमेतदवसेयम् ?। स उवाच देव ! आनाय्यतां कोऽपि जीर्णो हस्ती। आनायितो राज्ञा हस्ती। ततो वैद्येन तस्य हस्तिनः पुच्छदेशे वालमेकमुत्पाट्य तदीये रन्ध्रे विषं सञ्चारितम्, विषं च प्रसरमाददानं यत्र यत्र प्रसरति तत् तत् सर्वं विपन्नं कुर्वद् दृश्यते। वैद्यश्च राजानमभिधत्ते-देव ! सर्वोऽप्येष हस्ती विषमयो जातः, योऽप्येनं भक्षयति सोऽपि विषमयो भवति, एवमेतद् विषं सहस्रवेधि। ततो राजा हस्तिहानिदूनचेतास्तं प्रत्युवाच-अस्ति कोऽपि हस्तिनः प्रतीकारविधिः ?। सोऽवादीत्-बाढमस्ति। ततस्तस्मिन्नेव वालरन्ध्रेऽगदः प्रदत्तः, ततः सर्वोऽपि झटित्येव प्रशान्तो विषविकारः, प्रगुणीबभूव हस्ती, तुतोष राजा तस्मै वैद्याय। वैद्यस्य वैनयिकी बुद्धिः १०॥

'रहिए य गणिया य'त्ति **स्थूलभद्रकथानके** रथिकस्य यत् सहकारफललुम्बित्रोटनं यच्च गणिकायाः सर्षपराशेरुपरि नर्त्तनं ते द्वे अपि वैनयिकबुद्धिफले[१] ११॥६४॥

'सीये'त्यादि, क्वचित् पुरे कोऽपि राजा। तत्पुत्राः केनाप्याचार्येण शिक्षयितुमारब्धाः। ते च तस्मै आचार्याय प्रभूतं द्रव्यं दत्तवन्तः। राजा च द्रव्यलोभी तं मारयितुमिच्छति। तैश्च पुत्रैः कथञ्चिदेतद् ज्ञात्वा चिन्तितम्-अस्माकमेष विद्यादायी परमार्थपिता, ततः कथमप्येनमापदो निस्तारयामः। ततो यदा भोजनाय समागतः स्नानशाटिकां याचते तदा ते कुमाराः शुष्कामपि शाटीं वदन्ति-अहो ! सीया साडी। द्वारसम्मुखं च तृणं कृत्वा वदन्ति-अहो ! दीर्घं तृणम्, पूर्वं च क्रुञ्चकेन सदैव प्रदक्षिणीक्रियते, सम्प्रति स तस्यापसव्यं भ्रामितः। तत आचार्येण ज्ञातम्-सर्वं मम विरक्तम्, केवलमेते कुमारा मम भक्तिवशाद् ज्ञापयन्ति। ततो यथा न लक्ष्यते तथा पलायामास। कुमाराणामाचार्यस्य च वैनयिकी बुद्धिः १२॥

'निव्वोदएणं' ति काऽपि वणिग्भार्या चिरं प्रोषिते भर्त्तरि दास्या निजसद्भावं निवेदयति-आनय कमपि पुरुषमिति। ततस्तया समानीतः, नख-प्रक्षालनादिकं च सर्वं तस्य कारितम्। रात्रौ च तौ द्वावपि सम्भोगाय द्वितीयभूमिकामारूढौ, मेघश्च वृष्टिं कर्त्तुमारब्धवान्। ततस्तेन तृषा पीडितेन पुरुषेण नीव्रोदकं पीतम्। तदपि च

---

१. **वैनयिकीबुद्धि**° जेसं१, जे२, मां०॥ "पुंवत् कर्मधारये" - सिद्धहेम० ३।२।५७ ॥

त्वग्विषभुजङ्गसंस्पृष्टमिति तत्पानेन पञ्चत्वमुपगतः। ततस्तया वणिग्भार्यया निशापश्चिमयाम एव शून्यदेवकुलिकायां मोचितः। प्रभाते च दृष्टो दाण्डपाशिकैः, परिभावितं तस्य सद्यः कृतं नखादिकर्म। ततः पृष्टाः सर्वेऽपि नापिताः-केनेदं भोः ! कृतमस्य नखादिकं कर्म ? इति। तत एकेन नापितेनोक्तम्-मया कृतममुकाभिधवणिग्भार्यादासचेट्यादेशेन। ततः सा पृष्टा। साऽपि च पूर्वं न कथितवती, ततो हन्यमाना यथावस्थितं कथयामास। दाण्डपाशिकानां वैनयिकी बुद्धिः १३॥

'गोणे घोडग पडणं च रुक्खाओ' कोऽप्यकृतपुण्यो यद् यत् करोति तत् तत् सर्वमापदे प्रभवति। ततोऽन्यदा मित्रं बलीवर्दौ याचित्वा हलं वाहयति। अन्यदा च विकालवेलायां तावानीय वाटके क्षिप्तौ। स च वयस्यो भोजनं कुर्वन्नास्ते, ततः स तस्य पार्श्वे न गतः। केवलं 'तेनापि तौ दृष्ट्याऽवलोकितौ' इति स स्वगृहं गतः। तौ च बलीवर्दौ वाटकाद् निःसृत्यान्यत्र गतौ, ततोऽपहृतौ तस्करैः। स च बलीवर्दस्वामी तमकृतपुण्यं वराकं बलीवर्दौ याचते, स च दातुं न शक्नोति, ततो नीयते तेन राजकुलम्। पथि च गच्छतस्तस्य कोऽप्यश्वारूढः पुरुषः सम्मुखमागच्छति, स चाश्वेन पातितः, अश्वश्च पलायमानो वर्त्तते, ततस्तेनोक्तम्-आहन्यतामेष दण्डेनाश्व इति। तेन चाकृतपुण्येन सोऽश्वो मर्मण्याहतः, ततो मृत्युमुपागमत्। ततस्तेनापि पुरुषेण स वराको गृहीतः। ते च यावद् नगरमायातास्तावत् करणमुत्थितमिति कृत्वा ते नगरबहिष्प्रदेशे एवोषिताः। तत्र च बहवो नटाः सुप्ता वर्त्तन्ते। स चाकृतपुण्योऽचिन्तयत्, यथा– 'नास्मादापत्समुद्राद् मे निस्तारोऽस्तीति वृक्षे गलपाशेनाऽऽत्मानं वद्ध्वा म्रियेय' इति तेन तथैव कर्त्तुमारब्धम्, परं जीर्णदण्डिवस्त्रखण्डेन गले पाशो बद्धः, तच्च दण्डिवस्त्रखण्डमतिदुर्बलमिति त्रुटितम्, ततः स वराकोऽधस्तात्सुप्तनटमहत्तरस्योपरि पपात। सोऽपि च नटमहत्तरस्तद्भाराक्रान्तगलप्रदेशः पञ्चत्वमगमत्, ततो नटैरपि स प्रतिगृहीतः। गताः प्रातः सर्वेऽपि राजकुलम्। कथितः सर्वैरपि स्वस्वव्यतिकरः। ततः कुमारामात्येन स वराकः पृष्टः। सोऽपि दीनवदनोऽवादीद्-देव ! यदेते ब्रुवते तत् सर्वं सत्यमिति। ततस्तस्योपरि सञ्जातकृपः कुमारामात्यो [बलीवर्दस्वामिनम्] अवादीत्- एष बलीवर्दौ तुभ्यं दास्यति, तव पुनरक्षिणी उत्पाटयिष्यति, एष हि तदैवानृणो बभूव

यदा त्वया चक्षुर्भ्यामवलोकितौ बलीवर्दौ, यदि पुनस्त्वया चक्षुर्भ्यां नावलोकितौ स्यातां तदैषोऽपि स्वगृहं न यायात्, न हि यो यस्मै यस्य समर्पणायाऽऽगतः स तस्यानिवेदने समर्पणीयमेवमेव मुक्त्वा स्वगृहं याति। तथा द्वितीयोऽश्वस्वामी शब्दितः-एषोऽश्वं तुभ्यं दास्यति, तव पुनरेष जिह्वां छेत्स्यति, यदा हि त्वदीयजिह्वयोक्तम्-एनमश्वं दण्डेन ताडयेति तदाऽनेन दण्डेनाऽऽहतोऽश्वः, नान्यदा, तत एष दण्डेनाहन्ता दण्ड्यते तव न पुनर्जिह्वेति कोऽयं नीतिपथः ?। तथा नटान् प्रत्याह-अस्य पार्श्वे न किमप्यस्ति ततः किं दापयामः ?, एतावत् पुनः कारयामः-एषोऽधस्तात् स्थास्यति, त्वदीयः पुनः कोऽपि प्रधानो यथैष वृक्षे गलपाशेनाऽऽत्मानं बद्ध्वा मुक्तवान् तथाऽऽत्मानं मुञ्चत्विति। ततः सर्वैरपि मुक्तः। कुमारामात्यस्य वैनयिकी बुद्धिः १४॥६५॥ उक्ता वैनयिकी बुद्धिः॥२॥

कर्मजाया बुद्धेर्लक्षणमाह— **उवओग** इत्यादि। उपयोजनमुपयोगः-विवक्षितकर्मणि मनसोऽभिनिवेशः, **सारः** तस्यैव विवक्षितकर्मणः परमार्थः, उपयोगेन दृष्टः सारो यया सा उपयोगदृष्टसारा, अभिनिवेशोपलब्धकर्मपरमार्था इत्यर्थः। तथा कर्मणि **प्रसङ्गः** अभ्यासः **परिघोलनं** विचारस्ताभ्यां विशाला विस्तारमुपगता कर्मप्रसङ्गपरिघोलन-विशाला। तथा **साधुकृतं** सुष्ठुकृतमिति विद्वद्भ्यः प्रशंसा साधुकारः, तेन युक्तं फलं साधुकारफलं तद्वती, साधुकारपुरस्सरं वेतनादिलाभरूपं तस्याः फलमित्यर्थः। सा तथा कर्मसमुत्था भवति बुद्धिः॥६६॥

अस्या अपि विनेयजनानुग्रहार्थमुदाहरणैः स्वरूपं दर्शयति— **हेरण्णिए** इत्यादौ षष्ठ्यर्थे सप्तमी, ततोऽयमर्थः-**हैरण्यिके** हैरण्यकस्य कर्मजा बुद्धिः। एवं सर्वत्रापि योजना कार्या। हैरण्यको हि स्वविज्ञानप्रकर्षप्राप्तोऽन्धकारेऽपि हस्तस्पर्शविशेषेण रूपकं यथावस्थितं परीक्षते १॥

करिसगे त्ति अत्रोदाहरणम्-कोऽपि तस्करो रात्रौ वणिजो गृहे पद्माकारं खातं खातवान्। ततः प्रातरलक्षितस्तस्मिन्नेव गृहे समागत्य जनेभ्यः प्रशंसामाकर्णयति। तत्रैकः कर्षकोऽब्रवीत्-किं नाम शिक्षितस्य दुष्करत्वम् ?, यद् येन सदैवाभ्यस्तं कर्म स तत् प्रकर्षप्राप्तं करोति, नात्र विस्मयः। ततः स तस्कर एतद्वाक्यममर्ष-वैश्वानरसन्धुक्षणसममाकर्ण्य जज्वाल कोपेन। ततः पृष्टवान् कमपि पुरुषम्-कोऽयम् ?

कस्य वा सत्कः ? इति। ज्ञात्वा च तमन्यदा क्षुरिकामाकृष्य गतः क्षेत्रे तस्य पार्श्वे रे ! मारयामि त्वां सम्प्रति। तेनोक्तम्– किमिति ?। सोऽवादीत्-त्वया तदानीं न मम खातं प्रशंसितमिति कृत्वा। सोऽब्रवीत्– सत्यमेतत्, यो यस्मिन् कर्मणि सदैवाभ्यासपरः स तद्विषये प्रकर्षवान् भवति, तत्राहमेव दृष्टान्तः। तथाहि– अमून् मुद्गान् हस्तगतान् यदि भणसि तर्हि सर्वानप्यधोमुखान् पातयामि यद्वा ऊर्द्ध्वमुखान् अथवा पार्श्वस्थितानिति। ततः सोऽधिकतरं विस्मितचेताः प्राह-पातय सर्वानप्यधोमुखानिति। विस्तारितो भूमौ पटः, पातिताः सर्वेऽप्यधोमुखा मुद्गाः, जातो महान् विस्मयश्चौरस्य, प्रशंसितं भूयो भूयस्तस्य कौशलम्-अहो ! विज्ञानम् - अहो ! विज्ञानमिति। वदति चोरः-यदि नाधोमुखाः पातिता अभविष्यन् ततो नियमात् त्वामहममारयिष्यमिति। कर्षकस्य चौरस्य च कर्मजा बुद्धिः २॥

कोलिय त्ति कौलिकः-तन्तुवायः, स मुष्ट्या तन्तूनादाय जानाति-एतावद्भिः कण्डकैः पटो भविष्यति ३॥

डोए त्ति दर्वी, वर्द्धकिर्जानाति-एतावदत्र मास्यतीति ४॥

मुत्ति त्ति मणिकारो मौक्तिकमाकाशे प्रक्षिप्य शूकरवालं तथा धारयति यथा पततो मौक्तिकस्य रन्ध्रे स प्रविशतीति ५॥

घय त्ति घृतविक्रयी स्वविज्ञानप्रकर्षप्राप्तो यदि रोचते तर्हि शकटे स्थितोऽधस्तात् कुण्डिकानालेऽपि घृतं प्रक्षिपति ६॥

पवए त्ति प्लवकः, स चाऽऽकाशस्थितानि करणानि करोति ७॥

तुण्णाग त्ति सीवनकर्मकर्त्ता, स च स्वविज्ञानप्रकर्षप्राप्तस्तथा सीवति यथा प्रायो न केनापि लक्ष्यते ८॥

वड्ढइ त्ति वर्द्धकिः, स च स्वविज्ञानप्रकर्षप्राप्तोऽमित्वाऽपि देवकुल-रथादीनां प्रमाणं जानाति ९॥

पूइ[ए] य त्ति आपूपिकः, स चाऽमित्वाऽप्यपूपानां दलस्य मानं जानाति १०॥

घड त्ति घटकारः स्वविज्ञानप्रकर्षप्राप्तः प्रथमत एव प्रमाणयुक्तां मृदं गृह्णाति ११॥

चित्तकारे त्ति चित्रकारः, स च रूपकभूमिकाममित्वाऽपि रूपकप्रमाणं जानाति,

तावन्मात्रं वा वर्णं कुञ्चिकया गृह्णाति यावन्मात्रेण प्रयोजनमिति १२॥६७॥ उक्ता कर्मजा बुद्धिः ॥३॥

सम्प्रति पारिणामिक्या लक्षणमाह– **अणुमाण** इत्यादि। लिङ्गाल्लिङ्गिनि ज्ञानमनुमानम्, तच्च स्वार्थानुमानमिह द्रष्टव्यम्, अन्यथा हेतुग्रहणस्य नैरर्थक्यापत्तेः। अनुमानप्रतिपादकं वचो हेतुः, परार्थानुमानमित्यर्थः। अथवा ज्ञापकमनुमानम्, कारकं हेतुः। दृष्टान्तः प्रतीतः। आह-अनुमानग्रहणेन दृष्टान्तस्य गतत्वादलमस्योपन्यासेन, न, अनुमानस्य क्वचिद् दृष्टान्तमन्तरेणान्यथानुपपत्तिग्राहक-प्रमाणबलेन प्रवृत्तेः; यथा-सात्मकं जीवच्छरीरम्, प्राणादिमत्त्वान्यथानुपपत्तेः; न च दृष्टान्तोऽनुमानस्याङ्गम्; यत उक्तम्– **अन्यथाऽनुपपन्नत्वम्, यत्र तत्र त्रयेण किम्**[1] ?। [ ], ततः पृथग् दृष्टान्तस्योपादानम्। तत्र साध्यस्योपमाभूतो दृष्टान्तः। तथा चोक्तम्– **यः साध्यस्योपमाभूतः स दृष्टान्त इति कथ्यते**। [ ] अनुमान-हेतु-दृष्टान्तैः साध्यमर्थं साधयतीति अनुमान-हेतु-दृष्टान्तसाधिका। तथा कालकृतो देहावस्थाविशेषो वयः तद्विपाके परिणामः-पुष्टता यस्याः सा **वयोविपाकपरिणामा**। तथा हितम्-अभ्युदयो निःश्रेयसं-मोक्षस्ताभ्यां फलवती, ते द्वे अपि तस्याः फले इत्यर्थः। बुद्धिः पारिणामिकी नाम॥

अस्या अपि शिष्यगणहितायोदाहरणैः स्वरूपं प्रकटयति– **अभये**त्यादि गाथात्रयम्। अस्यार्थः कथानकेभ्योऽवसेयः। तानि च कथानकानि प्रायोऽतीव गुरूणि प्रसिद्धानि च, ततो ग्रन्थान्तरेभ्योऽवसेयानि। इह त्वक्षरयोजनामात्रमेव केवलं करिष्यते। तत्र **अभए** त्ति **अभयकुमार**स्य यच्च**ण्डप्रद्योता**द् वरचतुष्टयमार्गणम्, यच्च चण्डप्रद्योतं बद्ध्वा नगरमध्येनाऽऽरटन्तं नीतवानित्यादि सा पारिणामिकी बुद्धिः १॥

सेट्ठि त्ति **काष्ठश्रेष्ठी**, तस्य यत् स्वभार्यादुश्चरितमवलोक्य प्रव्रज्याप्रतिपत्तिकरणम्, यच्च पुत्रे राज्यमनुशासति वर्षाचतुर्मासकानन्तरं विहारक्रमं कुर्वतः पुत्रसमक्षं धिग्जातीयैरुपस्थापिताया द्व्यक्षरिकाया आपन्नसत्त्वायाः 'त्वदीयोऽयं गर्भः, त्वं च ग्रामान्तरं प्रति चलितस्ततः कथमहं भविष्यामि ?' इति वदन्त्याः प्रवचनापयशो-निवारणाय 'यदि मदीयो गर्भस्ततो योनेर्विनिर्गच्छतु, नो चेदुदरं भित्त्वा विनिर्गच्छतु'

१. "नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ॥" इति उत्तरार्धम् ॥

इति यत् शापप्रदानं सा पारिणामिकी बुद्धिः २॥

'कुमारे' त्ति मोदकप्रियस्य कुमारस्य प्रथमे वयसि वर्त्तमानस्य कदाचिद् गुणन्यां गतस्य प्रमदादिभिः सह यथेच्छं मोदकान् भक्षितवतोऽजीर्णरोगप्रादुर्भावादतिपूतिगन्धिं वातकायमुत्सृजतो या उद्गता चिन्ता, यथा 'अहो ! तादृशान्यपि मनोहराणि कणिक्कादीनि द्रव्याणि शरीरसम्पर्कवशात् पूतिगन्धीनि जातानि, तस्माद् धिगिदमशुचि शरीरम्, धिग् व्यामोहः, यदेतस्यापि शरीरस्य कृते जन्तुः पापान्यारभते' इत्यादिरूपा सा पारिणामिकी बुद्धिः। तत ऊर्द्धं तस्य शुभ-शुभतराध्यवसायभावतोऽन्तर्मुहूर्त्तेन केवलज्ञानोत्पत्तिः ३॥

[१]**'देवि'** त्ति देव्याः **पुष्पवत्य**भिधानायाः प्रव्रज्यां परिपाल्य देवत्वेनोत्पन्नाया यत् **पुष्पचूला**भिधानायाः स्वपुत्र्याः स्वप्ने नरक-देवलोकप्रकटनेन प्रबोधकरणं सा पारिणामिकी बुद्धिः ४॥

'उदिओदए' त्ति **उदितोदय**स्य राज्ञः **श्रीकान्ता**पतेः **पुरिमतालपुरे** राज्यमनुशासतः **श्रीकान्ता**निमित्तं **वाराणसी**वास्तव्येन **धर्मरुचिना** राज्ञा सर्वबलेन समागत्य निरुद्धस्य प्रभूतजनपरिक्षयभयेन यद् **वैश्रवण**मुपवासं कृत्वा समाहूय सनगरस्याऽऽत्मनोऽन्यत्र सङ्क्रामणं सा पारिणामिकी बुद्धिः ५॥

'साहू य नंदिसेणे' त्ति साधोः **श्रेणिक**पुत्रस्य **नन्दिषेण**स्य स्वशिष्यस्य व्रतमुज्झितुकामस्य स्थिरीकरणाय भगव**द्वर्द्धमानस्वामि**वन्दननिमित्तचलित-मुक्ताभरणश्वेताम्बरपरिधानरूपरामणीयकविनिर्जितामरसुन्दरीकस्वान्तःपुरदर्शनं कृतं सा पारिणामिकी बुद्धिः। स हि **नन्दिषेण**स्य तादृशमन्तःपुरं **नन्दिषेण**परित्यक्तं दृष्ट्वा दृढतरं संयमे स्थिरीबभूव ६॥

'धणदत्ते' त्ति **धनदत्त**स्य **सुंसुमा**या निजपुत्र्याः **चिलातीपुत्रे**ण मारितायाः कालमपेक्ष्य यत् पललभक्षणं सा पारिणामिकी बुद्धिः ७॥

'सावगो' त्ति कोऽपि श्रावकः प्रत्याख्यातपरस्त्रीसम्भोगः कदाचिन्निजजायासखीमवलोक्य तत्रातीवाध्युपपन्नः। तं च तादृशं दृष्ट्वा तद्भार्याऽचिन्तयत्-नूनमेष यदि कथमप्येतस्मिन्नध्यवसाये वर्त्तमानो म्रियते तर्हि नरकगतिं तिर्यग्गतिं वा याति, तस्मात्

---

१. **देवे त्ति** पा० दे० मासं० विना ॥

करोमि कश्चिदुपायमिति। तत एवं चिन्तयित्वा स्वपतिमभाणीत्-मा त्वमातुरीभूः, अहं ते तां विकालवेलायां सम्पादयिष्यामि। तेन प्रतिपन्नम्। ततो विकालवेलायामीषदन्धकारे जगति प्रसरति स्वसख्या वस्त्राण्याभरणानि च परिधाय सा स्वसखीरूपेण रहसि तमुपासृपत्। स च 'सेयं मद्भार्यासखी' इत्यवगम्य तां परिभुक्तवान्। परिभोगे च कृतेऽपगतकामाध्यवसायोऽस्मरच्च प्राग्गृहीतं व्रतम्। ततो 'व्रतभङ्गो मे समुदपादि' इति खेदं कर्तुं प्रवृत्तः। ततस्तद्भार्या तस्मै यथावस्थितं निवेदयामास। ततो मनाक् स्वस्थीबभूव, गुरुपादमूलं च गत्वा दुष्टमनः-सङ्कल्पनिमित्तव्रतभङ्गविशुद्ध्यर्थं प्रायश्चित्तं प्रतिपन्नवान्। श्राविकायाः पारिणामिकी बुद्धिः ८॥

'अमच्चे' त्ति वरधनुपितुरमात्यस्य ब्रह्मदत्तकुमारविनिर्गमनाय यत् सुरङ्गाखननं सा पारिणामिकी बुद्धिः ९॥६९॥

'खमए' त्ति क्षपकस्य कोपवशेन मृत्वा सर्पत्वेनोत्पन्नस्य ततोऽपि मृत्वा जातराजपुत्रस्य प्रव्रज्याप्रतिपत्तौ चतुरः क्षपकान् पर्युपासीनस्य यद् भोजनवेलायां तैः क्षपकैः पात्रे निष्ठ्यूतनिक्षेपेऽपि क्षमाकरणमात्मनिन्दनं क्षपकगुणप्रशंसा सा पारिणामिकी बुद्धिः १०॥

'अमच्चपुत्ते' त्ति अमात्यपुत्रस्य **वरधनु**नाम्नो **ब्रह्मदत्त**कुमारविषये **दीर्घपृष्ठ**-स्वरूपज्ञापनादिषु तेषु तेषु प्रयोजनेषु पारिणामिकी बुद्धिः ११॥

'चाणक्के' त्ति चाणक्यस्य चन्द्रगुप्ते राज्यमनुशासति भाण्डागारे निष्ठिते सति यदेकदिवसजाताश्वादियाचनं सा पारिणामिकी बुद्धिः १२॥

'थूलभद्दे' त्ति **स्थूलभद्रस्वामिनः** पितरि मारिते **नन्दे**नाऽमात्यपदपरिपालनाय प्रार्थ्यमानस्यापि यत् प्रव्रज्याप्रतिपत्तिकरणं सा पारिणामिकी बुद्धिः १३॥

'नासिक्कसुंदरीनंद' त्ति **नासिक्यपुरे सुन्दरीभर्तुर्नन्दस्य** भ्रात्रा साधुना यद् **मेरु**शिरसि नयनं यच्च देवमिथुनकं दर्शितं सा पारिणामिकी बुद्धिः १४॥७०॥

'वइर' त्ति **वज्रस्वामि**नो बालभावेऽपि वर्त्तमानस्य मातरमवगणय्य सङ्घ-बहुमानकरणं सा पारिणामिकी बुद्धिः १५॥

'**चलणाहण**'[१] त्ति कोऽपि राजा तरुणैर्व्युद्ग्राह्यते, यथा-देव ! तरुणा एव पार्श्वे ध्रियन्ताम्, किं स्थविरैः वलि-पलितविशोभितशरीरैः ?। ततो राजा तान् प्रति परीक्षानिमित्तं ब्रूते-यो मां शिरसि पादेन ताडयति तस्य को दण्डः ? इति। ते प्राहुः-तिलमात्राणि खण्डानि स विकृत्य मार्यते इति। ततः स्थविरान् पप्रच्छ-तेऽवोचन्-देव ! परिभाव्य कथयामः। ततस्तैरेकान्ते गत्वा चिन्तितम्-को नाम हृदयवल्लभां देवीमतिरिच्यान्यो देवं शिरसि ताडयितुमीष्टे ? हृदयवल्लभा च देवी विशेषतः सम्माननीयेति। ततस्ते समागत्य राजानं विज्ञपयामासुः-देव ! स विशेषतः सत्कारणीय इति। ततो राजा परितोषमुपागतस्तान् प्रशंसितवान्-को नाम वृद्धान् विहायान्य एवंविधबुद्धिभाग् भवति ?। ततः सदैव स्थविरान् पार्श्वे धारयामास, न तरुणानिति। राज्ञः स्थविराणां च पारिणामिकी बुद्धिः १६॥

'**आमंडे**' त्ति कृत्रिममामलकमतिकठिनत्वादकालत्वाच्च केनापि यथावस्थितं ज्ञातं तस्य पारिणामिकी बुद्धिः १७॥

'**मणि**' त्ति कोऽपि सर्पो वृक्षमारुह्य सदैव पक्षिणामण्डानि भक्षयति। अन्यदा च स वृक्षस्थितो निपातितः, मणिश्च तस्य तत्रैव क्वचित् प्रदेशे स्थितः। तस्य च वृक्षस्याधस्तात् कूपोऽस्ति, उपरिस्थितमणिप्रभाविच्छुरितं च सकलमपि कूपोदकं रक्तीभूतमुपलक्ष्यते, कूपादाकृष्टं च स्वाभाविकं दृश्यते। एतच्च बालकेन केनापि निजपितुः स्थविरस्य निवेदितम्। सोऽपि तत्र समागत्य सम्यक् परिभाव्य मणिं गृहीतवान्। तस्य पारिणामिकी बुद्धिः १८॥

'**सप्पे**' त्ति सर्पस्य चण्डकौशिकस्य भगवन्तं प्रति या चिन्ताऽभूत्- 'ईदृगयं महात्मा' इत्यादिका सा पारिणामिकी बुद्धिः १९॥

'**खग्ग**' त्ति कोऽपि श्रावकः प्रथमयौवनमदमोहितमना धर्ममकृत्वा पञ्चत्वमुपगतः खड्गः समुत्पन्नः। यस्य गच्छतो द्वयोरपि पार्श्वयोश्चर्माणि लम्बन्ते स जीवविशेषः खड्गः। स चाटव्यां चतुष्पथे जनं मारयित्वा खादति। अन्यदा च तेन पथा गच्छतः[२] साधून् दृष्टवान्, स चाऽऽक्रमितुं न शक्नोति। ततस्तस्य जातिस्मरणं भक्तप्रत्याख्यानं

---

१. **चलणाहए त्ति** पा० देमू० विना ॥ २. गच्छन् साधून् पा० विना।

देवलोकगमनम्। तस्य पारिणामिकी बुद्धिः २०॥

'**थूभ**'त्ति **विशालायां** पुरि **कूलवालकेन विशाला**भङ्गाय यद् **मुनिसुव्रतस्वामि**-पादुकास्तूपोत्खातनं सा तस्य पारिणामिकी बुद्धिः २१॥

[**इंद** त्ति **नन्द**राज्यविजिगीषोस्त्रिदण्डिवेषधारिणश्चाणक्यस्य **पर्वतक**राजेन सह एकत्र नगरे गमनम्, नगरं न पतति, चाणक्यः पुरान्तर्भ्रमन् वस्तूनि निरीक्षते, इन्द्रकुमारिकाः दृष्टाः, तासां प्रभावेण न पततीति निश्चित्य ता माययाऽपसारिताः, पतितं नगरम्, एषा चाणक्यस्य पारिणामिकी बुद्धिः २२॥] पारिणामिक्या बुद्धेरेवमादीन्युदाहरणानि॥४॥७१॥ '**सेत्तं**' इत्यादि, तदेतदश्रुतनिश्रितम्॥

[सू० ४८] से किं तं सुयणिस्सियं मतिणाणं ? सुयणिस्सियं मतिणाणं चउव्विहं पण्णत्तं, तंजहा– उग्गहे १, ईहा २, अवाए ३, धारणा ४।

'**से किं तं**' इत्यादि। अथ किं तत् श्रुतनिश्रितं मतिज्ञानम् ?। गुरुराह-श्रुतनिश्रितं मतिज्ञानं चतुर्विधं प्रज्ञप्तम्, तद्यथा– अवग्रह ईहा अपायो धारणा च। तत्र अवग्रहणमवग्रहः, अनिर्देश्यसामान्यमात्ररूपार्थग्रहणमित्यर्थः। यदाह **चूर्णिकृत्**– **सामन्नस्स रूवादिविसेसणरहियस्स अनिद्देसस्स अवग्गहणमवग्गह [नन्दीचू० सू० ४७ पृ० ३४]** इति। तथा ईहनमीहा, सद्भूतार्थपर्यालोचनरूपा चेष्टा इत्यर्थः। किमुक्तं भवति ?- अवग्रहादुत्तरकालमवायात् पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेष-परित्यागाभिमुखः 'प्रायोऽत्र मधुरत्वादयः शङ्खादिशब्दधर्मा दृश्यन्ते, न खर-कर्कश-निष्ठुरतादयः शार्ङ्गादिशब्दधर्माः' इत्येवंरूपो मतिविशेष ईहा। आह च **भाष्यकृत्**– **भूया-ऽभूयविसेसादाणच्चायाभिमुहमीहा [विशेषा० १८४]** । तथा तस्यैवावगृहीतस्येहितस्यार्थस्य निर्णयरूपोऽध्यवसायोऽवायः, 'शाङ्ख एवायम्, शार्ङ्ग एवायम्' इत्यादिरूपोऽवधारणात्मकः प्रत्ययोऽवाय इत्यर्थः। तस्यैवार्थस्य निर्णीतस्य धारणं धारणा। सा च त्रिधा-अविच्युतिः १, वासना २, स्मृतिश्च ३। तत्र तदुपयोगादविच्यवनमविच्युतिः, सा चान्तर्मुहूर्त्तप्रमाणा १। ततस्तयाऽऽहितो यः संस्कारः सा वासना, सा च सङ्ख्येयमसङ्ख्येयं वा कालं यावद् भवति २। ततः कालान्तरे

कुतश्चित् तादृशार्थदर्शनादिकात् कारणात् संस्कारस्य प्रबोधे यद् ज्ञानमुदयते 'तदेवेदं यद् मया प्रागुपलब्धम्' इत्यादिरूपं सा स्मृतिः। उक्तं च–

तदनंतरं तदत्थाविच्चवणं जो उ वासणाजोगो।
कालंतरेण जं पुण, अणुसरणं धारणा सा उ॥१॥ [ ]

एताश्चाविच्युति-वासना-स्मृतयो धारणालक्षणसामान्यान्वर्थयोगाद् धारणा-शब्दवाच्याः॥

[सू० ४९] से किं तं उग्गहे ? उग्गहे दुविहे पण्णत्ते, तंजहा– अत्थोग्गहे य वंजणोग्गहे य।

से किं तं इत्यादि। अथ कोऽयमवग्रहः ?। सूरिराह-अवग्रहो द्विविधः प्रज्ञप्तः, तद्यथा-अर्थावग्रहश्च व्यञ्जनावग्रहश्च। तत्र अर्यते इति अर्थः, अर्थस्यावग्रहणं अर्थावग्रहः, सकलरूपादिविशेषनिरपेक्षानिर्देश्यसामान्यमात्ररूपार्थग्रहणमेकसामयिक-मित्यर्थः। तथा व्यज्यते अनेनार्थः प्रदीपेनेव घट इति व्यञ्जनम्। तच्चोपकरणेन्द्रियस्य श्रोत्रादेः शब्दादिपरिणतद्रव्याणां च परस्परं सम्बन्धः, सम्बन्धे हि सति सोऽर्थः शब्दादिरूपः श्रोत्रादीन्द्रियेण व्यञ्जितुं शक्यते, नान्यथा, ततः सम्बन्धो व्यञ्जनम्। तथा चाह **भाष्यकृत्**–

वंजिज्जइ जेणऽत्थो, घडो व्व दीवेण वंजणं तं च।
उवगरणिंदिय-सद्दाइपरिणयद्दव्वसंबंधो॥१॥ [विशे* ० १९४]

व्यञ्जनेन-सम्बन्धेनावग्रहणं सम्बध्यमानस्य शब्दादिरूपस्यार्थस्याव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः। अथवा व्यज्यन्ते इति व्यञ्जनानि, **कृद् बहुलं** [*मलय० कृ० १।१२] इति वचनात् कर्मण्यनट्, व्यञ्जनानां-शब्दादिरूपतया परिणतानां द्रव्याणामुपकरणेन्द्रियसम्प्राप्तानामवग्रहः-अव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः। अथवा व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनम्– उपकरणेन्द्रियम्, तेन स्वसम्बद्धस्यार्थस्य शब्दादेरवग्रहणम्– अव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः। इयमत्र भावना-उपकरणेन्द्रिय-शब्दादिपरिणतद्रव्यसम्बन्धे प्रथमसमयादारभ्यार्थावग्रहात् प्राग् या सुप्त-मत्त-मूर्च्छितादिपुरुषाणामिव शब्दादिद्रव्यसम्बन्धमात्रविषया काचिदव्यक्ता ज्ञानमात्रा

सा व्यञ्जनावग्रहः, स चान्तर्मुहूर्त्तप्रमाणः।

अत्राऽऽह– ननु व्यञ्जनावग्रहवेलायां न किमपि संवेदनं संवेद्यते तत् कथमसौ ज्ञानरूपो गीयते ?, उच्यते, अव्यक्तत्वान्न संवेद्यते ततो न कश्चिद्दोषः; तथाहि यदि प्रथमसमयेऽपि शब्दादिपरिणतद्रव्यैरुपकरणेन्द्रियस्य सम्पृक्तौ काचिदपि न ज्ञानमात्रा भवेत् ततो द्वितीयेऽपि समये न भवेत्, विशेषाभावात्, एवं यावच्चरमसमयेऽपि, अथ च चरमसमये ज्ञानमर्थावग्रहरूपं जायमानमुपलभ्यते, ततः प्रागपि कापि कियती ज्ञानमात्रा द्रष्टव्या।

अथ मन्येथाः-मा भूत् प्रथमसमयादिषु शब्दादिपरिणतद्रव्यसम्बन्धेऽपि काचिदपि ज्ञानमात्रा, शब्दादिपरिणतद्रव्याणां तेषु समयेषु स्तोकत्वात्, चरमसमये तु भविष्यति, शब्दादिपरिणतद्रव्यसमूहस्य तदानीं भूयसो भावात्, तदयुक्तम्, यतो यदि प्रथमसमयादिषु शब्दादिद्रव्याणां स्तोकत्वात् सम्पृक्तावव्यक्ताऽपि काचिदपि ज्ञानमात्रा न समुल्लसेत् तर्हि प्रभूतसमुदायसम्पर्केऽपि न भवेत्, न खलु सिकताकणेषु प्रत्येकमसति तैललेशे समुदायेऽपि तैलमुद्भवदुपलभ्यते, अस्ति च चरमसमये प्रभूतशब्दादि-द्रव्यसम्पृक्तौ ज्ञानम्, ततः प्राक्तनेष्वपि समयेषु स्तोक-स्तोकतरैरपि शब्दादिपरिणतद्रव्यैः सम्बन्धे काचिदव्यक्ता ज्ञानमात्राऽभ्युपगन्तव्या, अन्यथा चरमसमयेऽपि ज्ञानानुपपत्तेः। तथा चोक्तम्–

जं सव्वहा न वीसुं, सव्वेसु वि तं न रेणुतेल्लं व।
पत्तेयमणिच्छंतो, कहमिच्छसि समुदये नाणं ?॥१॥ [**विशे॰ २०१**]

ततः स्थितमेतत्– व्यञ्जनावग्रहो ज्ञानरूपः, केवलं तद् ज्ञानमव्यक्तमवबोद्धव्यम्। चशब्दौ स्वगतानेकभेदसूचकौ, ते च स्वगता अनेकभेदा अग्रे स्वयमेव सूत्रकृता वर्णयिष्यन्ते।

आह– प्रथमं व्यञ्जनावग्रहो भवति ततोऽर्थावग्रहः ततः कस्मादिह प्रथममर्थावग्रह उपन्यस्तः ?, उच्यते, स्पष्टतयोपलभ्यमानत्वात्; तथाहि-अर्थावग्रहः स्पष्टरूपतया सर्वैरपि जन्तुभिः संवेद्यते, शीघ्रतरगमनादौ सकृत् सत्वरमुपलम्भे 'मया किञ्चिद् दृष्टम्, परं न परिभावितं सम्यग्' इति व्यवहारदर्शनात्; अपि च-अर्थावग्रहः सर्वेन्द्रिय-

मनोभावी व्यञ्जनावग्रहस्तु नेति प्रथममर्थावग्रह उक्तः॥

सम्प्रति तु व्यञ्जनावग्रहादूर्द्ध्वमर्थावग्रह इति क्रममाश्रित्य प्रथमं व्यञ्जनावग्रहस्वरूपं प्रतिपिपादयिषुः शिष्यं प्रश्नं कारयति–

[सू० ५०] से किं तं वंजणोग्गहे ?, वंजणोग्गहे चउव्विहे पण्णत्ते, तंजहा– सोतिंदियवंजणोग्गहे १, घाणेंदियवंजणोग्गहे २, जिब्भिंदियवंजणोग्गहे ३, फासेंदियवंजणोग्गहे ४, सेत्तं वंजणोग्गहे।

'से किं तं' इत्यादि। अथ कोऽयं व्यञ्जनावग्रहः ?। आचार्य आह– व्यञ्जनावग्रहश्चतुर्विधः प्रज्ञप्तः, तद्यथा– **श्रोत्रेन्द्रियव्यञ्जनावग्रह** इत्यादि। अत्राह– सत्सु पञ्चस्विन्द्रियेषु षष्ठे च मनसि कस्मादयं चतुर्विधो व्यावर्ण्यते ?, उच्यते, इह व्यञ्जनमुपकरणेन्द्रियस्य शब्दादिद्रव्याणां च परस्परं सम्बन्ध उच्यते, सम्बन्धश्चतुर्णामेव श्रोत्रेन्द्रियादीनाम्। न नयन-मनसोः, तयोरप्राप्यकारित्वात्। आह– कथमप्राप्यकारित्वं तयोरवसीयते ?, उच्यते, विषयकृतानुग्रहोपघाताभावात्। तथाहि–

यदि प्राप्तमर्थं चक्षुर्मनो वा गृह्णीयात् तर्हि यथा स्पर्शनेन्द्रियं स्रक्-चन्दनादिकम् अङ्गारादिकं च प्राप्तमर्थं परिच्छिन्दत् तत्कृतानुग्रहोपघातभाग् भवति तथा चक्षुर्मनसी अपि भवेताम्, विशेषाभावात्, न च भवतः, तस्मादप्राप्यकारिणी ते। ननु दृश्येते एव चक्षुषो विषयकृतावनुग्रहोपघातौ, तथाहि– घनपटलविनिर्मुक्ते नभसि सर्वतो निबिडजरठिमोपेतं करप्रसरमभिसर्पयन्तमंशुमालिनमनवरतमवलोकमानस्य भवति चक्षुषो विघातः, शशाङ्ककरकदम्बकं यदि वा तरङ्गमालोपशोभितं जलं तरुमण्डलं च शाड्वलं निरन्तरं निरीक्षमाणस्य चानुग्रहः, तदेतदपरिभावितभाषितम्, यतो न ब्रूमः-सर्वथा विषयकृतावनुग्रहोपघातौ न भवतः, किन्त्वेतावदेव वदामः-यदा विषयं विषयतया चक्षुरवलम्बते तदा तत्कृतावनुग्रहोपघातौ तस्य न भवत इति तदप्राप्यकारि, शेषकालं तु प्राप्तेनोपघातकेनोपघातो भविष्यति अनुग्राहकेण चानुग्रहः, तत्रांशुमालिनो रश्मयः सर्वत्रापि प्रसरमुपाददाना यदांऽशुमालिनः सम्मुखमीक्ष्यते तदा ते चक्षुर्देशमपि प्राप्नुवन्ति, ततश्चक्षुःसम्प्राप्तास्ते स्पर्शनेन्द्रियमिव चक्षुरुपघ्नन्ति; शीतांशुरश्मयश्च स्वभावत एव

१. प्राप्तेनोपघातो भवि° खं० पा० जेमू० ॥

शीतलत्वादनुग्राहकास्ततस्ते चक्षुः सम्प्राप्ताः[१] सन्तस्तत् स्पर्शनेन्द्रियमिव चक्षुरनुगृह्णन्ति; तरङ्गमालासङ्कुलजलावलोकने च जलकणसम्पृक्तसमीरावयवसंस्पर्शतोऽनुग्रहो भवति, शाड्वलतरुमण्डलावलोकनेऽपि शाड्वलतरुच्छायासम्पर्कशीतीभूतसमीरसंस्पर्शात्; शेषकालं तु जलाद्यवलोकनेऽनुग्रहाभिमान उपघाताभावादवसेयः, भवति चोपघाताभावेऽनुग्रहाभिमानः यथाऽतिसूक्ष्माक्षरनिरीक्षणाद् विनिवृत्त्य यथासुखं नीलीरक्तवस्त्राद्यवलोकने। इत्थं चैतदङ्गीकर्त्तव्यम्, अन्यथा समाने सम्पर्के यथा सूर्यमीक्षमाणस्य सूर्येणोपघातो भवति तथा हुतवह-जल-शूलाद्यालोकने दाह-क्लेद-पाटनादयोऽपि कस्मान्न भवन्ति ?। अपि च यदि चक्षुः प्राप्यकारि तर्हि स्वदेशगतरजो-मला-ऽञ्जनशलाकादिकं किं न पश्यति ?, तस्मादप्राप्यकार्येव चक्षुः।

ननु यदि चक्षुरप्राप्यकारि तर्हि मनोवत् कस्मादविशेषेण सर्वानपि दूर-व्यवहितादीनर्थान् न गृह्णाति ?, यदि हि प्राप्तं परिच्छिन्द्यात् तर्हि यदेवानावृतमदूरदेशं वा तदेव गृह्णीयाद् नावृतं दूरदेशं वा, तत्र चक्षूरश्मीनां गमनासम्भवः सम्पर्कासम्भवात्, ततो युज्येते चक्षुषो ग्रहणा-ऽग्रहणे, नान्यथा। तथा चोक्तम्– **प्राप्यकारि चक्षुः, उपलब्ध्यनुपलब्ध्योरनावरणेतरापेक्षणात् दूरेतरापेक्षणाच्च, यदि हि चक्षुरप्राप्यकारि भवेत् तदाऽऽवरणभावादनुपलब्धिः अन्यथोपलब्धिरिति न स्यात्, न हि तदावरणमुपघात-करणसमर्थम्, प्राप्यकारित्वे तु मूर्त्तद्रव्यप्रतिघातादुपपत्तिमान् व्याघातः, अतिदूरे च गमनाभावादिति। प्रयोगश्चात्र-न चक्षुषो विषयपरिमाणम्, अप्राप्यकारित्वात्, मनोवत्** [ ], तदेतदयुक्ततरम्, दृष्टान्तस्य साध्यविकलत्वात्, न खलु मनोऽप्यशेषान् विषयान् गृह्णाति, तस्यापि सूक्ष्मेष्वागमगम्यादिष्वर्थेषु मोहदर्शनात्, तस्माद् यथा मनोऽप्राप्य-कार्यपि स्वावरणक्षयोपशमसापेक्षत्वाद् नियतविषयं तथा चक्षुरपि स्वावरणक्षयोपशम-सापेक्षत्वादप्राप्यकार्यपि योग्यदेशावस्थितनियतविषयमिति न व्यवहितानामुपलम्भप्रसङ्गो नापि दूरदेशस्थितानामिति। अपि च दृष्टमप्राप्यकारित्वेऽपि तथास्वभावविशेषाद् योग्यदेशापेक्षणम्, यथाऽयस्कान्तस्य, न खल्वयस्कान्तोऽयसोऽप्राप्याकर्षणे प्रवर्त्तमानः सर्वस्याप्ययसो जगद्वर्त्तिन आकर्षको भवति, किन्तु प्रतिनियतस्यैव।

---

१. **सन्तस्तं स्प°** खं०। **सन्तस्ततः स्प°** जेसं१, जे२। **सन्तस्ते स्प°** पा० ॥

शङ्करस्वामी प्राह– **अयस्कान्तोऽपि प्राप्यकारी, अयस्कान्तच्छायाणुभिः सह समाकृष्यमाणवस्तुनः सम्बन्धभावात्, केवलं ते छायाणवः सूक्ष्मत्वान्नोपलभ्यन्ते** [ ] इति, तदेतदुन्मत्तप्रलपितम्, तद्ग्राहकप्रमाणाभावात्, न हि तत्र छायाणुसम्भवग्राहकं प्रमाणमस्ति, न चाप्रमाणकं प्रतिपत्तुं शक्नुमः। अथास्ति तद्ग्राहकं प्रमाणमनुमानम्- इह यदाकर्षणं तत् संसर्गपूर्वकम्, यथाऽयोगोलकस्य सन्दंशेन, आकर्षणं चायसोऽयस्कान्तेन, तत्र साक्षादयस्कान्ते संसर्गः प्रत्यक्षबाधित इत्यर्थात् छायाणुभिः सह द्रष्टव्य इति, तदपि बालिशजल्पितम्, हेतोरनैकान्तिकत्वात्, मन्त्रेण व्यभिचारात्, तथाहि– मन्त्रः स्मर्यमाणोऽपि विवक्षितं वस्त्वाकर्षति, न च तत्र कोऽपि संसर्ग इति, अपि च– यथा छायाणवः प्राप्तमयः समाकर्षन्ति तथा काष्ठादिकमपि प्राप्तं कस्मान्नाकर्षन्ति ?, शक्तिप्रतिनियमादिति चेत्, ननु स शक्तिप्रतिनियमोऽप्राप्तावपि तुल्य एवेति व्यर्थं छायाणुपरिकल्पनम्।

अन्यस्त्वाह– अस्ति चक्षुषः प्राप्यकारित्वे व्यवहितार्थानुपलब्धेरनुमानं प्रमाणम्, तदयुक्तम्, अत्रापि हेतोरनैकान्तिकत्वात्, काचा-ऽभ्रपटल-स्फटिकैरन्तरितस्याप्युपलब्धेः। अथेदमाचक्षीथाः-नायना रश्मयो निर्गत्य तमर्थं गृह्णन्ति, नायनाश्च रश्मयस्तैजसत्वान्न तेजोद्रव्यैः प्रतिस्खल्यन्ते ततो न कश्चिद्दोषः, तदपि न मनोरमम्, महाज्वालादौ स्खलनोपलब्धेः, तस्मादप्राप्यकारि चक्षुरिति स्थितम्॥

एवं मनसोऽप्यप्राप्यकारित्वं भावनीयम्, तत्रापि विषयकृतानुग्रहोपघाताभावात्; अन्यथा तोयादिचिन्तायामनुग्रहोऽग्नि-शस्त्रादिचिन्तायां चोपघातो भवेत्। ननु दृश्यते मनसोऽपि हर्षादिभिरनुग्रहः, शरीरोपचयदर्शनात्, तथाहि-हर्षप्रकर्षवशान्मनसोऽतिपुष्टता भवति, तद्वशाच्च शरीरस्योपचयः; तथोपघातोऽपि शोकादिभिर्दृश्यते, शरीरदौर्बल्योरःक्षतादिदर्शनात्; अतिशोककरणतो हि मनसो विघातः सम्भवति, ततस्तद्वशाच्छरीरस्य दौर्बल्यमतिचिन्तावशाच्च हृद्रोग इति; तदेतदतीवासम्बद्धम्, यत इह मनसोऽप्राप्यकारित्वं साध्यमानं वर्त्तते, विषयकृतानुग्रहोपघाताभावात्, न चेह विषयकृतावनुग्रहोपघातौ त्वया मनसो दर्श्येते, तत् कथं व्यभिचारः ?, मनस्तु स्वयं

पुद्गलमयत्वाच्छरीरस्यानुग्रहोपघातौ करिष्यति, यथेष्टा-ऽनिष्टरूप आहारः, तथाहि-इष्टरूप आहारः परिभुज्यमानः शरीरस्य पोषमाधत्ते, अनिष्टरूपस्तूपघातम्, तथा मनोऽप्यनिष्टपुद्गलोपचितमतिशोकादिचिन्तानिबन्धनं शरीरस्य हानिमादधाति, इष्टपुद्गलोपचितं च हर्षादिकारणं पुष्टिम्। उक्तं च–

इट्ठाणिट्ठाहारऽब्भवहारे होंति पुट्ठि-हाणीओ।
जह तह मणसो ताओ, पुग्गलगुणउ त्ति को दोसो ?॥१॥ [विशेषा० २२१]

तस्माद् मनोऽपि विषयकृतानुग्रहोपघाताभावादप्राप्यकारीति स्थितम्॥

इह **सुगतमतानुसारिणः** श्रोत्रमप्यप्राप्यकारि प्रपद्यन्ते, तथा च **तद्ग्रन्थः- चक्षुः श्रोत्रं मनोऽप्राप्यकारि [ ]** इति, तदयुक्तम्, इहाऽप्राप्यकारि तत् प्रतिपत्तुं शक्यते यस्य विषयकृतानुग्रहोपघाताभावः, यथा चक्षुर्मनसी, श्रोत्रस्य च शब्दकृत उपघातो दृश्यते, सद्योजातबालकस्य समीपे महाप्रयत्नताडितझल्लरीझात्कारश्रवणतो यद्वा विद्युत्प्रपाते तत्प्रत्यासन्नदेशवर्त्तिनां निर्घोषश्रवणतो बधिरीभावदर्शनात्; शब्दपरमाणवो हि उत्पत्तिदेशादारभ्य सर्वतो जलतरङ्गन्यायेन प्रसरमभिगृह्णानाः श्रोत्रेन्द्रियदेशमागच्छन्ति, ततः सम्भवत्युपघातः।

ननु यदि श्रोत्रेन्द्रियं प्राप्तमेव शब्दं गृह्णाति नाप्राप्तं तर्हि यथा गन्धादौ गृह्यमाणे न तत्र दूरा-ऽऽसन्नादितया भेदप्रतीतिरेवं शब्देऽपि न स्यात्, प्राप्तो हि विषयः परिच्छिद्यमानः सर्वोऽपि सन्निहित एव, तत् कथं तत्र दूरा-ऽऽसन्नादिभेद-प्रतीतिर्भवितुमर्हति ?, अथ च प्रतीयते शब्दो दूरा-ऽऽसन्नादितया, तथा च लोके वक्तारः-श्रूयते कस्यापि दूरे शब्द इति।

अन्यच्च, यदि प्राप्तः शब्दो गृह्यते श्रोत्रेन्द्रियेण तर्हि चाण्डालोक्तोऽपि शब्दः श्रोत्रियेण श्रोत्रेन्द्रियसंस्पृष्टो गृह्यते इति श्रोत्रेन्द्रियस्य (श्रोत्रियस्य) चाण्डालस्पर्श-दोषप्रसङ्गः, तन्न श्रेयः श्रोत्रेन्द्रियस्य प्राप्यकारित्वम्, तदेतदतिमहामोहमलीमसभाषितम्, यतो यद्यपि शब्दः प्राप्तो गृह्यते श्रोत्रेन्द्रियेण तथापि यत उत्थितः शब्दस्तस्य दूरा-ऽऽसन्नत्वे शब्देऽपि स्वभाववैचित्र्यसम्भवाद् दूरा-ऽऽसन्नादिभेदप्रतीतिर्भवति, तथाहि-दूरादागतः शब्दः क्षीणशक्तिकत्वात् स्विन्न उपलक्ष्यते अस्पष्टरूपो वा, ततो लोको

वदति-दूरे शब्दः श्रूयते, अस्य च वाक्यस्यायं भावार्थः-दूरादागतः शब्दः श्रूयते इति।

स्यादेतत्— एवमतिप्रसङ्गः प्राप्नोति, तथाहि-एतदपि वक्तुं शक्यते-दूरे रूपमुपलभ्यते, किमुक्तं भवति ?-दूरादागतं रूपमुपलभ्यते इति, ततश्चक्षुरपि प्राप्यकारि प्राप्नोति, न चेष्यते, तस्मान्नैतत् समीचीनमिति, तदयुक्तम्, यत इह चक्षुषो रूपकृतावनुग्रहोपघातौ नोपलभ्येते, श्रोत्रेन्द्रियस्य तु शब्दकृत उपघातोऽस्ति, एतच्च प्रागेवोक्तम्, ततो नातिप्रसङ्गापादनमुपपत्तिमत्।

अन्यच्च, प्रत्यासन्नोऽपि जनः पवनस्य प्रतिकूलमवतिष्ठमानः शब्दं न शृणोति, पवनवर्त्मनि तु वर्त्तमानो दूरदेशस्थितोऽपि शृणोति, तथा च लोके वक्तारः-न वयं प्रत्यासन्ना अपि त्वदीयं वचः शृणुमः, पवनस्य प्रतिकूलमवस्थानात्, यदि पुनरप्राप्तमेव शब्दं रूपमिव जनाः प्रमिणुयुः तर्हि वातस्य प्रतिकूलमप्यवतिष्ठमाना रूपमिव शब्दं यथावस्थितं प्रत्यासन्नाः प्रमिणुयुः, न च प्रमिण्वन्ति, तस्मात् प्राप्ता एव शब्दपरमाणवः श्रोत्रेन्द्रियेण परिगृह्यन्ते इति अवश्यमभ्युपगन्तव्यम्, तथा च सति पवनस्य प्रतिकूलमवतिष्ठमानानां श्रोत्रेन्द्रियं न शब्दपरमाणवो वैपुल्येन प्राप्नुवन्ति, तेषामन्यथा वातेन नीयमानत्वात्, ततो न ते शृण्वन्तीति न काचित् क्षतिः[१]।

यदपि चोक्तम्— 'चाण्डालस्पर्शदोषः[२] प्राप्नोति' इति, तदपि चेतनाविकलपुरुष-भाषितमिवासमीचीनम्, **स्पर्शा-ऽस्पर्शव्यवस्थाया लोके काल्पनिकत्वात्**। तथाहि— न स्पर्शा-ऽस्पर्शव्यवस्था[३] लोके पारमार्थिकी। तथाहि-यामेव भुवमग्रे चाण्डालः स्पृशन् प्रयाति तामेव पृष्ठतः श्रोत्रियोऽपि, तथा यामेव नावमारोहति स्म चाण्डालस्तामेवारोहति श्रोत्रियोऽपि, तथा स एव मारुतश्चाण्डालमपि स्पृष्ट्वा श्रोत्रियमपि स्पृशति, न च तत्र लोके स्पर्शदोषव्यवस्था, तथा शब्दपुद्गलसंस्पर्शोऽपि न भवतीति न कश्चिद् दोषः, अपि च— यदा केतकीदलनिचयं शतपत्रादिपुष्पनिचयं वा शिरसि निबध्य वपुषि वा मृगमद-चन्दनाद्यवलेपनमारचय्य विपणिवीथ्यामागत्य चाण्डालो-ऽवतिष्ठते तदा तद्गतकेतकीदलादिगन्धपुद्गलाः श्रोत्रियादिनासिकास्वपि प्रविशन्ति, ततस्तत्रापि चाण्डालस्पर्शदोषः प्राप्नोतीति तद्दोषभयान्नासिकेन्द्रियमप्राप्यकारि

---

१. **क्षितिः** जे१ खं० विना॥ २. पृ० २७१ पं० २१॥ ३. **स्पर्शस्य व्यवस्था** खं० विना ॥

प्रतिपत्तव्यम्, न चैतद् भवतोऽप्यागमे प्रतिपाद्यते, ततो बालिशजल्पितमेतदिति कृतं प्रसङ्गेन।

केचित् पुनः श्रोत्रेन्द्रियस्य प्राप्यकारित्वमभ्युपगच्छन्तः शब्दस्याम्बरगुणत्वं प्रतिपद्यन्ते, तदयुक्तम्, आकाशगुणतायां शब्दस्यामूर्त्तत्वप्रसक्तेः, यो हि यद्गुणः स तत्समानधर्मा, यथा ज्ञानमात्मनः, तथाहि-अमूर्त्त आत्मा, ततस्तद्गुणो ज्ञानमप्यमूर्त्तमेव, एवं शब्दोऽपि यद्याकाशगुणस्तर्ह्याकाशस्यामूर्त्तत्वाच्छब्दस्यापि तद्गुणत्वेनामूर्त्तता भवेत्, न चासौ युक्तिसङ्गता, तल्लक्षणायोगात्, मूर्त्तिविरहो ह्यमूर्त्तताया लक्षणम्, न च शब्दानां मूर्त्तिविरहः, स्पर्शवत्त्वात्, तथाहि– स्पर्शवन्तः शब्दाः, तत्सम्पर्कत उपघातदर्शनात्, लोष्टवत्, न चायमसिद्धो हेतुः, यतो दृश्यते सद्योजातबालकानां कर्णदेशाभ्यर्णीकृत-गाढास्फालितझल्लरीझात्कारश्रवणतः श्रवणस्फोटः, न चेत्थमुपघातकृत्त्वमस्पर्शवत्त्वे सम्भवति, यथा विहायसः, ततो विपक्षे गमनासम्भवान्नानैकान्तिकोऽपि, अतश्च स्पर्शवन्तः शब्दाः, तैरभिघाते गिरिगह्वर-भित्त्यादिषु शब्दोत्थानात्, लोष्टवत्, अयमपि हेतुरुभयोरपि सिद्धः, तथाहि– श्रूयन्ते तीव्रप्रयत्नोच्चारितशब्दाभिघाते गिरिगह्वरादिषु प्रतिशब्दाः प्रतिदिक्, ततः स्पर्शवत्त्वान्मूर्त्ता एव शब्दाः, **रूप-स्पर्शादिसन्निवेशो मूर्त्तिः** [ ] इति वचनप्रामाण्यात्, ततः कथमिवाऽऽकाशगुणत्वं शब्दानामुपपत्तिमत् ?।

अपि च-तदाकाशमेकम् ? अनेकं वा ?। यद्येकं तर्हि योजनलक्षादपि श्रूयेत, आकाशस्यैकत्वेन शब्दस्य च तद्गुणतया दूरा-ऽऽसन्नादिभेदाभावात्। अथानेकम्, एवं सति वदनदेश एव स विद्यते इति कथं भिन्नदेशवर्त्तिभिः श्रोतृभिः श्रूयते ?, वदनदेशाकाशगुणतया तस्य श्रोतृगतश्रोत्रेन्द्रियाकाशसम्बन्धाभावात्, अथ च श्रोत्रेन्द्रियाकाशसम्बद्धतया तच्छ्रवणमभ्युपगम्यते, तन्नाकाशगुणत्वाभ्युपगमः श्रेयान्। नन्वाकाशगुणत्वमन्तरेण शब्दस्यावस्थानमेव नोपपद्यते, अवश्यं हि पदार्थेन स्थितिमता भवितव्यम्, तत्र रूप-रस-स्पर्श-गन्धानां पृथिव्यादिमहाभूतचतुष्टयमाश्रयः, शब्दस्य त्वाकाशमिति, तदयुक्तम्, एवं सति पृथिव्यादीनामप्याकाशगुणत्वप्रसक्तेः, तेषामप्याकाशाश्रितत्वात्, न खल्वाकाशमन्तरेण पृथिव्यादीनामप्यन्यदाश्रयः। अगुणत्वात् पृथिव्यादीनामाकाशगुणत्वमनुपपन्नमिति चेत्, न, आकाशाश्रितत्वे भवन्नीत्या बलादपि

तद्गुणत्वप्रसक्तेः। अथ नाऽऽश्रयणमात्रं तद्गुणत्वनिबन्धनं किन्तु समवायः, स चास्ति शब्दस्याऽऽकाशे, न तु पृथिव्यादीनामिति, ननु कोऽयं समवायो नाम ?, एकत्र लोलीभावेनावस्थानम्, यथा पृथिव्यादि-रूपाद्योरिति चेत्, न तर्हि शब्दस्या-ऽऽकाशगुणत्वम्, आकाशेन सहैकलोलीभावेन तस्याप्रतिपत्तेः। अथाऽऽकाशे उपलभ्यमानत्वात् तद्गुणता शब्दस्य, तूलकादेरपि तर्ह्याकाशे उपलभ्यमानत्वात् तद्गुणत्वं प्राप्नोति। अथ तूलकादेः परमार्थतः पृथिव्यादि स्थानम् आकाशे तूपलम्भो वायुना सञ्चार्यमाणत्वात्, यद्येवं तर्हि शब्दस्यापि न परमार्थतः स्थानमाकाशम्, किन्तु श्रोत्रादि, यत् पुनराकाशेऽवस्थानमुपलभ्यते तद् वायुना सञ्चार्यमाणत्वादवसेयम्, तथाहि– यतो यतो वायुः सञ्चरति ततस्ततः शब्दोऽपि गच्छति, वातप्रतिकूलं शब्दस्याश्रवणात्। उक्तं च–

यथा च प्रेर्यते तूलमाकाशे मातरिश्वना।
तथा शब्दोऽपि किं वायोः प्रतीपं कोऽपि शब्दवित् ?॥१॥ [ ]

तन्नाकाशगुणः शब्दः, किन्तु पुद्गलमय इति स्थितम्॥

[सू० ५१ (१)] से किं तं अत्थोग्गहे ? अत्थोग्गहे छव्विहे पण्णत्ते, तंजहा– सोइंदियअत्थोग्गहे ? चक्खिंदियअत्थोग्गहे २ घाणिंदियअत्थोग्गहे ३ जिब्भिंदियअत्थोग्गहे ४ फासिंदियअत्थोग्गहे ५ णोइंदियअत्थोग्गहे ६।

(२) तस्स णं इमे एगट्ठिया णाणाघोसा णाणावंजणा पंच णामधेया भवंति, तंजहा– ओगिण्हणया १, उवधारणया २, सवणता ३, अवलंबणता ४, मेहा ५, सेत्तं उग्गहे १।

से किं तमित्यादि। अथ[१] कोऽयमर्थावग्रहः ?। सूरिराह- **अर्थावग्रहः षड्विधः प्रज्ञप्तः, तद्यथा– श्रोत्रेन्द्रियार्थावग्रह** इत्यादि। श्रोत्रेन्द्रियेण अर्थावग्रहः-व्यञ्जनावग्रहोत्तरकालमेकसामयिकमनिर्देश्यसामान्यरूपार्थावग्रहणं श्रोत्रेन्द्रियार्थावग्रहः। एवं घ्राण-जिह्वा-स्पर्शनेन्द्रियार्थावग्रहेष्वपि वाच्यम्। चक्षुर्मनसोस्तु व्यञ्जनावग्रहो न

---

१. **कतिविधोऽय°** पा० देसं० । से किं तमित्यादि। अथ कोऽयमर्थावग्रहः ?, अर्थावग्रहः षड्विधः प्रज्ञप्तः, तद्यथा- श्रोत्रेन्द्रियार्थावग्रह इत्यादि सूत्रसिद्धम्। - इति हारिभद्र्यां वृत्तौ॥

भवति, ततस्तयोः प्रथममेव स्वरूप-द्रव्य-गुण-क्रियाविकल्पनातीतमनिर्देश्यसामान्य-मात्ररूपार्थावग्रहणमर्थावग्रहोऽवसेयः। तत्र **नोइंदियअत्थावग्गहो** त्ति नोइन्द्रियं मनः, तच्च द्विधा-द्रव्यरूपं भावरूपं च। तत्र मनःपर्याप्तिनामकर्मोदयतो यद् मनः-प्रायोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमितं तद् द्रव्यरूपं मनः। तथा चाऽऽह **चूर्णिकृत्**– **मणपज्जत्तिनामकम्मोदयओ जोग्गे मणोदव्वे घेत्तुं मणत्तेण परिणामिया दव्वा दव्वमणो भण्णइ।** [नन्दीचू० सू० ५० [१] पृ० ३५] तथा द्रव्यमनोऽवष्टम्भेन जीवस्य यो मननपरिणामः स भावमनः। तथा चाऽऽह **चूर्णिकार** एव– **जीवो पुण मणणपरिणामक्रियापन्नो भावमणो, किं भणियं होइ ? मणदव्वालंबणो जीवस्स मणणवावारो भावमणो भण्णइ** [नन्दीचू० सू० ५० [१] पृ० ३५]। तत्रेह भावमनसा प्रयोजनम्, तद्ग्रहणे ह्यवश्यं द्रव्यमनसोऽपि ग्रहणं भवति, द्रव्यमनोऽन्तरेण भावमनसोऽसम्भवात्, भावमनो विनाऽपि च द्रव्यमनो भवति, यथा भवस्थकेवलिनः, तत उच्यते– भावमनसेह प्रयोजनम्। तत्र नोइन्द्रियेण-भावमनसाऽर्थावग्रहः-द्रव्येन्द्रियव्यापारनिरपेक्षो घटाद्यर्थस्वरूपपरिभावनाभिमुखः प्रथममेकसामयिको रूपाद्यूर्ध्वाकारादिविशेषचिन्ता-विकलोऽनिर्देश्यसामान्यमात्रचिन्तात्मको बोधो नोइन्द्रियार्थावग्रहः।

तस्स णमित्यादि। तस्य सामान्येनावग्रहस्य **णं** इति वाक्यालङ्कारे **अमूनि** वक्ष्यमाणानि एकार्थिकानि **नानाघोसाणि** त्ति घोषाः-उदात्तादयः स्वरविशेषाः, आह च **चूर्णिकृत्**– **घोसा उदत्तादओ सरविसेसा** [नन्दीचू० सू० ५० [२] पृ० ३५] नाना घोषां येषां तानि नानाघोषाणि, तथा **नानाव्यञ्जनानि** कादीनि येषां तानि **नानाव्यञ्जनानि, पञ्च** नामान्येव नामधेयानि भवन्ति। **तद्यथा** इति तेषामेवोपप्रदर्शने। **ओगिण्हणया** इत्यादि। यदा पुनरवग्रहविशेषानपेक्ष्य अमूनि पञ्चापि नामधेयानि चिन्त्यन्ते तदा परस्परं भिन्नार्थानि वेदितव्यानि। तथाहि– इहावग्रहस्त्रिधा, तद्यथा-व्यञ्जनावग्रहः सामान्यार्थावग्रहो विशेषसामान्यार्थावग्रहश्च। तत्र विशेषसामान्यार्थावग्रह औपचारिकः, स चानन्तरमेवाग्रे दर्शयिष्यते। तत्र **ओगिण्हणय** त्ति अवगृह्यतेऽनेनेति अवग्रहणम्, करणेऽनट्, व्यञ्जनावग्रहप्रथमसमयप्रविष्टशब्दादिपुद्गलादानपरिणामः, तद्भावोऽवग्रहणता। तथा **उवधारणय** त्ति धार्यतेऽनेनेति धारणम्, उप-सामीप्येन

धारणं-व्यञ्जनावग्रहे द्वितीयादिसमयेषु प्रतिसमयमपूर्वापूर्वप्रविशच्छब्दादिपुद्गलादान-पुरस्सरं प्राक्तनप्राक्तनसमयगृहीतशब्दादिपुद्गलधरणपरिणामः, तद्भाव **उपधारणता**। तथा **सवणय** त्ति श्रूयतेऽनेनेति **श्रवणम्** एकसामयिकः सामान्यार्थावग्रहरूपो बोधपरिणामः, तद्भावः श्रवणता। तथा **अवलंबणय** त्ति अवलम्ब्यते इति अवलम्बनम्, **कृद् बहुलम्** [*मलय० कृ० १।१२] इति वचनात् कर्मण्यनट्, विशेषसामान्यार्थावग्रहः। कथं विशेषसामान्यार्थावग्रहोऽवलम्बनम् ? इति चेत्, उच्यते– इह 'शब्दोऽयम्' इत्यपि ज्ञानं विशेषावगमरूपत्वादवायज्ञानम्, तथाहि– 'शब्दोऽयम्, न अशब्दः रूपादिः' इति शब्दस्वरूपावधारणं विशेषावगमः, ततोऽस्माद् यत् पूर्वमनिर्देश्यसामान्यमात्र-ग्रहणमेकसामयिकं स पारमार्थिकोऽर्थावग्रहः, तत ऊर्द्ध्वं तु यत् 'किमिदम् ?' इति विमर्शनं सा ईहा, तदनन्तरं तु यत् शब्दस्वरूपावधारणं 'शब्दोऽयम्' इति तदवायज्ञानम्, तत्रापि यदा उत्तरधर्मजिज्ञासा भवति– 'किमयं शब्दः शाङ्गः ? किं वा शार्ङ्गः ?' इति तदा पाश्चात्त्यं 'शब्दः' इति ज्ञानमुत्तरविशेषावगमापेक्षया सामान्यमात्रा-लम्बनमित्यवग्रह इत्युपचर्यते, स च परमार्थतः सामान्यविशेषरूपार्थालम्बन इति विशेषसामान्यार्थावग्रह इत्युच्यते। इदमेव च 'शब्दः' इति ज्ञानमालम्ब्य 'किमयं शाङ्गः ? किं वा शार्ङ्गः ?' इति ज्ञानमुदयते, ततो विशेषसामान्यार्थावग्रहोऽवलम्बन इत्युक्तः, ततोऽवलम्बनस्य भावोऽवलम्बनता, ततोऽप्यूर्द्ध्वं 'किमयं शाङ्गः ? किं वा शार्ङ्गः' इतीहित्वा यच्छाङ्ग एव शार्ङ्ग एव वेति ज्ञानं तदवायज्ञानम्, तदपि च 'किमयं शाङ्गोऽपि शब्दो मन्द्रः ? किं वा तारः ?' इत्युत्तरविशेषजिज्ञासायां सामान्यालम्बनमित्यवग्रह इत्युपचर्यते, 'किं मन्द्रः ? किं वा तारः ?' इतीहा, मन्द्र एवायं तार एवायम्' इत्यवायः, एवमुत्तरोत्तरविशेषजिज्ञासायां पाश्चात्त्यं पाश्चात्त्य-मवायज्ञानमुत्तरोत्तरविशेषावगमापेक्षया सामान्यार्थावलम्बनमित्यवग्रह इत्युपचर्यते, यदा तूत्तरधर्मजिज्ञासा न भवति तदा तदन्त्यं विशेषज्ञानमवायज्ञानमेव, नावग्रह इत्युपचर्यते, उपचारनिबन्धनाभावात्, उत्तरविशेषाकाङ्क्षाया अपगमात्। ततस्तदनन्तरमविच्युतिरूपा धारणा प्रवर्त्तते। वासना-स्मृती तु सर्वेष्वपि विशेषावगमेषु द्रष्टव्ये। तथा चाऽऽह प्रवचनोपनिषद्वेदी भगवान् **जिनभद्रगणिक्षमाश्रमणः**–

सामन्नमेत्तगहणं, निच्छयओ समयमोग्गहो पढमो।
तत्तोऽणंतरमीहियवत्थुविसेसस्स जोऽवाओ॥१।
सो पुणरीहा-ऽवायावेक्खाओ उग्गह त्ति उवयरिओ।
एस विसेसावेक्खं, सामन्नं गेण्हए जेण॥२॥
तत्तोऽणंतरमीहा, तओ अवाओ य तव्विसेसस्स।
इह सामन्न-विसेसावेक्खा जावंतिमो भेओ॥३॥
सव्वत्थेहा-ऽवाया, निच्छयओ मोत्तुमाइसामन्नं।
संववहारत्थं पुण, सव्वत्थावग्गहोऽवाओ॥४॥
तर-तमजोगाभावेऽवाओ च्चिय धारणा तदंतम्मि।
सव्वत्थ वासणा पुण, भणिया कालंतरसईया॥५॥ [**विशेषा०** २८२-२८६] इति।

तथा **मेह** त्ति मेधा, प्रथमं विशेष-सामान्यार्थावग्रहमतिरिच्योत्तरः सर्वोऽपि विशेषसामान्यार्थावग्रहः। तदेवमुक्तानि पञ्चापि नामधेयानि भिन्नार्थानि। यत्र तु व्यञ्जनावग्रहो न घटते तत्राद्यं भेदद्वयं न द्रष्टव्यम्। '**सेत्तं उग्गहो**'त्ति निगमनम्॥छ॥

[सू० ५२ (१)] से किं तं ईहा ? ईहा छव्विहा पण्णत्ता, तंजहा– सोतेंदियईहा १, चक्खिंदियईहा २, घाणेंदियईहा ३, जिब्भिंदियईहा ४, फासेंदियईहा ५, णोइंदियईहा ६।

(२) तीसे णं इमे एगट्ठिया णाणाघोसा णाणावंजणा पंच णामधेया भवंति, तंजहा– आभोगणया १, मग्गणया २, गवेसणया ३, चिंता ४, वीमंसा ५, सेत्तं ईहा २।

से किं तमित्यादि। अथ केयमीहा ?। **ईहा षड्विधा प्रज्ञप्ता, तद्यथा- श्रोत्रेन्द्रियेहा** इत्यादि। तत्र श्रोत्रेन्द्रियेणेहा श्रोत्रेन्द्रियेहा, श्रोत्रेन्द्रियार्थावग्रहमधिकृत्य या प्रवृत्ता ईहा सा श्रोत्रेन्द्रियेहा इत्यर्थः, एवं शेषा अपि भावनीयाः। **तीसे णं** इत्यादि सुगमम्। नवरं सामान्यत एकार्थिकानि, विशेषचिन्तायां पुनर्भिन्नार्थानि। तत्र **आभोगणय** त्ति आभोग्यतेऽनेनेति आभोगनम्– अर्थावग्रहसमयसमनन्तरमेव सद्भूतार्थविशेषाभिमुखमालोचनम्, तस्य भाव **आभोगनता**। तथा मार्ग्यतेऽनेनेति **मार्गणं** सद्भूतार्थविशेषाभिमुखमेव तदूर्द्ध्वमन्वय-व्यतिरेकधर्मान्वेषणं तद्भावो **मार्गणता**। तथा

गवेष्यतेऽनेनेति **गवेषणं** तत ऊर्द्ध्वं सद्भूतार्थविशेषाभिमुखमेव व्यतिरेकधर्मत्यागतोऽन्वयधर्माध्यासालोचनम्, तद्भावो **गवेषणता**। ततो मुहुर्मुहुः क्षयोपशमविशेषतः स्वधर्मानुगतसद्भूतार्थविशेषचिन्तनं **चिन्ता**। तत ऊर्द्ध्वं क्षयोपशमविशेषात् स्पष्टतरं सद्भूतार्थविशेषाभिमुखमेव व्यतिरेकधर्मपरित्यागतोऽन्वयधर्मापरित्यागतोऽन्वयधर्मविमर्शनं **विमर्शः**। **सेत्तं ईहा** इति निगमनम्॥

[सू० ५३ (१)] से किं तं अवाए ? अवाए छव्विहे पण्णत्ते, तंजहा-सोइंदियावाए १, चक्खिंदियावाए २, घाणेंदियावाए ३, जिब्भिंदियावाए ४, फासेंदियावाए ५, णोइंदियावाए ६।

(२) तस्स णं इमे एगट्ठिया णाणाघोसा णाणावंजणा पंच णामधेया भवंति, तंजहा-आवट्टणया १, पच्चावट्टणया २, अवाए ३, बुद्धी ४, विण्णाणे ५, सेत्तं अवाए ३।

से किं तमित्यादि। अत्र श्रोत्रेन्द्रियेणावायः श्रोत्रेन्द्रियावायः, श्रोत्रेन्द्रियनिमित्तमर्थावग्रहमधिकृत्य यः प्रवृत्तोऽपायः स श्रोत्रेन्द्रियापाय इत्यर्थः, एवं शेषा अपि भावनीयाः। **तस्स णं** इत्यादि प्राग्वत्। अत्रापि सामान्यत एकार्थिकानि, विशेषचिन्तायां पुनर्नानार्थानि। अत्र आवर्त्तते-ईहातो निवृत्त्य अपायभावप्रतिपत्त्यभिमुखो वर्त्तते येन बोधपरिणामेन स आवर्त्तनस्तद्भाव **आवर्त्तनता**। तथा आवर्त्तनं प्रति ये गता अर्थविशेषेषूत्तरोत्तरेषु विवक्षितापायप्रत्यासन्नतरा बोधविशेषास्ते प्रत्यावर्त्तनाः, तद्भावः प्रत्यावर्त्तनता। तथा **अपायः** निश्चयः, सर्वथा ईहाभावाद् विनिवृत्तस्यावधारणावधारितमर्थमवगच्छतो यो बोधविशेषः सोऽपाय इत्यर्थः। ततस्तमेवावधारितमर्थं क्षयोपशमविशेषात् स्थिरतया पुनः पुनः स्पष्टतरमवबुध्यमानस्य या बोधपरिणतिः सा **बुद्धिः**। तथा विशिष्टं ज्ञानं **विज्ञानं** क्षयोपशमविशेषादेवावधारितार्थविषय एव तीव्रतरधारणाहेतुर्बोधविशेषः। **सेत्तं अवाए** इति निगमनम्॥

[सू० ५४ (१)] से किं तं धारणा ? धारणा छव्विहा पण्णत्ता, तंजहा-सोइंदियधारणा १, चक्खिंदियधारणा २, घाणिंदियधारणा ३, जिब्भिंदियधारणा ४, फासिंदियधारणा ५, णोइंदियधारणा ६।

(२) तीसे णं इमे एगट्ठिया णाणाघोसा णाणावंजणा पंच णामधेया भवंति, तंजहा– धरणा १, धारणा २, ठवणा ३, पतिट्ठा ४, कोट्ठे ५ सेत्तं धारणा।

से किं तं इत्यादि सुगमं यावद् **धारणा** इत्यादि। अत्रापि सामान्यत एकार्थानि[१], विशेषार्थचिन्तायां पुनर्भिन्नार्थानि। तत्रापायानन्तरमवगतस्यार्थस्याविच्युत्याऽन्तर्मुहूर्त्तं कालं यावद् धरणं **धरणा**। ततस्तमेवार्थमुपयोगात् च्युतं जघन्यतोऽन्तर्मुहूर्त्तादुत्कर्षतोऽसङ्ख्येयात् कालात् परतो यत् स्मरणं सा **धारणा**। तथा स्थापनं **स्थापना** अपायावधारितस्यार्थस्य हृदि स्थापनम्, वासनेत्यर्थः। **अन्ये तु** धारणास्थापनयोर्व्यत्यासेन स्वरूपमाचक्षते। तथा प्रतिष्ठानं **प्रतिष्ठा**, अपायावधारितस्यैवार्थस्य हृदि प्रभेदेन प्रतिष्ठापनमित्यर्थः। कोष्ठ इव **कोष्ठः**, अविनष्टसूत्रार्थधारणमित्यर्थः। **सेत्तं धारणा** सेयं धारणा॥ सम्प्रति अवग्रहादेः कालप्रमाणप्रतिपादनार्थमाह–

[सू० ५५] उग्गहे एक्कसामइए, अंतोमुहुत्तिया ईहा, अंतोमुहुत्तिए अवाए, धारणा संखेज्जं वा कालं असंखेज्जं वा कालं।

[सू० ५६] एवं अट्ठावीसतिविहस्स आभिणिबोहियणाणस्स वंजणोग्गहस्स परूवणं करिस्सामि पडिबोहगदिट्ठंतेण मल्लगदिट्ठंतेण य।

[सू० ५७] से किं तं पडिबोहगदिट्ठंतेणं ? पडिबोहगदिट्ठंतेणं से जहाणामए केइ पुरिसे कंचि पुरिसं सुत्तं पडिबोहेज्जा 'अमुगा ! अमुग !' त्ति, तत्थ य चोयगे पन्नवगं एवं वयासी-किं एगसमयपविट्ठा पोग्गला गहणमागच्छंति ? दुसमयपविट्ठा पोग्गला गहणमागच्छंति ? जाव दससमयपविट्ठा पोग्गला गहणमागच्छंति ? संखेज्जसमयपविट्ठा पोग्गला गहणमागच्छंति ? असंखेज्जसमयपविट्ठा पोग्गला गहणमागच्छंति ?। एवं वदंतं चोयगं पण्णवगे एवं वयासी-णो एगसमयपविट्ठा पोग्गला गहणमागच्छंति, णो दुसमयपविट्ठा पोग्गला गहणमागच्छंति, जाव णो दससमयपविट्ठा पोग्गला गहणमागच्छंति, णो संखेज्जसमयपविट्ठा पोग्गला गहणमागच्छंति, असंखेज्जसमयपविट्ठा

१. एकार्थिकानि विशेषचि° खं० पा० विना ॥

पोग्गला गहणमागच्छंति, सेत्तं पडिबोहगदिट्ठंतेणं।

[सू० ५८ (१)] से किं तं मल्लगदिट्ठंतेणं ? मल्लगदिट्ठंतेणं से जहाणामए केइ पुरिसे आवागसीसाओ मल्लगं गहाय तत्थेगं उदगबिंदुं पक्खिवेज्जा से णट्ठे, अण्णे पक्खित्ते से वि णट्ठे, एवं पक्खिप्पमाणेसु पक्खिप्पमाणेसु होही से उदगबिंदू जे णं तं मल्लगं रावेहिति, होही से उदगबिंदू जे णं तंसि मल्लगंसि ठाहिति, होही से उदगबिंदू जे णं तं मल्लगं भरेहिति, होही से उदगबिंदू जे णं तं मल्लगं पवाहेहिति, एवमेव पक्खिप्पमाणेहिं पक्खिप्पमाणेहिं अणंतेहिं पोग्गलेहिं जाहे तं वंजणं पूरितं होति ताहे 'हुं' ति करेति णो चेव णं जाणति के वेस सद्दाइ ?, तओ ईहं पविसति तओ जाणइ अमुगे एस सद्दाइ, तओ अवायं पविसइ तओ से उवगयं हवइ, तओ णं धारणं पविसइ तओ णं धारेइ संखेज्जं वा कालं असंखेज्जं वा कालं।

(२) से जहाणामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जा तेणं सद्दो त्ति उग्गहिए, णो चेव णं जाणइ के वेस सद्दाइ ?, तओ ईहं पविसइ ततो जाणति अमुगे एस सद्दे, ततो णं अवायं पविसइ ततो से उवगयं हवति, ततो धारणं पविसइ तओ णं धारेइ संखेज्जं वा कालं असंखेज्जं वा कालं। एवं अव्वत्तं रूवं, अव्वत्तं गंधं, अव्वत्तं रसं, अव्वत्तं फासं पडिसंवेदेज्जा।

(३) से जहाणामए केइ पुरिसे अव्वत्तं सुमिणं पडिसंवेदेज्जा, तेणं सुमिणे त्ति उग्गहिए, ण पुण जाणति के वेस सुमिणे ? त्ति, तओ ईहं पविसइ तओ जाणति अमुगे एस सुमिणे त्ति, ततो अवायं पविसइ ततो से उवगयं हवइ, ततो धारणं पविसइ तओ णं धारेइ संखेज्जं वा कालं असंखेज्जं वा कालं। सेत्तं मल्लगदिट्ठंतेणं॥

उग्गहो इत्यादि। **अवग्रहः** अर्थावग्रह एकसामयिकः। आन्तर्मौहूर्त्तिकी ईहा। आन्तर्मौहूर्त्तिकोऽवायः। धारणा सङ्ख्येयं वा कालमसङ्ख्येयं वा कालम्, तत्र सङ्ख्येयवर्षायुषां सङ्ख्येयं कालम्, असङ्ख्ये यवर्षायुषामसङ्ख्येयं कालम्। सा च धारणा सङ्ख्येयमसङ्ख्येयं वा कालं यावद् वासनारूपा द्रष्टव्या, अविच्युति-

स्मृत्योरजघन्योत्कर्षेणान्तर्मुहूर्त्तप्रमाणत्वात्। यत उक्तं **भाष्यकृता**–

अत्थोग्गहो जहन्नं, समओ सेसोग्गहादओ वीसुं।
अंतोमुहुत्तमेगं, तु वासणाधारणं मोत्तुं॥१॥ [विशेषा* ० ३३४]

एवं अट्ठावीसइ इत्यादि, **एवम्** उक्तेन प्रकारेणाष्टाविंशतिविधस्य। कथमष्टाविंशतिविधता ? इति, उच्यते, चतुर्द्धा व्यञ्जनावग्रहः, षोढा अर्थावग्रहः, षोढा ईहा, षड्विधोऽपायः, षोढा धारणा, इत्यष्टाविंशतिविधता। एवमष्टाविंशतिविधस्याऽऽभिनिबोधिकज्ञानस्य सम्बन्धी यो व्यञ्जनावग्रहः तस्य स्पष्टतरस्वरूपपरिज्ञापनाय[१] प्ररूपणां करिष्यामि। कथम् ? इत्याह– **प्रतिबोधकदृष्टान्तेन मल्लकदृष्टान्तेन च** तत्र प्रतिबोधयतीति प्रतिबोधकः-सुप्तस्योत्थापकः, स एव दृष्टान्तः **प्रतिबोधकदृष्टान्त**स्तेन, **मल्लकं** शरावम्, तदेव दृष्टान्तो **मल्लकदृष्टान्त**स्तेन च।

से किं तमित्यादि। **अथ केयं प्रतिबोधकदृष्टान्तेन**, व्यञ्जनावग्रहस्य प्ररूपणेति शेषः ?। आचार्य आह– प्रतिबोधकदृष्टान्तेनेयं व्यञ्जनावग्रहप्ररूपणा– सः **यथानामकः** यथासम्भवनामधेयः कोऽपि पुरुषः, अत्र सर्वत्राप्येकारो मागधिकभाषालक्षणानुसरणात्, तच्च प्रागेवानेकश उक्तम्, **कश्चिद्** अनिर्दिष्टनामानं यथासम्भवनामकं पुरुषं सुप्तं सन्तं प्रतिबोधयेत्, कथमित्याह– **अमुक अमुक** ! इति, **तत्र** एवमुक्ते सति **चोदकः** ज्ञानावरणकर्मोदयतः कथितमपि सूत्रार्थमनवगच्छन् प्रश्नं चोदयतीति चोदकः, यथावस्थितं सूत्रार्थं प्रज्ञापयतीति **प्रज्ञापकः** गुरुः तम् **एवं** वक्ष्यमाणेन प्रकारेणावादीत्, भूतकालनिर्देशोऽनादिमानागम इति ख्यापनार्थः। वदनप्रकारमेव दर्शयति-किमेकसमयप्रविष्टाः पुद्गलाः **ग्रहणमागच्छन्ति** ? ग्राह्यतामुपगच्छन्ति ? किं वा द्विसमयप्रविष्टाः ? इत्यादि सुगमम्। एवं वदन्तं चोदकं प्रज्ञापकः **[एवं** वक्ष्यमाणेन प्रकारेण] **अवादीत्** उक्तवान्-**नो एकसमयप्रविष्टाः** इत्यादि प्रकटार्थं यावद् -'नो सङ्ख्येयसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति'। नवरमयं प्रतिषेधः स्फुटप्रतिभासरूपार्थावग्रहलक्षणविज्ञानग्राह्यतामधिकृत्य वेदितव्यः, यावता पुनः प्रथमसमयादप्यारभ्य किञ्चित् किञ्चिदव्यक्तं ग्रहणमागच्छन्तीति प्रतिपत्तव्यम् ?

---

१. **परिज्ञानाय** खं० पा० विना ॥

जं वंजणोग्गहम्मि वि, भणियं विन्नाणमव्वत्तं [ ] इति वचनप्रामाण्यात्। **असंखेज्ज** इत्यादि, आदित आरभ्य प्रतिसमयप्रवेशनेनासङ्ख्येयान् समयान् यावद् ये प्रविष्टास्ते-ऽसङ्ख्येयसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति-अर्थावग्रहरूपविज्ञानग्राह्यतामुपपद्यन्ते, असङ्ख्येयसमयप्रविष्टेषु तेषु चरमसमये अर्थावग्रहविज्ञानमुपजायते इत्यर्थः। अर्थावग्रहविज्ञानाच्च प्राक् सर्वोऽपि व्यञ्जनावग्रहः, एषा प्रतिबोधकदृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा। व्यञ्जनावग्रहस्य च कालो जघन्यत आवलिका-ऽसङ्ख्येयभागः, उत्कर्षतः सङ्ख्येया आवलिकाः, ता अपि च सङ्ख्येया आवलिकाः प्राणापानपृथक्त्वकालमाना वेदितव्याः। यत उक्तम्–

वंजणवग्गहकालो, आवलियाऽसंखभागतुल्लो उ।
थोवो उक्कोसो पुण, आणापाणा[1] पुहत्तं ति॥१॥ [ ]

सेत्तं इत्यादि निगमनम्, सेयं प्रतिबोधकदृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा।

से किं तं इत्यादि, अथ केयं मल्लकदृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा ?। सूरिराह-**मल्लकदृष्टान्तेन** व्यञ्जनावग्रहस्य प्ररूपणा– **सः** अनिर्दिष्टस्वरूपो यथानामकः कश्चित् पुरुषः **आपाकशिरसः** आपाकः प्रतीतः तस्य शिरसो **मल्लकं** शरावं गृहीत्वा, इदं हि किल रूक्षं भवति ततोऽस्योपादानम्, तत्र मल्लके एकमुदकबिन्दुं प्रक्षिपेत् स नष्टः, तत्रैव तद्भावपरिणतिमापन्न इत्यर्थः, ततो द्वितीयं प्रक्षिपेत् सोऽपि विनष्टः, एवं प्रक्षिप्यमाणेषु प्रक्षिप्यमाणेषु भविष्यति स उदकबिन्दुर्यस्तद् मल्लकं **रावेहिइ** देश्योऽयं शब्दः, आर्द्रतां नेष्यति, शेषं सुगमं यावद् **एवमेव** इत्यादि, 'एवमेव' उदकबिन्दुभिरिव निरन्तरं[2] प्रक्षिप्यमाणैः प्रक्षिप्यमाणैरनन्तैः शब्दरूपतापरिणतैः पुद्गलैर्यदा तद् व्यञ्जनं पूरितं भवति तदा **हुंकरोति** हुंकारं मुञ्चति, तदा तान् पुद्गलान् अनिर्देश्यरूपतया परिच्छिनत्तीति भावार्थः। अत्र व्यञ्जनशब्देनोपकरणेन्द्रियं शब्दादिपरिणतं वा द्रव्यं तयोः सम्बन्धो वा गृह्यते, न कश्चिद् विरोधः। आह च **भाष्यकृत्**–

---

१. °**पाण** खं०। °**पाणू** पा० । °**पाणो** दे० ॥ २. **नितरां** खं० ॥

तोएण मल्लगं पिव, वंजणमापूरियं ति जं भणियं।
तं दव्वमिंदियं वा, तस्संबंधो व न विरोहो॥१॥ [विशेषा० २५०]

तत्र यदा व्यञ्जनम् उपकरणेन्द्रियमधिक्रियते तदा पूरितमिति कोऽर्थः ? परिपूर्णं भृतं व्याप्तमित्यर्थः। यदा व्यञ्जनं द्रव्यमभिगृह्यते तदा **पूरित**मिति प्रभूतीकृतं स्वप्रमाणमानीतम्, स्वव्यक्तौ समर्थीकृतमित्यर्थः। यदा तु व्यञ्जनं द्वयोरपि सम्बन्धो गृह्यते तदा पूरितमिति किमुक्तं भवति ? तावान् सम्बन्धोऽभूत् यावति सति ते शब्दादिपुद्गला ग्रहणमागच्छन्ति। आह च **चूर्णिकृत्**– **यदा पुद्गलदव्वा वंजणं तया पूरियं ति पभूया ते पुद्गलदव्वा जाया-स्वप्रमाणमानीताः सविसयपडिबोहसमत्था जाया इत्यर्थः। जया उवगरणिंदियं वंजणं तया पूरियं ति कहं ?, उच्यते, जाहे तेहिं पोग्गलेहिं तं दव्वेंदियं आवृतं भरियं वापितं तया पूरियं ति भण्णइ। जया उभयसंबंधो वंजणं तया पूरियं ति कहं ?, उच्यते, दव्विंदियस्स पोग्गला अंगीभावमागता, पोग्गला दव्वेंद्रिये अभिषक्ता इत्यर्थः, तया पूरियं ति भन्नइ [नन्दीचू० सू० ५६ [१] पृ० ४०]** इति।

एवं च यदा पूरितं भवति व्यञ्जनं तदा हुं इति करोति, अर्थावग्रहरूपेण ज्ञानेन तमर्थं गृह्णाति, तं च गृह्णाति नाम-जात्यादिकल्पनारहितम्, तथा चाऽऽह– **'नो चेव णं जाणइ के वेस सद्दाइ ?'** इति न पुनरेवं जानाति क एष शब्दादिरर्थ इति, स्वरूप-द्रव्य-गुण-क्रियाविशेषकल्पनारहितमनिर्देश्यं सामान्यमात्रं गृह्णातीत्यर्थः, एवंरूपसामान्यमात्रग्रहणकारणत्वादर्थावग्रहस्य, एतस्माच्च पूर्वः सर्वोऽपि व्यञ्जनावग्रहः, एषा मल्लकदृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा। हुंकारकरणं चार्थावग्रहबलप्रवर्त्तितम्।

तत ईहां प्रविशति-किमिदं किमिदमिति विमर्शं कर्त्तुमारभते, **ततः** ईहानन्तरं क्षयोपशमविशेषभावाद् जानाति-अमुक एष शब्दादिरिति। **ततः** एवंरूपे ज्ञानपरिणामे प्रादुर्भवति सति सोऽपायं प्रविशति, ततोऽपायानन्तरमन्तर्मुहूर्त्तकालं यावदुपगतं भवति-सामीप्येनाऽऽत्मनि शब्दादिज्ञानं परिणतं भवति, अविच्युतिरन्तर्मुहूर्त्तकालं यावत् प्रवर्त्तते इत्यर्थः, ततो धारणां प्रविशति, सा च धारणा वासनारूपा द्रष्टव्या, यत आह– **ततो णं** इत्यादि, ततो धारणायां प्रवेशात् **णं** इति वाक्यालङ्कारे सङ्ख्येयं वा कालं असंख्येयं वा कालं हृदि धारयति, तत्र सङ्ख्येयवर्षायुष्कः सङ्ख्येयं कालम्

१. स्वं प्र० खं० विना ॥ २. °मानीता खं० ॥

असङ्ख्येयवर्षायुष्कस्त्वसङ्ख्येयं कालम्।

अत्राह– सुप्तमज्ञीकृत्य पूर्वोक्तः प्रकारः सर्वोऽपि घटते, जाग्रतस्तु शब्दश्रवण-समनन्तरमेवावग्रहेहाव्यतिरेकेणावायज्ञानमुपजायते, तथा प्रतिप्राणि संवेदनात्, तन्निषेधार्थमाह– **से जहानामए** इत्यादि, स यथानामकः कश्चिज्जाग्रदपि पुरुषोऽव्यक्तं शब्दं शृणुयात्, अव्यक्तमेव प्रथमं शब्दं शृणोति, अव्यक्तं नाम-अनिर्देश्यं स्वरूप-नाम-जात्यादिकल्पनारहितम्, अनेनावग्रहमाह, अर्थावग्रहश्च श्रोत्रेन्द्रियस्य सम्बन्धी व्यञ्जनावग्रहमन्तरेण न भवति ततो व्यञ्जनावग्रहोऽप्युक्तो वेदितव्यः।

अत्राऽऽह– नन्वेवं क्रमो न कोऽप्युपलभ्यते, किन्तु प्रथमत एव शब्दापाय-ज्ञानमुपजायते, सूत्रेऽपि चाव्यक्तमिति शब्दविशेषणं कृतम्, ततोऽयमर्थो व्याख्येयः-अव्यक्तम्-अनवधारितशाङ्ग-शाङ्र्गादिविशेषं शब्दं शृणुयादिति, इदं च व्याख्यान-मुत्तरसूत्रमपि संवादयति– **तेणं सद्दो त्ति उग्गहिए तेन** प्रमात्रा शब्द इत्यवगृहीतम् **नो चेव णं जाणइ के वेस सद्दाइ** न पुनरेवं जानाति– क एष शब्दः शाङ्गः शार्ङ्ग इति वा ?, **सद्दाइ** इत्यत्राऽऽदिशब्दाद् रसादिष्वप्ययमेव न्याय इति ज्ञापयति, तत ईहां प्रविशति इत्यादि सर्वं सम्बद्धमेव, तदेतदयुक्तम्, सम्यग् वस्तुतत्त्वापरिज्ञानात्, इह हि यत् किमपि वस्तु निश्चीयते तत् सर्वमीहापूर्वकम्, अनीहितस्य सम्यग् निश्चितत्वायोगात्, न खलु प्रथमाक्षिसन्निपाते सत्यधूमदर्शनेऽपि यावत् 'किमयं धूमः ? किं वा मसकवर्त्तिः' इति विमृश्य धूमगतकण्ठक्षणन-कालीकरण-सोष्मतादिधर्मदर्शनात् सम्यग्धूमं धूमत्वेन न विनिश्चिनोति तावत् स धूमो निश्चितो भवति, अनिवर्त्तितशङ्कतया तस्य सम्यग् निश्चितत्वायोगात्, तस्मादवश्यं यो वस्तुविशेषनिश्चयः स ईहापूर्वकः, 'शब्दोऽयम्' इति च निश्चयो वस्तुविशेषनिश्चयः, रूपादिव्यवच्छेदात्, ततोऽवश्यमितः पूर्वमीहया भवितव्यम्, ईहा च प्रथमतः सामान्यरूपेणावगृहीते भवति, नानवगृहीते, न खलु सर्वथा निरालम्बनमीहनं क्वापि भवदुपलभ्यते, न चानुपलभ्यमानं प्रतिपत्तुं शक्नुमः, सर्वस्या अपि प्रेक्षावतां प्रतिपत्तेः प्रमाणमूलत्वाद्, अन्यथा प्रेक्षावत्ता-क्षितिप्रसक्तेः, तस्मादीहायाः प्रागवग्रहोऽपि नियमात् प्रतिपत्तव्यः। अमुमेवार्थं **भाष्यकारो**ऽपि द्रढयति–

ईहिज्जइ नागहियं, नज्जइ नानीहियं न यानायं।
धारिज्जइ जं वत्थुं, तेण कमो उग्गहाईओ॥१॥ [विशेषा० २९६]

अवग्रहश्च 'शब्दोऽयम्' इति ज्ञानात् पूर्वं प्रवर्त्तमानोऽनिर्देश्यसामान्यमात्रग्रहणरूप एवोपपद्यते, नान्यः, अत एवोक्तं सूत्रकृता–'अव्यक्तं शब्दं श्रृणुयात्' इति, स हि परमार्थतः शब्द एव, ततः प्रज्ञापकस्तं शब्दमनूद्य तद्विशेषणमाचष्टे-अव्यक्तमिति, तं शब्दमव्यक्तं शृणोति, किमुक्तं भवति ?– शब्दव्यक्त्याऽपि व्यक्तं न शृणोति, किन्तु सामान्यमात्रमनिर्देश्यं गृह्णीतीत्यर्थः। यदपि चोक्तम्– तेन प्रमात्रा शब्द इत्यवगृहीतमिति, तत्र शब्द इति प्रतिपादयति प्रज्ञापकः सूत्रकारो, न पुनस्तेन प्रमात्रा शब्द इत्यवगृह्यते, शब्द इति ज्ञानस्यापायरूपत्वात्, तथाहि– 'शब्दोऽयम्' इति किमुक्तं भवति ?– न शब्दाभावः, न च रूपादिः, किन्तु शब्द एवायमिति, ततो विशेषनिश्चयरूपत्वाद-यमवगमोऽपायरूप एव, नावग्रहरूपः, अथ च अवग्रहप्रतिपादनार्थमिदमुच्यमानं वर्त्तते ततः शब्द इति प्रज्ञापकः सूत्रकारो वदति, न पुनस्तेन प्रमात्रा शब्द इत्यवगृह्यत इति स्थितम्। तथा चाऽऽह सूत्रकृत्– **नो चेव णं** इत्यादि, न पुनरेवं जानाति– क एष शब्दादिरर्थ इति, शब्दादिरूपतया तमर्थं न जानातीति भावार्थः, अनिर्देश्यसामान्य-मात्रप्रतिभासात्मकत्वादर्थावग्रहस्य, अर्थावग्रहश्च श्रोत्रेन्द्रिय-घ्राणेन्द्रियादीनां व्यञ्जनावग्रहपूर्वक इति पूर्वं व्यञ्जनावग्रहोऽपि द्रष्टव्यः, तदेवं सर्वत्राप्यवग्रहेहा-पूर्वमवायज्ञानमुपजायते, केवलमभ्यासदशामापन्नस्य शीघ्रं शीघ्रतरमवग्रहादयः प्रवर्त्तन्ते इति कालसौक्ष्म्यात् ते स्पष्टं न संवेद्यन्ते इति स्थितम्। तत ईहां प्रविशति।

इह केचिदीहां संशयमात्रं मन्यन्ते, तदयुक्तम्, संशयो हि[१] नामाज्ञानमिति, ज्ञानांशरूपा चेहा, ततः सा कथमज्ञानरूपा भवितुमर्हति ?। नन्वीहापि 'किमयं शाङ्खः ? किं वा शार्ङ्गः ?' इत्येवंरूपतया प्रवर्त्तते, संशयोऽपि चैवमेव, ततः कोऽनयोः प्रतिविशेषः ?, उच्यते, इह यद् ज्ञानं शाङ्खशार्ङ्गादिविशेषाननेकानालम्बते न चासद्भूतं विशेषमपासितुं शक्नोति किन्तु सर्वात्मना शयानमिव वर्त्तते, कुण्ठीभूतं तिष्ठतीत्यर्थः, तदसद्भूत-विशेषाऽपर्युदासपरिकुण्ठितं संशयज्ञानमुच्यते, यत् पुनः सद्भूतार्थविशेषविषये

१. हि नास्ति खं० पा० ॥

हेतूपपत्तिव्यापारपरतया सद्भूतार्थविशेषोपादानाभिमुखमसद्भूतविशेषत्यागाभिमुखं च तदीहा। आह च **भाष्यकृत्**–

जमणेगत्थालंबणमपज्जुदासपरिकुंठियं चित्तं।
सयइ व सव्वप्पणओ, तं संशयरूवमन्नाणं॥१॥
जं पुण सयत्थहेऊववत्तिवावारतप्परममोहं।
भूया-ऽभूयविसेसादाण-च्चायाभिमुहमीहा॥२॥ [विशेषा० १८३-१८४]

इह यदि वस्तु सुबोधं भवति विशिष्टश्च मतिज्ञानावरणक्षयोपशमो वर्त्तते ततोऽन्तर्मुहूर्त्तकालेन नियमात् तद् वस्तु विनिश्चिनोति, यदि पुनर्वस्तु दुर्बोधं न च तथाविधो विशिष्टो मतिज्ञानावरणक्षयोपशमस्तत ईहोपयोगादच्युतः पुनरप्यन्तर्मुहूर्त्तं कालमीहते, एवमीहोपयोगाविच्छेदेन प्रभूतान्यन्तर्मुहूर्त्तानि यावदीहते तत ईहानन्तरं जानाति– अमुक एषोऽर्थः शब्द इति, इदं च ज्ञानमवायरूपम्, ततोऽस्मिन् ज्ञाने प्रादुर्भवति **णं** इति वाक्यालङ्कारेऽपायं प्रविशति, ततः **से** तस्य उपगतम्-अविच्युत्या सामीप्येनाऽऽत्मनि परिणतं भवति, ततो धारणां-वासनारूपां प्रविशति, सङ्ख्येयमसङ्ख्येयं वा कालम्। **एवम्** अनेन क्रमप्रकारेण एतेन पूर्वदर्शितेनाभिलापेन शेषेष्वपि चक्षुरादिष्विन्द्रियेषु अवग्रहादयो वाच्याः, नवरम् अभिलापविषये 'अव्वत्तं सद्दं सुणेज्जा' इत्यस्य स्थाने 'अव्वत्तं रूवं पासेज्जा' इति वक्तव्यम्, उपलक्षणमेतत्, तेन सर्वत्रापि शब्दस्थाने रूपमिति वक्तव्यम्, तद्यथा– 'तेणं रूवि त्ति उग्गहिए नो चेव णं जाणइ के वेस रूवि त्ति ?, ततो ईहं पविसइ, ततो जाणइ अमुगे एस रूवे त्ति, ततो अवायं पविसइ' इत्यादि तदवस्थमेव, नवरमिह व्यञ्जनावग्रहो न व्याख्येयः, अप्राप्यकारित्वाच्चक्षुषः, घ्राणेन्द्रियादिषु तु व्याख्येयः, एवं घ्राणेन्द्रियविषये– 'अव्वत्तं गंधं अग्घाइज्जा' इत्यादि वक्तव्यम्, जिह्वेन्द्रियविषये 'अव्वत्तं रसं आसाएज्जा' इत्यादि, स्पर्शनेन्द्रियविषये 'अव्वत्तं फासं पडिसंवेइज्जा' इत्यादि, यथा च शब्द इति निश्चिते तदुत्तरकालमुत्तरधर्मजिज्ञासायां 'किं शाङ्गः ? किं वा शार्ङ्गः ?' इत्येवंरूपा ईहा प्रवर्त्तते, तथा रूपमिति निश्चिते तदुत्तरकालमुत्तरधर्मजिज्ञासायां 'किमयं स्थाणुः ? किं वा पुरुषः ?' इत्यादिरूपा प्रवर्त्तते, एवं घ्राणेन्द्रियादिष्वपि समानगन्धादीनि वस्तूनि

ईहालम्बनानि वेदितव्यानि। आह च **भाष्यकृत्**–

सेसेसु वि रूवाइसु, विसएसुं होंति सूवलक्खाइं।
पायं पच्चासन्नत्तणेण ईहाए वत्थूणि॥१॥
थाणुपुरिसाइ कुड्डुप्पलादि संभियकरिल्लमंसाइ।
सप्पुप्पलनालाइ व, समाणरूवाइं विसयाइं॥२॥ [विशेषा० २९२, २९३] 5

से जहानामए इत्यादि,स यथानामकः कोऽपि पुरषोऽव्यक्तं स्वप्नं प्रतिसंवेदयेत्, अव्यक्तं नाम सकलविशेषविकलमनिर्देश्यमिति यावत् स्वप्नमिति प्रज्ञापकः सूत्रकारो वदति, स तु प्रतिपत्ता स्वप्नादिव्यक्तिविकलं किञ्चिदनिर्देश्यमेव तदानीं गृह्णाति, तथा **तेन** प्रतिपत्त्रा **सुविणो त्ति उग्गहिए** इति स्वप्नमिति अवगृहीतम्, अत्रापि स्वप्न इति प्रज्ञापको वदति, स तु प्रतिपत्ता अशेषविशेषवियुक्तमेवावगृहीतवान्, तथा 10 चाऽऽह– न पुनरेवं जानाति– क एष स्वप्न इति, स्वप्न इत्यपि तमर्थं न जानातीति भावः, तत ईहां प्रविशतीत्यादि प्राग्वत्। एवं स्वप्नमधिकृत्य नोइन्द्रियस्यार्थावग्रहादयः प्रतिपादिताः। अनेन चोल्लेखेनान्यत्रापि विषये वेदितव्याः। तदेवं मल्लकदृष्टान्तेन व्यञ्जनावग्रहप्ररूपणां कुर्वता प्रसङ्गतोऽष्टाविंशतिसङ्ख्या अपि मतिज्ञानस्य भेदाः सप्रपञ्चमुक्ताः। सम्प्रति मल्लकदृष्टान्तमुपसंहरति– **सेत्तं मल्लगदिट्ठंतेणं** सेयं मल्लक- 15 दृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा।

एते चावग्रहादयोऽष्टाविंशतिभेदाः प्रत्येकं बह्वादिभिः सेतरैः सर्वसङ्ख्यया द्वादशसङ्ख्यैर्भेदैर्भिद्यमाना यदा विवक्ष्यन्ते तदा षट्त्रिंशदधिकं भेदानां शतत्रयं भवति। तत्र बह्वादयः शब्दमधिकृत्य भाव्यन्ते– शङ्ख-पटहादिनानाशब्दसमूहं पृथगेकैकं यदाऽवगृह्णाति तदा बह्ववग्रहः १, यदा त्वेकमेव कञ्चित् शब्दमवगृह्णाति तदाऽबह्ववग्रहः 20 २, तथा शङ्ख-पटहादिनानाशब्दसमूहमध्ये एकैकं शब्दमनेकैः पर्यायैः स्निग्ध-गाम्भीर्यादिभिर्विशिष्टं यथावस्थितं यदाऽवगृह्णाति तदा स बहुविधावग्रहः ३, यदा त्वेकमनेकं वा शब्दमेकपर्यायविशिष्टमवगृह्णाति तदा सोऽबहुविधावग्रहः ४, यदा त्वेकमनेकं वा शब्दमेकपर्यायविशिष्टमनेकपर्यायविशिष्टं वा क्षिप्रमवगृह्णाति तदा स क्षिप्रावग्रहः ५, यदा तु चिरेण तदाऽक्षिप्रावग्रहः ६, तमेव शब्दं स्वरूपेण यदा जानाति 25

न लिङ्गपरिग्रहात् तदाऽनिश्रितावग्रहः ७, लिङ्गपरिग्रहेण त्ववगच्छतो निश्रितावग्रहः ८, अथवा परधर्मैर्विमिश्रितं यद् ग्रहणं तद् निश्रितावग्रहः, यत् पुनः परधर्मैरविमिश्रितस्य ग्रहणं तदनिश्रितावग्रहः ७-८, तथा निश्चितमवगृह्णतो निश्चितावग्रहः ९, सन्दिग्धमवगृह्णतः सन्दिग्धावग्रहः १०, सर्वदैव बह्वादिरूपेणावगृह्णतो ध्रुवावग्रहः ११, कदाचिदेव पुनर्बह्वादिरूपेणावगृह्णतोऽध्रुवावग्रहः १२। एष च बहु-बहुविधादिरूपोऽवग्रहो विशेष-सामान्यावग्रहरूपो द्रष्टव्यः, नैश्चयिकस्यावग्रहस्य सकलविशेषनिरपेक्षानिर्देश्यसामान्य-मात्रग्राहिण एकसामयिकस्य बहु-बहुविधादिविशेषग्राहकत्वासम्भवात्। बह्वादीनां चानन्तरोक्तं व्याख्यानं **भाष्यकारो**ऽपि प्रमाणयति–

नाणासद्दसमूहं, बहुव्विहं मुणइ भिन्नजातीयं।
बहुविहमणेगभेयं, एक्केक्कं निद्ध-महुराई॥१॥
खिप्पमचिरेण तं चिय, सरूवओ जमनिस्सियमलिंगं।
निच्छइयमसंसयजं, धुवमच्चंतं न उ कयाइ॥२॥
एत्तो च्चिय पडिवक्खं, साहेज्जा निस्सिए विसेसो वा।
परधम्मेहिं विमिस्सं, निस्सियमविमिस्सियं इयरं॥३॥ [विशेषा॰ ३०८-३१०]

यदा पुनरालोकस्य मन्द-मन्दतर-मन्दतम-स्पष्ट-स्पष्टतर-स्पष्टतमत्वादिभेदतो विषयस्याल्पत्व-महत्त्व-सन्निकर्षादिभेदतः क्षयोपशमस्य च तारतम्यभेदतो भिद्यमानं मतिज्ञानं चिन्त्यते तदा तदनन्तभेदं प्रतिपत्तव्यम्॥ सम्प्रति पुनर्द्रव्यादिभेदतश्चतुः-प्रकारतामाह–

[सू॰ ५९] तं समासओ चउव्विहं पण्णत्तं, तंजहा-दव्वओ खेत्तओ कालओ भावओ।

(१) तत्थ दव्वओ णं आभिणिबोहियणाणी आएसेणं सव्वदव्वाइं जाणति ण पासति।

(२) खेत्तओ णं आभिणिबोहियणाणी आएसेणं सव्वं खेत्तं जाणइ ण पासइ।

(३) कालओ णं आभिणिबोहियणाणी आएसेणं सव्वं कालं जाणइ न पासइ।

(४) भावओ णं आभिणिबोहियणाणी आएसेणं सव्वे भावे जाणइ ण पासइ।

[सू०६० गा०७२-७७] उग्गहो ईहाऽवाओ, य धारणा एव होंति चत्तारि।
आभिणिबोहियणाणस्स भेयवत्थू समासेणं॥७२॥
अत्थाणं उग्गहणं च उग्गहं तह वियालणं ईहं।
ववसायं तु अवायं, धरणं पुण धारणं बिंति॥७३॥
उग्गहो एक्कं समयं, ईहा-ऽवाया मुहुत्तमद्धं तु।
कालमसंखं संखं च धारणा होति णायव्वा॥७४॥
पुट्ठं सुणेति सद्दं, रूवं पुण पासती अपुट्ठं तु।
गंधं रसं च फासं च, बद्ध-पुट्ठं वियागरे॥७५॥
भासासमसेढीओ, सद्दं जं सुणइ मीसयं सुणइ।
वीसेढी पुण सद्दं, सुणेति णियमा पराघाए॥७६॥
ईहा अपोह वीमंसा मग्गणा य गवेसणा।
सण्णा सती मती पण्णा, सव्वं आभिणिबोहियं॥७७॥
सेत्तं आभिणिबोहियणाणपरोक्खं।

तं समासतो इत्यादि, **तद्** मतिज्ञानं **समासतः** सङ्क्षेपेण चतुर्विधं प्रज्ञप्तम्, तद्यथा–द्रव्यतः क्षेत्रतः कालतो भावतश्च। तत्र द्रव्यतो **णं** इति वाक्यालङ्कारे, आभिनिबोधिकज्ञानी **आदेसेणं** ति आदेशः-प्रकारः, स च द्विधा– सामान्यरूपो विशेषरूपश्च, तत्रेह सामान्यरूपो ग्राह्यः, ततः **आदेशेन** द्रव्यजातिरूपसामान्यादेशेन **सर्वद्रव्याणि** धर्मास्तिकायादीनि जानाति किञ्चिद् विशेषतोऽपि, यथा-धर्मास्तिकायो [धर्मास्तिकायस्य देशः] धर्मास्तिकायस्य प्रदेशः तथा धर्मास्तिकायो गत्युपष्टम्भहेतुरमूर्त्तो लोकाकाशप्रमाण इत्यादि, न पश्यति-सर्वान् धर्मास्तिकायादीन् न पश्यति, घटादींस्तु योग्यदेशावस्थितान् पश्यत्यपि, अथवा आदेश इति सूत्रादेशस्तस्मात् सूत्रादेशात् सर्वद्रव्याणि धर्मास्तिकायादीनि जानाति, न तु साक्षात् सर्वाणि पश्यति। ननु यत् सूत्रादेशतो ज्ञानमुपजायते तत् श्रुतज्ञानं भवति, शब्दार्थपरिज्ञानरूपत्वात्, अथ च

मतिज्ञानमभिधीयमानं वर्त्तते तत् कथमादेश इति सूत्रादेशो व्याख्यातः ?, तदयुक्तम्, सम्यग् वस्तुतत्त्वापरिज्ञानात्, इह हि श्रुतभावितमतेः श्रुतोपलब्धेष्वप्यर्थेषु सूत्रानुसारमात्रेण येऽवग्रहेहा-ऽपायादयो बुद्धिविशेषाः प्रादुष्षन्ति ते मतिज्ञानमेव, न श्रुतज्ञानम्, सूत्रानुसारनिरपेक्षत्वात्। आह च **भाष्यकृत्**–

आदेसो त्ति व सुत्तं, सुयोवलद्धेसु तस्स मइनाणं।
पसरइ तब्भावणया, विणा वि सुत्ताणुसारेणं॥१॥ [**विशेषा*** ० ४०५]

एवं क्षेत्रादिष्वपि वाच्यम्, नवरं तान् सर्वथा न पश्यति, तत्र क्षेत्रं लोका-ऽलोकात्मकम्, कालः सर्वाद्धारूपोऽतीता-ऽनागत-वर्त्तमानरूपो वा, भावाश्च पञ्चसङ्ख्या औदयिकादयः। तथा चाह **भाष्यकृत्**–

आएसो त्ति पगारो, ओघाएसेण सव्वदव्वाइं।
धम्मत्थिकाइयाइं, जाणइ न उ सव्वभावेणं॥१॥
खेत्तं लोगालोगं, कालं सव्वद्धमहव तिविहं वा।
पंचोदइयाईए, भावे जं नेयमेवइयं॥२॥ [**विशेषा*** ० ४०३-४०४]

सम्प्रति सङ्ग्रहगाथाः प्रतिपादयति–

उग्गहो इत्यादि। अवग्रहः– प्रागूनिरूपितशब्दार्थः, तथा ईहा, तथा अपायश्च, **च**शब्दः पृथगवग्रहादिस्वरूपस्वातन्त्र्यप्रदर्शनार्थः, अवग्रहादयः परस्परं पर्याया न भवन्तीति भावार्थः, अथवा **च**शब्दः समुच्चये, तस्य च व्यवहितः प्रयोगः, धारणा चेत्येवं द्रष्टव्यः।

एवकारः क्रमप्रदर्शनार्थः, **एवम्** अनेन क्रमेण **समासेन** सङ्क्षेपेण चत्वारि आभिनिबोधिकज्ञानस्य भिद्यन्ते इति **भेदा** विकल्पा अंशा इत्यर्थः त एव वस्तूनि भवन्ति। तथाहि– नानवगृहीतमीह्यते, नानीहितं निश्चीयते, नानिश्चितं धार्यते इति ॥७२॥ इदानीमेतेषामेवावग्रहादीनां स्वरूपं प्रतिपिपादयिषुराह–

अत्थाणं इत्यादि, **अर्थानां** रूपादीनामवग्रहणम्, **च**शब्दोऽवग्रहणस्य अव्यक्तत्व-सामान्यमात्र-सामान्यविशेषविषयत्वापेक्षया स्वगतभेदबाहुल्यसूचकः, अवग्रहं ब्रुवते इति योगः। **तथा** इत्यानन्तर्ये, **विचारणं** पर्यालोचनमर्थानामिति वर्त्तते ईहां ब्रुवते। तथा विविधोऽवसायो **व्यवसायः** निर्णयस्तं चार्थानामिति वर्त्तते अपायं

ब्रुवते इति संसर्गः। **धरणं पुनः** अर्थानामविच्युति-स्मृति-वासनारूपं धारणां ब्रुवते तीर्थकर-गणधराः, अनेन स्वमनीषिकाव्युदासमाह।

अन्ये त्वेवं पठन्ति– **अत्थाणं उग्गहणम्मि उग्गहो** इत्यादि, तत्रैवं व्याख्यानम्- अर्थानामवग्रहणे सति अवग्रहो नाम मतिविशेषो भवतीत्येवं ब्रुवते, एवमीहादिष्वपि योजना कार्या, भावार्थः प्राग्वदेव॥७३॥ इदानीमभिहितस्वरूपाणामवग्रहादीनां कालप्रमाणमभिधित्सुराह–

उग्गहो इत्यादि। **अवग्रहः** अर्थावग्रहो नैश्चयिक एकं समयं यावद् भवति। समयः परमनिकृष्टः कालविभागः, स च प्रवचनप्रतिपादितादुत्पलपत्रशतव्यति-भेदोदाहरणाद् जरत्पट्टशाटिकापाटनदृष्टान्ताच्चावसेयः। व्यञ्जनावग्रह-विशेष-सामान्यार्थावग्रहौ तु पृथक् पृथग् अन्तर्मुहूर्त्तप्रमाणौ ज्ञातव्यौ। ईहा चापायश्च ईहा-ऽपायौ मुहूर्त्तार्द्धं ज्ञातव्यौ, मुहूर्त्तो घटिकाद्वयप्रमाणः कालविशेषः तस्यार्द्धं मुहूर्त्तार्द्धम्। तुशब्दो विशेषणार्थः, स चैतद् विशिनष्टि– व्यवहारापेक्षया एतद् मुहूर्त्तार्द्धमित्युच्यते, परमार्थतः पुनरन्तर्मुहूर्त्तमवसेयम्। **अन्ये** पुनरेवं पठन्ति– **मुहुत्तमंतं तु,** अत्र मकारोऽलाक्षणिकः, तत एवं द्रष्टव्यम्–'मुहूर्त्तान्तः' मुहूर्त्तस्यान्तः– मध्यं मुहूर्त्तान्तः, अन्तर्मुहूर्त्तमित्यर्थः, इह **पारे मध्येऽग्रेऽन्तः षष्ठ्या वा** [*मलय० ना० ८।५३] इति विकल्पेनाऽन्तःशब्दस्य प्राग्निपातो भवति, ततः सूत्रेऽन्तःशब्दस्य प्राग्निपातो न विहितः। तथा धारणा कालम**सङ्ख्यं** पल्योपमादिलक्षणं **सङ्ख्येयं च** वर्षादिरूपं यावद् भवति ज्ञातव्या, धारणा चेह वासनारूपा द्रष्टव्या, अविच्युति-स्मृती तु प्रत्येकमन्तर्मुहूर्त्तप्रमाणे वेदितव्ये॥७४॥ तदेवमवग्रहादीनां स्वरूपमभिधाय श्रोत्रेन्द्रियादीनां प्राप्ता-ऽप्राप्तविषयतां प्रतिपिपादयिषुराह–

पुट्ठं सुणेइ इत्यादि, इह श्रोत्रेन्द्रियेण शब्दं शृणोति **स्पृष्टं** स्पृष्टमात्रम्। स्पृष्टं नाम– आलिङ्गितं यथा तनौ रेणुसङ्घातः। अथ कथं स्पृष्टमात्रमेव शब्दं शृणोति ?, उच्यते, इह शेषेन्द्रियगणापेक्षया श्रोत्रेन्द्रियमतिशयेन पटु, तथा गन्धादिद्रव्यापेक्षया शब्दद्रव्याणि सूक्ष्माणि प्रभूतानि भावुकानि च, अत एव सर्वतस्तदिन्द्रियं प्राप्नुवन्ति, ततस्तानि स्पृष्टमात्राण्यपि श्रोत्रेन्द्रियेण ग्रहीतुं शक्यन्ते। रूपं पुनः पश्यति **अस्पृष्टं तु**

अस्पृष्टमेव, तुरेवकारार्थः, अप्राप्यकारित्वाच्चक्षुषः। तथा गन्धं रसं च स्पर्शं च, **च**शब्दौ समुच्चयार्थौ, बद्धस्पृष्टं घ्राणादिभिरिन्द्रियैर्विनिश्चिनोतीति व्यागृणीयात्। इह बद्धस्पृष्टमिति स्पृष्टबद्धमिति विज्ञेयम्, प्राकृतशैल्या चान्यथा सूत्रे उपन्यासः, तत्र स्पृष्टमिति-आलिङ्गितम्, बद्धं-तोयवदात्मप्रदेशैरात्मीकृतम्, आलिङ्गितानन्तरमात्म-
5 प्रदेशैरागृहीतमित्यर्थः। इह शब्दमुत्कर्षतो द्वादशयोजनेभ्य आगतं शृणोति, न परतः, शेषाणि तु गन्धादिद्रव्याणि प्रत्येकं नवभ्यो नवभ्यो योजनेभ्य आगतानि घ्राणादिभिरिन्द्रियैर्गृह्णाति जीवः, न परतः, परतः समागतानां द्रव्याणां मन्दपरिणामतया इन्द्रियग्राह्यत्वासम्भवात्; जघन्यतस्तु शब्दादिद्रव्याणि अङ्गुलासङ्ख्येयभागादागतानि। चक्षुषस्तु जघन्यतो योग्यो विषयोऽङ्गुलसङ्ख्येयभागवर्त्ती वेदितव्यः,
10 उत्कर्षतस्त्वात्माङ्गुलेन सातिरेको योजनलक्षः। एतदपि चाभासुरद्रव्यमधिकृत्योच्यते, भासुरं तु द्रव्यमेकविंशतियोजनलक्षेभ्योऽपि परतः पश्यन्ति, यथा पुष्करवरद्वीपार्द्धे मानुषोत्तरनगप्रत्यासन्नवर्त्तिनः कर्कसङ्क्रान्तौ सूर्यबिम्बम्। तथा चोक्तम्–

लक्खेहिं एक्कवीसाए सातिरेगेहिं पुक्खरद्धम्मि।
उदये पेच्छंति नरा, सूरं उक्कोसए दिवसे॥१॥ [विशेषा* ३४५]

15 अत्राह– ननु 'स्पृष्टं शृणोति शब्दम्' इत्युक्तम्, तत्र शब्दप्रयोगोत्सृष्टान्येव केवलानि शब्दद्रव्याणि शृणोति ? उतान्यान्येव तद्भावितानि ? आहोश्विद् मिश्राणि ? इति, उच्यते, न तावत् केवलानि, यतो वासकानि शब्दद्रव्याणि, शब्दयोग्यानि च द्रव्याणि सकललोकव्यापीनि, ततोऽवश्यं तद्वासितानि शृणोति मिश्राणि वा, न केवलान्येवोत्सृष्टानि॥७५॥ तथा चाऽऽह–

20 **भासासमे**त्यादि। भाष्यत इति **भाषा** वाक्त्रा शब्दरूपतया उत्सृज्यमाना द्रव्यसन्ततिः, सा च वर्णात्मिका भेरीभाङ्कारादिरूपा वा द्रष्टव्या, तस्याः समाः श्रेणयः, श्रेणयो नाम क्षेत्रप्रदेशपङ्क्तयोऽभिधीयन्ते, ताश्च सर्वस्यैव भाषमाणस्य षट्सु दिक्षु विद्यन्ते यासूत्सृष्टा सती भाषा प्रथमसमय एव लोकान्तमनुधावति, **भाषासमश्रेणयः**, समश्रेणिग्रहणं विश्रेणिव्यवच्छेदार्थम्, भाषासमश्रेणीः इतो गतः प्राप्तो भाषासमश्रेणीतः,
25 भाषासमश्रेणिव्यवस्थित इत्यर्थः, यं शब्दं पुरुषादिसम्बन्धिनं भेर्यादिसम्बन्धिनं वा

शृणोति यत्तदोर्नित्याभिसम्बन्धात् तं मिश्रं शृणोति, उत्सृष्टशब्दद्रव्यभावितापान्तरालस्थशब्दद्रव्यमिश्रं शृणोतीति भावार्थः। **वीसेढी** इत्यादि, अत्र इत इति वर्त्तते, ततोऽयमर्थः– विश्रेणिं पुनरितः-प्राप्तः, विश्रेणिव्यवस्थितः पुनरित्यर्थः, अथवा विश्रेणिस्थितो विश्रेणिरित्युच्यते, शब्दं शृणोति नियमात् पराघाते सति, नान्यथा, किमुक्तं भवति ? उत्सृष्टशब्दद्रव्याभिघातेन यानि वासितानि शब्दद्रव्याणि तान्येव केवलानि शृणोति, न कतिचिदपि उत्सृष्टानि। कुतः ? इति चेद्, उच्यते तेषामनुश्रेणिगमनात् प्रतिघाताभावाच्च॥७६॥ सम्प्रति विनेयजनसुखप्रतिपत्तये मतिज्ञानस्य पर्यायशब्दानभिधित्सुराह–

ईहा इत्यादि। एते ईहादयः शब्दा सर्वेऽपि परमार्थतो मतिवाचकाः पर्यायशब्दाः, परं विनेयजनबुद्धिप्रकाशनाय किञ्चिद्भेदाद् भेदोऽमीषां प्रदर्श्यते– ईहन**मीहा** सदर्थपर्यालोचनम्। अपोहन**मपोहः**, निश्चय इत्यर्थः। विमर्शनं **विमर्शः** अपायादवगीहायाः परिणामविशेषः। मार्गणं **मार्गणा** अन्वयधर्मान्वेषणम्। **चः** समुच्चये। गवेषणं **गवेषणा** व्यतिरेकधर्मालोचनम्। तथा संज्ञानं **संज्ञा** व्यञ्जनावग्रहोत्तरकालभावी मतिविशेष इत्यर्थः। तथा स्मरणं **स्मृतिः** पूर्वानुभूतार्थालम्बनः प्रत्ययविशेषः। मननं **मतिः** कथञ्चिदर्थपरिच्छित्तावपि सूक्ष्मधर्मालोचनरूपा बुद्धिः। प्रज्ञानं **प्रज्ञा** विशिष्टक्षयोपशमजन्या प्रभूतवस्तुगतयथावस्थितधर्मालोचनरूपा संवित्। सर्वमिदमाभिनिबोधिकम्, मतिज्ञानमित्यर्थः॥७७॥ **सेत्तं** इत्यादि, तदेतदाभिनिबोधिकज्ञानम्॥७७॥ साम्प्रतं प्रागुपन्यस्तसकलचरणकरणक्रियाधारश्रुतज्ञानस्वरूपजिज्ञासया शिष्यः प्रश्नयति–

[सू० ६१] से किं तं सुयणाणपरोक्खं ? सुयणाणपरोक्खं चोद्दसविहं पण्णत्तं, तंजहा- अक्खरसुयं १ अणक्खरसुयं २ सण्णिसुयं ३ असण्णिसुयं ४ सम्मसुयं ५ मिच्छसुयं ६ सादीयं ७ अणादीयं ८ सपज्जवसियं ९ अपज्जवसियं १० गमियं ११ अगमियं १२ अंगपविट्ठं १३ अणंगपविट्ठं १४।

से किं तमित्यादि। अथ किं तत् श्रुतज्ञानम् ?। आचार्य आह– श्रुतज्ञानं चतुर्दशविधं प्रज्ञप्तम्, तद्यथा– अक्षरश्रुतम् अनक्षरश्रुतं संज्ञिश्रुतम् असंज्ञिश्रुतं सम्यक्श्रुतं मिथ्याश्रुतं सादि अनादि सपर्यवसितम् अपर्यवसितं गमिकम् अगमिकम् अङ्गप्रविष्टम्

अनङ्गप्रविष्टं च। ननु अक्षरश्रुता-ऽनक्षरश्रुतरूप एव भेदद्वये शेषभेदा अन्तर्भवन्ति तत् किमर्थं[1] तेषां भेदानामुपन्यासः ?, उच्यते, **इहाव्युत्पन्नमतीनां विशेषावगमसम्पादनाय महात्मनां शास्त्रारम्भप्रयासः**, न चाक्षरश्रुता-ऽनक्षरश्रुतरूपभेदद्वयोपन्यासमात्राद-व्युत्पन्नमतयः शेषभेदानवगन्तुमीशते, ततोऽव्युत्पन्नमतिविनेयजनानुग्रहाय शेषभेदोपन्यास इति॥ साम्प्रतमुपन्यस्तानां भेदानां स्वरूपमनवगच्छन् आद्यं भेदमधिकृत्य शिष्यः प्रश्नं करोति–

[सू० ६२] से किं तं अक्खरसुयं ? अक्खरसुयं तिविहं पण्णत्तं, तंजहा– सण्णक्खरं १, वंजणक्खरं २, लद्धिअक्खरं ३।

[सू० ६३] से किं तं सण्णक्खरं ? सण्णक्खरं अक्खरस्स संठाणा-ऽऽगिती, सेत्तं सण्णक्खरं १।

[सू० ६४] से किं तं वंजणक्खरं ? वंजणक्खरं अक्खरस्स वंजणाभिलावो, सेत्तं वंजणक्खरं २।

[सू० ६५] से किं तं लद्धिअक्खरं ? लद्धिअक्खरं अक्खरलद्धियस्स लद्धिअक्खरं समुप्पज्जइ, तंजहा– सोइंदियलद्धिअक्खरं १, चक्खिंदियलद्धि-अक्खरं २, घाणेंदियलद्धिअक्खरं ३, रसणिंदियलद्धिअक्खरं ४, फासेंदियलद्धिअक्खरं ५, णोइंदियलद्धिअक्खरं ६, सेत्तं लद्धिअक्खरं ३। सेत्तं अक्खरसुयं।

[सू० ६६, गा० ७८] से किं तं अणक्खरसुयं ? अणक्खरसुयं अणेगविहं पण्णत्तं, तंजहा–

ऊससियं णीससियं, णिच्छूढं खासियं च छीयं च।
णिस्सिंघियमणुसारं, अणक्खरं छेलियादीयं॥७८॥

सेत्तं अणक्खरसुयं।

से किं तमित्यादि। अथ किं तद् अक्षरश्रुतम् ?। सूरिराह– अक्षरश्रुतं त्रिविधं प्रज्ञप्तम्, तद्यथा– सञ्ज्ञाक्षरं व्यञ्जनाक्षरं लब्ध्यक्षरं च। तत्र [2]क्षर सञ्चलने [मलय०धा०,

---

१. **किमर्थः** खं० पा० ॥ २. "क्षर संचलने" - हैमधा० ९७१ ॥

पा० धा० ८५१] न क्षरति– न चलतीत्यक्षरं ज्ञानम्, तद्धि जीवस्वाभाव्यादनुपयोगेऽपि तत्त्वतो न प्रच्यवते। यद्यपि च सर्वं ज्ञानमेवमविशेषेणाक्षरं प्राप्नोति तथाऽपीह श्रुतज्ञानस्य प्रस्तावादक्षरं श्रुतज्ञानमेव द्रष्टव्यम्, न शेषम्, इत्थम्भूतभावाक्षरकारणं चाकारादि वर्णजातं ततस्तदप्युपचारादक्षरमुच्यते, ततश्चाक्षरं च तत् श्रुतं च श्रुतज्ञानं च अक्षरश्रुतम्, भावश्रुतमित्यर्थः, तच्च लब्ध्यक्षरश्रुतं[1] वेदितव्यम्। तथाऽक्षरात्मकम् अकारादिवर्णात्मकं श्रुतमक्षरश्रुतम्, द्रव्यश्रुतमित्यर्थः, तच्च सञ्ज्ञाक्षरं व्यञ्जनाक्षरं च द्रष्टव्यम्। 5

अथ किं तत् सञ्ज्ञाक्षरम् ?, सञ्ज्ञाक्षरम् अक्षरस्याकारादेः संस्थानाकृति संस्थानाकारः। तथाहि– सञ्ज्ञायतेऽनयेति **सञ्ज्ञा** नाम, तन्निबन्धनं-तत्कारणमक्षरं संज्ञाक्षरम्, संज्ञायाश्च निबन्धनमाकृतिविशेषः, आकृतिविशेष एव नाम्नः करणाद् व्यवहरणाच्च, ततोऽक्षरस्य पट्टिकादौ संस्थापितस्य संस्थानाकृतिः संज्ञाक्षरमुच्यते। तच्च ब्राह्म्यादिलिपिभेदतोऽनेकप्रकारम्, तत्र **नागरीं** लिपिमधिकृत्य किञ्चित् प्रदर्श्यते- मध्यस्फाटितचुल्लीसन्निवेशसदृशो रेखासन्निवेशविशेषो णकारः, वक्रीभूतश्वपुच्छ-सन्निवेशसदृशो ढकार इत्यादि। **सेत्तं** इत्यादि, तदेतत् संज्ञाक्षरम्॥ 10

अथ किं तद् व्यञ्जनाक्षरम् ?, आचार्य आह– **व्यञ्जनाक्षरमक्षरस्य व्यञ्जनाभिलापः**, तथाहि– व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं भाष्यमाणमकारादिकं वर्णजातम्, तस्य विवक्षितार्थाभिव्यञ्जकत्वात्, व्यञ्जनं च तदक्षरं च व्यञ्जनाक्षरम्, ततो युक्तमुक्तं 'व्यञ्जनाक्षरमक्षरस्य व्यञ्जनाभिलापः'। **अक्षरस्य** अकारादेर्वर्णजातस्य व्यञ्जनेन-अत्र भावे अनट्, व्यञ्जकत्वे**नाभिलापः** उच्चारणम्, अर्थव्यञ्जकत्वेनोच्चार्यमाणमकारादिवर्णजातमित्यर्थः॥ 15 20

से किं तं इत्यादि। अथ किं तद् लब्ध्यक्षरम् ?, **लब्धिः** उपयोगः, स चेह प्रस्तावात् शब्दार्थपर्यालोचनानुसारी गृह्यते, लब्धिरूपमक्षरं लब्ध्यक्षरम्, भावश्रुतमित्यर्थः, **अक्खरलद्धियस्स** इत्यादि, अक्षरे-अक्षरस्योच्चारणेऽवगमे वा लब्धिर्यस्य सोऽक्षरलब्धिकः तस्य, अकाराद्यक्षरानुविद्धश्रुतलब्धिसमन्वितस्येत्यर्थः,

१. °क्षरं वेदि° खं० पा० ॥

लब्ध्यक्षरं भावश्रुतं समुत्पद्यते, शब्दादिग्रहणसमनन्तरमिन्द्रिय-मनोनिमित्तं शब्दार्थपर्यालोचनानुसारि 'शाङ्खोऽयम्' इत्याद्यक्षरानुविद्धं विज्ञानमुपजायते इत्यर्थः।

नन्विदं लब्ध्यक्षरं सञ्ज्ञिनामेव पुरुषादीनामुपपद्यते नासञ्ज्ञिनामेकेन्द्रियादीनाम्, तेषामकारादिवर्णानामवगमे उच्चारणे वा लब्ध्यसम्भवात्। न हि तेषां परोपदेशश्रवणं सम्भवति येनाकारदिवर्णानामवगमादि भवेत्, अथ चैकेन्द्रियादीनामपि लब्ध्यक्षरमिष्यते, तथाहि– पार्थिवादीनामपि भावश्रुतमुपवर्ण्यते– **दव्वसुयाऽभावम्मि वि, भावसुयं पत्थिवाईणं** [**विशेषाव०** १०३] इति वचनप्रामाण्यात्, भावश्रुतं च शब्दार्थपर्यालोचनानुसारि विज्ञानम्, शब्दार्थपर्यालोचनं चाक्षरमन्तरेण न भवतीति, सत्यमेतत्, किन्तु यद्यपि तेषामेकेन्द्रियादीनां परोपदेशश्रवणासम्भवस्तथापि तेषां तथाविधक्षयोपशमभावतः कश्चिदव्यक्तोऽक्षरलाभो भवति यद्वशादक्षरानुषक्तं श्रुतज्ञानमुपजायते, इत्थं चैतदङ्गीकर्त्तव्यम्, तथाहि– तेषामप्याहाराद्यभिलाष उपजायते, अभिलाषश्च प्रार्थना, सा च 'यदीदमहं प्राप्नोमि ततो भव्यं भवति' इत्याद्यक्षरानुविद्धैव, ततस्तेषामपि काचिदव्यक्ताऽक्षरलब्धिरवश्यं प्रतिपत्तव्या, ततस्तेषामपि लब्ध्यक्षरं सम्भवतीति न कश्चिद्दोषः।

तच्च लब्ध्यक्षरं षोढा, तद्यथा– **श्रोत्रेन्द्रियलब्ध्यक्षरम्** इत्यादि। इह यत् श्रोत्रेन्द्रियेण शब्दश्रवणे सति 'शाङ्खोऽयम्' इत्याद्यक्षरानुविद्धं शब्दार्थपर्यालोचनानुसारि विज्ञानं तत् श्रोत्रेन्द्रियलब्ध्यक्षरम्, तस्य श्रोत्रेन्द्रियनिमित्तत्वात्। यत् पुनश्चक्षुषा आम्रफलाद्युपलभ्य 'आम्रफलम्' इत्याद्यक्षरानुविद्धं शब्दार्थपर्यालोचनात्मकं विज्ञानं तत् चक्षुरिन्द्रियलब्ध्यक्षरम्। एवं शेषेन्द्रियलब्ध्यक्षरमपि भावनीयम्। **सेत्तं** इत्यादि, तदेतद् लब्ध्यक्षरम्, तदेतदक्षरश्रुतम्॥

से किं तमित्यादि। अथ किं तदनक्षरश्रुतम् ? अनक्षरात्मकं श्रुतमनक्षरश्रुतम्। आचार्य आह– अनक्षरश्रुतमनेकविधम्-अनेकप्रकारं प्रज्ञप्तम्, तद्यथा– **ऊससियं** इत्यादि। उच्छ्वसनमुच्छ्वसितम्, भावे निष्ठाप्रत्ययः। तथा निःश्वसनं निःश्वसितम्। निष्ठीवनं निष्ठ्यूतम्। काशनं काशितम्। चशब्दः समुच्चयार्थः। क्षवणं क्षुतम्। एषोऽपि चशब्दः

१. तह दव्वसुयाभावे भावसुयं - **विशेषावश्यके** ॥

समुच्चयार्थः, परमस्य व्यवहितः प्रयोगः, सेंटिकादिकं चेत्येवं द्रष्टव्यः। तथा **निस्सिंघनं** निस्सिङ्घितम्। अनुस्वारवद् अनुस्वारम्, सानुस्वारमित्यर्थः। तथा सेण्टितादिकं चानक्षरश्रुतम्। इह उच्छ्वसितादि द्रव्यश्रुतं द्रष्टव्यम्, ध्वनिमात्रत्वाद् भावश्रुतकारण-कार्यत्वाच्च। तथाहि— यदाऽभिसन्धिपूर्वकं सविशेषतरमुच्छ्वसितादि कस्यापि पुंसः कस्यचिदर्थस्य ज्ञप्तये प्रयुङ्क्ते तदा तद् उच्छ्वसितादि प्रयोक्तुर्भावश्रुतस्य फलं श्रोतुश्च भावश्रुतस्य कारणं भवति ततो द्रव्यश्रुतमित्युच्यते। अथ ब्रवीथाः— एवं तर्हि करादि-चेष्टाया अपि द्रव्यश्रुतत्वप्रसङ्गः, साऽपि हि बुद्धिपूर्विका क्रियमाणा तत्कर्तुर्भावश्रुतस्य फलं द्रष्टुश्च भावश्रुतस्य कारणमिति, नैष दोषः, श्रुतमित्यन्वर्थाश्रयणात्, तथाहि— यत् श्रूयते तत् श्रुतमित्युच्यते, न च करादिचेष्टा श्रूयते ततो न तत्र द्रव्यश्रुतत्वप्रसङ्गः, उच्छ्वसितादिकं तु श्रूयते अनक्षरात्मकं च ततस्तदनक्षरश्रुतमित्युक्तम्॥ **सेत्तं** इत्यादि, तदेतदनक्षरश्रुतम्।

[सू० ६७] से किं तं सण्णिसुयं ? सण्णिसुयं तिविहं पण्णत्तं, तंजहा— कालिओवएसेणं १, हेऊवएसेणं २, दिट्ठिवादोवदेसेणं ३।

[सू० ६८] से किं तं कालिओवएसेणं ? कालिओवएसेणं जस्स णं अत्थि ईहा अपोहो मग्गणा गवेसणा चिंता वीमंसा से णं सण्णि त्ति लब्भइ, जस्स णं णत्थि ईहा अपोहो मग्गणा गवेसणा चिंता वीमंसा से णं असण्णीति लब्भइ, सेत्तं कालिओवएसेणं १।

[सू० ६९] से किं तं हेऊवएसेणं ? हेऊवएसेणं जस्स णं अत्थि अभिसंधारणपुव्विया करणसत्ती से णं सण्णीति लब्भइ, जस्स णं णत्थि अभिसंधारणपुव्विया करणसत्ती से णं असण्णि त्ति लब्भइ, सेत्तं हेऊवएसेणं २।

[सू० ७०] से किं तं दिट्ठिवाओवएसेणं ? दिट्ठिवाओवएसेणं सण्णिसुयस्स खओवसमेणं सण्णी लब्भति, असण्णिसुयस्स खओवसमेणं असण्णी लब्भति ३। सेत्तं दिट्ठिवाओवएसेणं। सेत्तं सण्णिसुयं, सेत्तं असण्णिसुयं।

से किं तं इत्यादि। अथ किं तत् **संज्ञिश्रुतम्** ? संज्ञानं संज्ञा, साऽस्यास्तीति

संज्ञी, तस्य श्रुतं संज्ञिश्रुतम्। आचार्य आह– सञ्ज्ञिश्रुतं त्रिविधं प्रज्ञप्तम्, सञ्ज्ञिनस्त्रिभेदत्वात्। तदेव त्रिभेदत्वं सञ्ज्ञिनो दर्शयति, तद्यथा– कालिक्युपदेशेन १, हेतूपदेशेन २, दृष्टिवादोपदेशेन ३। तत्र कालिक्युपदेशेनेत्यत्रादिपदलोपाद् दीर्घकालिक्युपदेशेनेति द्रष्टव्यम्।

से किं तं इत्यादि, अथ कोऽयं कालिक्युपदेशेन सञ्ज्ञी ?, इह दीर्घकालिकी सञ्ज्ञा कालिकीति व्यपदिश्यते, आदिपदलोपात्, उपदेशनमुपदेशः-कथनमित्यर्थः दीर्घकालिक्या उपदेशः कालिक्युपदेशस्तेन। आचार्य आह– कालिक्युपदेशेन सञ्ज्ञी स उच्यते यस्य प्राणिनः **अस्ति** विद्यते **ईहा** सदर्थपर्यालोचनम्, **अपोहः** निश्चयः, **मार्गणा** अन्वयधर्मान्वेषणरूपा, **गवेषणा** व्यतिरेकधर्मस्वरूपपर्यालोचनम्, **चिन्ता** कथमिदं भूतं कथं चेदं सम्प्रति कर्त्तव्यं कथं चैतद् भविष्यतीति पर्यालोचनम्, विमर्शनं **विमर्शः** इदमित्थमेव घटते इत्थं वा तदभूत् इत्थमेव वा तद् भावीति यथावस्थितवस्तुस्वरूपनिर्णयः, स प्राणी **णं** इति वाक्यालङ्कारे सञ्ज्ञीति लभ्यते, स च गर्भव्युत्क्रान्तिकः पुरुषादिरौपपातिकश्च देवादिर्मनःपर्याप्तियुक्तो विज्ञेयः, तस्यैव त्रिकालविषयचिन्ता-विमर्शादिसम्भवात्। आह च **भाष्यकृत्**–

इह दीहकालिगी कालिगि त्ति सन्ना जया सुदीहं पि।
संभरइ भूयमेस्सं, चिंतेइ य किह णु कायव्वं ?॥१॥
कालियसन्नि त्ति तओ, जस्स तई सो य जो मणोजोग्गे।
खंधेऽणंते घेत्तुं, मन्नइ तल्लद्धिसंपन्नो॥२॥ [**विशेषा*** ० ५०८-५०९]

एष च प्रायः सर्वमप्यर्थं स्फुटरूपमुपलभते। तथाहि– यथा चक्षुष्मान् प्रदीपादिप्रकाशेन स्फुटमर्थमुपलभते तथैषोऽपि मनोलब्धिसम्पन्नो मनोद्रव्यावष्टम्भसमुत्थविमर्शवशतः पूर्वापरानुसन्धानेन यथावस्थितं स्फुटमर्थमुपलभते। यस्य पुनर्नास्ति ईहा अपोहो मार्गणा गवेषणा चिन्ता विमर्शः सोऽसंज्ञीति लभ्यते। स च सम्मूर्च्छिमपञ्चेन्द्रिय-विकलेन्द्रियादिर्विज्ञेयः, स हि स्वल्प-स्वल्पतरमनोलब्धिसम्पन्नत्वादस्फुटमस्फुटतरमर्थं जानाति। तथाहि– सञ्ज्ञिपञ्चेन्द्रियापेक्षया सम्मूर्च्छिमपञ्चेन्द्रियोऽस्फुटमर्थं जानाति, ततोऽप्यस्फुटं चतुरिन्द्रियः, ततोऽप्यस्फुटतरं त्रीन्द्रियः,

ततोऽप्यस्फुटतमं द्वीन्द्रियः, ततोऽप्यत्यस्फुटतममेकेन्द्रियः, तस्य प्रायो मनोद्रव्यासम्भवात्, केवलमव्यक्तमेव किञ्चिदतीवाल्पतरं मनो द्रष्टव्यम्, यद्वशादाहारादिसंज्ञा अव्यक्तरूपाः प्रादुष्यन्ति। **सेत्तं** इत्यादि, सोऽयं कालिक्युपदेशेन सञ्ज्ञी॥

से किं तं इत्यादि, अथ कोऽयं हेतूपदेशेन संज्ञी ?, हेतुः कारणं निमित्तमित्यनर्थान्तरम्, उपदेशनमुपदेशः, हेतोरुपदेशः हेतूपदेशस्तेन, किमुक्तं भवति ? कोऽयं सञ्ज्ञित्वनिबन्धनं हेतुमुपलभ्य कालिक्युपदेशेनासंज्ञ्यपि संज्ञीति व्यवह्रियते ?। आचार्य आह– हेतूपदेशेन सञ्ज्ञी यस्य प्राणिनः **अस्ति** विद्यते **अभिसन्धारणम्** अव्यक्तेन व्यक्तेन वा विज्ञानेनाऽऽलोचनं **तत्पूर्विका** तत्कारणिका **करणशक्तिः** करणं क्रिया तस्यां **शक्तिः** प्रवृत्तिः, स प्राणी **णं** इति वाक्यालङ्कारे हेतूपदेशेन सञ्ज्ञीति लभ्यते। एतदुक्तं भवति– यो बुद्धिपूर्वकं स्वदेहपरिपालनार्थमिष्टेष्वाहारादिषु वस्तुषु प्रवर्त्तते अनिष्टेभ्यश्च निवर्त्तते स हेतूपदेशेन सञ्ज्ञी, स च द्वीन्द्रियादिरपि वेदितव्यः। तथाहि– इष्टा-ऽनिष्टविषयप्रवृत्ति-निवृत्तिसञ्चिन्तनं न मनोव्यापारमन्तरेण सम्भवति, मनसा च पर्यालोचनं संज्ञा, सा च द्वीन्द्रियादेरपि विद्यते, तस्यापि प्रतिनियतेष्टा-ऽनिष्टविषयप्रवृत्ति-निवृत्तिदर्शनात्, ततो द्वीन्द्रियादिरपि हेतूपदेशेन सञ्ज्ञी लभ्यते, नवरमस्य सञ्चिन्तनं प्रायो वर्त्तमानकालविषयं न भूत-भविष्यद्विषयमिति न कालिक्युपदेशेन संज्ञी लभ्यते। यस्य पुनर्नास्त्यभिसन्धारणपूर्विका करणशक्तिः स प्राणी **णं** इति वाक्यालङ्कारे हेतूपदेशेनाप्यसंज्ञी लभ्यते, स च पृथिव्यादिरेकेन्द्रियो वेदितव्यः, तस्याभिसन्धिपूर्वकमिष्टा-ऽनिष्टप्रवृत्ति-निवृत्त्यसम्भवात्। या अपि चाऽऽहारादिसंज्ञाः पृथिव्यादीनां वर्त्तन्ते ता अप्यत्यन्तमव्यक्तरूपा इति तदपेक्षयाऽपि न तेषां सञ्ज्ञित्वव्यपदेशः। उक्तं च **भाष्यकृता**–

जे पुण संचिंतेउं, इट्ठा-ऽणिट्ठेसु विसयवत्थूसु।
वत्तंति नियत्तंति य, सदेहपरिपालणाहेउं॥१॥
पाएण संपइ च्चिय, कालम्मि न याइदीहकालण्णू।
ते हेउवायसण्णी, निच्चेट्ठा होंति अस्सण्णी॥२॥ [**विशेषा०** ५१५-५१६]

अन्यत्रापि हेतूपदेशेन संज्ञित्वमाश्रित्योक्तम्–

कृमि-कीट-पतङ्गाद्याः, समनस्का जङ्गमाश्चतुर्भेदाः।
अमनस्काः पञ्चविधाः, पृथिवीकायादयो जीवाः॥१॥ [ ]

सेत्तं इत्यादि, सोऽयं हेतूपदेशेन संज्ञी॥

से किं तं इत्यादि, अथ कोऽयं दृष्टिवादोपदेशेन सञ्ज्ञी ?, दृष्टिः दर्शनं-सम्यक्त्वादि, वदनं वादः, दृष्टीनां वादो दृष्टिवादः, तदुपदेशेन तदपेक्षयेत्यर्थः। आचार्य आह– दृष्टिवादोपदेशेन सञ्ज्ञिश्रुतस्य क्षयोपशमेन[१] संज्ञी लभ्यते, संज्ञानं **संज्ञा** सम्यग्ज्ञानं तदस्यास्ति स **संज्ञी** सम्यग्दृष्टिस्तस्य यत् श्रुतं तत् संज्ञिश्रुतम्, सम्यक्श्रुतमिति भावार्थः, तस्य **क्षयोपशमेन** तदावारकस्य कर्मणः क्षयोपशमभावेन सञ्ज्ञी लभ्यते, किमुक्तं भवति ? सम्यग्दृष्टिः क्षायोपशमिकज्ञानयुक्तो दृष्टिवादोपदेशेन सञ्ज्ञी भवति। स च यथाशक्ति रागादिनिग्रहपरो वेदितव्यः, स हि सम्यग्दृष्टिः सम्यग्ज्ञानी वा यो रागादीन् निगृह्णाति, अन्यथा हिता-ऽहितप्रवृत्ति-निवृत्त्यभावतः सम्यग्दृष्टित्वाद्ययोगात्। उक्तं च–

तद् ज्ञानमेव न भवति, यस्मिन्नुदिते विभाति रागगणः।
तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ?॥१॥ [ ]

अन्यस्तु मिथ्यादृष्टिरसञ्ज्ञी, तथा चाऽऽह– 'असञ्ज्ञिश्रुतस्य' मिथ्याश्रुतस्य क्षयोपशमेन असञ्ज्ञीति लभ्यते। **सेत्तं** इत्यादि निगमनम्, सोऽयं दृष्टिवादोपदेशेन सञ्ज्ञी। तदेवं सञ्ज्ञिनस्त्रिभेदत्वात् श्रुतमपि तदुपाधिभेदात् त्रिविधमुपन्यस्तम्।

अत्राऽऽह– ननु प्रथमं हेतूपदेशेन संज्ञी वक्तुं युज्यते, हेतूपदेशेनाल्पमनोलब्धि-सम्पन्नस्यापि द्वीन्द्रियादेः सञ्ज्ञित्वेनाभ्युपगमात् तस्य चाविशुद्धतरत्वात्, ततः कालिक्युपदेशेन, हेतूपदेशसञ्ज्ञ्यपेक्षया[२] कालिक्युपदेशेन सञ्ज्ञिनो मनःपर्याप्तियुक्ततया विशुद्धत्वात्, तत् किमर्थमुत्क्रमोपन्यासः ?, उच्यते, इह सर्वत्र सूत्रे यत्र क्वचित् सञ्ज्ञी असञ्ज्ञी वा परिगृह्यते तत्र सर्वत्रापि प्रायः कालिक्युपदेशेन गृह्यते, न हेतूपदेशेन, नापि दृष्टिवादोपदेशेन, तत एतत्सम्प्रत्ययार्थं प्रथमं कालिक्युपदेशेन सञ्ज्ञिनो ग्रहणम्। उक्तं च–

---

१. °न **युक्तो दृष्टिसंज्ञी** जे१,२ मां० ॥ २. °**संज्ञापे**° पा० देसं० मांसं० विना॥

सन्नि त्ति असन्नि त्ति य, सव्वसुए कालिओवएसेणं।
पायं संववहारो, कीरइ तेणाइओ स कओ॥१॥ [विशेषा० ५२६]

ततोऽनन्तरमप्रधानत्वाद् हेतूपदेशेन सञ्ज्ञिनो ग्रहणम्, ततः सर्वप्रधानत्वादन्ते दृष्टिवादोपदेशेनेति। **सेत्तं** इत्यादि, तदेतत् सञ्ज्ञिश्रुतम्। असञ्ज्ञिश्रुतमपि प्रतिपक्षाभिधानादेव प्रतिपादितम्, तत आह– **सेत्तं असन्निसुयं** तदेतद् असञ्ज्ञिश्रुतम्॥

[सू० ७१(१)] से किं तं सम्मसुयं ? सम्मसुयं जं इमं अरहंतेहिं भगवंतेहिं उप्पण्णणाण-दंसणधरेहिं तेलोक्कणिरिक्खित-महिय-पूइएहिं तीय-पच्चुप्पण्ण-मणागयजाणएहिं सव्वण्णूहिं सव्वदरिसीहिं पणीयं दुवालसंगं गणिपिडगं, तंजहा– आयारो १, सूयगडो २, ठाणं ३, समवाओ ४, विवाहपण्णत्ती ५, णायाधम्मकहाओ ६, उवासगदसाओ ७, अंतगडदसाओ ८, अणुत्तरोववा-इयदसाओ ९, पण्हावागरणाइं १०, विवागसुतं ११, दिट्ठिवाओ १२।

(२) इच्चेयं दुवालसंगं गणिपिडगं चोद्दसपुव्विस्स सम्मसुतं, अभिण्णदसपुव्विस्स सम्मसुतं, तेण परं भिण्णेसु भयणा, सेत्तं सम्मसुतं।

से किं तं इत्यादि, अथ किं तत् सम्यक्श्रुतम् ?। आचार्य आह-सम्यक्श्रुतं यदिदमर्हद्भिः अशोकाद्यष्टमहाप्रातिहार्यरूपां पूजामर्हन्तीत्यर्हन्तः तीर्थकरास्तैरर्हद्भिः, ते चार्हन्तः कैश्चित् शुद्धद्रव्यास्तिकनयमतानुसारिभिरनादिशुद्धा एव मुक्तात्मानोऽभ्युपगम्यन्ते। तथा च ते पठन्ति–

ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः।
ऐश्वर्यं चैव धर्मश्च, सहसिद्धं चतुष्टयम्॥१॥ [शास्त्रवार्ता० ३।२, द्वात्रिंश० १६।२]

इत्यादि। एवंरूपाश्चापि ते बहव इष्यन्ते स्थापनादिद्वारेण च विशिष्टां पूजामर्हन्ति ततोऽर्हन्तोऽप्युच्यन्ते ततस्तद्व्यवच्छेदार्थं विशेषणान्तरमाह– **भगवद्भिः** भगः-समग्रैश्वर्यादिरूपः, उक्तं च–

ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः।
धर्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना॥१॥ [ ]

भगो विद्यते येषां ते भगवन्तः तैर्भगवद्भिः, इहानादिशुद्धानां रूपमात्रमपि नोपपद्यते

किं पुनः समग्ररूपम्, अशरीरत्वात्, शरीरस्य च रागादिकार्यतया तेषां रागादिरहितानामसम्भवात्, ततो भगवद्भिरित्यनेन परपरिकल्पितानादिशुद्धार्हद्व्यवच्छेदमाह। अथ मन्येथाः-अनादिशुद्धा अप्यर्हन्तो यदा स्वेच्छया समग्ररूपादिगुणोपेतं शरीरमारचयन्ति तदा तेऽपि भगवन्तो भवन्ति ततः कथं तेषां व्युदासः ? इत्याशङ्कापनोदार्थं भूयोऽपि विशेषणान्तरमाह– **उत्पन्नज्ञान-दर्शनधरैः** उत्पन्नं **ज्ञानं** केवलज्ञानं **दर्शनं** केवलदर्शनं धरन्तीति उत्पन्नज्ञान-दर्शनधराः, **लिहादिभ्यः** [*मलय० कृ० १।३३] इत्यच् प्रत्ययः, तैः, न च येऽनादिशुद्धास्ते उत्पन्नज्ञान-दर्शनधरा भवन्ति, 'ज्ञानमप्रतिघं यस्य' इत्यादिवचनविरोधात्, तत उत्पन्नज्ञान-दर्शनधरैरिति विशेषणेन तेषां व्यवच्छेदो भवति। [ग्रन्थाग्रम्-६०००]

ननु यद्येवं तर्हि उत्पन्नज्ञान-दर्शनधरैरित्येतावदेवास्ताम्, अलं 'भगवद्भिः' इति विशेषणोपादानेन, तदयुक्तम्, उत्पन्नज्ञान-दर्शनधरा हि सामान्यकेवलिनोऽपि भवन्ति न च तेषामवश्यं समग्ररूपादिसम्भवः ततस्तत्कल्पानर्हतो मा ज्ञासिषुरमी विनेयजना इति समग्ररूपादिगुणप्रतिपत्त्यर्थं भगवद्भिरिति विशेषणोपादानम्। तदेवं शुद्धद्रव्यास्तिकनयमतानुसारिकल्पितमुक्तव्यवच्छेदः कृतः, सम्प्रति पर्यायास्तिकनयमतानुसारिपरिकल्पितमुक्तव्यवच्छेदार्थं विशेषणान्तरमाह–**'त्रैलोक्यनिरीक्षित-महित-पूजितैः'** त्रयो लोकास्त्रिलोकाः भवनपति-व्यन्तर-विद्याधर-ज्योतिष्क-वैमानिकाः, त्रिलोका एव त्रैलोक्यम्, भेषजादिभ्यः[१] त्वात् स्वार्थे ट्यण् प्रत्ययः, निरीक्षिताश्च ते महिताश्च ते पूजिताश्च ते निरीक्षित-महित-पूजिताः, त्रैलोक्येन निरीक्षित-महित-पूजिताः त्रैलोक्यनिरीक्षित-महित-पूजिताः। तत्र **निरीक्षिताः** मनोरथपरम्परासम्पत्तिसम्भावनविनिश्चयसमुत्थसम्मदविकाशिलोचनैरालोकिताः, **महिताः** यथावस्थितानन्यसाधारणगुणोत्कीर्त्तनलक्षणेन भावस्तवेनार्चिताः, **पूजिताः** सुगन्धिपुष्पप्रकरप्रक्षेपादिना द्रव्यस्तवेन। तत्र सुगता अपि पर्यायास्तिकनयमतानुसारिभिस्त्रैलोक्यनिरीक्षित-महित-पूजिता इष्यन्ते, तथा चाह **स्वयम्भूः**–

देवागम-नभोयान-चामरादिविभूतयः।
मायाविष्वपि दृश्यन्ते, नातस्त्वमसि नो महान्॥१॥ [आप्तमी० १] इति,

---

१. **भेषजादिभ्यष्ट्यण्** ।७।२।१६४॥ - सिद्धहेम०। **भेषजादिहोत्रादेवेभ्यष्ट्यण् छतल्**।३।४।१२७॥ - शाकटा०॥

ततस्तद्व्यवच्छेदार्थं विशेषणान्तरमाह– **अतीत-प्रत्युत्पन्ना-ऽनागतज्ञैः**, न चातीता-ऽनागतज्ञाः सुगताः सम्भवन्ति, तेषामेकान्तक्षणिकत्वाभ्युपगमेन सर्वथाऽतीता-ऽनागतयोरसत्त्वात्, असतां च ग्रहणासम्भवादिति, अत्र बहु वक्तव्यं तच्च प्रायः प्रागेवोक्तम् अन्यत्र च [१]**धर्मसङ्ग्रहणिटीका**दाविति नोच्यते। इह व्यवहारनय-मतानुसारिभिः कैश्चिद् ऋषयोऽप्यतीत-प्रत्युत्पन्ना-ऽनागतज्ञा इष्यन्ते, तथा च **तद्ग्रन्थः**– 5

ऋषयः संयतात्मानः, फल-मूला-ऽनिलाशनाः।
तपसैव प्रपश्यन्ति, त्रैलोक्यं सचराचरम्॥१॥
अतीता-ऽनागतान् भावान्, वर्त्तमानांश्च भारत !।
ज्ञानालोकेन पश्यन्ति, त्यक्तसङ्गा जितेन्द्रियाः॥२॥ [ ]

इत्यादि, ततस्तद्व्यवच्छेदार्थमाह– **सर्वज्ञैः सर्वदर्शिभिः**, ते तु ऋषयः सर्वज्ञाः 10 सर्वदर्शिनश्च न भवन्ति ततस्तेषां व्युदासः। तदेवं द्रव्यास्तिक-पर्यायास्तिक-नयमतव्यवच्छेदफलतया विशेषणसाफल्यमुक्तम्, विचित्रनयमताभिज्ञेन तु अन्यथाऽपि विशेषणसाफल्यं वाच्यम्, न कश्चिद् विरोधः। **प्रणीतम्** अर्थकथनद्वारेण प्ररूपितम्, किं तत् ? इत्याह– **द्वादशाङ्गम्** श्रुतरूपस्य परमपुरुषस्याङ्गानीवाङ्गानि द्वादश अङ्गानि-आचारादीनि यस्मिन् तद् द्वादशाङ्गम्, **गणिपिडगं** ति **गणः** गच्छो गुणगणो 15 वाऽस्यास्तीति **गणी** आचार्यस्तस्य पिटकमिव **पिटकं** सर्वस्वमित्यर्थः गणिपिटकम्। अथवा गणिशब्दः परिच्छेदवचनोऽ[प्य]स्ति, तथा चोक्तम्–

आयारम्मि अहीए, जं नाओ होइ समणधम्मो उ।
तम्हा आयारधरो, भन्नइ पढमं गणिट्ठाणं॥१॥ [*आचा० नि० १०]

ततश्च गणीनां पिटकं गणिपिटकम्, परिच्छेदसमूह इत्यर्थः। तद्यथा– **आयारो** 20 इत्यादि पाठसिद्धं यावद् **दृष्टिवादः**। अनङ्गप्रविष्टमप्यावश्यकादि तत्त्वतोऽर्हत्प्रणीतत्वात् परमार्थतो द्वादशाङ्गातिरिक्तार्थाभावाच्च द्वादशाङ्गग्रहणेन गृहीतं द्रष्टव्यम्। इदं च द्वादशाङ्गादि सर्वमेव द्रव्यास्तिकनयमतापेक्षया तदभिधेयपञ्चास्तिकायभाववद् नित्यम् स्वाम्यसम्बन्धचिन्तायां च स्वरूपेण चिन्त्यमानं सम्यक्श्रुतम्, स्वामिसम्बन्धचिन्तायां

---

१. धर्मसंग्रहणिटीका गा० १३१५॥

तु सम्यग्दृष्टेः सम्यक्श्रुतं मिथ्यादृष्टेर्मिथ्याश्रुतम्। एतदेव श्रुतपरिमाणतो[१] व्यक्तं दर्शयति-इत्येतद् द्वादशाङ्गं गणिपिटकं यश्चतुर्दशपूर्वी तस्य सकलमपि सामायिकादि बिन्दुसारपर्यवसानं नियमात् सम्यक्श्रुतम्, ततोऽधोमुखपरिहान्या नियमतः सर्वं सम्यक्श्रुतं तावद् वक्तव्यं यावद**भिन्नदशपूर्विणः** सम्पूर्णदशपूर्वधरस्य, सम्पूर्णदश-पूर्वधरत्वादिकं हि नियमतः सम्यग्दृष्टेरेव, न मिथ्यादृष्टेः, तथास्वाभाव्यात्। तथाहि-यथा अभव्यो ग्रन्थिदेशमुपागतोऽपि तथास्वभावत्वाद् न ग्रन्थेर्भिदामाधातुमलम्, एवं मिथ्यादृष्टिरपि श्रुतमवगाहमानः प्रकर्षतोऽपि तावदवगाहते यावत् किञ्चिन्न्यूनानि दश पूर्वाणि भवन्ति, परिपूर्णानि तु तानि नावगाढुं शक्नोति, तथास्वभावत्वादिति।

तेण परं भिन्नेसु भयणा, अत्र **तेण** इति [२]व्यत्ययोऽप्यासाम्* [ ] इति प्राकृतलक्षणवशात् पञ्चम्यर्थे तृतीया, ततोऽयमर्थः-ततः सम्पूर्णदशपूर्वधरत्वात् पश्चानुपूर्व्या परं भिन्नेषु दशसु पूर्वेषु **भजना** विकल्पना, कदाचित् सम्यक्श्रुतं कदाचिन्मिथ्याश्रुतमित्यर्थः। इयमत्र भावना-सम्यग्दृष्टेः प्रशमादिगुणगणोपेतस्य सम्यक्श्रुतम्, यथावस्थितार्थतया तस्य सम्यक् परिणमनात्, मिथ्यादृष्टेस्तु मिथ्याश्रुतम्, विपरीतार्थतया तस्य परिणमनात्। **'सेत्तं'** इत्यादि, तदेतत् सम्यक्श्रुतम्॥

[सू० ७२ (१)] से किं तं मिच्छसुतं ? मिच्छसुतं जं इमं अण्णाणिएहिं मिच्छदिट्ठीहिं सच्छंदबुद्धि-मतिवियप्पियं, तंजहा— भारहं १, रामायणं २, हंभीमासुरक्खं ३, कोडल्लयं ४, सगभद्दियाओ ५, खोडमुहं ६, कप्पासियं ७, नामसुहुमं ८, कणगसत्तरी ९, वइसेसियं १०, बुद्धवयणं ११, वेसितं १२, कविलं १३, लोगायतं १४, सट्ठितंतं १५, माढरं १६, पुराणं १७, वागरणं १८, णाडगादी १९। अहवा बावत्तरिकलाओ चत्तारि य वेदा संगोवंगा।

(२) एयाइं मिच्छदिट्ठिस्स मिच्छत्तपरिग्गहियाइं मिच्छसुतं, एताणि चेव सम्मदिट्ठिस्स सम्मत्तपरिग्गहियाइं सम्मसुयं। अहवा मिच्छदिट्ठिस्स वि सम्मसुयं, कम्हा ? सम्मत्तहेउत्तणओ, जम्हा ते मिच्छदिट्ठिया तेहिं चेव समएहिं चोइया समाणा केइ सपक्खदिट्ठीओ चयंति[३]। सेत्तं मिच्छसुयं।

---

१. °परिणामतो पा० देसं० ॥ २. **पञ्चम्यास्तृतीया च** - हैमप्रा० ३।१३६ ॥ ३. **वमेंति** जे० मो० विना॥

से किं तं इत्यादि। अथ किं तद् मिथ्याश्रुतम् ?। आचार्य आह– मिथ्याश्रुतं यदिदमज्ञानिकैः, तत्र यथाऽल्पधना लोकेऽधना उच्यन्ते एवं सम्यग्दृष्टयोऽप्यल्पज्ञान-भावादज्ञानिकाः प्रोच्यन्ते तत आह– मिथ्यादृष्टिभिः, किम् ? **स्वच्छन्दबुद्धि-मतिविकल्पितम्**, तत्रावग्रहेहे **बुद्धिः**, अपाय-धारणे **मतिः**, **स्वच्छन्देन** स्वाभिप्रायेण तत्त्वतः सर्वज्ञप्रणीतानुसारमन्तरेणेत्यर्थः, बुद्धि-मतिभ्यां विकल्पितं स्वच्छन्दबुद्धि-मतिविकल्पितम्, स्वबुद्धिकल्पनाशिल्पिनिर्मितमित्यर्थः, तद्यथा– '**भारत**मित्यादि यावत् **चत्तारि य [वेया] संगोवंगा**'। **भारता**दयश्च ग्रन्था लोके प्रसिद्धाः, ततो लोकत एव तेषां स्वरूपमवगन्तव्यम्। ते च स्वरूपतो यथावस्थितवस्त्वभिधानविकलतया मिथ्याश्रुतमवसेयाः। एतेऽपि च स्वामिसम्बन्धचिन्तायां भाज्याः, तथा चाह– **एयाइं** इत्यादि, **एतानि** भारतादीनि शास्त्राणि मिथ्यादृष्टेर्मिथ्यात्वपरिगृहीतानि भवन्ति ततो विपरीताभिनिवेशबुद्धिहेतुत्वाद् मिथ्याश्रुतम्, एतान्येव च भारतादीनि शास्त्राणि सम्यग्दृष्टेः सम्यक्त्वपरिगृहीतानि भवन्ति सम्यक्त्वेन-यथावस्थिताऽसारतापरिभावनरूपेण परिगृहीतानि भवन्ति ततस्तानि तस्य सम्यक्श्रुतम्, तद्गतासारतादर्शनेन स्थिरतर-सम्यक्त्वपरिणामहेतुत्वात्। **अहवा** इत्यादि अथवा मिथ्यादृष्टेरपि सतः कस्यचिदेतानि भारतादीनि शास्त्राणि सम्यक्श्रुतम्, शिष्य आह– कस्मात् ?। आचार्य आह– सम्यक्त्वहेतुत्वात्। सम्यक्त्वहेतुत्वमेव भावयति– **जम्हे**त्यादि। यस्मात् ते मिथ्यादृष्टयः तैरेव **समयैः** सिद्धान्तैर्वेदादिभिः पूर्वापरविरोधेन-'यथा रागादिपरीतः पुरुषस्ताव-न्नातीन्द्रियमर्थमवबुध्यते, रागादिपरीतत्वात्, अस्मादृशवत्, वेदेषु चातीन्द्रियाः प्रायोऽर्था व्यावर्ण्यन्ते, अतीन्द्रियार्थदर्शी च वीतरागः सर्वज्ञो नाभ्युपगम्यते, ततः कथं वेदार्थप्रतीतिः' ? इत्येवमादिलक्षणेन चोदिताः सन्तः **केचन** विवेकिनः **सत्या(त्यक्या)**दय इव **स्वपक्षदृष्टीः** स्वदर्शनानि त्यजन्ति, भगवच्छासनं प्रतिपद्यन्ते इत्यर्थः, तत एवं सम्यक्त्वहेतुत्वाद् वेदादीन्यपि शास्त्राणि केषाञ्चिद् मिथ्यादृष्टीनामपि सम्यक्श्रुतम्। **सेत्तं** इत्यादि, तदेतद् मिथ्याश्रुतम्॥

[सू० ७३] से किं तं सादीयं सपज्जवसियं ? अणादीयं अपज्जवसियं च ? इच्चेयं दुवालसंगं गणिपिडगं विउच्छित्तिणयट्ठयाए सादीयं सपज्जवसियं,

अविउच्छित्तिणयट्ठयाए अणादीयं अपज्जवसियं।

[सू० ७४] तं समासओ चउव्विहं पण्णत्तं, तंजहा-दव्वओ खेत्तओ कालओ भावओ।

(१) तत्थ दव्वओ णं सम्मसुयं एगं पुरिसं पडुच्च सादीयं सपज्जवसियं,बहवे पुरिसे पडुच्च अणादीयं अपज्जवसियं।

(२) खेत्तओ णं पंच भरहाइं पंच एरवयाइं पडुच्च सादीयं सपज्जवसियं, पंच महाविदेहाइं पडुच्च अणादीयं अपज्जवसियं।

(३) कालओ णं ओसप्पिणिं उस्सप्पिणिं च पडुच्च सादीयं सपज्जवसियं, णोउस्सप्पिणिं णोओसप्पिणिं च पडुच्च अणादीयं अपज्जवसियं।

(४) भावओ णं जे जया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति ते तया पडुच्च सादीयं सपज्जवसियं, खाओवसमियं पुण भावं पडुच्च अणादीयं अपज्जवसियं।

[सू० ७५] अहवा भवसिद्धियस्स सुयं साईयं सपज्जवसियं, अभव-सिद्धियस्स सुतं अणादीयं अपज्जवसियं।

[सू० ७६] सव्वागासपदेसग्गं सव्वागासपदेसेहिं अणंतगुणियं पज्जवग्गक्खरं णिप्फज्जइ।

[सू० ७७] सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो णिच्चुग्घाडिओ, जति पुण सो वि आवरिज्जा तेण जीवो अजीवत्तं पावेज्जा।

सुट्ठु वि मेहसमुदए, होति पभा चंद-सूराणं।

सेत्तं सादीयं सपज्जवसियं, सेत्तं अणादीतं अपज्जवसितं।

से किं तं इत्यादि। अथ किं तत् सादि सपर्यवसितमनादि अपर्यवसितं च ?। तत्र सह आदिना वर्त्तते इति सादि, तथा पर्यवसानं पर्यवसितम्, भावे क्तप्रत्ययः, सह पर्यवसितेन वर्त्तते इति सपर्यवसितम्, आदिरहितमनादि, न पर्यवसितमपर्यवसितम्। आचार्य आह– इत्येतद् द्वादशाङ्गं गणिपिटकं **वोच्छित्तिनयट्ठयाए** इत्यादि, व्यवच्छित्तिप्रतिपादनपरो नयो व्यवच्छित्तिनयः, पर्यायास्तिकनय इत्यर्थः, तस्यार्थो

व्यवच्छित्तिनयार्थः, पर्याय इत्यर्थः, तस्य भावो व्यवच्छित्तिनयार्थता तया, पर्यायापेक्षयेत्यर्थः। किम् ? इत्याह-सादि सपर्यवसितम्, नारकादिभवपरिणत्यपेक्षया जीव इव। **अव्वोच्छित्तिनयट्ठयाए** इति अव्यवच्छित्तिप्रतिपादनपरो नयोऽव्यवच्छित्तिनयः, द्रव्यास्तिकनय इत्यर्थः, तस्यार्थोऽव्यवच्छित्तिनयार्थः, द्रव्यमित्यर्थः, तद्भावस्तत्ता तया, द्रव्यापेक्षया इत्यर्थः। किम् इत्याह– अनादि अपर्यवसितं त्रिकालावस्थायित्वाद् जीववत्।

अधिकृतमेवार्थं द्रव्य-क्षेत्रादिचतुष्टयमधिकृत्य प्रतिपादयति- **तत्** श्रुतज्ञानं **समासतः** सङ्क्षेपेण चतुर्विधं प्रज्ञप्तम्, तद्यथा– द्रव्यतः क्षेत्रतः कालतो भावतश्च। तत्र द्रव्यतः **णं** इति वाक्यालङ्कारे सम्यक्श्रुतमेकं पुरुषं प्रतीत्य सादि सपर्यवसितम्, कथम् ? इति चेत्, उच्यते, सम्यक्त्वावाप्तौ तत्प्रथमपाठतो वा सादि, पुनर्मिथ्यात्वप्राप्तौ सति वा सम्यक्त्वे प्रमादभावतो महाग्लानत्वभावतो वा सुरलोकगमनसम्भवतो वा विस्मृतिमुपगते केवलज्ञानोत्पत्तिभावतो वा सर्वथा विप्रनष्टे सपर्यवसितम्। बहून् पुरुषान् कालत्रयवर्त्तिनः पुनः प्रतीत्यानाद्यपर्यवसितम्, सन्तानेन प्रवृत्तत्वात्, कालवत्।

तथा क्षेत्रतः **णं** इति वाक्यालङ्कारे पञ्च भरतानि पञ्चैरावतानि प्रतीत्य सादि सपर्यवसानम्, कथम् ?, उच्यते, तेषु क्षेत्रेष्ववसर्प्पिण्यां सुषमदुष्षमापर्यवसाने उत्सर्पिण्यां तु दुष्षमसुषमाप्रारम्भे तीर्थकर-धर्म-सङ्घानां प्रथमतयोत्पत्तेः सादि, एकान्तदुष्षमादौ च काले तदभावात् सपर्यवसितम्। तथा महाविदेहान् प्रतीत्यानाद्यपर्यवसितम्, तत्र प्रवाहापेक्षया तीर्थकरादीनामव्यवच्छेदात्।

तथा कालतः **णं** इति वाक्यालङ्कारे अवसर्पिणीमुत्सर्पिणीं च प्रतीत्य सादि सपर्यवसितम्। तथाहि-अवसर्पिण्यां तिसृष्वेव समासु सुषमदुष्षमा-दुष्षमसुषमा-दुष्षमरूपासु उत्सर्पिण्यां तु द्वयोः समयोः दुष्षमसुषमा-सुषमदुष्षमारूपयोर्भवति, न परतः, ततः सादि सपर्यवसानम्। अत्र चोत्सर्पिण्यवसर्पिणीस्वरूपज्ञापनार्थं कालचक्रं विंशतिसागरोपमकोटाकोटीप्रमाणं विनेयजनानुग्रहार्थं यथा **मूलवृत्तिकृता** [**नन्दी० हारि० सू० ७४ पृ० ६६-६७**] दर्शितं तथा वयमपि दर्शयामः–

चत्तारि सागरोवमकोडाकोडीउ संतईए उ।
एगंतसुस्समा खलु, जिणेहिं सव्वेहिं निद्दिट्ठा॥१॥
तीए पुरिसाणमाउं, तिन्नि य पलियाइं तह पमाणं च।
तिन्नेव गाउयाइं, आईए भणंति समयन्नू॥२॥
उवभोग-परीभोगा, जम्मंतरसुकयबीयजाया उ।
कप्पतरुसमूहाओ, होंति किलेसं विणा तेसिं॥३॥
ते पुण दसप्पयारा, कप्पतरू समणसमयकेऊहि।
धीरेहिं विनिद्दिट्ठा, मणोरहापूरगा एए॥४॥
मत्तंगया य भिंगा, तुडियंगा दीव जोइ चित्तङ्गा।
चित्तरसा मणियंगा, गेहागारा अणियणा य॥५॥
मत्तंगएसु मज्जं, सुहपेज्जं भायणाणि भिंगेसु।
तुडियंगेसु य संगयतुडियाणि बहुप्पगाराणि॥६॥
दीवसिहा जोइसनामया य निच्चं करेंति उज्जोयं।
चित्तंगेसु य मल्लं, चित्तरसा भोयणट्ठाए॥७॥
मणियंगेसु य भूसणवराणि भवणाणि भवणरुक्खेसु।
आइन्नेसु य [1]इच्छियवत्थाणि बहुप्पगाराणि॥८॥
एएसु य अन्नेसु य नरनारिगणाण ताणमुवभोगा।
भवियपुणब्भवरहिया, इय सव्वण्णू जिणा बिंति॥९॥
तो तिण्णि सागरोवमकोडाकोडीउ वीयरागेहिं।
सुसम त्ति समक्खाया, पवाहरूवेण धीरेहिं॥१०॥
तीए पुरिसाणमाउं दोन्नि उ पलियाइं तह पमाणं च।
दो चेव गाउयाइं, आईए भणंति समयन्नू॥११॥
उवभोग-परीभोगा, तेसिं पि य कप्पपायवेहिंतो।
होंति किलेसेण विणा, पायं ऊणाणुभावेणं॥१२॥
तो सुसमदुस्समाए, पवाहरूवेण कोडकोडीओ।
अयराण दोन्नि सिट्ठा, जिणेहिं जियराग-दोसेहिं॥१३॥
तीए पुरिसाणमाउं, एगं पलियं तहा पमाणं च।
एगं च गाउयं [2]ती आईए भणंति समयन्नू॥१४॥

---

१. पत्थिय° खं० दे० ॥ २. तीइ पा० देसं० ॥

उवभोगपरीभोगा, तेसिं पि य कप्पपायवेहिंतो।
होंति किलेसेण विणा, नवरं ऊणाणुभावेणं॥१५॥
सुसमदुसमावसेसे, पढमजिणो धम्मनायगो भयवं।
उप्पण्णो सुहपुण्णो,सिप्पकलादंसओ उसभो॥१६॥
तो दुसमसूसमूणा, बायालीसाए वरिससहसेहिं।
सागरकोडाकोडी, एगेव जिणेहिं पण्णत्ता॥१७॥
तीए पुरिसाणमाउं, पुव्वपमाणेण तह पमाणं च।
धणुसंखा निद्दिट्ठं, विसेससुत्ताओ नायव्वं॥१८।
उवभोगपरीभोगा, पवरोसहिमाइएहिं विन्नेया।
जिण-चक्कि-वासुदेवा, सव्वेऽवि इमीइ वोलीणा॥१९॥
इगवीससहस्साइं वासाणं दूसमा इमीए उ।
जीवियमाणुवभोगाइया य दीसंति हायंता॥२०॥
एत्तो य किलिट्ठयरा, जीयपमाणाइएहिं निद्दिट्ठा।
अइदूसम त्ति घोरा, वाससहस्साइं इगवीसा॥२१॥
ओसप्पिणीए एसो, कालविभागो जिणेहिं निद्दिट्ठो।
एसो च्चिय पडिलोमं, विन्नेउस्सप्पिणीए वि॥२२॥
एयं तु कालचक्कं, सिस्सजणाणुग्गहट्ठया भणियं।
संखेवेण महत्थो, विसेससुत्ताओ नायव्वो॥२३॥

[नन्दी० हारि० सू० ७४ पृ० ६६-६७]

नोउस्सप्पिणीमित्यादि, नोत्सर्पिणीं नावसर्पिणीं च प्रतीत्यानाद्यपर्यवसितम्, महाविदेहेषु हि नोत्सर्पिण्यवसर्पिणीरूपः कालः, तत्र च सदैवावस्थितं सम्यक्श्रुतमित्यनाद्यपर्यवसितम्।

तथा भावतः **णं** इति वाक्यालङ्कारे, **ये** इत्यनिर्दिष्टनिर्देशे, ये केचन यदा पूर्वाह्णादौ जिनैः प्रज्ञप्ता जिनप्रज्ञप्ता **भावाः** पदार्थाः **अग्घविज्जंति** त्ति प्राकृतत्वादाख्यायन्ते, सामान्यरूपतया विशेषरूपतया वा कथ्यन्ते इत्यर्थः। **प्रज्ञाप्यन्ते** नामादिभेदप्रदर्शनेनाऽऽख्यायन्ते, तेषां नामादयो भेदाः प्रदर्श्यन्ते इत्यर्थः। **प्ररूप्यन्ते** नामादिभेदस्वरूपकथनेन प्रख्यायन्ते, नामादीनां भेदानां स्वरूपमाख्यायते इति भावार्थः। यथा—

पज्जायाणभिधेयं, ठियमन्नत्थे तदत्थनिरवेक्खं।
जाइच्छियं च नामं, जावद्दव्वं च पाएणं॥१॥
जं पुण तदत्थसुन्नं, तदभिप्पाएण तारिसागारं।
कीरइ व निरागारं, इत्तरमियरं व सा ठवणा॥२॥ [**विशेषा*० २५-२६**] इत्यादि।

तथा **दर्श्यन्ते** उपमानमात्रोपदर्शनेन प्रकटीक्रियन्ते, यथा गौरिव गवय इत्यादि। तथा **निदर्श्यन्ते** हेतु-दृष्टान्तोपदर्शनेन स्पष्टतरीक्रियन्ते। **उपदर्श्यन्ते** उपनय-निगमनाभ्यां निःशङ्कं शिष्यबुद्धौ स्थाप्यन्ते, अथवा **उपदर्श्यन्ते** सकलनयाभिप्रायावतारणतः पटुप्रज्ञशिष्यबुद्धिषु व्यवस्थाप्यन्ते, **तान्** भावान् **तदा** तस्मिन् काले तथाऽऽख्यायमानान् प्रतीत्य सादि सपर्यवसितम्। एतदुक्तं भवति-तस्मिन् काले तं तं प्रज्ञापकोपयोगं स्वरविशेषं शिष्य[1]प्रयत्नविशेषमासनविशेषमङ्गविन्यासादिकं च प्रतीत्य सादि सपर्यवसितम्, उपयोगादेः प्रति[2]कलम् अन्यथाऽन्यथाभवनात्, उक्तं च–

***उवयोग-सर-पयत्ता, आसणभेयाइया य पइसमयं।**
भिण्णा पण्णवगस्सा, साइं सपज्जंतयं तम्हा॥१॥ [ ]

क्षायोपशमिकं भावं पुनः प्रतीत्यानाद्यपर्यवसितम्, प्रवाहरूपेण क्षायोपशमिकभावस्यानाद्यपर्यवसितत्वात्। अथवाऽत्र चतुर्भङ्गिका, तद्यथा– सादि सपर्यवसितम् १, साद्यपर्यवसितम् २, अनादि सपर्यवसितम् ३, अनाद्यपर्यवसितं च ४। तत्र प्रथमभङ्गप्रदर्शनायाह– **अथवा** इत्यादि। **अथवे**ति प्रकारान्तरोपदर्शने, **भवसिद्धिकः** भव्यः, तस्य सम्यक्श्रुतं सादि सपर्यवसितम्, सम्यक्त्वलाभे प्रथमतया भावाद् भूयो मिथ्यात्वप्राप्तौ केवलोत्पत्तौ वा विनाशात्। द्वितीयस्तु भङ्गः शून्यः, न हि सम्यक्श्रुतं मिथ्याश्रुतं वा सादि भूत्वाऽपर्यवसितं सम्भवति, मिथ्यात्वप्राप्तौ केवलोत्पत्तौ वाऽवश्यं सम्यक्श्रुतस्य विनाशात्, मिथ्याश्रुतस्यापि च सादेरवश्यं कालान्तरे सम्यक्त्वावाप्तावभावादिति। तृतीयभङ्गकस्तु मिथ्याश्रुतापेक्षया वेदितव्यः, तथाहि– भव्यस्यानादिमिथ्यादृष्टेर्मिथ्याश्रुतमनादि सम्यक्त्वावाप्तौ च तदपयातीति सपर्यवसितम्।

---

१. **शिष्य**° नास्ति खं० पा० देसं० मां०। "प्रज्ञापकोपयोग-स्वर-प्रयत्ना-ऽऽसनविशेषतः प्रतिक्षणमन्यथा नान्यथा चावस्थितेः" - **नन्दीहारिभद्री** पृ० ६७॥ "पण्णवगं पडुच्च उवयोगतो सरविसेसतो पयत्तयो आसणविसेसतो य सादि सपज्जवसाणं" - **नन्दीचूर्णि** पृ० ५२॥ २. **प्रतिकालमन्यथाभवनात्** दे० ॥

चतुर्थभङ्गकं पुनरुपदर्शयति– **अभवे**त्यादि, **अभवसिद्धिकः** अभव्यः, तस्य श्रुतं मिथ्याश्रुतमनाद्यपर्यवसितम्, तस्य सदैव सम्यक्त्वादिगुणहीनत्वात्। एषा च चतुर्भङ्गिका यथा श्रुतस्योक्ता तथा मतेरपि द्रष्टव्या, मति-श्रुतयोरन्योन्यानुगतत्वात्, केवलमिह श्रुतस्य प्रक्रान्तत्वात् साक्षात् तस्यैव दर्शिता। अत्राह– ननु तृतीयभङ्गे चतुर्थभङ्गे वा श्रुतस्यानादिभाव उक्तः स च जघन्यः ? उत मध्यमः ? आहोश्विदुत्कृष्टः ?, उच्यते, जघन्यो मध्यमो वा, न तूत्कृष्टः, यतस्तस्येदं मानम्– **सव्वागासे**त्यादि, सर्वं च तदाकाशं च सर्वाकाशम्, [१]लोका-ऽलोकाकाशमित्यर्थः, तस्य **प्रदेशाः** निर्विभागा भागाः सर्वाकाशप्रदेशास्तेषा**मग्गं** परिमाणं सर्वाकाशप्रदेशाग्रम्, तत् सर्वाकाशप्रदेशैः **अनन्तगुणितम्** अनन्तशो गुणितमेकैकस्मिन्नाकाशप्रदेशेऽनन्तागुरुलघुपर्यायभावात् **पर्यायाग्राक्षरं निष्पद्यते** पर्यायपरिमाणाक्षरं निष्पद्यते। इयमत्र भावना- सर्वाकाशप्रदेशपरिमाणं सर्वाकाशप्रदेशैरनन्तशो गुणितं यावत्परिमाणं भवति तावत्प्रमाणं सर्वाकाशपर्यायाणामग्रं भवति, एकैकस्मिन्नाकाशप्रदेशे यावन्तोऽगुरुलघुपर्यायास्ते [२]सर्वेऽपि एकत्र पिण्डिता एतावन्तो भवन्तीत्यर्थः, एतावत्प्रमाणं चाक्षरं भवति। इह स्तोकत्वाद् धर्मास्तिकायादयः साक्षात् सूत्रे नोक्ताः, परमार्थतस्तु तेऽपि गृहीता द्रष्टव्याः, ततोऽयमर्थः-सर्वद्रव्यप्रदेशाग्रं सर्वद्रव्यप्रदेशैरनन्तशो गुणितं यावत्परिमाणं भवति तावत्प्रमाणं सर्वद्रव्य-पर्यायप[३]रिमाणम्, एतावत्प्रमाणं चाक्षरं भवति। तदपि चाक्षरं द्विधा– ज्ञानमकारादिवर्णजातं च, उभयत्रापि अक्षरशब्दप्रवृत्ते रूढत्वात्, द्विविधमपि चेह गृह्यते, विरोधाभावात्। ननु ज्ञानं सर्वद्रव्य-पर्यायपरिमाणं सम्भवतु, यतो ज्ञानमिहाविशेषोक्तौ सर्वद्रव्य-पर्यायपरिमाणतुल्यताऽभिधानात् प्रक्रमाद्वा केवलज्ञानं ग्रहीष्यते, तच्च सर्वद्रव्य-पर्यायपरिमाणं घटत एव, तथाहि– यावन्तो जगति रूपिद्रव्याणां ये गुरुलघुपर्याया ये च रूपिद्रव्याणामरूपिद्रव्याणां चाऽगुरुलघुपर्यायास्तान् सर्वानपि साक्षात् करतलकलितमुक्ताफलमिव केवलालोकेन प्रतिक्षणमवलोकते भगवान्, न च येन स्वभावेनैकं पर्यायं परिच्छिनत्ति तेनैव स्वभावेन पर्यायान्तरमपि, तयोः

१. **लोकाकाशमि**° खं०, जेमू१, जे२, देमू०, मां० ॥ २. **सर्वे एकत्र** पा० खं० दे० ॥ ३. °**प्रमाणम्** खं० ॥

पर्याययोरेकत्वप्रसक्तेः, तथाहि– घटपर्यायपरिच्छेदनस्वभावं यद् ज्ञानं [१]तद् तदा पटपर्यायं परिच्छेत्तुमलं [२]यदा पटपर्यायस्यापि घटपर्यायरूपताऽऽपत्तिः, अन्यथा तस्य तत्परिच्छेदकत्वानुपपत्तेः, तथारूपस्वभावाभावात्, ततो यावन्तः परिच्छेद्याः पर्यायास्तावन्तः परिच्छेदकास्तस्य केवलज्ञानस्य स्वभावा वेदितव्याः, स्वभावाश्च पर्यायाः, ततः पर्यायानधिकृत्य सर्वद्रव्य-पर्यायपरिमाणं केवलज्ञानमुपपद्यते, यत्तु अकारादिकं वर्णजातं तत् कथं सर्वद्रव्यपर्यायपरिमाणं भवितुर्महति ?, तत्पर्यायराशेः सर्वद्रव्यपर्यायाणामनन्ततमे भागे वर्त्तमानत्वात्, तदयुक्तम्, अकारादेरपि स्व-परपर्यायभेदभिन्नतया सर्वद्रव्य-पर्यायपरिमाणतुल्यत्वात्। आह च **भाष्यकृत्**–

एक्केक्कमक्खरं पुण, [३]स-परपज्जायभेयओ भिन्नं।
तं सव्वदव्व-पज्जायरासिमाणं मुणेयव्वं॥१॥ [विशेषा[*]० ४७७]

अथ कथं स्व-परपर्यायापेक्षया सर्वद्रव्य-पर्यायराशितुल्यता ?, उच्यते, इह अ अ अ इत्युदात्तोऽनुदात्तः स्वरितश्च, पुनरप्येकैको द्विधा– सानुनासिको निरनुनासिक-श्चेत्यकारस्य षड् भेदाः, तांश्च षड् भेदानकारः केवलो लभते, एवं ककारेणापि संयुक्तो लभते षड् भेदान्, एवं खकारेण, एवं यावद् हकारेण, एवमेकैककेवलव्यञ्जनसंयोगे यथा षट् षड् भेदान् लभते तथा सजातीयविजातीय[४]व्यञ्जनद्वि[५]कादिसंयोगेऽपि, एवं स्वरान्तरसंयुक्ततत्तद्व्यञ्जनसहितोऽप्यनेकान् भेदान् लभते। अपि च– एकैकोऽप्युदात्तादिको भेदः स्वरविशेषादनेकभेदो भवति, वाच्यभेदादपि च समानवर्णश्रेणीकस्यापि शब्दस्य भेदो जायते, तथाहि– न येनैव स्वभावेन करशब्दो हस्तमाचष्टे तेनैव स्वभावेन किरणमपि, किन्तु स्वभावभेदेन, तथाऽकारोऽपि तेन तेन ककारादिना संयुज्यमानस्तं तमर्थं ब्रुवाणो भिन्नस्वभावो वेदितव्यः, ते च स्वभावा अनन्ता ज्ञातव्याः, वाच्यस्यानन्तत्वात्, एते च सर्वेऽप्यकारस्य स्वपर्यायाः, शेषास्तु सर्वेऽपि घटादिपर्याया आकारादिपर्यायाश्च परपर्यायाः, ते च स्वपर्यायेभ्योऽनन्तगुणाः, तेऽपि च अकारस्य सम्बन्धिनो द्रष्टव्याः। आह– ये स्वपर्यायास्ते तस्य सम्बन्धिनो

---

१. **तद् यदा** खं देमू० विना ॥ २. **तदा** खं० देमू० विना ॥ ३. **सपरप्पज्जा**° पा० देसं० ॥ ४. °**विजातीय**° नास्ति खंमू० मांमू० देमू० ॥ ५. **द्विकसंयोगे** जेमू१, खं० पा० दे० ॥

भवन्तु, ये तु परपर्यायास्ते विभिन्नवस्त्वाश्रयत्वात् कथं तस्य सम्बन्धिनो व्यपदिश्यन्ते ?, उच्यते, इह द्विधा सम्बन्धः— अस्तित्वेन नास्तित्वेन च, तत्रास्तित्वेन सम्बन्धः, स्वपर्यायैः, यथा घटस्य रूपादिभिः, नास्तित्वेन सम्बन्धः परपर्यायैः, तेषां तत्रासम्भवात्, यथा घटावस्थायां मृदः पिण्डाकारेण पर्यायेण, यत एव च ते तस्य न सन्तीति नास्तित्वसम्बन्धेन सम्बद्धाः अत एव च ते परपर्याया इति व्यपदिश्यन्ते, अन्यथा तेषामपि तत्रास्तित्वसम्भवात् स्वपर्याया एव ते भवेयुः। ननु ये यत्र न विद्यन्ते ते कथं तस्येति व्यपदिश्यन्ते ?, न खलु धनं दरिद्रस्य न विद्यते इति तत् तस्य सम्बन्धि व्यपदेष्टुं शक्यम्, मा प्रापद् लोकव्यवहारातिक्रमः, तदेतद् महामोहमूढमनस्कतासूचकम्, यतो यदि नाम ते नास्तित्वसम्बन्धमधिकृत्य तस्येति न व्यपदिश्यन्ते तर्हि सामान्यतो न सन्तीति प्राप्तम्, तथा च ते स्वरूपेणापि न भवेयुः, न चैतद् दृष्टमिष्टं वा, तस्मादवश्यं ते नास्तित्वसम्बन्धमङ्गीकृत्य तस्येति व्यपदेश्याः, धनमपि च नास्तित्वसम्बन्धमधिकृत्य दरिद्रस्येति व्यपदिश्यत एव, तथा च लोके वक्तारः- धनमस्य दरिद्रस्य न विद्यते इति। यदपि चोक्तम्— 'तत् तस्येति व्यपदेष्टुं शक्यम्' इति, तत्रापि तदस्तित्वेन तस्येति व्यपदेष्टुं न शक्यम्, न पुनर्नास्तित्वेनापि, ततो न कश्चिल्लौकिकव्यवहारातिक्रमः। ननु नास्तित्वमभावः, अभावश्च तुच्छरूपः, तुच्छेन च सह कथं सम्बन्धः ?, तुच्छस्य सकलशक्तिविकलतया सम्बन्धनशक्तेरप्यभावात्, अन्यच्च, यदि परपर्यायाणां तत्र नास्तित्वं तर्हि नास्तित्वेन सह सम्बन्धो भवतु, परपर्यायैस्तु सह कथम् ?, न खलु घटः पटाभावेन सम्बद्धः पटेनापि सह सम्बद्धो भवितुमर्हति, तथाप्रतीतेरभावात्, तदेतदसमीचीनम्, सम्यग्वस्तुतत्त्वापरिज्ञानात्, तथाहि— नास्तित्वं नाम तेन तेन रूपेणाभवनमिष्यते, तच्च तेन तेन रूपेणाभवनं वस्तुनो धर्मः, ततो नैकान्तेन तत् तुच्छरूपमिति न तेन सह सम्बन्धाभावः, तदपि च तेन तेन रूपेणाभवनं तं तं पर्यायमपेक्ष्य भवति, नान्यथा, तथाहि— यो यो घटादिगतः पर्यायस्तेन तेन रूपेण मया न भवितव्यमिति सामर्थ्यात् तं तं पर्यायमपेक्षते इति सुप्रतीतमेतत्, ततस्तेन तेन पर्यायेणाभवनस्य तं तं पर्यायमपेक्ष्य सम्भवात् तेऽपि परपर्यायास्तस्योपयोगिन इति तस्येति व्यपदिश्यन्ते, एवंरूपायां च विवक्षायां पटोऽपि घटस्य सम्बन्धी

भवत्येव, पटमपेक्ष्य घटे पटरूपेणाभवनस्य भावात्, तथा च लौकिका अपि घट-पटादीन् परस्परमितरेतराभावमधिकृत्य सम्बद्धान् व्यवहरन्तीत्यविगीतमेतत्। इतश्च ते पर्यायास्तस्येति व्यपदिश्यन्ते, स्वपर्यायविशेषणत्वेन तेषामुपयोगात्, इह ये यस्य स्वपर्यायविशेषणत्वेनोपयुज्यन्ते ते तस्य पर्यायाः, यथा घटस्य रूपादयः पर्यायाः परस्परविशेषकाः, उपयुज्यन्ते चाऽकारस्य पर्यायाणां विशेषकतया घटादिपर्यायाः, तानन्तरेण तेषां स्वपर्यायव्यपदेशासम्भवात्, तथाहि– यदि ते परपर्याया न भवेयुस्तर्ह्यकारस्य स्वपर्यायाः स्वपर्याया इत्येवं न व्यपदिश्येरन्, परापेक्षया स्वव्यपदेशस्य भावात्, ततः स्वपर्यायव्यपदेशकारणतया तेऽपि परपर्यायास्तस्योपयोगिन इति तस्येति व्यपदिश्यन्ते। अपि च– सर्वं वस्तु प्रतिनियतस्वभावम्, सा च प्रतिनियतस्वभावता प्रतियोग्यभावात्मकतोपनिबन्धना, ततो यावन्न प्रतियोगिविज्ञानं भवति तावन्नाधिकृतं वस्तु तदभावात्मकं तत्त्वतो ज्ञातुं शक्यते, तथा च सति घटादिपर्यायाणामपि अकारप्रतियोगित्वात् तदपरिज्ञाने न अकारो याथात्म्येनावगन्तुं शक्यते इति घटादिपर्याया अपि अकारस्य पर्यायाः, तथा चात्र प्रयोगः-यदनुपलब्धौ यस्यानुपलब्धिः स तस्य सम्बन्धी, यथा घटस्य रूपादयः, घटादिपर्यायानुपलब्धौ चाकारस्य न याथात्म्येनोपलब्धिरिति ते तस्य सम्बन्धिनः, न चायमसिद्धो हेतुः, घटादिपर्यायरूपप्रतियोग्यपरिज्ञाने तदभावात्मकस्याकारस्य तत्त्वतो ज्ञातत्वायोगादिति। आह च **भाष्यकृत्**–

जेसु अनाएसु तओ, न नज्जए नज्जए य नाएसु।
कह तस्स ते न धम्मा ?, घडस्स रूवाइधम्म व्व॥१॥ [**विशेषा०** ४८५]

तस्माद् घटादिपर्याया अपि अकारस्य सम्बन्धिन इति स्व-परपर्यायापेक्षयाऽकारः सर्वद्रव्यपर्यायपरिमाणः, एवमाकारादयोऽपि वर्णाः सर्वे प्रत्येकं सर्वद्रव्यपर्यायपरिमाणा वेदितव्याः, एवं घटादिकमपि प्रत्येकं सर्वं वस्तुजातं परिभावनीयम्, न्यायस्य समानत्वात्, न चैतदनार्षम्, यत उक्तमाचाराङ्गे- **जे एगं जाणइ से सव्वं जाणइ, जे सव्वं जाणइ से एगं जाणइ** [**आचा० ३।४।१२९**] अस्यायमर्थः-य एकं वस्तूपलभते सर्वपर्यायैः स नियमात् सर्वमुपलभते, सर्वोपलब्धिमन्तरेण विवक्षितस्यैकस्य स्व-परपर्यायभेदभिन्नतया सर्वात्मनाऽवगन्तुमशक्यत्वात्, यश्च सर्वं सर्वात्मना साक्षादुपलभते स एकं स्व-

परपर्यायभेदभिन्नं जानाति। तथाऽन्यत्राप्युक्तम्–

एको भावः सर्वथा येन दृष्टः, सर्वे भावाः सर्वथा तेन दृष्टाः ।

सर्वे भावाः सर्वथा येन दृष्टाः, एको भावः सर्वथा तेन दृष्टः॥ [ ]

तदेवमकारादिकमपि वर्णजातं केवलज्ञानमिव सर्वद्रव्यपर्यायपरिमाणमिति न कश्चिद् विरोधः। अपि च– केवलज्ञानमपि स्व-परपर्यायभेदभिन्नम्, यतस्तदात्मस्वभावरूपम्, न घटादिवस्तुस्वभावात्मकम्, ततो ये घटादिपर्यायास्ते तस्य परपर्यायाः, ये तु परिच्छेदकत्वस्वभावास्ते स्वपर्यायाः, परपर्याया अपि च पूर्वोक्तयुक्तेस्तस्य सम्बन्धिन इति स्व-परपर्यायभेदभिन्नम्। तथा चाऽऽह **भाष्यकृत्**–

वत्थुसहावं पइ तं पि स-परपज्जायभेयभिन्नं तु।

ते जेण जीयभावा, भिन्ना य तओ घडाईया॥१॥ [विशे*० ४९५]

ततः पर्यायपरिमाणचिन्तायां परमार्थतो न कश्चिदकारादिश्रुत-केवलज्ञानयोर्विशेषः, अयं तु विशेषः-केवलज्ञानं स्वपर्यायैरपि सर्वद्रव्यपर्यायपरिमाणतुल्यम्, अकारादिकं तु स्वपरपर्यायैरेव। तथाहि-अकारस्य स्वपर्यायाः सर्वद्रव्यपर्यायाणामनन्ततमभागकल्पाः, परपर्यायास्तु स्वपर्यायरूपानन्ततमभागोनाः सर्वद्रव्यपर्यायाः, ततः स्व-परपर्यायैरेव सर्वद्रव्यपर्यायपरिमाणमकारादिकं भवति। आह च **भाष्यकृत्**–

सयपज्जाएहि उ केवलेण तुल्लं न होइ न परेहि।

स-परपज्जाएहि उ, तं तुल्लं केवलेणेव॥१॥ [विशे*० ४९३]

यथा चाकारादिकं सर्वद्रव्यपर्यायपरिमाणं तथा मत्यादीन्यपि ज्ञानानि द्रष्टव्यानि, न्यायस्य समानत्वात्। इह यद्यपि सर्वं ज्ञानमविशेषेणाक्षरमुच्यते सर्वद्रव्यपर्यायपरिमाणं च भवति तथापि श्रुताधिकारादिहाक्षरं श्रुतज्ञानमवसेयम्, श्रुतज्ञानं च मतिज्ञानाविनाभूतं ततो मतिज्ञानमपि, तदेवं यतः श्रुतज्ञानमकारादिकं चोत्कर्षतः सर्वद्रव्यपर्यायपरिमाणम्, तच्च सर्वोत्कृष्टश्रुतकेवलिनो द्वादशाङ्गविदः सङ्गच्छते, न शेषस्य, ततोऽनादिभावः श्रुतस्य जन्तूनां जघन्यो मध्यमो वा द्रष्टव्यः, न तूत्कृष्ट इति स्थितम्। अपर आह– नन्वनादिभाव एव श्रुतस्य कथमुपपद्यते ?, यावता यदा प्रबलश्रुतज्ञानावरण-स्त्यानर्द्धिनिद्रारूपदर्शनावरणोदयः सम्भवति तदा सम्भाव्यते साकल्येन श्रुतस्याऽऽवरणम्,

यथाऽवध्यादिज्ञानस्य, ततोऽवध्यादिज्ञानमिवाऽऽदिमदेव युज्यते श्रुतमपि नानादिमदिति कथं तृतीय-चतुर्थभङ्गसम्भवः ?, तत आह– **सव्वजीवाणं पि** इत्यादि, सर्वजीवानामपि **णं** इति वाक्यालङ्कारे **अक्षरस्य** श्रुतज्ञानस्य, श्रुतज्ञानं च मतिज्ञानाविनाभावि ततो मतिज्ञानस्यापि **अनन्तभागः** अनन्ततमो भागः **नित्योद्घाटितः** सर्वदैवाप्रावृतः, सोऽपि च अनन्ततमो भागोऽनेकविधः तत्र सर्वजघन्यश्चैतन्यमात्रम्, तत् पुनः सर्वोत्कृष्टश्रुतावरण-स्त्यानर्द्धिनिद्रोदयभावेऽपि नाऽऽव्रियते, तथाजीवस्वाभाव्यात्। तथा चाऽऽह– **जइ पुण** इत्यादि, यदि पुनः सोऽपि अनन्ततमो भाग आव्रियेत[१] **तेन** तर्हि जीवोऽजीवत्वं प्राप्नुयात्, जीवो हि नाम चैतन्यलक्षणस्ततो यदि प्रबलश्रुतावरण-स्त्यानर्द्धिनिद्रोदयभावे चैतन्यमात्रमप्याव्रियेत तर्हि जीवस्य स्वस्वभावपरित्यागादजीवतैव सम्पनीपद्येत, न चैतद् दृष्टमिष्टं वा, सर्वस्य सर्वथा स्वभावातिरस्कारात्। अत्रैव दृष्टान्तमाह– **सुट्ठु वि** इत्यादि, सुष्ठ्वपि मेघसमुदये भवति **प्रभा चन्द्र-सूर्ययोः**। इयमत्र भावना-यथा निबिड-निबिडतरमेघपटलैराच्छादितयोरपि सूर्या-चन्द्रमसोर्नैकान्तेन तत्प्रभानाशः सम्पद्यते, सर्वस्य सर्वथा स्वभावापनयनस्य कर्त्तुमशक्यत्वात्, एवमनन्तानन्तैरपि ज्ञान-दर्शनावरणकर्मपरमाणुभिरेकैकस्याऽऽत्मप्रदेशस्याऽऽवेष्टितपरिवेष्टितस्यापि नैकान्तेन चैतन्यमात्रस्याप्यभावो भवति, ततो यत् सर्वजघन्यं तद् मति-श्रुतात्मकम्। अतः सिद्धोऽक्षरस्यानन्तभागो नित्योद्घाटितः। तथा च सति मतिज्ञानस्य श्रुतज्ञानस्य चानादिभावः प्रतिपाद्यमानो न विरुध्यत इति स्थितम्। **सेत्तं** इत्यादि, तदेतत् सादि सपर्यवसितमनाद्यपर्यवसितं च॥

[सू० ७८] से किं तं गमियं ? गमियं दिट्ठिवाओ, अगमियं कालितं सुअं, सेत्तं गमियं, सेत्तं अगमियं।

[सू० ७९] अहवा तं समासओ दुविहं पण्णत्तं, तंजहा– अंगपविट्ठं अंगबाहिरं च।

[सू० ८०] से किं तं अंगबाहिरं ? अंगबाहिरं दुविहं पण्णत्तं, तंजहा–

---

१. **आव्रियते** खंसं० विना ॥

आवस्सगं च आवस्सगवइरित्तं च।

[सू० ८१] से किं तं आवस्सगं ? आवस्सगं छव्विहं पण्णत्तं, तंजहा– सामाइयं १, चउवीसत्थओ २, वंदणयं ३, पडिक्कमणं ४, काउस्सग्गो ५, पच्चक्खाणं ६, सेत्तं आवस्सयं।

[सू० ८२] से किं तं आवस्सयवइरित्तं ? आवस्सयवइरित्तं दुविहं पण्णत्तं, तंजहा– कालियं च उक्कालियं च।

[सू० ८३] से किं तं उक्कालियं ? उक्कालियं अणेगविहं पण्णत्तं, तंजहा– दसवेयालियं १, कप्पियाकप्पियं २, चुल्लकप्पसुतं ३, महाकप्पसुतं ४, ओवाइयं ५, रायपसेणियं ६, जीवाभिगमो ७, पण्णवणा ८, महापण्णवणा ९, पमायप्पमादं १०, नंदी ११, अणुओगदाराइं १२, देविंदत्थओ १३, तंदुलवेयालियं १४, चंदावेज्झयं १५, सूरपण्णत्ती १६, पोरिसिमंडलं १७, मंडलप्पवेसो १८, विज्जाचरणविणिच्छओ १९, गणिविज्जा २०, झाणविभत्ती २१, मरणविभत्ती २२, आयविसोही २३, वीयरायसुतं २४, संलेहणासुतं २५, विहारकप्पो २६, चरणविही २७, आउरपच्चक्खाणं २८, महापच्चक्खाणं २९, सेत्तं उक्कालियं।

[सू० ८४] से किं तं कालियं ? कालियं अणेगविहं पण्णत्तं, तंजहा– उत्तरज्झयणाइं १, दसाओ २, कप्पो ३, ववहारो ४, णिसीहं ५, महाणिसीहं ६, इसिभासियाइं ७, जंबुद्दीवपण्णत्ती ८, दीवसागरपण्णत्ती ९, चंदपण्णत्ती १०, खुड्डिया विमाणपविभत्ती ११, महल्लिया विमाणपविभत्ती १२, अंगचूलिया १३, वग्गचूलिया १४, विवाहचूलिया १५, अरुणोववाए १६, वरुणोववाए १७, गरुलोववाए १८, धरणोववाए १९, वेसमणोववाए २०, देविंदोववाए २१, वेलंधरोववाए २२, उट्ठाणसुयं २३, समुट्ठाणसुयं २४, नागपरियावणियाओ २५, निरयावलियाओ २६, कप्पियाओ २७, कप्पवडिंसियाओ २८, पुप्फियाओ २९, पुप्फचूलियाओ ३०, वण्हीदसाओ ३१।

[सू० ८५] एवमाइयाइं चउरासीती पइण्णगसहस्साइं भगवतो अरहओ

सिरिउसहसामिस्स आइतित्थयरस्स, तहा संखेज्जाणि पइण्णगसहस्साणि मज्झिमगाणं जिणवराणं, चोद्दस पइण्णगसहस्साणि भगवओ वद्धमाणसामिस्स। अहवा जस्स जत्तिया सिस्सा उप्पत्तियाए वेणतियाए कम्मयाए पारिणामियाए चउव्विहाए बुद्धीए उववेया तस्स तत्तियाइं पइण्णगसहस्साइं, पत्तेयबुद्धा वि तत्तिया चेव। सेत्तं कालियं। सेत्तं आवस्सयवइरित्तं। सेत्तं अणंगपविट्ठं।

से किं तं इत्यादि। अथ किं तद् गमिकम् ?। इहाऽऽदि-मध्या-ऽवसानेषु किञ्चिद् विशेषतो भूयो भूयस्तस्यैव सूत्रस्योच्चारणं गमः, तत्रादौ– **सुयं मे आउसंतेणं भगवया एवमक्खायं, इह खलु [ ]** इत्यादि, एवं मध्या-ऽवसानयोरपि यथासम्भवं द्रष्टव्यम्, गमा अस्य विद्यन्ते इति गमिकम्, **अतोऽनेकस्वरात्** [*मलय० त० ७।१४] इति मत्वर्थीय इकप्रत्ययः। उक्तं च **चूर्णौ**– **आई मज्झेऽवसाणे वा किंचिविसेसजुत्तं दुगाइसयग्गसो तमेव पढिज्जमाणं गमियं भण्णइ** [**नन्दीचू० सू० ७६ पृ० ५६**] त्ति। तच्च गमिकं प्रायो दृष्टिवादः, तथा चाह– **गमियं दिट्ठीवाओ**। तद्विपरीतमगमिकम्, तच्च प्राय आचारादि कालिकश्रुतम्, असदृशपाठात्मकत्वात्, तथा चाह– **अगमियं कालियसुयं**। **सेत्तं** इत्यादि, तदेतद् गमिकमगमिकं च। **तं समासतो** इत्यादि, **तद्** गमिकमगमिकम्। अथवा **तत्** सामान्यतः श्रुतमर्हदुपदेशानुसारि **समासतः** सङ्क्षेपेण द्विविधं प्रज्ञप्तम्, तद्यथा– अङ्गप्रविष्टमङ्गबाह्यं च। अत्राह– ननु पूर्वमेव चतुर्दशभेदोद्देशाधिकारेऽङ्गप्रविष्टमङ्गबाह्यं चेत्युपन्यस्तं तत् किमर्थं भूयः **तत् समासतः** इत्याद्युपन्यासेन तदेवोद्दिश्यते ? इति, उच्यते, इह सर्व एव श्रुतभेदाः अङ्गा-ऽनङ्गप्रविष्टरूपे भेदद्वय एवान्तर्भवन्ति तत एतदर्थख्यापनार्थं भूयोऽप्युद्देशेनाभिधानम्, अथवाऽङ्गा-ऽनङ्गप्रविष्टमर्हदुपदेशानुसारि ततः प्राधान्यख्यापनार्थं भूयोऽपि तस्योद्देशेनाभिधानमित्यदोषः। तत्राङ्गप्रविष्टमिति– इह पुरुषस्य द्वादश अङ्गानि भवन्ति, तद्यथा-द्वौ पादौ द्वे जङ्घे द्वे ऊरुणी द्वे गात्रार्द्धे द्वौ बाहू ग्रीवा शिरश्च; एवं श्रुतरूपस्यापि परमपुरुषस्याऽऽचारादीनि द्वादश अङ्गानि क्रमेण वेदितव्यानि। तथा चोक्तम्–

पायदुगं जंघोरू, गायदुगद्धं तु दो य बाहू य।
गीवा सिरं च पुरिसो, बारस अङ्गो सुयविसिट्ठो॥१॥ [ ]

श्रुतपुरुषस्याङ्गेषु प्रविष्टमङ्गप्रविष्टम्, अङ्गभावेन व्यवस्थितमित्यर्थः। यत् पुनरेतस्यैव द्वादशाङ्गात्मकस्य श्रुतपुरुषस्य व्यतिरेकेण स्थितमङ्गबाह्यत्वेन व्यवस्थितं तदनङ्गप्रविष्टम्। अथवा यद् गणधरदेवकृतं तदङ्गप्रविष्टम्, मूलभूतमित्यर्थः, गणधरदेवा हि मूलभूतमाचारादिकं श्रुतमुपरचयन्ति, तेषामेव सर्वोत्कृष्टश्रुतलब्धिसम्पन्नतया तद् रचयितुमीशत्वात्, न शेषाणाम्, ततस्तत्कृतं सूत्रं मूलभूतमित्यङ्गप्रविष्टमुच्यते। यत् पुनः शेषैः श्रुतस्थविरैस्तदेकदेशमुपजीव्य विरचितं तदनङ्गप्रविष्टम्। अथवा यत् सर्वदैव नियतमाचारादिकं श्रुतं तद् अङ्गप्रविष्टम्, तथाहि– आचारादिकं श्रुतं सर्वेषु क्षेत्रेषु सर्वकालं चार्थं क्रमं चाधिकृत्यैवमेव व्यवस्थितं ततस्तदङ्गप्रविष्टमुच्यते, **अङ्गप्रविष्टम्** अङ्गभूतं मूलभूतमित्यर्थः। शेषं तु यत् श्रुतं तदनियतम् अतस्तद् अनङ्गप्रविष्टमुच्यते। उक्तं च–

गणहरकयमंगगयं, जं कय थेरेहिं बाहिरं तं तु।
नियतं चऽङ्गपविट्ठं, अणियतसुय बाहिरं भणियं॥१॥ [ ]

तत्राल्पवक्तव्यत्वात् प्रथममङ्गबाह्यमधिकृत्य प्रश्नसूत्रमाह– **से किं तं** इत्यादि। अथ किं तद् अङ्गबाह्यम् ?। सूरिराह-अङ्गबाह्यं श्रुतं द्विविधं प्रज्ञप्तम्, तद्यथा- आवश्यकं चाऽऽवश्यकव्यतिरिक्तं च। तत्र अवश्यं कर्म आवश्यकम्, अवश्यकर्त्तव्यक्रियानुष्ठानमित्यर्थः, अथवा गुणानामभिविधिना वश्यमात्मानं करोतीत्यावश्यकम्– अवश्यकर्त्तव्यसामायिकादिक्रियानुष्ठानम्, तत्प्रतिपादकं श्रुतमपि आवश्यकम्। चशब्दः स्वगतानेकभेदसूचकः॥

से किं तं इत्यादि। अथ किं तद् आवश्यकम् ?। सूरिराह-आवश्यकं षड्विधं प्रज्ञप्तम्, तद्यथा– **सामायिकम्** इत्यादि निगदसिद्धम्। **सेत्तं** इत्यादि तदेतदावश्यकम्। **से किं तं** इत्यादि। अथ किं तद् आवश्यकव्यतिरिक्तम् ?। आचार्य आह– आवश्यकव्यतिरिक्तं द्विविधं प्रज्ञप्तम्, तद्यथा– कालिकमुत्कालिकं च। तत्र यद्

दिवसनिशाप्रथम-पश्चिमपौरुषीद्वय एव पठ्यते तत् कालिकम्, कालेन निर्वृत्तं कालिकमिति व्युत्पत्तेः। यत् पुनः कालवेलावर्जं पठ्यते तद् उत्कालिकम्। आह च **चूर्णिकृत्**– **तत्थ कालियं जं दिण-राईण पढम-चरमपोरिसीसु पढिज्जइ। जं पुण कालवेलावज्जं पढिज्जइ तं उक्कालियं** [नन्दीचू० सू० ८० पृ० ५७] ति।

तत्राल्पवक्तव्यत्वात् प्रथममुत्कालिकमधिकृत्य प्रश्नसूत्रमाह– **से किं तं** इत्यादि। अथ किं तद् उत्कालिकं श्रुतम् ?। सूरिराह– उत्कालिकं श्रुतमनेकविधं प्रज्ञप्तम्, तद्यथा– **दशवैकालिकं** तच्च सुप्रतीतम्। तथा कल्प्याकल्प्यप्रतिपादकमध्ययनं कल्प्याकल्प्यम्। तथा कल्पनं कल्पः-स्थविरादिकल्पः, तत्प्रतिपादकं श्रुतं कल्पश्रुतम्। तत् पुनर्द्विभेदम्, तद्यथा– **चुल्लकप्पसुयं महाकप्पसुयं**, एकमल्पग्रन्थमल्पार्थं च, द्वितीयं महाग्रन्थं महार्थं च। शेषा ग्रन्थविशेषाः प्रायः सुप्रतीताः, तथापि लेशतोऽप्रसिद्धान् व्याख्यास्यामः। तत्र **पण्णवण** त्ति जीवादीनां पदार्थानां प्रज्ञापनं प्रज्ञापना। सैव बृहत्तरा महाप्रज्ञापना। तथा प्रमादा-ऽप्रमादस्वरूप-भेद-फल-विपाकप्रतिपादकमध्ययनं **प्रमादाप्रमादम्**। तत्र प्रमादस्वरूपमेव-प्रचुरकर्मेन्धनप्रभवनिरन्तराविध्यातशारीरमानसानेकदुःखहुतवहज्वालाकलापपरीतमशेषमेव संसारवासगृहं पश्यंस्तन्मध्यवर्त्यपि सति च तन्निर्गमनोपाये वीतरागप्रणीतधर्मचिन्तामणौ यतो विचित्रकर्मोदयसाचिव्यजनितात् परिणामविशेषादपश्यन्निव तद्भयमविगणय्य विशिष्टपरलोकक्रियाविमुख एवाऽऽस्ते जीवः स खलु प्रमादः, तस्य च प्रमादस्य ये हेतवो मद्यादयस्तेऽपि प्रमादाः, तत्कारणत्वात्। उक्तं च–

मज्जं विसय कसाया, निद्दा विगहा य पंचमी भणिया।
एए पंच पमाया, जीवं पाडेंति संसारे॥१॥ [ ]

एतस्य च पञ्चप्रकारस्यापि प्रमादस्य फलं दारुणो विपाकः। उक्तं च–

श्रेयो विषमुपभोक्तुं, क्षमं भवेत् क्रीडितुं हुताशेन।
संसारबन्धनगतैर्न तु प्रमादः क्षमः कर्त्तुम्॥१॥
अस्यामेव हि जातौ, नरमुपहन्याद् विषं हुताशो वा।
आसेवितः प्रमादो, हन्याज्जन्मान्तरशतानि॥२॥

यत्र प्रयान्ति पुरुषाः, स्वर्गं यच्च प्रयान्ति विनिपातम्।
तत्र निमित्तमनार्यः, प्रमाद इति निश्चितमिदं मे॥३॥
संसारबन्धनगतो जाति-जरा-व्याधि-मरणदुःखार्त्तः।
यन्नोद्विजते सत्त्वः, सोऽप्यपराधः प्रमादस्य॥४॥
आज्ञाप्यते यदवशस्तुल्योदर-पाणि-पाद-वदनेन।
कर्म च करोति बहुविधमेतदपि फलं प्रमादस्य॥५॥
इह हि प्रमत्तमनसः, सोन्मादवदनिभृतेन्द्रियाश्चपलाः।
यत् कृत्यं तदकृत्वा, सततमकार्येष्वभिपतन्ति॥६॥
तेषामभिपतितानामुद्भ्रान्तानां प्रमत्तहृदयानाम्।
वर्द्धन्त एव दोषा वनतरव इवाम्बुसेकेन॥७॥
दृष्ट्वाऽप्यालोकं नैव विश्रम्भितव्यं, तीरं नीताऽपि भ्राम्यते वायुना नौः।
लब्ध्वा वैराग्यं भ्रष्टयोगः प्रमादाद्, भूयो भूयः संसृतौ बम्भ्रमीति॥८॥ [ ]

एवं प्रतिपक्षद्वारेणाप्रमादस्यापि स्वरूपादयो वाच्याः। **नन्दी**त्यादि सुगमम्। **सूरियपन्नत्ति** त्ति सूर्यचर्याप्रज्ञापनं यस्यां ग्रन्थपद्धतौ सा **सूर्यप्रज्ञप्तिः**। तथा **पौरुषीमण्डलम्** इति पुरुषः-शङ्कुः पुरुषशरीरं वा तस्मान्निष्पन्ना पौरुषी[1] तत आगते [ ] इत्यण्। आह च **चूर्णिकृत्– पुरिसो त्ति संकू पुरिससरीरं वा, तत्र पुरिसाओ निप्फन्ना पोरिसी** [नन्दीचू० सू० ८१ पृ० ५८] इति। इयमत्र भावना-सर्वस्यापि वस्तुनो यदा स्वप्रमाणा छाया जायते तदा पौरुषी भवति, एतच्च पौरुषीप्रमाणमुत्तरायणस्यान्ते दक्षिणायनस्यादौ चैकं दिनं भवति, ततः परमङ्गुलस्याष्टावेकषष्टिभागा दक्षिणायने वर्द्धन्ते उत्तरायणे च ह्रसन्ति, एवं मण्डले मण्डले अन्याऽन्या पौरुषी यत्राध्ययने व्यावर्ण्यते तदध्ययनं **पौरुषीमण्डलम्**। तथा यत्राध्ययने चन्द्रस्य सूर्यस्य च दक्षिणेषु उत्तरेषु च मण्डलेषु सञ्चरतो यथा मण्डलाद् मण्डले प्रवेशो भवति तथा व्यावर्ण्यते तदध्ययनं **मण्डलप्रवेशः**। तथा **विद्याचरणविनिश्चयः** इति, विद्येति ज्ञानम्, तच्च सम्यग्दर्शनसहितमवगन्तव्यम्, अन्यथा ज्ञानत्वायोगात्, चरणं चारित्रम्, एतेषां

---

१. **ङसेरागतः** - मलय० त० १०।४७। **ङसेरागते** - शाकटा० ३।१।१५८।, **तत आगतः** पा० ४।३।७३, १४५२ ॥

फलविनिश्चयप्रतिपादको ग्रन्थो **विद्याचरणविनिश्चयः**। तथा **'गणिविद्या'** इति, सबाल-वृद्धो गच्छो गणः, सोऽस्यास्तीति गणी-आचार्यस्तस्य विद्या-ज्ञानं **गणिविद्या**, सा चेह– ज्योतिष्क-निमित्तादिपरिज्ञानरूपा वेदितव्या, ज्योतिष्क-निमित्तादिकं हि सम्यक् परिज्ञाय प्रव्राजन-सामायिकारोपणोपस्थापन-श्रुतोद्देशानुज्ञा-गणारोपणा-दिशानुज्ञा-विहारक्रमादिषु प्रयोजनेषूपस्थितेषु प्रशस्ते तिथि-करण-मुहूर्त्त-नक्षत्र-योगे यद् यत्र कर्त्तव्यं भवति तत् तत्र सूरिणा कर्त्तव्यम्, तथा चेन्न करोति तर्हि महान् दोषः। उक्तं च–

जोइस-निमित्तनाणं, गणिणो पव्वावणाइकज्जेसु।
उवजुज्जइ तिहि-करणाइजाणणट्ठऽन्नहा दोसो॥१॥ [ ]

ततो यानि सामायिकादीनि प्रयोजनानि यत्र तिथि-करणादौ कर्त्तव्यानि भवन्ति तानि तत्र यस्यां ग्रन्थपद्धतौ व्यावर्ण्यन्ते सा **गणिविद्या**। तथा **ध्यानविभक्तिः** इति **ध्यानानि** आर्त्तध्यानादीनि तेषां विभजनं विभक्तिर्यस्यां ग्रन्थपद्धतौ सा ध्यानविभक्तिः। तथा **मरणानि** प्राणत्यागलक्षणानि, तानि च द्विधा– प्रशस्तानि अप्रशस्तानि च, तेषां **विभजनं** पार्थक्येन स्वरूपप्रकटनं यस्यां ग्रन्थपद्धतौ सा **मरणविभक्तिः**। तथाऽऽत्मनः जीवस्याऽऽलोचना-प्रायश्चित्तप्रतिपत्तिप्रभृतिप्रकारेण विशुद्धिः कर्मविगमलक्षणा प्रतिपाद्यते यस्यां ग्रन्थपद्धतौ साऽऽत्मविशुद्धिः। तथा **वीतरागश्रुतम्** इति सरागव्यपोहेन वीतरागस्वरूपं प्रतिपाद्यते यत्राध्ययने तद् **वीतरागश्रुतम्**। तथा **संलेखनाश्रुतम्**, इति द्रव्य-भावसंलेखना यत्र श्रुते प्रतिपाद्यते तत् संलेखनाश्रुतम्। तत्रोत्सर्गत इयं द्रव्यसंलेखना–

चत्तारि विचित्ताइं विगईनिज्जूहियाइं चत्तारि।
संवच्छरे उ दोन्नि उ, एगंतरियं च आयामं॥१॥
नाइविगिट्ठो य तवो, छम्मासे परिमियं च आयामं।
अन्ने वि य छम्मासे, होइ विगिट्ठं तवोकम्मं॥२॥
वासं कोडीसहियं, आयामं कट्टु आणुपुव्वीए।
गिरिकंदरम्मि गंतुं, पायवगमणं अह करेइ॥३॥

[आचा० नि० २७१-२७३, पञ्चव० १५७४-१५७६]

भावसंलेखना तु क्रोधादिकषायप्रतिपक्षाभ्यासः। तथा **विहारकल्पः** इति विहरणं विहारः तस्य **कल्पः** व्यवस्था स्थविरकल्पादिरूपा यत्र वर्ण्यते ग्रन्थे स विहारकल्पः। तथा **चरणं** चारित्रं तस्य विधिर्यत्र वर्ण्यते स **चरणविधिः**। तथा **आतुरप्रत्याख्यानम्** इति **आतुरः** चिकित्साक्रियाव्यपेतस्तस्य प्रत्याख्यानं यत्राध्ययने विधिपूर्वकमुपवर्ण्यते तद् **आतुरप्रत्याख्यानम्**। विधिश्चाऽऽतुरस्य प्रत्याख्यानदानविषये **चूर्णिकृतै**वमुपदर्शितः— **गिलाणं किरियातीयं गीयत्था पच्चक्खावेंति दिणे दिणे दव्वह्रासं करेंता अंते य सव्वदव्वदायणयाए भत्तवेरग्गं जणेत्ता भत्ते नित्तिण्हस्स भवचरिमपच्चक्खाणं कारवेंति** [नन्दीचू० सू० ८१ पृ० ५८] त्ति। तथा [**महाप्रत्याख्यानम्** इति] महत् प्रत्याख्यानं यत्र वर्ण्यते तद् महाप्रत्याख्यानम्। इह **चूर्णिकारेण** कृता भावना दर्श्यते— **थेरकप्पेण वा जिणकप्पेण वा विहरित्ता अंते थेरकप्पिया बारस वासे संलेहणं [१]करेंता जिणकप्पिया पुण विहारेणेव संलीढा तहावि जहाजुत्तं संलेहणं [२]करेंता निव्वाघायं सचेट्ठा चेव भवचरिमं पच्चक्खंति, एयं सवित्थरं जत्थऽज्झयणे वण्णिजइ तमज्झणं महापच्चक्खाणं। [३]एतान्यध्ययनानि जहाभिहाणत्थाणि भणियाणि।** [नन्दीचू० सू० ८१ पृ० ५८]। **सेत्तं** इत्यादि, निगमनम्, तदेतदुत्कालिकम्, [४]उपलक्षणं चैतदिति उक्तमुत्कालिकम्।

से किं तं इत्यादि, अथ किं तत् कालिकम् ?। **कालिकमनेकविधं प्रज्ञप्तम्, तद्यथा** इत्यादि। **उत्तराध्ययनानि, उत्तराणि** प्रधानानि अध्ययनानि। सर्वाण्यपि चाध्ययनानि प्रधानान्येव तथाऽप्यमून्येव रूढ्या उत्तराध्ययनशब्दवाच्यत्वेन प्रसिद्धानि।

१-२. **करेत्ता** - नन्दीचू० नन्दीहारि० पृ०७२। अत्र '**करेन्ता**' इति '**करेत्ता**' इति पाठयोः कतरः पाठः समीचीन इति भ्रान्तिर्जायते, हस्तलिखितादर्शेषु उभयथा 'त्ता-न्ता' इत्यनयोः अक्षरयोः समानप्रायत्वात्। अतः सुधीभिर्विचार्य पाठो ग्राह्यः॥ ३. अस्मत्संविधवर्तिषु विविधेषु नन्दीमलयगिरीयवृत्तेरादर्शेषु ईदृशाः पाठा उपलभ्यन्ते- [**बृहत्टीकासत्कमेतत् जेसं२**] **एवं तावदमून्यध्ययनानि एतान्यध्ययनानि जहाभिहाणत्थाणि भणियाणि** पा० जे२। **एवं तावदमून्यध्ययनानि x एतान्यध्ययनानि x जहाभिहाणत्थाणि भणियाणि** खं०। xx।।।।। इति चिह्नं कृत्वा खं० मध्ये निराकृतः पाठः **बृहत्टीकासत्कमेतत् एतान्यध्ययनानि जहाभिहाणत्थाणि भणियाणि** जे१ दे०। **एवं तावदमून्यध्ययनानि एतानि जहाभिहाणत्थाणि भणियाणि** मां०। अत्र **नन्दीसूत्रचूर्णौ नन्दीहारिभद्रीवृत्तौ** च ईदृशः पाठः सम्प्रति उपलभ्यते- **एते अज्झयणा जहाभिधाणत्था भणिया - नन्दीचू०** सू०८१ पृ०५८। **एयाणि अज्झयणाणि जहा अभिधाणत्थाणि तहा वण्णियाणि - नन्दीहारि०** सू०८३ पृ०७२॥ ४. **उपलक्षणमेतत्** [**तेनान्यदपि स्थविरकृतं** खंसं०] **उत्कालिकं** [**अवसेयं** खंसं०] इति खं० मध्ये केनचित् संशोधितः पाठः। "**सेतमित्यादि निगमनम्, तदेतदुत्कालिकम्, उपलक्षणं चैतदित्युक्तमुत्कालिकम्**" इति **नन्दीसूत्रस्य हारिभद्र्यां वृत्तौ** [सू०८३ पृ०७२] पाठः॥

दशाः इत्यादि प्रायो निगदसिद्धम्। **निशीथम्** इति निशीथवद् निशीथम्, इदं प्रतीतमेव। तस्मात् परं यद् ग्रन्था-ऽर्थाभ्यां महत्तरं तद् **महानिशीथम्**। तथा आवलिकाप्रविष्टानामितरेषां वा विमानानां प्रविभक्तिः-प्रविभजनं यस्यां ग्रन्थपद्धतौ सा **विमानप्रविभक्तिः**, सा चैका स्तोकग्रन्थार्था द्वितीया महाग्रन्थार्था, तत्राऽऽद्या **क्षुल्लिकाविमानप्रविभक्तिः द्वितीया महाविमानप्रविभक्तिः**। तथा **अङ्गचूलिका** इति, **अङ्गस्य** आचारादेश्चूलिकाऽङ्गचूलिका, चूलिका नाम उक्ता-ऽनुक्तार्थसङ्ग्रहात्मिका ग्रन्थपद्धतिः। तथा **वर्गचूलिका** इति, **वर्गः** अध्ययनानां समूहो यथाऽन्तकृद्दशास्वष्टौ वर्गा इत्यादि, तेषां चूलिका। तथा **व्याख्या** भगवती, तस्याश्चूलिका **व्याख्याचूलिका**। तथा **अरुणोपपातः** इति, अरुणो नाम देवः, तद्वक्तव्यताप्रतिपादको यो ग्रन्थः परावर्त्त्यमानश्च तदुपपातहेतुः सोऽरुणोपपातः। तथा चात्र **चूर्णिकारो**[१] भावनामकार्षीत्- **जाहे तमज्झयणं उवउत्ते समाणे अणगारे परियट्टेइ ताहे से अरुणे देवे समयनिबद्धत्तणओ चलियासणे संभमुब्भंतलोयणे पउत्तावही वियाणियट्ठे पहट्ठे चल-चवलकुंडलधरे दिव्वाए विभूईए दिव्वाए गईए जेणामेव से भगवं समणे निग्गंथे अज्झयणं परियट्टेमाणे अच्छइ तेणामेव उवागच्छइ, उवागच्छित्ता भत्तिभरोणयवयणे विमुक्कवरकुसुमगंधवासे ओवयइ, ओवइत्ता ताहे से समणस्स पुरओ ठिच्चा अंतद्धिए कयंजली उवउत्ते संवेगविसुज्झ-**

---

१. अत्रेदमवधेयम्- **मलयगिरि**सूरीणां समये नन्दीसूत्रचूर्णौ अयं पाठो भवेदिति संभाव्यते। सम्प्रति मुद्रितायां नन्दीचूर्णौ नेदृशः पाठ उपलभ्यते, किन्तु हारिभद्र्यां वृत्तौ एतादृशः पाठ उपलभ्यते। अधस्तात् चूर्णौ हारिभद्र्यां च वृत्तावुपलभ्यमानः पाठ उपदर्श्यते -

"जाहे तं अज्झयणं उवउत्ते समाणे अणगारे परियट्टेति ताहे से अरुणे देवे समयनिबद्धत्तणतो चलितासणे जेणेव से समणे तेणेव आगच्छित्ता ओवयति, ताहे समणस्स पुरतो अंतद्धिते कतंजलि उवउत्ते सुणेमाणे चिट्ठति, समत्ते य भणति-सुभासितं, वरेह वरं ति, इहलोगणिप्पिवासे से समणे पडिभणति - ण मे वरेण अट्ठो त्ति, ताहे से पदाहिणं करेत्ता णमंसित्ता य पडिगच्छति।" - **नन्दी० चूर्णौ** सू०८२ पृ०५९।

"जाहे तमज्झयणं उवउत्ते समाणे समणे परियट्टेति ताहे से अरुणे देवे समयनिबद्धत्तणओ चलियासणे संभमुब्भंतलोयणे पउत्तावही वियाणियट्ठे हट्ठपहट्ठे चल-चवलकुंडलधरे दिव्वाए जुत्तीए दिव्वाए विभूईए दिव्वाए गतीए जेणामेव से भगवं समणे तेणामेव उवागच्छति, उवागच्छित्ता भत्तिभरोणयवयणे विमुक्कवरकुसुमवासे ओवयति, ओवतित्ता ताहे से समणस्स पुरतो ठिच्चा अंतद्धिए कयंजलिए उवउत्ते संवेगविसुज्झमाणज्झवसाणे सुणेमाणे चिट्ठइ, समत्ते य भणइ - सुसज्झाइयं सुसज्झाइयं, वरं वरेहि त्ति, ततो से इहलोगणिप्पिवासे समतिण-मणि-मुत्ता-लेट्ठु-कंचणे सिद्धिवधूणिब्भराणुरायचित्ते समणे पडिभणइ- ण मे वरेण अट्ठो त्ति, ततो से अरुणे देवे अधिगतरजातसंवेगे पयाहिणं करेता वंदित्ता णमंसित्ता पडिगच्छइ ॥" - **हारि० वृत्तौ**। सू० ८४ पृ० ७३॥

माणज्झवसाणे तं अज्झयणं सुणेमाणे चिट्ठइ, सम्मत्ते अज्झयणे भणइ-भयवं ! सुसज्झाइयं सुसज्झाइयं, वरं वरेहि त्ति, ताहे से इहलोयनिप्पिवासे समतण-मुत्ताहल-लेट्ठु-कंचणे सिद्धिवररमणिपडिबद्धनिब्भराणुरागे समणे पडिभणइ-न मे भो ! वरेणं अट्ठो त्ति, ततो से अरुणे देवे अहिगयरजायसंवेगे पयाहिणं करेत्ता वंदइ नमंसइ वंदित्ता नमंसित्ता पडिगच्छइ। [नन्दीचू० सू० ८२ पृ० ५९]। एवं [वरुण०] गरुडोपपातादिष्वपि भावना कार्या। 5

तथा **उत्थानश्रुतम्** इति, **उत्थानम्** उद्वसनं तद्धेतुः श्रुतमुत्थानश्रुतम्, तच्च शृङ्गनादिते कार्ये उपयुज्यते। अत्र **चूर्णिकारकृता** भावना– **जस्सेगस्स कुलस्स वा गामस्स वा नगरस्स वा रायहाणीए वा समणे कयसंकप्पे आसुरुत्ते चंडक्किए अप्पसन्ने अप्पसन्नलेसे विसमासुहासणत्थे उवउत्ते समाणे उट्ठाणसुयज्झयणं परियट्टेइ, तं च एक्कं दो वा तिण्णि वा वारे, ताहे से कुले वा गामे वा जाव रायहाणी वा ओहयमणसंकप्पे विलवंते** 10 **दुयं दुयं पहावेंते उट्ठेइ-उव्वसइ त्ति भणियं होइ [नन्दीचू० सू० ८२ पृ० ६०] त्ति।**

तथा **समुत्थानश्रुतम्** इति **समुपस्थानं** भूयस्तत्रैवाऽऽवासनं तद्धेतुः श्रुतं समुपस्थापनश्रुतम्, वकारलोपाच्च सूत्रे 'समुट्ठाणसुयं' ति पाठः। तस्य चेयं भावना– **तओ समत्ते कज्जे तस्सेव कुलस्स वा गामस्स वा जाव रायहाणीए वा से चेव समणे कयसंकप्पे तुट्ठे पसन्ने पसन्नलेसे समसुहासणत्थे उवउत्ते समाणे समुट्ठाणसुयज्झयणं** 15 **परियट्टेइ, तं च एक्कं वा दो वा तिन्नि वा वारे, ताहे से कुले वा गामे वा जाव रायहाणी वा पहट्ठचित्ते पसत्थं मंगलं कलयलं कुणमाणे मंदाए गईए सललियं आगच्छए समुवट्ठए आवासइ त्ति वुत्तं भवइ, सम्मं उ(मु)वट्ठाणसुयं ति वत्तव्वे वकारलोवाओ समुट्ठाणसुयं ति भणियं। तहा जइ अप्पणा वि पुव्वुट्ठियं गामाइ भवइ तहा वि जइ से समणे एवंकयसंकप्पे अज्झयणं परियट्टेइ तओ पुणरवि आवासेइ। [नन्दीचू० सू० ८२ पृ० ६०]** 20

तथा **नागपरियावणिय** त्ति, नागाः-नागकुमारास्तेषां परिज्ञा यस्यां ग्रन्थपद्धतौ भवति सा **नागपरिज्ञा**, तस्याश्चेयं **चूर्णिकृतो**पदर्शिता भावना– **जाहे तं अज्झयणं समणे निग्गंथे परियट्टेइ ताहे अकयसंकप्पस्स वि ते नागकुमारा तत्थत्था चेव तं समणं परियाणंति[1] वंदंति नमंसंति बहुमाणं च करेंति, सिंगनादितकज्जेसु य वरदा भवंति। [नन्दीचू० सू० ८२ पृ० ६०]** 25

तथा **निरयावलियाओ** त्ति, यत्राऽऽवलिकाप्रविष्टा इतरे च नरकावासाः

---

१. **परियणेंति** खं०। **परियणंति** खं० विना। अत्र नन्दीचूर्णौ हारिभद्र्यां वृत्तौ च **परियाणंति** इति पाठः ॥

प्रसङ्गतस्तद्गामिनश्च नरास्तिर्यञ्चो वा वर्ण्यन्ते ता निरयावलिकाः, एकस्मिन्नपि ग्रन्थे वाच्ये बहुवचनं शब्दशक्तिस्वाभाव्यात्, यथा पञ्चाला इत्यादौ। तथा '**कल्पिकाः**' इति याः सौधर्मादिकल्पगतवक्तव्यतागोचरा ग्रन्थपद्धतयस्ताः कल्पिकाः। एवं कल्पावतंसिका द्रष्टव्याः, नवरं तासामियं **चूर्णिकृतो**पदर्शिता भावना– **सोहम्मीसाणकप्पेसु जाणि कप्पविमाणाणि ताणि कप्पवडिंसताणि जासु वण्णिज्जंति तेसु कप्पवडिंसएसु विमाणेसु देवी जा जेण तवोविसेसेण उववण्णा एयं पि वण्णिज्जइ ताओ कप्पवडिंसयाओ वुच्चंति। [नन्दीचू० सू० ८२ पृ० ६०]**

तथा **पुष्पिताः** इति यासु ग्रन्थपद्धतिषु गृहवासमुकुलनपरित्यागेन प्राणिनः संयमभाव[१]पुष्पिता उन्मिषिता भूयः संयमभावपरित्यागतो दुःखावाप्तिमुकुलनेन मुकुलिताः पुनस्तत्परित्यागेन पुष्पिताः प्रतिपाद्यन्ते ताः पुष्पिता उच्यन्ते। अधिकृतार्थविशेषप्रतिपादिकाः **पुष्पचूडाः**। तथा **वृष्णिदशा** इति, [२]**नाम्न्युत्तरपदस्य च** [**शाकटा० २।२।१३६**] इति लक्षणवशादादिपदस्यान्धकशब्दरूपस्य लोपः, ततोऽयं परिपूर्णशब्दः **अन्धकवृष्णिदशा** इति, अयं चान्वर्थः-अन्धकवृष्णिनराधिपकुले ये जातास्तेऽपि अन्धकवृष्णयः, तेषां दशाः-अवस्थाश्चरित-गति-सिद्धिगमनलक्षणा यासु ग्रन्थपद्धतिषु वर्ण्यन्ते ता अन्धकवृष्णिदशाः, अथवाऽन्धकवृष्णिवक्तव्यताप्रतिपादिका दशाः-अध्ययनानि अन्धकवृष्णिदशाः। आह च **चूर्णिकृत्**– **अंधगवण्हिणो जे कुले अंधगसद्दलोवाओ वण्हिणो भणिया तेसिं चरियं गती सिज्झणा य जत्थ भणिया ता वण्हीदसाओ, दस त्ति अवत्था अज्झयणा वा [नन्दीचू० सू० ८२ पृ० ६०]** इति।

एवमाइया इत्यादि, कियन्ति नाम नामग्राहमाख्यातुं शक्यन्ते प्रकीर्णकानि ?, तत एवमादीनि चतुरशीतिप्रकीर्णकसहस्राणि भगवतोऽर्हतः श्री**ऋषभ**स्वामिनस्तीर्थकृतः, तथा सङ्ख्येयानि प्रकीर्णकसहस्राणि मध्यमाना**मजिता**दीनां जिनवरेन्द्राणां तीर्थकराणाम्, एतानि च यस्य यावन्ति भवन्ति तस्य तावन्ति **प्रथमानुयोग**तो वेदितव्यानि, तथा चतुर्दशप्रकीर्णकसहस्राणि भगवतोऽर्हतो **वर्द्धमान**स्वामिनः। इयमत्र भावना– इह

---

१. °**पुष्पिताः मुषिताः** देसं० विना। '°पुष्पिताः सुखिताः' - नन्दीहारि० पृ० ७३॥ २. **नाम्न्युत्तरपदस्य च** ३।२।१०७॥ - सिद्धहेम० ॥

भगवत ऋषभस्वामिनश्चतुरशीतिसहस्रसङ्ख्याः श्रमणा आसीरन्, ततः प्रकीर्णकरूपाणि चाध्ययनानि कालिकोत्कालिकभेदभिन्नानि सर्वसङ्ख्यया चतुरशीतिसहस्र-सङ्ख्यान्यभवन्। कथम् ? इति चेत्, उच्यते, इह यद् भगवदर्हदुपदिष्टं श्रुतमनुसृत्य भगवन्तः श्रमणा विरचयन्ति तत् सर्वं प्रकीर्णकमुच्यते, अथवा श्रुतमनुसरन्तो यदात्मनो वचनकौशल्येन धर्मदेशनादिषु ग्रन्थपद्धतिरूपतया भाषन्ते तदपि सर्वं प्रकीर्णकम्। भगवतश्च ऋषभस्वामिन उत्कृष्टा श्रमणसम्पदा आसीत् चतुरशीतिसहस्रप्रमाणा, ततो घटन्ते प्रकीर्णकान्यपि भगवतश्चतुरशीतिसहस्रसङ्ख्यानि। एवं मध्यमतीर्थकृतामपि सङ्ख्येयानि प्रकीर्णकसहस्राणि भावनीयानि। भगवतस्तु वर्द्धमानस्वामिनश्चतुर्दश श्रमणसहस्राणि, तेन प्रकीर्णकान्यपि भगवतश्चतुर्दश सहस्राणि। अत्र द्वे मते-एके सूरयः प्रज्ञापयन्ति- इदं किल चतुरशीतिसहस्रादिकम् ऋषभादीनां[1] तीर्थकृतां श्रमणपरिमाणं प्रधानसूत्रविरचनसमर्थान् श्रमणानधिकृत्य वेदितव्यम्, इतरथा पुनः सामान्यश्रमणाः प्रभूततरा अपि तस्मिन् तस्मिन् ऋषभादिकाले आसीरन्। अपरे पुनरेवं प्रज्ञापयन्ति- ऋषभादितीर्थकृतां जीवतामिदं चतुरशीतिसहस्रादिकं श्रमणपरिमाणम्, प्रवाहतः पुनरेकैकस्मिन् तीर्थे भूयांसः श्रमणा वेदितव्याः, तत्र ये प्रधानसूत्रविरचनशक्तिसमन्विताः सुप्रसिद्धतद्ग्रन्था अतत्कालिका अपि तीर्थे वर्त्तमानास्तेऽत्राधिकृता द्रष्टव्याः।

एतदेव मतान्तरमुपदर्शयन्नाह— **अथवा** इत्यादि, **अथवेति** प्रकारान्तरोपदर्शने, यस्य ऋषभादेस्तीर्थकृतो यावन्तः शिष्यास्तीर्थे औत्पत्तिक्या वैनयिक्या कर्मजया पारिणामिक्या चतुर्विधया बुद्ध्या उपेताः-समन्विताः आसीरन् तस्य-ऋषभादेस्तावन्ति प्रकीर्णकसहस्राण्यभवन्, प्रत्येकबुद्धा अपि तावन्त एव। **अत्रैके** व्याचक्षते-इह एकैकस्य तीर्थकृतस्तीर्थेऽपरिमाणानि प्रकीर्णकानि भवन्ति, प्रकीर्णककारिणाम-परिमाणत्वात्, केवलमिह प्रत्येकबुद्धरचितान्येव प्रकीर्णकानि द्रष्टव्यानि, प्रकीर्णकपरिमाणेन प्रत्येकबुद्धपरिमाणप्रतिपादनात्। स्यादेतत्-प्रत्येकबुद्धानां शिष्यभावो विरुध्यते, तदेतदसमीचीनम्, यतः प्रव्राजकाचार्यमेवाधिकृत्य शिष्यभावो निषिध्यते, न तु तीर्थकरोपदिष्टशासनप्रतिपन्नत्वेनापि, ततो न कश्चिद्दोषः। तथा च तेषां ग्रन्थः—

१. °**भादितीर्थ**° जे१,२, मां ॥

इह तित्थे अपरिमाणा पइन्नगा, पइन्नगसामिअपरिमाणत्तणओ, किञ्च इह सुत्ते पत्तेयबुद्धपणीयं पइण्णगं भाणियव्वं, कम्हा ?, जम्हा पइण्णगपरिमाणेण चेव पत्तेयबुद्धपरिमाणं कीरइ[त्ति] भणियं 'पत्तेयबुद्धा वि तत्तिया चेव'त्ति। चोयग आह-नणु पत्तेयबुद्धा सिस्सभावो य विरुज्झए ?'। आयरिओ आह-तित्थगरपणीयसासणपडिवन्नत्तणओ तस्सीसा हवंति [नन्दीहारि० वृत्तौ० सू० ८३ पृ० ६१] इति। अन्ये पुनरेवमाहुः— सामान्येन प्रकीर्णकैस्तुल्यत्वात् प्रत्येकबुद्धानामत्राभिधानम्, न तु नियोगतः प्रत्येकबुद्धरचितान्येव प्रकीर्णकानीति। [नन्दीहारि० वृत्तौ सू० ८५ पृ० ७४] **सेत्तं** इत्यादि, तदेतत् कालिकम्, तदेतद् आवश्यकव्यतिरिक्तम्, तदेतद् अनङ्गप्रविष्टमिति॥

[सू० ८६] से किं तं अंगपविट्ठं ? अंगपविट्ठं दुवालसविहं[1] पण्णत्तं, तंजहा— आयारो १, सूयगडो २, ठाणं ३, समवाओ ४, वियाहपण्णत्ती ५, णाया-धम्मकहाओ ६, उवसगदसाओ ७, अंतगडदसाओ ८, अणुत्तरोव-वाइयदसाओ ९, पण्हावागरणाइं १०, विवागसुतं ११, दिट्ठिवाओ १२।

[सू० ८७] से किं तं आयारे ? आयारे णं समणाणं णिग्गंथाणं आयार-गोयर-विणय-वेणइय-सिक्खा-भासा-अभासा-चरण-करण-जाया-माया-वित्तीओ आघविज्जंति। से समासओ पंचविहे पण्णत्ते, तंजहा— णाणायारे १, दंसणायारे २, चरित्तायारे ३, तवायारे ४, वीरियायारे ५। आयारे णं परित्ता वायणा, संखेज्जा अणुओगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए पढमे अंगे दो सुयक्खंधा, पणुवीसं अज्झयणा, पंचासीती उद्देसणकाला, पंचासीती समुद्देसणकाला, अट्ठारस पयसहस्साइं पदग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा। सासत-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति। से एवंआया, एवंनाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जइ। सेत्तं आयारे १।

---

१. तुलना - द्वादशानामङ्गानां स्वरूपं समवायाङ्गसूत्रेऽपि [सू० १३६-१४८] समानप्रायं वर्तते ॥

से किं तं इत्यादि। अथ किं तद् अङ्गप्रविष्टम् ?। सूरिराह-अङ्गप्रविष्टं द्वादशविधं प्रज्ञप्तम्, तद्यथा– 'आचारः सूत्रकृतम्' इत्यादि। **से किं तं** इत्यादि। अथ किं तद् आचारः ? इति, अथवा कोऽयमाचारः ?। आचार्य आह-'आयारेणं' इत्यादि, आचरणमाचारः, आचर्यते इति वा आचारः, पूर्वपुरुषाचरितो ज्ञानाद्यासेवनविधिरित्यर्थः, तत्प्रतिपादको ग्रन्थोऽप्याचार एवोच्यते। अनेन चाऽऽचारेण करणभूतेन अथवा **आचारे** आधारभूते **णं** इति वाक्यालङ्कारे **श्रमणानां** प्रागूनिरूपितशब्दार्थानां **निर्ग्रन्थानां** बाह्या-ऽभ्यन्तरग्रन्थरहितानाम्। आह- श्रमणा निर्ग्रन्था एव भवन्ति तत् किमर्थं निर्ग्रन्थानामिति विशेषणम् ?, उच्यते, शाक्यादिव्यवच्छेदार्थम्, शाक्यादयोऽपि हि लोके श्रमणा व्यपदिश्यन्ते, तदुक्तम्– **निग्गंथ सक्क तावस, गेरुय आजीव पंचहा समणा।** [**पिण्डनि०** ४४५] इति, तेषामाचाराद्याख्यायते, तत्राऽऽचारो ज्ञानाचाराद्यनेकभेदभिन्नः, **गोचरः** भिक्षाग्रहणविधिलक्षणः, **विनयः** ज्ञानादिविनयः, **वैनयिकं** विनयफलं कर्मक्षयादि, **शिक्षा** ग्रहणशिक्षा आसेवनशिक्षा च, [१]विनेयशिक्षेति **चूर्णिकृत्**, तत्र **विनेयाः** शिष्याः, तथा **भाषा** सत्या असत्यामृषा च, **अभाषा** मृषा सत्यमृषा च, **चरणं** व्रतादि, **करणं** पिण्डविशुद्ध्यादि, उक्तं च–

वय ५, समणधम्म १०, संजम १७, वेयावच्चं १०, च बंभगुत्तीओ ९।
नाणाइतियं ३, तव १२, कोहनिग्गहाई ४, चरणमेयं॥१॥
पिंडविसोही ४, समिई ५, भावण १२, पडिमा १२, य इंदियनिरोहो ५।
पडिलेहण २५, गुत्तीओ ३, अभिग्गहा ४, चेव करणं तु॥२॥

[**संबोधप्र० ७३६-७३७**]

जाया-माया-वित्तीउ त्ति **यात्रा** संयमयात्रा, **मात्रा** तदर्थमेव परिमिताहारग्रहणम्, **वृत्तिः** विविधैरभिग्रहविशेषैर्वर्त्तनम्, 'आचारश्च गोचरश्च' इत्यादिद्वन्द्वः, ता आचार-गोचर-विनय-वैनयिक-शिक्षा-भाषा-ऽभाषा-चरण-करण-यात्रा-मात्रा-वृत्तयः आख्यायन्ते। इह यत्र क्वचिदन्यतरोपादानेऽन्यतरगतार्थाभिधानं तत् सर्वं तत्प्राधान्यख्यापनार्थमवसेयम्। **से समासतो** इत्यादि, स आचारः **समासतः**

१. "वेणइया सीसा, तेसि जहा आसेवणसिक्खा" - नन्दीचू० सू० ८५ पृ० ६१ ॥

सङ्क्षेपतः पञ्चविधः प्रज्ञप्तः, तद्यथा– **ज्ञानाचारः** इत्यादि, तत्र **ज्ञानाचारः**

काले विणए बहुमाणुवहाणे तह अनिण्हवणे।
वंजण अत्थ तदुभए, अट्ठविहो नाणमायारो॥१॥ [संबोधप्र० १२६२]

दर्शनाचारः–

निस्संकिय निक्कंखिय, निव्वितिगिच्छा अमूढदिट्ठी य।
उववूह थिरीकरणे, वच्छल्ल पभावणे अट्ठ॥१॥ [संबोधप्र० १२६२]

प्रभावकाश्च तीर्थस्यामी द्रष्टव्याः–

अइसेस इड्ढि आयरिय वाइ धम्मकहि खवग नेमित्ती।
विज्जा राया-गणसम्मया य तित्थं पभावंति॥१॥ [संबोधप्र० १२९]

चारित्राचारः–

पणिहाणजोगजुत्तो, पंचहिं समिईहिं तीहिं गुत्तीहिं।
एस चरित्तायारो, अट्ठविहो होइ नायव्वो॥१॥ [संबोधप्र० १२६४, पञ्चा० ७१९]

तपआचारः–

बारसविहम्मि वि तवे, अब्भिंतर बाहिरे जिणुवइट्ठे।
अगिलाए अणाजीवी, नायव्वो सो तवायारो॥१॥ [पञ्चा० ७२०, पञ्चव० ५६२]

वीर्याचारः–

अणिगूहियबल-विरिओ, परक्कमइ जो जहुत्तमाउत्तो।
जुंजइ य जहाथामं, नायव्वो वीरियायारो॥१॥ [पञ्चा० ७२१]

आयारे णं इत्यादि, आचारे **णं** इति वाक्यालङ्कारे **परीत्ता** परिमिता तं तं प्रज्ञापकं पाठकं वाधिकृत्याद्यन्तोपलब्धेः अथवा उत्सर्पिणीमवसर्पिणीं वा प्रतीत्य परीत्ता वा द्रष्टव्या, काऽसौ ? इत्याह **वाचना**, वाचना नाम सूत्रस्यार्थस्य वा प्रदानम्, यदि पुनः सामान्यतः प्रवाहमधिकृत्य चिन्त्यते तदाऽनन्ता। तथा चाह **चूर्णिकृत्**– **सुत्तस्स अत्थस्स वा पयाणं वायणा, सा 'परित्ता' अणंता न भवति, आइ-अंतोवलंभत्तणओ, अहवा ओसप्पिणीमुस्सप्पिणीकालं पडुच्च परित्ता, तीया-ऽणागयसव्वद्धं च पडुच्च अणंता** [नन्दीचू० सू० ८५ पृ० ६२] इति। तथा सङ्ख्येयानि 'अनुयोगद्वाराणि' उपक्रमादीनि,

१. °सप्पिणिमु° खं० ॥

तानि ह्यध्ययनमध्ययनं प्रति प्रवर्त्तन्ते, अध्ययनानि च सङ्ख्येयानीति कृत्वा। तथा सङ्ख्येया **वेढाः**, वेढो नाम छन्दोविशेषः। तथा सङ्ख्येयाः **श्लोकाः** सुप्रतीताः। तथा सङ्ख्येया **निर्युक्तयः**। तथा सङ्ख्येयाः **प्रतिपत्तयः**, प्रतिपत्तयो नाम द्रव्यादिपदार्थाभ्युपगमाः प्रतिमाद्यभिग्रहविशेषा वा, ताः सूत्रनिबद्धाः सङ्ख्येयाः। आह च **चूर्णिकृत्**– **दव्वाइपयत्थब्भुवगमा पडिमादभिग्गहविसेसा वा पडिवत्तीओ, ते समासतो सुत्तपडिबद्धा संखेज्ज** [नन्दीचू० सू० ८५ पृ० ६२] त्ति। **से णं** इत्यादि, **सः** आचारः **णं** इति वाक्यालङ्कारे **अङ्गार्थतया** अङ्गार्थत्वेन, अर्थग्रहणं परलोकचिन्तायां सूत्रादर्थस्य गरीयस्त्वख्यापनार्थम्, अथवा सूत्रार्थोभयरूप आचार इति ख्यापनार्थम्, प्रथममङ्गम्, एकारान्तता सर्वत्र मागधभाषालक्षणानुसरणाद् वेदितव्या, स्थापनामधिकृत्य प्रथममङ्गमित्यर्थः। तथा **द्वौ श्रुतस्कन्धौ** अध्ययनसमुदायरूपौ। पञ्चविंशतिरध्ययनानि, तद्यथा–

सत्थपरिन्ना १ लोगविजओ २ सीओसणिज्ज ३ सम्मत्तं ४।
आवंति ५ धुय ६ विमोहो ७ महापरिन्नो ८ वहाणसुयं ९॥१॥ [आव० नि०[1]]

एतानि नवाध्ययनानि प्रथमश्रुतस्कन्धे,

पिंडेसण १ सिज्जि २ रिया ३ भासज्जाया ४ य वत्थ ५ पाएसा ६।
उग्गहपडिमा ७ सत्तसत्तिक्कया १४ य भावण १५ विमुत्ती १६॥१॥ [आव० नि०[1]]

अत्र **सिज्जिरिय** त्ति शय्याध्ययनमीर्याध्ययनं च, **वत्थपाएस** त्ति वस्त्रैषणाध्ययनं पात्रैषणाध्ययनं च, अमूनि षोडशाध्ययनानि द्वितीयश्रुतस्कन्धे, एवमेतानि निशीथवर्जानि पञ्चविंशतिरध्ययनानि भवन्ति। तथा पञ्चाशीतिरुद्देशनकालाः, कथम् ? इति चेत्, उच्यते, इहाङ्गस्य श्रुतस्कन्धस्याध्ययनस्योद्देशकस्य चैक एवोद्देशनकालः, एवं शस्त्रपरिज्ञायां सप्तोद्देशनकालाः, लोकविजये षट्, शीतोष्णाध्ययने चत्वारः, सम्यक्त्वाध्ययने चत्वारः, लोकसाराध्ययने षट्, धुताध्ययने पञ्च, विमोहाऽध्ययनेऽष्टौ, महापरिज्ञायां सप्त, उपधानश्रुते चत्वारः, पिण्डैषणायामेकादश, शय्यैषणाध्ययने त्रयः, ईर्याध्ययने त्रयः, भाषाध्ययने द्वौ, वस्त्रैषणाध्ययने द्वौ, पात्रैषणाध्ययने द्वौ,

१. आव० नि० प्रतिक्रमणाध्ययने 'अट्ठावीसविहे आयारकप्पे' प्रक्षेपगाथास्ति। २. °**षणाध्ययने एका**° जे१,२, मां० देमू०॥

अवग्रहप्रतिमाध्ययने द्वौ, सप्त सप्ततिकाऽध्ययनेषु, भावनायामेकः, विमुक्तावेकश्च, एवमेते सर्वेऽपि पिण्डिताः पञ्चाशीतिर्भवन्ति। अत्र सङ्ग्रहगाथा–

सत्त १ य छ २ च्चउ ३ चउरो ४, छ ५ पंच ६ अट्ठेव ७ सत्त ८ चउरो ९ य।
एक्कार १० ति ११ तिय १२ दो १३ दो १४ दो १५ दो १६ सत्ते २३ क्क २४ एक्को २५ य॥१॥

एवं समुद्देशनकाला अपि पञ्चाशीतिर्भावनीयाः। तथा **पदाग्रेण** पदपरिमाणेनाष्टादश पदसहस्राणि, इह यत्रार्थोपलब्धिस्तत् पदम्। अत्र पर आह-यद्याचारे द्वौ श्रुतस्कन्धौ पञ्चविंशतिरध्ययनानि पदाग्रेण चाष्टादश पदसहस्राणि तर्हि यद् भणितं– **नवबंभचेरमइओ, अट्ठारसपयसहस्सिओ वेओ** [*आचा० नि० ११] इति तद् विरुध्यते, अत्र हि नवब्रह्मचर्याध्ययनमात्र एवाष्टादशपदसहस्रप्रमाण आचार उक्तः अस्मिंस्त्वध्ययने श्रुतस्कन्धद्वयात्मकः पञ्चविंशत्यध्ययनरूपोऽष्टादशपदसहस्रप्रमाण इति ततः कथं परस्परं न विरोधः ? तदयुक्तम्, अभिप्रायापरिज्ञानात्, इह द्वौ श्रुतस्कन्धौ पञ्चविंशतिरध्ययनानि एतत् समग्रस्याऽऽचारस्य परिमाणमुक्तम्, अष्टादश पदसहस्राणि पुनः प्रथमश्रुतस्कन्धस्य नवब्रह्मचर्याध्ययनमयस्य, विचित्रार्थनिबद्धानि हि सूत्राणि भवन्ति, अत एव चैषां सम्यगर्थावगमो गुरूपदेशतो भवति, नान्यथा। तथा चाह **चूर्णिकृत्**– **दो सुयक्खंधा पणुवीसं अज्झयणाणि एयं आयारग्गसहियस्स आयारस्स पमाणं भणियं, अट्ठारसपयसहस्सा पुण पढमसुयक्खंधस्स नवबंभचेरमइयस्स पमाणं, विचित्तअत्थनिबद्धाणि य सुत्ताणि, गुरूवएसओ सिं अत्थो जाणियव्वो** [नन्दीचू० सू० ८५ पृ० ६२] त्ति। तथा सङ्ख्येयानि अक्षराणि, पदानां सङ्ख्येयत्वात्। तथा **अणंता गमा** इति, इह **गमाः** अर्थगमा गृह्यन्ते, अर्थगमा नाम अर्थपरिच्छेदाः, ते चानन्ताः, एकस्मादेव सूत्रादतिशायिमतिमेधादिगुणानां तत्तद्धर्मविशिष्टानन्तधर्मात्मकवस्तुप्रतिपत्तिभावात्, एतच्च **टीकाकृतो**[1] व्याख्यानम्।

चूर्णिकृत्[2] पुनराह– अभिधाना-ऽभिधेयवशतो गमा भवन्ति, ते चानन्ताः, अनेन च प्रकारेण ते वेदितव्याः। तद्यथा– **सुयं मे आउसंतेणं भगवता एवमक्खायं** [नन्दीचू० सू० ८५ पृ० ६२] इति, इदं च सुधर्मस्वामी जम्बूस्वामिनं प्रत्याह, तत्रायमर्थः-श्रुतं

---

१. नन्दी० हारि० वृत्तौ सू० ८७ पृ० ७७ ॥ २. नन्दीचू० सू० ८५ पृ० ६२ ॥

मया हे आयुष्मन् ! 'तेन भगवता' वर्द्धमानस्वामिना एवमाख्यातम् १, अथवा श्रुतं मया 'आयुष्मदन्ते' आयुष्मतः-भगवतो वर्द्धमानस्वामिनोऽन्ते-समीपे 'णं' इति वाक्यालङ्कारे, तथा च भगवता एवमाख्यातम् २, अथवा श्रुतं मयाऽऽयुष्मता ३, अथवा श्रुतं मया भगवत्पादारविन्दयुगलमामृशता ४, अथवा श्रुतं मया गुरुकुलवासमावसता ५, अथवा श्रुतं मया हे आयुष्मन् ! 'तेणं' ति प्रथमार्थे तृतीया, तद् भगवता एवमाख्यातम् ६, अथवा श्रुतं मया हे आयुष्मन् ! 'तेणं' ति तदा भगवता एवमाख्यातम् ७, अथवा श्रुतं मया हे आयुष्मन् ! 'तेणं' ति तत्र, षड्जीवनिकायविषये 'तत्र' वा ८, विवक्षिते समवसरणे स्थितेन भगवता एवमाख्यातम् ९, अथवा श्रुतं मम हे आयुष्मन् ! वर्त्तते यतस्तेन भगवता एवमाख्यातम् १०, एवमादयस्तं तमर्थमधिकृत्य गमा भवन्ति। अभिधानवशतः पुनरेवं गमाः- **सुयं मे आउसं ! १, आउसं ! सुयं मे २, मे सुयं आउसं ३** इत्येवमर्थाभेदे तथा तथा पदानां संयोजनतोऽभिधानगमा भवन्ति, एवमादयः किल गमाः अनन्ता भवन्ति। तथा अनन्ताः पर्यायाः, ते च स्व-परभेदभिन्ना अक्षरार्थगोचरा वेदितव्याः। तथा **परीत्ताः** परिमिताः **त्रसाः** द्वीन्द्रियादयः। अनन्ताः **स्थावराः** वनस्पतिकायादयः। 'सासय-कड-निबद्ध-निकाइय'त्ति **शाश्वताः** धर्मास्तिकायादयः **कृताः** प्रयोग-विस्रसाजन्या घट-सन्ध्याभ्ररागादयः, एते सर्वेऽपि त्रसादयो **निबद्धाः** सूत्रे स्वरूपतः उक्ता **निकाचिताः** निर्युक्ति-सङ्ग्रहणि-हेतूदाहरणादिभिरनेकधा व्यवस्थापिता जिनप्रज्ञप्ताः **भावाः** पदार्थाः **आख्यायन्ते** सामान्यरूपतया विशेषरूपतया वा कथ्यन्ते, **प्रज्ञाप्यन्ते** नामादिभेदोपन्यासेन प्रपञ्च्यन्ते, **प्ररूप्यन्ते** नामादीनामेव भेदानां सप्रपञ्चं स्वरूपकथनेन पृथग्विविक्ताः ख्याप्यन्ते, **दर्श्यन्ते** उपमाप्रदर्शनेन यथा गौरिव गवय इत्यादि, **निदर्श्यन्ते** हेतु-दृष्टान्तोपदर्शनेन **उपदर्श्यन्ते** निगमनेन शिष्यबुद्धौ निःशङ्कं व्यवस्थाप्यन्ते। साम्प्रतमाचाराङ्गग्रहणे फलं प्रतिपादयति– **से एवं** इत्यादि, **सः** इति आचाराङ्गग्राहकोऽभिसम्बध्यते, एवमात्मा– एवंरूपो भवति, अयमत्र भावः-अस्मिन्नाचाराङ्गे भावतः सम्यगधीते सति तदुक्तक्रियानुष्ठान-परिपालनात् साक्षान्मूर्त्त इवाऽऽचारो भवतीति। आह च **टीकाकृत्**–

तदुक्त-क्रियापरिणामाव्यतिरेकात् स एवाऽऽचारो भवतीत्यर्थः [नन्दीचू० सू० ८७ पृ० ७७]

इति। तदेवं क्रियामधिकृत्योक्तम्, सम्प्रति ज्ञानमधिकृत्याऽऽह– **एवंनाय** त्ति यथाऽऽचाराङ्गे निबद्धा भावास्तथा तेषां भावानां ज्ञाता भवति, तथा **एवंविन्नाय** त्ति यथा निर्युक्ति-सङ्ग्रहणि-हेतूदाहरणादिभिर्विविधं प्ररूपितास्तथा विविधं ज्ञाता भवति। एवं चरण-करणप्ररूपणा आचारे आख्यायते। **सेत्तं आयारे** त्ति सोऽयमाचारः॥

[सू० ८८] से किं तं सूयगडे ? सूयगडेणं लोए सूइज्जइ, अलोए सूइज्जइ, लोया-ऽलोए सूइज्जइ, जीवा सूइज्जंति, अजीवा सूइज्जंति, जीवा-ऽजीवा सूइज्जंति, ससमए सूइज्जइ, परसमए सूइज्जइ, ससमय-परसमए सूइज्जइ। सूयगडे णं आसीतस्स किरियावादिसयस्स, चउरासीईए अकिरियवादीणं, सत्तट्ठीए अण्णाणियवादीणं, बत्तीसाए वेणइयवादीणं, तिण्हं तेवट्ठाणं पासंडियसयाणं वूहं किच्चा ससमए ठाविज्जइ। सूयगडे णं परित्ता वायणा, संखेज्जा अणुओगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए बिइए अंगे, दो सुयक्खंधा, तेवीसं अज्झयणा, तेत्तीसं उद्देसणकाला, तेत्तीसं समुद्देसणकाला, छत्तीसं पदसहस्साणि पयग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासय-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति। से एवंआया, एवंणाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जइ। सेत्तं सूयगडे २।

से किं तं इत्यादि। अथ किं तत् सूत्रकृतम् ?। सूच[1] पैशुन्ये [पा० धा० १८७४] सूचनात् सूत्रम्, निपातनाद् रूपनिष्पत्तिः, भावप्रधानश्चायं सूत्रशब्दः, ततोऽयमर्थः- सूत्रेण कृतम्, सूत्ररूपतया कृतमित्यर्थः, यद्यपि च सर्वमङ्गं सूत्ररूपतया कृतं तथापि रूढिवशादेतदेव सूत्रकृतमुच्यते, न शेषमङ्गम्। आचार्य आह– सूत्रकृतेन अथवा सूत्रकृते **णं** इति वाक्यालङ्कारे लोकः सूच्यते इत्यादि निगदसिद्धं यावत् 'असीयस्स किरियावाइसयस्स' इत्यादि, अशीत्यधिकस्य क्रियावादिशतस्य चतुरशीतेरक्रियावादिनां

१. 'सूचण् पैशून्ये' - हैम० धा० ९।२८८ ॥

सप्तषष्टेरज्ञानिकानां द्वात्रिंशतो वैनयिकानां सर्वसङ्ख्यया त्रयाणां त्रिषष्ट्यधिकानां पाषण्डिकशतानां **व्यूहं** प्रतिक्षेपं कृत्वा स्वसमयः स्थाप्यते।

तत्र न कर्त्तारमन्तरेण क्रिया पुण्यबन्धादिलक्षणा सम्भवति तत एवं परिज्ञाय तां क्रियाम् आत्मसमवायिनीं वदन्ति तच्छीलाश्च ये ते क्रियावादिनः। ते पुनरात्माद्यस्तित्वप्रतिपत्तिलक्षणा अमुनोपायेनाशीत्यधिकशतसङ्ख्या विज्ञेयाः— जीवा-ऽजीवा-ऽऽश्रव-बन्ध-संवर-निर्जरा-पुण्या-ऽपुण्य-मोक्षरूपान् नव पदार्थान् परिपाट्या पट्टिकादौ विरचय्य जीवपदार्थस्याधः स्व-परभेदावुपन्यसनीयौ, तयोरधो नित्या-ऽनित्यभेदौ, तयोरप्यधः कालेश्वरा-ऽऽत्म-नियति-स्वभावभेदाः पञ्च न्यसनीयाः। पुनश्चैवं विकल्पाः कर्त्तव्याः, तद्यथा—अस्ति जीवः स्वतो नित्यः कालत इत्येको विकल्पः। अस्य च विकल्पस्यायमर्थः-विद्यते खल्वयमात्मा स्वेन रूपेण नित्यश्च कालतः कालवादिनो मते। कालवादिनश्च नाम ते मन्तव्या ये कालकृतमेव सर्वं जगद् मन्यन्ते। तथा च ते आहुः— न कालमन्तरेण चम्पका-ऽशोक-सहकारादिवनस्पतिकुसुमोद्गम-फलबन्धादयो[१] हिमकणानुषक्तशीतप्रपात-नक्षत्र-गर्भाधान-वर्षादयो वा ऋतुविभाग-सम्पादिता बाल-कुमार-यौवन-वलि-पलितागमादयो वाऽवस्थाविशेषा घटन्ते, प्रतिनियतकालविभाग एव तेषामुपलभ्यमानत्वात्, अन्यथा सर्वमव्यवस्थया भवेत्, न चैतद् दृष्टमिष्टं वा। अपि च— मुद्गपक्तिरपि न कालमन्तरेण लोके भवन्ती दृश्यते किन्तु कालक्रमेण, अन्यथा स्थालीन्धनादिसामग्रीसम्पर्कसम्भवे प्रथमसमयेऽपि तस्या भावप्रसङ्गः, न च भवति, तस्माद् यत् कृतकं तत् सर्वं कालकृतमिति। तथा चोक्तम्—

न कालव्यतिरेकेण, गर्भ-बाल-शुभादिकम्।
यत् किञ्चिज्जायते लोके, तदसौ कारणं किल॥१॥
किञ्च कालादृते नैव मुद्गपक्तिरपीक्ष्यते।
स्थाल्यादिसन्निधानेऽपि, ततः कालादसौ मता॥२॥
कालाभावे च गर्भादि, सर्वं स्यादव्यवस्थया।
परेष्टहेतुसद्भावमात्रादेव तदुद्भवात्॥३॥

---

१. °**फलाबन्धा**° खं० पा०। 'फलस्य आबन्धः' इत्यर्थः॥

कालः पचति भूतानि, कालः संहरति प्रजाः।

कालः सुप्तेषु जागर्त्ति, कालो हि दुरतिक्रमः॥४॥ [*शास्त्रवार्ता० २।५३-५६]

अत्र 'परेष्टहेतुसद्भावमात्रात्' इति पराभिमतवनिता-पुरुषसंयोगादिमात्ररूप-हेतुसद्भावमात्रादेव 'तदुद्भवात्' इति गर्भाद्युद्भवप्रसङ्गात्॥ तथा कालः 'पचति' परिपाकं नयति परिणतिं नयति 'भूतानि' पृथिव्यादीनि। तथा कालः 'संहरति प्रजाः' पूर्वपर्यायात् प्रच्याव्य पर्यायान्तरेण 'प्रजाः' लोकान् स्थापयति। तथा कालः सुप्तेषु जनेषु जागर्त्ति, काल एव तं तं सुप्तं जनमापदो रक्षतीति भावः। तस्माद् 'हि' स्फुटं 'दुरतिक्रमः' अपाकर्तुमशक्यः काल इति॥

उक्तेनैव प्रकारेण द्वितीयोऽपि विकल्पो वक्तव्यः, नवरं कालवादिन इति वक्तव्ये ईश्वरवादिन इति वक्तव्यम्। तद्यथा– अस्ति जीवः स्वतो नित्य ईश्वरतः। ईश्वरवादिनश्च सर्वं जगदीश्वरकृतं मन्यन्ते, ईश्वरं च सहसिद्धज्ञान-वैराग्य-धर्मैश्वर्यरूपचतुष्टयं प्राणिनां च स्वर्गा-ऽपवर्गयोः प्रेरकमिति। तदुक्तम्–

ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः।

ऐश्वर्यं चैव धर्मश्च, सहसिद्धं चतुष्टयम्॥१॥ [*शास्त्रवार्ता० ३।२, द्वा० द्वा० १६।२]

अज्ञो जन्तुरनीशोऽयमात्मनः सुख-दुःखयोः।

ईश्वरप्रेरितो गच्छेत्, स्वर्गं वा श्वभ्रमेव वा॥२॥ [*शास्त्रवार्ता० ३।३] इत्यादि।

एवं तृतीयो विकल्प आत्मवादिनाम्, आत्मवादिनो नाम ये **पुरुष एवेदं सर्वं** [ ] इत्यादि प्रतिपन्नाः।

चतुर्थो विकल्पो नियतिवादिनाम्। ते ह्येवमाहुः-नियतिर्नाम तत्त्वान्तरमस्ति यद्वशादेते भावाः सर्वेऽपि नियतेनैव रूपेण प्रादुर्भावमश्नुवते, नान्यथा। तथाहि- यद् यदा यतो भवति तत् तदा तत एव नियतेनैव रूपेण भवदुपलभ्यते, अन्यथा कार्यकारण-भावव्यवस्था प्रतिनियतरूपव्यवस्था च न भवेत्, नियामकाभावात्, तत एवं कार्यनैयत्यतः प्रतीयमानामेनां नियतिं को नाम प्रमाणपथकुशलो बाधितुं क्षमते ?, मा प्रापदन्यत्रापि प्रमाणपथव्याघातप्रसङ्गः। तथा चोक्तम्–

नियतेनैव रूपेण, सर्वे भावा भवन्ति यत्।

ततो नियतिजा ह्येते, तत्स्वरूपानुवेधतः॥१॥

यद् यदैव यतो यावत्, तत् तदैव ततस्तथा।
नियतं जायते न्यायात्, क एनां बाधितुं क्षमः ?॥२॥ [*शास्त्रवार्ता० २।६१-६२]

पञ्चमो विकल्पः स्वभाववादिनाम्, ते हि स्वभाववादिन एवमाहुः-'इह सर्वे भावाः स्वभाववशादुपजायन्ते।' तथाहि-मृदः कुम्भो भवति न पटादिः, तन्तुभ्योऽपि पट उपजायते न कुम्भादिः, एतच्च प्रतिनियतभवनं न तथास्वभावतामन्तरेण घटासण्टङ्कमाटीकते, तस्मात् सकलमिदं स्वभावकृतमवसेयम्। अपि च- आस्तामन्यत् कार्यजातम्, इह मुद्गपक्तिरपि न स्वभावमन्तरेण भवितुमर्हति, तथाहि-स्थालीन्धन-कालादिसामग्रीसम्भवेऽपि न काङ्कटुकमुद्गानां पक्तिरुपलभ्यते, तस्माद् यद् यद्भावे भवति यदभावे च न भवति तत् तदन्वय-व्यतिरेकानुविधायि तत्कृतमिति स्वभावकृता मुद्गपक्तिरप्येष्टव्या, ततः सकलमेवेदं वस्तुजातं स्वभावहेतुकमवसेयमिति। तत एवं स्वत इति पदेन लब्धाः पञ्च विकल्पाः।

एवं परत इत्यनेनापि पञ्च लभ्यन्ते, 'परतः' इति परेभ्यो व्यावृत्तेन रूपेण विद्यते खल्वयमात्मेत्यर्थः। एवं नित्यत्वापरित्यागेन दश विकल्पा लब्धाः, एवमनित्यपदेनापि दश, सर्वेऽपि मिलिता विंशतिः। एते च जीवपदार्थेन लब्धाः, एवमजीवादिष्वप्यष्टसु पदार्थेषु प्रत्येकं विंशतिर्विंशतिर्विकल्पा लभ्यन्ते, ततो विंशतिर्नवगुणिताः शतमशीत्युत्तरं क्रियावादिनां भवति॥

तथा 'न कस्यचित् प्रतिक्षणमनवस्थितस्य पदार्थस्य क्रिया सम्भवति, उत्पत्त्यनन्तरमेव विनाशात्' इत्येवं ये वदन्ति तेऽक्रियावादिनः। तथा चाऽऽहुरेके-

क्षणिकाः सर्वसंस्कारा अस्थिराणां कुतः क्रिया ?।
भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते॥१॥
[*शास्त्रवार्ता० ८।१२८, षड्द० समु० ७]

एते चाऽऽत्मादिनास्तित्वप्रतिपत्तिलक्षणा अमुनोपायेन चतुरशीतिसङ्ख्या द्रष्टव्याः-पुण्या-ऽपुण्यवर्जितशेषजीवा-ऽजीवादिपदार्थसप्तकन्यासः, तथैव च जीवादिसप्तकस्याधः प्रत्येकं स्व-परविकल्पोपादानम्, असत्त्वादात्मनो नित्या-ऽनित्यविकल्पौ न स्तः, कालादीनां च पञ्चानामधस्तात् षष्ठी यदृच्छा न्यस्यते। इह यदृच्छावादिनः

सर्वेऽप्यक्रियावादिन एव, न केचिदपि क्रियावादिनः, ततः प्राग् यदृच्छा नोपन्यस्ता। तत एवं विकल्पाभिलापः-नास्ति जीवः स्वतः कालत इत्येको विकल्पः, एवमीश्वरादिभिरपि यदृच्छापर्यन्तैः, सर्वे मिलिताः षड् विकल्पाः। अमीषां च विकल्पानामर्थः प्राग्वद् भावनीयः, नवरं 'यदृच्छातः' इति यदृच्छावादिनां मते। अथ के ते यदृच्छावादिनः ?, उच्यते, इह ये भावानां सन्तानापेक्षया न प्रतिनियतं कार्य-कारणभावमिच्छन्ति किन्तु यदृच्छया ते यदृच्छावादिनः। तथा च ते एवमाहुः– न खलु प्रतिनियतो वस्तूनां कार्य-कारणभावः, तथा प्रमाणेनाग्रहणात्। तथाहि– शालूकादपि जायते शालूको गोमयादपि[१], वह्नेरपि वह्निरुपजायते अरणिकाष्ठादपि, धूमादपि जायते धूमः अग्नीन्धनसम्पर्कादपि, कन्दादपि जायते कदली बीजादपि, वटादयोऽपि बीजादुपजायन्ते शाखैकदेशादपि, ततो न प्रतिनियतः क्वचिदपि कार्य-कारणभाव इति यदृच्छातः क्वचित् किञ्चिद् भवतीति प्रतिपत्तव्यम्। न खल्वन्यथा वस्तुसद्भावं पश्यन्तोऽन्यथाऽऽत्मानं प्रेक्षावन्तः परिक्लेशयन्तीति। यथा च स्वतः षड् विकल्पा लब्धाः तथा नास्ति परतः कालत इत्येवमपि षड् विकल्पा लभ्यन्ते, सर्वेऽपि मिलिता द्वादश विकल्पा जीवपदे लब्धाः, एवमजीवादिष्वपि षट्सु पदार्थेषु प्रत्येकं द्वादश द्वादश विकल्पा लभ्यन्ते, ततो द्वादशभिः सप्त गुणिताश्चतुरशीतिर्भवन्ति अक्रियावादिनां विकल्पाः॥

तथा कुत्सितं ज्ञानमज्ञानं तदेषामस्तीति अज्ञानिकाः, **अतोऽनेकस्वरात्** [*मलय० त ७।१४] इति मत्वर्थीय इकप्रत्ययः। अथवाऽज्ञानेन चरन्तीति अज्ञानिकाः– असञ्चिन्त्यकृतबन्धवैफल्यादिप्रतिपत्तिलक्षणाः। तथाहि– ते एवमाहुः– न ज्ञानं श्रेयः, तस्मिन् सति परस्परं विवादयोगतश्चित्तकालुष्यादिभावतो दीर्घतरसंसारप्रवृत्तेः। तथाहि-केनचित् पुरुषेणान्यथा देशिते सति वस्तुनि विवक्षितो ज्ञानी ज्ञानगर्वाध्मातमानसस्तस्योपरि कलुषचित्तस्तेन सह विवादमारभते, विवादे च क्रियमाणे तीव्र-तीव्रतरचित्तकालुष्य-भावतोऽहङ्कारतश्च प्रभूत-प्रभूततराशुभकर्मबन्धसम्भवः, तस्माच्च दीर्घ-दीर्घतरसंसारः। तथा चोक्तम्–

---

१. इतः परं **जायते शालूकः** इत्यधिकः पाठः खं० पु० विना ॥

अन्नेण अन्नहा देसियम्मि भावम्मि नाणगव्वेणं।
कुणइ विवायं कलुसियचित्तो तत्तो य से बंधो॥१॥ [*धर्मसं० ५००]

यदा पुनर्[१] ज्ञानमाश्रीयते तदा नाहङ्कारसम्भवः, नापि परस्योपरि चित्तकालुष्यभावः, ततो न कर्मबन्धसम्भवः। अपि च– यः सञ्चिन्त्य क्रियते कर्मबन्धः स दारुणविपाकः, अत एव चावश्यं[२] वेद्यः, तस्य तीव्राध्यवसायतो निष्पन्नत्वात्; यस्तु मनोव्यापारमन्तरेण काय-वाक्कर्मवृत्तिमात्रतो विधीयते न तत्र मनसोऽभिनिवेशः, ततो नासाववश्यं वेद्यः, नापि तस्य दारुणो विपाकः, केवलमतिशुष्कसुधापङ्कधवलितभित्तिगतरजोमल इव स कर्मसङ्गः स्वत एव शुभाध्यवसायपवनविक्षोभितोऽपयाति; मनसोऽभिनिवेशाभावश्चाज्ञानाभ्युपगमे समुपजायते, ज्ञाने सति अभिनिवेशसम्भवात्; तस्मादज्ञानमेव मुमुक्षुणा मुक्तिपथप्रवृत्तेनाभ्युपगन्तव्यम्, न ज्ञानमिति। अन्यच्च-भवेद् युक्तो ज्ञानस्याभ्युपगमो यदि ज्ञानस्य निश्चयः कर्तुं पार्येत यावता स एव न पार्यते। तथाहि– सर्वेऽपि दर्शिनः परस्परं भिन्नमेव ज्ञानं प्रतिपन्नाः ततो न निश्चयः कर्तुं शक्यते–किमिदं ज्ञानं सम्यग् ? उतेदमिति ?। उक्तं च–

सव्वे य मिहो भिन्नं, नाणं इह नाणिणो जओ बेंति।
तीरइ न तओ काउं, विणिच्छओ एवमेयं ति॥१॥ [*धर्मसं० ५०१]

अथोच्येत– इह यत् सकलवस्तुस्तोमसाक्षात्कारिभगवदुपदेशादुपजायते ज्ञानं तत् सम्यग्, नेतरत्, असर्वज्ञमूलत्वादिति, सत्यमेतत्, किन्तु स एव सकलवस्तुस्तोमसाक्षात्कारीति कथं ज्ञायते ?, तद्ग्राहकप्रमाणाभावात्; अपि च– सुगतादयोऽपि सौगतादिभिः सकलवस्तुस्तोमसाक्षात्कारिण इष्यन्ते, तत् किं सुगतादिः सकलवस्तुस्तोमसाक्षात्कारीति प्रतिपद्यतामस्माभिः ? किं वा भगवद्वर्द्धमानस्वामी ? इति तदवस्थ एव निश्चयाभावः। स्यादेतत्– किमत्र संशयेन ?, यस्य पादारविन्दयुगलं प्रणिणंसवो दिवौकसः परस्परमहमहमिकया विशिष्ट-विशिष्टतरविभूति-द्युतिपरिकलिताः शतसहस्रसङ्ख्येन विमाननिवहेन सकलमपि नभोमण्डलमाच्छादयन्तो महीमवतीर्य पूजादिकमातन्वते स्म स भगवान् वर्द्धमानस्वामी सर्वज्ञः, न शेषाः सुगतादयः, मनुष्या

---

१. पुनरज्ञानमा° पा० दे० ॥ २. °श्यवेद्यः पा० खं०॥

हि मूढमनस्का अपि सम्भाव्यन्ते, न देवाः, ततो यदि शेषा अपि सुगतादयः सर्वज्ञा अभविष्यन् तर्हि तेषामपि देवाः पूजामकरिष्यन्, न च कृतवन्तः, तस्मान्न ते सर्वज्ञाः, तदेतत्, स्वदर्शनानुरागतरलितमनस्कतासूचकम्, यतो वर्द्धमानस्वामिनो दिवः समागत्य देवास्तथा पूजां कृतवन्त इत्येतदपि कथमवसीयते, भगवतश्चिरातीतत्वेनेदानीं तद्भावग्राहकप्रमाणाभावात् ?, सम्प्रदायादवसीयते इति चेत्, ननु सोऽपि सम्प्रदायो न धूर्त्तपुरुषप्रवर्त्तितः किन्तु सत्यपुरुषप्रवर्त्तित एवेति कथमवगन्तव्यम्, तद्ग्राहकप्रमाणाभावात् ?, न चाप्रमाणकं वयं प्रतिपत्तुं क्षमाः, मा प्रापदप्रेक्षावत्ताप्रसङ्गः। अन्यच्च-मायाविनः स्वयमसर्वज्ञा अपि जगति स्वस्य सर्वज्ञभावं प्रचिकटयिषवस्तथाविधेन्द्रजालवशाद् दर्शयन्ति देवान् इतस्ततः सञ्चरतः स्वस्य च पूजादिकं कुर्वतः, ततो देवागमदर्शनादपि कथं तस्य सर्वज्ञत्वनिश्चयः ?। तथा चाऽऽह भावत्क एव **स्तुतिकारः समन्तभद्रः**–

देवागम-नभोयान-चामरादिविभूतयः।
मायाविष्वपि दृश्यन्ते, नातस्त्वमसि नो महान्॥१॥ [आप्तमी० १]

भवतु वा वर्द्धमानस्वामी सर्वज्ञः तथापि तस्य सत्कोऽयमाचारादिक उपदेशः, न पुनः केनापि धूर्त्तेन स्वयं विरचय्य प्रवर्त्तित इति कथमवसेयम् ?, अतीन्द्रियत्वेनैतद्विषये प्रमाणाभावात्। अथवा भवत्वेषोऽपि निश्चयो यथाऽयमाचारादिक उपदेशो वर्द्धमानस्वामिन इति, तथापि तस्योपदेशस्यायमर्थो नान्य इति न शक्यं प्रत्येतुम्, नानार्था हि शब्दा लोके प्रवर्त्तन्ते, तथादर्शनात्, ततोऽन्यथाऽप्यर्थसम्भावनायां कथं विवक्षितार्थनियमनिश्चयः ?। अथ मन्येथास्तदात्वे तत एव सर्वज्ञात् साक्षात् श्रवणतो गौतमादेरर्थनियमनिश्चयोऽभूत् तत आचार्यपरम्परयेदानीमपि भवतीति, तदप्ययुक्तम्, यतो नाम गौतमादिरपि छद्मस्थः, छद्मस्थस्य च परचेतोवृत्तिरप्रत्यक्षा, तस्या अतीन्द्रियत्वेन तद्विषये चक्षुरादीन्द्रियप्रत्यक्षप्रवृत्तेरभावात्, अप्रत्यक्षायां च सर्वज्ञस्य विवक्षायां कथमिदं ज्ञायते– एष सर्वज्ञस्याभिप्रायः,अनेन चाभिप्रायेणायं शब्दः प्रयुक्तः, नाभिप्रायान्तरेण ?, तत एवं सम्यक्परिज्ञानाभावाद् यामेव वर्णावलीमुक्तवान् भगवान् तामेव केवलां पृष्ठतो लग्नो गौतमादिरपि भाषते, न पुनः परमार्थतस्तस्योपदेशस्या-

र्थमवबुध्यते, यथाऽऽर्यदेशोत्पन्नोक्तस्यानुवादकोऽपरिज्ञातशब्दार्थो म्लेच्छः। उक्तं च–

मिलक्खू[1] अमिलक्खुस्स, जहा वुत्ताणुभासए।
न हेउं से वियाणाइ, भासियं तऽणुभासए॥१॥
एवमन्नाणिया नाणं, वयंता वि सयं सयं।
निच्छयत्थं न याणंति, मिलक्खु व्व अबोहिए॥२॥ [धर्मसं० ५०८-५०९] 5

तदेवं दीर्घतरसंसारकारणत्वात् सम्यगनिश्चयाभावाच्च न ज्ञानं श्रेयः, किन्त्वज्ञानमेवेति स्थितम्।

ते चाज्ञानिकाः सप्तषष्टिसङ्ख्या अमुनोपायेन प्रतिपत्तव्याः-इह जीवा-ऽजीवादीन् नव पदार्थान् क्वचित् पट्टिकादौ व्यवस्थाप्य पर्यन्ते उत्पत्तिः स्थाप्यते, तेषां च जीवादीनां नवानां पदार्थानां प्रत्येकमधः सप्त सप्त सत्त्वादयो न्यस्यन्ते, तद्यथा– सत्त्वम् असत्त्वं 10 सदसत्त्वम् अवाच्यत्वं सदवाच्यत्वम् असदवाच्यत्वं सदसदवाच्यत्वं चेति। तत्र सत्त्वं स्वरूपेण विद्यमानत्वम् १, असत्त्वं पररूपेणाविद्यमानत्वम् २, सदसत्त्वं स्वरूप-पररूपाभ्यां विद्यमाना-ऽविद्यमानत्वम् ३, तत्र यद्यपि सर्वं वस्तु स्व-पररूपाभ्यां सर्वदैव स्वभावत एव सदसत् तथापि क्वचित् किञ्चित् कदाचिदुद्भूतं प्रमात्रा विवक्ष्यते तत एवं त्रयो विकल्पा भवन्ति ३, तथा तदेव सत्त्वमसत्त्वं च यदा युगपदेकेन शब्देन 15 वक्तुमिष्यते तदा तद्वाचकः शब्दः कोऽपि न विद्यते इति अवाच्यत्वम् ४, एते च चत्वारोऽपि विकल्पाः सकलादेशा इति गीयन्ते, सकलवस्तुविषयत्वात्। यदा त्वेको भागः सन् अपरश्चावाच्यो युगपद् विवक्ष्यते तदा सदवाच्यत्वम् ५, यदा त्वेको भागोऽसन् अपरश्चावाच्यस्तदाऽसदवाच्यत्वम् ६, यदा त्वेको भागः सन् अपरश्चासन् अपरतरश्चावाच्यस्तदा सदसदवाच्यत्वमिति ७। न चैतेभ्यः सप्तविकल्पेभ्योऽन्यो विकल्पः 20 सम्भवति, सर्वस्यैतेष्वेव मध्येऽन्तर्भावात्, ततः सप्त विकल्पा उपन्यस्ताः। सप्त च विकल्पा नवभिर्गुणिता जातास्त्रिषष्टिः। उत्पत्तेश्चत्वार एवाऽऽद्या विकल्पाः, तद्यथा– सत्त्वमसत्त्वं सदसत्त्वमवाच्यत्वं चेति, एते च चत्वारोऽपि विकल्पास्त्रिषष्टिमध्ये प्रक्षिप्यन्ते ततः सप्तषष्टिर्भवति।

---

१. **मिलक्खु** सर्वत्र पाठः ॥

तत्र को जानाति जीवः सन्नित्येको विकल्पः, न कश्चिदपि जानाति, तद्ग्राहक-प्रमाणाभावादिति भावः, ज्ञातेन वा किं तेन प्रयोजनम् ?, ज्ञानस्याभिनिवेशहेतुतया लोके प्रतिपन्थित्वात्, एवमसदादयोऽपि विकल्पा भावनीयाः, उत्पत्तिरपि किं सतोऽसतः सदसतोऽवाच्यस्य वेति को जानाति ?, ज्ञातेन वा न किञ्चिदपि प्रयोजनमिति॥

तथा विनयेन चरन्तीति वैनयिकाः, एते चानवधृतलिङ्गा-ऽऽचार-शास्त्रा विनयप्रतिपत्तिलक्षणा वेदितव्याः। ते च द्वात्रिंशत्सङ्ख्या अमुनोपायेन द्रष्टव्याः-सुर-नृपति-यति-ज्ञाति-स्थविरा-ऽधम-मातृ-पितृरूपेष्वष्टसु स्थानेषु कायेन वाचा मनसा दानेन च देश-कालोपपन्नेन विनयः कार्य इति चत्वारः कायादयः स्थाप्यन्ते, चत्वारश्चाष्टभिर्गुणिता जाता द्वात्रिंशत्॥

एतेषां च त्रयाणां त्रिषष्ट्यधिकानां पाषण्डिकशतानां प्रतिक्षेपः सूत्रकृताङ्गे शेषेषु च प्रकरणेषु पूर्वाचार्यैरनेकधा युक्तिभिः कृतस्ततो वयमपि स्थानाशून्यार्थं पूर्वाचार्यकृतं तेषां प्रतिक्षेपं सङ्क्षेपतो दर्शयामः-तत्र ये कालवादिनः सर्वं कालकृतं मन्यन्ते तान् प्रति ब्रूमः-कालो नाम किमेकस्वभावो नित्यो व्यापी ? किं वा समयादिरूपतया परिणामी[१] ?। तत्र यद्याद्यः पक्षः तदयुक्तम्, तथाभूतकालग्राहकप्रमाणाभावात्, न खलु तथाभूतं कालं प्रत्यक्षेणोपलभामहे। नाप्यनुमानेन, तदविनाभाविलिङ्गाभावात्। अथ कथं तदविनाभाविलिङ्गाभावः ? यावता दृश्यते भरत-रामादिषु पूर्वा-ऽपरव्यवहारः, स च न वस्तुस्वरूपमात्रनिमित्तः, वर्त्तमाने च काले वस्तुस्वरूपस्य विद्यमानतया तथाव्यवहारप्रवृत्तिप्रसक्तेः, ततो यन्निमित्तोऽयं भरत-रामादिषु पूर्वा-ऽपरव्यवहारः स काल इति। तथाहि-पूर्वकालयोगी पूर्वो भरतचक्रवर्त्ती अपरकालयोगी चापरो रामादिरिति। ननु यदि भरत-रामादिषु पूर्वा-ऽपरकालयोगतः पूर्वा-ऽपरव्यवहारस्तर्हि कालस्यैव कथं स्वयं पूर्वा-ऽपरव्यवहारः ?, तदन्यकालयोगादिति चेत्, न, तत्रापि स एव प्रसङ्गः इत्यनवस्था। अथ मा भूदेष दोष इति तस्य स्वयमेव पूर्वत्वमपरत्वं चेष्यते नान्यकालयोगादिति, तथा चोक्तम्–

पूर्वकालादियोगी यः, स पूर्वाद्यपदेशभाक्।
पूर्वापरत्वं तस्यापि, स्वरूपादेव नान्यतः॥१॥ [वार्तिकालं० ४।श्लो० ३० पृ० ४७६]

१. °णमतीति खं० पा० विना ॥

तदप्याकण्ठपीतासवप्रलापदेशीयम्, यत एकान्तेनैको व्यापी नित्यः कालोऽभ्युपगम्यते ततः कथं तस्य पूर्वादित्वसम्भवः ?। अथ सहचारिसम्पर्क-वशादेकस्यापि तथात्वकल्पना, तथाहि– सहचारिणो भरतादयः पूर्वाः अपरे च रामादयोऽपराः ततस्तत्सम्पर्कवशात् कालस्यापि पूर्वा-ऽपरव्यपदेशो भवति, भवति च सहचारिणा[1] व्यपदेशः, यथा मञ्चाः क्रोशन्तीति, तदेतदपि बालिशजल्पितम्, इतरेतराश्रयदोषप्रसङ्गात्, तथाहि– सहचारिणां भरतादीनां पूर्वादित्वं कालगतपूर्वादित्वयोगात्, कालस्य च पूर्वादित्वं सहचारिभरतादिगतपूर्वादित्वयोगतः, तत एकासिद्धावन्यतरस्याप्यसिद्धिः। उक्तं च–

एकत्व[2]-व्यापितायां हि, पूर्वादित्वं कथं भवेत् ?।
सहचारिवशात् तच्चेदन्योन्याश्रयतागमः ॥१॥
सहचारिणां हि पूर्वत्वं पूर्वकालसमागमात्।
कालस्य पूर्वादित्वं च, सहचार्यवियोगतः ॥२॥

[वार्तिकालं० ४।श्लो० ३१-३२ पृ० ४७६]

प्रागसिद्धावेकस्य कथमन्यस्य सिद्धिः ? इति, तन्नायं पक्षः श्रेयान्। अथ द्वितीयः पक्षः, सोऽप्ययुक्तः, यतः समयादिरूपे परिणामिनि कालेऽविशिष्टेऽपि फलवैचित्र्यमुपलभ्यते, तथाहि-समकालमारभ्यमाणाऽपि मुद्गपक्तिरविकला कस्यचिद् दृश्यते अपरस्य तु स्थाल्यादिसंगतावेव विकला। तथा समकालमेकस्मिन्नेव राजनि सेव्यमाने सेवकस्यैकस्य फलमचिराद् भवति अपरस्य तु कालान्तरेऽपि न, तथा समानेऽपि समकालमपि क्रियमाणे कृष्यादिकर्मण्येकस्य परिपूर्णा धान्यसम्पदुपजायते अन्यस्य[3] तु खण्डस्फुटिता न वा किञ्चिदपि, ततो यदि काल एव केवलः कारणं भवेत् तर्हि सर्वेषामपि सममेव मुद्गपक्त्यादिकं फलं भवेत्, न च भवति, तस्मान्न कालमात्रकृतं विश्ववैचित्र्यम्, किन्तु कालादिसामग्रीसापेक्षं तत्तत्कर्मनिबन्धनमिति स्थितम्॥

यदपि चेश्वरवादिनो ब्रुवते– **ईश्वरकृतं जगत्** इति, तदप्यसमीचीनम्, ईश्वरग्राहकप्रमाणाभावात्, अथास्ति तद्ग्राहकप्रमाणमनुमानम्, तथाहि– यत् स्थित्वा

---

१. °चारिणो खं विा ॥ २. "नित्यताव्यापितायां हि" इति **वार्तिकालङ्कारे** पाठः ॥ ३. **अपर**° खं० पा० विना॥

स्थित्वाऽभिमतफलसम्पादनाय प्रवर्त्तते तद् बुद्धिमत्कारणाधिष्ठितम्, यथा वास्यादि द्वैधीकरणादौ, प्रवर्त्तते च स्थित्वा स्थित्वा सकलमपि विश्वं स्वफलसाधनायेति, न खलु वास्यादयः स्वयमेव प्रवर्त्तन्ते, तेषामचेतनत्वात्, स्वभावत एव चेत् प्रवर्त्तन्ते तर्हि सदैव तेषां प्रवर्त्तनं भवेत्, न च भवति, तस्मादवश्यं स्थित्वा स्थित्वा प्रवर्त्तनं केनचित् प्रेक्षावता प्रवर्त्तकेन भवितव्यम्, सकलस्यापि च जगतः स्थित्वा स्थित्वा स्वफलं साधयतः प्रवर्त्तक ईश्वर एवोपपद्यते, नान्य इतीश्वरसिद्धिः।

तथाऽपरमनुमानम्- यत् पारिमण्डल्यादिलक्षणसन्निवेशविशेषभाक् तच्चेतनावता कृतम्, यथा घटादि, पारिमण्डल्यादिसन्निवेशविशेषभाक् च भू-भूधरादिकमिति, तदेतदयुक्तम्, सिद्धसाधनेन पक्षस्य प्रसिद्धसम्बन्धत्वात्, तथाहि– सकलमपीदं विश्ववैचित्र्यं वयं कर्मनिबन्धनमिच्छामः, यतोऽमी वैताढ्य-हिमवदादयः पर्वता भरतैरावत-विदेहा-ऽन्तरद्वीपादीनि क्षेत्राणि तथा तथा प्राणिनां सुख-दुःखादिहेतुतया यत् परिणमन्ते तत्र तथा तथा परिणमने तत्तन्निवासिनामेव तेषां जन्तूनां कर्म कारणमवसेयम्, नान्यत्, तथा च दृश्यन्ते एव पुण्यवति राज्यमनुशासति भूपतौ तत्कर्मप्रभावतः सुभिक्षादयः प्रवर्त्तमानाः, कर्म च जीवाश्रितम्, जीवाश्च बुद्धिमन्तश्चेतनावत्त्वात्, ततो बुद्धिमत्कारणाधिष्ठितत्वे चेतनावत्कृतत्वे च साध्यमाने सिद्धसाधनम्। अथ बुद्धिमान् चेतनावान् वा विशिष्ट एवेश्वरः कश्चित् साध्यते तेन न सिद्धसाधनम्, तर्हि दृष्टान्तस्य साध्यविकलता, वास्यादौ घटादौ चेश्वरस्याधिष्ठायकत्वेन कारणत्वेन वा व्याप्रियमाणस्यानुपलभ्यमानत्वाद्, वर्द्धकि-कुम्भकारादीनामेव तत्र तत्रान्वयतो व्यतिरेकतो वा व्याप्रियमाणानां निश्चीयमानत्वात्। अथ वर्द्धक्यादयोऽपि ईश्वरप्रेरिता एव तत्र तत्र कर्मणि प्रवर्त्तन्ते, न स्वतः, ततो न दृष्टान्तस्य साध्यविकलता, नन्वेवं तर्हि ईश्वरोऽप्यन्येनेश्वरेण प्रेरितः स्वकर्मणि प्रवर्त्तते, न स्वतः, विशेषाभावात्, सोऽप्यन्येनेश्वरेण प्रेरित इति विकालसन्ध्यायां तमःसन्ततिरिवादृष्टपर्यन्ता ध्यान्ध्यमापादयन्ती प्रसरत्यनवस्था। अथ मन्येथा वर्द्धक्यादिको जन्तुः सर्वोऽपि स्वरूपेणाज्ञस्ततः स प्रेरित एव स्वकर्मणि प्रवर्त्तते, भगवांस्त्वीश्वरः सकलपदार्थज्ञाता ततो नासौ स्वकर्मण्यन्यं स्वप्रेरकमपेक्षते तेन नानवस्था, तदप्यसत्,

इतरेतराश्रयदोषप्रसङ्गात्। तथाहि– सकलपदार्थयथावस्थित-स्वरूपज्ञातृत्वे सिद्धे सति अन्याप्रेरितत्वसिद्धिः, अन्याप्रेरितत्वसिद्धौ च सकल-जगत्करणतः सर्वज्ञत्व-सिद्धिरित्येकासिद्धावन्यतरस्याप्यसिद्धिः।

अपि च– यद्यसौ सर्वज्ञो वीतरागश्च तत् किमर्थमज्ञं[१] जनमसद्व्यवहारे प्रवर्त्तयति ?, मध्यस्था हि विवेकिनः सद्व्यवहार एव प्रवर्त्तयन्ति, नासद्व्यवहारे, स तु विपर्ययमपि करोति, ततः कथमसौ सर्वज्ञो वीतरागो वा ?। अथोच्येत– सद्व्यवहारविषयमेव भगवानुपदेशं ददाति तेन सर्वज्ञो वीतरागश्च, यस्त्वधर्मकारी जनसमूहस्तं फलमसद् अनुभावयति येन स तस्मादधर्माद् व्यावर्त्तते, तत उचितफलदायित्वाद् विवेकवानेव भगवानिति न कश्चिद् दोषः, तदप्यसमीक्षिताभिधानम्, यतः पापेऽपि प्रथमं स एव प्रवर्त्तयति, नान्यः, न च स्वयं प्रवर्त्तते, तस्याज्ञत्वेन पापे धर्मे वा स्वयंप्रवृत्तेरयोगात्, ततः पूर्वं पापे प्रवर्त्त्य तत्फलमनुभाव्य पश्चाद् धर्मे प्रवर्त्तयतीति केयमीश्वरस्य प्रेक्षापूर्वकारिता ?।

अथ पापेऽपि प्रथमं प्रवर्त्तयति तत्कर्माधिष्ठित एव, तथाहि–तदेव तेन जन्तुना कृतं कर्म यद्वशात् पाप एव प्रवर्त्तते, ईश्वरोऽपि च भगवान् सर्वज्ञस्तथारूपं तत्कर्म साक्षाद् ज्ञात्वा तं पाप एव प्रवर्त्तयति, तत उचितफलदायित्वान्नाप्रेक्षापूर्वकारीति। ननु तदपि कर्म तेनैव कारितम्, ततस्तदपि कस्मात् प्रथमं कारयति ? इति स एवाप्रेक्षापूर्वकारिताप्रसङ्गः। अथाधर्ममसौ न कारयति, किन्तु स्वत एव सोऽधर्ममाचरति, अधर्मकारिणं तु तं तत्फलमसदनुभावयति, तदन्येश्वरवत्– यथा हि तदन्ये ईश्वरा राजादयो नाधर्मे जनं प्रवर्त्तयन्ति अधर्मफलं तु प्रेषा[२]दिकमनुभावयन्ति तद्वद् भगवानीश्वरोऽपि, तदप्ययुक्तम्, अन्ये हि ईश्वरा न पापप्रतिषेधं कारयितुमीशाः, न हि नाम राजानोऽपि उग्रशासना[३]ः पापे मनो-वाक्कायनिमित्ते [प्रवृत्तं] सर्वथा प्रतिषेधयितुं प्रभविष्णवः, स तु भगवान् धर्मा-ऽधर्मविधि-प्रतिषेधविधापनसमर्थ इष्यते ततः कथं पापे प्रवृत्तं न प्रतिषेधति ?, अप्रतिषेधंश्च परमार्थतः स एव कारयति, तत्फलस्य पश्चादनुभावनादिति तदवस्थ एव दोषः। अथ पापे प्रवर्त्तमानं प्रतिषेधितुमशक्त इष्यते

१. °मन्यं पा० देसं० ॥ २. प्रेषा° देसं० विना ॥ ३. शासनात् खं० ॥

तर्हि नैवोच्चकैरिदमभिधातव्यं 'सर्वमीश्वरेण कृतम्' इति। अपि च-यद्यसौ स्वयमधर्मं करोति तथा धर्ममपि करिष्यति फलं च स्वयमेव भोक्ष्यते ततः किमीश्वरकल्पनया विधेयम् ? इति। उक्तं च–

अशक्त्याऽन्येश्वराः पापप्रतिषेधं न कुर्वते।
स त्वत्यन्तमशक्तेभ्यो, व्यावृत्तमतिरिष्यते॥१॥
अथाप्यशक्त एवासौ, तथा सति परिस्फुटम्।
नेश्वरेण कृतं सर्वमिति वक्तव्यमुच्चकैः॥२॥
पापवत् स्वार्थकारित्वाद् धर्मादिरपि किं ततः ? [वार्तिकालं० २।श्लो० २५७-२५९ पृ० ३७] इति।

अथ ब्रवीथाः-स्वयमसौ धर्मा-ऽधर्मौ करोति, तत्फलं त्वीश्वर एव भोजयति, तस्य धर्मा-ऽधर्मफलभोगे स्वयमशक्तत्वादिति, तदप्यसत्, यतो यो नाम स्वयं धर्मा-ऽधर्मौ विधातुमलं स कथं तत्फलं स्वयमेव न भोक्तुमीशः ?, न हि पक्तुमोदनं समर्थो न भोक्तुमिति लोके प्रतीतम्। अथवा भवत्वेतदपि तथाऽप्यसौ धर्मफलमुन्मत्त-देवाङ्गनासंस्पर्शादिरूपमनुभावयतु, तस्येष्टत्वात्, अधर्मफलं तु नरकप्रपातादिरूपं कस्मादनुभावयति ?, न हि मध्यस्थभावमवलम्बमानाः परमकरुणापरीतचेतसः प्रेक्षावन्तो निरर्थके परपीडाहेतौ कर्मणि प्रवर्त्तन्ते। क्रीडार्था भगवतस्तथा प्रवृत्तिरिति चेत्, यद्येवं तर्हि कथमसौ प्रेक्षावान् ?, तस्य हि प्रवर्त्तने क्रीडामात्रमेव फलम्, ते पुनः प्राणिनः स्थाने स्थाने प्राणैर्वियुज्यन्ते। उक्तं च–

क्रीडार्था तस्य वृत्तिश्चेत्, प्रेक्षापूर्वक्रिया कुतः ?।
एकस्य क्षणिका तृप्तिरन्यः प्राणैर्वियुज्यते॥१॥ [वार्तिकालं० २।श्लो० २६१ पृ० ५७]

अपि च– क्रीडा लोके सरागस्योपलभ्यते भगवांश्च वीतरागः ततः कथं तस्य क्रीडा सङ्गतिमङ्गति ?। अथ सोऽपि सराग इष्यते तर्हि शेषजन्तुरिवावीतरागत्वाद् न सर्वज्ञो नापि सर्वस्य कर्त्तेत्यापतितम्। अथ रागादियुतोऽपि स सर्वज्ञः सर्वस्य कर्त्ता च भवति तथास्वभावत्वात् ततो न कश्चिद्दोषः, न हि स्वभावे पर्यनुयोगो घटनामुपपद्यते, उक्तं च–

इदमेवं न वेत्येतत्, कस्य पर्यनुयोज्यताम् ?।
अग्निर्दहति नाऽऽकाशं कोऽत्र पर्यनुयुज्यताम् ?॥१॥

[वार्तिकालं० २।श्लो० २४८ पृ० ३५]

तदेतदसम्यक्, यतः प्रत्यक्षतस्तथारूपे स्वभावेऽवगते यदि पर्यनुयोगो विधीयते तत्रेदमुत्तरं विजृम्भते, यथा-स्वभावे पर्यनुयोगो न भवतीति, यथा प्रत्यक्षेणोपलभ्यमाने वह्नेर्दाह्यं दहतो दाहकत्वरूपे स्वभावे, तथाहि-यदि तत्र कोऽपि पर्यनुयोगमाधत्ते, यथा– कथमेष वह्निर्दाहकस्वभावो जातः ?। यदि वस्तुत्वेन तर्हि व्योमापि किं न दाहकस्वभावं भवति ?, वस्तुत्वाविशेषादिति, तत्रेदमुत्तरं विधीयते-दाहकत्वरूपो हि स्वभावो वह्नेः प्रत्यक्षत एवोपलभ्यते ततः कथमेष पर्यनुयोगमर्हति ?, न हि दृष्टेऽनुपपन्नता नाम। तथा चोक्तम्–

स्वभावेऽध्यक्षतः सिद्धे, यदि पर्यनुयुज्यते।
तत्रेदमुत्तरं वाच्यं, न दृष्टेऽनुपपन्नता॥१॥ [वार्तिकालं० २।श्लो० २४९ पृ० ३५]

ईश्वरस्तु सर्वजगत्कर्तृत्वेन सर्वज्ञत्वेन च नोपलब्धः, ततस्तत्र तथास्वभावत्वकल्पनाऽवश्यं पर्यनुयोगमाश्रयते। यदि पुनरदृष्टेऽपि तथास्वभावत्वकल्पना पर्यनुयोगानाश्रयाऽभ्युपगम्येत तर्हि सर्वोऽपि वादी तं तं पक्षमाश्रयन् परेण विक्षोभितस्तत्र तत्र तथास्वभावताकल्पनेन परं निरुत्तरीकृत्य लब्धजयपताक एव भवेत्। उक्तं चान्यत्रापि[१]–

यत्किञ्चिदात्माऽभिमतं विधाय, निरुत्तरस्तत्र कृतः परेण।
वस्तुस्वभावैरिति वाच्यमित्थं, तदोत्तरं स्याद् विजयी समस्तः॥१॥

[वार्तिकालं० २।श्लो० २५० पृ० ३५]

किञ्च– सर्वं यदि जगद् ईश्वरकृतं मन्यते तर्हि सर्वाण्यपि शास्त्राणि सकलदर्शनगतानि तेन प्रवर्त्तितानीति प्राप्तम्, तानि च शास्त्राणि परस्परविरुद्धार्थानि, ततोऽवश्यं कानिचित् सत्यानि कानिचिदसत्यानि, ततः सत्या-ऽसत्योपदेशदानात् कथमसौ प्रमाणम् ?। उक्तं च–

---

१. खं० विना प्रतिषुपाठाः- **च अन्यथा यत्किं°** खंमू० देमू० जे१,२, मां०। **च यत्किं°** पा० देसं० ॥ श्लोकोऽयं **वार्तिकालंकारे** विद्यते एव, किन्तु तत्सम्पादकेन अनवधानाद् अशुद्धरूपेण गद्यपाठे लिखितः ॥

शास्त्रान्तराणि सर्वाणि, यदीश्वरविकल्पतः।
सत्या-ऽसत्योपदेशस्य, प्रमाणं दानतः कथम् ?॥१॥

[वार्तिकालं० २।श्लो० २६२ पृ० ३७]

अथ न सकलानि शास्त्राणीश्वरेण कारितानि किन्तु सत्यान्येव ततो न कश्चिद् दोषावकाशः, तर्हि शास्त्रान्तरवदेव नेश्वरेणान्यदपि व्यधायीति हता तव पक्षसिद्धिरिति।

अन्यच्च– यादृग्भूतं संस्थानादि बुद्धिमत्कारणपूर्वकत्वेनोपलब्धं तादृग्भूतमेवान्यत्रापि बुद्धिमन्तमात्मनो हेतुमनुमापयति, यथा जीर्णदेवकुल-कूपादिगतम्, न शेषम्, न हि सन्ध्याभ्रराग-वल्मीकादिगतं संस्थानादि आत्मनो बुद्धिमन्तं कर्त्तारमनुमापयति, तथाप्रतीतेरभावात्, तद्गतस्य संस्थानादेर्बुद्धिमत्कारणत्वेन निश्चयाभावात्, तथा भू-भूधरादिगतमपि संस्थानादिकं न बुद्धिमत्कारणपूर्वकत्वेन निश्चितमिति कथं तद्वशाद् बुद्धिमतः कर्त्तुरनुमानम् ?। अथ मन्येथाः-तदपि संस्थानादि तादृग्भूतमेव, संस्थानादि-शब्दवाच्यत्वात्, न चैवं तत्कर्त्तुर्बुद्धिमतोऽनुमाने काश्चिदपि बाधामुपलभामहे ततः सर्वं सुस्थमिति, तदयुक्तम्, शब्दा हि रूढिवशाज्जात्यन्तरेऽपि प्रवर्त्तन्ते, ततः शब्दसाम्याद् यदि तथारूपवस्त्वनुमानं तर्हि गोत्वाद् वागादीनामपि विषाणिताऽनुमीयताम्, विशेषाभावात्। अथ तत्र प्रत्यक्षेण बाधोपलभ्यते ईश्वरानुमाने तु न, ततो न कश्चिद्दोष इति, तदेतदतीव प्रमाणमार्गानभिज्ञतासूचकम्, यतो यत एव तत्र प्रत्यक्षेण बाधोपलम्भोऽत एव नान्यत्रापि शब्दसाम्यात् तथारूपवस्त्वनुमानं कर्त्तव्यम्, प्रत्यक्षत एव शब्दसाम्यस्य वस्तुतोथारूप्येण सहाविनाभावित्वस्याऽभावावगमात्, न च बाधकमत्र नोपलभ्यते इत्येवानुमानं प्रवर्त्तते, किन्तु वस्तुसम्बन्धबलात्। तथा चोक्तम्–

न न बाध्यत इत्येवमनुमानं प्रवर्त्तते।
सम्बन्धदर्शनात् तस्य, प्रवर्त्तनमिहेष्यते[१]॥१॥

[वार्तिकालं० २।श्लो० ३२७ पृ० ४३] इति।

स च सम्बन्धोऽत्र न विद्यते, तद्ग्राहकप्रमाणाभावात्, ततोऽनैकान्तिकता हेतोः। इत्थं चैतदङ्गीकर्त्तव्यम्, अन्यथा 'यो यो मृद्विकारः स स कुम्भकारकृतः, यथा

---

१. **वार्तिकालंकारे** '०मितीरितम्' इति पाठः ॥

घटादिः, मृद्विकारश्चायं वल्मीकः, तस्मात् कुम्भकारकृतः' इत्यप्यनुमानं समीचीनता-मापनीस्कद्येत[१], बाधकादर्शनात्[२]। अथास्ति बाधकमत्रादर्शनम्, तथाहि– यदि तत्र कुम्भकारः कर्त्ता भवेत् तर्हि कदाचिदुपलभ्येत, न चोपलभ्यते, तस्मादेतदयुक्तमिति, तदेतदीश्वरानुमानेऽपि समानम्, यदि हि सर्वस्यापि वस्तुजातस्येश्वरः कर्त्ता तर्हि क्वचित् कदाचिदुपलभ्येत, न चोपलभ्यते, तस्मादेतदप्यलीकमिति कृतं प्रसङ्गेन॥

येऽपि चाऽऽत्मवादिनः **पुरुष एवेदं सर्वम्** [ ] इति प्रतिपन्नास्तेऽपि महामोहमहोरगगरलपूरमूर्च्छितमानसा वेदितव्याः। तथाहि–यदि नाम पुरुषमात्ररूपमद्वैतं तत्त्वं तर्हि यदेतदुपलभ्यते सुखित्व-दुःखित्वादि तत् सर्वं परमार्थतोऽसत् प्राप्नोति, ततश्चैवं स्थिते यदेतदुच्यते–'प्रमाणतोऽधिगम्य संसारनैर्गुण्यं तद्विमुखया प्रज्ञया तदुच्छेदाय प्रवृत्तिः' इत्यादि तदेतदाकाशकुसुमसौरभवर्णनोपमानमवसेयम्, अद्वैतरूपे हि तत्त्वे कुतो नरकादिभवभ्रमणरूपः संसारः, यन्नैर्गुण्यमवगम्य तदुच्छेदाय प्रवृत्तिरुपपद्येत ?

यदप्युच्यते– 'पुरुषमात्रमेवाद्वैतं तत्त्वम्, यत्तु संसारनैर्गुण्यं भावभेददर्शनं च तत् सर्वदा सर्वेषामविगानप्रतिपत्तावपि चित्रे निम्नोन्नतभेददर्शनमिव भ्रान्तमवसेयम्' इति, तदप्यचारु, एतद्विषयवास्तवप्रमाणाभावात्, तथाहि– नाद्वैताभ्युपगमे किञ्चिदद्वैतग्राहकं ततः पृथग्भूतं प्रमाणमस्ति, द्वैततत्त्वप्रसक्तेः। न च प्रमाणमन्तरेण निष्प्रतिपक्षा तत्त्वव्यवस्था भवति, मा प्रापत् सर्वस्य सर्वेष्टार्थसिद्धिप्रसङ्गः।

तथा भ्रान्तिरपि प्रमाणभूतादद्वैताद् भिन्नाऽभ्युपगन्तव्या, अन्यथा प्रमाणभूतमद्वैतम-प्रमाणमेव भवेत्, तदव्यतिरेकात्, तत्स्वरूपवत्, तथा च कुतस्तत्त्वव्यवस्था ?। भिन्नायां च भ्रान्तावभ्युपगम्यमानायां द्वैतं प्रसक्तमित्यद्वैतहानिः। अपि च- यदीदं स्तम्भेभ-कुम्भा-ऽम्भोरुहादिभावभेददर्शनं भ्रान्तमुच्यते तर्हि नियमात् तदपि क्वचित् सत्यमवगन्तव्यम्, अभ्रान्तदर्शनमन्तरेण भ्रान्तेरयोगात्, न खलु येन पूर्वमाशीविषो न दृष्टस्तस्य रज्ज्वामाशीविषभ्रान्तिरुपजायते। तदुक्तम्–

---

१. °**मापनीपद्येत** जे१,२,॥ २. °**दर्शनात्** जे१,२ मां० ॥

नादृष्टपूर्वसर्पस्य, रज्ज्वां सर्पमतिः क्वचित्।
ततः[1] पूर्वानुसारित्वाद्, भ्रान्तिरभ्रान्तिपूर्विका॥१॥

[वार्तिकालं० २।श्लो० ९२६ पृ० ३८४]

तत एवमप्यव्याहतो भेदः।

अन्यच्च– 'पुरुषाद्वैतरूपं तत्त्वमवश्यं परस्मै निवेदनीयम्, नाऽऽत्मने, आत्मनो व्यामोहाभावात्, विमोहश्चेद् अद्वैतप्रतिपत्तिरेव न भवेत्।' अथोच्येत-यत एव व्यामोहोऽत एव तन्निवृत्त्यर्थमात्मनोऽद्वैतप्रतिपत्तिरास्थेया, तदयुक्तम्, एवं सति अद्वैतप्रतिपत्त्याधानेनाऽऽत्मनो व्यामोहे निवर्त्त्यमानेऽवश्यं पूर्वरूपत्यागोऽपररूपस्य चाव्यामूढतालक्षणस्योत्पत्तिरित्यद्वैतप्रतिज्ञाहानिः, परस्मै च प्रतिपादयन् नियमतः परमभ्युपगच्छेत्, परं चाभ्युपगच्छन् तस्मै चाद्वैतरूपं तत्त्वं निवेदयन् 'पिता मे कुमारब्रह्मचारी' इत्यादि वदन्निव कथं नोन्मत्तः ?, स्व-पराभ्युपगमेनाद्वैतवचसो बाधनादिति यत्किञ्चिदेतत्॥

यदपि च **नियतिवादिन** उक्तवन्तः–नियतिर्नाम तत्त्वान्तरमस्तीति, तदपि ताड्यमानातिजीर्णपटह[2] इव विचारताडनमसहमानं शतशो विशरारुभावमाभजते तथाहि– तद् नियतिरूपं नाम तत्त्वान्तरं भावरूपं वा स्यादभावरूपं वा ?, यदि भावरूपं तर्हि किमेकरूपमनेकरूपं वा ?, यद्येकरूपं ततस्तदपि नित्यमनित्यं वा ?। यदि नित्यं कथं भावानां हेतुः ?, नित्यस्य कारणत्वायोगात्, तथाहि-नित्यमाकालमेकरूपमुपवर्ण्यते, अप्रच्युता-ऽनुत्पन्न-स्थिरैकस्वभावतया नित्यत्वस्य व्यावर्णनात्, ततो यदि तेन रूपेण कार्याणि जनयति तर्हि सर्वदा तेन रूपेण जनयेत्, विशेषाभावात्, न च सर्वदा तेन रूपेण जनयति, क्वचित् कदाचित् तस्य तस्य भावस्य दर्शनात्। अपि च-यानि द्वितीयादिषु क्षणेषु कर्त्तव्यानि कार्याणि तान्यपि प्रथमसमय एवोत्पादयेत्, तत्करणस्वभावस्य तदानीमपि विद्यमानत्वात्, मा वा द्वितीयादिष्वपि क्षणेषु, विशेषाभावात्, विशेषे वा बलादनित्यत्वम्, **अतादवस्थ्यमनित्यतां ब्रूमः** [ ] इति वचनप्रामाण्यात्। अथाविशिष्टमपि नित्यं तं तं सहकारिणमपेक्ष्य कार्यं विधत्ते, सहकारिणश्च प्रतिनियतदेश-कालभाविनः, ततः सहकारिभावा-ऽभावाभ्यां कार्यस्य

---

१. "पूर्वदृष्ट्यनुसारित्वान्न हेतुर्वासना कथम्" इति उत्तरार्धं **वार्तिकालङ्कारे** ॥ २. °पट इव जेसं१,२, मां विना॥

क्रम इति, तदप्यसमीचीनम्, यतः सहकारिणोऽपि नियतिसम्पाद्याः, नियतिश्च प्रथमक्षणेऽपि तत्करणस्वभावा, द्वितीयादिषु क्षणेषु तत्करणस्वभावताऽभ्युपगमे नित्यत्वक्षितिप्रसङ्गात्, ततः प्रथमेऽपि क्षणे सर्वसहकारिणां सम्भवात् सकलकार्यकरणप्रसङ्गः। अपि च– सहकारिषु सत्सु भवति कार्यं तदभावे च न भवति ततः सहकारिणामेवान्वय-व्यतिरेकदर्शनात् कारणता परिकल्पनीया, न नियतेः, तत्र व्यतिरेकासम्भवात्। उक्तं च–

हेतुताऽन्वयपूर्वेण[1], व्यतिरेकेण सिध्यति।
नित्यस्याव्यतिरेकस्य, कुतो हेतुत्वसम्भवः ?॥१॥

[वार्तिकालं० २।श्लो० २२७ पृ० ३३]

अथैतद्दोषभयादनित्यमिति पक्षाश्रयणं तर्हि तस्य प्रतिक्षणमन्यान्यरूपतया भवनतो बहुत्वभावादेकरूपमिति प्रतिज्ञाव्याघातप्रसङ्गः। न च क्षणक्षयित्वे कार्य-कारणभाव इति प्रागेवोपपादितम्। अन्यच्च, यदि नियतिरेकरूपा ततस्तन्निबन्धननिखिल-कार्याणामेकरूपताप्रसङ्गः, न हि कारणभेदमन्तरेण कार्यस्य भेदो भवितुमर्हति, तस्य निर्हेतुकत्वप्रसक्तेः। अथानेकरूपमिति पक्षः, ननु साऽनेकरूपता न तदन्यनानारूप-विशेषणमन्तरेणोपपद्यते, न खलु ऊषरेतरादिधराभेदमन्तरेण विहायसः पतताम्भसा-मनेकरूपता भवति, **विशेषणं विना यस्मान्न तुल्यानां विशिष्टता।** [*शास्त्रवार्ता० ५४] इति वचनप्रामाण्यात्, ततोऽवश्यं तदन्यानि नानारूपाणि विशेषणानि नियतेर्भेद-कान्यभ्युपगन्तव्यानि। तेषां च नानारूपाणां विशेषणानां भावः किं तत एव नियतेर्भवेत् ? उतान्यतः ?। यदि नियतेस्तर्हि तस्याः स्वत एकरूपत्वात् कथं तन्निबन्धनानां विशेषणानां नानारूपता ?। अथ विचित्रकार्यान्यथाऽनुपपत्त्या सा चित्ररूपाऽभ्युपगम्यते, ननु सा चित्ररूपता विशेषणबाहुल्यसम्पर्कमन्तरेण न घटामञ्चति, ततस्तत्रापि विशेषणबाहुल्यमभ्युपगन्तव्यम्। तेषामपि च विशेषणानां भावः किं तत एव नियतेर्भवेत् ? उतान्यतः ? इत्यादि तदेवाऽऽवर्त्तते इत्यनवस्था। अथान्यत इति पक्षः तदप्ययुक्तम्, नियतिव्यतिरेकेणान्यस्य हेतुत्वेनानभ्युपगमादिति यत्किञ्चिदेतत्।

---

१. "सम्बन्धोऽन्वयपूर्वेण व्यतिरेकेण शुध्यति। नित्यस्याव्यतिरेकस्य कुतः सम्बन्धसंभवः ॥" इति **वार्तिकालंकारे** श्लोकः ॥

किञ्च– अनेकरूपमिति पक्षाभ्युपगमे भवतः प्रतिपन्थि विकल्पयुगलमुपढौकते- तद्धि मूर्त्तं वा स्यादमूर्त्तं वा ?। यदि मूर्त्तं तर्हि नामान्तरेण कर्मैव प्रतिपन्नम्, यस्मात् तदपि कर्म पुद्गलरूपत्वाद् मूर्त्तमनेकं चास्माकमभिप्रेतम्, भवताऽपि च नियतिरूपं तत्त्वान्तरमनेकं मूर्त्तं चाभ्युपगम्यते इत्यावयोरविप्रतिपत्तिः। अथामूर्त्तमित्यभ्युपगमस्तर्हि न तत् सुख-दुःखनिबन्धनम्, अमूर्त्तत्वात्, न खल्वाकाशममूर्त्तमनुग्रहायोपघाताय वा जायते, पुद्गलानामेवानुग्रहोपघातविधानसमर्थत्वात्, **जमणुग्गहोवघाया, जीवाणं पुग्गलेहिंतो** [ ] इति वचनात्।

अथ मन्येथाः-दृष्टमाकाशमपि देशभेदेन सुख-दुःखनिबन्धनम्, तथाहि– मरुस्थलीप्रभृतिषु देशेषु दुःखं शेषेषु तु सुखमिति, तदप्यसत्, तत्रापि तदाकाशस्थितानामेव पुद्गलानामनुग्रहोपघातकारित्वात्, तथाहि– मरुस्थलीप्रायासु भूमिषु जलविकलतया न तथाविधा धान्यसम्पत्, वालुकाकुलतया चाध्वनि प्राणिनां गमना-ऽऽगमनविधावतिशायी पदे पदे खेदः, निदाघे च खरकिरणतीव्रकरनिकरसम्पर्कतो भूयान् सन्तापः, जलाभ्यवहरणमपि स्वल्पीयो महाप्रयत्नसम्पाद्यं चेति महत् तत्र दुःखम्, शेषेषु तद्विपर्ययात् सुखमिति तत्रापि पुद्गलानामेवानुग्रहोपघातकारित्वं नाऽऽकाशस्येति। अथाभावरूपमिति पक्षस्तदप्ययुक्तम्, अभावस्य तुच्छरूपतया सकलशक्त्ययोगतः कार्यकारित्वायोगात्, न हि कटक-कुण्डलाद्यभावतः कटक-कुण्डलाद्युपजायते, तथादर्शनाभावात्, अन्यथा तत एव कटक-कुण्डलाद्युत्पत्ते-र्विश्वस्यादरिद्रताप्रसङ्गः।

नन्विह घटाभावो मृत्पिण्ड एव तस्माच्चोपजायमानो दृश्यते घटः ततः किमिहायुक्तम् ?, न खलु मृत्पिण्डस्तुच्छरूपः, स्वरूपभावात्, ततः कथमिव तस्य हेतुता नोपपत्तिमर्हति ?, तदप्यसमीचीनम्, यतो न य एव मृत्पिण्डस्य स्वरूपभावः स एवाभावो भवितुमर्हति, भावा-ऽभावविरोधात्, तथाहि-यदि भावः कथमभावः ? अथाभावः कथं भावः ? इति। अथोच्येत-स्वरूपापेक्षया भावरूपता पररूपापेक्षया चाभावरूपता ततो भावा-ऽभावयोर्भिन्ननिमित्तत्वान्न कश्चिद्दोष इति। नन्वेवं मृत्पिण्डस्य भावा-ऽभावात्मकत्वाभ्युपगमेऽनेकान्तात्मकता स्वतन्त्रविरोधिनी भवतः प्राप्नोति,

एवं हि ब्रुवाणा जैना एव सदसि विराजन्ते ये सर्वं वस्तु स्व-परभावादिना-ऽनेकान्तात्मकमभिमन्यन्ते, न भवादृशा एकान्तग्रहग्रस्तमनसः।

स्यादेतत्– परिकल्पितस्तत्र पररूपाभावः स्वरूपभावस्तु तात्त्विकः ततो नानेकान्तात्मकत्वप्रसङ्ग इति, यद्येवं तर्हि कथं ततो मृत्पिण्डाद् घटभावः ?, तत्र परमार्थतो घटप्रागभावस्याभावात्, यदि पुनः प्रागभावाभावेऽपि ततो घटो भवेत् तर्हि सूत्रपिण्डादेरपि कस्मान्न भवति ?, प्रागभावाभावाविशेषात्, कथं वा ततो न खरविषाणमिति यत्किञ्चिदेतत्।

[1]यदप्युक्तम्– यद् यदा यतो भवति कालान्तरेऽपि तत् तदा तत एव नियतेनैव रूपेण भवदुपलभ्यते इति, तदपि युक्तमेव, कारणसामग्रीशक्तिनियमतः कार्यस्य तदा तत एव तेनैव रूपेण भावसम्भवात्; ततो [2]यदुक्तम्– 'अन्यथा कार्य-कारणभावव्यवस्था प्रतिनियतरूपव्यवस्था च न भवेत्, नियामकाभावात्' इति तद् बहिः प्लवते, कारणशक्तिरूपस्य नियामकस्य भावात्। एवं च कारणशक्तिनैयत्यतः कार्यस्य नैयत्ये कथं प्रेक्षावान् प्रमाणपथकुशलः प्रमाणोपपन्नयुक्तिबाधितां नियतिमङ्गीकुरुते ?, मा प्रापदप्रेक्षावत्ताप्रसङ्गः।

एतेन [3]यदाहुः **स्वभाववादिनः**-'इह सर्वे भावाः स्वभाववशादुपजायन्ते' इति, तदपि प्रतिक्षिप्तमवगन्तव्यम्, उक्तदूषणानां प्रायस्तत्रापि समानत्वात्। तथाहि–स स्वभावो भावरूपो वा स्यात् ? अभावरूपो वा ?, भावरूपोऽप्येकरूपोऽनेकरूपो वेत्यादि सर्वं तदवस्थमेवात्रापि दूषणजालमुपढौकते। अपि च– यः स्वो भावः स्वभावः, आत्मीयो भाव इत्यर्थः, स च कार्यगतो वा हेतुर्भवेत् ? कारणगतो वा ?। न तावत् कार्यगतः, यतः कार्ये परिनिष्पन्ने सति स कार्यगतः स्वभावो भविष्यति, नानिष्पन्ने, निष्पन्ने च कार्ये कथं स तस्य हेतुः ?, यो हि यस्यालब्धलाभसम्पादनाय प्रभवति स तस्य हेतुः, कार्यं च परिनिष्पन्नतया लब्धात्मलाभम्, अन्यथा तस्यैव स्वभावस्याभावप्रसङ्गात्, ततः कथं स कार्यस्य हेतुर्भवति ?। कारणगतस्तु स्वभावः कार्यस्य हेतुरस्माकमपि सम्मतः, स च प्रतिकारणं विभिन्नस्तेन मृदः कुम्भो भवति न पटादिः, मृदः

१. पृ० ३३६ पं० २०॥ २. पृ० ३३६ पं० २१॥ ३. पृ० ३३७ पं० ३ ॥

पटादिकरणस्वभावाभावात्, तन्तुभ्योऽपि पट एव भवति न घटादिः, तन्तूनां घटादिकरणस्वभावाभावात्, ततो यदुच्यते[१]-'मृदः कुम्भो भवति न पटादिः' इत्यादि तत् सर्वं कारणगतस्वभावाभ्युपगमे सिद्धसाध्यतामध्यमध्यासीनमिति न नो बाधामादधाति। यदपि चोक्तम्[२]- 'आस्तामन्यत् कार्यजातम्' इत्यादि, तदपि कारणगतस्वभावाङ्गीकारेण समीचीनमेवावसेयम्, तथाहि- ते काङ्कटुकमुद्गाः स्वकारणवशतस्तथारूपा एव जाता ये स्थालीन्धन-कालादिसामग्रीसम्पर्केऽपि न पाकमश्नुवते इति, स्वभावश्च कारणादभिन्न इति सर्वं सकारणमेवेति स्थितम्। उक्तं च-

कारणगओ उ हेऊ, केण व निट्ठो त्ति नियय[*]कज्जस्स ?।
न य सो तओ विभिन्नो, सकारणं सव्वमेव तओ॥१॥ [धर्मसं० ५६५]

यदपि च **यदृच्छावादिनः** प्रलपन्ति[३]- 'न खलु प्रतिनियतो वस्तूनां कार्य-कारणभावः' इत्यादि, तदपि कार्या-ऽकार्यादिविवेचनपटीयः शेमुषीविकलतासूचक-मवगन्तव्यम्, कार्य-कारणभावस्य प्रतिनियततया सम्भवात्। तथाहि- यः शालूकादुपजायते शालूकः स सदैव शालूकादेव न गोमयादपि, योऽपि च गोमयादुपजायते शालूकः [ग्रन्थाग्रम्-७०००] सोऽपि सदैव गोमयादेव न शालूकादपि, न चानयोरेकरूपता, शक्ति-वर्णादिवैचित्र्यतः परस्परं जात्यन्तरत्वात्; योऽपि च वह्नेरुपजायते वह्निः सोऽपि सदैव वह्नेरेव नारणिकाष्ठादपि, योऽपि चारणिकाष्ठादुपजायते सोऽपि सर्वदाऽरणिकाष्ठादेव न वह्नेरपि। यदपि चोक्तम्[४]- 'बीजादपि जायते कदली' इत्यादि, तत्रापि परस्परविभिन्नत्वाद् एतदेवोत्तरम्। अपि च- या कन्दादुपजायते कदली साऽपि परमार्थतो बीजादेव वेदितव्या, परम्परया बीजस्यैव कारणत्वात्। एवं वटादयोऽपि शाखैकदेशादुपजायमानाः परमार्थतो बीजादवगन्तव्याः, तथाहि- शाखातः शाखा प्रभवति, न च सा शाखा शाखाहेतुका लोके व्यवह्रियते, वटबीजस्यैव सकलशाखाप्रशाखादिसमुदायरूपवटहेतुत्वेन प्रसिद्धत्वात्, एवं शाखैकदेशादपि जायमानो वटः परमार्थतो मूलवटप्रशाखारूप इति मूलवटबीजहेतुक एव सोऽपि वेदितव्यः, तस्मान्न क्वचिदपि कारण-कार्यव्यभिचारः, निपुणविचारप्रवीणेन च प्रतिपत्त्रा भवितव्यम्,

---

१. पृ० ३३७ पं० ४॥ २. पृ० ३३७ पं० ६॥ ३. पृ० ३३८ पं० ६ ॥ ४. पृ० ३३८ पं० ९ ॥

ततो न कश्चिद्दोषः। एवं च यदुच्यते[1]– 'न खल्वन्यथा वस्तुसद्भावं पश्यन्तोऽन्यथाऽऽत्मानं प्रेक्षावन्तः परिक्लेशयन्ति' इति तद् वाङ्मात्रमिति स्थितम्॥

येऽपि **चाज्ञानवादिनो** 'न[2] ज्ञानं श्रेयः, तस्मिन् सति परस्परं विवादयोगतश्चित्तकालुष्यादिभावतो दीर्घतरसंसारप्रवृत्तेः' इत्याद्युक्तवन्तः तेऽप्यज्ञानमहानिद्रोपप्लुतमनस्कतया यत्किञ्चिद् भाषितवन्तो वेदितव्याः। तथाहि– आस्तामन्यद् एतावदेव तावद् वयं पृच्छामः- ज्ञाननिषेधः किं ज्ञानं वा स्यात् ? अज्ञानं वा ?। तत्र यदि ज्ञानं ततः कथमभाषिष्ट– अज्ञानमेव श्रेयः ?, नन्वेवं ज्ञानमेव श्रेयस्तामाचनीस्कद्येत[3], तदन्तरेणाज्ञानस्य प्रतिष्ठापयितुमशक्यत्वात्, तथा च प्रतिज्ञाव्याघातप्रसङ्गः। अथाज्ञानमिति पक्षः सोऽप्ययुक्तः, अज्ञानस्य ज्ञाननिषेधनसामर्थ्यायोगात्, न खलु अज्ञानं साधनाय बाधनाय वा कस्यापि प्रभवति, अज्ञानत्वादेव, ततोऽप्रतिषेधादपि सिद्धं ज्ञानं श्रेयः। आह च–

नाणनिसेहणहेऊ, नाणं ? इयरं व होज्ज ? जइ नाणं।
अब्भुवगममम्मि तस्सा, कहं नु अन्नाण मो सेयं ?॥१॥
अह अन्नाणं न तयं, नाणनिसेहणसमत्थमेवं पि।
अप्पडिसेहाउ च्चिय, संसिद्धं नाणमेव त्ति॥२॥ [धर्मसं० ५१३-५१४]

यदप्युक्तम्[4]– 'ज्ञाने सति परस्परं विवादयोगतश्चित्तकालुष्यादिभावः' इत्यादि तदप्यपरिभावितभाषितम्, इह हि ज्ञानी परमार्थतः स एवोच्यते यो विवेकपूतात्मा ज्ञानगर्वमात्मनि सर्वथा न विधत्ते, यस्तु ज्ञानलवमासाद्याऽऽकण्ठपीतासव इवोन्मत्तः सकलमपि जगत् तृणाय मन्यते स परमार्थेनाज्ञानी वेदितव्यः, ज्ञानफलाभावात्, ज्ञानफलं हि रागादिदोषगणनिरासः, स चेन्न भवति तर्हि न परमार्थतस्तद् ज्ञानम्। उक्तं च–

तज्ज्ञानमेव न भवति, यस्मिन्नुदिते विभाति रागगणः।
तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ?॥१॥ [ ]

तत इत्थम्भूतो ज्ञानी विवेकपूतात्मा परहितकरणैकरसिको वादमपि

---

१. पृ० ३३८ पं० ११॥ २. पृ० ३३८ पं० १९॥ ३. °द्यते खं० पा० ॥ ४. पृ० ३३८ पं० १८ ॥

परेषामुपकारार्थमाधत्ते, न यथाकथञ्चित्। तमपि च वादं वादि-नरपति-परीक्षकेषु निपुणबुद्धिषु मध्यस्थेषु सत्सु विधत्ते, नान्येषु, तथा तीर्थकर-गणधरैरनुज्ञानात्। उक्तं च–

वादो वि वाइ-नरवइ-परिच्छगजणेसु निउणबुद्धीसु।
मज्झत्थेसु य विहिणा, उस्सग्गेणं अणुण्णाओ॥१॥ [धर्मसं० ५१६]

तत एवं स्थिते कथं नु नाम चित्तकालुष्यभावः ? यद्वशात् तीव्र-तीव्रतरकर्मबन्धयोगतो दीर्घ-दीर्घतरसंसारप्रवृत्तिः सम्भवेत्, केवलं वादि-नरपति-परीक्षकाणामज्ञानापगमतः सम्यग्ज्ञानोन्मीलनं जायते, तथा च महदुपकारि ज्ञानमिति तदेव श्रेयः। यत् पुनरुच्यते[१]– 'तीव्राध्यवसायनिष्पन्नः कर्मबन्धो दारुणविपाको भवति' इति तदभ्युपगम्यत एव। न च तीव्रोऽध्यवसायो ज्ञाननिबन्धनः, अज्ञानिनोऽपि तस्य दर्शनात्, केवलं ज्ञाने सति यदि कथञ्चित् कर्मदोषतोऽकार्येऽपि प्रवृत्तिरुपजायते तथापि ज्ञानवशतः प्रतिक्षणं संवेगभावतो न तीव्रपरिणामो[२] भवति। तथाहि– यथा कश्चित् पुरुषो राजादिदुष्टनियोगतो विषमिश्रमन्नं जानानोऽपि भयभीतमानसो भुङ्क्ते तथा सम्यग्ज्ञान्यपि कथञ्चित् कर्मदोषतोऽकार्यमाचरन्नपि संसारदुःखभयभीतमानसः समाचरति, न निःशङ्कम्, संसारभयभीतता च संवेग उच्यते, ततः संवेगवशान्न तीव्रः परिणामो भवति। उक्तं च–

जाणंतो विसखाणू, पवत्तमाणो वि बीहए जह उ।
न उ इयरो तह नाणी, पवत्तमाणो वि संविग्गो॥१॥
जं संवेगपहाणो,अच्चंतसुहो य होइ परिणामो।
पावनिवित्ती य परा, नेयं अण्णाणिणो उभयं॥२॥ [धर्मसं० ५३९-५४०]

ततो यदुक्तम्[३]– 'अज्ञानमेव मुमुक्षुणा मुक्तिपथप्रवृत्तेनाभ्युपगन्तव्यम्, न ज्ञानम्' इति तत् तेषां मूढमनस्कतासूचकमवगन्तव्यम्। यदप्युक्तम्[४]– 'भवेद् युक्तो ज्ञानस्याभ्युपगमो यदि ज्ञानस्य निश्चयः कर्तुं पार्येत' इत्यादि तदपि बालिशजल्पितम्, यतो यद्यपि सर्वे दर्शनिनः परस्परं भिन्नमेव ज्ञानं प्रतिपन्नाः तथापि यद्वचो दृष्टेष्टाऽबाधितं पूर्वाऽपराव्याहतं च तत् सम्यग्रूपमवसेयम्, तादृग्भूतं च वचो भगवत्प्रणीतमेवेति तदेव

१. पृ० ३३९ पं० ४॥ २. **तीव्रः परि°** जे१ ॥ ३. पृ० ३३९ पं० ९॥ ४. पृ० ३३९ पं० १० ॥

प्रमाणं न शेषमिति। यदप्युक्तम्[१]– 'सुगतादयोऽपि सौगतादिभिः सर्वज्ञा इष्यन्ते' इत्यादि, तदप्यसत्, दृष्टेष्टबाधितवचनतया सुगतादीनामसर्वज्ञत्वात्, यथा च दृष्टेष्ट-बाधितवचनता सुगतादीनां तथा प्रागेव सर्वज्ञसिद्धौ लेशतो दर्शिता, ततो भगवानेव सर्वज्ञः। उक्तं च–

सव्वण्णुविहाणम्मि वि, दिट्ठेट्ठाबाहियाउ वयणाओ।
सव्वण्णू होइ जिणो, सेसा सव्वे असव्वण्णू॥१॥ [*धर्मसं० १३७२]

एतेन यदुक्तम्[२]– 'भवतु वा वर्द्धमानस्वामी सर्वज्ञस्तथापि तस्य सत्कोऽयमाचारादिक उपदेश इति कथं प्रतीयते ?' इति तदपि दूरापास्तम्, अन्यस्येत्थम्भूतदृष्टेष्टा-ऽबाधितवचनप्रवृत्तेरसम्भवात्। यदप्युक्तम्[३]– 'भवत्वेषोऽपि निश्चयो यथाऽयमाचारादिक उपदेशो वर्द्धमानस्वामिन इति, तथापि तस्योपदेशस्यायमर्थो नान्य इति न शक्यं प्रत्येतुम्' इत्यादि तदप्ययुक्तम्, भगवान् हि वीतरागस्ततो न विप्रतारयति, विप्रतारणाहेतुरागादिदोषगणासम्भवात्, तथा सर्वज्ञत्वेन विपरीतं सम्यग् वाऽर्थमवबुध्यमानं शिष्यं जानाति ततो यदि विपरीतमर्थमवबुध्यते श्रोता तर्हि निवारयेत्, न च निवारयति, न च विप्रतारयति, करोति च देशनां कृतकृत्योऽपि तीर्थकरनामकर्मोदयात्, ततो ज्ञायते एष एवास्योपदेशस्यार्थ इति। उक्तं च–

नाए वि तदुवएसे, एसेवऽत्थो मउ त्ति से एवं।
नज्जइ पवत्तमाणं, जं न निवारेइ तह चेव॥१॥
अन्नह य पवत्तंतं, निवारई न य तओ पवंचेइ।
जम्हा स वीयरागो, कहणे पुण कारणं कम्मं॥२॥ [*धर्मसं० ५२६-५२७]

एवं च भगवद्विवक्षायाः परोक्षत्वेऽपि सम्यगुपदेशस्यार्थनिश्चये जाते यदुक्तम्[४]– 'गौतमादिरपि छद्मस्थः' इत्यादि तदप्यसारमवसेयम्, छद्मस्थस्याप्युक्तप्रकारेण भगवदुपदेशार्थनिश्चयोपपत्तेः; तथा चित्रार्था अपि शब्दा भगवतैव समयिताः, ते च प्रकरणाद्यनुरोधेन तत्तदर्थप्रतिपादकाः प्रतिपादितास्ततो न कश्चिद्दोषः, तत्तत्प्रकरणाद्यनुरोधेन तत्तदर्थनिश्चयोपपत्तेः, भगवताऽपि च तथा तथाऽर्थावगमे

१. पृ० ३३९ पं० १८॥ २. पृ० ३४० पं० १४॥ ३. पृ० ३४० पं० १६॥ ४. पृ० ३४० पं० २१ ॥

प्रतिषेधाकरणादिति, एवं च तदानीं गौतमादिना सम्यगुपदेशार्थावगतावाचार्यपरम्परात इदानीमपि तदर्थावगमो भवति, न चाऽऽचार्यपरम्परा न प्रमाणम्, अविपरीतार्थ-व्याख्यातृत्वेन तस्याः प्रामाण्यस्यापाकर्त्तुमशक्यत्वात्। अपि च– भवद्दर्शनमपि किमागममूलम् ? अनागममूलं वा ?। यद्यागममूलं तर्हि कथमाचार्यपरम्परा न प्रमाणम् ? आचार्यपरम्परामन्तरेण आगमार्थस्यावबोद्धुमशक्यत्वात्। अथानागममूलं तर्हि न प्रमाणम्, उन्मत्तकविरचितदर्शनवत्। अथ यद्यपि नागममूलं तथापि युक्त्युपपन्नमिति कृत्वा समाश्रीयते, अहो ! दुरन्तः स्वदर्शनानुरागो य एवमपि पूर्वाऽपरविरुद्धं भाषयति। अथवा भूषणमेतदज्ञानपक्षाभ्युपगमस्य यदित्थं पूर्वाऽपरविरुद्धार्थभाषणम्। कथं पूर्वा-ऽपरविरुद्धार्थभाषिता ? इति चेत्, उच्यते, युक्तयो हि ज्ञानमूलाः, भवतां चाज्ञानाभ्युपगमः, ततः कथं तास्तत्र घटन्ते ? इति पूर्वा-ऽपरविरुद्धार्थभाषितेति यत्किञ्चिदेतत्।

येऽपि च **विनयवादिनो** विनयप्रतिपत्तिलक्षणास्तेऽपि मोहाद् मुक्तिपथपरिभ्रष्टाः वेदितव्याः। तथाहि-विनयो नाम मुक्त्यङ्गं यो मुक्तिपथानुकूलो न शेषः, मुक्तिपथश्च ज्ञान-दर्शन-चारित्राणि, **सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः** [*तत्त्वार्थ० १।१] इति वचनात्, ततो ज्ञानादीनां ज्ञानाद्याधाराणां च बहुश्रुतादिपुरुषाणां यो विनयो ज्ञानादिबहुमानप्रतिपत्तिलक्षणः स ज्ञानादिसम्पद्वृद्धिहेतुत्वेन परम्परया मुक्त्यङ्गमुपजायते, यस्तु सुर-नृपत्यादिषु विनयः स नियमात् संसारहेतुः, यतः सुर-नृपत्यादिषु विनयो विधीयमानः सुर-नृपत्यादिभावविषयं बहुमानमापादयति, अन्यथा विनयकरणाप्रवृत्तेः, सुर-नृपत्यादिभावश्च भोगप्रधानः, ततस्तद्बहुमाने भोगबहुमानमेव कृतं परमार्थतो भवतीति दीर्घसंसारपथप्रवृत्तिः। येऽपि च यतिविनयवादिनस्तेऽपि यदि साक्षाद् विनयमेव केवलं मुक्त्यङ्गमिच्छन्ति तर्हि तेऽप्यसमीचीनवादिनो वेदितव्याः, ज्ञानादिरहितस्य केवलस्य विनयस्य साक्षान्मुक्त्यङ्गत्वाभावात्, न खलु ज्ञान-दर्शन-चारित्ररहिताः केवलपादपतनादिविनयमात्रेण मुक्तिमार्गमश्नुवते जन्तवः, किन्तु ज्ञानादिसहिताः, ततो ज्ञानादिकमेव साक्षान्मुक्त्यङ्गम्, न विनयः। कथमेतदवसीयते ? इति चेद्, उच्यते, इह मिथ्यात्वा-ऽज्ञाना-ऽविरतिप्रत्ययं कर्मजालम्, कर्मजालक्षयाच्च मोक्षः, मुक्तिः

कर्मक्षयादिष्टा [ ] इति वचनप्रामाण्यात्, कर्मजालक्षयश्च न निर्मूलकारणोच्छेदमन्तरेण सर्वथा सम्भवति, ततो मिथ्यात्वप्रतिपक्षं सम्यग्दर्शनमज्ञानप्रतिपक्षं ज्ञानमविरतिप्रतिपक्षं च चारित्रं सम्यक् सेव्यमानं यदा प्रकर्षप्राप्तं भवति तदा सर्वथा कारणापगमतो निर्मूलकर्मोच्छेदो भवतीति ज्ञानादिकं साक्षान्मुक्त्यङ्गम्, न विनयमात्रम्। केवलं विनयो ज्ञानादिषु विधीयमानः परम्परया मुक्त्यङ्गम्, साक्षात्तु ज्ञानादिहेतुरिति सर्वकल्याणभाजनं तत्र तत्र प्रदेशे गीयते। यदि पुनर्यतिविनयवादिनोऽपि ज्ञानादिवृद्धिहेतुतया मुक्त्यङ्गं विनयमिच्छन्ति तदा तेऽप्यस्मत्पथवर्त्तिन एवेति न काचिद् विप्रतिपत्तिरिति कृतं प्रसङ्गेन॥

प्रकृतमनुसन्धीयते। **सूयगडस्स णं परित्ता वायणा** इत्यादि सर्वं प्राग्वत्। उद्देशानां च परिमाणं कृत्वा उद्देश-समुद्देशकालसङ्ख्या भावनीया। **'सेत्तं सूयगडे'** तदेतत् सूत्रकृतम्।

[सू० ८९] से किं तं ठाणे ? ठाणेणं जीवा ठाविज्जंति, अजीवा ठाविज्जंति, जीवा-ऽजीवा ठाविज्जंति, लोए ठाविज्जइ, अलोए ठाविज्जइ, लोया-ऽलोए ठाविज्जइ, ससमए ठाविज्जइ, परसमए ठाविज्जइ, ससमय-परसमए ठाविज्जइ। ठाणे णं टंका कूडा सेला सिहरिणो पब्भारा कूडाइं गुहाओ आगरा दहा णदीओ आघविज्जंति। ठाणे णं एगाइयाए एगुत्तरियाए वुड्ढीए दसट्ठाणगविवड्ढियाणं भावाणं परूवणया आघविज्जति। ठाणे णं परित्ता वायणा, संखेज्जा अणुओगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ निज्जुत्तीओ, संखेज्जाओ संगहणीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए तइए अंगे, एगे सुयक्खंधे, दस अज्झयणा, एक्कवीसं उद्देसणकाला, एक्कवीसं समुद्देसणकाला, बावत्तरिं पदसहस्साइं पयग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासत-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति। से एवंआया, एवंणाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जइ। सेत्तं ठाणे ३।

से किं तं इत्यादि। अथ किं तत् स्थानम् ?। तिष्ठन्ति प्रतिपाद्यतया जीवादयः पदार्था अस्मिन्निति स्थानम्। तथा चाह सूरिः– **ठाणेणं** इत्यादि, स्थानेन स्थाने वा 'णं' इति वाक्यालङ्कारे जीवाः **स्थाप्यन्ते** यथावस्थितस्वरूपप्ररूपणया व्यवस्थाप्यन्ते, शेषं प्रायो निगदसिद्धम्। नवरं **टंक** त्ति छिन्नतटं टङ्कम्। **कूटानि** पर्वतस्योपरि, यथा वैताढ्यस्योपरि सिद्धायतनकूटादीनि नव कूटानि। **शैला** हिमवदादयः। **शिखरिणः** शिखरेण समन्विताः, ते च वैताढ्यादयः। तथा यत् कूटमुपरि कुब्जाग्रवत् कुब्जं तत् **प्राग्भारम्**, यद्वा यत् पर्वतस्योपरि हस्तिकुम्भाकृति कुब्जं विनिर्गतं तत् प्राग्भारम्। **कुण्डानि** गङ्गाकुण्डादीनि। **गुहाः** तिमिश्रगुहादयः। **आकराः** रूप्य-सुवर्णाद्युत्पत्तिस्थानानि। **ह्रदाः** पौण्डरीकादयः। **नद्यः** गङ्गा-सिन्ध्वादय आख्यायन्ते। तथा स्थानेन अथवा स्थाने **णं** इति वाक्यालङ्कारे एकाद्येकोत्तरिकया वृद्ध्या दशस्थानकं यावद् विवर्द्धितानां भावानां प्ररूपणा आख्यायते। किमुक्तं भवति ? एकसङ्ख्यायां द्विसङ्ख्यायां यावद् दशसङ्ख्यायां ये ये भावा यथा यथाऽन्तर्भवन्ति तथा तथा ते ते प्ररूप्यन्ते इत्यर्थः, यथा– **एगे आया** इत्यादि। तथा **जं इत्थं च णं लोके तं सव्वं दुपडोयारं, तंजहा-जीवा चेव अजीवा चेव** इत्यादि। **'ठाणस्स णं परित्ता वायणा'** इत्यादि सर्वं प्राग्वत् परिभावनीयम्। पदपरिमाणं च पूर्वस्मात् पूर्वस्मादङ्गादुत्तरस्मिन्नुत्तरस्मिन्नङ्गे द्विगुणमवसेयम्। शेषं पाठसिद्धं यावन्निगमनम्॥

[सू० ९०] से किं तं समवाए ? समवाएणं जीवा समासिज्जंति, अजीवा समासिज्जंति, जीवाऽजीवा समासिज्जंति, लोए समासिज्जति, अलोए समासिज्जति, लोयाऽलोए समासिज्जति, ससमए समासिज्जति, परसमए समासिज्जति, ससमयपरसमए समासिज्जति। समवाए णं एगाइयाणं एगुत्तरियाणं ठाणगसयविवड्ढियाणं भावाणं परूवणा आघविज्जति। दुवालसंगस्स य गणिपिडगस्स पल्लवग्गे समासिज्जति। समवाए णं परित्ता वायणा, संखेज्जा अणुओगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ पडिवत्तीओ, संखेज्जाओ संगहणीओ। से णं अंगट्ठयाए चउत्थे अंगे, एगे सुयक्खंधे, एगे अज्झयणे, एगे उद्देसणकाले, एगे समुद्देसणकाले,

एगे चोयाले पदसयसहस्से पदग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासत-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति। से एवंआया, एवंणाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जति। सेत्तं समवाए ४।

से किं तं इत्यादि। अथ कोऽयं **समवायः** सम्यग् **अवायः** निश्चयो जीवादीनां पदार्थानां यस्मात् स समवायः ?। तथा चाह सूरिः– **समवायेणं** इत्यादि, समवायेन यद्वा समवाये **णं** इति वाक्यालङ्कारे जीवाः **समाश्रीयन्ते** समिति सम्यग् यथावस्थिततया आश्रीयन्ते-बुद्ध्या स्वीक्रियन्ते, अथवा जीवाः समस्यन्ते-कुप्ररूपणाभ्यः समाकृष्य सम्यक्प्ररूपणायां प्रक्षिप्यन्ते, शेषमानिगमनं निगदसिद्धम्। नवरमेकादिकानामेकोत्तराणां शतस्थानकं यावद् विवर्द्धितानां भावानां प्ररूपणा आख्यायते। अयमत्र भावार्थः- एकसङ्ख्यायां द्विसङ्ख्यायां यावच्छतसङ्ख्यायां ये ये भावा यथा यथा यत्र यत्रान्तर्भवन्ति ते ते तत्र तत्र तथा तथा प्ररूप्यन्ते, यथा एगे आया इत्यादि॥

[सू० ९१] से किं तं वियाहे ? वियाहेणं जीवा वियाहिज्जंति, अजीवा वियाहिज्जंति, जीवा-ऽजीवा वियाहिज्जंति, लोए वियाहिज्जति, अलोए वियाहिज्जति, लोया-ऽलोए वियाहिज्जति, ससमए वियाहिज्जति, परसमए वियाहिज्जति, ससमय-परसमए वियाहिज्जति। वियाहे णं परित्ता वायणा, संखेज्जा अणुओगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ संगहणीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए पंचमे अंगे, एगे सुयक्खंधे, एगे सातिरेगे अज्झयणसते, दस उद्देसगसहस्साइं, दस समुद्देसगसहस्साइं, छत्तीसं वागरणसहस्साइं, दो लक्खा अट्ठासीतिं पयसहस्साइं पयग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासत-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति

उवदंसिज्जंति। से एवंआया, एवंणाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जइ। सेत्तं वियाहे ५।

से किं तं इत्यादि। अथ केयं **व्याख्या** ? व्याख्यायन्ते जीवादयः पदार्था अनयेति व्याख्या, [1]उपसर्गादा*तः [शाकटा० ४।४।८३।, सिद्धहेम० ५।३।११०] इत्यङ्प्रत्ययः। तथा चाह सूरिः— **विवाहेणं** [2]इत्यादि, व्याख्यया व्याख्यायां वा जीवा व्याख्यायन्ते। शेषमानिगमनं पाठसिद्धम्॥

[सू० ९२] से किं तं णायाधम्मकहाओ ? णायाधम्मकहासु णं णायाणं णगराइं उज्जाणाइं चेइयाइं वणसंडाइं समोसरणाइं रायाणो अम्मा-पियरो धम्मकहाओ धम्मायरिया इहलोग-परलोगिया रिद्धिविसेसा भोगपरिच्चागा पव्वज्जाओ परियागा सुयपरिग्गहा तवोवहाणाइं संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं देवलोगगमणाइं सुकुलपच्चायाईओ पुणबोहिलाभा अंतकिरियाओ य आघविज्जंति। दस धम्मकहाणं वग्गा। तत्थ णं एगमेगाए धम्मकहाए पंच पंच अक्खाइयासयाइं, एगमेगाए अक्खाइयाए पंच पंच उवक्खाइयासयाइं, एगमेगाए उवक्खाइयाए पंच पंच अक्खाइओवक्खाइयासयाइं, एवमेव सपुव्वावरेणं अद्धट्ठाओ कहाणगकोडीओ भवंति त्ति मक्खायं। णायाधम्मकहाणं परित्ता वायणा, संखेज्जा अणुयोगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ संगहणीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए छट्ठे अंगे, दो सुयक्खंधा, एगूणवीसं णातज्झयणा, एगूणवीसं उद्देसणकाला, एगूणवीसं समुद्देसणकाला, संखेज्जाइं पयसहस्साइं पयग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासत-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति

---

१. उपसर्गात् अः - मलय० कृ० ५।६५ ॥ २. इत्यादि व्याख्यायां वा जीवा खंमू०। इत्यादि व्याख्यया व्याख्यायां वा जीवा खंसं०। इत्यादि व्याख्यायां जीवा खं० विना ॥

उवदंसिज्जंति। से एवंआया, एवंणाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जति। सेत्तं णायाधम्मकहाओ ६।

से किं तं इत्यादि, अथ कास्ताः **ज्ञाताधर्मकथाः** ? **ज्ञातानि** उदाहरणानि, तत्प्रधाना **धर्मकथा** ज्ञाताधर्मकथाः, अथवा **ज्ञातानि** ज्ञाताध्ययनानि प्रथमश्रुतस्कन्धे धर्मकथा द्वितीये श्रुतस्कन्धे यासु ग्रन्थपद्धतिषु ता **ज्ञाताधर्मकथाः**, पृषोदरादित्वात् पूर्वपदस्य दीर्घान्तता। सूरिराह– **ज्ञाताधर्मकथासु, णं** इति वाक्यालङ्कारे, 'ज्ञातानाम्' उदाहरणभूतानां नगरादीन्याख्यायन्ते। तथा **दस धम्मकहाणं वग्गा** इत्यादि। इह प्रथमश्रुतस्कन्धे एकोनविंशतिः 'ज्ञाताध्ययनानि' ज्ञातानि-उदाहरणानि तत्प्रधानानि अध्ययनानि, द्वितीयश्रुतस्कन्धे दश 'धर्मकथाः', धर्मस्य अहिंसादिलक्षणस्य प्रतिपादिकाः कथा धर्मकथाः, अथवा धर्मादनपेता धर्म्याः धर्म्याश्च ताः कथाश्च धर्म्यकथाः। तत्र प्रथमे श्रुतस्कन्धे यान्येकोनविंशतिर्ज्ञाताध्ययनानि तेष्वादिमानि दश ज्ञातानि ज्ञातान्येव, न तेष्वाख्यायिकादिसम्भवः। शेषाणि पुनर्यानि नव ज्ञातानि तेष्वेकैकस्मिन् चत्वारिंशानि पञ्च पञ्चाख्यायिकाशतानि ५४० भवन्ति ४८६०, एकैकस्यां चाऽऽख्यायिकायां पञ्च पञ्च उपाख्यायिकाशतानि २४३०००, एकैकस्यां चोपाख्यायिकायां पञ्च पञ्च आख्यायिकोपाख्यायिकाशतानि, सर्वसङ्ख्या १२१५०००००० एकविंशं कोटिशतं लक्षाः पञ्चाशत्, तत एवं स्थिते प्रस्तुतसूत्रस्यावतारः। आह च **टीकाकृत्**–

इगवीसं कोडिसयं, लक्खा पन्नास चेव बोद्धव्वा।
एवं कए समाणे, अहिगयसुत्तस्स पत्थावो॥१॥ [**नन्दी० हारि० सू० ९२ पृ० ८१**]

द्वितीये श्रुतस्कन्धे दश धर्मकथानां वर्गाः, **वर्गः** समूहः, दश धर्मकथासमुदाया इत्यर्थः, त एव च दशाध्ययनानि। एकैकस्यां धर्मकथायां-कथासमूहरूपाया-मध्ययनप्रमाणायां पञ्च पञ्चाऽऽख्यायिकाशतानि, एकैकस्यां चाऽऽख्यायिकायां पञ्च पञ्च उपाख्यायिकाशतानि, एकैकस्यां चोपाख्यायिकायां पञ्च पञ्च आख्यायिकोपाख्यायिकाशतानि, सर्वसङ्ख्यया पञ्चविंशं कोटिशतम्। इह नव-ज्ञाताध्ययनसम्बद्धाख्यायिकादिसदृशा या आख्यायिकादयः पञ्चाशल्लक्षाधिकैक-

विंशकोटिशतप्रमाणास्ता अस्मात् पञ्चविंशकोटिशतप्रमाणाद् राशेः शोध्यन्ते, ततः शेषा अपुनरुक्ता अर्द्धचतुर्थाः कथानककोट्यो भवन्ति। तथा चाह-'एवमेव' उक्तप्रकारेणैव गुणने शोधने च कृते 'सपूर्वापरेण' पूर्वश्रुतस्कन्धा-ऽपरश्रुतस्कन्धकथाः समुदिता अपुनरुक्ताः 'अद्धट्ठाओ'त्ति अर्द्धचतुर्थाः कथानककोटयो भवन्तीत्याख्यातं तीर्थकर-गणधरैः। आह च **टीकाकृत्**–

पणुवीसं कोडिसयं, एत्थ य समलक्खणाइगा जम्हा।
नवनायासम्बद्धा, अक्खाइयमाइया तेणं॥१॥
ता सोहिज्जंति फुडं, इमाओ रासीओ वेगलाणं तु।
पुणरुत्तवज्जियाणं, पमाणमेयं विणिद्दिट्ठं॥२॥ [नन्दी० हारि० सू० ९२ पृ० ८१]

तथा '**नायाधम्मकहाणं परित्ता वायणा**' इत्यादि सर्वं प्राग्वद्भावनीयं यावन्निगमनम्। नवरं सङ्ख्येयानि पदसहस्राणि **पदाग्रेण** पदपरिमाणेन, तानि च पञ्च लक्षाः षट्सप्ततिः सहस्राः, पदमपि चात्रौपसर्गिकं नैपातिकं नामिकमाख्यातिकं मिश्रं च[१] वेदितव्यम्। तथा चाह **चूर्णिकृत्**– **पयग्गेणं ति उवसग्गपयं निवायपयं नामियपयं अक्खायपयं मिस्सपयं च, एए पए अधिकिच्च पंच लक्खा छावत्तरिसहस्सा पयग्गेणं भवंति।** [नन्दी० हारि० सू० ९० पृ० ६५] अथवेह पदं सूत्रालापकरूपमुपगृह्यते, ततस्तथारूपपदापेक्षया सङ्ख्येयानि पदसहस्राणि भवन्ति, न लक्षाः। आह च[२] **चूर्णिकृत्**– **अहवा सुत्तालावगपयग्गेणं संखेज्जाइं पयसहस्साइं भवंति** [नन्दी० हारि० सू० ९० पृ० ६६] त्ति। एवमुत्तरत्रापि भावनीयम् ६॥

[सू० ९३] से किं तं उवासगदसाओ ? उवासगदसासु णं समणोवासगाणं णगराइं उज्जाणाइं चेइयाइं वणसंडाइं समोसरणाइं रायाणो अम्मा-पियरो धम्मकहाओ धम्मायरिया इहलोग-परलोइया रिद्धिविसेसा भोगपरिच्चाया परियागा सुयपरिग्गहा तवोवहाणाइं सीलव्वय-गुण-वेरमण-पच्चक्खाण-पोसहोववासपडिवज्जणया पडिमाओ उवसग्गा संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं देवलोगगमणाइं सुकुलपच्चायाईओ पुणबोहिलाभा अंतकिरियाओ य आघविज्जंति। उवासगदसासु णं परित्ता वायणा, संखेज्जा

१. चेति जे१,२, मां० दे० ॥ २. च नास्ति खं० देमू० ॥

अणुयोगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ संगहणीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए सत्तमे अंगे, एगे सुयक्खंधे, दस अज्झयणा, दस उद्देसणकाला, दस समुद्देसणकाला, संखेज्जाइं पदसहस्साइं पयग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासय-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति। से एवंआया, एवंणाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जति। सेत्तं उवासगदसाओ ७।

से किं तं इत्यादि। अथ कास्ताः **उपासकदशाः** ? **उपासकाः** श्रावकाः तद्व्रताणुव्रत-गुणव्रतादिक्रियाकलापप्रतिबद्धा **दशाः** अध्ययनानि उपासकदशाः। तथा चाऽऽह सूरिः-**उवासगदसासु णं** इत्यादि पाठसिद्धं यावन्निगमनम्। नवरं सङ्ख्येयानि पदसहस्राणि पदाग्रेणेति, एकादश लक्षा द्विपञ्चाशत् सहस्रा इत्यर्थः। द्वितीयं तु व्याख्यानं प्रागिव भावनीयम्।

[सू० ९४] से किं तं अंतगडदसाओ ? अंतगडदसासु णं अंतगडाणं णगराइं उज्जाणाइं चेतियाइं वणसंडाइं समोसरणाइं रायाणो अम्मा-पियरो धम्मकहाओ धम्मायरिया इहलोग-परलोगिया रिद्धिविसेसा भोगपरिच्चागा पव्वज्जाओ परियागा सुतपरिग्गहा तवोवहाणाइं संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं देवलोगगमणाइं सुकुलपच्चायाईओ, पुणबोहिलाभा अंतकिरियाओ य आघविज्जंति। अंतगडदसासु णं परित्ता वायणा, संखेज्जा अणुयोगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ संगहणीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए अट्ठमे अंगे, एगे सुयक्खंधे, अट्ठ वग्गा, अट्ठ उद्देसणकाला, अट्ठ समुद्देसणकाला, संखेज्जाइं पयसहस्साइं पदग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासत-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति

णिदंसिज्जंति उवदंसिज्जंति। से एवंआया, एवंणाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जति। सेत्तं अंतगडदसाओ ८।

से किं तं इत्यादि। अथ कास्ताः **अन्तकृद्दशाः** ? **अन्तो** विनाशस्तं कर्मणः तत्फलभूतस्य वा संसारस्य ये कृतवन्तस्ते**ऽन्तकृतः** तीर्थकरादयः तद्वक्तव्यताप्रतिबद्धा **दशाः** अध्ययनानि अन्तकृद्दशाः। तथा चाह सूरिः-**अंतकडदसासु णं** इत्यादि पाठसिद्धं यावद् **अंतकिरियाओ** त्ति भवापेक्षया अन्त्याश्च ताः क्रियाश्चान्त्यक्रियाः शैलेश्यवस्थादिका गृह्यन्ते। शेषं प्रकटार्थं यावद् **अट्ठ वग्ग** त्ति **वर्गः** समूहः, स चान्तकृतामध्ययनानां वा वेदितव्यः। सर्वाणि चाध्ययनानि वर्गवर्गान्तर्गतानि युगपदुद्दिश्यन्ते अत आह– अष्टावुद्देशनकालाः, अष्टौ समुद्देशनकालाः। सङ्ख्येयानि पदसहस्राणि पदाग्रेण, तानि च किल त्रयोविंशतिर्लक्षाश्चत्वारश्च सहस्राः। शेषं पाठसिद्धं यावन्निगमनम्॥

[सू० ९५] से किं तं अणुत्तरोववाइयदसाओ ? अणुत्तरोववाइयदसासु णं अणुत्तरोववाइयाणं णगराइं उज्जाणाइं चेइयाइं वणसंडाइं समोसरणाइं रायाणो अम्मा-पियरो धम्मकहाओ धम्मायरिया इहलोग-परलोगिया रिद्धिविसेसा भोगपरिच्चागा पव्वज्जाओ परियागा सुतपरिग्गहा तवोवहाणाइं पडिमाओ उवसग्गा संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं अणुत्तरोववाइयत्ते उववत्ती सुकुलपच्चायादीओ पुणबोहिलाभा अंतकिरियाओ य आघविज्जंति। अणुत्तरोववाइयदसासु णं परित्ता वायणा, संखेज्जा अणुयोगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ संगहणीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए णवमे अंगे, एगे सुयक्खंधे, तिण्णि वग्गा, तिण्णि उद्देसणकाला, तिण्णि समुद्देसणकाला, संखेज्जाइं पयसहस्साइं पयग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासय-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति। से एवंआया, एवंणाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जइ।

सेत्तं अणुत्तरोववाइयदसाओ ९।

से किं तं इत्यादि। अथ कास्ताः **अनुत्तरौपपातिकदशाः** ? न विद्यते **उत्तरः** प्रधानो येभ्यस्तेऽनुत्तराः सर्वोत्तमा इत्यर्थः, उपपातेन निर्वृत्ता औपपातिकाः, अनुत्तराश्च ते औपपातिकाश्च अनुत्तरौपपातिकाः, विजयाद्यनुत्तरविमानवासिन इत्यर्थः, तद्वक्तव्यताप्रतिबद्धा दशा अनुत्तरौपपातिकदशाः। तथा चाह सूरिः- **अणुत्तरोववाइयदसासु णं** इत्यादि पाठसिद्धं यावन्निगमनम्। नवरमध्ययनसमूहो वर्गः, वर्गे च वर्गे च दश दशाध्ययनानि। वर्गश्च युगपदेवोद्दिश्यते इति त्रय एव उद्देशनकालास्त्रय एव च समुद्देशनकालाः। सङ्ख्येयानि च पदसहस्राणि सहस्राष्टकाधिकषट्चत्वारिंशल्लक्षप्रमाणानि वेदितव्यानि॥

[सू० ९६] से किं तं पण्हावागरणाइं ? पण्हावागरणेसु णं अट्ठुत्तरं पसिणसयं, अट्ठुत्तरं अपसिणसयं, अट्ठुत्तरं पसिणा-ऽपसिणसयं अण्णे वि विचित्ता दिव्वा विज्जातिसया नाग-सुवण्णेहि य सद्धिं दिव्वा संवाया आघविज्जंति। पण्हावागरणाणं परित्ता वायणा, संखेज्जा अणुओगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ संगहणीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए दसमे अंगे, एगे सुयक्खंधे, पणयालीसं अज्झयणा, पणयालीसं उद्देसणकाला, पणयालीसं समुद्देसणकाला, संखेज्जाइं पदसहस्साइं पदग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासत-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति। से एवंआया, एवं णाया एवं विण्णाया, एवं चरण-करणपरूवणा आघविज्जइ। सेत्तं पण्हावागरणाइं १०।

से किं तं इत्यादि। अथ कानि **प्रश्नव्याकरणानि** ? **प्रश्नः** प्रतीतः, तद्विषयं निर्वचनं व्याकरणम्, तानि च बहूनि ततो बहुवचनम्। [१]तेषु प्रश्नव्याकरणेषु **अष्टोत्तरं प्रश्नशतं** या विद्या मन्त्रा वा विधिना जप्यमानाः पृष्टा एव सन्तः शुभा-ऽशुभं

१. अत्र प्रश्न° जे१ ॥

कथयन्ति ते प्रश्नाः तेषामष्टोत्तरं शतम्। याः पुनर्विद्या मन्त्रा वा विधिना जप्यमाना अपृष्टा एव शुभा-ऽशुभं कथयन्ति तेऽप्रश्नाः तेषामष्टोत्तरं शतम्। तथा ये पृष्टा अपृष्टाश्च कथयन्ति ते प्रश्नाप्रश्नाः तेषामप्यष्टोत्तरं शतमाख्यायते। तथाऽन्येऽपि च विविधा विद्यातिशयाः कथ्यन्ते। तथा नागकुमारैः सुपर्णकुमारैरन्यैश्च भवनपतिभिः सह साधूनां दिव्याः 'संवादाः' जल्पविधयः कथ्यन्ते, यथा भवन्ति तथा कथ्यन्ते इत्यर्थः। शेषं निगदसिद्धम्। नवरं सङ्ख्येयानि पदसहस्राणि द्विनवतिर्लक्षाः षोडश सहस्रा इत्यर्थः॥

[सू० ९७ (१)] से किं तं विवागसुतं ? विवागसुतेणं सुकड-दुक्कडाणं कम्माणं फल-विवागा आघविज्जंति। तत्थ णं दस दुहविवागा, दस सुहविवागा।

(२) से किं तं दुहविवागा ? दुहविवागेसु णं दुहविवागाणं णगराइं उज्जाणाइं वणसंडाइं चेइयाइं समोसरणाइं रायाणो अम्मा-पियरो धम्मकहाओ धम्मायरिया इहलोइय-परलोइया रिद्धिविसेसा निरयगमणाइं दुहपरंपराओ संसारभवपवंचा दुकुलपच्चायाईओ दुलहबोहियत्तं आघविज्जंति, सेत्तं दुहविवागा।

(३) से किं तं सुहविवागा ? सुहविवागेसु णं सुहविवागाणं णगराइं उज्जाणाइं वणसंडाइं चेइयाइं समोसरणाइं रायाणो अम्मा-पियरो धम्मकहाओ धम्मायरिया इहलोइअ-परलोइया रिद्धिविसेसा भोगपरिच्चागा पव्वज्जाओ परियागा सुतपरिग्गहा तवोवहाणाइं संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं देवलोगगमणाइं सुहपरंपराओ सुकुलपच्चायादीओ पुणबोहिलाभा अंतकिरियाओ य आघविज्जंति। [सेत्तं सुहविवागा।]

(४) विवागसुते णं परित्ता वायणा, संखेज्जा अणुयोगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ संगहणीओ, संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए एक्कारसमे अंगे, दो सुयक्खंधा, वीसं अज्झयणा, वीसं उद्देसणकाला, वीसं समुद्देसणकाला, संखेज्जाइं पदसहस्साइं पदग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासय-कड-णिबद्ध-णिकाइया जिणपण्णत्ता

भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति। से एवंआया एवंणाया एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जति। सेत्तं विवागसुतं ११।

से किं तं इत्यादि। अथ किं तद् **विपाकश्रुतम्** ? विपचनं **विपाकः** शुभाऽशुभकर्मपरिणाम इत्यर्थः, तत्प्रतिपादकं श्रुतं विपाकश्रुतम्। शेषं सर्वमानिगमनं पाठसिद्धम्। नवरं सङ्ख्येयानि पदसहस्राणीति एका कोटी चतुरशीतिर्लक्षा द्वात्रिंशच्च सहस्राणि॥

[सू० ९८] से किं तं दिट्ठिवाए ? दिट्ठिवाएणं सव्वभावपरूवणा आघविज्जति। से समासओ पंचविहे पण्णत्ते, तंजहा– परिकम्मं १, सुत्ताइं २, पुव्वगए ३, अणुओगे ४, चूलिया ५।

[सू० ९९] से किं तं परिकम्मे ? परिकम्मे सत्तविहे पण्णत्ते, तंजहा– सिद्धसेणियापरिकम्मे १, मणुस्ससेणियापरिकम्मे २, पुट्ठसेणियापरिकम्मे ३, ओगाढसेणियापरिकम्मे ४, उवसंपज्जणसेणियापरिकम्मे ५, विप्पजहणसेणियापरिकम्मे ६, चुतअचुतसेणियापरिकम्मे ७।

[सू० १००] से किं तं सिद्धसेणियापरिकम्मे ? सिद्धसेणियापरिकम्मे चोद्दसविहे पण्णत्ते, तंजहा– माउगापयाइं १, एगट्ठियपयाइं २, अट्ठापयाइं ३, पाढो ४, आमासपयाइं ५, केउभूयं ६, रासिबद्धं ७, एगगुणं ८, दुगुणं ९, तिगुणं १०, केउभूयपडिग्गहो ११, संसारपडिग्गहो १२, नंदावत्तं १३, सिद्धावत्तं १४। सेत्तं सिद्धसेणियापरिकम्मे १।

[सू० १०१] से किं तं मणुस्ससेणियापरिकम्मे ? मणुस्ससेणियापरिकम्मे चोद्दसविहे पण्णत्ते, तंजहा– माउगापयाइं १, एगट्ठियपयाइं २, अट्ठापयाइं ३, पाढो ४, आमासपयाइं ५, केउभूयं ६, रासिबद्धं ७, एगगुणं ८, दुगुणं ९, तिगुणं १०, केउभूयपडिग्गहो ११, संसारपडिग्गहो १२, णंदावत्तं १३, मणुस्सावत्तं १४। सेत्तं मणुस्ससेणियापरिकम्मे २।

[सू० १०२] से किं तं पुट्ठसेणियापरिकम्मे ? पुट्ठसेणियापरिकम्मे

एक्कारसविहे पण्णत्ते, तंजहा– पाढो १, आमासपयाइं २, केउभूयं ३, रासिबद्धं ४, एगगुणं ५, दुगुणं ६, तिगुणं ७, केउभूयपडिग्गहो ८, संसारपडिग्गहो ९, णंदावत्तं १०, पुट्ठावत्तं ११। सेत्तं पुट्ठसेणियापरिकम्मे ३।

[सू० १०३] से किं तं ओगाढसेणियापरिकम्मे ? ओगाढसेणियापरिकम्मे एक्कारसविहे पण्णत्ते, तंजहा– पाढो १, आमासपयाइं २, केउभूयं ३, रासिबद्धं ४, एगगुणं ५, दुगुणं ६, तिगुणं ७, केउभूयपडिग्गहो ८, संसारपडिग्गहो ९, णंदावत्तं १०, ओगाढावत्तं ११, सेत्तं ओगाढसेणियापरिकम्मे ४।

[सू० १०४] से किं तं उवसंपज्जणसेणियापरिकम्मे ? उवसंपज्जणसेणियापरिकम्मे एक्कारसविहे पण्णत्ते, तंजहा– पाढो १, आमासपयाइं २, केउभूयं ३, रासिबद्धं ४, एगगुणं ५, दुगुणं ६, तिगुणं ७, केउभूयपडिग्गहो ८, संसारपडिग्गहो ९, णंदावत्तं १०, उवसंपज्जणावत्तं ११, सेत्तं उवसंपज्जणसेणियापरिकम्मे ५।

[सू० १०५] से किं तं विप्पजहणसेणियापरिकम्मे ? विप्पजहणसेणियापरिकम्मे एगारसविहे पण्णत्ते, तंजहा– पाढो १, आमासपयाइं २, केउभूयं ३, रासिबद्धं ४, एगगुणं ५, दुगुणं ६, तिगुणं ७, केउभूयपडिग्गहो ८, संसारपडिग्गहो ९, णंदावत्तं १०, विप्पजहणावत्तं ११, सेत्तं विप्पजहणसेणियापरिकम्मे ६।

[सू० १०६] से किं तं चुयमचुयसेणियापरिकम्मे ? चुयमचुयसेणियापरिकम्मे एगारसविहे पण्णत्ते, तंजहा– पाढो १, आमासपयाइं २, केउभूयं ३, रासिबद्धं ४, एगगुणं ५, दुगुणं ६, तिगुणं ७, केउभूयपडिग्गहो ८, संसारपडिग्गहो ९, णंदावत्तं १०, चुयमचुयावत्तं ११, सेत्तं चुयमचुयसेणियापरिकम्मे ७।

[सू० १०७] [इच्चेताइं[1] सत्त परिकम्माइं, छ ससमइयाइं, सत्त आजीवियाइं।]

१. एतत् चतुरस्रकोष्ठकान्तर्वर्ति सूत्रं सूत्रादर्शेषु न विद्यते। किन्तु चूर्णौ हारिभद्र्यांवृत्तौ मलयगिरीयायां च वृत्तौ आदृतं भाति। अतः चतुरस्रकोष्ठकान्तर्वर्ती एतावानंशः समवायाङ्गसूत्रानुसारेणोद्धृत्यात्रोपन्यस्यते॥

छ चउक्कणइयाइं, सत्त तेरासियाइं, सेत्तं परिकम्मे १।

[सू० १०८ (१)] से किं तं सुत्ताइं ? सुत्ताइं बावीसं पण्णत्ताइं, तंजहा– उज्जुसुतं १, परिणयापरिणयं २, बहुभंगियं ३, विजयचरियं ४, अणंतरं ५, परंपरं ६, सामाणं ७, संजूहं ८, संभिण्णं ९, आयच्चायं १०, सोवत्थिप्पण्णं ११, णंदावत्तं १२, बहुलं १३, पुट्ठापुट्ठं १४, वेयावच्चं १५, एवंभूयं १६, भूयावत्तं १७, वत्तमाणुप्पयं १८, समभिरूढं १९, सव्वओभद्दं २०, पण्णासं २१, दुप्परिग्गहं २२।

(२) इच्चेयाइं बावीसं सुत्ताइं छिण्णच्छेयणइयाइं ससमयसुत्तपरिवाडीए सुत्ताइं १, इच्चेयाइं बावीसं सुत्ताइं अच्छिण्णच्छेयणइयाइं आजीवियसुत्त-परिवाडीए सुत्ताइं २, इच्चेयाइं बावीसं सुत्ताइं तिगणइयाइं तेरासियसुत्तपरिवाडीए सुत्ताइं ३, इच्चेयाइं बावीसं सुत्ताइं चउक्कणइयाइं ससमयसुत्तपरिवाडीए सुत्ताइं ४, एवामेव सपुव्वावरेणं अट्ठासीतिं सुत्ताइं भवंतीति मक्खायं। सेत्तं सुत्ताइं २।

[सू० १०९ (१)] से किं तं पुव्वगते ? पुव्वगते चोद्दसविहे पण्णत्ते, तंजहा– उप्पादपुव्वं १, अग्गेणीयं २, वीरियं ३, अत्थिणत्थिप्पवादं ४, नाणप्पवादं ५, सच्चप्पवादं ६, आयप्पवादं ७, कम्मप्पवादं ८, पच्चक्खाणं ९, विज्जणुप्पवादं १०, अवंझं ११, पाणायुं १२, किरियाविसालं १३, लोगबिंदुसारं १४।

(२) उप्पायस्स णं पुव्वस्स दस वत्थू चत्तारि चुल्लयवत्थू पण्णत्ता १। अग्गेणीयस्स णं पुव्वस्स चोद्दस वत्थू दुवालस चुल्लवत्थू पण्णत्ता २। वीरियस्स णं पुव्वस्स अट्ठ वत्थू अट्ठ चुल्लवत्थू पण्णत्ता ३। अत्थिणत्थिप्पवायस्स णं पुव्वस्स अट्ठारस वत्थू दस चुल्लवत्थू पण्णत्ता ४। णाणप्पवादस्स णं पुव्वस्स बारस वत्थू पण्णत्ता ५। सच्चप्पवायस्स णं पुव्वस्स दोण्णि वत्थू पण्णत्ता ६। आयप्पवायस्स णं पुव्वस्स सोलस वत्थू पण्णत्ता ७। कम्मप्पवायस्स णं पुव्वस्स तीसं वत्थू पण्णत्ता ८। पच्चक्खाणस्स णं पुव्वस्स वीसं वत्थू पण्णत्ता

९। विज्जणुप्पवादस्स णं पुव्वस्स पणरस वत्थू पण्णत्ता १०। अवंझस्स णं पुव्वस्स बारस वत्थू पण्णत्ता ११। पाणाउस्स णं पुव्वस्स तेरस वत्थू पण्णत्ता १२। किरियाविसालस्स णं पुव्वस्स तीसं वत्थू पण्णत्ता १३। लोगबिंदुसारस्स णं पुव्वस्स पणुवीसं वत्थू पण्णत्ता १४।

(३) दस १, चोद्दस २, अट्ठ ३, ऽट्ठारसेव ४, बारस ५, दुवे ६, य वत्थूणि।
सोलस ७, तीसा ८, वीसा ९, पण्णरस १० अणुप्पवायम्मि॥७९।
बारस एक्कारसमे ११, बारसमे तेरसेव वत्थूणि १२।
तीसा पुण तेरसमे १३, चोद्दसमे पण्णवीसा उ १४॥८०॥
चत्तारि १, दुवालस २, अट्ठ ३, चेव दस ४, चेव चुल्लवत्थूणि।
आइल्लाण चउण्हं, सेसाणं चुल्लया णत्थि॥८१॥
सेत्तं पुव्वगते ३।

[सू० ११०] से किं तं अणुओगे ? अणुओगे दुविहे पण्णत्ते, तंजहा– मूलपढमाणुओगे य १, गंडियाणुओगे य २।

[सू० १११] से किं तं मूलपढमाणुओगे ? मूलपढमाणुओगे णं अरहंताणं भगवंताणं पुव्वभव्वा देवलोगगमणाइं आउं चवणाइं जम्मणाणि य अभिसेया रायवरसिरीओ पव्वज्जाओ, तवा य उग्गा, केवलनाणुप्पयाओ तित्थपवत्तणाणि य सीसा गणा गणधरा य अज्जा य पवत्तिणीओ य संघस्स चउव्विहस्स जं च परिमाणं, जिण-मणपज्जव-ओहिणाणि-समत्तसुयणाणिणो य वादी य अणुत्तरगती य उत्तरवेउव्विणो य मुणिणो जत्तिया, जत्तिया सिद्धा, सिद्धिपहो जह य देसिओ, जच्चिरं च कालं पादोवगओ, जो जहिं जत्तियाइं भत्ताइं छेयइत्ता अंतगडो मुणिवरुत्तमो तमरओघविप्पमुक्को मुक्खसुहमणुत्तरं च पत्तो, एते अन्ने य एवमादी भावा मूलपढमाणुओगे कहिया, सेत्तं मूलपढमाणुओगे।

[सू० ११२] से किं तं गंडियाणुओगे ? गंडियाणुओगे णं कुलगरगंडियाओ तित्थगरगंडियाओ चक्कवट्टिगंडियाओ दसारगंडियाओ बलदेवगंडियाओ वासुदेवगंडियाओ गणधरगंडियाओ भद्दबाहुगंडियाओ तवोकम्मगंडियाओ

हरिवंसगंडियाओ ओसप्पिणिगंडियाओ उस्सप्पिणिगंडियाओ चित्तंतरगंडियाओ अमर-णर-तिरिय-निरयगइगमणविविहपरियट्टणेसु एवमाइयाओ गंडियाओ आघविज्जंति, सेत्तं गंडियाणुओगे। सेत्तं अणुओगे ४।

[सू० ११३] से किं तं चूलियाओ ? चूलियाओ आइल्लाणं चउण्हं पुव्वाणं चूलिया, अवसेसा पुव्वा अचूलिया, सेत्तं चूलियाओ ५।

[सू० ११४] दिट्ठिवायस्स णं परित्ता वायणा, संखेज्जा अणुओगदारा, संखेज्जा वेढा, संखेज्जा सिलोगा, संखेज्जाओ पडिवत्तीओ, संखेज्जाओ णिज्जुत्तीओ, संखेज्जाओ संगहणीओ। से णं अंगट्ठयाए दुवालसमे अंगे, एगे सुयक्खंधे, चोद्दस पुव्वा, संखेज्जा वत्थू, संखेज्जा चुल्लवत्थू, संखेज्जा पाहुडा, संखेज्जा पाहुडपाहुडा, संखेज्जाओ पाहुडियाओ, संखेज्जाओ पाहुडपाहुडियाओ, संखेज्जाइं पदसहस्साइं पदग्गेणं, संखेज्जा अक्खरा, अणंता गमा, अणंता पज्जवा, परित्ता तसा, अणंता थावरा, सासत-कड-णिबद्ध-णिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति णिदंसिज्जंति उवदंसिज्जंति। से एवंआया, एवंणाया, एवंविण्णाया, एवं चरण-करणपरूवणा आघविज्जति। सेत्तं दिट्ठिवाए १२।

से किं तं इत्यादि। अथ कोऽयं **दृष्टिवादः दृष्टयः** दर्शनानि, वदनं वादः, दृष्टीनां वादो यत्र स दृष्टिवादः, अथवा पतनं पातः, दृष्टीनां पातो यत्र स दृष्टिपातः, तथाहि– तत्र सर्वनयदृष्टय आख्यायन्ते। तथा चाह सूरिः-**दिट्ठिवाएणं** इत्यादि, दृष्टिवादेन अथवा दृष्टिपातेन, यद्वा दृष्टिवादे दृष्टिपाते वा **णं** इति वाक्यालङ्कारे सर्वभावप्ररूपणा आख्यायते। **से समासतो पंचविहे पन्नत्ते** इत्यादि, सर्वमिदं प्रायो व्यवच्छिन्नं तथापि लेशतो यथाऽऽगतसम्प्रदायं किञ्चिद् व्याख्यायते- **सः** दृष्टिवादो दृष्टिपातो वा समासतः पञ्चविधः प्रज्ञप्तः, तद्यथा– परिकर्म १, सूत्राणि २, पूर्वगतम् ३, अनुयोगः ४, चूलिका ५। तत्र 'परिकर्म' नाम योग्यतापादनम्, तद्धेतुः शास्त्रमपि परिकर्म, किमुक्तं भवति ? सूत्र-पूर्वगता-ऽनुयोगसूत्रार्थग्रहणयोग्यतासम्पादनसमर्थानि परिकर्माणि, यथा गणितशास्त्रे सङ्कलनादीन्याद्यानि षोडश परिकर्माणि

शेषगणितसूत्रार्थग्रहणयोग्यतासम्पादनसमर्थानि। तथाहि– यथा गणितशास्त्रे गणितशास्त्रगताद्यषोडशपरिकर्मगृहीतसूत्रार्थः सन् शेषगणितशास्त्रग्रहणयोग्यो भवति, नान्यथा, तथा गृहीतविवक्षितपरिकर्मसूत्रार्थः सन् शेषसूत्रादिरूपदृष्टिवादश्रुतग्रहणयोग्यो भवति, नेतरथा। तथा चोक्तं **चूर्णौ**– **परिकम्मं ति योग्यताकरणं, जहा गणियस्स सोलस परिकम्मा, तग्गहियसुत्तत्थो सेसगणियस्स जोग्गो भवइ, एवं गहियपरिकम्मसुत्तत्थो सेससुत्ताइदिट्ठिवायसुयस्स जोग्गो भवइ** [नन्दीचू० सू० ९७ पृ० ७२] त्ति। तच्च परिकर्म सिद्धश्रेणिकापरिकर्मादिमूलभेदापेक्षया सप्तविधम्, मातृकापदाद्युत्तरभेदापेक्षया त्र्यशीतिविधम्, तच्च समूलोत्तरभेदं सकलमपि सूत्रतोऽर्थतश्च व्यवच्छिन्नम्, यथागतसम्प्रदायतो वा[१] वाच्यम्। एतेषां च सिद्धश्रेणिकापरिकर्मादीनां सप्तानां परिकर्मणामाद्यानि षट् परिकर्माणि स्वसमयवक्तव्यतानुगतानि, स्वसिद्धान्त-प्रकाशकानीत्यर्थः। ये तु गोशालप्रवर्त्तिता आजीविकाः पाषण्डिनस्तन्मतेन च्युताच्युतश्रेणिकापरिकर्मसहितानि सप्तापि परिकर्माणि प्रज्ञाप्यन्ते।

सम्प्रत्येतेष्वेव परिकर्मसु नयचिन्ता– तत्र नयाः सप्त नैगमादयः, नैगमोऽपि द्विधा– सामान्यग्राही विशेषग्राही च, तत्र यः सामान्यग्राही स सङ्ग्रहं प्रविष्टः, यस्तु विशेषग्राही स व्यवहारम्। आह च **भाष्यकृत्**–

जो सामन्नग्गाही, स नेगमो संगहं गओ अहवा।
इयरो ववहारमिओ, जो तेण समाणनिद्देसो॥१॥ [विशेषा* ० ३९]

शब्दादयश्च त्रयोऽपि नया एक एव नयः परिकल्प्यते, तत एवं चत्वार एव नयाः, एतैश्चतुर्भिर्नयैराद्यानि षट् परिकर्माणि स्वसमयवक्तव्यतया परिचिन्त्यन्ते। तथा चाह **चूर्णिकृत्**– **इयाणिं परिकम्मे नयचिंता, नेगमो दुविहो-संगहिओ असंगहिओ य, संगहिओ संगहं पविट्ठो, असंगहिओ ववहारं, तम्हा संगहो ववहारो उज्जुसुओ सद्दाइया य एक्को, एवं चउरो नया, एएहिं चउहिं नएहिं छ ससमइगा परिकम्मा चिंतिज्जंति।** [नन्दीचू० सू० १०५ पृ० ७२]। तथा चाह सूत्रकृत्– **छ चउक्कनइयाइं** ति, आद्यानि षट् परिकर्माणि **चतुर्नयिकानि** चतुर्नयोपेतानि। तथा त एव गोशालप्रवर्त्तिता आजीविकाः पाषण्डिनस्त्रैराशिकाः उच्यन्ते। कस्मात् ? इति चेत्, उच्यते, इह ते सर्वं वस्तु

१. **वा** जेसं० खंसं० विना नास्ति॥ नन्दीचूर्णौ नन्दीहारिभद्र्यां च वर्तत एव॥

त्र्यात्मकमिच्छन्ति, तद्यथा-जीवोऽजीवो जीवाजीवश्च, लोकोऽलोको लोकालोकश्च, सद् असत् सदसत्। नयचिन्तायामपि त्रिविधं नयमिच्छन्ति, तद्यथा– द्रव्यास्तिकं पर्यायास्तिकमुभयास्तिकं च। ततस्त्रिभी राशिभिश्चरन्तीति त्रैराशिकाः, तन्मतेन सप्तापि परिकर्माणि चिन्त्यन्ते[१], तथा चाह सूत्रकृत्– **सत्त तेरासियाइं** ति, सप्त परिकर्माणि **त्रैराशिकानि** त्रैराशिकमतानुयायीनि। एतदुक्तं भवति-पूर्वसूरयो नयचिन्तायां त्रैराशिकमतमवलम्बमानाः सप्तापि परिकर्माणि त्रिविधयाऽपि नयचिन्तया चिन्तयन्ति स्मेति। **सेत्तं परिकम्मे** तदेतत् परिकर्म॥

से किं तं सुत्ताइं ति। अथ कानि **सूत्राणि** ? सर्वस्य पूर्वगतसूत्रार्थस्य सूचनात् सूत्राणि, तथाहि– तानि सूत्राणि सर्वद्रव्याणां सर्वपर्यायाणां सर्वनयानां सर्वभङ्गविकल्पानां [च] प्रदर्शकानि। तथा चोक्तं **चूर्णिकृता**– **ताणि य सुत्ताइं सव्वदव्वाण सव्वपज्जवाण सव्वनयाण सव्वभंगविकप्पाण य पदंसगाणि, सव्वस्स पुव्वगयस्स सुयस्स अत्थस्स य सूयग त्ति सूयणत्ताओ सूया भणिया जहाभिहाणत्था [नन्दीचू० सू० १०६ पृ० ७४]** इति।

आचार्य आह– सूत्राणि द्वाविंशतिः प्रज्ञप्तानि, तद्यथा 'ऋजुसूत्रम्' इत्यादि, एतान्यपि सम्प्रति सूत्रतोऽर्थतश्च व्यवच्छिन्नानि, यथागतसम्प्रदायतो वा वाच्यानि। एतानि च सूत्राणि नयविभागतो विभिद्यमानानि अष्टाशीतिसङ्ख्यानि भवन्ति। कथम् ? इति चेत्, अत आह– **इच्चेयाइं बावीसं सुत्ताइं** इत्यादि, इह यो नाम नयः सूत्रं छेदेन छिन्नमेवाभिप्रैति न द्वितीयेन सूत्रेण सह सम्बन्धयति यथा 'धम्मो मंगलमुक्कट्ठं' इति श्लोकम्। तथाहि– अयं श्लोकः छिन्नच्छेदनयमतेन व्याख्यायमानो न द्वितीयादीन् श्लोकानपेक्षते नापि द्वितीयादयः श्लोका अमुम्। अयमत्राभिप्रायः– तथा कथञ्चनाप्यमुं श्लोकं पूर्वसूरयः छिन्नच्छेदनयमतेन व्याख्यान्ति स्म यथा न मनागपि द्वितीयादिश्लोकानामपेक्षा भवति, द्वितीयादीनपि श्लोकान् तथा व्याख्यान्ति स्म यथा न तेषां प्रथमश्लोकस्यापेक्षा, तथा सूत्राण्यपि यन्नयाभिप्रायेण परस्परं निरपेक्षाणि व्याख्यान्ति स्म स छिन्नच्छेदनयः, **छिन्नः** द्विधाकृतः पृथक्कृतः **छेदः** पर्यन्तो येन स

---

१. उच्यन्ते पा० दे० ॥

छिन्नच्छेदः, प्रत्येकं कल्पितपर्यन्त इत्यर्थः, स चासौ नयश्च छिन्नच्छेदनय इति। एतानि द्वाविंशतिसूत्राणि **स्वसमयसूत्रपरिपाट्यां** स्वसमयवक्तव्यतामधिकृत्य सूत्रपरिपाट्यां विवक्षितायां छिन्नच्छेदनयिकानि, अत्र [१]**अतोऽनेकस्वरात्** [*मलय० त० ७।१४] इति मत्वर्थीय इकप्रत्ययः, ततोऽयमर्थः-छिन्नच्छेदनयवन्ति द्रष्टव्यानि। तथा **इच्चेयाइं** इत्यादि, इत्येतानि द्वाविंशतिसूत्राणि **आजीविकसूत्रपरिपाट्यां** गोशालकप्रवर्त्तिताजीविकपाषण्डिमतेन सूत्रपरिपाट्यां विवक्षितायामच्छिन्नच्छेदनयिकानि, इयमत्र भावनाअच्छिन्नच्छेदनयो नाम यः सूत्रं सूत्रान्तरेण सहाच्छिन्नमर्थतः सम्बद्धमभिप्रैति, यथा **धम्मो मंगलमुक्कट्ठं** [*दशवै०१।१] इति श्लोकम्, तथाहि– अयं श्लोकोऽच्छिन्नच्छेदनयमतेन व्याख्यायमानो द्वितीयादीन् श्लोकानपेक्षते, द्वितीयादयोऽपि श्लोका एनं श्लोकम्, एवमेतान्यपि द्वाविंशतिसूत्राणि अक्षररचनामधिकृत्य परस्परं विभक्तान्यपि स्थितानि अच्छिन्नच्छेदनयमतेनार्थसम्बन्धमपेक्ष्य सापेक्षाणि वर्त्तन्ते। तदेवं नयाभिप्रायेण परस्परं सूत्राणां सम्बन्धा-ऽसम्बन्धावधिकृत्य भेदो दर्शितः, सम्प्रत्यन्यथा नयविभागमधिकृत्य भेदं दर्शयति– **इच्चेयाइं** इत्यादि, इत्येतानि द्वाविंशतिसूत्राणि **त्रैराशिकसूत्रपरिपाट्यां** त्रैराशिकनयमतेन सूत्रपरिपाट्यां विवक्षितायां त्रिकनयिकानि, त्रिकेति प्राकृतत्वात् स्वार्थे कप्रत्ययः, ततोऽयमर्थः-'त्रिनयिकानि' त्रिनयोपेतानि, किमुक्तं भवति ?– त्रैराशिकमतमवलम्ब्य द्रव्यास्तिकादिनयत्रिकेण चिन्त्यन्ते इति। तथा इत्येतानि द्वाविंशतिसूत्राणि **स्वसमयसूत्रपरिपाट्यां** स्वसमयवक्तव्यतामधिकृत्य सूत्रपरिपाट्यां विवक्षितायां **चतुर्नयिकानि** सङ्ग्रह-व्यवहार-ऋजुसूत्र-शब्दरूपनय-चतुष्टयोपेतानि, सङ्ग्रहादिनयचतुष्टयेन चिन्त्यन्ते इत्यर्थः। **एवमेव** उक्तेनैव प्रकारेण **पुव्वावरेणं** ति पूर्वाणि चापराणि च पूर्वापरं समाहारप्रधानो द्वन्द्वः, पूर्वापरसमुदाय इत्यर्थः, [२]तत एतदुक्तं भवति– नयविभागतो विभिन्नानि पूर्वाणि अपराणि च सूत्राणि समुदितानि सर्वसङ्ख्ययाऽष्टाशीतिसूत्राणि भवन्ति, चतसृणां द्वाविंशतीनामष्टा-शीतिमानत्वात्, इत्याख्यातं तीर्थकर-गणधरैः। **सेत्तं सुत्ताइं** तान्येतानि सूत्राणि २॥

से किं तं इत्यादि, अथ किं तत् पूर्वगतम् ?। इह तीर्थकरस्तीर्थप्रवर्त्तनकाले

१. **अतोऽनेकस्वरात्** - सिद्धहेम० ७।२।६ ॥ २. **तेन एत°** खं० ॥

गणधरान् सकलश्रुतार्थावगाहनसमर्थानधिकृत्य पूर्वं पूर्वगतसूत्रार्थं भाषते ततस्तानि पूर्वाण्युच्यन्ते, गणधराः पुनः सूत्ररचनां विदधतः आचारादिक्रमेण विदधति स्थापयन्ति वा। **अन्ये** तु व्याचक्षते-पूर्वं पूर्वगतसूत्रार्थमर्हन् भाषते, गणधरा अपि पूर्वं पूर्वगतसूत्रं विरचयन्ति पश्चादाचारादिकम्।

अत्र चोदक आह– नन्विदं पूर्वापरविरुद्धम्, यस्मादाचारनिर्युक्तावुक्तम्– **सव्वेसिं आयारो पढमो** [*आचा० नि० ८] इत्यादि, सत्यमुक्तम्, किन्तु तत् स्थापनामधिकृत्योक्तम्, अक्षररचनामधिकृत्य पुनः पूर्वं पूर्वाणि कृतानि ततो न कश्चित् पूर्वापरविरोधः।

सूरिराह– **पुव्वगते** इत्यादि, पूर्वगतं श्रुतं चतुर्दशविधं प्रज्ञप्तम्, तद्यथा– **उत्पादपूर्वम्** इत्यादि। तत्र उत्पादप्रतिपादकं पूर्वमुत्पादपूर्वम्। तथाहि– तत्र सर्वद्रव्याणां सर्वपर्यायाणां चोत्पादमधिकृत्य प्ररूपणा क्रियते। आह च **चूर्णिकृत्**– **पढमं उप्पायपुव्वं, तत्थ सव्वदव्वाणं पज्जवाण य उप्पायमंगीकाउं पण्णवणा कया** [**नन्दीचू० सू० १०७ पृ० ७५**] इति। तस्य पदपरिमाणमेका पदकोटी १। द्वितीयम् **अग्रायणीयम्, अग्रं** परिमाणं तस्य **अयनं** गमनं परिच्छेद इत्यर्थः, तस्मै हितमग्रायणीयम्, सर्वद्रव्यादिपरिमाण-परिच्छेदकारीति भावार्थः। तथाहि– तत्र सर्वद्रव्याणां पर्यायाणां सर्वजीवविशेषाणां च परिमाणमुपवर्ण्यते। यत उक्तं **चूर्णिकृता**– **बिइयं अग्गेणीयं, तत्थ सव्वदव्वाण पज्जवाण सव्वजीवाण य अग्गं परिमाणं वन्निज्जइ त्ति अग्गेणीयं**[**नन्दीचू० सू० १०६ पृ० ७५**]। तस्य पदपरिमाणं षण्णवतिपदशतसहस्राणि २। तृतीयं पूर्वं **विरियं** ति पदैकदेशे पदसमुदायोपचाराद् वीर्यप्रवादम्, तत्र सकर्मेतराणां जीवानामजीवानां च वीर्यं प्रवदतीति वीर्यप्रवादम्, **कर्मणोऽण्** [*मलय० कृ० २।१५] इति अण्प्रत्ययः, तस्य पदपरिमाणं सप्ततिपदशतसहस्राणि ३। चतुर्थम् **अस्तिनास्तिप्रवादम्**, तत्र यद् वस्तु लोकेऽस्ति धर्मास्तिकायादि यच्च नास्ति खरशृङ्गादि तत् प्रवदतीत्यस्तिनास्तिप्रवादम्, अथवा सर्वं वस्तु स्वरूपेणास्ति पररूपेण नास्तीति प्रवदतीति अस्तिनास्तिप्रवादम्, तस्य पदपरिमाणं षष्टिः पदशतसहस्राणि ४। पञ्चमं **ज्ञानप्रवादम्**, ज्ञानं मतिज्ञानादिभेदभिन्नं पञ्चप्रकारं तत् सप्रपञ्चं वदतीति ज्ञानप्रवादम्, तस्य पदपरिमाणमेका पदकोटी पदेनैकेन न्यूना ५। षष्ठं **सत्यप्रवादम्, सत्यं** संयमो वचनं वा तत् सत्यं-संयमं वचनं वा प्रकर्षेण सप्रपञ्चं

वदतीति सत्यप्रवादम्, तस्य पदपरिमाणमेका पदकोटी षड्भिः पदैरभ्यधिका ६। सप्तमं पूर्वम् **आत्मप्रवादम्, आत्मानं** जीवमनेकधा नयमतभेदेन यत् प्रवदति तद् आत्मप्रवादम्, तस्य पदपरिमाणं षड्विंशतिपदकोटयः ७। अष्टमं **कर्मप्रवादम्, कर्म** ज्ञानावरणीयादिकमष्टप्रकारं तत् प्रकर्षेण प्रकृति-स्थित्यनुभाग-प्रदेशादिभिर्भेदैः सप्रपञ्चं वदति [तत्] कर्मप्रवादम्, तस्य पदपरिमाणमेका पदकोटी अशीतिश्च पदसहस्राणि ८। नवमं **पच्चक्खाणं** ति, अत्रापि पदैकदेशे पदसमुदायोपचारात् प्रत्याख्यानप्रवादमिति द्रष्टव्यम्, प्रत्याख्यानं सप्रभेदं यद् वदति तत् प्रत्याख्यानप्रवादम्, तस्य पदपरिमाणं चतुरशीतिपदलक्षाणि ९। दशमं **विद्यानुप्रवादम्** विद्याः-अनेकातिशयसम्पन्ना अनुप्रवदति-साधनानुकूल्येन सिद्धिप्रकर्षेण वदतीति विद्यानुप्रवादम्, तस्य पदपरिमाणमेका पदकोटी दश च पदलक्षाः १०। एकादशम् **अवन्ध्यम्**, वन्ध्यं नाम निष्फलम्, न विद्यते वन्ध्यं यत्र तदवन्ध्यम्, किमुक्तं भवति ?-यत्र सर्वेऽपि ज्ञान-तपः-संयमादयः शुभफलाः सर्वे च प्रमादादयोऽशुभफला यत्र वर्ण्यन्ते तदवन्ध्यं नाम, तस्य पदपरिमाणं षड्विंशतिपदकोटयः ११। द्वादशं **प्राणायुः, प्राणाः** पञ्चेन्द्रियाणि त्रीणि मानसादीनि बलानि उच्छ्वास-निःश्वासौ च **आयुश्च** प्रतीतम्, ततो यत्र प्राणा आयुश्च सप्रभेदमुपवर्ण्यन्ते तद् उपचारतः प्राणायुरित्युच्यते, तस्य पदपरिमाणमेका पदकोटी षट्पञ्चाशच्च पदलक्षाणि १२। त्रयोदशं **क्रियाविशालम्, क्रियाः** कायिक्यादयः संयमक्रियाश्छन्दक्रियादयश्च ताभिः प्ररूप्यमाणाभिर्विशालं क्रियाविशालम्, तस्य पदपरिमाणं नव पदकोटयः १३। चतुर्दशं **लोकबिन्दुसारम्, लोके** जगति श्रुतलोके वा अक्षरस्योपरि बिन्दुरिव **सारं** सर्वोत्तमं सर्वाक्षरसन्निपातलब्धिहेतुत्वाद् लोकबिन्दुसारम्, तस्य पदपरिमाणमर्द्धत्रयोदशपदकोटयः १४। **उप्पायपुव्वस्स णं** इत्यादि कण्ठ्यम्। नवरं **वस्तु** ग्रन्थविच्छेदविशेषः, तदेव लघुतरं क्षुल्लकं वस्तु, तानि चाऽऽदिमेष्वेव चतुर्षु पूर्वेषु, न शेषेषु। तथा चाह– **'आइल्लाण चउण्हं, सेसाणं चुल्लया णत्थि।' सेत्तं पुव्वगए** तदेतत् पूर्वगतम्॥

से किं तं इत्यादि। अथ कोऽयम् **अनुयोगः** ? अनुरूपोऽनुकूलो वा योगोऽनुयोगः-सूत्रस्य स्वेनाभिधेयेन सार्द्धमनुरूपः सम्बन्धः। स च द्विधा-

मूलप्रथमानुयोगश्च गण्डिकानुयोगश्च। इह **मूलं** धर्मप्रणयनात् तीर्थकरास्तेषां **प्रथमं** सम्यक्त्वावाप्तिलक्षणपूर्वभवादिगोचरोऽनुयोगो मूलप्रथमानुयोगः। इक्ष्वादीनां पूर्वापरपर्वपरिच्छिन्नो मध्यभागो गण्डिका, गण्डिकेव **गण्डिका** एकार्थाधिकारा ग्रन्थपद्धतिरित्यर्थः, तस्या अनुयोगो गण्डिकानुयोगः। **से किं तं** इत्यादि, अथ कोऽयं मूलप्रथमानुयोगः ?। आचार्य आह– मूलप्रथमानुयोगेन अथवा मूलप्रथमानुयोगे **णं** इति वाक्यालङ्कारे अर्हतां भगवतां **पूर्वभवाः** सम्यक्त्वभवादारभ्य पूर्वभवा देवलोकगमनानि तेषु पूर्वभवेषु देवभवेषु चाऽऽयुः देवलोकेभ्यश्च्यवनं तीर्थकरभवत्वेनोत्पादः ततो जन्मानि ततः शैलराजे सुरा-ऽसुरैर्विधीयमाना अभिषेका इत्यादि पाठसिद्धं यावन्निगमनम्। **से किं तं** इत्यादि, अथ कोऽयं गण्डिकानुयोगः ?। सूरिराह-गण्डिकानुयोगेन अथवा गण्डिकानुयोगे **णं** इति वाक्यालङ्कारे कुलकरगण्डिकाः, इह सर्वत्राप्यपान्तरालवर्त्तिन्यो बहव्यः प्रतिनियतैकार्थाधिकाररूपा गण्डिकास्ततो बहुवचनम्, कुलकराणां गण्डिकाः कुलकरगण्डिकाः, यासु कुलकराणां विमलवाहनादीनां पूर्वभवजन्म-नामादीनि सप्रपञ्चमुपवर्ण्यन्ते। एवं तीर्थकरगण्डिकादिष्वप्यभिधानवशतो भावनीयम्।

जाव चित्तंतरगंडियाउ त्ति चित्रा-अनेकार्था अन्तरे-ऋषभा-ऽजित-तीर्थकरापान्तराले गण्डिकाः चित्रान्तरगण्डिकाः। एतदुक्तं भवति– ऋषभा-ऽजित-तीर्थकरान्तरे ऋषभवंशसमुद्भूतभूपतीनां शेषगतिगमनव्युदासेन शिवगतिगमना-ऽनुत्तरोपपातप्राप्तिप्रतिपादिका गण्डिकाश्चित्रान्तरगण्डिकाः। तासां च प्ररूपणा पूर्वाचार्यैरेवमकारि–

इह **सुबुद्धि**नामा **सगर**चक्रवर्त्तिनो महामात्योऽष्टापदपर्वते **सगर**चक्रवर्त्तिसुतेभ्य **आदित्ययशः**प्रभृतीनां भगव**दृषभ**वंशजानां नरपतीनामेवं सङ्ख्यामाख्यातुमुपक्रमते स्म। आह च–

आइच्चजसाईणं, उसभस्स पउप्पए नरवईणं।
सगरसुयाण सुबुद्धी, इणमो संखं परिकहेइ॥१॥ [नन्दीचू० सू० ११० पृ० ७७]

आदित्ययशःप्रभृतयो भगवन्नाभेयवंशजास्त्रिखण्डभरतार्द्धमनुपाल्य पर्यन्ते पारमेश्वरीं

दीक्षामभिगृह्य तत्प्रभावतः सकलकर्मक्षयं कृत्वा चतुर्दश लक्षा निरन्तरं सिद्धिमगमन्, तत एकः सर्वार्थसिद्धे, ततो भूयोऽपि चतुर्दश लक्षा निरन्तरं निर्वाणे, ततोऽप्येकः सर्वार्थसिद्धमहाविमाने, एवं चतुर्दश-चतुर्दशलक्षान्तरितः सर्वार्थसिद्धावेकैकस्तावद् वक्तव्यो यावत् तेऽप्येकका असङ्ख्येया भवन्ति। ततो भूयश्चतुर्दश लक्षा नरपतीनां निरन्तरं निर्वाणे, ततो द्वौ सर्वार्थसिद्धे, ततः पुनरपि चतुर्दश लक्षा निरन्तरं निर्वाणे, ततो भूयोऽपि द्वौ सर्वार्थसिद्धे, एवं चतुर्दश-चतुर्दशलक्षान्तरितौ द्वौ द्वौ सर्वार्थसिद्धे तावद् वक्तव्यौ यावत् तेऽपि द्विक-द्विकसङ्ख्या असङ्ख्येया भवन्ति। एवं त्रिकत्रिकसङ्ख्यादयोऽपि प्रत्येकमसङ्ख्येयास्तावद् वक्तव्याः यावन्निरन्तरं चतुर्दश लक्षा निर्वाणे, ततः पञ्चाशत् सर्वार्थसिद्धे, ततो भूयोऽपि चतुर्दश लक्षा निर्वाणे, ततः पुनरपि पञ्चाशत् सर्वार्थसिद्धे, एवं पञ्चाशत्-पञ्चाशत्सङ्ख्याका अपि चतुर्दश-चतुर्दश-लक्षान्तरितास्तावद् वक्तव्या यावत्तेऽप्यसङ्ख्येया भवन्ति। उक्तं च–

चोद्दस लक्खा सिद्धा, निवईणेक्को य होइ सव्वट्ठे।
एवेक्केक्कट्ठाणे, पुरिसजुगा होंतऽसंखेज्जा॥१॥
पुणरवि चोद्दस लक्खा, सिद्धा निवईण दो वि सव्वट्ठे।
दुगठाणे वि असंखा, पुरिसजुगा होंति नायव्वा॥२॥
जाव य लक्खा चोद्दस, सिद्धा पण्णास होंति सव्वट्ठे।
पन्नासट्ठाणे वि उ, पुरिसजुगा होंतऽसंखेज्जा॥३॥
एगुत्तरा उ ठाणा, सव्वट्ठे चेव जाव पन्नासा।
एक्केक्कंतरठाणे, पुरिसजुगा होंतऽसंखेज्जा॥४॥ [नन्दीचू० सू० ११० पृ० ७७]

स्थापनाचेयम्–

[सिद्धौ लक्षाः]	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४
[सर्वार्थे लक्षाः]	१	२	३	४	५	६	७	८	९	१०	५०

ततोऽनन्तरं चतुर्दश लक्षा नरपतीनां निरन्तरं सर्वार्थसिद्धे एकः सिद्धौ, भूयश्चतुर्दश लक्षाः सर्वार्थे एकः सिद्धौ, एवं चतुर्दश-चतुर्दशलक्षान्तरित एकैकः सिद्धौ तावद्वक्तव्यो यावत् तेऽप्येकका असङ्ख्येया भवन्ति। ततो भूयोऽपि चतुर्दश लक्षा नरपतीनां निरन्तरं सर्वार्थसिद्धे। ततो द्वौ निर्वाणे, ततः पुनरपि चतुर्दश लक्षाः सर्वार्थसिद्धे ततो

भूयोऽपि द्वौ निर्वाणे, एवं चतुर्दश-चतुर्दशलक्षान्तरितौ द्वौ द्वौ निर्वाणे तावद् वक्तव्यौ यावत् तेऽपि द्विकद्विकसङ्ख्या असङ्ख्येया भवन्ति। एवं त्रिकत्रिकसङ्ख्यादयोऽपि यावत् पञ्चाशत्पञ्चाशत्सङ्ख्याश्चतुर्दश-चतुर्दशलक्षान्तरिताः सिद्धौ प्रत्येकमसङ्ख्येया वक्तव्याः। उक्तं च-

विवरीयं सव्वट्ठे, चोद्दस लक्खा उ निव्वुओ एगो।
स च्चेव य परिवाडी, पन्नासा जाव सिद्धीए॥१॥ [नन्दीचू० सू० ११० पृ० ७७]

स्थापना चेयम्–

१	२	३	४	५	६	७	८	९	१०	५०
१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४

ततः परं द्वे लक्षे नरपतीनां निरन्तरं निर्वाणे ततो द्वे लक्षे निरन्तरं सर्वार्थसिद्धे, ततस्तिस्रो लक्षा निर्वाणे ततो भूयोऽपि तिस्रो लक्षाः सर्वार्थसिद्धे, ततश्चतस्रो लक्षा निर्वाणे ततः पुनरपि चतस्रो लक्षाः सर्वार्थसिद्धे, एवं पञ्च पञ्च षट् षट् यावदुभयत्राप्यसङ्ख्येया असङ्ख्येया लक्षा वक्तव्याः। आह च–

तेण पर दुलक्खाई दो दो ठाणा य समग वच्चंति।
सिवगइ-सव्वट्ठेहिं, इणमो तेसिं विही होइ॥१॥
दो लक्खा सिद्धीए, दो लक्खा नरवईण सव्वट्ठे।
एवं तिलक्ख चउ पंच, जाव लक्खा असंखेज्जा॥२॥ [नन्दीचू० सू० ११० पृ० ७७]

स्थापना–

२	३	४	५	६	७	८	९	१०
२	३	४	५	६	७	८	९	१०

ततः परं चतस्रश्चित्रान्तरगण्डिकाः। तद्यथा-प्रथमा एकादिका एकोत्तरा, द्वितीया एकादिका द्व्युत्तरा, तृतीया एकादिका त्र्युत्तरा, चतुर्थी त्र्यादिका द्व्यादिविषमोत्तरा। आह च–

सिवगइ-सव्वट्ठेहिं, चित्तंतरगंडिया तओ चउरो।
एगा एगुत्तरिया, एगाइ बिउत्तरा बिइया॥१॥
एगाइ तिउत्तरगा, तिगादि विसमुत्तरा चउत्थी उ। [नन्दीचू० सू० ११० पृ० ७७]

तत्र प्रथमा भाव्यते– प्रथममेकः सिद्धौ, ततो द्वौ सर्वार्थसिद्धे, ततस्त्रयः सिद्धौ, ततश्चत्वारः सर्वार्थे, ततः पञ्च सिद्धौ, ततः षट् सर्वार्थे, एवमेकोत्तरया वृद्ध्या शिवगतौ सर्वार्थे च तावद् वक्तव्यं यावदुभयत्राप्यसङ्ख्येया भवन्ति। उक्तं च–

पढमाए सिद्धेक्को, दोन्नि य सव्वट्ठसिद्धम्मि॥२॥
तत्तो तिन्नि नरिंदा, सिद्धा चत्तारि होंति सव्वट्ठे।
इय जाव असंखेज्जा, सिवगति-सव्वट्ठसिद्धेहिं॥३॥ [नन्दीचू० सू० ११० पृ० ७७]

स्थापना चेयम्–

१	३	५	७	९	११	१३	१५	१७	१९
२	४	६	८	१०	१२	१४	१६	१८	२०

सम्प्रति द्वितीया भाव्यते– तत ऊर्द्ध्वमेकः सिद्धौ, त्रयः सर्वार्थे, ततः पञ्च सिद्धौ, सप्त सर्वार्थे, ततो नव सिद्धौ, एकादश सर्वार्थे, ततः त्रयोदश सिद्धौ, पञ्चदश सर्वार्थे, एवं द्व्युत्तरया वृद्ध्या शिवगतौ सर्वार्थे च तावद्वक्तव्यं यावदुभयत्राप्यसङ्ख्येया भवन्ति। उक्तं च–

ताहे बिउत्तराए, सिद्धेक्को तिन्नि होंति सव्वट्ठे।
एवं पंच य सत्त य, जाव असंखेज्ज दो वि त्ति॥१॥ [नन्दीचू० सू० ११० पृ० ७७]

स्थापना चेयम्–

१	५	९	१३	१७	२१	२५
३	७	११	१५	१९	२३	२७

सम्प्रति तृतीया भाव्यते-ततः परमेकः सिद्धौ, चत्वारः सर्वार्थे, ततः सप्त सिद्धौ, दश सर्वार्थे, ततस्त्रयोदश सिद्धौ, षोडश सर्वार्थे, एवं त्र्युत्तरया वृद्ध्या शिवगतौ सर्वार्थे च क्रमेण तावदवसेयं यावदुभयत्राप्यसङ्ख्येया गता भवन्ति। उक्तं च–

एग चउ सत्त दसगं, जाव असंखेज्ज होंति ते दो वि।
सिवगति-सव्वट्ठेहिं, तिउत्तराए उ नायव्वा॥१॥ [नन्दीचू० सू० ११० पृ० ७७]

स्थापना चेयम्–

१	७	१३	१९	२५	३१	३७	४३	४९	५५
४	१०	१६	२२	२८	३४	४०	४६	५२	५८

सम्प्रति चतुर्थी भाव्यते, सा च विचित्रा, ततस्तस्याः परिज्ञानार्थमयमुपायः पूर्वाचार्यैर्दर्शितः- इह एकोनत्रिंशत्सङ्ख्यास्त्रिका ऊर्द्ध्वाधः परिपाट्या पट्टिकादौ स्थाप्यन्ते, तत्र प्रथमे त्रिके न किञ्चिदपि प्रक्षिप्यते, द्वितीये द्वौ प्रक्षिप्येते, तृतीये पञ्च, चतुर्थे नव, पञ्चमे त्रयोदश, षष्ठे सप्तदश, सप्तमे द्वाविंशतिः, अष्टमे षट्, नवमे अष्टौ, दशमे द्वादश, एकादशे चतुर्दश, द्वादशेऽष्टाविंशतिः, त्रयोदशे षड्विंशतिः, चतुर्दशे पञ्चविंशतिः, पञ्चदशे एकादश, षोडशे त्रयोविंशतिः, सप्तदशे सप्तचत्वारिंशत्, अष्टादशे सप्ततिः, एकोनविंशे सप्तसप्ततिः, विंशे एकः, एकविंशे द्वौ, द्वाविंशे सप्ताशीतिः, त्रयोविंशे एकसप्ततिः, चतुर्विंशे द्विषष्टिः, पञ्चविंशे एकोनसप्ततिः, षड्विंशे चतुर्विंशतिः, सप्तविंशे षट्चत्वारिंशत्, अष्टाविंशे शतम्, एकोनत्रिंशे षड्विंशतिः। उक्तं च–

ताहे तियगाइविसमुत्तराए[1], अउणतीसं तु तियग ठावेउं।
पढमे नत्थि उ खेवो, सेसेसु इमो भवे खेवो॥१॥
दुग पण नवगं तेरस, सत्तरस दुवीस छच्च अट्ठेव।
बारस चउदस तह अट्ठवीस छव्वीस पणुवीसा॥२॥
एक्कारस तेवीसा, सीयाला सयरि सत्तहत्तरिया।
इग दुग सत्तासीई, एगत्तरिमेव बावट्ठी॥३॥
अउणत्तरि चउवीसा, छायाल सयं तहेव छव्वीसा।
एए रासिक्खेवा, तिगअंतंता जहाकमसो॥४॥ [नन्दीचू० सू० ११० पृ० ७८]

एतेषु च राशिषु प्रक्षिप्तेषु यद् यद् भवति तावन्तस्तावन्तः क्रमेण सिद्धौ सर्वार्थे चेत्येवंरूपेण वेदितव्याः। तद्यथा– त्रयः सिद्धौ पञ्च सर्वार्थे, ततः सिद्धावष्टौ द्वादश सर्वार्थे, ततः षोडश सिद्धौ सर्वार्थे विंशतिः, ततः पञ्चविंशतिः सिद्धौ नव सर्वार्थे, तत एकादश सिद्धौ पञ्चदश सर्वार्थे, ततः सप्तदश सिद्धौ एकत्रिंशत् सर्वार्थे, तत एकोनत्रिंशत् सिद्धौ अष्टाविंशतिः सर्वार्थे, ततः सिद्धौ चतुर्दश षड्विंशतिः सर्वार्थे, ततः पञ्चाशत् सिद्धौ त्रिसप्ततिः सर्वार्थे, ततोऽशीतिः सिद्धौ चत्वारः सर्वार्थे, तत पञ्च

१. °इबिउत्तराए इति नन्दीचूर्णौ (पृ० ७८) नन्दीहारिभद्र्यां (पृ० ९०) च पाठः॥

सिद्धौ नवतिः सर्वार्थे, ततश्चतुःसप्ततिर्मुक्तौ पञ्चषष्टिः सर्वार्थसिद्धे, ततः सिद्धौ द्विसप्ततिः सप्तविंशतिः सर्वार्थे, [ततः] एकोनपञ्चाशद् मुक्तौ त्र्युत्तरं शतं सर्वार्थे, तत एकोनत्रिंशत् सिद्धौ। उक्तं च–

सिवगइ-सव्वट्ठेहिं, दो दो ठाण विसमुत्तरा नेया।
जाव उणतीसठाणे, गुणतीसं पुण छवीसाए॥१॥ [नन्दीचू० सू० ११० पृ० ७७]

अत्र 'जाव' इत्यादि यावदेकोनत्रिंशत्तमे स्थाने त्रिकरूपे षड्विंशतौ प्रक्षिप्तायामेकोनत्रिंशद् भवति। स्थापना चेयम्–

३	८	१६	२५	११	१७	२९	१४	५०	८०	५	७४	७२	४९	२९
५	१२	२०	९	१५	३१	२८	२६	७३	४	९०	६५	२७	१०३	०

एवं द्व्यादिविषमोत्तरा गण्डिका असङ्ख्येयास्तावद् वक्तव्या यावदजितस्वामिपिता जितशत्रुः समुत्पन्नः। नवरं पाश्चात्त्यायां पाश्चात्त्यायां गण्डिकायां यदन्त्यमङ्कस्थानं तदुत्तरस्यामुत्तरस्यामादिमं द्रष्टव्यम्। तथा प्रथमायां गण्डिकायामादिममङ्कस्थानं सिद्धौ, द्वितीयस्यां सर्वार्थे, तृतीयस्यां सिद्धौ, चतुर्थ्यां सर्वार्थे, एवमसङ्ख्येयास्वपि गण्डिकास्वादिमान्यङ्कस्थानानि क्रमेणैकान्तरितानि शिवगतौ सर्वार्थे च वेदितव्यानि। एतदेव दिग्मात्रप्रदर्शनतो भाव्यते– तत्र प्रथमायां गण्डिकायामन्त्यमङ्कस्थानमेकोनत्रिंशत्, तत एकोनत्रिंशद्वारान् सा एकोनत्रिंशदूर्ध्वाधः क्रमेण स्थाप्यते, तत्र प्रथमेऽङ्के नास्ति प्रक्षेपः, द्वितीयादिषु चाङ्केषु **'दुग पण नवगं तेरस'** इत्यादयः क्रमेण प्रक्षेपणीया राशयः प्रक्षिप्यन्ते, तेषु च प्रक्षिप्तेषु सत्सु यद् यत् क्रमेण भवति तावन्तस्तावन्तः क्रमेण सर्वार्थे सिद्धौ सर्वार्थे इत्येवं वेदितव्याः, तद्यथा-एकोनत्रिंशत् सर्वार्थे सिद्धावेकत्रिंशत्, ततश्चतुस्त्रिंशत् सर्वार्थे सिद्धावष्टात्रिंशत्, ततो द्विचत्वारिंशत् सर्वार्थे षट्चत्वारिंशत् सिद्धौ, तत एकपञ्चाशत् सर्वार्थे पञ्चत्रिंशत् सिद्धौ, सप्तत्रिंशत् सर्वार्थे सिद्धावेकचत्वारिंशत्, त्रिचत्वारिंशत् सर्वार्थे सप्तपञ्चाशत् सिद्धौ, ततः पञ्चपञ्चाशत् सर्वार्थे चतुःपञ्चाशत् सिद्धौ, चत्वारिंशत् सर्वार्थे द्विपञ्चाशत् सिद्धौ, सर्वार्थे षट्सप्ततिः सिद्धौ नवनवतिः, षडुत्तरं शतं सर्वार्थे त्रिंशत् सिद्धौ, एकत्रिंशत् सर्वार्थे सिद्धौ

षोडशाधिकं शतम्, शतं सर्वार्थे सिद्धावेकनवतिः, सर्वार्थेऽष्टानवतिः त्रिपञ्चाशत् सिद्धौ, पञ्चसप्ततिः सर्वार्थे सिद्धावेकोनत्रिंशं शतम्, [ततः][1] पञ्चपञ्चाशत् सर्वार्थे। स्थापना चेयम्-

[सर्वार्थे]	२९	३४	४२	५१	३७	४३	५५	४०	७६	१०६	३१	१००	९८	७५	५५
[सिद्धौ]	३१	३८	४६	३५	४१	५७	५४	५२	९९	३०	११६	९१	५३	१२९	०

एषा द्वितीया गण्डिका। अस्यां च गण्डिकायामन्त्यमङ्कस्थानं पञ्चपञ्चाशत्, ततस्तृतीयस्यां गण्डिकायामिदमेवादिममङ्कस्थानम्, ततः पञ्चपञ्चाशदेकोनत्रिंशद्वारान् स्थाप्यते, तत्र प्रथमेऽङ्के नास्ति प्रक्षेपः, द्वितीयादिषु चाङ्केषु क्रमेण द्विक-पञ्च-नवक-त्रयोदशादयः पूर्वोक्तराशयः क्रमेण प्रक्षेपणीयाः प्रक्षिप्यन्ते[2], इह चाऽऽदिममङ्कस्थानं सिद्धौ, ततस्तेषु प्रक्षेपणीयेषु राशिषु प्रक्षिप्तेषु सत्सु यद् यत् क्रमेण भवति तावन्तस्तावन्तः प्रथमादङ्कादारभ्य सिद्धौ सर्वार्थे इत्येवं क्रमेण वेदितव्याः। एवमन्यास्वपि गण्डिकासूक्तप्रकारेण भावनीयम्। उक्तं च-

विसमुत्तरा य पढमा, एवमसंखविसमुत्तरा नेया।
सव्वत्थ वि अंतिल्लं, अन्नाए आइमं ठाणं॥१९॥
अउणत्तीसं वारा, ठावेउं नत्थि पढमए क्खेवो।
सेसे अडवीसाए, सव्वत्थ दुगाइओ खेवो॥२०॥
सिवगइ पढमादीए, बीयाए तह य होइ सव्वट्ठे।
इय एगंतरियाइं, सिवगइ-सव्वट्ठठाणाइं॥२१॥
एवमसंखेज्जाओ, चित्तंतरगंडिया मुणेयव्वा।
जाव जियसत्तुराया, अजियजिणपिया समुप्पन्नो॥२२॥ [नन्दीचू० सू० ११० पृ० ७८]

तथा **अमर** इत्यादि, विविधेषु **परिवर्त्तेषु** भवभ्रमणेषु, जन्तूनामिति गम्यते, अमर-नर-तिर्यङ्-निरयगतिगमनम्, एवमादिका गण्डिका बहव आख्यायन्ते। **सेत्तं**

---

१. 'ततः' जेसं० मध्ये एव वर्तते ॥ २. अत्र हस्तलिखितादर्शेषु स्थापना लिखिता नास्ति तथापि **श्रीपुण्यविजयजी** महाभागैः टिप्पनरूपेण ईदृशी स्थापना अत्र दर्शिताऽस्ति-

सिद्धौ	५५	६०	६८	७७	६३	६९	८१	६६	१०२	१३२	५७	१२६	१२४	१०१	८१
सर्वार्थे	५७	६४	७२	६१	६७	८३	८०	७८	१२५	५६	१४२	१११	७९	१५५	०

गंडियाणुयोगे सोऽयं गण्डिकानुयोगः॥

से किं तं इत्यादि, अथ कास्ताश्चूलाः ?, इह चूला शिखरमुच्यते, यथा मेरौ चूला, तत्र चूला इव **चूलाः** दृष्टिवादे परिकर्म-सूत्र-पूर्वानुयोगोक्ता-ऽनुक्तार्थसङ्ग्रहपरा ग्रन्थपद्धतयः। तथा चाह **चूर्णिकृत्**– **दिट्ठिवाए जं परिकम्म-सुत्त-पुव्वाणुयोगे न भणियं तं चूलासु भणियं [नन्दीचू० सू० १११ पृ० ७९]** ति। अत्र सूरिराह– चूला आदिमानां चतुर्णां पूर्वाणाम्, शेषाणि पूर्वाण्यचूलकानि। ता एव चूला आदिमानां चतुर्णां पूर्वाणां प्राक् पूर्ववक्तव्यताप्रस्तावे चूलावस्तूनीति भणिताः। आह च **चूर्णिकृत्**– **ताओ य चूलाओ आइल्लपुव्वाणं चउण्हं चुल्लवत्थू भणिता[नन्दीचू० सू० १११ पृ० ७९]**॥ एताश्च सर्वस्यापि दृष्टिवादस्योपरि किल स्थापितास्तथैव च पठ्यन्ते, ततः श्रुतपर्वते चूला इव राजन्ते इति चूला इत्युक्ताः। तथा चोक्तं **चूर्णिकृता**– **सव्वुपरि ट्ठिया पढिज्जंति य अतो ते सुयपव्वयचूला इव चूला [नन्दीचू० सू० १११ पृ० ७९]** इति। तासां च चूलानामियं सङ्ख्या– प्रथमपूर्वसत्काश्चतस्रः, द्वितीयपूर्वसत्का द्वादश, तृतीयपूर्वसत्का अष्टौ, चतुर्थपूर्वसत्का दश। तथा च पूर्वमुक्तं सूत्रे– **चत्तारि दुवालस अट्ठ चेव दस चेव चूलवत्थूणि। आइल्लाण चउण्हं, सेसाणं चूलिया नत्थि॥१॥ [नन्दीसू० १११ पृ० ७९]**

सर्वसङ्ख्यया चूलिकाश्चतुस्त्रिंशत्। **सेत्तं चूलिय** त्ति अथैताश्चूलिकाः॥

दिट्ठिवायस्स णं इत्यादि, पाठसिद्धम्। नवरं **संखेज्जा वत्थु** त्ति सङ्ख्येयानि वस्तूनि, तानि च पञ्चविंशत्युत्तरे द्वे शते, कथम् ? इति चेत्, उच्यते-इह प्रथमे पूर्वे दश वस्तूनि, द्वितीये चतुर्दश, तृतीये अष्टौ, चतुर्थेऽष्टादश, पञ्चमे द्वादश, षष्ठे द्वे, सप्तमे षोडश, अष्टमे त्रिंशत्, नवमे विंशतिः, दशमे पञ्चदश, द्वादश एकादशे, द्वादशे त्रयोदश, त्रिंशत् त्रयोदशे, चतुर्दशे पञ्चविंशतिः। तथा च सूत्रे प्राक् पूर्ववक्तव्यतायामुक्तम्–

दस चोद्दस अट्ठऽट्ठारस बारस दुवे य मूलवत्थूणि।
सोलस तीसा वीसा,पन्नरस अणुप्पवायम्मि॥१॥
बारस एक्कारसमे, बारसमे तेरसेव वत्थूणि।
तीसा पुण तेरसमे, चोद्दसमे पण्णवीसा उ॥२॥ [नन्दीसू० १०७ पृ० ७५]

सर्वसङ्ख्यया चामूनि द्वे शते पञ्चविंशत्यधिके। तथा सङ्ख्येयानि चूलावस्तूनि, तानि च चतुस्त्रिंशत्सङ्ख्याकानि॥ साम्प्रतमोघतो द्वादशाङ्गाभिधेयमुपदर्शयति–

[सू० ११५] इच्चेयम्मि दुवालसंगे गणिपिडगे अणंता भावा अणंता अभावा, अणंता हेऊ अणंता अहेऊ, अणंता कारणा अणंता अकारणा, अणंता जीवा अणंता अजीवा, अणंता भवसिद्धिया अणंता अभवसिद्धिया, अणंता सिद्धा अणंता असिद्धा पण्णत्ता। संगहणिगाहा–

भावमभावा हेउमहेऊ कारणमकारणा चेव।
जीवाऽजीवा भवियमभविया सिद्धा असिद्धा य॥८२॥

[सू० ११६] इच्चेयं दुवालसंगं गणिपिडगं तीए काले अणंता जीवा आणाए विराहेत्ता चाउरंतं संसारकंतारं अणुपरियट्टिंसु। इच्चेयं दुवालसंगं गणिपिडगं पडुप्पण्णकाले परित्ता जीवा आणाए विराहेत्ता चाउरंतं संसारकंतारं अणुपरियट्टंति। इच्चेयं दुवालसंगं गणिपिडगं अणागते काले अणंता जीवा आणाए विराहेत्ता चाउरंतं संसारकंतारं अणुपरियट्टिस्संति।

[सू० ११७] इच्चेयं दुवालसंगं गणिपिडगं अतीतकाले अणंता जीवा आणाए आराहेत्ता चाउरंतं संसारकंतारं वितिवइंसु। इच्चेयं दुवालसंगं गणिपिडगं पडुप्पण्णकाले परित्ता जीवा आणाए आराहेत्ता चाउरंतं संसारकंतारं वितिवयंति। इच्चेयं दुवालसंगं गणिपिडगं अणागए काले अणंता जीवा आणाए आराहेत्ता चाउरंतं संसारकंतारं वितिवतिस्संति।

[सू० ११८] इच्चेयं दुवालसंगं गणिपिडगं ण कयाइ णाऽऽसी ण कयाइ ण भवति ण कयाइ ण भविस्सति, भुविं च भवति य भविस्सति य, धुवे णिअए सासते अक्खए अव्वए अवट्ठिए णिच्चे। से जहाणामए पंचत्थिकाए ण कयाति णाऽऽसी ण कयाति णत्थि ण कयाइ ण भविस्सति, भुविं च भवति य भविस्सति य, धुवा णीया सासता अक्खया अव्वया अवट्ठिया णिच्चा। एवामेव दुवालसंगे गणिपिडगे ण कयाइ णाऽऽसी ण कयाइ णत्थि ण कयाइ ण भविस्सति, भुविं च भवति य भविस्सति य, धुवे णीते सासते

अक्खए अव्वए अवट्ठिए णिच्चे।

[सू० ११९] से समासतो चउव्विहे पण्णत्ते, तंजहा-दव्वओ खेत्तओ कालओ भावओ। तत्थ दव्वओ णं सुयणाणी उवउत्ते सव्वदव्वाइं जाणइ पासइ। खेत्तओ णं सुयणाणी उवउत्ते सव्वं खेत्तं जाणइ पासइ। कालओ णं सुयणाणी उवउत्ते सव्वं कालं जाणइ पासइ। भावओ णं सुयणाणी उवउत्ते सव्वे भावे जाणइ पासइ।

[इच्चेयम्मि इत्यादि।] 'इत्येतस्मिन् द्वादशाङ्गे गणिपिटके' एतत् पूर्ववदेव व्याख्येयम्, अनन्ताः **भावाः** जीवादयः पदार्थाः प्रज्ञप्ता इति योगः, तथा **अनन्ता अभावाः** सर्वभावानां पररूपेणासत्त्वात् त एवानन्ता अभावा द्रष्टव्याः। तथाहि– स्व-परसत्ताभावा-ऽभावात्मकं वस्तुतत्त्वम्, यथा जीवो जीवात्मना भावरूपः, अजीवात्मना चाभावरूपः, अन्यथाऽजीवत्वप्रसङ्गात्, अत्र बहु वक्तव्यं तत्तु नोच्यते, ग्रन्थगौरवभयादिति। तथाऽनन्ताः **हेतवः** हिनोति-गमयति जिज्ञासितधर्मविशिष्टमर्थमिति हेतुः, ते चानन्ताः, तथाहि– वस्तुनोऽनन्ता धर्माः, ते च तत्तत्प्रतिबद्धधर्मविशिष्ट-वस्तुगमकास्ततोऽनन्ता हेतवो भवन्ति। यथोक्तहेतुप्रतिपक्षभूता अहेतवः, तेऽपि अनन्ताः। तथा अनन्तानि कारणानि' घट-पटादीनां निर्वर्त्तकानि मृत्पिण्ड-तन्त्वादीनि। अनन्तानि अकारणानि, सर्वेषामपि कारणानां कार्यान्तराण्यधिकृत्याकारणत्वात्। तथा **जीवाः** प्राणिनः, **अजीवाः** परमाणु-द्व्यणुकादयः, **भव्याः** अनादिपारिणामिक-सिद्धिगमनयोग्यतायुक्ताः, तद्विपरीता अभव्याः। **सिद्धाः** अपगतकर्ममलकलङ्काः, **असिद्धाः** संसारिणः, एते सर्वेऽप्यनन्ताः प्रज्ञप्ताः। इह भव्या-ऽभव्यानामानन्त्येऽभिहितेऽपि यत् पुनरसिद्धा अनन्ता इत्यभिहितं तत् सिद्धेभ्यः संसारिणामनन्तगुणताख्यापनार्थम्।

सम्प्रति द्वादशाङ्गविराधनाफलं त्रैकालिकमुपदर्शयति– **इच्चेयं** इत्यादि, इत्येतद् द्वादशाङ्गं गणिपिटकमतीते कालेऽनन्ता जीवाः **आज्ञया** यथोक्ताज्ञापरिपालनाऽभावतो विराध्य चतुरन्तं **संसारकान्तारं** विविधशारीर-मानसानेकदुःखविटपिशतसहस्रदुस्तरं भवगहनम् **अणुपरियट्टिंसु** अनुपरावृत्तवन्त आसन्। इह द्वादशाङ्गं सूत्रार्थोभयभेदेन

त्रिविधम्, द्वादशाङ्गमेव चाऽऽज्ञा, आज्ञाप्यते जन्तुगणो हितप्रवृत्तौ यया साऽऽज्ञेति व्युत्पत्तेः, ततश्चाज्ञाऽपि त्रिधा, तद्यथा– सूत्राज्ञा अर्थाज्ञा उभयाज्ञा च। सम्प्रति अमूषामाज्ञानां विराधनाश्चिन्त्यन्ते– तत्र यदाऽभिनिवेशवशतोऽन्यथा सूत्रं पठति तदा सूत्राज्ञाविराधना, सा च यथा **जमालि**प्रभृतीनाम्। यदा त्वभिनिवेशवशतोऽन्यथा द्वादशाङ्गार्थं प्ररूपयति तदाऽर्थाज्ञाविराधना, सा च **गोष्ठामाहिला**दीनामवसेया। यदा पुनरभिनिवेशवशतः श्रद्धाविहीनतया हास्यादितो वा द्वादशाङ्गस्य सूत्रमर्थं च विकुट्टयति तदा उभयाज्ञाविराधना, सा च दीर्घसंसारिणामभव्यानां वाऽनेकेषां विज्ञेया। अथवा पञ्चविधाचारपरिपालनशीलस्य परोपकारकरणैकरतस्य गुरोर्हितोपदेशवचनम् आज्ञा, तामन्यथा समाचरन् परमार्थतो द्वादशाङ्गं विराधयति। तथा चाह **चूर्णिकृत्**– **'अहवा आण त्ति पंचविहायारायरणसीलस्स गुरुणो हियोवएसवयणं आणा, तमन्नहा आयरंतेण गणिपिडगं विराहियं भवइ** [**नन्दीचू० सू० ११४ पृ० ८१**] त्ति।

तदेवमतीते काले विराधनाफलमुपदर्श्य सम्प्रति वर्त्तमाने काले दर्शयति- **इच्चेयं** इत्यादि सुगमम्, नवरं **परीत्ताः** इति परिमिता न त्वनन्ता असङ्ख्येया वा, वर्त्तमानकालचिन्तायां विराधकमनुष्याणां सङ्ख्येयत्वात्, **अणुपरियट्टंति** त्ति **अनुपरावर्त्तन्ते** भ्रमन्तीत्यर्थः। भविष्यति काले विराधनाफलमुपदर्शयति– **इच्चेयं** इत्यादि, इदमपि पाठसिद्धम्, नवरम् **[अणु]परियट्टिस्संति**त्ति अनुपरावर्त्तिष्यन्ते, पर्यटिष्यन्तीत्यर्थः। तदेवं विराधनाफलं त्रैकालिकमुपदर्श्य सम्प्रत्याराधनाफलं त्रैकालिकमुपदर्शयति- **इच्चेयं** इत्यादि सुगमम्, नवरम् **वईवइंसु** त्ति व्यतिक्रान्तवन्तः संसारकान्तारमुल्लङ्घ्य मुक्तिमवाप्ता इत्यर्थः, **वईवयंति** त्ति व्यतिक्रमन्ते, **वईवइस्संति** त्ति व्यतिक्रमिष्यन्ति।

एतच्च त्रैकालिकविराधनाफलमाराधनाफलं च द्वादशाङ्गस्य सदाऽवस्थायित्वे सति युज्यते, नान्यथा, ततः सदावस्थायित्वं तस्याऽऽह– **इच्चेयं** इत्यादि, इत्येतद् द्वादशाङ्गं गणिपिटकं न कदाचिन्नाऽऽसीत्, सर्वदैवाऽऽसीदिति भावः, अनादित्वात्, तथा न कदाचिन्न भवति, सर्वदैव वर्त्तमानकालचिन्तायां भवतीति भावः, सदैव भावात्, तथा न कदाचिन्न भविष्यति, किन्तु भविष्यच्चिन्तायां सदैव भविष्यतीति

प्रतिपत्तव्यम्, अपर्यवसितत्वात्। तदेवं कालत्रयचिन्तायां नास्तित्वप्रतिषेधं विधाय सम्प्रत्यस्तित्वं प्रतिपादयति– **भुविं च** इत्यादि, अभूत् भवति भविष्यति चेति। एवं त्रिकालावस्थायित्वाद् **ध्रुवं** मेर्वादिवत्। ध्रुवत्वादेव सदैव जीवादिषु पदार्थेषु प्रतिपादकत्वेन **नियतम्**, पञ्चास्तिकायेषु लोकवचनवत्। नियतत्वादेव च **शाश्वतं** शश्वद्भवनस्वभावम्। शाश्वतत्वादेव च सततं गङ्गा-सिन्धुप्रवाहप्रवृत्तावपि [पद्म-] पौण्डरीकह्रद इव वाचनादिप्रदानेऽपि **अक्षयं** नास्य क्षयोऽस्तीत्यक्षयम्। अक्षयत्वादेव च **अव्ययं** मानुषोत्तराद् बहिः समुद्रवत्। अव्ययत्वादेव सदैव स्वप्रमाणेऽ**वस्थितं** जम्बूद्वीपादिवत्। एवं च सदाऽवस्थानेन चिन्त्यमानं **नित्य**माकाशवत्। साम्प्रतमत्रैव दृष्टान्तमाह– **से जहानामए** इत्यादि, तद्यथानाम **पञ्चास्तिकायाः** धर्मास्तिकायादयः न कदाचिन्नाऽऽसन्नित्यादि पूर्ववत्, **एवमेव** इत्यादि निगमनं निगदसिद्धम्।

से समासओ इत्यादि, तद् द्वादशाङ्गं समासतश्चतुर्विधं प्रज्ञप्तम्। तद्यथा– द्रव्यतः क्षेत्रतः कालतो भावतश्च। तत्र द्रव्यतो 'णं' इति वाक्यालङ्कारे श्रुतज्ञानी उपयुक्तः सर्वद्रव्याणि जानाति पश्यति। अत्राह– ननु पश्यतीति कथम् ? न हि श्रुतज्ञानी श्रुतज्ञानज्ञेयानि सकलानि वस्तूनि पश्यति, नैष दोषः, उपमाया अत्र विवक्षितत्वात्, पश्यतीव पश्यति, तथाहि– मेर्वादीन् पदार्थानदृष्टानप्याचार्यः शिष्येभ्य आलिख्य दर्शयति ततस्तेषां श्रोतॄणामेवं बुद्धिरुपजायते-भगवानेष गणी साक्षात् पश्यन्निव व्याचष्टे इति। एवं क्षेत्रादिष्वपि भावनीयम्, ततो न कश्चिद् दोषः। **अन्ये** तु न पश्यतीति पठन्ति, तत्र चोद्यस्यानवकाश एव। श्रुतज्ञानी चेहाभिन्नदशपूर्वधरादिश्रुतकेवली परिगृह्यते, तस्यैव नियमतः श्रुतज्ञानबलेन सर्वद्रव्यादिपरिज्ञानसम्भवात्, तदारतस्तु ये श्रुतज्ञानिनस्ते सर्वद्रव्यादिपरिज्ञाने भजनीयाः, केचित् सर्वद्रव्यादि जानन्ति केचिन्नेति भावः। इत्थम्भूता च भजना मतिवैचित्र्याद् वेदितव्या। आह च **चूर्णिकृत्**– **आरओ पुण जे सुयनाणी ते सव्वदव्वनाण-पासणासु भइया, सा य भयणा मइविसेसओ जाणियव्व** [**नन्दीचू० सू० ११७ पृ० ८२**] त्ति।

सम्प्रति सङ्ग्रहगाथामाह–

[सू० १२०] अक्खर १, सण्णी २, सम्मं ३,
सादीयं ४, खलु सपज्जवसियं ५ च।
गमियं ६, अंगपविट्ठं ७, सत्त वि एए सपडिवक्खा॥८३॥
आगमसत्थग्गहणं, जं बुद्धिगुणेहिं अट्ठहिं दिट्ठं।
बिंति सुयणाणलंभं, तं पुव्वविसारया धीरा॥८४॥
सुस्सूसइ १, पडिपुच्छइ २, सुणेइ ३, गिण्हइ ४, य ईहए ५ यावि।
तत्तो अपोहए ६, वा, धारेइ ७, करेइ वा सम्मं ८॥८५॥
मूयं १, हुंकारं २, वा, बाढक्कार ३, पडिपुच्छ ४, वीमंसा ५।
तत्तो पसंगपारायणं ६, च परिणिट्ठ ७, सत्तमए॥८६॥
सुत्तत्थो खलु पढमो १, बीओ णिज्जुत्तिमीसिओ भणिओ २।
तइओ य णिरवसेसो ३, एस विही होइ अणुओगे॥८७॥
सेत्तं अंगपविट्ठं। सेत्तं सुयणाणं। सेत्तं परोक्खणाणं।

॥ सेत्तं णंदी सम्मत्ता॥

अक्खरसन्नी इत्यादि, गतार्था। नवरं सप्राप्येते पक्षाः सप्रतिपक्षाः। ते चैवम्– अक्षरश्रुतम् अनक्षरश्रुतमित्यादि॥ इदं च श्रुतज्ञानं सर्वातिशयरत्नकल्पं प्रायो गुर्वधीनं च, ततो विनेयजनानुग्रहार्थं यो यथा वाऽस्य लाभस्तं तथा दर्शयति–

आगम इत्यादि, आ-अभिविधिना सकलश्रुतविषयव्याप्तिरूपेण मर्यादया वा यथावस्थितप्ररूपणारूपया गम्यन्ते-परिच्छिद्यन्तेऽर्था येन स आगमः; स चैवं व्युत्पत्त्या अवधि-केवलादिलक्षणोऽपि भवति ततस्तद्व्यवच्छेदार्थं विशेषणान्तरमाह– **शास्त्र** इति शिष्यतेऽनेनेति शास्त्रम्, आगमः[1] शास्त्रमागमशास्त्रम्; आगमग्रहणेन षष्टितन्त्रादिकुशास्त्रव्यवच्छेदः, तेषां यथावस्थितार्थप्रकाशनाभावतोऽनागमत्वात्; आगमशास्त्रस्य ग्रहणम् आगमशास्त्रग्रहणं यद् **बुद्धिगुणैः** वक्ष्यमाणैः कारणभूतैरष्टभिर्दृष्टं **तदेव** ग्रहणं श्रुतज्ञानस्य लाभं ब्रुवते पूर्वेषु विशारदाः-विपश्चितः **धीराः** व्रतपरिपालने स्थिराः। किमुक्तं भवति ?– यदेव जिनप्रणीतप्रवचनार्थपरिज्ञानं तदेव परमार्थतः श्रुतज्ञानम्, न

१. आगमरूपं शास्त्र° पा० देसं० मांसं० ॥

शेषमिति॥

बुद्धिगुणैरष्टभिरित्युक्तं ततस्तानेव बुद्धिगुणानाह– **सुस्सूसइ** इत्यादि, पूर्वं तावत् **शुश्रूषते** विनययुक्तो गुरुवदनारविन्दाद् विनिर्गच्छद् वचनं श्रोतुमिच्छति। यत्र शङ्कितं भवति तत्र भूयोऽपि विनयनम्रतया वचसा गुरुमनः प्रह्लादयन् पृच्छति। पृष्टे च सति यद् गुरुः कथयति तत् सम्यग् व्याक्षेपपरिहारेण सावधानः शृणोति। श्रुत्वा चार्थरूपतया गृह्णाति। गृहीत्वा च **ईहते** पूर्वापराविरोधेन पर्यालोचयति। **च**शब्दः समुच्चयार्थः, **अपि**शब्दः पर्यालोचयन् किञ्चित् स्वबुद्ध्याऽप्युत्प्रेक्षते इति सूचनार्थः। ततः पर्यालोचनानन्तरम् **अपोहते** एवमेतद् यदादिष्टमाचार्येण नान्यथेत्यवधारयति। ततस्तमर्थं निश्चितं स्वचेतसि विस्मृत्यभावार्थं सम्यग् धारयति। करोति च **सम्यग्** यथोक्तमनुष्ठानम्, यथोक्तानुष्ठानमपि श्रुतज्ञानप्राप्तिहेतुः तदावरणकर्मक्षयोपशम-निमित्तत्वात्॥

तदेवं गुणा व्याख्याताः, सम्प्रति यत् शुश्रूषते इत्युक्तं तत्र श्रवणविधिमाह– **मूयं** इत्यादि, **मूकम्** इति प्रथमतो मूकं शृणुयात्, किमुक्तं भवति ?– प्रथमश्रवणे संयतगात्रस्तूष्णीमासीत। ततो द्वितीये श्रवणे हुङ्कारं दद्यात्, वन्दनं कुर्यादित्यर्थः। ततस्तृतीये बाढक्कारं कुर्यात्, बाढमेवमेतद् नान्यथेति। ततश्चतुर्थश्रवणे तु गृहीतपूर्वापरसूत्राभिप्रायो मनाक् प्रतिपृच्छां कुर्यात्, कथमेतदिति ?। पञ्चमे **मीमांसाम्**, प्रमाणजिज्ञासां कुर्यादिति भावः। षष्ठे श्रवणे तदुत्तरोत्तरगुणप्रसङ्गः पारगमनं चास्य भवति। ततः सप्तमे श्रवणे परिनिष्ठा, गुरुवदनुभाषते, एवं सप्तमे श्रवणे इति भावः।

एवं तावच्छ्रवणविधिरुक्तः, सम्प्रति व्याख्यानविधिमभिधित्सुराह– **सुत्तत्थो** इत्यादि, प्रथमोऽनुयोगः **सूत्रार्थः** सूत्रार्थप्रतिपादनपरः, **खलु**शब्द एवकारार्थः, स चावधारणे, ततोऽयमर्थः-गुरुणा प्रथमोऽनुयोगः सूत्रार्थाभिधानलक्षण एव कर्त्तव्यः, मा भूत् प्राथमिकविनेयानां मतिमोहः। द्वितीयोऽनुयोगः सूत्रस्पर्शिकनिर्युक्तिमिश्रितो भणित-स्तीर्थकर-गणधरैः, सूत्रस्पर्शिकनिर्युक्तिमिश्रितं द्वितीयमनुयोगं गुरुर्विदध्यादित्याख्यातं तीर्थकर-गणधरैरिति भावः। तृतीयश्चानुयोगः **निरवशेषः** प्रसक्ता-ऽनुप्रसक्तप्रति-पादनलक्षण इति। **एषः** उक्तलक्षणो विधिर्भवति **अनुयोगे** व्याख्यायाम्। आह–

परिनिष्ठा सप्तमे इत्युक्तम्, त्रयश्चानुयोगप्रकाराः तदेतत् कथम् ?, उच्यते, त्रयाणामनुयोगानामन्यतमेन केनचित् प्रकारेण भूयो भूयो भाव्यमानेन सप्त वाराः श्रवणं कार्यते ततो न कश्चिद्दोषः; अथवा कश्चिन्मन्दमतिविनेयमधिकृत्यैतदुक्तं द्रष्टव्यम्, न पुनरेष एव सर्वत्र श्रवणविधिनियमः, उद्घटितज्ञविनेयानां सकृच्छ्रवणत एवाशेषग्रहणदर्शनादिति कृतं प्रसङ्गेन। **सेत्तं** इत्यादि, तदेतत् श्रुतज्ञानम्, तदेतत् परोक्षमिति।

नन्द्यध्ययनं पूर्वम्, प्रकाशितं येन विषमभावार्थम्।
तस्मै श्री**चूर्णिकृते**, नमोऽस्तु विदुषे परोपकृते॥१॥
मध्येसमस्तभूपीठम्, यशो यस्याभिवर्द्धते।
तस्मै श्री**हरिभद्राय**, नमष्टीकाविधायिने॥२।
वृत्तिर्वा चूर्णिर्वा, रम्याऽपि न मन्दमेधसां योग्या।
अभवदिह तेन तेषामुपकृतये यत्न एष कृतः॥३॥
बह्वर्थमल्पशब्दम्, **नन्द्यध्ययनं** विवृण्वता कुशलम्।
यदवापि **मलयगिरि**णा, सिद्धिं तेनाश्नुतां लोकः॥४॥
अर्हन्तो मङ्गलं मे स्युः, सिद्धाश्च मम मङ्गलम्।
साधवो मङ्गलं सम्यग्, जैनो धर्मश्च मङ्गलम्॥५॥
इति श्री**मलयगिरि**विरचिता **नन्द्यध्यनटीका** समाप्ता॥ ग्रन्थाग्रं ७७३२॥[१]

---

१. **खं** = सं० १२९२ वर्षे वैशाख सुदि १३ अद्येह **वी**जापुरे श्रावकपोषधशालायां श्रीदेवभद्रगणि पं० मलयकीर्त्ति पं० अजितप्रभगणिप्रभृतीनां व्याख्यानतः संसारासारतां विचिंत्य सर्वज्ञोक्तं शास्त्रं प्रमाणमिति मनसि ज्ञात्वा सा० धणपालसुत सा० रत्नपाल ठ० गजसुत ठ० विजयपाल श्रे० देल्हासुत श्रे० बील्हण महं० जिणदेव महं० वीकलसुत ठ० आसपाल श्रे० साल्हा ठ० सहजा सुत ठ० अरसीह सा० राहडसुत सा० लाहडप्रभृति समस्तश्रावकैः मोक्षफलप्रार्थकैः समस्तचतुर्विधसंघस्य पठनार्थं वाचनार्थं च समर्पणाय लिखापितम्॥छ॥ [ठ० = ठकुरसिंहः]

दे = अंकतोऽपि द्वात्रिंशदधिकसप्तशतानि सप्तसहस्राः। सं० १४७८ वर्षे श्रावणवदि २ भौमे अद्येह... लिखितं। शुभं भवतु।" श्री सर्वविदे नमः।

यः श्री धर्ममहारथेन जगतीमुद्धृत्य सत्यार्थतां भग्नां दुर्गतमे युगादिसमये पंकाकुले वर्त्मनि।
स्वं नाम स्फुटमानिनाय तुलनातिक्रान्तकारुण्यभूर्देवः श्रीवृषभप्रभुः प्रभवतु प्रेष्टार्थसिद्धयै सताम्॥१॥

विश्वोद्द्योति स्फुरदुरुयशाः श्रीजिनेन्द्रद्रढीयो भक्तिर्मुक्तामणिरपमलः साधुरूकेशवंशे।
श्रीमान् रामः समजनि पुरा प्रेयसी तस्य शस्या जज्ञेऽनन्योपमगुणगणैर्भूषितालक्ष्मीदेवी ॥२॥

जज्ञे श्रीरणमल्लनामनृपतेर्मान्यो वदान्याग्रणीः सूनुः संघपतिस्तयोः शुभमतिः श्रीवत्सराजाह्वयः।
श्रीमद्धर्ममयीर्यदीयचरितश्रेणीरुदारानके श्रावं श्रावमविश्रमं कृतधियो मूर्द्धानमाधुन्वते॥३॥
राणीरमुष्य रमणीपुरुषोत्तमस्य लक्ष्मीरिवाभवदनुत्तरशीललक्ष्मीः।
यस्यार्विभूषणविधिर्व्यवहारमात्रमासीदसीमगुणरत्नविभूषितायाः॥४॥
चत्वारस्तनयास्तयोर्नययुषः ख्याताः क्षमायां गुणश्रेणीभिः सुभगंभविष्णुवपुषः सौभाग्यभाग्यादिभिः।
तेषु श्रीजिनशासनोन्नतिवनीनव्यांबुवाहोपमः पूर्वः सर्वमहेभ्यमंडनमणिर्गोविंदसंघाधिपः॥५॥
विस्मेरीकुरुते मनांसि न सतां केषां द्वितीयः सुतश्चातुर्यादिभिरद्भुतैर्निजगुणैःसंघाग्रणीर्वीशलः।
ख्यातष्ठकुरसिंह इत्यमलधीस्थानं तृतीयस्तथा तुर्यः स्फूर्जदजर्जरोज्ज्वलयशा हीराह्वयो विश्रुतः॥६॥
जाया जासलदेवी गोविंदस्यानवद्यगुणह्रद्या। वैशद्येन यदीया शीलकला शशिकलां जयति॥७॥
वीसलसंघाधिपतेः..... ....॥ इतः परं पृष्ठो नास्ति॥

जे१ = मंगलमस्तु॥ श्री स्वस्ति संवत् १४८८ वर्षे श्री सत्यपुरे पौषवदि १० दिने श्रीपार्श्वदेवजन्मकल्याणके श्रीखरतरगणाधिपैः श्री जिनराजसूरिपट्टालंकारसारैः प्रभुश्रीमज्जिनभद्रसूरिसूर्यावतारैः श्रीनन्दिसिद्धांतपुस्तकं स्वहस्तेन शोधितं पाठितं च। तच्च श्रीश्रमणसंघेन वाच्यमानं चिरं नंदतु॥

पा० = शुभं भवतु मंगलमस्तु समस्तसंघस्य॥ इतः परं पञ्चचत्वारिंशतः श्लोकानां प्रशस्तिः अस्ति॥

मां० = शुभं भवतु। यादृशं पुस्तके दृष्टं तादृशं लिखितं मया। यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥ शुभं भवतु॥ कल्याणमस्तु ॥छ॥

लहुनंदी-अणुण्णानंदी।

[सू० १] से किं तं अणुण्णा ?, अणुण्णा छव्विहा पण्णत्ता, तंजहा– नामाणुण्णा १ ठवणाणुण्णा २ दव्वाणुण्णा ३ खेत्ताणुण्णा ४ कालाणुण्णा ५ भावाणुण्णा ६।

[सू० २] से किं तं नामाणुण्णा ? नामाणुण्णा जस्स णं जीवस्स वा अजीवस्स वा जीवाणं वा अजीवाणं वा तदुभयस्स वा तदुभयाणं वा अणुण्ण त्ति णामं कीरइ। सेत्तं णामाणुण्णा १।

[सू० ३] से किं तं ठवणाणुण्णा ?, ठवणाणुण्णा जं णं कट्ठकम्मे वा पोत्थकम्मे वा लेप्पकम्मे वा चित्तकम्मे वा गंथिमे वा वेढिमे वा पूरिमे वा संघातिमे वा अक्खे वा वराडए वा एगे वा अणेगे वा सब्भावट्ठवणाए वा असब्भावट्ठवणाए वा अणुण्ण त्ति ठवणा ठविज्जति सेत्तं ठवणाणुण्णा २।

[सू० ४] णाम-ठवणाणं को पतिविसेसो ?, णामं आवकहियं ठवणा इत्तिरिया वा होज्जा आवकहिया वा।

[सू० ५] से किं तं दव्वाणुण्णा ?, दव्वाणुण्णा दुविहा पण्णत्ता, तंजहा– आगमतो य णोआगमतो य।

[सू० ६] से किं तं आगमतो दव्वाणुण्णा ?, आगमतो दव्वाणुण्णा जस्स णं अणुण्ण त्ति पदं सिक्खियं ठितं जितं मितं परिजितं णामसमं घोससमं अहीणक्खरं अणच्चक्खरं अव्वाइद्धक्खरं अखलियं अमिलियं अविच्चामेलियं पडिपुण्णं पडिपुण्णघोसं कंठोट्ठविप्पमुक्कं गुरुवायणोवगयं। से णं तत्थ वायणाए पुच्छणाए परियट्टणाए धम्मकहाए, नो अणुप्पेहाए। कम्हा ? 'अणुवओगो दव्वं' इतिकट्टु।

णेगमस्स एगे अणुवउत्ते आगमतो एगा दव्वाणुण्णा, दोण्णि अणुवउत्ता आगमतो दोण्णि दव्वाणुण्णाओ, एवं जावतिया अणुवउत्ता तावतियाओ दव्वाणुण्णाओ। एवमेव ववहारस्स वि। संगहस्स एगो वा अणेगो वा अणुवउत्तो वा अणुवउत्ता वा दव्वाणुण्णा दव्वाणुण्णाओ वा सा एगा दव्वाणुण्णा।

उज्जुसुअस्स एगे अणुवउत्ते आगमतो एगा दव्वाणुण्णा, पुहत्तं नेच्छइ। तिण्हं सद्दणयाणं जाणए अणुवउत्ते अवत्थू। कम्हा ?, जति जाणए अणुवउत्ते ण भवति, सेत्तं आगमतो दव्वाणुण्णा।

[सू० ७] से किं तं णोआगमतो दव्वाणुण्णा ? णोआगमतो दव्वाणुण्णा तिविहा पण्णत्ता, तंजहा– जाणगसरीरदव्वाणुण्णा भवियसरीरदव्वाणुण्णा जाणगसरीरभवियसरीरवतिरित्ता दव्वाणुण्णा।

[सू० ८] से किं तं जाणगसरीरदव्वाणुण्णा ?, जाणगसरीरदव्वाणुण्णा अणुण्ण त्ति पदत्थाहिगारजाणगस्स जं सरीरगं ववगयचुतचतियचत्तदेहं जीवविप्पजढं सिज्जागयं वा संथारगयं वा निसीहियागयं वा सिद्धिसिलातलगतं वा, अहो णं इमेणं सरीरसमुस्सएणं अणुण्ण त्ति पयं आघवियं पण्णवियं परूवियं दंसियं णिदंसियं उवदंसियं, जहा को दिट्ठंतो ?, अयं घयकुंभे आसी, अयं महुकुंभे आसी, सेत्तं जाणगसरीरदव्वाणुण्णा।

[सू० ९] से किं तं भवियसरीरदव्वाणुण्णा ?, भवियसरीरदव्वाणुण्णा जे जीवे जम्मणजोणीणिक्खंते इमेणं चेव सरीरसमुस्सएणं आदत्तेणं जिणदिट्ठेणं भावेणं अणुण्ण त्ति पयं सेयकाले सिक्खिस्सति, न ताव सिक्खइ, जहा को दिट्ठंतो ?, अयं घयकुंभे भविस्सति, अयं महुकुंभे भविस्सति। सेत्तं भवियसरीरदव्वाणुण्णा।

[सू० १०] से किं तं जाणगसरीरभवियसरीरवतिरित्ता दव्वाणुण्णा ?, जाणगसरीरभवियसरीरवतिरित्ता दव्वाणुण्णा तिविहा पण्णत्ता, तंजहा– लोइया कुप्पावयणिया लोगुत्तरिया य।

[सू० ११] से किं तं लोइया० दव्वाणुण्णा ?, लोइया० दव्वाणुण्णा तिविहा पण्णत्ता, तंजहा-सचित्ता अचित्ता मीसिया।

[सू० १२] से किं तं सचित्ता० ?, सचित्ता० से जहाणामए राया इ वा जुवराया इ वा ईसरे इ वा तलवरे इ वा कोडुंबिए इ वा माडंबिए इ वा इब्भे इ वा सेट्ठी इ वा सत्थवाहे इ वा सेणावई इ वा कस्सइ कम्हिं कारणे तुट्ठे

समाणे आसं वा हत्थिं वा उट्टं वा गोणं वा खरं वा घोडयं वा एलयं वा अयं वा दासं वा दासिं वा अणुजाणेज्जा। सेत्तं सचित्ता०।

[सू० १३] से किं तं अचित्ता० ?, अचित्ता० से जहाणामए राया इ वा जुवराया इ वा ईसरे इ वा तलवरे इ वा कोडुंबिए इ वा माडंबिए इ वा इब्भे इ वा सत्थवाहे इ वा सेट्ठी इ वा सेणावई इ वा कस्सइ कम्हिं कारणे तुट्ठे समाणे आसणं वा सयणं वा छत्तं वा चामरं वा पडगं वा मउडं वा हिरण्णं वा सुवण्णं वा कंसं वा दूसं वा मणि-मोत्तिय-संख-सिल-प्पवाल-रत्तरयणमादीयं संत-सारसावदिज्जं अणुजाणिज्जा। सेत्तं अचित्ता० दव्वाणुण्णा।

[सू० १४] से किं तं मीसिया० दव्वाणुण्णा ?, मीसिया० दव्वाणुण्णा से जहाणामए राया ति वा जुवराया ति वा ईसरे ति वा तलवरे ति वा कोडुंबिए ति वा माडंबिए ति वा इब्भे ति वा सेट्ठी ति वा सेणावती ति वा सत्थवाहे ति वा कस्सइ कम्हिं कारणे तुट्ठे समाणे हत्थिं वा मुहभंडगमंडियं, आसं वा थासग-चामरमंडियं, सकडगं दासं वा, दासिं वा सव्वालंकारविभूसियं अणुजाणिज्जा। सेत्तं मीसिया० दव्वाणुण्णा। सेत्तं लोइया० दव्वाणुण्णा।

[सू० १५] से किं तं कुप्पावयणिया० दव्वाणुण्णा ?, कुप्पावयणिया० दव्वाणुण्णा तिविहा पण्णत्ता, तंजहा– सचित्ता अचित्ता मीसिया।

[सू० १६] से किं तं सचित्ता० ?, सचित्ता० से जहाणामए आयरिए इ वा उवज्झाए इ वा कस्सइ कम्हि कारणे तुट्ठे समाणे आसं वा हत्थिं वा उट्टं वा गोणं वा खरं वा घोडं वा अयं वा एलगं वा दासं वा दासिं वा अणुजाणिज्जा। सेत्तं सचित्ता कुप्पावयणिया० दव्वाणुण्णा।

[सू० १७] से किं तं अचित्ता० ?, अचित्ता० से जहाणामए आयरिए इ वा उवज्झाए इ वा कस्सइ कम्हि कारणे तुट्ठे समाणे आसणं वा सयणं वा छत्तं वा चामरं वा पट्टं वा मउडं वा हिरण्णं वा सुवण्णं वा कंसं वा दूसं वा मणि-मोत्तिय-संख-सिल-प्पवाल-रत्तरयणमाईयं संत-सारसावएज्जं अणुजाणिज्जा। सेत्तं अचित्ता कुप्पावयणिया० दव्वाणुण्णा।

[सू० १८] से किं तं मीसिया० दव्वाणुण्णा ?, मीसिया० दव्वाणुण्णा से जहाणामए आयरिए इ वा उवज्झाए इ वा कस्सइ कम्हि कारणे तुट्ठे समाणे हत्थिं वा मुहभंडगमंडियं, आसं वा थासग-चामरमंडियं, सकडगं दासं वा, दासिं वा सव्वालंकारविभूसियं अणुजाणिज्जा। सेत्तं मीसिया कुप्पावयणिया० दव्वाणुण्णा। सेत्तं कुप्पावयणिया० दव्वाणुण्णा।

[सू० १९] से किं तं लोउत्तरिया० दव्वाणुण्णा ?, लोउत्तरिया० दव्वाणुण्णा तिविहा पण्णत्ता, तं जहा-सचित्ता अचित्ता मीसिया।

[सू० २०] से किं तं सचित्ता० ?, सचित्ता० से जहाणामए आयरिए इ वा उवज्झाए इ वा थेरे इ वा पवत्तए इ वा गणी इ वा गणहरे इ वा गणावच्छेयए इ वा सीसस्स वा सिस्सिणीए इ वा कम्हिं कारणे तुट्ठे समाणे सीसं वा सिस्सिणिं वा अणुजाणेज्जा। सेत्तं सचित्ता०।

[सू० २१] से किं तं अचित्ता० ?, अचित्ता० से जहाणामए आयरिए ति वा उवज्झाए ति वा थेरे ति वा पवत्ती ति वा गणी ति वा गणधरे ति वा गणावच्छेदिए ति वा सिस्सस्स वा सिस्सिणियाए वा कम्हिय कारणे तुट्ठे समाणे वत्थं वा पातं वा पडिग्गहं वा कंबलं वा पादपुच्छणं वा अणुजाणेज्जा, सेत्तं अचित्ता०।

[सू० २२] से किं तं मीसिया० ?, मीसिया० से जहाणामए आयरिए इ वा उवज्झाए इ वा थेरे इ वा पवत्ती इ वा गणी इ वा गणहरे इ वा गणावच्छेयए इ वा सिस्सस्स वा सिस्सिणीए वा कम्हिय कारणे तुट्ठे समाणे सिस्सं वा सिस्सिणियं वा सभंड-मत्तोवगरणं अणुजाणेज्जा। सेत्तं मीसिया०। सेत्तं लोगुत्तरिया०। सेत्तं जाणगसरीरभवियसरीरवइरित्ता० दव्वाणुण्णा । सेत्तं णोआगमतो दव्वाणुण्णा । सेत्तं दव्वाणुण्णा ३।

[सू० २३] से किं तं खेत्ताणुण्णा ? खेत्ताणुण्णा जो णं जस्स खेत्तं अणुजाणति जत्तियं वा खेत्तं, जम्मि वा खेत्ते, सेत्तं खेत्ताणुण्णा ४।

[सू० २४] से किं तं कालाणुण्णा ?, कालाणुण्णा जो णं जस्स कालं अणुजाणति जत्तियं वा कालं, जम्मि वा काले अणुजाणति, तं०–तीतं वा

पडुप्पण्णं वा अणागतं वा वसंतं वा हेमंतं वा पाउसं वा अवत्थाणहेउं। सेत्तं कालाणुण्णा ५।

[सू० २५] से किं तं भावाणुण्णा ?, भावाणुण्णा तिविहा पण्णत्ता, तंजहा–लोइआ कुप्पावयणिया लोगुत्तरिया।

[सू० २६] से किं तं लोइया भावाणुण्णा ?, लोइया भावाणुण्णा से जहानामए राया इ वा जुवराया इ वा जाव तुट्ठे समाणे कस्सइ कोहाइभावं अणुजाणिज्जा। सेत्तं लोइया भावाणुण्णा।

[सू० २७] से किं तं कुप्पावयणिया भावाणुण्णा ?, कुप्पावयणिया भावाणुण्णा से जहानामए केइ आयरिए इ वा जाव कस्स वि कोहाइभावं अणुजाणिज्जा। सेत्तं कुप्पावयणिया भावाणुण्णा।

[सू० २८] से किं तं लोगुत्तरिया भावाणुण्णा ?, लोगुत्तरिया भावाणुण्णा से जहानामए आयरिए इ वा जाव कम्हि कारणे तुट्ठे समाणे कालोचियनाणाइगुणो जोगिणो विणीयस्स खमाइपहाणस्स सुसीलस्स सिस्सस्स तिविहेणं तिगरणविसुद्धेणं भावेणं आयारं वा सूयगडं वा ठाणं वा समवायं वा विवाहपण्णत्तिं वा नायाधम्मकहं वा उवासगदसाओ वा अंतगडदसाओ वा अणुत्तरोववाइयदसाओ वा पण्हावागरणं वा विवागसुयं वा दिट्ठिवायं वा सव्वदव्व-गुण-पज्जवेहिं सव्वाणुओगं वा अणुजाणिज्जा। सेत्तं लोगुत्तरिया भावाणुण्णा, सेत्तं भावाणुण्णा ६॥

[सू० २९] किमणुण्ण ? कस्सऽणुण्णा ? केवतिकालं पवत्तियाऽणुण्णा?।
आदिकर पुरिमताले, पवत्तिया उसभसेणस्स॥१॥

[सू० ३०] अणुण्णा १ उण्णमणी २ णमणी ३, णामणी ४
ठवणा ५ पभवो ६ पभावण ७ पयारो ८।
तदुभय ९ हिय १० मज्जाया ११,
णाओ १२ मग्गो १३ य कप्पो १४ य ॥२॥
संगह १५ संवर १६ णिज्जर १७, ठिइकरणं १८ चेव जीववुड्ढिपयं १९।
पदपवरं २० चेव तहा, वीसमणुण्णाए णामाइं॥३॥

॥ अणुण्णानंदी समत्ता ॥

[जोगणंदी]

[सू० १] नाणं पंचविहं पण्णत्तं, तंजहा-आभिणिबोहियनाणं १ सुयनाणं २ ओहिनाणं ३ मणपज्जवनाणं ४ केवलनाणं ५। तत्थ णं चत्तारि नाणाइं ठप्पाइं ठवणिज्जाइं, नो उद्दिसिज्जंति नो समुद्दिसिज्जंति नो अणुण्णविज्जंति, सुयनाणस्स पुण उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ य पवत्तइ।

[सू० २] जइ सुयनाणस्स उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ पवत्तइ किं अंगपविट्ठस्स उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ पवत्तइ ? किं अंगबाहिरस्स उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ पवत्तइ ? गोयमा ! अंगपविट्ठस्स वि उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ पवत्तइ, अंगबाहिरस्स वि उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ पवत्तइ। इमं पुण पट्ठवणं पडुच्च अंगबाहिरस्स उद्देसो ४।

[सू० ३] जइ पुण अंगबाहिरस्स उद्देसो जाव अणुओगो पवत्तइ किं कालियस्स उद्देसो ४ ? किं उक्कालियस्स उद्देसो ४ ?, गोयमा ! कालियस्स वि उद्देसो ४ उक्कालियस्स वि उद्देसो ४। इमं पुण पट्ठवणं पडुच्च उक्कालियस्स उद्देसो ४।

[सू० ४] जइ उक्कालियस्स उद्देसो ४ किं आवस्सगस्स उद्देसो समुद्देसो अणुण्णा अणुओगो पवत्तइ ? आवस्सगवइरित्तस्स ४ ?, गोयमा ! आवस्सगस्स वि उद्देसो ४ आवस्सगवइरित्तस्स वि उद्देसो ४।

[सू० ५] जइ आवस्सगस्स उद्देसो ४ किं सामाइयस्स १ चउवीसत्थयस्स २ वंदणस्स ३ पडिक्कमणस्स ४ काउस्सग्गस्स ५ पच्चक्खाणस्स ६ ? सव्वेसिं एतेसिं उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ य पवत्तइ।

[सू० ६] जइ आवस्सगवइरित्तस्स उद्देसो ४ किं कालियसुयस्स उद्देसो ४ उक्कालियसुयस्स उद्देसो ४ ?, कालियस्स वि उद्देसो ४ उक्कालियस्स वि उद्देसो ४।

[सू० ७] जइ उक्कालियस्स उद्देसो ४ किं दसकालियस्स १ कप्पियाकप्पियस्स २ चुल्लकप्पसुयस्स ३ महाकप्पसुयस्स ४ उववाइयसुयस्स ५ रायपसेणीयसुयस्स ६ जीवाभिगमस्स ७ पण्णवणाए ८ महापण्णवणाए ९ पमायप्पमायस्स १० नंदीए ११ अणुओगदाराणं १२ देविंदथयस्स १३ तंदुलवेयालियस्स १४ चंदाविज्झयस्स १५ सूरपण्णत्तीए १६ पोरिसिमंडलस्स १७ मंडलप्पवेसस्स १८ विज्जाचरणविणिच्छियस्स १९ गणिविज्जाए २० संलेहणासुयस्स २१ विहारकप्पस्स २२ वीयरागसुयस्स २३ झाणविभत्तीए २४ मरणविभत्तीए २५ मरणविसोहीए २६ आयविभत्तीए २७ आयविसोहीए २८ चरणविसोहीए २९ आउरपच्चक्खाणस्स ३० महापच्चक्खाणस्स ३१ ?, सव्वेसिं एएसिं उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ पवत्तइ।

[सू० ८] जइ कालियस्स उद्देसो जाव अणुओगो पवत्तइ किं उत्तरज्झयणाणं १ दसाणं २ कप्पस्स ३ ववहारस्स ४ निसीहस्स ५ महानिसीहस्स ६ इसिभासियाणं ७ जंबुद्दीवपण्णत्तीए ८ चंदपण्णत्तीए ९ दीवपण्णत्तीए १० सागरपण्णत्तीए ११ खुड्डियाविमाणपविभत्तीए १२ महल्लियाविमाणपविभत्तीए १३ अंगचूलियाए १४ वग्गचूलियाए १५ विवाहचूलियाए १६ अरुणोववायस्स १७ वरुणोववायस्स १८ गरुलोववायस्स १९ धरणोववायस्स २० वेसमणोववायस्स २१ वेलंधरोववायस्स २२ देविंदोववायस्स २३ उट्ठाणसुयस्स २४ समुट्ठाणसुयस्स २५ नागपरियावणियाणं २६ निरयावलियाणं २७ कप्पियाणं २८ कप्पवडिंसियाणं २९ पुप्फियाणं ३० पुप्फचूलियाणं ३१ [वण्हियाणं ३२] वण्हिदसाणं ३३ आसीविसभावणाणं ३४ दिट्ठिविसभावणाणं ३५ चारणभा० ३६ सुमिणभा० ३७ महासुमिणभा० ३८ तेयग्गिनिसग्गाणं ३९ ?, सव्वेसिं पि एएसिं उद्देसो जाव अणुओगो ४ पवत्तइ ।

[सू० ९] जइ अंगपविट्ठस्स उद्देसो जाव अणुओगो पवत्तइ किं आयारस्स १ सुयगडस्स २ ठाणस्स ३ समवायस्स ४ विवाहपण्णत्तीए ५ नायाधम्मकहाणं ६ उवासगदसाणं ७ अंतगडदसाणं ८ अणुत्तरोववाइयदसाणं ९ पण्हावागरणाणं

१० विवागसुयस्स ११ दिट्ठिवायस्स १२ ?, सव्वेसिं पि एएसिं उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ पवत्तइ । इमं पुण पट्ठवणं पडुच्च इमस्स साहुस्स इमाए साहुणीए [अमुगस्स सुयस्स] उद्देसो १ समुद्देसो २ अणुण्णा ३ अणुओगो ४ पवत्तइ खमासमणाणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं उद्देसामि समुद्देसामि अणुजाणामि ॥

॥ जोगणंदी समत्ता ॥

॥ इति श्रीमन्मलयगिर्याचार्यवृत्तियुतं योगनन्द्यनुज्ञासूत्रम् ॥

तदेवं श्रीनन्दीसूत्रं समाप्तम् ॥

प्रथमं परिशिष्टम् - टिप्पनानि।

[पृ०२ पं०१३] "**दुविहो लोगुत्तरिओ सुअधम्मो खलु चरित्तधम्मो अ। सुअधम्मो सज्झाओ चरित्तधम्मो समणधम्मो॥४३॥** व्याख्या- द्विविधो-द्विप्रकारो 'लोकोत्तरो' लोकप्रधानः, धर्म इति वर्त्तते, तथा चाह– श्रुतधर्मः खलु चारित्रधर्मश्च, तत्र श्रुतम्-द्वादशाङ्गं तस्य धर्मः श्रुतधर्मः, खलुशब्दो विशेषणार्थः, किं विशिनष्टि ?-स हि वाचनादिभेदाच्चित्र इति, आह च– श्रुतधर्मः स्वाध्यायः- वाचनादिरूपः, तत्त्वचिन्तायां धर्महेतुत्वाद्धर्म इति। तथा चारित्रधर्मश्च, तत्र **चर गतिभक्षणयोः [पा०धा० ५५९]** इत्यस्य **अर्त्तिलूधूसूखनसहचर इत्रन् [पा० ३-२-१८४]** इतीत्रन्प्रत्ययान्तस्य चरित्रमिति भवति, चरन्त्यनिन्दितमनेनेति चरित्रं क्षयोपशमरूपं तस्य भावश्चारित्रम्, अशेषकर्मक्षयाय चेष्टेत्यर्थः, ततश्चारित्रमेव धर्मः चारित्रधर्म इति। चः समुच्चये। अयं च श्रमणधर्म एवेत्याह– चारित्रधर्मः श्रमणधर्म इति, तत्र श्राम्यतीति श्रमणः **कृत्यल्युटो बहुलम् [पा० ३-३-११३]** इति वचनात् कर्त्तरि ल्युट्, श्राम्यतीति-तपस्यतीति, एतदुक्तं भवति- प्रव्रज्यादिवसादारभ्य सकलसावद्ययोगविरतौ गुरूपदेशादनशनादि यथाशक्त्याऽऽ-प्राणोपरमात्तपश्चरतीति, उक्तं च- **यः समः सर्वभूतेषु, त्रसेषु स्थावरेषु च। तपश्चरति शुद्धात्मा, श्रमणोऽसौ प्रकीर्त्तितः॥१॥** इति, तस्य धर्मः स्वभावः श्रमणधर्मः, स च क्षान्त्यादिलक्षणो वक्ष्यमाण इति गाथार्थः॥४३॥" - **दशवै० हारि०।**

[पृ०३ पं०९] "**उदितः नम्॥ आ० ५।२४।** उदितः धातोः अन्त्यस्वरात् परः नम् भवति। वन्दन्ते॥२४॥" - **मलय० स्वो०॥**

[पं०१२] "**स्वरेभ्यः इः॥६०६॥** स्वरान्तेभ्यो धातुभ्य इः प्रत्ययो भवति। जिं अभिभवे, जयिः-राजा। हिंट् गतिवृद्ध्योः, हयिः-कामः। रुक् शब्दे, रविः-सूर्यः। कुंक् शब्दे, कविः- काव्यकर्त्ता। ष्टुंग्क् स्तुतौ, स्तविः-उद्गाता। लूग्श् छेदने, लविः-दात्रम्। पुग्श् पवने, पविः- वायुः, वज्रं पवित्रं च। भू सत्तायाम्, भविः-सत्ता, चन्द्रः, विधिश्च। क्रृंक् गतौ, अरिः- शत्रुः। हृंग् हरणे, हरिः-इन्द्रः, विष्णुः, चन्दनम्, मर्कटादिश्च। हरयः-शक्राश्वाः। टुडुभृंग्क् पोषणे च, भरिः-वसुधा। सृं गतौ, सरिः-मेघः। पृश् पालन-पूरणयोः, परिः-भूमिः। तॄ प्लवन-तरणयोः, तरिः-नौः। दृश् विदारणे, दरिः-महाभिदा। मृश् हिंसायाम्, ण्यन्तः, मारिः-अशिवम्। वृग्श् वरणे, वरिः-विष्णुः। ण्यन्ताद् वारिः-हस्तिबन्धनम्, वारि-जलम्॥६०६॥

पदि-पठि-पचि-स्थलि-हलि-कलि-बलि-वलि-वल्लि-पल्लि-कटि-चटि-वटि-बधि-गाध्यचि-वन्दि-नन्द्यवि-वशि-वाशि-काशि-छर्दि-तन्त्रि-मन्त्रि-खण्डि-मण्डि-चण्डि-यत्यञ्जि-मस्यसि-वनि-ध्वनि-सनि-गमि-तमि-ग्रन्थि-श्रन्थि-जनि-मण्यादिभ्यः॥६०७॥

एभ्यः इः प्रत्ययो भवति। पर्दिच् गतौ, पदिः-राशिः, मोक्षमार्गश्च। पठ व्यक्तायां वाचि, पठिः-विद्वान्। डुपचींष् पाके, पचिः-अग्निः। ष्ठल स्थाने, स्थलिः-दानशाला। हल विलेखने, हलिः-हलः। कलि शब्द-संख्यानयोः, कलिः-कलहः, युगं च। बल प्राणनधान्यावरोधयोः, बलिः-देवतोपहारः दानवश्च। वलि-वल्लि संवरणे, वलिः-त्वक्तरङ्गः। वल्लिः-हिरण्यशलाका, लता च। पल्ल गतौ, पल्लिः-मुनीनामाश्रमः, व्याधसंस्त्यायश्च। कटे वर्षावरणयोः, कटिः-स्वाङ्गम्। चटण् भेदे, चटिः-वर्णः। वट वेष्टने, वटिः-गुलिका, तन्तुः सूना च, नाभिः, वर्णश्च। बधि बन्धने, बधिः-क्रियाशब्दः। गाधृङ् प्रतिष्ठालिप्सा-ग्रन्थेषु, गाधिः-विश्वामित्रपिता। अर्च पूजायाम्, अर्चिः-अग्निशिखा। वदुङ् स्तुत्यभिवादनयोः, वन्दिः-ग्रहणिः। टुनदु समृद्धौ, नन्दिः ईश्वरप्रतीहारः, भेरिश्च। अव रक्षणादौ, अविः-ऊर्णायुः। वशक् कान्तौ, वशिः-वशिता। वाशिच् शब्दे, वाशिः-प्रकान्तिः, रश्मिः-गोमायुः, अग्निः, शब्दः, प्रजनप्राप्ता, चतुष्पात्, जलदश्च। काशृङ् दीप्तौ, काशयः-जनपदः। छर्दण् वमने, छर्दिः-वमनम्। तन्त्रिण् कुटुम्बधारणे, तन्त्रिः-वीणासूत्रम्। मन्त्रिण् गुप्तभाषणे, मन्त्रिः-सचिवः। खडुण् भेदे, खण्डिः-प्रद्वारम्। मडु भूषायाम्, मण्डिः-मृद्भाजनपिधानम्। चडुङ् कोपे, चण्डिः-भामिनी। यतैङ् प्रयत्ने, यतिः-भिक्षुः। अञ्जौप् व्यक्तिम्रक्षणगतिषु, अञ्जिः-सज्जः, पेषणी, पेजः, गतिश्च। समञ्जिः-शिश्नः। मसैच् परिणामे, मसिः-शस्त्री। असूच् क्षेपणे असिः-खड्गः। वनूयी याचने, वनिः-साधुः, याच्ञा, शकुनिः, अग्निश्च। ध्वन शब्दे, ध्वनिः-नादः। षण भक्तौ, सनिः-संभक्ता, पन्थाः, दानं, म्लेच्छः, नदीतटं च। गम्लृं गतौ, गमिः-आचार्यः। तमूच् काङ्क्षायाम्, तमिः-अलसः। ग्रन्थश् संदर्भे, श्रन्थश् मोचन-प्रतिहर्षयोः, ग्रन्थिः, श्रन्थिश्च पर्व-संध्यादि। जनैचि प्रादुर्भावे, जनिः-वधूः, कुलाङ्गना, भगिनी, प्रादुर्भावश्च। मण शब्दे, मणिः-रत्नम्। आदिग्रहणात् वहीं प्रापणे, वहिः-अश्वः। खादृ भक्षणे, खादिः-श्वा। दधि धारणे, दधि-क्षीरविकारः। खल संचये च, खलिः-पिण्याकः। शचि व्यक्तायां वाचि, शची-इन्द्राणी, 'इतोऽक्त्यर्थात्' इति गौरादित्वाद् वा ङीः इत्यादयोऽपि भवन्ति॥६०७॥

[पं०१३] **नाम्युपान्त्यकृ-गृ-शृ-पृ-पूङ्भ्यः कित्॥६०९॥** नाम्युपान्त्येभ्यः क्रादिभ्यश्च किन्निः प्रत्ययो भवति। लिखत् अक्षरविन्यासे, लिखिः-शिल्पम्। शूच् शोके, शुचिः-पूतः, विद्वान्, धर्मः, आषाढश्च। रुचि अभिप्रीत्यां च, रुचिः-दीप्तिः, अभिलाषश्च। भुजंप् पालनाभ्यवहारयोः, भुजिः-अग्निः, राजा, कुटिलं च। कुणत् शब्दोपकरणयोः, कुणिः-विकलो हस्तः, हस्तविकलश्च। सृजंत् विसर्गे, सृजिः-पन्थाः। द्युति दीप्तौ, द्युतिः-दीप्तिः। कृत् घृणागतिस्पर्धेषु, कृतिः-यतिः। छदृंपी द्वैधीकरणे, छिदिः-छेत्ता, पर्शुश्च। मुदि हर्षे, मुदिः-बालः। भिदृंपी विदारणे, भिदिः-वज्रम्, सूचकः भेत्ता च। ऊछृदृंपी दीप्ति-देवनयोः, छृदिः-

रथकारः। लिपींत् उपदेहे लिपिः-अक्षरजातिः। तुर त्वरणे, सौत्रः, तुरिः-तन्तुवायोपकरणम्। डुलण् उत्क्षेपे, डुलिः-कच्छपः। त्विषीं दीप्तौ, त्विषिः दीप्तिः, त्विषिमान्,...। पॄश् पालन-पूरणयोः, पुरि-नगरम्, राजा, पूरियिता च। पूङ् पवने, पुविः-वातः॥६०९॥" - **सिद्धहेम० उणादि०॥**

[पं०१४] "**इतोऽक्त्यर्थात् ङीः॥ ना०५।९॥** इकारान्तात् स्त्रियां वर्तमानात् क्त्यर्थप्रत्ययान्तवर्जात् परः वा ङी प्रत्ययो भवति। धूलिः, धूली। शक्तिः, शक्ती। अक्त्यर्थात् इति किम् ? कृतिः। ग्लानिः॥५।९॥" - **मलय० शब्दानु० टीका०॥**

[पृ०४ पं०१५] "**मङ्गलमहवा नन्दी चउव्विहा मङ्गलं च सा नेया। दव्वे तूरसमुदओ भावम्मि य पञ्च नाणाइं॥७८॥** सूत्रस्य सूचकत्वाद् नोआगमतो भावमङ्गलस्यैव च प्रस्तुतत्वाद् मङ्गलशब्देनेह नोआगमतो भावमङ्गलमिति द्रष्टव्यम्। अथवाशब्दस्तु पूर्वोक्तपक्षत्रयापेक्षया विकल्पार्थः, ततश्चायमर्थः-यदि वा नोआगमतो भावमङ्गलमन्यद् द्रष्टव्यम्। किं तत् ?, इत्याह- 'नंदी' नन्दनं नन्दी, नन्दन्ति समृद्धिमवाप्नुवन्ति भव्यप्राणिनोऽनयेति वा नन्दी, इयं च सूत्रे सामान्योक्तावपि व्याख्यानतो विशेषप्रतिपत्तेरिह ज्ञानपञ्चकरूपा गृह्यते। सामान्यरूपेण तु चिन्त्यमानाऽसौ मङ्गलवद् नामादिचतुर्विधा भवति। एतदेवाह-'चउव्विहेत्यादि' तत्र 'नन्दी' इति यत् कस्यचिद् नाम क्रियते सा नामनन्दी। अक्षादिषु स्थापिता स्थापनानन्दी। द्रव्यनन्दी तु द्विविधा आगमतः, नोआगमतश्च। तत्राऽऽगमतो नन्दीपदार्थज्ञोऽनुपयुक्तः, नोआगमतस्तु ज्ञ- भव्यशरीरोभयव्यतिरिक्ता द्रव्यनन्दी द्वादशप्रकारस्तूर्यसमुदयः, तद्यथा—

भंभा-मुगुन्द-मद्दल-कडंब-झल्लरि-हुडुक्क-कंसाला। काहल तलिमा वंसो संखो पणवो व बारसमो॥१॥ [ ] इह च 'दव्वे तूरसमुदओ' इत्यनेन ज्ञ-भव्यशरीरव्यतिरिक्ता द्रव्यनन्दी सूत्रेऽपि दर्शिता, नामनन्द्यादिस्वरूपं तु पूर्वोक्तनाममङ्गलाद्यनुसारेण सुज्ञेयत्वाद् नोक्तमिति। भावनन्द्यपि द्विधा-आगमतः, नोआगमतश्च। आगमतो नन्दिपदार्थज्ञस्तत्रोपयुक्तः। नोगामतस्त्वाह- 'भावम्मि येत्यादि' भावे भावनन्द्यां विचार्यमाणायां पुनः 'नोआगमतो भावनन्दी' इति शेषः। का पुनरियम् ?, इत्याह-पञ्च ज्ञानानि आगमस्य ज्ञानपञ्चकैकदेशत्वात् नोशब्दस्य चेहाप्येकदेशवाचित्वादिति भावः। इयमेव चेह नोआगमतो भावमङ्गलत्वेन प्रस्तुतगाथादौ निर्दिष्टा॥ इति गाथार्थः॥७८॥" - **विशेषाव० मलधारि०।**

[पृ०६ पं०४] "**यः कर्ता कर्मभेदानाम्, भोक्ता कर्मफलस्य च। संसर्त्ता परिनिर्वाता स ह्यात्मा नान्यलक्षणः॥९०॥** एतदेवाह- यः कर्त्ता 'कर्म्मभेदानां' ज्ञानावरणादीनाम्, भोक्ता कर्मफलस्य च, नाभोगादेः, अन्वयीति भावः, एतदेवाह- 'संसर्त्ता' संसरणशीलः, परिनिर्वाणशीलः, स एवात्मा, न अन्यलक्षणः-इत्येकान्तनित्यादिलक्षणः॥९०॥" - **शास्त्र० हारि०॥**

[**पृ०७ पं०२१**] ''कार्यपक्षमधिकृत्याह– **काठिन्याबोधरूपाणि, भूतान्यध्यक्षसिद्धितः। चेतना तु न तद्रूपा, सा कथं तत्फलं भवेत् ?॥४३॥** काठिन्याबोधरूपाणि, काठिन्यग्रहणं ग्रा(द्र)वोष्णाद्युपलक्षणम्, 'भूतानि' पृथिव्यादीनि 'अध्यक्षसिद्धितः' तथाप्रत्यक्षोपलब्धेः, चेतना तु न 'तद्रूपा' काठिन्याबोधस्वभावा, सा कथं 'तत्फलं' भूतकार्यं भवेत् ? नैवेत्यभिप्रायः॥४३॥'' - **शास्त्र० हारि०॥**

[**पृ०१४ पं०७**] ''**अविकृत्य हि यद् वस्तु यः पदार्थो विकार्यते। उपादानं न तत् तस्य युक्तं गोगवयादिवत्॥१।६३॥** कस्मादेवम् इत्याह- **हि** यस्मात् **अविकृत्य यद्वस्तु** किञ्चिद् **यः पदार्थो विकार्यते उपादानं न तत्तस्य** पदार्थस्य **युक्तम् गोगवयादिवत्** गोगवययोरिव नोपादानोपादेयभावः, एकस्याविकारेणापरस्य विकारात्॥६३॥'' - **प्रमाणावा० मनोरथनन्दि०।**

[**पं०१८**] ''**सचित्तशीतसंवृत्ताः सेतरा मिश्राश्चैकशस्तद्योनयः॥२-३३॥ भा०-** संसारे जीवानामस्य त्रिविधस्य जन्मन एताः सचित्तादयः सप्रतिपक्षा मिश्राश्चैकशो योनयो भवन्ति। तद्यथा- सचित्ता, अचित्ता, सचित्ताचित्ता, शीता, उष्णा, शीतोष्णा, संवृता, विवृता, संवृतविवृता, इति। तत्र नारकदेवानामचित्ता योनिः। गर्भजन्मनां मिश्रा। त्रिविधाऽन्येषाम्। गर्भजन्मनां देवानां च शीतोष्णा। तेजःकायस्योष्णा। त्रिविधाऽन्येषाम्। नारकैकेन्द्रियदेवानां संवृता। गर्भजन्मनां मिश्रा। विवृताऽन्येषामिति॥'' - **तत्त्वार्थ० भा०॥**

[**पृ०२२ पं०१३**] ''**सव्वे पाणा सव्वे भूता सव्वे जीवा सव्वे सत्ता ण हंतव्वा, ण अज्जावेतव्वा, ण परिघेत्तव्वा, ण परितावेयव्वा, ण उद्दवेयव्वा। एस धम्मे सुद्धे णितिए सासए समेच्च लोयं खेतण्णेहिं पवेदिते। [आचा० १।४।१।१३२]**

सर्वे प्राणाः सर्व एव पृथिव्यप्-तेजो-वायु-वनस्पतयो द्वि-त्रि-चतुः-पञ्चेन्द्रियाश्च, इन्द्रिय-बलोच्छ्वास-निश्वासा-ऽऽयुष्कलक्षणप्राणधारणात् प्राणाः। तथा सर्वाणि भवन्ति भविष्यन्त्यभूवन्निति च भूतानि चतुर्दशभूतग्रामान्तःपातीनि। एवं सर्व एव जीवन्ति जीविष्यन्ति अजीविषुरिति जीवाः नारक-तिर्यङ्-नरा-ऽमरलक्षणाश्चतुर्गतिकाः। तथा सर्व एव स्वकृतसाताऽसातोदयसुख-दुःखभाजः सत्त्वाः। एकार्था वैते शब्दाः, 'तत्त्वभेदपर्यायैः प्रतिपादनम्' इति कृत्वेति।

एते च सर्वेऽपि प्राणिनः पर्यायशब्दावेदिता **न हन्तव्या** दण्ड-कशादिभिः, **नाज्ञापयितव्याः** प्रसह्याभियोगदानतः, **न परिग्राह्या** भृत्य-दास-दास्यादिममत्वपरिग्रहतः, **न परितापयितव्याः** शारीर-मानसपीडोत्पादनतः, **नापद्रावयितव्याः** प्राणव्यपरोपणतः।

एषः अनन्तरोक्तः **धर्मः** दुर्गत्यर्गला-सुगतिसोपानदेश्यः। अस्य च प्रधानपुरुषार्थत्वाद् विशेषणं दर्शयति-**शुद्धः** पापानुबन्धरहितः, न **शाक्य**धिग्जातीयनामिवैकेन्द्रिय-पञ्चेन्द्रियवधानुमति-

कलङ्काङ्कितः। तथा **नित्यः** अप्रच्युतिरूपः पञ्चस्वपि विदेहेषु सदाभवनात्। तथा **शाश्वतः** शाश्वतगतिहेतुत्वात्, यदि वा नित्यत्वात् शाश्वतः, न तु नित्यं भूत्वा न भवति भव्यत्ववत्, अभूत्वा च नित्यं भवति घटाभाववदिति, अयं तु त्रिकालावस्थायीति।

अमुं च **लोकं** जन्तुलोकं दुःखसागरावगाढं **समेत्य** ज्ञात्वा तदुत्तरणाय **खेदज्ञैः** जन्तुदुःखपरिच्छेत्तृभिः **प्रवेदितः** प्रतिपादित इति।'' - **आचा० शीला० टीका०।** 5

[**पृ०३२ पं०१५**] ''**स्वयं रागादिमान्नार्थं वेत्ति वेदस्य नान्यतः॥३।३१८॥ न वेदयति वेदोऽपि वेदार्थस्य कुतो गतिः।** सर्व एव हि पुरुषोऽनतिक्रान्तदोषविप्लवस्तमतीन्द्रियमर्थ-विशेषप्रतिनियमं व्याख्यां वा स्वयं न वेत्ति नाप्येनमन्यो वेदयति, तस्यापि तुल्यप्रसङ्गात्। न ह्यन्धेनाकृष्यमाणोऽन्धः पन्थानं प्रतिपद्यते। नापि वेदः स्वार्थं विवृणोति, उपदेशवैयर्थ्यप्रसङ्गात्। तदयमपरिज्ञातार्थः शब्दगडुरेवं शल्यभूतोऽसद्दर्शनस्नायूपनिबद्धो दुरुद्धरो दुःखमासादयति॥ 10

तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ॥३।३१९॥ खादेच्छ्वमांसमित्येष नार्थ इत्यत्र का प्रमा। क्वचिदप्यर्थे प्रत्यासत्तिविप्रकर्षरहितस्य **अग्निहोत्रं जुहुयात् स्वर्गकामः** [**मैत्री० ६.३६**] इत्यादिवाक्यस्य भूतविशेषे यथाभिमतं घृतादि प्रक्षिपेत् इत्ययमर्थो न पुनः श्वमासं खादेत् इति नातिशयं पश्यामः॥'' - **प्रमाणावा० मनोरथनन्दि०।**

[**पृ०३३ पं०१५**] ''**स्वर्गोर्वश्यादिशब्दश्च दृष्टोऽरूढार्थवाचकः॥३।३२१॥ शब्दान्तरेषु** 15 **तादृक्षु तादृश्येवास्तु कल्पना।** न च लोकप्रसिद्धानुसाराद् वेदार्थव्यवस्था। तथाहि– **स्वर्गोर्वश्यादिशब्दश्चारूढार्थवाचको दृष्टः**। मनुष्यातिशायिपुरुषविशेषनिकेतोऽतिमानुषसुखाधिष्ठानो नानोपकरणः स्वर्गः तत्स्थाऽप्सरा उर्वशीति प्रसिद्धो लोकवादः। तमुल्लङ्घ्य-दुःखेनासम्भिन्ना निरतिशया प्रीतिः स्वर्गः, उर्वशी चारणिः पात्री वा – इत्यप्रसिद्धार्थकल्पनेति। **शब्दान्तरेष्वग्निहोत्रादिषु तादृक्षु** सर्वार्थयोग्येषु **तादृश्येवाप्रसिद्धार्थैव** कल्पनास्तु, न्यायस्य 20 तुल्यत्वात्॥'' - **प्रमाणावा० मनोरथनन्दि०।**

[**पृ०३५ पं०११**] ''कृतकृत्यो भगवान् किमिति तीर्थप्रणामं करोतीति ? उच्यते- **तप्पुव्विया अरहया पूइयपूता य विणयकम्मं च। कयकिच्चोऽवि जह कहं कहए णमए तहा तित्थं॥५६७॥** तीर्थं-श्रुतज्ञानं तत्पूर्विका 'अर्हता' तीर्थकरता, तदभ्यासप्राप्तेः, पूजितेन पूजा पूजितपूजा सा च कृताऽस्य भवति, लोकस्य पूजितपूजकत्वाद्, भगवताऽप्येतत्पूजितमिति 25 प्रवृत्तेः, तथा 'विनयकर्म च' वक्ष्यमाणवैनयिकधर्ममूलं कृतं भवति, अथवा-कृतकृत्योऽपि यथा कथां कथयति नमति तथा तीर्थमिति॥५६७॥''- **आव० हारि०॥**

[**पृ०३६ पं०१६**] ''गृहीतमेतत्, यत् पुनरुक्तं कृतार्थोऽप्युपदिशतीति तद्विरुद्धम्, कृतार्थश्चोपदिशति चेति, नहि कश्चिन्निरभिवाञ्छः श्रममाद्रियमाणो दृष्ट इति चोदितः कारणमाह–

तीर्थप्रवर्तनफलं, यत् प्रोक्तं कर्म तीर्थकरनाम। तस्योदयात् कृतार्थो-ऽप्यर्हंस्तीर्थं प्रवर्तयति ॥९॥ व्या० तीर्थप्रवर्तनेत्यादि। भवसमुद्रं तरन्ति तेन तद्वाऽधिगम्येति तीर्थम्, प्रवचनमित्यर्थः, तस्य प्रवर्तनं प्रणयनम्, तदस्य कर्मणः फलम्, उपभोगो विपाकः प्रयोजनमिति तीर्थप्रवर्तनफलम्, यत् प्रोक्तम् उपदिष्टं कर्म, क्वोक्तम्, प्रवचने, तत्प्रामाण्याच्च शास्त्रे (अ० ६, सू०२३) वक्ष्यते दर्शनविशुद्ध्यादिहेतुकं कर्माष्टके। कतरत् पुनस्तदित्याह- **तीर्थकरनाम**, तीर्थं करोतीति तीर्थकरः। **कृञो हेत्वादिषु (पा०३।२।२०)** इति हेतौ टः, तीर्थकरस्तीर्थहेतुरित्यर्थः; तस्य नाम, कारणे कार्योपचारः, तीर्थकरनाम कारणं तीर्थकरनाम, यस्मिन्नुपात्ते तीर्थकरोऽयमित्येवं व्यपदिश्यते, तस्योदयात् कृतार्थोऽप्यर्हंस्तीर्थम् प्रवर्तयति, यत् प्रोक्तम्, तस्योदयात् तद्विपाकात् कृतार्थो-ऽप्यर्हंस्तीर्थमित्येवदुक्तनिर्वचनम्, प्रवर्तयति प्रणयति उपदिशति करोतीति, तस्य चैतदेव फलमित्युक्तम्, न चोपभुञ्जानः पुनरपि चेष्यते इत्याशङ्कितव्यम्, उक्तं हि षष्ठस्य निरनुबन्धं कर्मेति, किंपुनरित्थं दृष्टमित्याह-न किञ्चिदसाधारणोऽयमतिशयः तथापि निदर्शनमात्रमिदम्॥९॥

तत्स्वाभाव्यादेव, प्रकाशयति भास्करो यथा लोकम्। तीर्थप्रवर्तनाय, प्रवर्त्तते तीर्थकर एवम्॥१०॥ व्या० तत्स्वाभाव्यादेवेति। तदेव प्रकाशनं स्वभावस्तत्स्वभावः तद्भावस्तत्स्वाभाव्यं प्रकाशमयमित्यर्थः। तस्मादेव कारणात् **प्रकाशयति** अवभासयति, तन्मयत्वमेवास्य प्रकाशने कारणं नान्यदित्येवकारोऽवधारयति। भासः करोतीति भास्करः। यथा, धर्मप्रत्यासत्तौ, लोकं भुवनम्। अत्र च भास्करग्रहणेन तद्विमानसम्प्रत्ययस्तदुपदेशस्तु प्रतीतत्वात्। तीर्थ-प्रवर्तनाय प्रवर्तते, तीर्थकर एवम्, तीर्थमुक्तम्, तत्प्रवर्तनार्थम्, प्रवर्तते, प्रभवति तीर्थकर एवम्, यथा भास्करः, उभयोरपि स्वभावानुगृहीता निराकाङ्क्षा तन्मात्रफला प्रवृत्तिरित्यर्थः, तदेवं सर्वतीर्थकरोपदेशप्रयोजने व्याख्याते॥१०॥" - **तत्त्वार्थकारिका०॥**

[**पृ०३७ पं०१६**] "**बाध्यबाधकभावः कः स्यातां यद्युक्तिसंविदौ। तादृशो-ऽनुपलब्धेश्चेद् उच्यतां सैव साधनम्॥२।९३॥ अनिश्चयकरं प्रोक्तमीदृक् चानुपलम्भनम्। तन्नात्यन्तपरोक्षेषु सदसत्ताविनिश्चयौ॥२।९४॥ यदि चोक्तिसंविदौ** सह स्याताम्, कस्तयोः परस्परं **बाध्यबाधकभावः** न हि ज्ञानवचनयोर्विरोधः सिद्धः, येनैकसत्त्वेऽपरस्याभावः। अविरोधोऽपि न सिद्ध इति चेत् सत्यम्, किन्तु संशयोऽपि। न वक्तृत्वमनैकान्तिकम्। **तादृशः** सर्वज्ञस्य वक्तुर**नुपलब्धेर**भाव**श्चेत् उच्यतां** निषेधे साध्ये **सैवा**नुपलब्धिः **साधनम्**, नात्रान्यस्य शक्तिः॥९३॥ किन्त्वी**दृ**गतीन्द्रियार्थविषय**मनुपलम्भनमनिश्चयकरं प्रोक्तम्**, सत्यप्यर्थे सम्भवात्। **तत्** तस्मादत्य**न्तपरोक्षेषु सदसत्तानिश्चयौ न** स्तः। सत्यपि प्रमाणावृत्तेः। प्रमाणनिवृत्तावप्यर्था-भावासिद्धेः। तस्मान्नानुपलब्धेः कुतश्चिदन्यस्मादभावसिद्धिः, किन्तु विरुद्धादेव॥९४॥" - **प्रमाणावा० मनोरथनन्दि०।**

[पृ०३८ पं०५] "**तं च कहं वेइज्जइ ? अगिलाए धम्मदेसणाईहिं। बज्झइ तं तु भगवओ तइयभवोसक्कइत्ताणं॥१८३॥** गमनिका- तच्च तीर्थकरनामगोत्रं कर्म कथं वेद्यत इति, अग्लान्या धर्मदेशनादिभिः, बध्यते तत्तु भगवतो यो भवस्तस्मात् तृतीयं भवमवसर्प्य, अथवा बध्यते तत्तु भगवतस्तृतीयं भवं प्राप्य, ओसक्कइत्ताणंति-तत्स्थितिं संसारं वाऽवसर्प्येति, तस्य ह्युत्कृष्टा सागरोपमकोटीकोटिर्बन्धस्थितिः, तच्च प्रारम्भबन्धसमयादारभ्य सततमुपचिनोति, यावदपूर्वकरणसंख्येयभागैरिति, केवलिकाले तु तस्योदय इति गाथार्थः॥१८३॥" - **आव० हारि०।**

[पृ०४० पं०१] "**भद्र-आयुष्य-क्षेम-सुख-अर्थ-हितार्थ-हितैः आशिषि॥ ना०७।२१॥** 'भद्र'-आदि अर्थैः 'हित'शब्देन च युक्तात् अप्रधानात् नाम्नः आशीर्विषये चतुर्थी वा भवति। भद्रमस्तु चैत्राय भद्रमस्तु चैत्रस्य। भद्रमस्तु साधुभ्यः साधूनां वा। आयुष्यमस्तु चैत्राय चैत्रस्य वा। चिरंजीवितमस्तु चैत्राय चैत्रस्य वा। क्षेमं भूयात् छात्राय छात्रस्य वा। कुशलं भूयात् मैत्राय मैत्रस्य वा। सुखं भवतात् प्रजाभ्यः प्रजानां वा। अर्थो भूयात् मैत्राय मैत्रस्य वा। प्रयोजनं भूयात् चैत्राय चैत्रस्य वा। हितार्थ-पथ्यं भूयात् चैत्राय चैत्रस्य वा। हितं भूयात् मैत्राय मैत्रस्य वा। 'हित'शब्दग्रहणम् -आशिषि पक्षे षष्ठीप्रापणार्थम्, चतुर्थी तु उत्तरेणैव सिद्धा। 'हित'अर्थग्रहणं पर्यायार्थं स्यात्। आशिषि इति किम् ? क्षेमं चैत्रस्य॥२१॥" - **मलय० स्वो०॥**

[पृ०४१,४८ पं०१३,१४] "**प्रमाणपञ्चकं यत्र वस्तुरूपे न ज्ञायते। वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता॥** मी.श्लो.वा.अभाव.१४॥ अभावं दर्शयतीत्याह वार्तिककारः **प्रमाणपञ्चक**मिति। यत्र घटाख्ये वस्तुनि प्रत्यक्षादि सद्भावं नोपग्राहयते, तस्य नास्तिता भूप्रदेशाधिकरणाभावस्य प्रमाणस्य प्रमेयेत्यर्थः॥" **मीमांसा० श्लोकवार्तिक० तात्पर्यटीका०॥**

[पृ०४३ पं०७] "**सर्वज्ञोऽसाविति ह्येव तत्काले च बुभुत्सुभिः। तज्ज्ञानज्ञेय-विज्ञानरहितैर्गम्यते कथम्॥२।१३४॥** इदानीं सर्वज्ञाभावे युक्तितः प्रमाणमाह-सर्वज्ञ इति। भवद्भिर्हि बुद्धः सर्वज्ञोऽभीष्टो नान्यः; ततश्च तज्ज्ञानज्ञेयविज्ञानरहितैः बुद्धज्ञानविज्ञेयक्षणिकशून्य-दुःखात्मकत्वादिविषयज्ञानवर्जितैरतीतानागतवर्तमानैः पुरुषैः सर्वज्ञग्रहणासम्भवात् सर्वप्रमाणाभावेना-भावः प्रतीयत इत्यर्थः। तदयं प्रयोगार्थः— त्रिकालवर्तिनः पुरुषाः कालत्रयेऽपि सर्वज्ञं न गृह्णन्ति, तज्ज्ञानज्ञेयविज्ञानरहितत्वात्, अस्मदादिवत्, यश्च न कदाचित् गृह्यते, स नास्ति शशविषाणवदिति॥" - **मीमांसा० श्लो० वा० तात्पर्यटीका०॥**

[पृ० ४७ पं०८] "**बंधइ जहेव कम्मं अन्नाणादीहिं कलुसियमणो तु। तह चेव तव्विवक्खे सहावतो मुच्चति तेणं॥११७७॥** यथैवाज्ञानादिभिः कलुषितमनाः सन् जीवः कर्म्म-

ज्ञानावरणीयादि बध्नाति तथैव तद्विपक्षे-ज्ञानादिसद्भावरूपे सति स्वभावतस्तेन कर्मणा मुच्यते, नहि कारणोच्छित्तावपि कार्यस्योद्भवो भवति, निर्हेतुकत्वप्रसङ्गात्, अज्ञानादिनिमित्तं च कर्म, ज्ञानादि चाज्ञानादिप्रतिपक्षभूतम्, ततो ज्ञानादिनैरन्तर्याभ्यासवशतो निर्मूलत एवाज्ञानादिव्यवच्छित्तौ कुतस्तन्निमित्तकर्मसंबन्धबसंभवो ? येन तदुदयनिबन्धना रागादयो दोषा भवेयुरिति ज्ञानादिरूपा भावना रागादिप्रतिपक्षभूतेति स्थितम्॥११७७॥'' - **धर्मसं० टीका०।**

[**पृ०४८ पं०४**] **न चाऽऽगमेन यदसौ विध्यादिप्रतिपादकः। अप्रत्यक्षत्वतो नैवोपमानस्यापि सम्भवः॥५८२॥** 'नचे'त्यादि, न चागमेन सर्वज्ञो गृह्यते, यद् 'असौ' आगमः 'विध्यादिप्रतिपादकः' विधिप्रतिषेधवाचकः, न चायं विधिविषयः, तथा अप्रत्यक्षत्वतः कारणान्नैवोपमानेनापि गम्यते सर्वज्ञः, तस्य सादृश्यविषयत्वाद्, अनेन दृश्यमानेन पदार्थेन सदृशः तदीयो गौरिति प्रवृत्तेः॥५८२॥'' - **शास्त्र० हारि०॥**

[**पृ०५७-५८ पं०२२**] ''प्रतिपक्षभावनातो रागादिक्षय इत्युक्तं अतस्तस्या एव प्रतिपक्षभावनाया योग्यो यो भवति तमुपदर्शयन्नाह– **नाणी तवम्मि निरओ चारित्ती भावणाएँ जोगो त्ति सा पुण विचित्तरूवावत्थाभेदेण निद्दिट्ठा॥११६७॥** ज्ञानी-हेयोपादेयवस्तु-याथात्म्यावगमवान्, तपसि-बाह्यान्तरभेदभिन्ने यथाशक्ति निरतः-आसक्तः, चारित्री-सदसत्क्रिया-प्रवृत्तिनिवृत्तिलिङ्गम्यशुभपरिणामविशेषवान्, एष इत्थंभूतो रागादिप्रतिपक्षभावनाया योग्यो भवति, नान्यः, तस्य यथाभावनप्रवृत्त्ययोगतस्तस्या मिथ्यारूपत्वात्। सा पुनर्भावना विचित्ररूपाऽवस्था-भेदेन-अप्रमत्त-गुणस्थानकाद्यारोहणक्रमेणानेकावस्थाभेदेन निर्दिष्टा-कथिता तीर्थकरगणधरैरिति ॥११६७॥ तदेवं भावनायोग्यं भावनाभेदांश्चाभिधाय सांप्रतं यद्भावयति तद्दर्शयति- **भावेइ य दोसाणं निदाणमेसो तहा सरूवं च। विसयं फलं च सम्मं एवं च विरज्जई तेसुं॥११६८॥** भावयति च सम्यगेष-भावको दोषाणां-रागादीनां निदानं तथा स्वरूपं विषयं फलं च प्रतिकलमवदातबुद्धिर्भावयन् तेषु दोषेषु विरज्यते-विरक्तो भवति॥११६८॥ तत्र यथा दोषाणां निदानं भाव्यं तथा दर्शयन्नाह- **जं कुत्सि[च्छि]याणुजोगो पयइविसुद्धस्स चेव जीवस्स। एतेसिमो णिदाणं बुहाण न य सुंदरं एयं॥११६९॥** यत्-यस्मादेतेषां रागादिदोषाणां निदानं-कारणं प्रकृतिविशुद्धस्यैव सतो जीवस्य कुत्सिताणुयोगः-कुत्सितकर्मांशसंबन्धस्तस्मात्, न च-नैव बुधानाम्-अवगतवस्तुतत्त्वानां सुन्दरमेतन्निदानमुपेक्षितुमिति गम्यते॥११६९॥ **रूवंपि संकिलेसोभिस्संगापीतिमादिलिंगो उ। परमसुहपच्चणीओ एयंपि असोहणं चेव॥११७०॥** रूपमपि-स्वरूपमपि यस्माद्रागादिदोषाणां संक्लेश एवाभिष्वङ्गाप्रीत्यादिलिङ्गः, तुरवधारणे भिन्नक्रमश्च स च यथास्थानं योजितः, परमसुखप्रत्यनीकः-परमानन्दरूपप्रशमसुख-प्रत्यनीकस्तस्मादेतदपि स्वरूपमशोभनमेवेति॥११७०॥ विषयभावनामाह- **विसओ य भंगुरो खलु गुणरहितो तह य तहऽतहारूवो। संपत्तिनिप्फलो केवलं तु मूलं अणत्थाणं॥११७१॥** विषयश्च-

रागादिदोषाणां स्त्र्यादियौवनादिकः खलु-निश्चितं भङ्गुरः क्षणदृष्टनष्टस्वरूपस्तथा गुणरहितो-रागवत्समारोपितमनोज्ञत्वादिगुणविरहितस्तथाच तथातथारूपो-मनोज्ञामनोज्ञस्वरूपः, तथाहि-य एव विषयो रागवेदनीयोदयवशादभीष्टः प्रतिभात आसीत् स एवेदानीं बुभुक्षादिवेदनीयाक्रान्तमनसो-ऽनभीष्टः प्रतिभाति। तदुक्तम्- **तानेवार्थान् द्विषतस्तानेवार्थान् प्रलीयमानस्य। निश्चयतोऽस्यानिष्टं न विद्यते किंचिदिष्टं वा॥१॥** [**प्रशम० ५२**] इति, संपत्तिनिष्फलो त्ति' संप्राप्तिरिह परत्र च श्रेयोहेतुत्वमधिकृत्य निष्फला यस्य स तथाभूतः, केवलं मूलमेव-कारणमेवानर्थानाम्, तदुक्तम्- **रागद्वेषोपहतस्य केवलं कर्मबन्ध एवास्य। नान्यः स्वल्पोऽपि गुणोऽस्ति यः परत्रेह च श्रेयान्॥१॥** [**प्रशम० ५३**] इति॥११७१॥ **जम्मजरामरणादी विचित्तरूवो फलं तु संसारो। बुहजणणिव्वेदकरो एसोऽवि तहाविहो चेव॥११७२॥** रागादिदोषाणां फलं संसारः, स च यस्मात् जन्मजरामरणादिर्विचित्ररूपो बुधजननिर्वेदकरस्तस्मादेषोऽपि तत्फलभूतस्संसार**स्तथाविध एव** अशोभन एव॥११७२॥" - **धर्मसं० टीका०।**

[**पृ०५९ पं०१२**] "**यः पश्यत्यात्मानं तत्रास्याहमिति शाश्वतः स्नेहः। स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते॥१।२१९॥ गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते। तेनात्माभिनिवेशो यावत् तावत् स संसारे॥१।२२०॥ यः पश्यत्यात्मानं** तत्रात्मन्यस्य द्रष्टुरहमिति **शाश्वतो**ऽनपायी स्नेहो भवति। **स्नेहादात्मस्नेहात् सुखेषु तृष्यति,** तृष्णावान् भवतीति। **तृष्णा** च सुखसाधनत्वेनाध्यवसितानां वस्तूनां **दोषान**शुचित्वादीन् **तिरस्कुरुते** प्रच्छादयति। दोषतिरस्करणात् **गुणदर्शी** शुचित्वेष्टत्वगुणान् पश्यन् **परितृष्यन् ममेति** ममेदं सुखम् इति गर्द्धमान**स्तस्य** सुखस्य साधनानि गर्भगमनादी**न्युपादत्ते**। **तेनात्म**दर्शनमूलत्वेन जन्मादेरात्मा**भिनिवेशो यावत् तावत् स** आत्मदर्शी **संसार** एव। ॥२१९-२२०॥" - **प्रमाणावा० मनोरथनन्दि०।**

[**पृ०६१ पं०१४**] "**वास्यवासकयोश्चैवमसाहित्यान्न वासना। पूर्वक्षणैरनुत्पन्नो वास्यते नोत्तरः क्षणः॥१८२॥ उत्तरेण विनष्टत्वान्न च पूर्वस्य वासना। साहित्ये च तयोर्नैव सम्बन्धोऽस्तीत्यवासना॥१८३॥** यथैवोपरितनं विनष्टत्वेन न पूर्वस्य वासकमिष्यते, तथैव पूर्वमनुत्पन्नत्वादुपरितनस्य चेत्याह-**पूर्वक्षणै**रिति। नापि युगपदुत्पन्नयोः, तादात्म्यतदुत्पत्ति-लक्षणसम्बन्धाभावादित्याह-**साहित्ये चे**त्यर्द्धेन॥

[**पं०११**] "**अवस्थिता हि वास्यन्ते भावा भावैरवस्थितैः। अवस्थितो हि पूर्वस्माद्विद्यते नोत्तरो यदि॥१८५॥** मीमांसकपक्षे त्ववस्थितस्यात्मनो अवस्थितैरेव विज्ञानैर्वास्यवासकभावो घटत इत्याह-**अवस्थिता हीत्यर्द्धेन**। स्थायिन एव ज्ञानस्याशुतरविनाशित्वाभिप्रायेण "क्षणिका हि सा" इति व्यवहारः। एवमवस्थिते मीमांसकपक्षं

निराकृत्य वास्यवासकदर्शनान्तरमुपन्यस्यति। तत्र निराकरणम्-किं भिन्नस्योत्पत्तिरुताभिन्नस्य ? भिन्नोत्पत्तौ तादवस्थ्यं तस्य, अभिन्नोत्पत्तौ तु आत्मैवोत्पन्नः स्यात्; तदाह-**अवस्थितो हीति।''- मीमांसा० श्लो० वा० तात्पर्यटीका०॥**

[**पृ०६३ पं०१०**] ''**सर्व्वात्मना हि सारूप्ये ज्ञानमज्ञानतां व्रजेत्। साम्ये केनचिदंशेन स्यात्सर्व्वं सर्व्ववेदनं॥४३५॥** सर्व्वात्मना हि सारूप्यं सकलभेदापगमे स्यात्। तदा चार्थ एवासावपरार्थव्यक्तिवत्। कथं तज्ज्ञानं। ज्ञात्वेनाधिकत्वेन सर्व्वात्मना साम्यम्भवेत्। अथ केनचिदंशेन भेदोपि तदा सर्वं सर्व्ववेदनं भवेत् सकलस्य केनचिदंशेन समानत्वानपगमात्॥४३५॥'' **- प्रमाणवार्त्तिक० प्रज्ञाकरगुप्त० टीका०॥**

[**पृ०७० पं०१८**] ''**सत्तविहबंधगा हुंति पाणिणो आउवज्जियाणं तु। तह सुहुमसंपराया छव्विहबंधा विणिद्दिट्ठा॥३०६॥** सप्तविधबन्धका भवन्ति प्राणिनो जीवा आयुर्वर्जितानामेव ज्ञानावरणीयादिप्रकृतीनां सप्तानामिति तथा सूक्ष्मसंपरायाः श्रेणि द्वयमध्यवर्तिनः तथाविधलोभाणुवेदकाः षड्विधबन्धका विनिर्दिष्टास्तीर्थकृद्भिरिति॥३०६॥ **मोहाऊवज्जाणं पयडीणं ते उ बंधगा भणिया। उवसंतखीणमोहा केवलिणो एगविहबंधा॥३०७॥** मोहायुर्वर्जानां प्रकृतीनां ज्ञानावरणादिरूपाणां ते तु सूक्ष्मसंपराया बन्धका भणिता, मोहनीयं न बध्नन्ति निदानाभावात्तस्य किंचिच्छेषमात्रत्वावस्थितावप्यसमर्थत्वात् आयुष्कं न बध्नन्ति तथाविधपरिणामोपात्तस्य वेदनास्थानाभावात्। उपशान्तक्षीणमोहाः श्रेणिद्वयोपरिवर्तिनः उपशान्तक्षीणच्छद्मस्थवीतरागाः केवलिनश्च सयोगिभवस्था एकविधबन्धका इति॥३०७॥ **ते पुण दुसमयठिइस्स बंधगा न उण संपरायस्स। सेलेसीपडिवन्ना अबंधगा हुंति नायव्वा॥३०८॥** ते पुनरुपशान्तमोहादयस्तस्यैकविधस्य द्विसमयस्थितेरीर्यापथस्य बन्धका न पुनः सांपरायिकस्य पुनर्भवहेतोरिति। शैलेशीप्रतिपन्ना अयोगिकेवलिनोऽबन्धका भवन्ति ज्ञातव्याः सर्वथा निदानाभावादिति द्वारं॥३०८॥'' **- श्रावकप्र० टीका०॥**

''यदाहुस्तदेव दर्शयन् गाथापञ्चकमाह– **सत्तविहबंधगा होंति पाणिणो आउवज्जियाणं तु। तह सुहुमसंपराया छव्विहबंधा विणिऽद्दिट्ठा॥१६।४०॥ सत्त०** गाहा। **व्याख्या-** सप्तविधबन्धकाः सप्तप्रकारकर्मोपार्जकाः। भवन्ति स्युः। प्राणिनो जीवाः। आयुर्वर्जितानां त्वायुष्ककर्मविरहितानामेव। शेषाणां ज्ञानावरणादीनां। तद्धि एकत्र भवे सकृदेव बध्यते। तथेति समुच्चये। सूक्ष्मसंपराया दशमगुणस्थानवर्तिनः। षड्विधो बन्धो येषां ते तथा। विनिर्दिष्टा उक्ता आगमे॥४०॥ कथं षड्विधबन्धा इत्याह– **मोहाउयवज्जाणं पगडीणं ते उ बंधगा भणिता। उवसंतखीणमोहा केवलिणो एगविहबंधा॥४१॥ मोहा०** गाहा। व्याख्या- मोहायुर्वर्जानां मोहनीयायुष्कवर्जितानां। प्रकृतीनां कर्मभेदानां। ते तु सूक्ष्मसंपरायाः पुनः। बन्धका आवर्जकाः।

भणिता उक्ताः। तथा उपशान्तः सर्वथाऽनुदयावस्थः क्षीणश्च निर्जीर्णो मोहो मोहनीयं कर्म येषां ते तथा। केवलिनश्च सयोगिकेवलिनः। एकविधबन्धा व्यक्तमिति॥४१॥ **ते पुण दुसमयट्ठितियस्स बंधगा ण पुण संपरायस्स। सेलेसीं पडिवण्णा अबंधया होंति विन्नेया॥४२॥** ते० गाहा। व्याख्या- ते पुनस्त्रयोऽपि द्वौ समयौ बन्धोदयविशिष्टौ स्थितिरवस्थानं यस्य तद्द्विसमयस्थितिकं योगप्रत्ययं सातवेदनीयमित्यर्थः, तस्य। बन्धका अर्जकाः। न तु न पुनः। संपरायस्य कषायप्रत्ययस्य, उपशान्तक्षीणकषायत्वात्तेषां। तथा शैलेश्य-योग्यवस्थासंभवः करणविशेषस्तां प्रतिपन्ना आश्रिता ये ते तथा ते। अबन्धकाः कर्मबन्धरहिताः। भवन्ति स्युः। विज्ञेया ज्ञातव्या इति॥१६।४०-४२॥'' - **पञ्चाशक० अभय० टीका॥**

[**पृ०७१ पं०२२**] ''सांप्रतं सम्यक्त्ववक्तव्यतामभिधातुकाम आह- **संमत्तंपि य तिविहं खवो[ओ]वसमियं तहोवसमियं च। खइयं च कारयादि य[व]पन्नत्तं वीयरागेहिं॥७९६॥** सम्यक्शब्दः प्रशंसायामविरोधे वा, सम्यक्-जीवस्तस्य भावः सम्यक्त्वं प्रशस्तो मोक्षाविरोधी वा जीवस्य स्वभावविशेष इतियावत्। तदपि त्रिविधं-त्रिप्रकारम्, आस्तामनन्तरोक्तं करणं त्रिविधमित्यपिशब्दार्थः। चशब्दः स्वगतानेकभेदसूचकः। उक्तं च - ''तं पंचहा सम्मं-उवसमं सासाणं खयसमजं वेयगं खयगमिति''। त्रैविध्यमेव दर्शयति-क्षायोपशमिकं तथा औपशमिकं क्षायिकं चेति। कारकादि वेति वाशब्दस्त्रैविध्यस्य प्रकारान्तरतासूचनार्थः। कारकमादिशब्दात् रोचकं व्यञ्जकं च प्रज्ञप्तं वीतरागैः॥७९६॥'' - **धर्मसं० टीका०।**

[**पृ०७२,१६३ पं०८,१७**] तुलना- ''**डो दीर्घो वा॥३८॥** आमन्त्र्यार्थात्परे सौ सति अतः सेर्डोः [३.२] इति यो नित्यं डोः प्राप्तो यश्च अक्लीबे सौ [३.१९] इति इदुतोरकारान्तस्य च प्राप्तो दीर्घः स वा भवति॥ हे देव हे देवो॥ हे खमासमण हे खमासमणो। हे अज्ज हे अज्जो॥ दीर्घः। हे हरी हे हरि। हे गुरू हे गुरु। जाइविसुद्धेण पहू। हे प्रभो इत्यर्थः। एवं दोण्णि पहू जिअलोए। पक्षे। हे पहु। एषु प्राप्ते विकल्पः॥ इह त्वप्राप्ते हे गोअमा हे गोअम। हे कासवा हे कासव। रे रे चप्फलया। रेरे निग्घिणया॥'' - **हैमप्राकृत० स्वो०॥**

[**पं०१०**] ''**व्याघ्रादिभिः गौणैः तद्गुणानुक्तौ॥ ना०८।३७॥** एकार्थं नाम 'व्याघ्र' आदिभिर्गौणैः सह समस्यते, येन गुणेन गौणत्वं तद्गुणानुक्तौ। पुरुषः व्याघ्र इव पुरुषव्याघ्रः। पुरुषसिंहः। गौणैः इति किम् ? वृषभः सिंह इव, 'वृषभ'- शब्दस्य परनिपातो न भवति। तद्गुणानुक्तौ इति किम् ? पुरुषव्याघ्रः शूरः इति मा भूत्। व्याघ्र सिंह वृषभ वराह हस्तिन् कुञ्जर रुरु पुण्डरीक इत्यादि। आकृतिगणत्वात् वाग्वज्रः मुखपद्मम् इत्यादि सिद्धम्॥३७॥'' - **मलय० शब्दानु० स्वो०॥**

[**पं०१३**] तुलना- ''**मांसादेर्वा॥१।२९॥** मांसादीनामनुस्वारस्य लुग् वा भवति। मासं

मंसं। मासलं मंसलं। कासं कंसं। पासू पंसू। कह कहं। एव एवं। नूण नूणं। इआणि इआणिं। दाणि दाणिं। कि करेमि किं करेमि। समुहं संमुहं। केसुअं किसुअं। सीहो सिंधो॥ मांस मांसल। कांस्य। पांसु। कथम्। एवम्। नूनम्। इदानीम्। किम्। संमुखं। किंशुक। सिंह। इत्यादि॥'' - **हैमप्राकृत० स्वो०॥**

[पं०२०] ''संयममधिकृत्याह। सम्यगुपरमः पापस्थानेभ्यः संयमः सप्तदशप्रकारः— **पञ्चाश्रवाद्विरमणं पञ्चेन्द्रियनिग्रहश्च कषायजयः। दंडत्रयविरतिश्चेति संयमः सप्तदशभेदः ॥१७२॥ टीका**— पञ्चाश्रवाः प्राणातिपातमृषाभाषणादत्तादानमैथुनपरिग्रहाः कर्मादानहेतवस्तेभ्यो विरमणं विरतिकरणं संयमः। पञ्चेन्द्रियाणि स्पर्शनादीनि तेषां निग्रहः नियमनं निरोधः। शब्दादिषु गोचरप्राप्तेष्वरक्तद्विष्टतामाध्यस्थ्यम्। कषः संसारः कष्यते यत्र जीवः स्वकृतैः कर्मभिः कदर्थ्यते पीड्यते तस्यायाः प्राप्तिहेतवः क्रोधादयश्चत्वारस्तेषां जयोऽभिभव उदयनिरोधः, उदितानां वा विफलतापादनम्। दंडा मनोवाक्कायाख्याः। अभिद्रोहाभिमानेर्ष्यादिलक्षणो मनोदंडः। हिंस्रपरुषानृतादिलक्षणो वाग्दंडः। धावनवल्गनप्लवनादिरूपः कायदंडः। एभ्यो विरतिर्निवृत्तिः। एवमेष संयमः सप्तदशभेदो भवति। आर्षे त्वन्येन क्रमेणायमेवार्थो निबद्धः। पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुःपञ्चेन्द्रियेषु संयमः। तथा पुस्तकाद्यपरिग्रहः अजीवकायसंयमः। प्रेक्षोपेक्षाप्रमार्जनापरिष्ठापनसंयमः मनोवाक्कायसंयम इति॥१७२॥

[पं०२४] **अनशनमूनोदरता वृत्तेः संक्षेपणं रसत्यागः। कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम्॥१७५॥ टीका-** तत्रानशनं चतुर्थभक्तादि षण्मासान्तम्, तथाऽपरं भक्तप्रत्याख्यानम्, इंगिनीमरणम्, पादपोपगमनमिति। ऊनोदरता द्वात्रिंशतः कवलेभ्यो यथाशक्ति न्यूनयत्याहारं यावदष्टकवलाहार इति। वृत्तिर्वर्तनं भिक्षा तस्याः संक्षेपणं परिमितग्रहणम्, दत्तिभिर्भिक्षाभिश्च। रसत्यागः रसाः क्षीरदधिनवनीतघृतगुडादिप्रभृतयो विकृतयस्तासां त्यागः। कायक्लेशः कायोत्सर्गोत्कुटुकासनातापनादिः। संलीन आगमोपदेशेन, तद्भावः संलीनता इन्द्रियनोइन्द्रियभेदात् द्विधा। इन्द्रियैः संलीनः संहतेन्द्रियव्यापारः कूर्मवत् यथांगानि स्वात्मन्याहरति कूर्मः, तद्वदिन्द्रियाणि आत्मन्याहृत्य तिष्ठति साधुः रागद्वेषहेतुभ्यः शब्दादिभ्यो निवर्त्य व्यवस्थापितेन्द्रियः इन्द्रियसंलीनः। नोइन्द्रियं मनः। क्रोधादयश्च। आर्तरौद्रध्यानरहिते मनसि नोइन्द्रियसंलीनः। क्रोधादीनामुदयनिरोधः उदयप्राप्तानां च वैफल्यापादनं नोइन्द्रियसंलीनता। षोढा विभक्तं बाह्यं तपः परोपलक्ष्यत्वाद्बाह्यमुच्यते॥१७५॥'' **प्रशम० टीका०।**

[पृ०७३ पं०२] ''आभ्यन्तरतपोनिरूपणायाह— **प्रायश्चित्तध्याने वैयावृत्त्यविनयावथोत्सर्गः। स्वाध्याय इति तपः षट्प्रकारमभ्यन्तरं भवति॥१७६॥ टीका०** प्रायो बाहुल्येन चित्तविशोधनं प्रायश्चित्तमालोचनादि कृतातीचारमलप्रक्षालनार्थम्। एकाग्रचित्तनिरोधो ध्यानमामुहूर्तात्।

तत्रार्तरौद्रे व्युदसनीये। आर्तं चतुर्विधम् अमनोज्ञविषयसंप्रयोगे तद्विप्रयोगार्थं चित्तनिरोधः। शिरोरोगादिवेदनायाश्च विप्रयोगार्थो मनोनिरोधः। मनोज्ञविषयसंप्रयोगे तदविप्रयोगार्थो मनोनिरोधः। चन्दनोशीरादिजनितसुस्ववेदनायाश्चाविप्रयोगार्थश्चित्तनिरोधः आर्तध्यानम्। रौद्रं हिंसानुबन्धि मृषानुबन्धि स्तेयानुबन्धि विषयसंरक्षं चेति। एतयोस्त्यागस्तपः। धर्म्यं शुक्लं च ध्यानमनुष्ठेयम्। धर्मादनपेतं धर्म्यं चतुर्विधम्-आज्ञाविजयमपायविजयं विपाकविजयं संस्थानविजयं चेति। शुक् शोको दुःखं शारीरं मानसं चेति तल्लुनाति विच्छेदयतीति शुक्लम्। पृषोदरादिपाठाच्च संस्कारः। तच्चतुर्विधम्-पृथक्त्ववितर्कं सविचारम्, एकत्ववितर्कमविचारम्, सूक्ष्मक्रियमप्रतिपाति, व्युपरतक्रियमनुवर्तनम्। व्यापृतभावो वैयावृत्त्यम्, आचार्योपाध्यायादीनां भक्तपानवस्त्रपात्रादिना दशानामुपग्रहः, शरीरशुश्रूषा चेति। विनीयते येनाष्टविधं कर्म स विनयः ज्ञानदर्शनचारित्रोपचारभेदः। तत्रोपचारविनयो विनयार्हेषु अभ्युत्थानमासनदानांजलिप्रग्रहः दंडकग्रहणचरणप्रक्षालनमर्दनादि। व्युत्सर्गोऽतिरिक्तोपकरणसंसक्तभक्तपानादेरुज्झनम्। अभ्यन्तरस्य च मिथ्यादर्शनकषायादेरपाकरणम्। स्वाध्यायः पञ्चधा-वाचना पृच्छना अनुप्रेक्षा आम्नायः धर्मोपदेशश्च। तत्र वाचना आलापकदानम्, संजातसन्देहपृच्छनम् (पृच्छना), अनुप्रेक्षा मनसा परिवर्तनमागमस्य, आम्नाय आत्मानुयोगकथनम्, धर्मोपदेश आक्षेपणी विक्षेपणी संवेदनी निर्वेदनी चेति कथा धर्मोपदेशः। एवमभ्यन्तरमपि षोढा तपः॥१७६॥'' **प्रशम० टीका०।**

[**पृ०७४ पं०१९**] तुलना– ''**आल्विल्लोल्लाल-वन्त-मन्तत्तेरे-मणा-मतोः॥१५९॥** आलु इत्यादयो नव आदेशा मतोः स्थाने यथाप्रयोगं भवन्ति॥ आलु। नेहालू। दयालू। ईसालू। लज्जालुआ॥ इल्ल। सोहिल्लो। छाइल्लो। जामइल्लो॥ उल्ल। विआरुल्लो। मंसुल्लो। दप्पुल्लो॥ आल। सद्दालो। जडालो। फडालो। रसालो। जोण्हालो॥ वन्त॥ धणवन्तो। भत्तिवन्तो॥ मन्त। हणुमन्तो। सिरिमन्तो। पुण्णमन्तो। इत्त। कव्वइत्तो। माणइत्तो॥ इर। गव्विरो। रेहिरो॥ मण। धणमणो॥ केचिन्मादेशमपीच्छन्ति। हणुमा॥ मतोरिति किम्। धणी अत्थिओ॥'' - **हैमप्राकृत० स्वो०॥**

[**पृ०७५ पं०९**] ''**नन्द्यादिभ्यः अनः॥कृ०१।४६॥** एभ्यः 'अन' प्रत्ययो भवति। नन्द्यादयः नन्दन - 'रमण' इत्यादिप्रातिपदिकपाठात् अपोद्धृत्य वेदितव्याः। स च सप्रत्ययपाठः विशिष्टविषयार्थः रूपनिग्रहार्थश्च। नन्दनः। वाशनः। मदनः। दूषणः। साधनः। शोभनः। रोचनः। वर्धनः। अत्र ण्यन्तेभ्यः। सहनः। तपनः। दमनः। सर्वे एव एते संज्ञायाम्। दर्पणः। रमणः। संक्रन्दनः। संकर्षणः। बिभीषणः। पवनः। लवणः निपातनात् णत्वम्। जनार्दनः। मधुसूदनः। चित्तविनाशनः। अत्र वृद्धिः। कुलदमनः। अत्र अण् न भवति॥४६॥'' - **मलय० शब्दानु० स्वो०॥**

[**पृ०७६,७८ पं०१,६**] तुलना– ''**शेषाद्वा॥७.३.१७५॥** यस्माद्बहुव्रीहेः समासान्तः

प्रत्यय आदेशो वा न विहितस्तस्माच्छेषात् कच् प्रत्ययः समासान्तो वा भवति। बहव्यः खट्वा अस्मिन् बहुखट्वकः, बहुखट्वः, बहुमालकः, बहुमालः, बहुवीणकः, बहुवीणः। शेषादिति किम् ? प्रियपथः, प्रियधुरः, व्याघ्रपाद्, सिंहपाद्। असति शेषग्रहणे पक्षे परत्वात् कच् स्यात्॥१७५॥" - **सिद्धहेम० बृहद्वृत्ति०॥**

[**पृ०७८ पं०२**] तुलना– "**क्वचिद् द्वितीयादेः॥१३४॥** द्वितीयादीनां विभक्तीनां स्थाने षष्ठी भवति क्वचित्॥ सीमाधरस्स वन्दे। तिस्सा महुस्स भरिमो। अत्र द्वितीयायाः षष्ठी॥ धणस्य लद्धो। धनेन लब्ध इत्यर्थः। चिरस्स मुक्का। चिरेण मुक्तेत्यर्थः।.....।" " - **हैमप्राकृत० स्वो०॥**

[**पृ०७८,८३ पं०१७,१९**] "**लिहादिभ्यः॥** मलय० कृ०१।३३॥ एभ्यः परः अच् प्रत्ययो भवति। लेहः। .... 'लिह' आदयः प्रयोगगम्याः॥३३॥" **मलय० शब्दानु० टीका०॥**

[**पृ०८१,२०७ पं०४,२२**] "**सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः॥१-१॥ टीका-सम्यग्दर्शनादीन्येव** मोक्षमार्ग इति। अनवधारणे हि सति अन्यस्यापि मुक्तिपथस्य सद्भावादनर्थकमेवोपदेशदानं स्यात्, तेनैव सिद्धत्वादिति। सम्यक्शब्दश्च दर्शनशब्दसन्निधौ श्रूयते अतस्तेनैव सहास्याभिसम्बन्धो न ज्ञानचारित्राभ्यामिति कश्चिदाशङ्केत, अतस्तन्निवारणायाह **भाष्यकारः**– भाष्यम्-सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रमित्येष त्रिविधो मोक्षमार्गः।.....॥१-१॥" - **तत्त्वार्थ० सिद्धसेनी०॥**

[**पं० ५**] "**ऋक्-पूः-पथ्यपोऽत्॥७।३।७६॥** ऋगाद्यन्तात् समासादः समासान्तः स्यात्। अर्धर्चः, त्रिपुरम्, जलपथः, द्वीपम्॥७६॥" - **सिद्ध० लघु०॥**

[**पृ०८१,८४ पं०८,१०**] तुलना– "**स्वार्थे कश्च वा॥१६४॥** स्वार्थे कश्चकारादिल्लोल्लौ डितौ प्रत्ययौ वा भवतः॥ क। कुंकुमपिञ्जरयं। चन्दओ। गयणयम्मि। धरणीहरपक्खुब्भन्तयं। दुहिअए राम-हिअयए। इहयं। आलेट्ठुअं। आश्लेष्टुमित्यर्थः॥ द्विरपि भवति। बहुअयं॥ ककारोच्चारणं पैशाचिकभाषार्थम्। यथा। वतनके वतनकं समप्पेत्तून॥ इल्ल। निज्जिआसोअ-पल्लविल्लेण। पुरिल्लो। पुरा पुरो वा॥ उल्ल। मह। पिउल्लओ। मुहुल्लं। हत्थुल्ला। पक्षे। चन्दो। गयणं। इह। आलेट्ठुं। बहु। बहुअं। मुहं। हत्था॥ कुत्सादिविशिष्टे तु संस्कृतवदेव कप् सिद्धः॥ यावादिलक्षणः कः प्रतिनियत विषय एवेति वचनम्॥" - **हैमप्राकृत० स्वो०॥**

[**पं०२१**] "**जंकारण णिक्खमणं वोच्छं एएसि आणुपुव्वीए। तित्थं च सुहम्माओ णिरवच्चा गणहरा सेसा॥५९५॥** व्या० 'यत्कारणं' यन्निमित्तं निष्क्रमणं यत्तदोर्नित्यसम्बन्धात् तत् वक्ष्ये 'एतेषां' गणधराणाम् 'आनुपूर्व्या' परिपाट्या, तथा तीर्थं च सुधर्मात् सञ्जातम्, 'निरपत्याः' शिष्यगणरहिताः गणधराः 'शेषाः' इन्द्रभूत्यादयः इति गाथार्थः ॥५९५॥" - **आव० हारि०॥**

[पृ०८२ पं०१] **गर्गादेर्यञ्॥६।१।४२॥** गर्गादिभ्यो ङसन्तेभ्यो वृद्धेऽपत्येऽर्थे यञ् प्रत्ययो भवति। गर्गस्यापत्यं वृद्धं गार्ग्यः वात्स्यः।... गर्ग, वत्स... अग्निवेश.... कपि, कत... इति गर्गादिः॥६।१।४२॥" **सिद्धहेम० बृहद्वृत्ति०॥**

[पं०४] "**विदादेर्वृद्धे।६।१।४१॥** विदादिभ्यो वृद्धेऽपत्येऽर्थे अञ् प्रत्ययो भवति। विदस्यापत्यं वृद्धं वैदः, वैदौ, वैदाः, और्वः, और्वौ, उर्वाः, काश्यपः, काश्यपौ, काश्यपाः, भारद्वाजः, भारद्वाजौ, भारद्वाजाः॥६।१।४१॥" **सिद्धहेम० बृहद्वृत्ति०॥**

[पं०१५] "**ऋषि-वृष्ण्यन्धक-कुरुभ्यः।६।१।६१॥** ऋष्यादिवाचिभ्योऽपत्येऽण् स्यात्। वाशिष्ठः, वासुदेवः, श्वाफल्कः, नाकुलः॥६१॥" **सिद्धहेम० लघु०॥**

[पं०२२] "'**पति' उत्तरपद-यम-आदित्य-दिति-अदितेः ञ्यः 'अण्' अपवादे च अस्वे॥ त०११।३॥** 'पति'शब्दउत्तरपदात् 'यम'आदिभ्यश्च आक्वचितीये अर्थे, स्ववर्जिते यः 'अण्' - अपवादः तद्विषये च ञ्यः प्रत्ययो भवति। बृहस्पतिः देवता अस्य बार्हस्पत्यम्। एवम् याम्यम्। आदित्य-आदित्य्यम्। दिति-दैत्यम्। अदिति-आदित्यम्। बार्हस्पत्यः। प्राजापत्यम्। याम्यम्। आदित्यः। अत्र **अतः** [आ०६।४९] इति इञ् न भवति। अण्ग्रहणं किम्? वास्तोष्पत्यभार्यः। असति 'अण्' ग्रहणे 'स्व'अपवादविषयेऽपि अस्य समावेशः स्यात् ततः **न तद्धितः स्वरवृद्धिहेतुः** [आ० ९।८३] इति पुंभावनिषेधात् आकारः अपि श्रूयते-वास्तोष्पत्याभार्यः इति। अस्वे इति किम् ? उष्ट्रपतिः नाम वाहनम् तस्य स्वम् औष्ट्रपतम्, **वाहनात्** [ ] इति अञ्॥३॥" - **मलय० स्वो०॥**

[पृ०८३ पं०१९] अस्मिन् परिशिष्टे दृश्यतां पृ०१४ पं०९॥

[पृ०८४ पं०१०] अस्मिन् परिशिष्टे दृश्यतां पृ०१४ पं०१९॥

[पृ०८५ पं०१५] "अधुना करणावयवप्रतिपादनार्थमिदं गाथासूत्रमाह– **पिंडविसोही समिई भावण पडिमा य इंदियनिरोहो। पडिलेहणगुत्तीओ अभिग्गहा चेव करणं तु॥३॥** (भा०) अस्या व्याख्या- 'पिंड'त्ति पिण्डनं पिण्डस्तस्य विविधम्-अनेकैः प्रकारैः शुद्धिः आधाकर्मादिपरिहारप्रकारैः पिण्डविशुद्धिः, सा किम् ?, करणं भवतीति योगः, 'समिति'त्ति सम्यगितिः-सम्यग्गमनं प्राणातिपातवर्जनेनेत्यर्थः, जातावेकवचनम्, ताश्चेर्यासमित्यादयः समितयः, 'भावण'त्ति भाव्यन्त इति भावनाः-अनित्यत्वादिकाः 'पडिम'त्ति प्रतिमाः-अभिग्रहप्रकारा मासाद्या द्वादश भिक्षुप्रतिमाः, चशब्दाद्भद्रादयश्च प्रतिमा गृह्यन्ते, 'इंदियनिरोहो'त्ति इन्द्रियाणि-स्पर्शनादीनि तेषां निरोधः, आत्मीयेष्टानिष्टविषयरागद्वेषाभाव इत्यर्थः, 'पडिलेहण' इति प्रतिलेखनं प्रतिलेखना **लिख अक्षरविन्यासे** [पा०धा० १३६६] अस्य प्रतिपूर्वस्य ल्युडन्तस्यानादेशे टापि च विहिते प्रतिलेखनेति भवति, एतदुक्तं भवति-अक्षरानुसारेण प्रतिनिरीक्षणमनुष्ठानं च यत्सा प्रतिलेखना,

सा च चोलपट्टादेरुपकरणस्येति 'गुत्तीओ'त्ति गोपनानि गुप्तयो-मनोवाक्कायरूपास्तिस्रः 'अभिग्गह'त्ति अभिग्रहा द्रव्यादिभिरनेकप्रकाराः, चशब्दो वसत्यादिसमुच्चयार्थः, एवकारः क्रमप्रतिपादनार्थः, 'करणं तु'त्ति क्रियत इति करणम्, मोक्षार्थिभिः साधुभिर्निष्पाद्यत इत्यर्थः, तुशब्दो विशेषणे, मूलगुणसद्भावे करणत्वमस्य, नान्यथेति॥३॥" - **ओघनि० द्रोणीयावृत्तिः।**

[**पृ०९० पं०३**] "**ज्ञो जाण-मुणौ॥४।७॥** जानातेर्जाण मुण इत्यादेशौ भवतः॥ जाणइ। मुणइ। बहुलाधिकारात्क्वचिद्विकल्पः। जाणिअं। णायं। जाणिऊण। णाऊण। जाणणं। णाणं। मणइ इति तु मन्यतेः॥" - **हैमप्राकृत० स्वो०॥**

[**पृ०९१ पं०१**] "तदिदमवेत्य गुरुराराधनीयः, गुरुणापि शिष्यः सम्यक् शिक्षणीय इत्याह च— **धम्ममइएहिं अइसुंदरेहिं कारणगुणोवणीएहिं। पल्हायंतो व्व मणं, सीसं चोएइ आयरिओ॥१०३॥ धम्ममइएहिं०** गाहा। धर्मेण निर्वृत्तानि निरवद्यत्वाद्धर्ममयानि तैः, तथा अतिसुन्दरैर्वचनदोषरहितैः, तथा **कारणगुणोपनीतैः**, तत्र कारणं स्वभणनप्रयोजनम्, गुणाः शिष्यमाणस्य ज्ञानभाजनतादयः, कारणं च गुणाश्चेति द्वन्द्वः, तैरुपनीतान्युपढौकितानि, शिष्यस्यापि प्रतीतावारोपितानीत्यर्थः, तैः 'वचनैः' इति गम्यते, **प्रह्लादयन्निव मन**श्चितम्, अन्यस्याश्रुतत्वात्तस्यैव **शिष्यं चोदयति** शिक्षयत्याचार्यो गुरुरिति॥१०३॥" - **उपदेश० हेयोपादेया०॥**

[**पृ०९३ पं०३**] "तत्र द्रव्यग्रासैषणोदाहरणस्य सम्बन्धमाह— **चरियं व कप्पियं वा आहरणं दुविहमेव नायव्वं। अत्थस्स साहणट्ठा इंधणमिव ओयणट्ठाए॥६३०॥ व्या-** इह विवक्षितस्यार्थस्य **साधनार्थं** प्रतिपादनार्थं द्विविधमुदाहरणं ज्ञातव्यम्, तद्यथा-चरितं कल्पितं च, कथमिव विवक्षितस्यार्थस्य प्रसाधनायोदाहरणं भवतीत्यत आह-इन्धनमिव ओदनार्थम् इन्धनमिवौदनस्येति भावः,॥६३०॥" - इति **पिण्डनि० मलय०॥**

[**पृ०९५ पं०६**] "**आयरिए सुत्तम्मि य, परिवाओ सुत्त-अत्थपलिमंथो। अण्णेसिं पि य हाणी, पुट्ठा वि न दुद्धदा वंझा॥३३७॥** आचार्ये परिवादो यथा— अयमयोग्यः शिक्षापयितुम्, कथमन्यथा ईदृशं शिक्षयति ?। सूत्रपरिवादो यथा-नूनमेतादृशमेवेदं सूत्रं यदेतादृशः पठति। सूत्राऽर्थपलिमन्थ एवम्-यावत् स ग्राह्यते तावदात्मना न गुणयति न चार्थं परिभावयति ततः स्वतः सूत्राऽर्थव्याघातः। तथा 'अन्येषामपि' श्रोतॄणां सूत्रा-ऽर्थहानिः, निरन्तरं तच्छिक्षणे व्यापृतत्वात्। न च तस्य तथाशिक्षणे कश्चिदुपकारः, केवलं सुबहुरपि तत्र क्लेशः क्रियमाणो निरर्थकः। एतदेव प्रतिवस्तूपमया दर्शयति-स्पृष्टाऽपि वन्ध्या गौर्न दुग्धदा भवति, एवं सोऽपि शिष्यमाणो न किञ्चिदवगाहते॥३३७॥ शैलघनप्रतिपक्षे च शिष्ये कृष्णभूमकल्पे दातव्यम्। तथा आह- **वुट्ठे वि दोणमेहे, न कण्हभोमाउ लोट्टए उदयं। गहण-धरणासमत्थे, इय देयमछित्तिकारिम्मि॥३३८॥** कृष्णभूमे प्रदेशे द्रोणमेघेऽपि वृष्टे यद् यत्र पतत्युदकं तत्तथैव

प्रविशति, न पुनस्तस्मात् कृष्णभूमादन्यत्र लोटते, 'इति' एवं ग्रहण-धारणासमर्थे अव्यवच्छित्ति-कारिणि देयं सूत्रम्॥३३८॥'' - **बृहत्कल्प० टीका०॥**

[**पृ०९७ पं०२**] **''सेले य छिद्द चालिणि, मिहो कहा सोउ उट्ठियाणं तु। छिड्डाऽऽह तत्थ विट्ठो, सरिंसु सुमरामि नेयाणिं॥३४३॥ एगेण विसइ बीएण नीइ कन्नेण चालिणी आह। धन्न त्थ आह सेलो, जं पविसइ नीइ वा तुज्झं॥३४४॥** 5

तेषां मुद्गशैल-च्छिद्रकुट-चालनीसमानानां शिष्याणां व्याख्यां श्रुत्वोत्थितानामेवंरूपा मिथः कथा प्रावर्त्तत-कथयत आर्याः ! केन किमवधारितम् ?। तत्र च्छिद्रकुटसमानो ब्रूते-यावत् तत्र मण्डल्यामुपविष्ट आसीत् (आसं) तावत् स्मृतवान्, उत्थितस्य सर्वं विस्मृतम्॥३४३॥

चालनीसमान आह– ममैकेन कर्णेन 'विशति' प्रविशति द्वितीयेन निर्गच्छति। शैलसमानः प्राह-धन्याः स्थ यूयम् यद् युष्माकं कर्णेषु प्रविशति निर्गच्छति च, मम तु मन्दभाग्यस्य 10 मूलत एव न प्रविशति॥३४४॥ चालनीप्रतिपक्षस्य कथयितव्यम्, यत आह-

[**पं०८**] **तावसखउरकढिणयं, चालणिपडिवक्खु न सवइ दवं पि। .....॥३४५।** चालिन्याः प्रतिपक्षस्तापसस्य भाजनं खउरम्, बिल्वरस-भल्लातकरसाभ्यां लिप्तत्वात् 'कठिनम्' अतिशयेन घनं तद् 'द्रवमपि' पानीयमपि, आस्तामन्यदित्यपिशब्दार्थः, न श्रवति, तादृशस्याव्यवच्छित्तिकारित्वाद् दातव्यम्॥३४५॥ 15

[**पं०१७**] आह किं भट्टारकवचनेऽपि दोषाः सन्ति येनोच्यते 'दोषास्तिष्ठन्ति' इति ? तत्राह- **सव्वन्नुप्पामन्ना, दोसा उ न हुंति जिणमये के वि। जं अणुवउत्तकहणं, अपत्तमासज्ज व हवंति॥३४६॥** सर्वज्ञप्रामाण्यान्न केचिद् जिनमते दोषा विद्यन्ते। उक्तं च–

वीतरागा हि सर्वज्ञाः, न मिथ्या ब्रुवते वचः। यस्मात् तस्माद् वचस्तेषां, तथ्यं भूतार्थदर्शनम्॥

[ ] केवलं यद् अनुपयुक्तस्याचार्यस्य कथनम् अथवा परः श्रोता अपात्रं तद् आसाद्य 20 गुणा अपि सर्पमुखे प्रविष्टं दुग्धमिव दोषीभवन्ति॥३४६॥ सम्प्रति हंसदृष्टान्तभावनामाह–

[**पृ०९८ पं०४**] **अंबत्तणेण जीहाइ कूइया होइ खीरमुदगम्मि। हंसो मोत्तूण जलं, आपियइ पयं तह सुसीसो॥३४७॥** परिपूणकप्रतिपक्षो हंसः। तथाहि-हंसस्य जिह्वा अम्ला, ततो जिह्वाया अम्लत्वेन तत्सम्पर्कतः क्षीरमुदके कूचिका भवन्ति, ततो जलं मुक्त्वा यत् 'पयः' क्षीरं कूचिकाभूतं तद् आपिबति। एवं यो गुणान् गृह्णाति दोषान् त्यजति तस्य हंससमानस्य 25 दातव्यम्॥३४७॥

[**पं०१४**] महिषदृष्टान्तमाह– **सयमवि न पियइ महिसो, न य जूहं पिवइ लोलियं उदयं। विग्गह-विकहाहिं तहा, अथक्कपुच्छाहि य कुसीसो॥३४८॥** यथा महिषस्तृषापीडितः पानीयं पास्यामीति बुद्ध्या कश्चिद् ह्रदमवतीर्णः। स प्रथममेव प्रविष्टः सन् सर्वमुदकं लोलयति-

कलुषयति तावद् यावत् कर्दमीभवति। तच्च तथाकर्दमीभूतं नात्मना पिबति नापि यूथं पिबति। एवं यः शिष्यः प्रारब्धे व्याख्याने विग्रहेण– यथा अमुको भिक्षायां न गच्छति अमुक एतादृशस्तादृश इति विकथाभिर्नानाप्रकाराभिः यदि वा 'अथक्कपृच्छाभिः' अप्रस्तावपृच्छाभिराचार्यं तथा परिश्रमयति यथा न तस्य कथयति नाप्यन्यस्य गणस्य स एष कुशिष्यस्तस्मै न कथनीयम्॥३४८॥

[पं०२४] **जलुगा व अदूमिंतो, पियइ सुसीसो वि सुयनाणं॥३५०॥** मसकप्रतिपक्षो जलौका, यथा सा शरीरे लग्ना अदुःखापयन्ती रुधिरमापिबति, उक्तञ्च–

दंसो तिक्खनिवाएण, अप्पणो वहमिच्छई। जलुगा वि तदेवत्थं, मद्दवेणोपसप्पई॥ एवं यः शिष्य आचार्यम् 'अदूनयन्' अदुःखापयन् श्रुतज्ञानमापिबति तस्मिन् सुशिष्ये दातव्यम्॥३५०॥" - **बृहत्क० भा० टीका०॥**

[पृ०९९ पं०२१] "गोदृष्टान्तमाह– **अन्नो दुज्झिहि कल्लं, निरत्थयं किं वहामि से चारिं। चउचरणगवी य मया, अवण्ण हाणी य मरुयाणं॥३५३॥ मा णे हुज्ज अवन्नो, गोवज्झा मा पुणो य न दलिज्जा। वयमवि दोज्झामो पुण, अणुग्गहो अन्नदूढे वि॥३५४॥ सीसा पडिच्छगाणं, भरो त्ति ते वि य हु सीसगभरो त्ति। न करिंति सुत्तहाणी, अन्नत्थ वि दुल्लहं तेसिं॥३५५॥** एकेनाविरतेन चतुर्णां चरणानां-चतुर्वेदब्राह्मणानां गौर्दत्ता। ते तां दिने दिने वारकेण दुहन्ति। तत्र यदा यस्य वारको भवति स तदा चिन्तयति-सुपोषितामप्येनां कल्येऽन्यो धोक्ष्यति, ततः पोषणफलं नैवाहमुपजीविष्यामीति किमिति निरर्थिकामस्य (मस्याः) चारिं वहामि ?। एवं चिन्तयित्वा दुग्ध्वा तां मुञ्चति। तत एवं सा चारिरहिता मृता। तेषां च मरुकाणामवर्णो जातः, यथा-अमी गोहन्तार इति। पुनर्दानहानिश्च जाता, मारयन्तीति कृत्वा न कोऽपि तेभ्यः पुनर्गोदानं ददातीत्यर्थः। एवं गोस्थानीया आचार्याः, धिग्जातिस्थानीयाः शिष्याः, ते चिन्तयन्ति-वयं ध्रुवाः, प्रतीच्छकाः सूत्रार्थं गृहीत्वा गन्तुकामाः, ततस्ते करिष्यन्ति प्रत्युपेक्षण-भिक्षा-पादधावनानि। प्रतीच्छका अपि चिन्तयन्ति-एष शिष्याणां भारः, वयं सूत्रा-ऽर्थौ गृह्णीमः। एवं शिष्यैः प्रतीच्छकैश्चाचार्यस्याक्रियमाणे स सर्वमात्मना करोति। ततो वातिक-पैत्तिक-श्लेष्मिकै रोगांतङ्कैर्गृहीतः किं ददातु ?, एवं सूत्राऽर्थहानिर्जाता। अन्यत्रापि च गच्छान्तरे तेषां श्रुतज्ञानं दुर्लभम्॥ तथैकेनाविरतेन चतुर्णां चतुर्वेदानामेका गौर्दत्ता। तत्र यदा यस्य वारको भवति स तदा चिन्तयति– माऽस्माकमवर्णो भूयात्, यथा-अमीभिर्गोहत्या कृता, मा च पुनर्गोघातकत्वमवधार्य भूयो गां न दद्यात्, अन्यच्च वयं पुनरपि स्ववारके धोक्ष्यामः, अन्यदुग्धेऽपि च मम महाननुग्रहः। एवं चिन्तयित्वा प्रभूतं तृणपानीयं ददाति। ईदृशेष्वाचार्यभक्तिमत्सु दातव्यम्॥३५३-३५५॥" - **बृहत्क० भा० टीका०॥**

''अन्नो दोज्झिइ कल्ले निरत्थियं किं वहामि से चारिं। चउचरणगवी उ मया अवन्न-हाणी य बडुयाणं॥१४७३॥ तेनैतच्चिन्तितम्-हन्त ! वारकप्राप्तोऽन्यो ब्राह्मणः कल्ये तावदेतां धेनुं धोक्ष्यति, तत् किमद्य निरर्थिकामस्याश्चारीं वहामि। कल्येऽन्योऽपि हि तां दास्यति, इति विनिश्चित्य न तस्याश्चारी प्रदत्ता। ततो द्वितीये दिने द्वितीयेनापि द्विजातीयेन तथैव कृतम्। एवं तृतीये दिने तृतीयेनापि, चतुर्थे दिने चतुर्थेनापि तथैव चेष्टितम्। इत्थं च चारिविरहिता दुह्यमाना कतिपयदिनमध्ये चतुर्णां चरणानां संबन्धिनी सा गौर्मृता। ततश्च तेषां बटूनां गोहत्या समभवत्। जने चावर्णवादो जातः, हानिश्च, तेषां ततो यजमानात्, अन्यस्माद् वा पुनर्गवादिलाभाभावादिति॥१४७३॥ अन्यैस्तु यैश्चतुर्भिश्चरणैर्गौर्लब्धा, तन्मध्ये प्रथमद्विजस्तां दुग्ध्वा चारीप्रदानवेलायामचिन्तयत्, किम् ? इत्याह- **मा मे होज्ज अवण्णो गोवज्झा वा पुणो वि न दविज्जा। वयमवि दोज्झामो पुणो अणुग्गहो अन्नदुद्धे वि॥१४७४॥** मा भूज्जनमध्ये ममावर्णवादः, गोहत्या वा मा भूत्, इत्यस्याश्चारीं प्रयच्छामि। यदि तु न दास्यामि तदा संजातकलङ्केभ्योऽस्मभ्यं पुनर्गवादिकं किमपि कोऽपि न दास्यति। अपरं च, एतास्याश्चारीप्रदाने को दोषः ? प्रत्युत गुण एव, यतश्चारीप्रदानपुष्टामेतां पुनरपि वारकेणागतां वयमेव धोक्ष्यामः। यदिवा, अन्येनापि ब्राह्मणेन दुग्धायामेतस्यामस्माकमेवानुग्रह इति॥१४७४॥ अथोपनयमाह– **सीसा पडिच्छगाणं भरो त्ति ते विय हु सीसगभरो त्ति। न करेंति सुत्तहाणी अन्नत्थ वि दुल्लहं तेसिं॥१४७५॥** गुरोर्विनयकर्मणि कर्तव्ये स्वगच्छदीक्षिताः शिष्यास्तावच्चिन्तयन्ति। किम् ? इत्याह- प्रतीच्छकानामुपसंपन्नानामागन्तुकशिष्याणामयं गुरोर्विनयकरणलक्षणो भर आभारः किमस्माकम्, तेषामेव सांप्रतं वल्लभत्वात् ? इति। तेऽपि च प्रतीच्छका एवं संप्रधारयन्ति- निजशिष्याणामेवाऽयं भरः, किमस्माकमागन्तुकानामद्य समागतानामन्येद्युर्जिगमिषूणाम् ? इति। एवं संप्रधार्योभयेऽपि गुरोर्न किञ्चिद् विनय-वैयावृत्त्यादिकं कुर्वन्ति। ततश्च गुरुषु सीदत्सु तेषां सूत्रा- ऽर्थहानिः, अन्यत्रापि च गतानां तेषां दुर्विनीतानां दुर्लभं सूत्रम्, अर्थश्च। उपलक्षणत्वादन्येऽप्यवर्णवादादयो दोषाः स्वयमेवाभ्यूह्याः। अयं च दुर्विनीतशिष्योपनयः कृतः। सुविनीतविनेयोपनयस्तूक्तविपर्ययेण स्वयमेव कर्तव्य इति॥१४७५॥'' - **विशेषाव० मलधारी।**

[पृ०१०५ पं०१२] ''अणासवा थूलवया कुसीला मिउंपि चंडं पकरंति सीसा। चित्ताणुया लहु दक्खोवेवया पसायए ते हु दुरासयंपि॥१।१३॥ (सूत्रम्) **व्याख्या-** 'अणासव' त्ति आ-समन्तात् शृण्वन्ति-गुरुवचनमाकर्णयन्तीत्याश्रवा न तथा प्रतिभासाविषयस्य तस्याश्रवणादनाश्रवाः, पठ्यते च-'अणासुण' त्ति अस्यार्थः स एव, स्थूलम्- अनिपुणं यतस्ततो भाषितया वचो येषां ते स्थूलवचसः 'कुशीला' इति दुःशीलाः, 'मृदुमपि' अकोपनमपि कोमलालापिनमपि वा 'चण्डं' कोपनं परुषभाषिणं वा 'प्रकुर्वन्ति' प्रकर्षेण विदधति 'शिष्याः'

विनेयाः, सम्भवति ह्येवंविधशिष्यानुशासनाय पुनः पुनर्वचनात्मकं खेदमनुभवतो मृदोरपि गुरोः कोप इति।....॥१।१३॥'' - **उत्तरा० बृहद्वृत्तिः।**

[**पृ०१०६ पं०१८**] ''**इक् उपान्त्य-प्री-कृ-गृ-ज्ञः कः। कृ०१।१३४ ॥** 'इक्' उपान्त्यात् 'प्री' प्रभृतिभ्यश्च परः कप्रत्ययो भवति। विलिखः। बुधः। 'काष्ठभेदः' इत्यत्र परत्वात् अप्। प्रियः। संप्रियः। किरः। उत्किरः। गिलः। ज्ञः॥३४॥'' **मलय० स्वो० टीका०॥**

[**पं०१९**] ''**इटि चातो लुक्।४।२।८४।** आकारन्तस्य धातोरिडादावजादौ च क्ङिति ल्यश्लिप्रत्यये लुग् भवति इटि-पपिथ। तस्थिथ। क्ङिति- अचि पपतुः। पपुः। ....। ल्यश्लीति किम् ? यान्ति। वान्ति। व्यत्यरे। व्यत्यले।'' - **शाकटा० अमोघ०।**''

इडेत्पुसि चाऽऽतो लुक्।४।३।९४। क्ङिति अशिति स्वरे, इटि, एति, पुसि च परे आदन्तस्य धातोः लुक् स्यात्। पपुः। अदधत्। पपिथ। व्यतिरे। अदुः।'' ॥४।३।९४॥ - **सिद्धहेम० लघु०।**

[**पं०१९**] ''**अजादेः॥ ना०५।६ ॥** 'अज' आदेः संबन्धिन्यां स्त्रियां ततः परः 'आप्' प्रत्ययो भवति। अजा। एडका। चटका। कोकिला। मूषिका। अत्र जातिलक्षणस्य ङ्यो बाधा। बाला। पाका। हेडा। वत्सा। मन्दा। विलाता। कन्या। अत्र वयोलक्षणस्य। पूर्वापहाणा। अपरापहाणा। अत्र टिल्लक्षणस्य, निपातनात् णत्वम्। त्रिफला। अत्र द्विगुलक्षणस्य। क्रुञ्चा। देवविशा। उष्णिहा। अजादेः संबन्धिन्यां स्त्रियाम् इति किम् ? पञ्चानाम् अजानां समाहारः पञ्चाजी॥६॥'' - **मलय० स्वो०॥**

[**पं०२१**] ''**स्व-ज्ञ-अज-भस्त्र-अधातु-त्यय-कात्॥ ना० ६।३६॥** 'स्व'आदिभ्यः धातु-त्यवर्जयकार-ककाराभ्यां च परस्य आपः स्थाने अनितः प्रत्ययस्य अवयवे ककारे आप्परे इकार आदेशो वा भवति, न तु स्यादेः परे आपि।

कुत्सिता स्वा ज्ञातिः स्विका, स्वका। अस्विका। अस्वका। ज्ञिका, ज्ञका। अजिका, अजका। निर्भस्त्रिका, निर्भस्त्रका। आर्यिका, आर्यका। चटकिका, चटकका। 'भस्त्र' ग्रहणं न्यगर्थम् अनीचो हि पूर्वेणैव विकल्पः सिद्धः। धातु-त्यप्रतिषेधः किम् ? सुनयिका।... आपः इति किम् ? कुत्सिता स्वा आत्मा आत्मीया वा स्विका। प्रियहयिका। अस्यादेः इति किम् ? अतिभस्त्राका॥३६॥'' - **मलय० शब्दानु० स्वो०॥**

[**पृ०१०७ पं०४**] ''प्रतिज्ञातमेव करोति– **गुण-दोसविसेसन्नू, अणभिग्गहिया य कुस्सुइमतेसु। सा खलु जाणगपरिसा, गुणतत्तिल्ला अगुणवज्जा॥३६५॥** या गुण-दोषविशेषज्ञा 'कुश्रुतिमतैः' अपरकुतीर्थिकसिद्धान्तमतैरनभिगृहीता, गाथायां सप्तमी तृतीयार्थे, सा खलु ''गुणतत्तिल्ला' गुणयत्नवती अगुणवर्जा जानती पर्षत्॥३६५॥

सम्प्रति येऽस्याध्ययनस्य योग्यास्तानाह– **खीरमिव रायहंसा, जे घोट्टंति उ गुणे गुणसमिद्धा। दोसे वि य छड्डंती, ते वसभा धीरपुरिस त्ति॥३६६॥** ये 'गुणसमृद्धाः' विनयादिगुणसमन्विताः क्षीरमिव राजहंसा गुणान् 'घोटयन्ति' आस्वादयन्ति, येऽपि केचनानुपयोगप्रभवा दोषास्तानपि च 'छर्दयन्ति' परित्यजन्ति ते 'वृषभाः' **निशीथे**न गीतार्था धीरपुरुषा अधिकृतस्याध्ययनस्य योग्याः॥३६६॥ अजानतीं पर्षदमाह– 5

[**पं०११**] **जे होंति पगयमुद्धा, मिगछावग-सीह-कुक्कुरगभूया। रयणमिव असंठविया, सुहसण्णप्पा गुणसमिद्धा॥३६७॥** ये प्रकृत्या-स्वभावेन मुग्धा मृग-सिंह-कुक्कुरशावभूता, गाथायां शावशब्दस्यान्यत्रोपनिपातः प्राकृतत्वात्, भूतशब्द औपम्ये, ततोऽयमर्थः- यथा मृगादिशावा अरण्यादानीय यदि रोचते तर्हि भद्रकाः क्रियन्ते अथवा क्रूराः, एवं ये प्रकृत्या मुग्धाः परतीर्थिकैश्चाभावितास्ते यथा भण्यन्ते तथा कुर्वन्ति। तथा रत्नमिव असंस्थापिताः, 10 यथा रत्नमसंस्थापितं यादृशोऽभिप्रायस्तादृशं घटित्वा क्रियते एवमेतेऽपि यथा रोचते तथा क्रियन्ते। तथा चाह– सुखप्रज्ञापनीयाः 'गुणसमृद्धाः' विनयादिगुणनिधयः॥३६७॥ **जे खलु अभाविया कुस्सुतीहिं न य ससमए गहियसारा। अकिलेसकरा सा खलु, वयरं छक्कोडिसुद्धं वा॥३६८॥** ये खलु 'कुश्रुतिभिः' कुसिद्धान्तैः अभाविता न च स्वसमये गृहीतसारा सा खल्वक्लेशकरा अजानती पर्षत्। षट्कोटिशुद्धं वज्रमिव गुणनिधानम्। षट्कोटिशुद्धं नाम यत् 15 स्वभावतः षट्स्वपि दिक्षु शुद्धम्॥३६८॥ सम्प्रति दुर्विदग्धां पर्षदमाह-

[**पं०२०**] **किंचिम्मत्तग्गाही, पल्लवग्गाही य तुरियग्गाही य। दुवियड्ढगा उ एसा, भणिया परिसा भवे तिविहा॥३६९॥** किञ्चिन्मात्रग्राहिणः पल्लवग्राहिणः त्वरितग्राहिणः। एवमेषा दुर्विदग्धा पर्षत् 'त्रिविधा' त्रिप्रकारा भणिता॥३६९॥" - **बृहत्क० भा० टीका०॥**

[**पृ०१०८,३७६ पं०१४,३**] "**उपसर्गात् अः॥ कृ०५।६५॥** उपसर्गपूर्वात् आकारान्तात् 20 धातोः अकर्तरि स्त्रियाम् अङ् प्रत्ययो भवति। उपदा। उपधा। उपसर्गात् इति किम् ? दत्तिः॥६५॥" - **मलय० स्वो०।**

"**उपसर्गादातः।४।४।८३॥** उपसर्गात् परादाकारान्तात् धातोरकर्तरि स्त्रियामर्थेऽङ्प्रत्ययो भवति। प्रज्ञा। प्रदा। उपदा।....॥८३॥" - **शाकटा० अमोघ० टीका०।**

[**पं०१७**] "**अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं। सासणस्स हियट्ठाए** 25 **तओ सुत्तं पवत्तइ॥१११९॥** अर्थमेवाऽर्हन् भाषते, न सूत्रं द्वादशाङ्गरूपम्। गणधरास्तु तत् सूत्रं सर्वमपि निपुणं सूक्ष्मार्थप्ररूपकं बह्वर्थं चेत्यर्थम्; अथवा, नियताः प्रमाणनिश्चिता गुणा यत्र तद् नियतगुणं निगुणं ग्रथ्नन्ति। ततः शासनस्य हितार्थं सूत्रं प्रवर्तते॥ इति निर्युक्तिगाथाक्षरार्थः॥१११९॥" - **विशेषाव० मलधारी।**

[पृ०१०९ पं०६] "**विनयादिभ्यः ॥३।४।१३६॥** विनय इत्येवमादिभ्यः स्वार्थेऽण्प्रत्ययो वा भवति। विनय एव वैनयिकम्। समय एव सामयिकम्। विनय, समय, सङ्गति कथञ्चित्, अकस्मात्, उपचार, समाचार, व्यवहार, सम्प्रदान, समुत्कर्ष, संग्राम, समूह, विशेष, अव्यय इति विनयादिराकृतिगणः ॥३।४।१६६॥" - **शाकटा० अमोघ० टीका०।**

[पृ०११०,३७७ पं०५,१९] "**कर्मणः अण् ॥ कृ० २।१५।** कर्मवाचिनः नाम्नः परात् धातोः अण् प्रत्ययो भवति। कुम्भकारः। चर्चापारः। 'ग्रामं गच्छति' 'आदित्यं पश्यति' 'हिमवन्तं शृणोति' इत्यादौ प्राप्यात् कर्मणः न भवति, अनभिधानात्। 'महान्तं कुम्भं करोति' इत्यादौ च सापेक्षत्वात् ॥१५॥" **मलय० स्वो० टीका०।**

[पं०२२] "**मलविद्धमणिव्यक्तिर्यथाऽनेकप्रकारतः। कर्मविद्धात्मविज्ञप्तिस्तथाऽनेकप्रकारतः ॥५७॥** यथास्वं कर्मक्षयोपशमापेक्षिणी करणमनसी निमित्तं विज्ञानस्य न बहिरर्थादयः। "नाननुकृतान्वयव्यतिरेकं कारणं नाकारणं विषयः" इति बालिशगीतम्; तामसखगकुलानां तमसि सति रूपदर्शनमावरणविच्छेदात्, तदविच्छेदात् आलोके सत्यपि संशयादिज्ञानसम्भवात्। काचाद्युपहतेन्द्रियाणां शङ्खादौ पीताद्याकारज्ञानोत्पत्तेः, मुमूर्षाणां यथासम्भवमर्थे सत्यपि विपरीतप्रतिपत्तिसद्भावात् नार्थादयः कारणं ज्ञानस्येति स्थितम् ॥५७॥" - **लघीयस्त्रय० टीका॥**

[पृ०११२ पं०२०] "अत्र पर आह- **णत्तेगसहावत्ता आभिणिबोहादि किंकओ भेदो ?। नेयविसेसाओ चे ण सव्वविसयं जतो चरमं॥८२८॥** ज्ञप्त्येकस्वभावत्वात्-परिच्छेदैकरूपत्वात् ज्ञानस्याभिनिबोधिकादिभेदः किंकृतः-किंनिमित्तः ?, निर्निबन्धनत्वान्नैवासौ युक्त इति भावः। ज्ञेयविशेषात्-ज्ञेयभेदादाभिनिबोधिकादिको भेद इति चेत् तथाहि-वर्त्तमानकालभावि वस्तु आभिनिबोधिकज्ञानस्य ज्ञेयम्, त्रिकालवर्त्ति च शब्दगोचरः सामान्यं श्रुतज्ञानस्येत्यादि। अत्राह- 'नेत्यादि' यदेतदुक्तं तन्न। यस्मात्सर्वविषयं सर्वे-आभिनिबोधिकादिज्ञानविषया अपि विषया यस्य तत्तथा चरमं केवलज्ञानम्, न च तत्र विषयभेदेऽपि भेदोऽस्ति, तन्नासौ भेदसाधनायालमिति॥८२८॥ **अह पडिवत्तिविसेसा णेगम्मि वऽणेगभेदभावातो। आवरणविभेदो वि हु सहावभेदं विणा न भवे॥८२९॥** अथोच्येत न विषयभेदात् ज्ञानस्य भेदमिच्छामः किंतु प्रतिपत्तिविशेषात्-प्रतिपत्तिप्रकारभेदादिति। तदपि न युक्तम्। कुत इत्याह- एकस्मिन्नप्यनेकभेदभावात् - एकस्मिन्नपि ज्ञाने अनेकभेदभावप्रसङ्गात्, देशकालपुरुषस्वरूपभेदेन प्रत्येकमाभिनिबोधिकादिज्ञानानां प्रतिपत्ति-प्रकारानन्त्यभावात्। स्यादेतत्, तदावरणीयं कर्म्म अनेकभेदमतस्तदावार्यं ज्ञानमप्यनेकभेदत्वं प्रतिपद्यत इत्यत आह- 'आवरणेत्यादि' आवरणविभेदोऽपि 'हु' निश्चितं न स्वभावभेदं विना भवितुमर्हति, आवार्यापेक्षं ह्यावरणं

तच्चैकस्वभावमिति कथं तदावरणमनेकधा भवेदिति॥८२९॥ अथ निपप्तयदयं मा दोष इति स्वभावतोऽपि ज्ञानस्य भेद इष्यते इति, अत्राह–

तम्मि य सति सव्वेसिं खीणावरणस्स पावती भावो। तद्धम्मत्तातो च्चिय जुत्तिविरोहा स चाणिट्ठो॥८३०॥ तस्मिन्-ज्ञानस्य स्वभावभेदे सति सर्वेषाम्-आभिनिबोधिकादिज्ञानानां भावः-सत्ता क्षीणावरणस्य सर्वज्ञस्य प्राप्नोति। कुत इत्याह-तद्धर्म्मत्वादेव-जीवस्वभावत्वादेव। ज्ञानं हि आत्मनो नौपाधिकं किंतु स्वभावभूतम्, तस्य चेत् स्वरूपेणैवाभिनिबोधिकादिरूपतया भेदस्ततः क्षीणावरणस्यापि तद्भावः प्राप्नोति इति, स च क्षीणावरणस्याप्याभिनिबोधिकादिज्ञानभेदभावोऽनिष्टः। कुत इत्याह-युक्तिविरोधात्॥८३०॥ तमेव दर्शयति– **अरहावि असव्वन्नू आभिणिबोहादिभावतो नियमा। केवलभावातो चेव सव्वन्नू णणु विरुद्धमिदं॥८३१॥** अर्हन्नपि अष्टमहाप्रातिहार्याद्यैश्वर्यवानपि भगवानसर्वज्ञः, आभिनिबोधिकादिज्ञानभेदभावाद्-अस्मादृश इव नियमादसर्वज्ञः प्राप्नोति। केवलाभावात् सर्वज्ञ एव भगवानिति चेत् ? नन्विदं विरुद्धम्। तथाहि– यदा भगवतः केवलज्ञानोपयोगस्तदा तद्भावेन निःशेषवस्तुजातपरिच्छेदात् सर्वज्ञत्वम्, यदा त्वाभिनिबोधिकादिज्ञानोपयोगभावस्तदा देशतः परिच्छेदसंभवात् अस्मादृशस्येव तस्याप्यसर्वज्ञत्वम्, न च भगवतः सर्वज्ञत्वमसर्वज्ञत्वं चेष्यत इति विरुद्धमेतदिति स्थितम्॥८३१॥" - **धर्मसं० टीका०।**

[**पृ०११३ पं०६**] "**तम्हा अवग्गहातो आरब्भ इहेगमेव णाणंति। जुत्तं छउमत्थस्साऽसगलं इतरं तु केवलिणो॥८३५॥** तस्मादिह- विचारप्रक्रमे अवग्रहादारभ्य छद्मस्थस्य सतो यद् असकलम्- असकलविषयं ज्ञानं तत्सर्वमप्येकमेव युक्तम्, इतरत्तु सकलार्थविषयं केवलिन इति सकलासकलविषयतया ज्ञानस्य भेदद्वयमेव समीचीनं न तु भेदपञ्चकमिति॥८३५॥" - **धर्मसं० टीका०।**

[**पं०२२**] "अत्राचार्य आह– **णत्तेगसहावत्तं ओहेण विसेसओ पुण असिद्धं। एगंततस्सहावत्तणे उ कह हाणिवुड्ढीओ॥८३६॥** यदुक्तं ज्ञप्त्येकस्वभावत्वात् ज्ञानस्याभिनिबोधिकादिभेदो न युक्त इति, तत्र ज्ञप्त्येकस्वभावत्वं किमोघेन-सामान्येनेष्यते विशेषतो वा ?। यद्योघेन ततः सिद्धसाध्यता, सामान्यतो ज्ञानस्य एकरूपत्वाभ्युपगमात्। अथ विशेषतो ज्ञप्त्येकस्वभावत्वं तर्हि तदसिद्धम्। कथमित्याह-'एगंतेत्यादि' तु हेत्वर्थे यस्मादेकान्ततत्स्वभावत्वे-सर्वथा ज्ञप्त्येकस्वभावत्वे सति ज्ञानस्य ये प्रतिप्राण्यनुभवसिद्धे हानिवृद्धी ते कथं स्याताम् ?, नैव कथंचनेतिभावः, तस्माद्विशेषतस्तदसिद्धम्॥८३६॥ एतदेव भावयति- **जं अविचलियसहावे ण एगंततस्सभावत्तं। ण य तं तहोवलद्धा उक्करिसापकरिस-विसेसा॥८३७॥** यस्मादविचलितस्वभावे-एकान्तेनैकरूपे ज्ञत्वे सति ज्ञानस्य एकान्ततत्स्वभावत्वं - सर्वथा ज्ञप्त्येकस्वभावत्वं युज्यते नान्यथा, न च तत्-अविचलितस्वभावं ज्ञत्वमस्ति। कुत इत्याह-

'तहोवेत्यादि' तथा प्रतिपाण्यनुभवसिद्धतया उपलब्धात् उत्कर्षापकर्षविशेषात्, उपलभ्येते हि अभ्यासभावाभावादिना ज्ञानस्योत्कर्षापकर्षाविति॥८३७॥ **तम्हा परिथूरातो निमित्तभेदातो समयसिद्धातो। उववत्तिसंगओ च्चिय आभिणिबोहादिगो भेदो॥८३८॥** तस्मात् परिस्थूरात् वक्ष्यमाणलक्षणान्निमित्तभेदात् समयसिद्धात् - प्रवचनप्रसिद्धादाभिनिबोधादिको भेदो ज्ञानस्योपपत्ति-संगत एव-युक्तियुक्त एव॥८३८॥ तमेव परिस्थूरं निमित्तभेदमुपदर्शयति– **घातिक्खयो निमित्तं केवलनाणस्स वन्निओ समए। मणपज्जवनाणस्स उ तहावितो[हो] अप्पमादो त्ति॥८३९॥** घातयन्ति ज्ञानादिकं गुणमिति घातिनि-ज्ञानावरणदर्शनावरणमोहनीयान्तरायाणि तेषां क्षयः - साकल्येनोच्छेदो निमित्तं केवलज्ञानस्य वर्णितः समये। मनःपर्यवज्ञानस्य तु तथाविधः आमर्षौषध्यादिलब्धिनिमित्तभूतोऽप्रमाद इति॥८३९॥

ओहिन्नाणस्स तहा अणिंदिएसुं पि जो खओवसमो। मतिसुयनाणाणं पुण लक्खणभेदादिणा भेओ॥८४०॥ अवधिज्ञानस्य, तथेति समुच्चये, योऽतीन्द्रियेष्वपि रूपिद्रव्येषु क्षयोपशमः स निमित्तम्। मतिज्ञान-श्रुतज्ञानयोः पुनर्लक्षणभेदादिना भेदो ज्ञेयः, लक्षणभेदादिको निमित्तभेदो ज्ञेय इतियावत्, आदिशब्दात् हेतुफलभावादिपरिग्रहः....।॥८४०॥'' - **धर्मसं० टीका०।**

[**पृ०११४ पं०१४**] ''**न य पडिवत्तिविसेसा एगम्मि अणेगभेदभावोऽवि। जं ते तहाविसिट्ठे ण जातिभेदे विलंघेंति॥८४२॥** न च प्रतिपत्तिविशेषादेकस्मिन्नप्याभिनिबोधिकादौ ज्ञाने अनेकभेदभावः प्रसज्यतेऽपिर्भिन्नक्रमः। कुत इत्याह- 'जं ते' इत्यादि यत्- यस्मात्ते प्रतिपत्तिविशेषा देशकालपुरुषस्वरूपभेदेन भिद्यमानाः तथा- परिस्थूरनिमित्त भेदलक्षणेन प्रकारेण ये विशिष्टाः-परस्परं विभिन्ना जातिभेदास्तान् आभिनिबोधिकादीन् न विलङ्घन्ति(न्ते)-नातिक्रामन्ति, ततः कुतः प्रतिपत्तिप्रकारभेदात् भेदाभ्युपगमे सत्येकस्मिन्नप्यनेकभेदभावप्रसङ्गः ॥८४२॥'' - **धर्मसं० मलय०॥**

[**पृ०११६ पं०२**] ''अथ कथं जीवस्वभावत्वेऽपि क्षीणावरणस्य तेषामभाव इत्यत आह– **जमिह छउमत्थधम्मा जम्मादीया ण होंति सिद्धाणं। इय केवलीणमाभिणिबोहाऽभावम्मि को दोसो ?॥८४५॥** यत्-यस्मादिह छद्मस्थधर्म्मा जन्मादय आदिशब्दाज्जरामरणादिपरिग्रहः स्वभावभूता अपि न भवन्ति सिद्धानाम्-अपगतमलकलङ्कानामितिः-एवं सिद्धानां जन्मादिवत् केवलिनां सर्वज्ञानामभिनिबोधाभावे-अभिनिबोधग्रहणस्योपलक्षणत्वादभिनिबोधश्रुताद्यभावे सति को दोषः स्यात् ?, नैव कश्चिदिति भावः। न्यायस्योभयत्रापि समानत्वात्॥८४५॥'' - **धर्मसं० टीका०॥**

[**पं०१३**] ''नानाजीवानां च कियांल्लब्धिकालः ?, इत्याह– **दो वारे विजयाईसु गयस्स**

तिन्नच्चुए अहव ताइं। अइरेगं नरभवियं, नाणाजीवाण सव्वद्धं॥४३६॥ इह कश्चित् साधुर्मत्यादिज्ञानान्वितो देशोनां पूर्वकोटीं यावत् प्रव्रज्यां परिपाल्य विजय-वैजयन्त-जयन्ता-ऽपराजितविमानानामन्यतरविमाने उत्कृष्टं त्रयस्त्रिंशत्सागरोपमलक्षणदेवायुरनुभूय पुनरप्रतिपतित-मत्यादिज्ञान एव मनुजेषूत्पन्नो देशोनां पूर्वकोटीं प्रव्रज्यां विधाय तदेव विजयादिषूत्कृष्टमायुः संप्राप्य पुनरप्रतिपतितमत्यादिज्ञान एव मनुष्यो भूत्वा पूर्वकोटीं जीवित्वा सिद्ध्यतीति। एवं विजयादिषु वारद्वयं गतस्य; अथवाऽच्युतदेवलोके द्वाविंशतिसागरोपमस्थितिकेषु देवेषु त्रीन् वारान् गतस्य तानि षट्षष्टिसागरोपमानि अधिकानि भवन्ति। अधिकं चेह नरभवसंबन्धि देशोनं पूर्वकोटित्रयं चतुष्टयं वा द्रष्टव्यम्। नानाजीवानां तु सर्वाद्धं सर्वकालं मतिज्ञानस्य स्थितिः॥ इति गाथार्थः ॥४३६॥'' - **विशेषाव० मलधारि०।**

[**पं०२१**] ''तदेवं ज्ञानपञ्चकस्याप्यभिधानार्थे कथिते आह कश्चित्– नन्वादौ मति-श्रुतोपन्यासः किमर्थः ? इति। अत्राऽऽचार्यः प्राह– **जं सामि-काल-कारण-विसय-परोक्खत्तणेहिं तुल्लाइं। तब्भावे सेसाणि य तेणाईए मइ-सुयाइं॥८५॥** तेन कारणेनादौ मति-श्रुते निर्दिष्टे। येन, किम् ?, इत्याह-'जं सामीत्यादि' इति संटङ्कः। मतिशब्दोऽत्रा-ऽऽभिनिबोधिकसमानार्थो द्रष्टव्यः, आभिनिबोधिकं ह्यौत्पत्तिक्यादिमतिप्रधानत्वाद् मतिरित्यप्युच्यते। यद् यस्मात् कारणात् स्वामि-काल-कारण-विषयपरोक्षत्वैस्तुल्ये समानस्वरूपे मति-श्रुते, तेनाऽऽदौ निर्दिष्टे इत्यर्थः। तत्र स्वामी तावदनयोरेक एव 'जत्थ मइनाणं तत्थ सुयनाणं'' इत्याद्यागम-वचनादिति। कालोऽपि द्विधा-नानाजीवापेक्षया, एकजीवापेक्षया च। स चाऽयं द्विविधो-ऽप्यनयोस्तुल्य एव, नानाजीवापेक्षया द्वयोरपि सर्वकालमनुच्छेदाद्, एकजीवापेक्षया तूभयोरपि निरन्तरसातिरेकसागरोपमषट्षष्टिस्थितिकत्वेनाऽत्रैवाऽभिधास्यमानत्वादिति। कारणमपीन्द्रिय-मनोलक्षणं स्वावरणक्षयोपशमस्वरूपं च द्वयोरपि समानम्। उभयस्याऽपि सर्वद्रव्यादिविषयत्वाद् विषयतुल्यता। परनिमित्तत्वाच्च परोक्षत्वसमता। ननु यद्येवमनयोः परस्परं तुल्यता, तर्ह्येकत्र द्वयोरप्युपन्यासोऽस्तु, आदावेव तु तदुपन्यासः कथम् ?, इत्याह- 'तब्भावे इत्यादि' तद्भावे मतिश्रुतज्ञानसद्भाव एव शेषाण्यवध्यादीनि ज्ञानान्यवाप्यन्ते, नान्यथा, न हि स कश्चित् प्राणी भूतपूर्वः, अस्ति, भविष्यति वा, यो मति-श्रुतज्ञाने अनासाद्य प्रथममेवाऽवध्यादीनि शेषज्ञानानि प्राप्तवान्, प्राप्नोति, प्राप्स्यति वेति भावः। ततस्तदवाप्तौ शेषज्ञानाऽवाप्तेश्चादौ मतिश्रुतोपन्यासः॥ इति गाथार्थः॥८५॥'' - **विशेषाव० मलधारि०।**

[**पृ०११७ पं०६**] ''अथ श्रुतस्य मतिपूर्वतां विघटयन्नाह– **णाणाणऽण्णाणाणि य समकालाइं जओ मइसुयाइं। तो न सुयं मइपुव्वं मइणाणे वा सुयन्नाणं॥१०७॥** इह मति-श्रुते वक्ष्यमाणयुक्त्या द्विविधे-सम्यग्दृष्टेर्ज्ञानस्वरूपे, मिथ्यादृष्टेस्त्वज्ञानस्वभावे। तत्र ज्ञाने

अज्ञाने चैते प्रत्येकं समकालमेव भवतः, तत्क्षयोपशमलाभस्याऽऽगमे युगपदेव निर्देशात्। यतश्चैते ज्ञाने अज्ञाने च मतिश्रुते पृथक् समकाले भवतः, ततो न श्रुतं मतिपूर्वं युज्यते न हि सममेवोत्पन्नयोः सव्येतरगोविषाणयोरिव पूर्व-पश्चाद्भावः संगच्छते। अथोत्सूत्रोऽप्यसदाग्रहवशात् स न त्यज्यते, इत्याह-'मइणाणे वा इत्यादि' इदमुक्तं भवति-मतिज्ञाने समुत्पन्ने तत्समकालं च श्रुतज्ञानेऽनभ्युपगम्यमाने श्रुताज्ञानं जीवस्य प्रसज्यते, श्रुतज्ञानानुत्पादेऽद्यापि तदनिवृत्तेः, न च ज्ञानाऽज्ञानयोः समकालमवस्थितिरागमे क्वचिदप्यनुमन्यते, विरोधात्, ज्ञानस्य सम्यग्दृष्टिसंभवित्वात्, अज्ञानस्य तु मिथ्यादृष्टिभावित्वात्॥ इति गाथार्थः॥१०७॥

[पं०१२] अत्र प्रतिविधानमाह– **इह लद्धिमइ-सुयाइं समकालाइं, न तूवओगो सिं। मइपुव्वं सुयमिह पुण सुओवओगो मइप्पभवो॥१०८॥** ननु ध्यान्ध्यविजृम्भितमिदं परस्य, अभिप्रायापरिज्ञानात्, तथाहि-द्विविधे मति-श्रुते तदावरणक्षयोपशमरूपलब्धितः, उपयोगतश्च। तत्रेह लब्धितो ये मति-श्रुते ते ते एव समकालं भवतः, यस्त्वनयोरुपयोगः स युगपद् न भवत्येव, किन्तु केवलज्ञान-दर्शनयोरिव तथास्वाभाव्यात् क्रमेणैव प्रवर्तते। अत्र तर्हि लब्धिमङ्गीकृत्य मतिपूर्वता श्रुतस्योक्ता भविष्यतीति चेत्। नैवम्, इत्याह-मतिपूर्वं श्रुतम्, इह तु श्रुतोपयोग एव मतिप्रभवोऽङ्गीक्रियते, न लब्धिरिति भावः, श्रुतोपयोगो हि विशिष्टमन्तर्जल्पाकारं श्रुतानुसारि ज्ञानमभिधीयते, तच्चाऽवग्रहे-हादीनन्तरेणाऽऽकस्मिकं न भवति, अवग्रहादयश्च मतिरेव, इति तत्पूर्वता श्रुतस्य न विरुध्यते॥ इति गाथार्थः॥१०८॥'' - **विशेषाव० मलधारि०।**

[पं०१९] ''सम्यग्ज्ञानमिथ्याज्ञानयोः किंकृतो भेद इत्याह– **सम्यग्दृष्टेर्ज्ञानं सम्यग्ज्ञानमिति नियमतः सिद्धम्। आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्तम्॥२२७॥ टीका-** सम्यग्दृष्टिस्तत्त्वार्थश्रद्धानलक्षणसम्यग्दर्शनसंपन्नः शंकादिशल्यरहितस्तस्य यज्ज्ञानं तत्सम्यग्ज्ञानम्। यथावस्थितपदार्थपरिच्छेदित्वात्। नियमेनैवाव्यभिचारि सिद्धम्। आद्यत्रयमज्ञानमपि। मिथ्यादर्शनयोगात् मतिश्रुतावधयः सदसदविशेषपरिज्ञानाद्यदृच्छातो वाऽसदुपलब्धेरुन्मत्तवत् ज्ञानफलाभावाच्च मिथ्यादृष्टेरज्ञानमेव॥२२७॥'' - **प्रशम० टीका।**

[पृ०११८ पं०५] ''अथ मतिश्रुतानन्तरमवधेः, तत्समनन्तरं च मनःपर्याय-ज्ञानस्योपन्यासे कारणमाह– **काल-विवज्जय-सामित्त-लाभसाहम्मओऽवही तत्तो। माणसमित्तो छउमत्थ-विसय-भावादिसामण्णा॥८७॥** ततो मति-श्रुताभ्यामवधिर्निर्दिष्टः। कुतः ?, इत्याह- काल-विपर्यय-स्वामित्वलाभसाधर्म्यात्। तत्र नानाजीवापेक्षया, एकजीवापेक्षया च मति-श्रुताभ्यां सहाऽवधेः समानस्थितिकालत्वात् कालसाधर्म्यम्। यथा च मिथ्यात्वोदये मति-श्रुतज्ञाने अज्ञानरूपं विपर्ययं प्रतिपद्येते, तथाऽवधिरपि, इति विपर्ययसाधर्म्यम्। य एव च मति-श्रुतयोः स्वामी स एवाऽवधेरपि, इति स्वामिसाधर्म्यम्। लाभोऽपि कदाचित् कस्यचिदमीषां त्रयाणामपि ज्ञानानां

युगपदेव भवति, इति लाभसाधर्म्यम्। 'माणसमित्तो' इत्यादि इतोऽवधेरनन्तरं मनोविषयत्वाद् मनसि भवं मानसं मनःपर्यायज्ञानमुक्तम्। कुतः ?, इत्याह- छद्मस्थ-विषय-भावादिसामान्यात्; आदिशब्दात् प्रत्यक्षत्वादिसामान्यं गृह्यते, समानस्य भावः सामान्यं साम्यं तस्मादित्यर्थः। तत्र यथाऽवधिज्ञानं छद्मस्थस्यैव भवति तथा मनःपर्यायज्ञानमपीतिच्छद्मस्थसाम्यम्। उभयोरपि पुद्गलमात्रविषयत्वाद् विषयसाम्यम्। द्वयोरपि क्षायोपशमिकभाववृत्तित्वाद् भावसामान्यम्। द्वितयस्याऽपि साक्षाद्दर्शित्वात् प्रत्यक्षत्वसाम्यम्। एवमन्यापि प्रत्यासत्तिरभ्यूह्या॥ इति गाथार्थः॥८७॥

[**पं०१३**] अथ केवलज्ञानस्य सर्वोपरिनिर्देशे कारणमाह– **अंते केवलमुत्तम-जइसामित्तावसाणलाभाओ। एत्थं च मइ सुयाइं परोक्खमियरं च पच्चक्खं॥८८॥** अन्ते सर्वज्ञानानामुपरि केवलज्ञानमभिहितम्। कुतः ?, इत्याह-भावप्रधानत्वाद् निर्देशस्य-उत्तमत्वात्, सर्वोत्तमं हि केवलज्ञानम्, अतीता-ऽनागत-वर्तमाननिःशेषज्ञेयस्वरूपावभासित्वादिति। यथा च मनःपर्यायज्ञानस्य यतिरेव स्वामी, तथा केवलज्ञानस्यापि, ततो यतिस्वामित्वसाम्याद् मनःपर्यायज्ञानानन्तरं केवलज्ञानमभिहितम्। तथा समस्तापरज्ञानानामवसान एवाऽस्य लाभादवसान एव निर्देश इति। तदेवमुपन्यासक्रमे समर्थिते सत्याह कश्चित्– नन्वेतानि पञ्च ज्ञानानि किं परोक्षस्वरूपाणि, आहोस्वित् प्रत्यक्षाणि ? इति अत्राह-'एत्थं चेत्यादि' एतेषु पञ्चसु ज्ञानेषु मध्ये मति-श्रुते परोक्षे, इतरत् तु अवध्यादि ज्ञानत्रयं प्रत्यक्षम्॥ इति गाथार्थः॥८८॥'' - **विशेषाव० मलधारि०।**

[**पृ०११९ पं०२**] ''तत्र प्रत्यक्षस्य लक्षणमाह– **जीवो अक्खो अत्थव्वावण-भोयणगुणण्णिओ जेण। तं पइ वट्टइ नाणं जं पच्चक्खं तयं तिविहं॥८९॥** अक्षस्तावज्जीव उच्यते। केन हेतुना ?, इत्याह-'अत्थव्वावणेत्यादि' अर्थव्यापन-भोजनगुणान्वितो येन, तेनाऽक्षो जीवः, इदमुक्तं भवति- **अशू व्याप्तौ [पा०धा० १२६५]** अश्नुते ज्ञानात्मना सर्वार्थान् व्याप्नोतीत्युणादिनिपातनादक्षो जीवः, अथवा **अश भोजने [पा०धा० १५२४]** अश्नाति समस्तत्रिभुवनाऽन्तर्वर्तिनो देवलोकसमृद्ध्यादीनर्थान् पालयति भुङ्क्ते वेति निपातनादक्षो जीवः, अश्नातेर्भोजनार्थत्वाद्, भुजेश्च पालनाऽभ्यवहारार्थत्वादिति भावः। इत्येवमर्थव्यापन-भोजनगुणयुक्तत्वेन जीवस्याऽक्षत्वं सिद्धं भवति। तमक्षं जीवं प्रति साक्षाद्गतमिन्द्रियनिरपेक्षं वर्तते यज्ज्ञानं तत् प्रत्यक्षम्। तच्चाऽवधि-मनःपर्याय-केवलज्ञानभेदात् त्रिविधं त्रिप्रकारम्, तस्यैव साक्षादर्थपरिच्छेदकत्वेन जीवं प्रति साक्षाद् वर्तमानत्वात्॥इति गाथार्थः॥८९॥ अथ परोक्षज्ञानस्वरूपमाह–

[**पं०१२**] **अक्खस्स पोग्गलकया जं दव्विन्दिय-मणा परा तेणं। तेहिं तो जं**

नाणं परोक्खमिह तमणुमाणं व॥९०॥ यद् यस्माद् द्रव्येन्द्रियाणि द्रव्यमनश्च, अक्षस्य जीवस्य पराणि भिन्नानि वर्तन्ते। कथंभूतानि पुनर्द्रव्येन्द्रिय-द्रव्यमनांसि ?, इत्याह-पुद्गलकृतानि पुद्गलस्कन्धनिचयनिष्पन्नानि, हेतुद्वारेण चेदं विशेषणं द्रष्टव्यम्-पुद्गलकृतत्वाद्, येन द्रव्येन्द्रिय-मनांसि जीवस्य परभूतानि, तेन तेभ्यो यद् मति-श्रुतलक्षणं ज्ञानमुत्पद्यते, तत् तस्य साक्षादनुत्पत्तेः परोक्षम्, अनुमानवदिति। इदमुक्तं भवति। अपौद्गलिकत्वादमूर्तो जीवः, पौद्गलिकत्वात् तु मूर्तानि द्रव्येन्द्रिय-मनांसि, अमूर्ताच्च मूर्तं पृथग्भूतम्, ततस्तेभ्यः पौद्गलिकेन्द्रिय-मनोभ्यो यद् मति-श्रुतलक्षणं ज्ञानमुपजायते, तद् धूमादेरग्न्यादिज्ञानवत् परनिमित्तत्वात् परोक्षमिह जिनमते परिभाष्यते। इति गाथार्थः॥९०॥" - **विशेषाव० मलधारि०।**

[**पं०६, पृ०१७९ पं०१७**] "**पृषोदरादयः।२।२।१७२॥** पृषोदर इत्येवंप्रकाराः शब्दाः अविहितलोपागमादेशवर्णविकाराः शिष्टैः प्रयुज्यमानाः साधवो वेदितव्याः। पृषदुदरमस्येति पृषोदरः। ...॥२।२।१७२॥" - **शाकटा० अमोघ० टीका॥**

[**पं०२०**] "**निर्वृत्त्युपकरणे द्रव्येन्द्रियम्॥२-१७॥ भा०**-तत्र निर्वृत्तीन्द्रियमुपकरणेन्द्रियं च द्विविधं द्रव्येन्द्रियम्। निर्वृत्तिरङ्गोपाङ्गनामनिर्वर्तितानीन्द्रियद्वाराणि, कर्मविशेषसंस्कृताः शरीरप्रदेशाः, निर्माणनामाङ्गोपाङ्गप्रत्यया मूलगुणनिर्वर्तनेत्यर्थः। उपकरणं बाह्यमभ्यन्तरं च निर्वर्तितस्यानुपघातानुग्रहाभ्यामुपकारीति॥१७॥" - **तत्त्वार्थ० सिद्धसेनी०॥**

[**पृ०१२० पं०४**] न च चैतन्यं प्रति भूतसमुदायस्यानुरूपत्वमस्ति, यस्मात्- **बोहसहावममुत्तं विसयपरिच्छेदगं च चेतन्नं। विवरीयसहावाणि य भूयाणि जगप्पसिद्धाणि॥५०॥** बोधस्वभावं स्वयंविदितात्मरूपत्वात्, अमूर्त्तं रूपाद्याकार-विशेषविकलत्वात्, विषयपरिच्छेदकं तद्ग्रहणपरिणामस्वभावत्वात्, 'चः' समुच्चये, चेतनस्य भावः कर्म्म वा चैतन्यम्। भूतानि पुनश्चैतन्यापेक्षया विपरीतस्वभावानि। तथाहि- न तानि बोधरूपाणि स्वसंवेदितात्मरूपत्वाभावात्, नामूर्त्तानि रूपाद्याकारविशेषत्वात्, न विषयपरिच्छेदकानि बोधरूपत्वाभावे तद्ग्रहणपरिणामाभावात्। अस्मिंश्चार्थे सकललोकप्रसिद्धिरेव प्रमाणं नान्यत्। यो हि प्रत्यक्षसिद्धमप्यर्थमपह्नुते तस्य लोकप्रतीतिरेव प्रायो बाधकप्रमाणम्, यथा-अचन्द्रः शशीत्याद्यभिधातुः, अत आह-जगतोऽपि प्रसिद्धानि जगत्प्रसिद्धानि यथोक्तचैतन्यविपरीत-स्वभावत्वेन॥५०॥ **ता धम्मधम्मिभावो कहमेतेसिं ? तहब्भुवगमे य। अणुरूवत्ताभावे काठिण्णजलाण किन्न भवे ?॥५१॥** 'ता' तस्मात्कथम्, 'अनयोः' चैतन्यभूतसमुदाययोर्धर्म-धर्म्मिभावः ?, नैव कथंचनेति भावः, अत्यन्तवैलक्षण्येनानुरूपत्वाभावात्। तथापि तदभ्युपगमे दोषमाह- 'तहेत्यादि'। अनुरूपत्वाभावेऽपि च 'तथा' धर्म्मधर्म्मिभावेनाभ्युपगमे क्रियमाणे काठिन्यजलयोरपि धर्म्मधर्म्मिभावः किन्न भवति ?, भवेदेवेति भावः, अनुरूपत्वाभावाविशेषात्,

न च भवति, तस्मान्न चैतन्यस्य भूतसमुदायो धर्म्मी। तथा च प्रयोगः-न यस्य येन सह अनुरूपत्वम्, न तस्य तं प्रति धर्म्मिभावः, यथा जलस्य काठिन्यं प्रति। नास्ति च भूतसमुदायस्य चैतन्यं प्रत्यनुरूपत्वमिति व्यापकानुपलब्धिः। न चासिद्धता हेतोः, 'विवरीयसहावाणि य भूयाणि जगप्पसिद्धाणी'त्यनेन तस्याः प्रागेवापास्तत्वात्॥५१॥" - **धर्मसं० टीका०।**

[**पृ०१२१ पं०७**] "ये तु वैशेषिकादयोऽक्षमिन्द्रियं प्रति गतं प्रत्यक्षम्, शेषं तु परोक्षमिति मन्यन्ते, तद्दर्शनमपाकर्तुमाह– **केसिंचि इंदिआइं अक्खाइं, तदुवलद्धि पच्चक्खं। तन्नो, ताइं जमचेअणाइं जाणंति न घडो व्व॥९१॥** केषांचिद् वैशेषिकादीनां मतेनाऽक्षाणि स्पर्शनादीनीन्द्रियाण्युच्यन्ते, न जीव इति भावः। 'तदुवलद्धि पच्चक्खं ति' तेषामिन्द्रियाणां येयं साक्षाद्घटाद्यर्थोपलब्धिर्घटादिज्ञानं तत् प्रत्यक्षम्, अन्यत् तु परोक्षमिति। अङ्गीक्रियतां तर्हि तन्मतमित्याह-'तन्नो इत्यादि' तदेतद् वैशेषिकादिमतं न युक्तम्, यतस्तानीन्द्रियाण्यचेतनानि, ततश्च न जानन्ति न वस्तुस्वरूपमुपलभन्ते, घटवत्, तथाहि-यदचेतनं तत् सर्वमपि न जानाति, यथा घटादि, अचेतनानि चेन्द्रियाणि, इति कुतस्तेषामुपलब्धिः ? या प्रत्यक्षं स्यादिति भावः। तथा इन्द्रियाणां ज्ञानशून्यत्वे मूर्तिमत्त्व-स्पर्शादिमत्त्वादयोऽपि हेतवो वाच्याः॥ इति गाथार्थः॥९१॥

नन्विन्द्रियाणि न जानन्ति, इति प्रत्यक्षविरोधिनी प्रतिज्ञा, तेषां साक्षात्कारेणाऽर्थोपलब्धेरनुभवप्रत्यक्षेण प्रतिप्राणि प्रसिद्धत्वात्, इत्याशङ्क्याह– **उवलद्धा तत्थाऽऽया तव्विगमे तदुवलद्धसरणाओ। गेहगवक्खोवरमे वि तदुवलद्धाऽणुसरिया वा॥९२॥** 'तत्थ' त्ति तत्र चक्षुरादीन्द्रिये करणतया व्याप्रियमाणे उपलब्धा वस्तूनां बोद्धा आत्मैव द्रष्टव्यः, न त्विन्द्रियम्। कुतः ?, इत्याह- 'तव्विगम' इत्यादि तस्य चक्षुरादीन्द्रियस्य विगमेऽभावेऽपीत्यर्थः, तदुपलब्धस्य पराभ्युपगमेनेन्द्रियोपलब्धस्याऽर्थस्य स्मरणात्। क इव ? इत्याह- तेन गृहगवाक्षेण करणभूतेनोपलब्धस्य योषिदाद्यर्थस्य योऽनुस्मर्ता देवदत्तादिः स इव, वाशब्दस्येवाऽर्थत्वात्। क्व सति ?, इत्याह- गृहगवाक्षस्योपरमेऽप्यभावेऽपि सतीत्यर्थः। अत्र प्रयोगः-इह यो येषूपरतेष्वपि तदुपलब्धानर्थाननुस्मरति स तत्रोपलब्धा दृष्टः, यथा गृहगवाक्षोपलब्धानामर्थानां तद्विगमेऽप्यनुस्मर्ता देवदत्तादिः, अनुस्मरति चेन्द्रियविगमेऽपि तदुपलब्धमर्थमात्मा, तस्मात् स एवोपलब्धा, यदि पुनरिन्द्रियाण्युपलम्भकानि स्युः, तदा तद्विगमे कस्याऽनुस्मरणं स्यात् ?। न ह्यन्येनोपलब्धेऽर्थेऽन्यस्य स्मरणं युक्तम्, अतिप्रसङ्गात्, अस्ति चाऽनुस्मरमण्। .....॥९२॥" - **विशेषाव० मलधारि०।**

[**पृ०१२३ पं०१६**] "तथा च भाष्यकारो विषयविभागमुपदर्शयन्निदमेवाह– **एगंतेण परोक्खं लिंगियमोहाइयं च पच्चक्खं। इंदिय-मणोभवं जं तं संववहारपच्चक्खं॥९५॥** 'एगंतेण परोक्खं लिंगियमिति' बाह्ये धूमादौ लिङ्गे भवं लैङ्गिकं यज्ज्ञानं तदेकान्तेनाऽऽत्मन इन्द्रिय-मनसां चाऽसाक्षात्कारेणोपजायमानत्वादेकान्तपरोक्षम्-इन्द्रिय-मनोभिर्गृहीते बाह्ये धूमादौ

लिङ्गेऽग्न्यादिविषयं यज्ज्ञानमुत्पद्यते तदेकान्तेन परोक्षम्, इन्द्रियमनसामात्मनश्च तद्ग्राह्यार्थस्यैकान्तेन परोक्षत्वात्, इति भावः। 'ओहाइयं च पच्चक्खमिति' 'एकान्तेन' इत्यत्राऽपि वर्तते, ततश्चाऽवधिमनःपर्यायकेवललक्षणं ज्ञानत्रयमेकान्तेनाऽऽत्मनःप्रत्यक्षम्, बाह्यलिङ्गमन्तरेणेन्द्रिय-मनोनिरपेक्षत्वेन च जीवस्य वस्तुसाक्षात्कारित्वादिति। 'इंदियमणोभवमित्यादि' यत्पुनरिन्द्रिय-मनोभवं ज्ञानं तत् संव्यवहारप्रत्यक्षम्, लिङ्गमन्तरेणैव यदिन्द्रिय-मनसां वस्तुसाक्षात्कारित्वेन ज्ञानमुपजायते तत् तेषां प्रत्यक्षत्वाल्लोकव्यवहारमात्रापेक्षया प्रत्यक्षमुच्यते, न परमार्थत इत्यर्थः, इन्द्रिय-मनःसु अचेतनत्वेन ज्ञानवृत्तेरभावादिति प्रागेवोक्तम् । एतामेव च संव्यवहारप्रत्यक्षताम-पेक्ष्याऽऽगमेऽपीन्द्रियप्रत्यक्षमित्युक्तम्, परमार्थतस्त्ववध्यादिकमेव प्रत्यक्षम्, आत्मनः प्रत्यक्षत्वात्, इदं तु तस्य परोक्षम्, परनिमित्तत्वात्, अनुमानादिवत्, इत्यनेकधा प्रोक्तमेव॥ .....। तस्मादिन्द्रिय-मनोभवं ज्ञानं परनिमित्तत्वात् परोक्षम्, मति-श्रुतान्तर्भावाच्च परमार्थतः परोक्षम्, संव्यवहारतस्तु प्रत्यक्षमिति स्थितम् इति गाथार्थः॥९५॥" - **विशेषाव० मलधारि०।**

[**पृ०१२४ पं०११**] "**इन्द्रियम्।। त० २।६।** 'इन्द्र'शब्दाद् 'इय' प्रत्ययो निपात्यते, निपातनं रूढ्यर्थम्। इन्द्रः आत्मा तस्य लिङ्गम् इदम् आवरणक्षय-उपशमजम्, तेन जुष्टम् दत्तं वा इन्द्रियम्॥६॥" - **मलय० स्वो० टीका०॥**

[**पृ०१२६ पं०१**] "**स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्राणि॥२/२०॥ भा०** स्पर्शनम्, रसनम्, घ्राणम्, चक्षुः, श्रोत्रमित्येतानि पञ्चेन्द्रियाणि॥२०॥" - **तत्त्वा० भा०॥**

[**पं०२०**] "**पुंनाम्नि घः।। कृ० ६।५।** धातोः करणे आधारे च पुंनाम्नि 'घ'प्रत्ययो भवति । प्रच्छदः। उरच्छदः। आधारे-आकरः। आलवः। 'पुं' ग्रहणम् किम् ? विचयनी। बहुलाधिकारात् इह न भवति। दोहनः। प्रसाधनः॥५॥" - **मलय० स्वो० टीका०॥**

[**पृ०१२८,१३० पं०१०,१**] "प्रकृतीनामौदयिकभावो द्विधा भवति– शुद्धः क्षायोपशमिकभावानुगतश्च, तद्व्यक्तीकरणाय स्पर्द्धकप्ररूपणामाह– **चउतिट्ठाणरसाइं सव्वघाईणि होंति फड्डाइं। दुट्ठाणियाणि मीसाणि देसघाईणि सेसाणि॥२९॥** [**स्वो०**]-'चतुस्त्रिस्थानरसानि सर्वविघातीनि भवन्ति स्पर्द्धकानि द्विस्थानकानि मिश्राणि देशघातीनि शेषाणी'ति पदानि। पदार्थस्तु-चतुःस्थानिक-त्रिस्थानिकरसाभ्यां यानि निर्वृत्तानि स्पर्द्धकानि तान्युदयप्राप्तानि स्वहन्तव्यसर्वघातीनि भवन्ति, द्विस्थानिकरसस्पर्द्धकानि मिश्राणि, कानिचित्सर्वघातीनि कानिचिद्देशघातीनि भवन्ति, शेषाण्येकस्थानिकरसस्पर्द्धकानि सर्वाण्यपि देशघातीनीति गाथार्थः॥३।२९॥" - **पञ्चसं० स्वो० टीका०॥**

[**पृ०१२८ पं०१४**] "**घोसाडइनिंबुवमो असुभाण सुभाण खीरखंडुवमो। एगट्ठाणो उ रसो अणंतगुणिया कमेणियरा॥३३॥** (**स्वो०**)-'घोषातकीनिम्बोपमोऽशुभानां शुभानां

क्षीरखण्डोपमः, एकस्थानस्तु रसोऽनन्तगुणिताः क्रमेणेतरे' इति पदानि। पदार्थस्त्वयम्- घोषातनिम्बरसोपमोऽशुभप्रकृतीनामेकस्थानिको रसः तुशब्दविशेषितत्वाद् ज्ञापयत्येकस्थानिक-रसस्पर्द्धकानि असंख्येयव्यक्तिव्यक्तानि, सर्वजघन्यस्पर्द्धकस्येयमुपमा, अनन्तासु रसव्यक्तिव्यतीतासु तदुत्तरस्पर्द्धकः, एवं द्वित्रिचतुःस्थानिकान्यप्यसंख्येयव्यक्तीनि स्पर्द्धकानि, परस्परमनन्तगुणत्वमतो भावनीयम्। शुभप्रकृतीनां एकस्थानिकरसस्यैवाभावाद् द्विस्थानिकसर्व्वाघातिसर्वजघन्यरसस्पर्द्धकस्य क्षीरखण्डमित्युपमा, भूयः स्पर्धकवृद्धावुत्तरस्पर्द्धकेष्वनन्तगुणा वृद्धिरिति गाथार्थः॥३।३३॥'' - **पञ्चसं० स्वो० टीका।**

[**पृ०१२९ पं०५**] रसहेतूनां विभागमभिधातुकाम आह- **उप्पलभूमीवालुयजलरेहा-सरिससंपराएसु। चउट्ठाणाई असुभाणं सेसयाणं तु वच्चासा॥३२॥** (स्वो०)- 'उपलभूमीवालुकाजलरेखासदृशसम्परायैश्चतुःस्थानादयोऽशुभानां शेषकाणां तु व्यत्यासादिति' पदानि। पदार्थस्तु-रेखाशब्दः प्रत्येकं सम्बन्धनीयः, उपलरेखेति पाषाणरेखा, तया प्रभूत-कालोदयव्यपदेशेनातितीव्रत्वं कषायाणां प्रतिपाद्यते, पाषाणरेखासदृशैः कषायैः सर्वासामशुभप्रकृतीनां चतुःस्थानिकरसबन्धो भवति, आतपशुष्कतडागभूरेखासदृशैः कषायैर्मनाग्मन्दोदयैः त्रिस्थानिकरस-बन्धोऽशुभप्रकृतीनां भवति, वालुकारेखासदृशैः कषायैः मन्दोदयैरशुभप्रकृतीनां द्विस्थानिकरसबन्धो भवति, जलरेखासदृशैः कषायैरतिमन्दोदयैरेकस्थानिकरसबन्धः, तुशब्देन विशेषितत्वात् पूर्वोक्तानामेव सप्तदशाशुभप्रकृतीनां भवति, न शेषशुभाशुभप्रकृतीनामिति। शुभप्रकृतीनां पाषाणरेखासमकषायैः द्विस्थानिको रसः भूरेखातुल्यैस्त्रिस्थानिकः, वालुकाजलरेखातुल्यैः कषायैश्चतुःस्थानिको रसस्पर्द्धकानां बन्धो भवति, व्यत्यासादिति वचनादिति गाथार्थः॥३।३२॥'' - **पञ्चसं० स्वो० टीका।**

[**पृ०१३० पं०९**] ''बन्धं प्रति सर्वप्रकृतीनां रसस्थानान्यभिधातुकाम आह– **आवरणम-सव्वग्घं पुंसंजलणंतरायपयडीओ। चउट्ठाणपरिणयाओ दुतिचउठाणाउ सेसाओ॥३१॥** [**स्वो०**]-'आवरणमसर्व्वघ्नं पुंसंज्वलनान्तरायप्रकृतयः, चतुःस्थानपरिणता द्वित्रिचतुःस्थानाः शेषा' इति पदानि। पदार्थस्तु 'आवरणं' ज्ञानावरणं दर्शनावरणं च 'असर्वघ्नं' असर्वघाति मतिश्रुतावधिमनः-पर्यायज्ञानचक्षुरचक्षुरवधिदर्शनावरणाख्याः सप्त प्रकृतयः, पुरुषवेदसञ्ज्वलन-कषायदानाद्यन्तराय-प्रकृतयश्चैताः सप्तदशापि 'चतुःस्थानपरिणताः' एकद्वित्रिचतुःस्थानिकरसपरिणाम-परिणताः-तत्स्वरूपापन्ना इति, शेषप्रकृतयस्त्रिस्थानपरिणता द्वित्रिचतुःस्थानिकरसपरिणामपरिणताः, शेषनोकषायाणां द्विस्थानिकरसोदयेनैव देशघातित्वं तिरिच्य शेषा अशुभप्रकृतयो बन्धमेव नायान्ति, तद्बन्धहेतुव्यवच्छेदात्। ये अपि केवलज्ञानावरणकेवलदर्शनावरणे बन्धमायातः, तयोरपि सर्वघातित्वाद् द्विस्थानक एव रसो बन्धमागच्छति, नैकस्थानकः, सर्वघातिनीनां जघन्यपदेऽपि

द्विस्थानकरसबन्धसम्भवात्। यास्तु शुभाः प्रकृतयस्तासामत्यन्तविशुद्धौ वर्त्तमानश्चतुःस्थानकमेव रसं बध्नाति, न त्रिस्थानकं द्विस्थानकं वा। मन्दमन्दतरविशुद्धौ तु वर्त्तमानस्त्रिस्थानकं वा बध्नाति द्विस्थानकं वा, यदात्यन्ताविशुद्धसंक्लेशाद्धायां वर्त्तते, तदा तस्य शुभप्रकृतयो बन्धमेव नायान्ति, कुतस्तद्गतरसस्थानचिन्ता ? या अपि नरकगतिप्रायोग्यं बध्नतोऽतिसंक्लिष्टस्यापि वैक्रियतैजसादिकाः प्रकृतयो बन्धमायान्ति तासामपि तथास्वाभाव्यात् द्विस्थानकस्यैव रसस्य बन्धः, नैकस्थानकस्य, एतच्चाग्रे स्वयमेव वक्ष्यति, परमिह प्रस्तावादुक्तम्। तत इत्थं शेषप्रकृतीनामेकस्थानकरसबन्धासम्भवात्समीचीनमुक्तं द्वित्रिचतुःस्थानपरिणताः शेषाः प्रकृतय इति॥३।३१॥'' - **पञ्चसं० स्वो० टीका।**

[**पं०१७**] ''तदेव रसस्वरूपं वक्तुकाम आह- **जो घाएइ सविसयं सयलं सो होइ सव्वघाइरसो। सो निच्छिद्दो निद्धो तणुओ फलिहब्भहरविमलो॥३।४०॥** (**स्वो०**)- 'यो घातयति स्वविषयं सकलं स भवति सर्वघातिरसः, सुगममर्द्धम्, स निच्छिद्रः स्निग्धः तनुकः स्फटिकाभ्रहारविमल' इति पदानि। पदार्थस्तु-सर्वघातिरसो 'निच्छिद्रो भवति स्फटिकवत्, स्निग्धो हारवत्, तनुकः सूक्ष्माऽभ्रपटलवत्, स्फटिकाभ्रहारवद्विमलो वेति गाथार्थः॥३।४०॥

(**मलय०**) - इह रसभेदतः प्रकृतीनां सर्वदेशघातित्वमुक्तम्, अतो रसमेव सर्वदेशघातित्वेन प्ररूपयति-यः स्वविषयं ज्ञानादिकं सकलमपि घातयति, स्वकार्यसाधनं प्रत्यसमर्थं करोति, स रसः सर्वघाती भवति। स च ताम्रभाजनवन्निश्छिद्रः, घृतमिवातिशयेन स्निग्धः, द्राक्षावत्तनुकस्तनुप्रदेशोपचितः, स्फटिकाभ्रहारवच्चातीवनिर्मलः। इह रसः केवलो न भवति, ततो रसस्पर्द्धकसंघात एवंरूपो द्रष्टव्यः॥'' - **पञ्चसं० स्वो० टीका।**

[**पृ०१३१ पं०२**] ''देशघातिरसस्वरूपमाह- **देसविघाइत्तणओ इयरो कडकंबलंसुसंकासो। विविहबहुछिद्दभरिओ अप्पसिणेहो अविमलो य॥३।४१॥** (**स्वो०**)- 'देशघातित्वादितरः कटकम्बलांशुकसङ्काशः विविधबहुच्छिद्रभृतोऽल्पस्नेहोऽविमलश्चे'ति पदानि। पदार्थस्तु देशघातित्वाद्धेतोरितरो देशघातिरसः कटसदृशो बृहच्छिद्रविवक्षया, कम्बलसदृशो मध्यमच्छिद्रविवक्षया, अंशुकसदृशोऽतिसूक्ष्मच्छिद्रविवक्षया, एवं स्थूरत्वादिविवक्षया छिद्रसंख्याविवक्षया वा व्याख्या कार्या, अल्पस्नेहो वैमल्यरहितश्चेति गाथार्थः॥३।४१॥

[**पं०७**] अघातिरसस्वरूपमाह- **जाण न विसओ घाइत्तणंमि ताणंपि सव्वघाइरसो। जायइ घाइसगासेण चोरया वेह चोराणं॥३।४२॥** (**स्वो०**) -'यासां न विषयो घातित्वे तासामपि सर्वघातिरसो जायते घातिसमासेन, चौरता वेहाचौराणामि'ति पदानि। पदार्थस्तु-यासामघातिकर्मप्रकृतीनां हन्तव्यविषयो नास्ति तासामपि सर्वघातिरसो भवति, रसस्थानस्पर्द्धकान्यधिकृत्य घातिकर्मसंयोगात् हेतोः, यथा चौरता भवति चौरसङ्गेनेह लोके-अस्मिन्

जने, तद्वियोगेऽसर्वघातित्वं संजातमेवेति गाथार्थः॥३।४२॥'' - **पञ्चसं० स्वो० टीका।**

[**पृ०१३२ पं०१९**] ''अथ क्षायोपशमिकमाह– **मिच्छत्तं जमुइण्णं तं खीणं अणुइयं य उवसंतं मीसीभावपरिणयं वेइज्जंतं खओवसमं॥५३२॥** यदुदीर्णमुदयमागतं मिथ्यात्वं तद् विपाकोदयेन वेदितत्वात् क्षीणं निर्जीणम्, यच्च शेषं सत्तायामनुदयागतं वर्तते तदुपशान्तम्। उपशान्तं नाम विष्कम्भितोदयमपनीतमिथ्यास्वभावं च शेषमिथ्यात्वम्, मिथ्यात्वमिश्रपुञ्जावाश्रित्य विष्कम्भितोदयम्, शुद्धपुञ्जमाश्रित्य पुनरपनीतमिथ्यास्वभावमित्यर्थः। आह- यद्येवम्, अशुद्ध-मिश्रपुञ्जद्वयरूपस्य विष्कम्भितोदयस्यैवोपशान्तस्यानुदीर्णता युज्यते, न तु शुद्धपुञ्जलक्षणस्यापनीतमिथ्यात्वस्वभावस्य, तस्य विपाकेन साक्षादनुभूयमानत्वादिति, भवद्भिस्तु 'अणुइयं च उवसंतं' इति वचनाद् द्विस्वभावमप्युपशान्तमनुदीर्णमुक्तम्, तदेतत् कथम् ? इति। अत्रोच्यते-सत्यमेतत्, किन्त्वपनीतमिथ्यास्वभावत्वात् स्वरूपेणाऽनुदयात् तस्याऽप्यनुदीर्णतोपचारः क्रियते। अथवा, अनुदीर्णत्वमशुद्धमिश्रपुञ्जद्वयरूपस्य मिथ्यात्वस्यैव योज्यते, न तु सम्यक्त्वस्य, तस्यापनीतमिथ्यास्वभावत्वलक्षणमुपशान्तत्वमेव योज्यत इत्यर्थः। कथम् ?, इति चेत्। उच्यते- मिथ्यात्वं यदुदीर्णमुदयमागतं तत् क्षीणम्, शेषं त्वशुद्धमिश्रपुञ्जद्वयलक्षणं मिथ्यात्वमनुदीर्णं 'अणुइयं च' इति चशब्दस्य व्यवहितप्रयोगात् शुद्धपुञ्जलक्षणं तदुपशान्तं चेति- अपनीतमिथ्यास्वभावमित्यर्थः, इत्येवं सर्वं सुस्थं भवति।

तदेवमुदीर्णस्य मिथ्यात्वस्य क्षयः, अनुदीर्णस्य च य उपशमः, एतत्स्वभावद्वयस्य योऽसौ मिश्रीभाव एकत्रमिथ्यात्वलक्षणे धर्मिणि भवनरूपस्तमापन्नं मिश्रीभावपरिणतं वेद्यमानमनुभूयमानं त्रुटितरसं शुद्धपुञ्जलक्षणं मिथ्यात्वमपि क्षयोपशमाभ्यां निर्वृत्तत्वात् क्षायोपशमिकं सम्यक्त्वमुच्यते। शोधिता हि मिथ्यात्वपुद्गला अतिस्वच्छवस्त्रमिव दृष्टेर्यथावस्थिततत्त्वरुच्यध्यवसायरूपस्य सम्यक्त्वस्याऽऽवारका न भवन्ति। अतस्तेऽप्युपचारतः सम्यक्त्वमुच्यत इति।

अत्राह-ननूदीर्णस्य मिथ्यात्वस्य क्षये, अनुदीर्णस्य चोपशमे क्षायोपशमिकं सम्यक्त्वमिहोक्तम्, प्रागुक्तमौपशमिकमपि तदेवंविधमेव, तत् कोऽनयोर्विशेषः ?। तदेतदसमीक्षिताभिधानम्, यतो 'मीसीभावपरिणयं वेइज्जंतं खओवसमं' इति वचनादत्र क्षायोपशमिकसम्यक्त्वे शुद्धपुञ्जपुद्गलवेदनमुक्तम्, औपशमिके तु तत् सर्वथैव नास्ति, इति महान् विशेषः। किञ्च, औपशमिकसम्यक्त्वे मिथ्यात्वं प्रदेशोदयेनाऽपि न वेद्यते, अत्र तु प्रदेशोदयेन तदपि वेद्यते। इत्यलं प्रसङ्गेनेति॥५३२॥'' - **विशेषाव० मलधारि०।**

[**पृ०१३३ पं०१०**] ''**निहएसु सव्वघाईरसेसु फड्डेसु देसघाईणं। जीवस्स गुणा जायंति ओहीमणचक्खुमाईया॥३।३०॥** [**स्वो०**]-''निहतेषु सर्वघातिरसेषु स्पर्द्धकेषु' देशघातिनां जीवस्य गुणा जायन्ते अवधिमनश्चक्षुरादय'' इति पदानि। पदार्थस्तुशुभपरिणामशस्त्रेण 'निहतेषु

सर्वघातिरसस्पर्द्धकेषु, देशघातिरसत्त्वेन व्यवस्थापितेष्विति भावः। देशोपघातकानामपि क्षणे क्षणे समयादुत्तरसमये संख्यातीताशुभरसविभागैर्विमुच्यमानस्येति वाक्यशेषः, एवंभूतस्य जीवस्यावधि-मनःपर्यायज्ञानचक्षुर्दर्शनादयोगुणाः 'जायन्ते' क्षयोपशमजाः प्रादुर्भवन्ति। किमुक्तं भवति ? यदा अवधिज्ञानस्य सर्वघातिरसस्पर्द्धकानामुदयस्तदा तद्विषय औदयिक एव शुद्धो भावो भवति, यदा तु देशघातिरसस्पर्द्धकानामुदयस्तदा तदुदयादौदयिकभावो भवति, तथा 'देशावरणोदये सत्यपि यो हन्तव्यविषयस्य देशप्रादुर्भावः स क्षायोपशमिको भावः। आह-यद्येवं ततः सर्वघातिप्रदेशोदये मोहनीयस्य कथं क्षायोपशमिको भाव इति ? उच्यते-ते हि प्रदेशा रसभावेनाप्रधाना यथासम्भवं देशघातिवेद्यमानरसान्तर्गताः स्वरूपमप्रकटयन्तो देशघातिरसप्राधान्यात् क्षायोपशमिकभावं जनयन्ति, एवं मनःपर्यायज्ञानचक्षुरवधिदर्शनानामपि भावना कार्या, मतिश्रुतज्ञानाचक्षुर्दर्शनावरणान्तरायप्रकृतीनां सदैवोदयं प्रति देशघातिरसस्पर्द्धका-नामेवोदयस्ततो भावद्वयं भावितमेव, बन्धं प्रति चतुर्विधानामपि सम्भवोऽस्तीति गाथार्थः॥३।३०॥" - **पञ्चसं० स्वो० टीका।**

[**पृ०१३५ पं०५**] "अथ सप्रतिपक्षमानुगामुकद्वारमाह- **अणुगामिओ य ओही नेरइयाणं तहेव देवाणं। अणुगामियऽणणुगामी मीसो य मणुस्स-तेरिच्छे॥७१४॥**

अनुगमनशील आनुगामुकः, यः समुत्पन्नोऽवधिः स्वस्वामिनं देशान्तरमभिव्रजन्तमनुगच्छति, लोचनवत्, असावानुगामुक इत्यर्थः। ईदृश एवावधिर्भवति, केषाम् ? इत्याह-नारकाणां तथा देवानां चेति। तथा, आनुगामुक उक्तस्वरूपः अनानुगामुकस्त्ववस्थितशृङ्खलादिनियन्त्रितप्रदीपवद् विपरीतः। यस्य तूत्पन्नस्यावधेर्देशो व्रजति स्वामिना सहाऽन्यत्र, देशस्तु प्रदेशान्तरचलित-पुरुषस्योपहतैकलोचनवदन्यत्र न व्रजति, असौ मिश्र उच्यते। एष त्रिविधोऽप्यवधिर्मनुष्येषु तिर्यक्षु च भवति॥ इति निर्युक्तिगाथार्थः॥७१४॥" - **विशेषाव० मलधारि०।**

[**पं०११**] तुलना- "**कुत्सिताल्पाज्ञाते॥३।४।८६॥** कुत्सितं गर्हितम्। अल्पं महत्प्रतियोगि। अज्ञातं प्रकृत्युपात्तधर्मव्यतिरेकेण केनचित्स्वत्त्वादिना धर्मेणाज्ञातम्। अन्यथायोगात्। एतदुपाधिकेऽर्थे वर्तमानाद् यथायोगं कबादयः प्रत्यया भवन्ति। कुत्सितः अल्पः अज्ञातो वा अश्वः अश्वकः। गर्दभकः। घृतकम्। तैलकम्। पचतकि। जल्पतकि। सर्वके। विश्वके। उच्चकैः। नीचकैः। तूष्णीकाम्। कुत्सितकः। अल्पकः। अज्ञातकः। कुत्सितादीनां भेदोपपत्तेः। कुत्सितादिभ्यः कुत्सितादौ च प्रत्ययः। राधकः। पूर्णकः। शूद्रकः इति संज्ञायां कुत्सायोगात्। कुत्सित इत्येव कः। व्याकरणकेन नाम त्वं गर्वितः। याज्ञिक्यकेन नाम त्वं गर्वित इत्येव क्षेपणमपि कुत्सितमे न ह्यकुत्सितेनावक्षिप्यते॥"- **शाकटा० अमोघवृत्ति०॥**

[**पृ०१३७ पं०१**] "**फड्डा य असंखेज्जा संखेज्जा यावि एगजीवस्स। एगप्फड्डुवओगे नियमा सव्वत्थ उवउत्तो॥७३८॥** अपवरकादिजालकान्तरस्थप्रदीपप्रभानिर्गमस्थानानीवा-

ऽवधिज्ञानावरणक्षयोपशमजन्यान्यवधिज्ञाननिर्गमस्थानानीह फड्डकान्युच्यन्ते। तानि चैकजीवस्य संख्येयानि, असंख्येयान्यपि च भवन्ति। तत्र चैकफड्डकोपयोगे जन्तुर्नियमात् सर्वत्र सर्वैरपि फड्डकैरुपयुक्तो भवति, एकोपयोगत्वाज्जीवस्य, एकलोचनोपयोगे द्वितीयलोचनोपयुक्तवदिति॥७३८॥" - **विशेषाव० मलधारि०।**

[**पृ०१३८ पं०१५**] तुलना– "**अत एत्सौ पुंसि मागध्याम्।४।२८७॥** मागध्यां भाषायां सौ परे अकारस्य एकारो भवति पुंसि पुल्लिङ्गे॥ एषः मेषः। एशे मेशे॥.... ॥४।२८७॥" - **हैमप्राकृत० स्वो०॥**

[**पृ०१४० पं०९**] तुलना– "**द्वितीयातृतीययोः सप्तमी॥३।१३५॥** द्वितीयातृतीययोः स्थाने क्वचित् सप्तमी भवति। गामे वसामि, नयरे न जामि। अत्र द्वितीयायाः॥ मइ वेविरीए मलिआइं॥ तिसु तेसु अलंकिआ पुहवी। अत्र तृतीयायाः॥" - **हैमप्राकृत० स्वो०॥**

[**पृ०१४२ पं०१३**] "**पणुवीस जोयणाइं दसवाससहस्सिया ठिई जेसिं।....॥७०१॥** पञ्चविंशतियोजनानि यज्जघन्यमवधिक्षेत्रमुक्तं तद् येषां देवानां दशवर्षसहस्रप्रमाणा स्थितिस्तेषामेव विज्ञेयम्। ते च भवनपतिव्यन्तरविशेषा एव।....॥७०१॥" - **विशेषाव० मलधारि०॥**

[**पृ०१४३ पं०७**] "**वेमाणियाणमंगुलभागमसंखं जहण्णओ होइ। उववाए परभविओ तब्भवजो होइ तो पच्छा॥७०२॥** वैमानिकानां तु जघन्योऽवधिः क्षेत्रतोऽङ्गुलासंख्येयभागमानो भवति, अयं चोपपाताद्यसमय एव पारभविको विज्ञेयः, ततः पश्चात् ताद्भविकः॥ इति गाथार्थः॥७०२॥" - **विशेषाव० मलधारि०।**

[**पृ०१४५ पं०७**] "अथ तप्रादिस्वरूपं व्याचिख्यासुराह– **तप्पेण समागारो तप्पागारो स चाययत्तंसो। उड्ढायओ य पल्लो उवरिं च स किंचि संखित्तो॥७०८॥ नच्चायओ समो विय पडहो हिट्ठोवरिं पईओ सो। चम्मावणद्धवित्थिण्णवलयरूवा य झल्लरिया॥७०९॥ उड्ढायओ मुइंगो हेट्ठारुं दो तहोवरिं तणुओ। पुप्फसिहावलिरइया चंगेरी पुप्फचंगेरी॥७१०॥ जवनालउ त्ति भणिओ उब्भो सरकंचुओ कुमारीए। अह सव्वकालनियओ कायाइक्को वि सेसाणं॥७११॥**

गतार्था एव, नवरं 'अह सव्वकालेत्यादि'। अथ नारक-भवनपत्यादीनाम्, तिर्यग्-मनुष्याणां चावधिसंस्थाने विशेष उच्यते, कः पुनरसौ ?, इत्याह- सर्वकालनियतोऽवधिः संस्थानमाश्रित्याऽमीषां नारक-भवनपत्यादिदेवानाम्; शेषाणां तिर्यग्-मनुष्याणां कादाचित्कोऽपि भवति। इदमुक्तं भवति-तप्राद्याकारसमानतया यद् नारक-भवनपत्यादीनामवधेः संस्थानमुक्तम्, तदङ्गीकृत्य तेषामवधिः सर्वकालं नियतोऽवस्थित एव भवति, न त्वन्याकारतया परिणमति। तिर्यग्-मनुष्याणां तु येनाकारेण प्रथममुत्पन्नोऽवधिः, केषांचित् तेनैवाकारेण सर्वकालमवतिष्ठते,

केषांचित् त्वन्याकारेण परिणमतीति॥७०८-७११॥ अथ यदुक्तम्-'तिरिय-मणुएसु ओही' इत्यादि (गा०७०६), तद् व्याचिख्यासुराह– **नाणागारो तिरिय-मणुएसु मच्छा संयभूरमणे व्व। तत्थ वलयं निसिद्धं तस्सिह पुण तं पि होज्जाहि॥७१२॥** तत्र स्वयंभूरमणे तस्य मत्स्यस्याऽऽकारविषये वलयं निषिद्धम्, इह पुनस्तिर्यग्-मनुष्येषु, 'तस्यावधेः' इत्येतदप्यावृत्त्या योज्यते, तदपि वलयाकारमाश्रित्य भवेत्। शेषं सुगममिति॥७१२॥ तदेवं संस्थाने प्रोक्तेऽपि 'कया दिशा बहुरवधिः, कयापि तु स्तोकः ?', इति न ज्ञायते। अत एतद् भवनपत्यादीनां दर्शयन्नाह– **भवणवइ-वंतराणं उड्ढं बहुगो अहो य सेसाणं। नारग-जोइसियाणं तिरियं ओरालिओ चित्तो॥७१३॥** नारक-ज्योतिष्काणामवधिस्तिर्यग् बहुः, तिर्यग्-मनुष्याणां तु संबन्धी अवधिरौदारिकावधिरुच्यते। अयं पुनश्चित्रो नानाप्रकारः-केषांचिदूर्ध्वं बहुः, अन्येषां त्वधः, अपरेषां तु तिर्यक्; केषांचित् स्वल्प इति भावः। शेषं सुगमम्। इति गाथासप्तकार्थः॥७१३॥'' - **विशेषाव० मलधारि०।**

[पृ०१४८ पं०७] नाम नाम्ना ऐकार्थ्ये समासः बहुलम्॥ ना०८।१॥ ऐकार्थ्यं सामर्थ्यविशेषः, तस्मिन् सति नाम्ना सह समासो भवति बहुलम्। विस्पष्टं पटुः विस्पष्टपटुः। व्यक्तलवणः। नाम इति किम् ? चरन्ति गावः धनम् अस्य। नाम्ना इति किम् ? चैत्रः पचति।'' - **मलय० शब्दानु० स्वो०॥**

[पृ०१४९ पं०१४] ''मच्छो महल्लकाओ संखित्तो जो य तीहिं समयेहिं। स किर पयत्तविसेसेण सण्हमोगाहणं कुणइ॥५९३॥ सण्हयरा सण्हयरो सुहुमो पणओ जहण्णदेहो य। सुबहुविसेससविसिट्ठो सण्हयरो सव्वदेहेसु॥५९४॥

यो हि योजनसहस्रायामो महाकायो मत्स्यः, त्रिभिश्च समयैरात्मानं संक्षिपति, स किल प्रयत्नविशेषादतिसूक्ष्मामवगाहनां कुरुते, नान्यः। अनेन 'किमिति मत्स्योऽतिमहान् गृह्यते, तृतीयसमयसंक्षिप्तश्च ?' (गा०५९२) इत्येतस्योत्तरमदायि। दूरे च गत्वाऽन्यत्र यद्युत्पद्यते, विग्रहेण च गच्छति, तदा जीवप्रदेशाः किञ्चिद्विस्तरं यान्तीत्यवगाहना स्थूलतरा स्यात्, इत्यविग्रहगत्या स्वशरीरदेश एवोत्पादित इत्येतत् स्वयमेव द्रष्टव्यमिति। 'कीस वा सुहुमो' इत्यादेरुत्तरमाह-'सण्हयरा इत्यादि' श्लक्ष्णादपि श्लक्ष्णतरस्तावद् भवति। कः ?, पनकः। कथंभूतः ?, सूक्ष्मः, जघन्यदेहश्च जघन्यावगाहश्चेत्यर्थः। वस्तुतोऽर्थतात्पर्यमाह-'सुबहु इत्यादि' जो जोयणसाहस्सो' (गा०-५८९) इत्याद्युक्तप्रकारेण सुबहुविशेषणविशिष्टो गृह्यमाणः पनकजीवः सूक्ष्मतरः सूक्ष्मतमश्च सर्वदेहेभ्यो भवतीति॥५९३-५९४॥ अथ 'किं त्रिसमयाहारकः ?' इत्यस्योत्तरमाह-

पढम-बिईएऽतिसण्हो जमइत्थूलो चउत्थयाईसु। तइयसमयम्मि जोग्गो गहिओ तो तिसमयाहारो॥५९५॥ यस्मात् प्रथम-द्वितीययोः समयोरतिसूक्ष्मो भवति, चतुर्थादिषु चातिस्थूलः

संपद्यते, तृतीयसमये तु योग्यः; अतस्त्रिसमयाहारकग्रहणमिति॥५९५॥'' - **विशेषाव० मलधारि०।**

[**पृ०१५० पं०१**] स्वप्रतिज्ञातमेवाह– **तेया-भासादव्वाण अंतरा एत्थ लभइ पट्ठवओ। गुरुलहु अगुरुयलहुयं तंपि य तेणेव निट्ठाइ॥६२७॥**

तैजसं च भाषा च तैजस-भाषे तयोर्द्रव्याणि तेषां तैजस-भाषाद्रव्याणामन्तरादपान्तराले 'एत्थ त्ति' अत्रान्यदेव तदयोग्यं द्रव्यं लभते पश्यति प्रस्थापकोऽवधिज्ञानप्रारम्भकः, अवधिप्रतिपत्तेति यावत्। किंविशिष्टं तत् ?, इत्याह-गुरुलघु, अगुरुलघु चेति-गुरुलघुपर्यायोपेतं गुरुलघु, अगुरुलघुपर्यायोपेतं त्वगुरुलघ्विति। तत्र तैजसद्रव्यासन्नं गुरुलघु, भाषाद्रव्यासन्नं त्वगुरुलघ्विति। तदपि चावधिज्ञानं तदावरणोदयात् प्रतिपतत् तेनैवोक्तद्रव्यस्वरूपेण उपलब्धेन सता निष्ठां याति प्रतिपततीत्यर्थः अपिशब्देन चैतज्ज्ञापयतिप्रतिपातिन्यवधिज्ञानेऽयं न्यायः, न चैतदवश्यं प्रतिपतत्येव॥ इति निर्युक्तिगाथार्थः॥६२७॥'' - **विशेषाव० मलधारि०।**

[**पं०५**] ''तमेव विषयसंग्रहमाह– **दव्वाइं अंगुला-वलिसंखेज्जाईयभाग-विसयाइं। पेच्छइ चउग्गुणाइं जहण्णओ मुत्तिमंताइं॥८०७॥** जघन्यतो मूर्तिमन्ति द्रव्याण्यवधिज्ञानी पश्यतीति संटङ्कः। कथंभूतानि ?, इत्याह- 'अंगुलेत्यादि' अङ्गुलसंख्यातीत-भागविषयाणि, आवलिकासंख्यातीतभागविषयाणि चेत्यर्थः। भावतस्तु प्रतिद्रव्यं चत्वारो गुणा धर्माः पर्याया येषां तानि चतुर्गुणानि पश्यति। इदमुक्तं भवति– जघन्यतोऽवधिज्ञानी द्रव्यतः क्षेत्रतश्चाङ्गुलासंख्येयभागक्षेत्राभ्यन्तरवर्तीनि मूर्तद्रव्याणि पश्यति, कालतस्त्वेतावद्द्रव्याणामावलिकाऽसंख्येयभागाभ्यन्तरवर्तिनोऽतीतान् अनागतांश्च पर्यायान् पश्यति, भावतस्तु प्रतिद्रव्यं चतुरः पर्यायान् पश्यतीति।'' - **विशेषाव० मलधारि०।**

[**पं०१४**] ''भावार्थं तु सांप्रदायिकार्थप्रतिपादकभाष्यमुखेन भाष्यकार एवाह– **अव्वाघाए सव्वासु कम्मभूमीसु जं तदारंभा। सव्वबहवो मणुस्सा होंतजियजिणिंदकालम्मि ॥५९९॥** **अव्याघाते** अनलजीवोत्पत्तेर्महावृष्ट्यादिव्याघाताभावे, सर्वासु समस्तभरतै-रावत-विदेहलक्षणासु पञ्चदशसु कर्मभूमिषु सर्वबहवो 'बादराग्निजीवा भवन्ति' इति प्रक्रमाल्लभ्यते। किमविशेषेण सर्वदैवैतास्वेते भवन्ति ?, न, इत्याह- **अजित**जिनेन्द्रकाले, **अजित**जिनेन्द्रस्योपलक्षणत्वादवसर्पिण्यां द्वितीयतीर्थकरकाल इत्यर्थः। किमिति तत्रैव **बहवो भवन्ति** ?, इत्याह- 'जमित्यादि' यद् यस्मात् तदारम्भास्तेषां बादराग्निजीवानां संधुक्षण-ज्वालनाद्यारम्भपराः सर्वबहवः सर्वेभ्योऽप्यतीता-ऽनागतेभ्यो बहवः प्रचुरा गर्भजमनुष्या भवन्ति स्वभावादेवेति॥५९९॥ आह- किमेतैरेव बादराग्निजीवैः सर्वबहवग्निजीवपरिमाणं पूर्यते, आहोस्वित् सूक्ष्माग्निभिः सह ?। यदि तैः सह, तदा तेऽविशिष्टा अपि गृह्यन्ते, आहोस्वित् क्वचिदेव विशिष्टाः ?, इत्याह– **उक्कोसया**

य सुहुमा जया तया सव्वबहुगमणीणं।... ॥६००॥ उत्कृष्टाश्च सूक्ष्माग्निजीवाः स्वभावत एव कथमपि यदा संभवन्ति, तदैवैतैर्बादराग्निजीवैः सह सर्वबहव्ग्निजीवानां परिमाणं भवति।'' **- विशेषाव० मलधारि०।**

[पृ०१५१ पं०१०] ''एतदेवाह– **एक्केक्कागासपएसजीवरयणाए सावगाहे य। चउरंसघणं पयरं सेढी छट्ठो सुयाएसो॥६०१॥** तैः सर्वैरप्यग्निजीवैः समचतुरस्रो घनो यतो द्विभेदः स्थाप्यते। कथम् ?, इत्याह-एकैकाकाशप्रदेश एकैकाग्निजीवरचनया स्वावगाहे चासंख्येयाकाशप्रदेशलक्षण एकैकाग्निजीवरचनयेति। अत्र स्थापना–

०	०	०
०	०	०
०	०	०

एतेषां नवानामग्निजीवानां प्रत्येकमेकैकाकाशप्रदेशव्यवस्थापितानामधस्तादुपरिष्टाच्चाऽन्येऽपि नव नव जीवा इत्थमेव स्थाप्यन्ते। एष कल्पनया सप्तविंशत्या, सद्भावतस्त्व-संख्येयैरग्निजीवैरेकैकाकाशप्रदेशव्यवस्थापितैर्घनो मन्तव्यः। द्वितीयोऽपि घन इत्थमेव द्रष्टव्यः, केवलमिहासंख्येयाकाशप्रदेशेष्वेकैकजीवो व्यवस्थाप्यते। एवमेकैकाकाशप्रदेशे एकैकजीवस्थापनया-ऽसंख्येयप्रदेशात्मकस्वावगाहस्थापनया च प्रतरोऽपि द्विभेदः। सूचिरपि द्विभेदा। तत्र घन-प्रतरपक्षश्चतुर्भेदः; पञ्चमश्चैकैकाकाशप्रदेशव्यवस्थापितैकैकजीवलक्षणसूचिपक्षोऽपि न ग्राह्यः, दोषद्वयानुषङ्गात्, तथाहि-पञ्चविधयाऽप्यनया स्थापनया स्थापिता अग्निजीवाः षट्स्वपि द्विक्ष्ववधिज्ञानिनोऽसत्कल्पनया भ्रम्यमाणाः स्तोकमेव क्षेत्रं स्पृशन्तीत्येको दोषः, एकैकाकाशप्रदेशे एकैकजीवस्थापनायामागमविरोधश्च द्वितीयदोषः, असंख्येयाकाशप्रदेशानन्तरेणाऽऽगमे जीवावगाहनिषेधात्। असत्कल्पनया प्रदेशावगाहोऽप्यस्विति चेत्। नैवम्, कल्पनाऽपि सति संभवेऽविरोधिन्येव कर्तव्या, किं विरोधिन्या ?, इत्यालोच्याह - 'छट्ठो सुयाएसो त्ति' असंख्येयाकाशप्रदेशलक्षणे स्वावगाहे षड्क्त्या एकैकजीवस्थापनेन यः सूचिलक्षणः षष्ठपक्षः, अयं श्रुते आदिष्टत्वाद् ग्राह्यः; शेषास्तु पञ्चाऽनादेशाः संभवोपदर्शनमात्रेणोक्तत्वात् परिहार्याः। इयं हि यथोक्ता सूचिरेकैकजीवस्यासंख्येयाकाशप्रदेशावगाहे व्यवस्थापितत्वाद् बहुतरं क्षेत्रं स्पृशति, इत्येको गुणः; अवगाहविरोधाभावस्तु द्वितीयः। ततश्चैषाग्निजीवसूचिरवधिज्ञानिनः षट्स्वपि दिक्ष्वसत्कल्पनया भ्रमिता सती अलोके लोकप्रमाणान्यसंख्येयखण्डानि स्पृशति। अत एतावदुत्कृष्टक्षेत्रमवधेर्विषय इत्युक्तं भवति; इत्यादि स्वयमेव वक्ष्यतीति॥६०१॥ अत्र कश्चिदाह-

घण-पयरसेढिगणियं नणु तुल्लं चिय, विगप्पणा कीस। छद्धा कीरइ, भण्णइ पुरिसपरिक्खेवओ भेओ॥६०२॥

नन्वेकैकाकाशप्रदेशावगाढजीवघन-प्रतर-श्रेण्याक्रान्ताकाशप्रदेशानां संख्यारूपं गणितं

तुल्यमेव। तथा, असंख्येयाकाशप्रदेशावगाढजीवघन-प्रतर-श्रेण्याक्रान्ताकाशप्रदेशानामपि गणितं स्वस्थाने परस्परं तुल्यमेव; तथाहि-यावत एकैकाकाशप्रदेशावगाहिनां जीवानां घन आकाशप्रदेशानाक्रामति, प्रतरोऽपि तेषां तावत एव तानाक्रामति, सूचिरपि तेषां तावत एव तान् स्पृशति, संवृतप्रसारितनेत्रपट्टाक्रान्ताकाशप्रदेशवदिति। एवमसंख्येयाकाशप्रदेशावगाढजीवघन-प्रतर-श्रेण्याक्रान्ताकाशप्रदेशानामपि स्वस्थाने गणिततुल्यता भावनीयेति। अतोऽवगाहभेदद्वयभिन्नो घन एवाऽस्तु, प्रतरो वा, सूचिर्वेति; षोढा तु विकल्पना षड्भेदानां कल्पनं किमिति क्रियते ? न युक्तेयमित्यभिप्रायः।

अत्र सूरिराह-भण्यत उत्तरम्। किम् ?, इत्याह- 'पुरिसपरिक्खेवओ भेउ' त्ति अस्त्यस्याः षड्विधकल्पनाया भेदः। कथम् ?, इत्याह- पुरुषपरिक्षेपतः। इदमुक्तं भवति- नेह घनाद्याक्रान्ताकाशप्रदेशानां संख्यासमत्व-विषमत्वे चिन्त्येते। किं तर्हि ?, घनादीनां मध्याद् यः कश्चिद् रचनाविशेषोऽवधिज्ञानिनः सर्वासु दिक्षु भ्रम्यमाणो बहुतरं क्षेत्रं स्पृशति, स एवेह ग्राह्यः। एवं च सत्यस्त्यमीषां भेदः, तथाहि-एकैकप्रदेशावगाढजीवघनो भ्रम्यमाणो यावत् क्षेत्रं स्पृशति, तस्मादसंख्येयप्रदेशावगाढजीवघनोऽसंख्येयगुणं स्पृशति, ततोऽप्येकैकप्रदेशावगाढजीवप्रतरो-ऽसंख्येयगुणम्, तस्मादप्यसंख्येयप्रदेशावगाढजन्तुप्रतरोऽसंख्येयगुणम्, ततोऽप्येकैकप्रदेशावगाढ-जीवसूचिरसंख्येयगुणम्, तस्मादप्यसंख्येयाकाशप्रदेशावगाढैकैकाग्निजीवसूचिरवधिज्ञानिनः सर्वासु दिक्षु भ्रम्यमाणाऽसंख्येयगुणं क्षेत्रं स्पृशति, तच्चाऽलोके लोकप्रमाणान्यसंख्येयाकाशखण्डानि; अत एतावदेवाऽवधेरुत्कृष्टं क्षेत्रं विषय इति॥६०२॥ उक्तमेवार्थं भाष्यकारः स्वयमेवाह–

[पं०१५] **नियया वगाहणा गणिजीवसरीरावली समंतेणं। भामिज्जइ ओहिन्नाणिदेह-पज्जंतओ सा य॥६०३॥ अइगंतूण अलोगं लोगागासप्पमाणमेत्ताइं। ठाइ असंखेज्जाइं इदमोहिखेत्तमुक्कोसं ॥६०४॥** निजका आत्मीया एकैकस्यऽसंख्येयप्रदेशात्मिकाऽवगाहना येषां तानि तथा, तानि च तानि अग्निजीवशरीराणि च, तेषामावली पङ्क्तिः सूचिरवधिज्ञानिनो देहपर्यन्तात् समन्तात् सर्वासु दिक्षु बुद्ध्या भ्राम्यते। सा चाऽलोके 'लोकप्रमाणमात्राण्यसंख्येयान्याकाशखण्डानि' इति गम्यते, अतीत्य गत्वा स्पृष्ट्वा 'ठाइ' इति तिष्ठत्युपरमते। इदमवधेरुत्कृष्टं क्षेत्रं विषय इति॥६०३-६०४॥ आह-ननु 'रूपिद्रव्याण्येवावधिः पश्यति' इति गीयते, क्षेत्रं त्वमूर्तत्वात् कथं तद्विषयः ?, इत्याशङ्क्याह-

[पं०२५] **सामत्थमेत्तमेयं जइ दट्ठव्वं हवेज्ज, पेच्छेज्जा। न य तं तत्थत्थि जओ सो रूविनिबंधणो भणिओ॥६०५॥** यदवधेरेतावत् क्षेत्रं विषय उच्यते, तदेतत् तस्य सामर्थ्यमात्रमेव कीर्त्यते। कोऽर्थः ?, इत्याह-यद्येतावति क्षेत्रे द्रष्टव्यं किमपि भवेत् तदा पश्येदवधिज्ञानी। न च तद् द्रष्टव्यं तत्राऽलोके समस्ति, यतोऽयमवधिस्तीर्थकर-गणधरै

रूपिद्रव्यनिबन्धनो भणितः, तच्च रूपिद्रव्यमलोके नास्त्येवेति॥६०५॥ आह-यद्येवम्, लोकप्रमाणोऽवधिर्भूत्वा यस्य पुरतो विशुद्धिवशतो लोकाद् बहिरप्यसौ वर्धते तस्य तद्वृद्धेः किं फलम्, लोकाद् बहिर्द्रष्टव्याभावात् ?, इत्याशङ्क्याह-

वड्ढंतो उण बाहिं लोयत्थं चेव पासई दव्वं। सुहुमयरं सुहुमयमं परमोही जाव परमाणुं॥६०६॥ लोकाद् बहिष्पुनर्विशुद्धिवशाद् वर्धमानोऽवधिर्लोकस्थमेवाऽधिकमधिकतरं च द्रव्यं पश्यति। कथंभूतम् ?, सूक्ष्मतरम्, सूक्ष्मतमं यावत् परमावधिः सर्वसूक्ष्मं परमाणुमपि पश्यति, इति तद्वृद्धेस्तात्त्विकं फलमिति। अलोके तु लोकप्रमाणासंख्येयखण्डेषु द्रव्यदर्शनसामर्थ्यमेव तस्येति। अन्यकर्तृकेयं प्रक्षेपगाथा, सोपयोगेति च व्याख्यातेति॥६०६॥'' - **विशेषाव० मलधारि०।**

[**पृ०१५२ पं०४**] अथ विनेयानुग्रहार्थं प्रासङ्गिकं किञ्चिदभिधित्सुर्वक्ष्यमाणं च संबन्धयितुमाह- **परमोहिन्नाणविओ केवलमंतोमुहुत्तमित्तेण। मणुयक्खओवसमिओ भणिओ, तिरियाण वोच्छामि॥६८९॥** परमावधिज्ञानेन वेत्तीति परमावधिज्ञानवित् तस्य परमावधिज्ञानविदः परमावधौ समुत्पन्ने सति किलान्तर्मुहूर्तेनावश्यमेव केवलज्ञानमुत्पद्यते। केवलज्ञानसूर्यस्य ह्युदयपदवीमासादयतः प्रथमप्रभास्फोटकल्पं परमावधिज्ञानम्, अतस्तदनन्तरमवश्यं भवत्येव केवलज्ञानभास्करोदय इति। तदेवं भणितो मनुष्यसंबन्धी क्षायोपशमिकोऽवधिः। इदानीं तिरश्चाममुं वक्ष्यामि॥ इति गाथार्थः॥६८९॥'' - **विशेषाव० मलधारि०।**

[**पं०१३**] ''अथ-भाष्यम्- **खेत्तमसंखेज्जंगुलभागं पासं तमेव कालेणं। आविलयाए भागं भूयमणागयं च जाणाइ॥६११॥ तत्थेव य जे दव्वा तेसिं चिय जे हवंति पज्जाया। इय खेत्ते कालम्मि य जोएज्जा दव्व-पज्जाए॥६१२॥ संखेज्जंगुलभाए आविलयाए वि मुणइ तइभागं। अंगुलमिह पेच्छंतो आवलियंतो मुणइ कालं॥६१३॥ आवलियं मुणमाणो संपुण्णं खेत्तमंगुलपुहुत्तं। एवं खेत्ते कालं काले खेत्तं च जोएज्जा॥६१४॥**

गतार्था एव, नवरं 'अणागयं च' इत्यनागतम्। नन्वमूर्तौ क्षेत्र-कालौ कथमवधिः पश्यति, मूर्तालम्बनत्वात् तस्य ?, इत्याह- 'तत्थेव येत्यादि' इदमत्र हृदयम्- अङ्गुलासंख्येयभागादिकं क्षेत्रं पश्यतीति कोऽर्थः ?, तत्रैवैतावति क्षेत्रे यानि प्रस्तुतावधिदर्शनयोग्यानि पुद्गलद्रव्याणि तान्येवासौ पश्यति। आवलिकासंख्येयभागादिकं कालं पश्यतीत्यत्रापि कोऽर्थः ?, तेषामेव पुद्गलद्रव्याणां ये प्रस्तुतावधेर्दर्शनयोग्याः पर्यायास्तान् भूतेऽनागते चैतावति कालेऽसौ वीक्षत इति। एवं सर्वत्र क्षेत्रे काले चावधिविषयत्वेनोक्ते, यथासंख्यं क्षेत्रगतानि योग्यरूपिद्रव्याणि, कालगतांस्तद्योग्यांस्तत्पर्यायानायोजयेत्। क्षेत्र-कालौ तु 'मञ्चाः क्रोशन्ति' इत्यादिन्यायेनोपचारत एवोच्येते इति भावः॥ इति भाष्यगाथाचतुष्टयार्थः॥६११-६१४॥'' - **विशेषाव० मलधारि०।**

[पृ०१५४-५५ पं०२३,८] "काले प्रवर्धमाने सर्वे द्रव्यादयः प्रवर्धन्ते। क्षेत्रे कालो भाज्यो वर्धेते तु द्रव्य-पर्यायौ॥६१८॥ भजनया क्षेत्रकालौ परिवर्धमानयोर्द्रव्य-भावयोः। द्रव्ये वर्धते भावो भावे द्रव्यं तु भजनीयम्॥६१९॥ - छाया"॥

[पं०१६] **सव्वमसंखेज्जगुणं कालाओ खेत्तमोहिविसयम्मि। अवरोप्परसंबद्धं समयपएसप्पमाणेणं॥६२४॥** (सर्वमसंख्येयगुणं कालात् क्षेत्रमवधिविषये। परस्परसंबद्धं समय- 5
प्रदेशप्रमाणेन॥६२४॥ - छाया)

[पृ०१५६ पं०४] **खेत्तपएसेहिंतो दव्वमणंतगुणियं पएसेहिं। दव्वेहिंतो भावो संखगुणोऽसंखगुणिओ वा॥६२५॥** (क्षेत्रप्रदेशेभ्यो द्रव्यमनन्तगुणितं प्रदेशैः। द्रव्येभ्यो भावः संख्यगुणोऽसंख्यगुणितो वा॥६२५॥ - छाया)

गाथाद्वयमपि गतार्थम्, नवरं यस्मात् सर्वमप्यङ्गुलासंख्येयभागादिकं क्षेत्रं स्वप्रदेशैरावलिका- 10
ऽसंख्येयभागादेः कालादेतत्समयानाश्रित्याऽसंख्येयगुणमवधिविषये प्रोक्तम्। क्षेत्रप्रदेशेभ्यस्तुद्रव्यं प्रदेशैरनन्तगुणमित्यादि, तस्मात् कालादयः स्तोकादितयाऽनुमेया इति॥६२४-६२५॥" - **विशेषाव० मलधारि०।**

[पृ०१५९ पं०७,२३] "**एगं दव्वं पेच्छं खंधमणुं वा स पज्जवे तस्स उक्कोसमसंखिज्जे संखिज्जे पेच्छए कोइ॥७६१॥ दो पज्जवे दुगुणिए सव्वजहण्णेण पेच्छए ते य। वण्णाई** 15
य चउरो नाणंते पेच्छइ कयाइ॥७६२॥ (एकं द्रव्यं प्रेक्षमाणः स्कन्धमणुं वा स पर्यवांस्तस्य। उत्कृष्टतोऽसंख्येयान् प्रेक्षते संख्येयान् कश्चित्॥७६१॥ द्वौ पर्यवौ द्विगुणितौ सर्वजघन्येन प्रेक्षते तांश्च। वर्णार्द्वीश्च चतुरो नाऽनन्तान् प्रेक्षते कदाचित्॥७६२॥ - छाया)" - **विशेषाव० मलधारि०।**

[पृ०१६० पं०१५] चालना-प्रत्यवस्थाने प्राह– **अब्भिंतर त्ति भणिए भण्णइ पासंति** 20
सव्वओ कीस ?॥ ओयइ जमसंतयदिसो अंतो विठिओ न सव्वत्तो॥७६८॥

नन्ववधेरबाह्या भवन्ति, इत्यवध्युपलब्धक्षेत्रस्याभ्यन्तरे नारकादयो वर्तन्त इति प्रथमपक्षे व्याख्यातम्। एवं चोक्ते सति 'पश्यन्ति सर्वतः' इति किमर्थं भण्यते ?; ये ह्यवधिप्रकाशितक्षेत्रस्य मध्ये वर्तन्ते, ते सर्वतः पश्यन्त्येव, इति गतार्थत्वादतिरिच्यत एवेदमिति पराभिप्रायः। अत्र सूरिराह-'ओयईत्यादि' संतता निरन्तरालाः सर्वा दिग्-विदिग्लक्षणा दिशः प्रकाशविषयभूता 25
यस्याऽवधेरसौ संततदिक्कोऽवधिरबाह्यावधिरित्यर्थः, न विद्यते संततदिक्कोऽवधिर्यस्याऽसाव-संततदिक्कोऽवधिमान् बाह्यावधियुक्तः साध्वादिरित्यर्थः। अयं यस्माद् 'न ओयइ त्ति' न पश्यति, कथम् ?, सर्वतः। किंभूतः सन् ?, इत्याह- अवधिद्योतितक्षेत्रस्याऽन्तर्मध्येऽपि स्थितः, तस्मात् कर्तव्यं 'पासंति सव्वओ खलु' इति। इदमुक्तं भवति-'फड्डोही वाऽहवाऽसंबद्धो' इत्यनेन ग्रन्थेन

यः प्राक् प्रतिपादितो द्विविधो बाह्यावधिः फड्डकावधिः, असंबद्धवलयाकारक्षेत्र-प्रकाशकावधिश्चेत्यर्थः, तद्वान् साध्वादिरवध्युपलब्धक्षेत्रस्यान्तः स्थितोऽपि न सर्वतः पश्यति, अन्तरालाऽदर्शनात्। अतस्तद्व्यवच्छेदार्थं कर्तव्यं 'पश्यन्ति सर्वतः' इति। आह- नन्वयमसंततदिक्कावधिरबाह्यावधिरेव न भवति, बाह्यावधित्वेनैव प्राक् प्रतिपादितत्वात्, तत् किमेतद्व्यवच्छेदपरेण 'पासंति' इत्याद्युपादानेन ?। सत्यम्, समयपरिभाषितमबाह्यावधित्वमत्र नास्ति, लोकरूढं त्ववधिप्रकाशितक्षेत्रमध्यवर्तित्वमात्रमत्रापि विद्यते, इत्येतद्व्यवच्छेदार्थं 'पासंति' इत्यादि स्थितम्। इत्यलं विस्तरेणेति॥७६८॥" - **विशेषाव० मलधारि०।**

[**पृ०१६३ पं०१७**] दृश्यतां पृ०११ पं०१७॥

[**पं०२२**] "**संखाईएऽवि भवे साहइ जं वा परो उ पुच्छिज्जा। ण य णं अणाइसेसी वियाणई एस छउमत्थो॥५९०॥ व्याख्या-** सङ्ख्यातीतानपि भवान्, असङ्ख्येयानित्यर्थः, किम् ? – 'साहइ'त्ति देशीवचनतः कथयति, एतदुक्तं भवति असङ्ख्येयभवेषु यदभवद्भविष्यति वा, यद्वा वस्तुजातं परस्तु पृच्छेत् तत्सर्वं कथयतीति, अनेनाशेषाभिलाप्यपदार्थप्रतिपादनशक्तिमाह, किं बहुना ? 'न च' नैव, णमिति वाक्यालङ्कारे, 'अणाइसेसि'त्ति अनतिशयी अवध्याद्यतिशयरहित इत्यर्थः, विजानाति यथा एष गणधरछद्मस्थ इति, अशेषप्रश्नोत्तरप्रदानसमर्थत्वात्तस्येति गाथार्थः॥५९०॥" - **आव० हारि०।**

[**पृ०१६४ पं०७**] "क्व भदन्त ! संमूर्च्छममनुष्याः संमूर्च्छन्ति ?, गौतम ! अन्तर्मनुष्यक्षेत्रे पञ्चचत्वारिंशति योजनशतसहस्रेषु अर्धतृतीयेषु द्वीपसमुद्रेषु पञ्चदशसु कर्मभूमिषु त्रिंशत्यकर्मभूमिषु षट्पञ्चाशत्यन्तर्द्वीपेषु गर्भव्युत्क्रान्तिकमनुष्याणामेवोच्चारेषु वा प्रश्रवणेषु श्लेष्मसु वा सिङ्घाणेषु वा वान्तेषु वा पित्तेषु वा शुक्रेषु वा शोणितेषु वा शुक्रपुद्गलपरिशाटेषु वा विगतजीवकलेवरेषु स्त्रीपुरुषसंयोगेषु वा ग्रामनिर्धमनेषु वा नगरनिर्धमनेषु वा सर्वेष्वेवाशुचिस्थानेषु अत्र संमूर्च्छिममनुष्याः संमूर्च्छन्ति, अङ्गुलस्यासंख्यभागमात्रयाऽवगाहनया असंज्ञिनो मिथ्यादृष्टयोऽज्ञानिनः सर्वाभिः पर्याप्तिभिरपर्याप्तकाः अन्तर्मुहूर्त्तायुष एव कालं कुर्वन्ति।" - छाया।

[**पृ०१६५ पं०२१**] "सम्प्रति अन्तरद्वीपवक्तव्यतामाह- **चुल्लहिमवंत पुव्वारेण विदिसासु सागरं तिसए। गंतुणंतरदीवा, तिन्नि सए होंति वित्थिन्ना॥२।५५॥ व्या०-** क्षुल्लहिमवति पूर्वस्यामपरस्यां च दिशि वेदिकान्तात् परतः प्रत्येकं द्वे द्वे दंष्ट्रे विदिगभिमुखे विनिर्गते, तद्यथा- पूर्वस्यां दिश्येका उत्तरपूर्वाभिमुखी द्वितीया दक्षिणपूर्वाभिमुखी, अपरस्यां दिश्येका दक्षिणापराभिमुखी अपराऽपरोत्तराभिमुखी, एवंभूतासु चतसृषु विदिगभिमुखीषु दंष्ट्रासु प्रत्येकं त्रीणि त्रीणि योजनशतानि सागरं लवणसमुद्रं गत्वाऽतिक्रम्यात्रान्तरे विदिक्षु प्रत्येकमेकैकभावेन चत्वारोऽन्तरद्वीपा भवन्ति, ते च त्रीणि योजनशतानि प्रत्येकं विस्तीर्णाः, प्रत्येकमेव च

पञ्चधनुःशतप्रमाणविष्कम्भया द्विगव्यूतोच्छ्रितया पद्मवरवेदिकया वनखण्डेन च सर्वतः परिक्षिप्ताः ॥२।५५॥ सम्प्रत्येतेषामेव चतुर्णामन्तरद्वीपानां परिधीन् नामानि चाह- **अउणापन्न नव सए, किंचूणे परिहि तेसिमे नामा। एगोरुय आभासिय, वेसाणा चेव लंगूलो॥५६॥ व्या० एकोनपञ्चाशानि** एकोनपञ्चाशदधिकानि नव शतानि ९४९ किञ्चिदूनानि तेषां चतुर्णामन्तरद्वीपानां प्रत्येकं परिधिः। नामानि पुनरिमानि, तद्यथा-उत्तरपूर्वस्यामेकोरुकः, दक्षिणपूर्वस्यामाभाषिकः, दक्षिणापरस्यां वैषाणिकः, अपरोत्तरस्यां लाङ्गूलिकः। एवं द्वितीयादिचतुष्केष्वप्ययं क्रमो भावनीयः॥२।५६॥" - **बृहत्क्षेत्र० मलय०॥**

[**पृ०१६७ पं०२१**] "**अंतरदीवेसु नरा, धणुसय अट्ठुस्सिया सया मुइया। पालंति मिहुणधम्मं, पल्लस्स असंखभागाउ॥२।७३॥ चउसट्ठीपिट्ठकरंडयाण मणुयाण तेसिमाहारो। भत्तस्स चउत्थस्स य उणसीइ दिणाणि पालणया॥२॥७४॥ व्या०** षट्पञ्चाशत्सङ्ख्येष्वन्तरद्वीपेषु नरा मनुष्या अष्टौ धनुःशतानि उच्छ्रिता उच्चाः, तथा सदा सर्वकालं मुदिताः प्रमुदिता रोगशोकाद्युपद्रवलेशस्याप्यभावात्, तेऽपि हि हैमवतादिवास्तव्यमनुष्या इव कल्पद्रुमसंपाद्यभोगोपभोगाः प्रबलपुण्योपचयभाजः, ततो न कोऽपि तेषामपि रोगशोकाद्युपद्रवः संभवति, नवरमत्र कल्पद्रुमफलरसास्वादादिपर्यायानधिकृत्यानन्तगुणहीनं द्रष्टव्यम्। तथा ते नराः पालयन्ति मिथुनधर्मं युगलधार्मिकत्वं हैमवतादिमनुष्यवत्, तेषां च नराणामायुः पल्यस्य पल्योपमस्यासंख्येयो भागः, तथा पृष्ठकरण्डकानां चतुःषष्टिर्मनुष्याणां भवति, आहारोऽपि च तेषां चतुर्थभक्तस्यातिक्रमे एकोपवासातिक्रमे इत्यर्थः, तेषां च मनुष्याणां स्वापत्यपालना एकोनाशीतिदिनानि॥२।७३-७४॥" - **बृहत्क्षेत्र० मलय०॥**

[**पृ०१६९, पं०१३**] "**अभ्रादिभ्यः॥ त० ७।४१।** एभ्यः मत्वर्थे 'अ'प्रत्ययो भवति। अभ्रं। नभः। अभ्र अर्शस् उरस् इत्यादि॥४१॥" **मलय० स्वो० टीका०।**

[**पृ०१७० पं०६**] "**गत्यकर्मण्याधारे च॥४।३।५३॥** गतावकर्मके चार्थे वर्तमानाद्धातोः क्तः आधारे चकारात्कर्तरि वा भवति। इदमहेः सृप्तम्। इदं यातम्। इदं गतं देवदत्तस्य। गतो देवदत्तो ग्रामम्। गतो देवदत्तेन ग्रामः। गतं देवदत्तेन। इदमेषामासितम्। इदमेषां शयितम्। आसितो देवदत्तः। शयितो देवदत्तः। आसितं शयितं देवदत्तेन। अकर्मणीति यस्य कालादिकर्म नास्ति तन्निर्देशः। तेन कृतो देवदत्तः हृतो देवदत्तः इत्यविवक्षितकर्मकात्कर्तरि न भवति। भुक्ता ब्राह्मणाः। पीता गाव इति मत्वर्थीयोऽकारः।"- **शाकटा० अमोघवृत्ति०॥**

[**पृ०१७१ पं०१०**] "'**ज्योत्स्नादिभ्योऽण्॥ त० ७।९॥** एभ्यः मत्वर्थे अण् प्रत्ययो भवति। ज्योत्स्नः पक्षः। तामिस्रं नभः। ज्योत्स्नावान्। तमिस्रावान्। 'ज्योत्स्ना' आदयः प्रयोगगम्याः ॥९॥" - **मलय० स्वो० टीका०॥**

[पृ०१७२-१७४, पं०७,२४] रिजु सामण्णं तम्मत्तगाहिणी रिजुमई मणोनाणं। पायं विसेसविमुहं घडमेत्तं चिंतियं मुणइ॥७८४॥ विउलं वत्थुविसेसणमाणं तग्गाहिणी मई विउला। चिंतियमणुसरइ घडं पसंगओ पज्जवसएहिं॥७८५॥ अइसयचरणसमत्था जंघा-विज्जाहिं चारणा मुणओ। जंघाहिं जाइ पढमो नीसं काउं रविकरे वि॥७८६॥ एगुप्पाएण गओ रुयगवरमिओ तओ पडिनियत्तो। बीएणं नंदिस्सरमिहं तओ एइ तइएणं॥७८७॥ पढमेण पंडगवणं बीओप्पाएण नंदणं एइ। तइओप्पाएण तओ इह, जंघाचारणो होइ॥७८८॥ पढमेण माणुसोत्तरनगं स नंदिस्सरं तु बिइएणं। एइ तओ तइएणं कयचेइयवंदणो इहइं॥७८९॥ पढमेण नंदणवणे बीओप्पाएण पंडगवणम्मि। एइ इहं तइएणं जो विज्जाचारणो होइ॥७९०॥ (ऋजु सामान्यं तन्मात्रग्राहिणी ऋजुमतिर्मनोज्ञानम्। प्रायो विशेषविमुखं घटमात्रं चिन्तितं जानाति॥७८४॥ विपुलं वस्तुविशेषमानं तद्ग्राहिणी मतिर्विपुला। चिन्तितमनुसरति घटं प्रसंगतः पर्यवशतैः॥७८५॥ अतिशयचरणसमर्था जङ्घा-विद्याभ्यां चारणा मुनयः। जङ्घाभ्यां याति प्रथमो निश्रां कृत्वा रविकरेऽपि॥७८६॥ एकोत्पादेन गतो रुचकवरमितस्ततः प्रतिनिवृत्तः। द्वितीयेन नन्दीश्वरमिह तत एति तृतीयेन॥७८७॥ प्रथमेन पण्डकवनं द्वितीयोत्पातेन नन्दनमेति। तृतीयोत्पातेन तत इह, जङ्घाचारणो भवति॥७८८॥ प्रथमेन मानुषोत्तरनगं स नन्दीश्वरं तु द्वितीयेन। एति ततस्तृतीयेन कृतचैत्यवन्दन इह॥७८९॥ प्रथमेन नन्दनवने द्वितीयोत्पातेन पण्डकवने। एतीह तृतीयेन यो विद्याचारणो भवति॥७९०॥ - छाया)

व्या० ऋजुमति-विपुलमतिमनःपर्यायज्ञानस्वरूपम्। निर्युक्तौ विपुलमतेरग्रेतनगाथायां व्यस्तोपादानेऽपि भाष्यकृता द्वयोरपि मनःपर्यायज्ञानावयवतया प्रत्यासन्नत्वादृजुमतेरनन्तरं विपुलमतेरपि व्याख्यानं कृतमित्यदोषः। 'विउलं वत्थुविसेसणमाणं' ति विपुलं वस्तुनो घटादेर्विशेषणानां देश-क्षेत्र-कालादीनां मानं संख्यास्वरूपं तद्ग्राहिणी विपुलमतिः। षष्ठ-सप्तमाऽष्टमगाथाभिर्जङ्घाचारणर्द्धिस्वरूपम्। नवम-दशमगाथाभ्यां तु विद्याचारणर्द्धिस्वरूपम्।'' - **विशेषाव० मलधारि०।**

[पृ०१७४ पं०२१] मुणइ मणोदव्वाइं नरलोए सो मणिज्जमाणाइं। काले भूय-भविस्से पलिया ऽसंखिज्जभागम्मि॥८१३॥ दव्वमणोपज्जाए जाणइ पासइ य तग्गएणंते। तेणावभासिए उण जाणइ बज्झेऽणुमाणेणं॥८१४॥

स मनःपर्यायज्ञानी मुणत्यवगच्छति। कानि ?, इत्याह– मनश्चिन्ताप्रवर्तकानि द्रव्याणि मनोद्रव्याणि। तानि किं मनोयोग्यान्यप्याकाशस्थानि जानाति ?। न, इत्याह-नरलोके तिर्यग्लोके मन्यमानानि संज्ञिभिर्जीवैः काययोगेन गृहीत्वा मनोयोगेन मनस्त्वेन परिणमितानीत्यर्थः। तदयं द्रव्यतो विषय उक्तः। अथ कालतो भावतश्च तमाह-'काले इत्यादि' भावतस्तावज्जानाति पश्यति

च। कान् ?, इत्याह-चिन्तानुगुणान् सर्वपर्यायराश्यनन्तभागरूपानन्तान् रूपादीन् पर्यायान्। कस्य संबन्धिनः ?, इत्याह-मनस्त्वपरिणतानन्तस्कन्धसमूहमयस्य द्रव्यमनसः, न तु भावमनसः, तस्य ज्ञानरूपत्वात्, ज्ञानस्य चामूर्तत्वात्,छद्मस्थस्य चामूर्तविषयाऽयोगादिति। तांश्च तद्गतानेव मनोद्रव्यस्थितानेव जानाति, न पुनश्चिन्तनीयबाह्यघटादिवस्तुगतानिति भावः। न च वक्तव्यमेते मनोद्रव्यसंबन्धिन एव न भवन्ति, किमेतद्व्यवच्छेदपरेण तद्गतग्रहणेन ? इति; मनोद्रव्याणि दृष्ट्वा पश्चादनुमानेन ते ज्ञायन्ते, इत्येतावता मनोद्रव्यैरपि सह संबन्धमात्रस्य विद्यमानत्वात्। एतदेवाह-तेन द्रव्यमनसाऽवभासितान् प्रकाशितान् बाह्यांश्चिन्तनीयघटादीननुमानेन जानाति, यत एव तत्परिणतान्येतानि मनोद्रव्याणि, तस्मादेवंविधेनेह चिन्तनीयवस्तुना भाव्यम्, इत्येवं चिन्तनीयवस्तूनि जानाति न साक्षादित्यर्थः। चिन्तको हि मूर्तममूर्तं च वस्तु चिन्तयेत्। न च च्छद्मस्थोऽमूर्तं साक्षात् पश्यति, ततो ज्ञायते- 'अनुमानादेव चिन्तनीयं वस्त्ववगच्छति।' कियति कस्मिंश्च काले मनोद्रव्य-पर्यायानसौ जानाति ?, इत्याह- 'काले भूये'त्यादि भूतेऽतीते, भविष्यति चाऽनागते पल्योपमासंख्येयभागरूपे काले ये तेषां मनोद्रव्याणां भूता व्यतीताः, भविष्यन्तश्चाऽनागताश्चिन्तानुगुणाः पर्यायास्तान् जानातीति॥८१३-८१४॥" - **विशेषाव० मलधारि०।**

[**पृ०१७५ पं०२३**] तुलना- "**द्वयोर्विभज्ये च तरप्। ७।३।६॥** द्वयोर्मध्ये प्रकृष्टे विभज्ये च प्रकृष्टे वर्त्तमानात् तरप् स्यात्। पटुतरा स्त्री, साङ्काश्यकेभ्यः पाटलिपुत्रका आढ्यतराः॥७।३।६॥" - **सिद्धहेम० लघु०।**

[**पृ०१७९ पं०९**] तुलना- "**स्थादिभ्यः कः॥५।३।८२॥** एभ्यो भावाऽकर्त्रो कः स्यात्। आखूत्थो वर्त्तते, प्रस्थः प्रपा॥८२॥" - **सिद्धहेम० लघु०॥**

[**पं०१४**] "शेषानेकादशसिद्धभेदानाह- **कम्मे सिप्पे य विज्जाए मंते जोगे य आगमे। अत्थ-जत्ता-अभिप्पाए तवे कम्मक्खए इय॥३०२८॥** कर्मसिद्ध-शिल्पसिद्धौ, विद्यासिद्धः, मन्त्रसिद्धः, योगसिद्धः, आगमसिद्धः, अर्थसिद्धः, यात्रासिद्धः, अभिप्रायो बुद्धिपर्यायस्ततो बुद्धिसिद्धिः, तपःसिद्धः, कर्मक्षयसिद्धः॥ इति निर्युक्तिश्लोकसमासार्थः॥३०२८॥" - **विशेषाव० मलधारी।**

[**पं०१७**] दृश्यतां पृ०२८ पं०९॥

[**पं०२२**] "**कायवाङ्मनःकर्म योगः॥६।१॥** किंस्वरूपो योगः ? कतिप्रकारो वेत्याह- काय-वाङ्-मनःकर्म योगः। कृतद्वन्द्वानां कायादीनामात्मनः करणानामभेदवृत्तीनां कर्मपदेन सह षष्ठीसमासः। कर्म व्यापारः क्रिया चेष्टा इत्यनर्थान्तरम्। एतत् कर्म कायादिसम्बन्धि यथासम्भवं योग उच्यते, वीर्यान्तरायक्षयोपशमजनितेन पर्यायेणात्मनः सम्बन्धो योगः॥६।१॥" - **तत्त्वार्थ० सिद्धसेनीया०॥**

[पृ०१८० पं०३] **"अहवा तणुजोगाहिअवइदव्वसमूहजीववावारो। सो वइजोगो भण्णइ वाया निसिरिज्जए तेणं॥३६३॥ तह तणुवावाराहि अमणदव्वसमूहजीववावारो। सो मणजोगो भण्णइ मण्णइ नेयं जओ तेणं॥३६४॥** अथवा तनुयोगेन कायव्यापारेणाऽऽदृतोऽऽहृतो गृहीतो योऽसौ वाग्द्रव्यसमूहस्तेन सहकारिकारणभूतेन तन्निसर्गार्थं योऽसौ जीवस्य व्यापारः स वाग्योगो भण्यते, वाचा सहकारिकारणभूतया जीवस्य योगो वाग्योग इति कृत्वा। किं पुनस्तेन क्रियते ?, इत्याह-सैव वाक् तेन जीवव्यापारेण निसृज्यते परप्रत्यायनार्थमुच्यत इति॥ तथा, तनुव्यापारेणाऽऽदृतो योऽसौ मनोद्रव्यसमूहस्तेन सहकारिकारणभूतेन वस्तुचिन्तनाय योऽसौ जीवस्य व्यापारः स मनोयोगो भण्यते, मनसा सहकारिकारणभूतेन जीवस्य योगो मनोयोग इति व्युत्पत्तेः। कुतः पुनरयं मनोयोगः ?, इत्याह-यतस्तेन ज्ञेयं जिनमूर्त्यादिकं मन्यते चिन्त्यते, अतस्तस्य मनोयोगत्वमिति॥ इति गाथार्थः॥३६३-३६४॥" - **विशेषाव० मलधारि०।**

[**पृ०१८३ पं०१६**] "नैरयिका भदन्त ! अनन्तरागता अन्तक्रियां कुर्वन्ति परम्परागत अन्तक्रियां कुर्वन्ति ?, गौतम ! अनन्तरागता अपि अन्तक्रियां कुर्वन्ति परम्परागता अपि अन्तक्रियां कुर्वन्ति, एवं रत्नप्रभापृथ्वीनैरयिका अपि यावत्पङ्कप्रभापृथ्वीनैरयिकाः, धूमप्रभापृथ्वीनैरयिकाणां पृच्छा, गौतम ! नानन्तरागता अन्तक्रियां कुर्वन्ति परम्परागता अन्तक्रियां कुर्वन्ति, एवं यावदधः सप्तमपृथ्वीनैरयिकाः। असुरकुमारा यावत्स्तनितकुमाराः पृथ्व्यब्वनस्पतिकायिका अनन्तरागता अपि अन्तक्रियां कुर्वन्ति परम्परागता अपि अन्तक्रियां कुर्वन्ति, तेजो-वायु-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिया नो अनन्तरागता अन्तक्रियां कुर्वन्ति, शेषा अनन्तरागता अपि अन्तक्रियां कुर्वन्ति परम्परागता अपि॥" - छाया।

[**पृ०१८४ पं०९**] "रत्नप्रभापृथ्वीनैरयिको भदन्त ! रत्नप्रभापृथ्वीनारकत्वादनन्तरमुद्वृत्त्य तीर्थकरत्वं लभेत ?, गौतम ! अस्त्येकको लभेत अस्त्येकको न लभेत, अथ केनार्थेन भदन्त ! एवमुच्यते- अस्त्येकको लभेत अस्त्येकको न लभेत ?, गौतम ! यस्य रत्नप्रभापृथ्वीनैरयिकस्य तीर्थकरनामगोत्रकर्म बद्धं स्पृष्टं कृतं निबद्धमभिनिर्वृत्तमभिसमन्वागतमुदीर्णं नोपशान्तं भवति स रत्नप्रभापृथ्वीनैरयिको रत्नप्रभापृथ्वीनारकत्वादुद्वृत्त्य तीर्थकरत्वं लभते, यस्य रत्नप्रभापृथ्वीनारकस्य तीर्थकरनामगोत्रं कर्म न बद्धं यावन्नोदीर्णमुपशान्तं भवति स रत्नप्रभापृथ्वीनारको रत्नप्रभापृथ्वीनारकत्वादुद्वृत्त्य तीर्थकरत्वं नो लभेत, तदेतेनार्थेन गौतम ! एवमुच्यते- अस्त्येकको लभेत अस्त्येकको नो लभेत। एवं यावद्वालुकाप्रभापृथ्वीनैरयिकत्वात्तीर्थकरत्वं लभेत, पङ्कप्रभापृथ्वीनैरयिको भदन्त ! पङ्कप्रभापृथ्वी-नारकत्वादनन्तरमुद्वृत्त्य तीर्थकरत्वं लभेत ? गौतम ! नैषोऽर्थः समर्थः, अन्तक्रियां पुनः कुर्यात्, धूमप्रभापृथ्वीनैरयिके पृच्छा, गौतम ! नैषोऽर्थः समर्थः, विरतिं पुनर्लभेत, तमःप्रभापृथ्वीपृच्छा, गौतम ! नैषोऽर्थः समर्थः, विरताविरतिं लभेत,

अधः सप्तम्यां पृच्छा, गौतम ! नैषोऽर्थः समर्थः, सम्यक्त्वं पुनर्लभेत। असुरकुमाराणां पृच्छा, गौतम, नैषोऽर्थः समर्थः, अन्तक्रियां पुनः कुर्यात्, एवं निरन्तरं यावदप्कायाः, तेजस्कायिको भदन्त ! तेजस्कायादनन्तरमुद्वृत्य तीर्थकरत्वं लभेत ?, गौतम ! नैषोऽर्थः समर्थः, केवलिप्रज्ञप्तं धर्मं लभेत श्रवणतया, एवं वायुकायिकेऽपि वनस्पतिकायेऽपि पृच्छा, गौतम ! नैषोऽर्थः सर्मथः, अन्तक्रियां पुनः कुर्यात्। द्वीन्द्रियत्रीन्द्रिय-चतुरिन्द्रियाणां पृच्छा, गौतम ! नैषोऽर्थः समर्थः, मनःपर्यवज्ञानं पुनरुत्पादयेत्। पञ्चेन्द्रिय-तिर्यग्योनिकमनुष्य-व्यन्तरज्योतिष्केषु पृच्छा, गौतम ! नैषोऽर्थः समर्थः, अन्तक्रियां पुनः कुर्यात्। सौधर्मदेवो भदन्त ! अनन्तरं च्युत्वा तीर्थकरत्वं लभेत ?, गौतम ! अस्त्येकको लभेत अस्त्येकको नो लभेत, एवं यथा रत्नप्रभापृथ्वीनैरयिकस्य यावत् सर्वार्थकदेवाः ॥'' - छाया। 5

[**पृ०१९१ पं०११**] ''...। **इहं बोंदिं चइत्ता णं तत्थ गंतूण सिज्झई॥९५९॥** ..., तथा 'इह' अर्धतृतीयद्वीपसमुद्रान्तः 'बोन्दिं' तनुं 'त्यक्त्वा' परित्यज्य सर्वथा किम् ? 'तत्र' लोकाग्रं 'गत्वा' अस्पृशद्गत्या समयप्रदेशान्तरमस्पृशन्नित्यर्थः, 'सिध्यन्ति' निष्ठितार्था भवन्ति सिद्धयति वेति गाथार्थः॥९५९॥'' - **आव० हारि०॥** 10

[**पं०१७**] ''**फुसइ अणंते सिद्धे सव्वपएसेहिं नियमसो सिद्धो। ते वि असंखिज्जगुणा देसपएसेहिं जे पुट्ठा॥३१७७॥** स्पृशत्यनन्तान् सिद्धान् सर्वप्रदेशैरात्मसंबन्धि-भिर्नियमात् सिद्ध इति। तथा तेऽपि सर्वप्रदेशस्पृष्टेभ्योऽसंख्येयगुणा वर्तन्ते देश-प्रदेशैर्ये स्पृष्टाः, कथम् ? इति चेत्। उच्यते-सर्वप्रदेशैस्तावदनन्ताः स्पृष्टाः एवमेकैकेनापि जीवस्य देशेन प्रदेशेन चानन्ताः स्पृष्टाः, जीवश्चासंख्येयदेशप्रदेशात्मकः, ततश्च मूलानन्तकं सकलजीवदेश-प्रदेशाऽसंख्येयकेन गुणितं यथोक्तमेव भवतीति॥३१७७॥'' - **विशेषाव० मलधारी।** 15

''**फुसइ अणंते सिद्धे सव्वपएसेहि निअमसो सिद्धो। तेऽवि असंखिज्जगुणा देसपएसेहिं जे पुट्ठा॥९७६॥** **व्या०** स्पृशत्यनन्तान् सिद्धान् सर्वप्रदेशैः आत्मसम्बन्धिभिः 'नियमात्' नियमेन सिद्ध इति, तथा तेऽप्यसंख्येयगुणा वर्तन्ते देशप्रदेशैर्ये स्पृष्टाः, तेभ्यः सर्वप्रदेशस्पृष्टेभ्यः, कथम् ? सर्वात्मप्रदेशैरनन्ताः स्पृष्टाः, तथैकैकप्रदेशेनाप्यानन्ता एव, स चासंख्येयप्रदेशात्मकः, ततश्च मूलानन्तकं सकलजीवप्रदेशासंख्येयानन्तकैर्गुणितं यथोक्तमेव भवतीति गाथार्थः॥९७६॥'' - **आव० हारि०॥** 20 25

[**पृ०२०७ पं०२१**] दृश्यतां पृ०१४ पं०१२॥

[**पृ०२०८ पं०६**] ''**न सो परिग्गहो वुत्तो, नायपुत्तेण ताइणा। मुच्छा परिग्गहो वुत्तो, इअ वुत्तं महेसिणा॥६।२१॥** यतश्चैवमतः-'न सो' त्ति सूत्रम्, नासौ निरभिष्वङ्गस्य वस्त्रधारणादिलक्षणः परिग्रह उक्तः, बन्धहेतुत्वाभावात्, केन ? 'ज्ञातपुत्रेण' ज्ञात-उदारक्षत्रियः

सिद्धार्थः तत्पुत्रेण वर्धमानेन 'त्रात्रा' स्व-परपरित्राणसमर्थेन, अपि तु 'मूर्च्छा असत्स्वपि वस्त्रादिष्वभिष्वङ्गः परिग्रह उक्तः, बन्धहेतुत्वाद्, अर्थतस्तीर्थकरेण, ततोऽवधार्य 'इति' एवमुक्तो 'महर्षिणा' गणधरेण, सूत्रे सेज्जंभव आहेति सूत्रार्थः॥६।२१॥'' **दशवै० हारि०।**

[पृ०२१३ पं०१३] **''नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात्। अपेक्षातश्च भावानां कादाचित्कस्य सम्भवः॥३।३५॥** अहेतुत्वे च धूमस्य नित्यं सत्त्वमाकाशस्येव स्यात्, असत्त्वं शशविषाणादेरिव, **अहेतोरन्यापेक्षणाभावात्। अपेक्षातश्च भावानां कादाचित्कस्य सम्भवः।** ततो यद्यहेतुर्भावः, तदा नित्यं स्यात्। असदेव वा स्याद्, हेत्वभावात्। तस्माद् धूमस्य कादाचित्कत्वदर्शनात् हेतुमत्त्वम्। अग्न्यन्वयव्यतिरेकानुविधानदर्शनात् तत्कार्यत्वं च। यश्च यस्य कार्यं स तं न व्यभिचरति, तदधीनस्वरूपत्वात्॥३।३५॥'' - **प्रमाणावा० मनोरथनन्दि०।**

[पृ०२१६ पं०२०] **''...। सव्वस्स केवलिस्स जुगवं दो नत्थि उवओगा॥९५९॥** ...., यतः सर्वस्य केवलिनः सत्त्वस्य 'युगपद्' एकस्मिन् काले द्वौ न स्तः उपयोगौ, तत् स्वाभाव्यात्, क्षायोपशमिकसंवेदने तथादर्शनात्, अत्र बहु वक्तव्यं तत्तु नोच्यते ग्रन्थविस्तरभयादिति गाथार्थः॥९७९॥'' - **आव० हारि०॥**

[पृ०२१९ पं०२१] **''सव्वदव्वाण पओग-वीससा-मीसजा जहाजोग्गं। परिणामा पज्जाया जम्म-विणासादओ सव्वे॥८२५॥ तेसिं भावो सत्ता सलक्खणं वा विसेसओ तस्स। नाणं विण्णत्तीए कारणं केवलण्णाणं॥८२६॥**

(सर्वद्रव्याणां प्रयोग-विस्रसा-मिश्रजा यथायोग्यम्। परिणामाः पर्याया जन्म-विनाशादयः सर्वे॥८२५॥ तेषां भावः सत्ता स्वलक्षणं वा विशेषतस्तस्य। ज्ञानं विज्ञप्तेः कारणं केवलज्ञानम्॥८२६॥ - छाया।)'' - **विशेषाव० मलधारि०।**

[पृ०२२० पं०२१] **''पण्णवणिज्जा भावा अणंतभागो उ अणभिलप्पाणं। पण्णवणिज्जाणं पुण अणंतभागो सुयनिबद्धो॥१४१॥** प्रज्ञाप्यन्ते प्ररूप्यन्त इति प्रज्ञापनीया वचनपर्यायत्वेन श्रुतज्ञानगोचरा इत्यर्थः। के ?, भावा ऊर्ध्वाधस्तिर्यग्लोकान्तर्निविष्टभू-भवन-विमान-ग्रह-नक्षत्र-तारका-ऽर्केन्द्रादयस्ते सर्वेऽपि मिलिताः। किम् ? इत्याह-अनन्ततम एव भागे वर्तन्ते। केषाम् ?, अत्राह-अनभिलाप्यानामर्थपर्यायत्वेनाऽवचनगोचरापन्नानामित्यर्थः, अनभिलाप्य-वस्तुराशेरभिलाप्यपदार्थसार्थः सर्वोऽप्यनन्ततम एव भागे वर्तत इत्यर्थः। प्रज्ञापनीयपदार्थानां पुनरनन्तभाग एव चतुर्दशपूर्वलक्षणे श्रुते निबद्धो भगवद्भिर्गणधरैः साक्षाद् ग्रथितः॥ इति गाथार्थः॥१४१॥'' - **विशेषाव० मलधारि०।**

[पृ०२२३ पं०१] **''इंदिय-मणोनिमित्तं जं विण्णाणं सुयाणुसारेणं। नियय्त्थुत्ति-समत्थं तं भावसुयं मई सेसं॥१००॥** इन्द्रियाणि च स्पर्शनादीनि मनश्च, इन्द्रिय-मनांसि,

तानि निमित्तं यस्य तदिन्द्रियमनोनिमित्तम्, इन्द्रिय-मनोद्वारेण यद् विज्ञानमुपजायत इत्यर्थः। तत् किम् ?, इत्याह-तद् भावश्रुतं श्रुतज्ञानमित्यर्थः। इन्द्रिय-मनोनिमित्तं च मतिज्ञानमपि भवति, अतस्तद्व्यवच्छेदार्थमाह-'श्रुतानुसारेणेति' श्रूयत इति श्रुतं द्रव्यश्रुतरूपं शब्द इत्यर्थः। स च संकेतविषयपरोपदेशरूपः, श्रुतग्रन्थात्मकश्चेह गृह्यते, तदनुसारेणैव यदुत्पद्यते तत् श्रुतज्ञानम्, नान्यत्। इदमुक्तं भवति-संकेतकालप्रवृत्तं श्रुतग्रन्थसंबन्धिनं वा घटादिशब्दमनुसृत्य वाच्यवाचकभावेन संयोज्य 'घटो घटः' इत्याद्यन्तर्जल्पाकारमन्तःशब्दोल्लेखान्विमिन्द्रियादिनिमित्तं यज्ज्ञानमुदेति तच्छ्रुतज्ञानमिति। तच्च कथंभूतम् ?, इत्याह-'निजकाऽर्थोक्तिसमर्थमिति' निजकः स्वस्मिन् प्रतिभासमानो योऽसौ घटादिरर्थस्तस्योक्तिः परस्मै प्रतिपादनं तत्र समर्थं क्षमं निजकाऽर्थोक्तिसमर्थम्, अयमिह भावार्थः-शब्दोल्लेखसहितं विज्ञानमुत्पन्नं स्वप्रतिभासमानार्थप्रतिपादकं शब्दं जनयति, तेन च परः प्रत्याय्यते, इत्येवं निजकाऽर्थोक्तिसमर्थमिदं भवति, अभिलाप्यवस्तुविषयमिति यावत्। स्वरूपविशेषणं चैतत्, शब्दानुसारेणोत्पन्नज्ञानस्य निजकार्थोक्तिसामर्थ्याऽव्यभिचारादिति। 'मई सेसं ति' शेषमिन्द्रिय-मनोनिमित्तमश्रुतानुसारेण यदवग्रहादिज्ञानम्, तद् मतिज्ञानमित्यर्थः। ....॥१००॥

[पं०१०] **''पंचेदिउ व्व बउलो नरो व्व सव्वविसओवलंभाओ। तहवि न भण्णइ पंचेदिउ त्ति बज्झेंदियाभावा॥३००१॥** पञ्चेन्द्रिय इव बकुल इति प्रतिज्ञा। सर्वेषामपि शब्द-रूपादिविषयाणामुपलम्भादिति हेतुः। नरवदिति दृष्टान्तः। ननु बकुलस्य रसनेन्द्रियोपलम्भ एव युक्तः, तत् कथमस्य सर्वविषयोपलम्भसंभव इति ?। सत्यम्, मुख्यस्तावत् स एव संभवति, गौणवृत्त्या तु शेषेन्द्रियविषयोपलम्भोऽप्यस्य संभाव्यते, शृङ्गारितस्वरूपतरुणीमदिरागण्डूषापेक्षणात्, तस्याश्च तनुलतास्पर्शाधररस-चन्दनादिगन्ध-शोभनरूप-मधुरोल्लापलक्षणानां पञ्चानामपीन्द्रियविषयाणां संभवादिति। अन्यथा वा पञ्चेन्द्रियत्वमस्य सुधिया भावनीयम् तर्ह्येकेन्द्रियो बकुलः कथं प्रसिद्धः पञ्चेन्द्रियोऽपि कस्माद् नोपदिश्यते ? इत्याह- तथापि पञ्चेन्द्रियोऽसौ न भण्यते, बाह्यानां निर्वृत्त्यादिद्रव्येन्द्रियाणामभावादिति॥३००१॥''

[पं०१३] **जह सुहुमं भाविंदियनाणं दव्विंदियावरोहे वि। तह दव्वसुयाभावे भावसुयं पत्थिवाईणं॥१०३॥** इह केवलिनो विहाय शेषसंसारिजीवानां सर्वेषामप्यतिस्तोक-बहु-बहुतर-बहुतमादितारतम्यभावेन द्रव्येन्द्रियेष्वसत्स्वपि लब्धीन्द्रिय-पञ्चकावरणक्षयोपशमः समस्त्येवेति परममुनिवचनम्। ततश्च यथा येन प्रकारेण पृथिव्यादीनामेकेन्द्रियाणां श्रोत्र-चक्षु-घ्राण-रसनलक्षणानां प्रत्येकं निर्वृत्युपकरणरूपाणां द्रव्येन्द्रियाणां तत्प्रतिबन्धककर्मावृतत्वादवरोधेऽप्यभावेऽपि सूक्ष्ममव्यक्तं लब्ध्युपयोगरूपं श्रोत्रादिभावेन्द्रियज्ञानं भवति, लब्धीन्द्रियावरणक्षयोपशमसंभूताऽणीयसी ज्ञानशक्तिर्भवतीत्यर्थः। तथा तेनैव प्रकारेण द्रव्यश्रुतस्य द्रव्येन्द्रियस्थानीयस्याऽभावेऽपि भावश्रुतं भावेन्द्रियज्ञानकल्पं पृथिव्यादीनां भवतीति प्रतिपत्तव्यमेव।...॥१०३॥''- **विशेषाव० मलधारि०।**

[पृ०२२४ पं०१०] **''सोइंदिओवलद्धी होइ सुयं सेसयं तु मइनाणं। मोत्तूणं दव्वसुयं अक्खरलंभो य सेसेसु॥११७॥** इन्द्रो जीवस्तस्येदमिन्द्रियम्, श्रूयतेऽनेनेति श्रोत्रम्, तच्च तदिन्द्रियं चेति श्रोत्रेन्द्रियम्, उपलम्भनमुपलब्धिर्ज्ञानम्, श्रोत्रेन्द्रियेणोपलब्धिः श्रोत्रेन्द्रियोपलब्धिरिति तृतीयासमासः, श्रोत्रेन्द्रियस्य वोपलब्धिः श्रोत्रेन्द्रियोपलब्धिरिति षष्ठीसमासः, श्रोत्रेन्द्रियद्वारकं ज्ञानमित्यर्थः, श्रोत्रेन्द्रियेणोपलब्धिर्यस्येति बहुव्रीहिणाऽन्यपदार्थे शब्दोऽप्यधिक्रियते। ततश्चाद्यसमासद्वये श्रोत्रेन्द्रियद्वारकमभिलापप्लावितोपलब्धिलक्षणं भावश्रुतमुक्तं द्रष्टव्यम्, बहुव्रीहिणा तु तस्य भावश्रुतोपलब्धावनुपयुक्तस्य वदतो द्रव्यश्रुतम्, तदुपयुक्तस्य तु वदत उभयश्रुतमभिहितं वेदितव्यम्। इह च व्यवच्छेदफलत्वात् सर्वं वाक्यं सावधारणं भवति, इष्टश्चाऽवधारणविधिः प्रवर्तते; ततः 'चैत्रो धनुर्धर एव' इत्यादिष्विवेहाऽयोगव्यवच्छेदेनाऽवधारणं द्रष्टव्यम्, तद्यथा-श्रुतं श्रोत्रेन्द्रियोपलब्धिरेव, न तु श्रोत्रेन्द्रियोपलब्धिः श्रुतमेवेति; श्रोत्रेन्द्रियोपलब्धिस्तु श्रुतं मतिर्वा भवति, यथा धनुर्धरश्चैत्रोऽन्यो वेति, श्रोत्रेन्द्रियोपलब्धेरवग्रहे-हादिरूपाया मतित्वात्, श्रुतानुसारिण्यास्तु श्रुतत्वादिति; यदि पुनः श्रोत्रेन्द्रियोपलब्धिः श्रुतमेवेत्यवधार्येत, तदा तदुपलब्धेर्मतित्वं सर्वथैव न स्यात्, इष्यते च कस्याश्चित् तदपीति भावः। यदि श्रोत्रेन्द्रियोपलब्धिः श्रुतम्, तर्हि शेषं किं भवतु ?, इत्याह-'सेसयं त्वित्यादि' श्रोत्रेन्द्रियोपलब्धिं विहाय शेषकं यच्चक्षुरादीन्द्रियचतुष्टयोपलब्धिरूपं तद् मतिज्ञानं 'भवति' इति वर्तते। तुशब्दः समुच्चये, स चैवं समुच्चिनोति न केवलं शेषेन्द्रियोपलब्धिर्मतिज्ञानम्, किन्तु श्रोत्रेन्द्रियोपलब्धिश्च काचिदवग्रहे-हादिमात्ररूपा मतिज्ञानं भवति; तथा च सत्यनन्तरमवधारणव्याख्यानमुपपन्नं भवति। 'सेसयं तु मइनाणं' इति सामान्येनैवोक्ते शेषस्य सर्वस्याऽप्युत्सर्गेण मतित्वे प्राप्ते सत्यपवादमाह 'मोत्तूणं दव्वसुयं ति' पुस्तकादिलिखितं यद् द्रव्यश्रुतं तद् मुक्त्वा परित्यज्यैव शेषं मतिज्ञानं द्रष्टव्यम्, पुस्तकादिन्यस्तं हि भावश्रुतकारणत्वात् शब्दवद् द्रव्यश्रुतमेव, इति कथं मतिज्ञानं स्यात् ?, इति भावः। न केवलं श्रोत्रेन्द्रियोपलब्धिः श्रुतम्, किन्तु यश्च शेषेषु चतुर्षु चक्षुरादीन्द्रियेषु श्रुतानुसारिसाभिलापविज्ञानरूपोऽक्षरलाभः सोऽपि श्रुतम्, न त्वक्षरलाभमात्रम्; तस्येहा-ऽपायाद्यात्मके मतिज्ञानेऽपि सद्भावादिति। ....॥११७॥

[पं०१९] **सोइंदिओवलद्धी चेव सुयं न उ तई सुयं चेव। सोइंदिओवलद्धी वि काइ जम्हा मइन्नाणं॥१२२॥** इह श्रोत्रेन्द्रियोपलब्धिशब्दस्य तृतीया-षष्ठीसमासः, बहुव्रीहिश्च; आद्यसमासद्वयेन भावश्रुतम्, बहुव्रीहिणा तु भावश्रुतानुपयुक्तस्य वदतो द्रव्यश्रुतम्, तदुपयुक्तस्य तु ब्रुवत उभयश्रुतं गृहीतमिति प्राग्वृत्तौ दर्शितं सर्वं द्रष्टव्यम्। अवधारणविधिमपि प्रागुपदर्शितमाह-'श्रोत्रेन्द्रियोपलब्धिरेव श्रुतं' इत्येवमवधारणीयम्। 'न उ तई ति' न पुनः 'सा श्रोत्रेन्द्रियोपलब्धिः श्रुतमेव' इति कुतो नैवमवधार्यते ?, इत्याह-यस्माच्छ्रोत्रेन्द्रियोपलब्धिरपि काचिदश्रुतानुसारिणी

अवग्रहे-हादिमात्ररूपा मतिज्ञानमेव, अतः 'श्रोत्रेन्द्रियोपलब्धिः श्रुतमेव' इति नावधार्यत इति भावः। एवं च सति **न नाम सोउग्गहादओ बुद्धी** [गा० ११८] इत्यादि परेण यत् प्रेरितं तत् परिहृतं भवति, श्रोत्रावग्रहादीनामपि बुद्धिरूपतायाः समर्थितत्वात्॥ इति गार्थाथः॥१२२॥

[पं०२४] **तु समुच्चयवयणाओ व काई सोइन्दिओवलद्धी वि। मइरेवंसइ सोउग्गहादओ हुन्ति मइभेया॥१२३॥ सेसयं तु मइनाणं** [गा० ११७] इत्यत्र योऽसौ तुशब्दः स समुच्चयवचनः, ततश्च किमुक्तं भवति ?- शेषकं मतिज्ञानम्, काचिदनपेक्षितपरोपदेशार्हद्वचना श्रोत्रेन्द्रियोपलब्धिश्च मतिज्ञानमित्येवं वा श्रोत्रावग्रहादयो भवन्ति मतिभेदाः। तथा च सति मतेरष्टाविंशतिभेदत्वं न परिहीयते, ततश्च **न नाम सोउग्गहादओ बुद्धी** [गा०-११८] इत्यादि परप्रेर्यं प्रतिक्षिप्तमेव॥ इति गाथार्थः॥१२३॥'' - **विशेषाव० मलधारि०।**

[पृ०२२५ पं०१९] ''तान्येव लक्षणादीनि पुरतो विस्तराभिधेयात् संपिण्ड्यैकगाथया दर्शयति– **लक्खणभेआ हेऊ फलभावओ भेयइन्दियविभागा। वाग-क्खर-मूए-यर भेआभेओ मइ-सुयाणं॥९७॥** लक्षणभेदाद् भिन्नलक्षणत्वाद् मति-श्रुतयोर्भेदः। तथा मतिज्ञानं हेतुः, श्रुतं तु तत्फलं तत्कार्यम्; इति हेतुफलभावात् तयोर्भेदः। तथा 'भेअ त्ति' विभागशब्दोऽत्रापि योज्यते, ततश्च भेदानां विभागो विशेषो भिन्नत्वं भेदविभागः, तस्मादपि मति-श्रुतयोर्भेदः, अवग्रहादिभेदादष्टाविंशत्यादिभेदं हि मतिज्ञानं वक्ष्यते 'अक्खर सन्नी सम्मं' इत्यादि वक्ष्यमाणवचनाच्चतुर्दशादिभेदं च श्रुतज्ञानम्, इति भेदविभागात् तयोर्भेद इति भावः। 'इंदियविभाग त्ति' तत्त्वतः श्रोत्रविषयमेव श्रुतज्ञानम्, शेषेन्द्रियविषयमपि मतिज्ञानम्, इत्येवं वक्ष्यमाणा-दिन्द्रियविभागाच्च तयोर्भेदः। 'वागेत्यादि' वल्कश्चाऽक्षरं च मूकं च वल्कादिप्रतिपक्षभूतानीतराणि च वल्का-ऽक्षर-मूकेतराणि तैर्योऽसौ भेदस्तस्मादपि मति-श्रुतयोर्भेद इत्यर्थः.....॥९७॥'' - **विशेषाव० मलधारि०।**

[पृ०२२७ पं०१] ''संप्रति विनयस्य पारंपर्येण पर्यन्तवर्ति मोक्षाख्यं फलं दर्शयन्नाह– **विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम्। ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः॥७२॥ टीका०** विनयस्य फलं शुश्रूषा श्रोतुमिच्छा यदाचार्य उपदिशति तत् सम्यक् शुश्रूषते श्रुत्वा चानुतिष्ठति। गुरोः सकाशादाकर्ण्य किं फलमिहावाप्यतेऽत आह- गुरुशुश्रूषायाः फलं श्रुतज्ञानमागमज्ञानलाभ इत्यर्थः। ज्ञानस्य किं फलं ? विरतिराश्रवद्वारेभ्यो निवृत्तिः। विरतेः फलमाश्रवद्वारस्थगनम्। विरतौ सत्यामाश्रवद्वाराणि स्थगितानि भवन्ति ततश्चाश्रवद्वारस्थगनात् संवरो जायते फलभूतः संवरात्मा भवति अपूर्वकर्मप्रवेशनिरोधः॥७२॥'' - **प्रशम० टीका०।**

[पं०४] ''ननु यथा मति-श्रुताभ्यां सम्यग्दृष्टिर्घटादिकं जानीते, व्यवहरति च; तथा

मिथ्यादृष्टिरपि, तत् किमिति तस्य सत्कं सर्वमप्यज्ञानमुच्यते ?, इत्याशङ्क्याह– **सद-सदविसेसणाओ भवहेउ-जदिच्छिओवलम्भाओ। नाणफलाभावाओ मिच्छदिट्ठिस्स अण्णाणं॥११५॥** सच्चाऽसच्च सद-सती तयोरविशेषणमविशेषस्तस्माद् हेतोः, मिथ्यादृष्टेः संबन्धि व्यवहारमात्रेण ज्ञानमपि निश्चयतोऽज्ञानमुच्यते, सतो ह्यसत्वेनाऽसद् विशिष्यते, असतोऽपि च सत्त्वेन सद् भिद्यते। मिथ्यादृष्टिश्च घटे सत्त्व-प्रमेयत्व-मूर्तत्वादीन्, स्तम्भ-रम्भाऽम्भोरुहादिव्यावृत्त्यादींश्च पटादिधर्मान् सतोऽप्यसत्त्वेन प्रतिपद्यते, 'सर्वप्रकारैर्घट एवायम्' इत्यवधारणात्। अनेन ह्यवधारणेन सन्तोऽपि सत्त्व-प्रमेयत्वादयः पटादिधर्मा न सन्तीति प्रतिपद्यते, अन्यथा सत्त्व-प्रमेयत्वादिसामान्यधर्मद्वारेण घटे पटादीनामपि सद्भावात् 'सर्वथा घट एवायम्' इत्यवधारणानुपपत्तेः, 'कथञ्चिद् घट एवाऽयम्' इत्यवधारणे त्वनेकान्तवादाभ्युपगमेन सम्यग्दृष्टित्वप्रसङ्गात्, तथा पट-पुट-नट-शकटादिरूपं घटेऽसदपि सत्त्वेनाऽयमभ्युपगच्छति 'सर्वैः प्रकारैर्घटोऽस्त्येव' इत्यवधारणात्, 'स्यादस्त्येव घटः' इत्यवधारणे तु स्याद्वादाश्रयणात् सम्यग्दृष्टित्वप्राप्तेः। तस्मात् सद-सतोर्विशेषाभावादुन्मत्तकस्येव मिथ्यादृष्टेर्बोधोऽज्ञानम्। तथा विपर्यस्तत्वादेव भवहेतुत्वात् तद्बोधोऽज्ञानम् तथा पशुवध-तिलादिदहन-जलाद्यवगाहनादिषु संसारहेतुषु मोक्षहेतुत्वबुद्धेः, दया-प्रशम-ब्रह्मचर्या-ऽऽकिञ्चन्यादिषु तु मोक्षकारणेषु भवहेतुत्वाध्यवसायतो यदृच्छोपलम्भात् तस्याऽज्ञानम्। तथा विरत्यभावेन ज्ञानफलाभावाद् मिथ्यादृष्टेरज्ञानम्॥ इति गाथार्थः॥११५॥" - **विशेषाव० मलधारि०।**

[पृ०२२९ पं०९] "**पुव्वं सुयपरिकम्मियमइस्स जं संपयं सुयाईयं। तं निस्सियमियरं पुण अणिस्सियं मइचउक्कंतं॥१६९॥** व्यवहारकालात् पूर्वं यथोक्तरूपेण श्रुतेन परिकर्मिता-आहितसंस्कारा मतिर्यस्य स तथा तस्य साध्वादेर्यत् सांप्रतं व्यवहारकाले श्रुतातीतं श्रुतनिरपेक्षं ज्ञानमुपजायते तच्छ्रुतनिश्रितमवग्रहादिकं सिद्धान्ते प्रतिपादितम्। इतरत् पुनरश्रुतनिश्रितम्, तच्चौत्पत्तिक्यादिमतिचतुष्कं द्रष्टव्यम्, ... ॥१६९॥" - **विशेषाव० मलधारि०।**

[पं०१६] "**प्रयोजनम्। त०९।९४॥** 'सः अस्य' इति वर्तते। 'सः' इति प्रथमान्तात् 'अस्य' इति षष्ठ्यर्थे इकण् प्रत्ययो भवति। तत् चेत् प्रथमान्तं प्रयोजनं स्यात्। प्रयोजनम्-प्रयोजकम्। जिनमहः प्रयोजनम् अस्य जैनमहिकम्॥९४॥" - **मलय० स्वो० टीका०॥**

[पृ०२६५,२८६ पं०१९,३] "आह-ननु संशयेहयोः किं कश्चिद् विशेषोऽस्ति, येनेहारूपत्वं संशयस्य निषिध्यते ? इत्याशङ्क्य तयोः स्वरूपभेदमुपदर्शयन्नाह– **जमणेगत्थालंबण-मपज्जुदासपरिकुंठियं चित्तं। सेय इव सव्वप्पयओ तं संसयरूवमन्नाणं॥१८३॥ तं चिय सयत्थहेऊ-ववत्तिवावारतप्परममोहं। भूया-ऽभूयविसेसायाण-च्चायाभिमुहमीहा॥१८४॥** यच्चित्तं यन्मनोऽनेकार्थालम्बनमनेकार्थप्रतिभासाऽऽन्दोलितम्, अत एव पर्युदसनं पर्युदासो निषेधो

न तथाऽपर्युदासोऽनिषेधस्तेन, तथोपलक्षणत्वादविधिना च परिकुण्ठितं जडीभूतं सर्वथाऽवस्तुनिश्चयरूपतामापन्नम्, किं बहुना ? 'सेय इवेत्यादि' शेत इव स्वपितीव सर्वात्मना न किञ्चिच्चेतयते, वस्त्वप्रतिपत्तिरूपत्वात्, तदेवंविधं चित्तं संशयरूपं संशय उच्यत इत्यर्थः, तच्चाऽज्ञानम्, वस्त्ववबोधरहितत्वादिति। यत् पुनस्तदेव चेतो वक्ष्यमाणस्वरूपं तदीहेति संबन्धः। कथंभूतं सत् ? इत्याह- 'भूया-ऽभूयेत्यादि' भूतः क्वचिद् विवक्षितप्रदेशे स्थाण्वादिरर्थः, अभूतस्तत्राऽविद्यमानः पुरुषादिः, तावेव पदार्थान्तरेभ्यो विशिष्यमाणत्वाद् विशेषौ, तयोरादान-त्यागाभिमुखं-भूतार्थविशेषोपादानस्याऽभिमुखम्, अभूतार्थत्यागस्याऽभिमुखमिति यथासंख्येन संबन्धः। यतः कथंभूतम् ? इत्याह-सदर्थहेतूपपत्तिव्यापारतत्परं हेतुद्वारेणेदं विशेषणम्-सदर्थहेतूपपत्तिव्यापारतत्परत्वाद् भूता-ऽभूतविशेषादान-त्यागाभिमुखमिति भावः, तत्र हेतुः साध्यार्थगमकं युक्तिविशेषरूपं साधनम्, उपपत्तिः संभवघटनम्-विवक्षितार्थस्य संभवव्यवस्थापनम्। ततश्च हेतुश्चोपपत्तिश्च हेतूपपत्ती सदर्थस्य विवक्षितप्रदेशेऽरण्यादौ विद्यमानस्य स्थाण्वादेरर्थस्य हेतू-पपत्ती सदर्थहेतूपपत्ती, तद्विषयो व्यापारो घटनं चेष्टनं सदर्थहेतूपपत्तीव्यापारस्तत्परं तन्निष्ठमिति समासः। अत एवाऽमोघमर्थबलायातत्वेनाऽविफलममिथ्यास्वरूपम्, तदेवंभूतं चेतः 'ईहा' इति संबन्धः कृत एव; इदमुक्तं भवति-केनचिदरण्यदेशं गतेन सवितुरस्तमयसमयें ईषदवकाशमासादयति तमिस्रे दूरवर्ती स्थाणुरुपलब्धः, ततोऽस्य विमर्शः समुत्पन्नः-किमयं स्थाणुः, पुरुषो वा ? इति। अयं च संशयत्वादज्ञानम्। ततोऽनेन तस्मिन् स्थाणौ दृष्ट्वा वल्ल्यारोहणम्, प्रविलोक्य काक-कारण्डव-कादम्बक-क्रौञ्च-कीरशकुन्तकुलनिलयनम्, कृतश्चेतसि हेतुव्यापारः, यथा स्थाणुरयम्, वल्ल्युत्सर्पण-काकादिनिलयनोपलम्भात्। तथा संभवपर्यालोचनं च व्यधायि, तद् यथा-अस्ताचलान्तरिते सवितरि, प्रसरति चेषत्तमिस्रे महारण्येऽस्मिन् स्थाणुरयं संभाव्यते, न पुरुषः, शिरःकण्डूयन-कर-ग्रीवाचलनादेस्तद्व्यवस्थापकहेतोरभावात्; ईदृशे च प्रदेशेऽस्यां वेलायां प्रायस्तस्याऽसंभवात्। तस्मात् स्थाणुनाऽत्र सद्भूतेन भाव्यम्, न पुरुषेण। तदुक्तम्-

अरण्यमेतत् सविताऽस्तमागतो न चाऽधुना संभवतीह मानवः। प्रायस्तदेतेन खगादिभाजा भाव्यं स्मरारातिसमाननाम्ना॥१॥ [ ] एतच्चेदृशं चित्तं 'ईहा' इत्युच्यते, निश्चयाभिमुखत्वेन संशयादुत्तीर्णत्वात्, सर्वथानिश्चयेऽपायत्वप्रसङ्गेन निश्चयादधोवर्तित्वाच्च। इति संशये-हयोः प्रतिविशेषः॥ इति गाथाद्वयार्थः॥१८३-१८४॥" - **विशेषाव० मलधारि०।**

[**पृ०२६६ पं०१६**] "तत्र व्यञ्जनं तावत् किमुच्यते ?, इत्याह- **वंजिज्जइ जेणत्थो घडो व्व दीवेण वंजणं तं च। उवगरणिंदियसद्दाइपरिणयद्दव्वसंबंधो॥१९४॥** व्यज्यते प्रकटीक्रियतेऽर्थो येन, दीपेनेव घटः, तद् व्यञ्जनम्। किं पुनस्तत् ?, इत्याह-'तं चेत्यादि' तच्च व्यञ्जनमुपकरणेन्द्रियशब्दादिपरिणतद्रव्यसंबन्धः, इन्द्रियं द्विविधम्- द्रव्येन्द्रियम्, भावेन्द्रियं

च। तत्र निर्वृत्त्युपकरणे द्रव्येन्द्रियम्, लब्ध्युपयोगौ भावेन्द्रियम्। निर्वृत्तिश्च द्विधा-अङ्गुलासंख्येय-भागादिमाना कदम्बकुसुमगोलक-धान्यमसूर-काहला-क्षुरप्राकारमांसगोलकरूपा, शरीराकारा च श्रोत्रादीन्द्रियाणां पञ्चानामपि यथासंख्यमन्तर्निवृत्तिः; कर्णशष्कुलिकादिरूपा तु बहिर्निर्वृत्तिः। तत्र कदम्बकुसुमगोलकाकारमांसखण्डादिरूपाया अन्तर्निर्वृत्तेः शब्दादिविषय-परिच्छेदहेतुर्यः शक्तिविशेषः स उपकरणेन्द्रियम्, शब्दादिश्च श्रोत्रादीन्द्रियविषयः, आदिशब्दाद् रस-गन्ध-स्पर्शपरिग्रहः; तद्भावेन परिणतानि च तानि भाषावर्गणादिसंबन्धीनि द्रव्याणि च शब्दादिपरिणतद्रव्याणि, उपकरणेन्द्रियं च शब्दादिपरिणतद्रव्याणि च, तेषां परस्परं संबन्ध उपकरणेन्द्रिय-शब्दादिपरिणतद्रव्यसंबन्धः; एष तावद् व्यञ्जनमुच्यते। अपरं चेन्द्रियेणाऽप्यर्थस्य व्यज्यमानत्वात् तदपि व्यञ्जनमुच्यते। तथा शब्दादिपरिणतद्रव्यनिकुरम्बमपि व्यज्यमानत्वाद् व्यञ्जनमभिधीयत इति। एवमुपलक्षणव्याख्यानात् त्रितयमपि यथोक्तं व्यञ्जनमवगन्तव्यम्। ततश्चेन्द्रियलक्षणेन व्यञ्जनेन शब्दादिपरिणतद्रव्य-संबन्धस्वरूपस्य व्यञ्जनस्याऽवग्रहो व्यञ्जनावग्रहः, अथवा तेनैव व्यञ्जनेन शब्दादिपरिणत-द्रव्यात्मकानां व्यञ्जनानामवग्रहो व्यञ्जनावग्रहः, इत्युभयत्राऽप्येकस्य व्यञ्जनशब्दस्य लोपं कृत्वा समासः॥ इति गाथार्थः॥१९४॥'' - **विशेषाव० मलधारि०।**

[**पं०१९, पृ०२७६ पं०४**] ''**कृत् बहुलम्॥ कृ०१।१२॥** कृत्प्रत्ययः निर्दिष्टात् अर्थात् अन्यत्रापि अर्थे बहुलं वेदितव्यः। पादाभ्यां ह्रियते पादहारकः। कृष्टे पच्यन्ते स्वयमेव कृष्टपच्याः शालयः। रोचते इति रुच्यो मोदको मैत्राय। गां हन्ति तस्मै आगताय दातुम् इति गोघ्नः ब्राह्मणः। स्नाति अनेन इति स्नानीयं चूर्णम्। मोहयति आत्मानम् मुह्यति अनेन इति वा मोहनीयं कर्म। अवस्राव्यते तत् इति अवस्रावणम्। राजभोजनाः शालयः। संप्रदीयते तस्मै संप्रदानम्। अपादीयते तस्मात् इति अपादानम्। इत्यादिनिर्दिष्टे अर्थे कृतः नियोगतः। अन्यत्र तु यथादर्शनम् अल्पशः॥१२॥'' - **मलय० स्वो०॥**

[**पृ०२६७ पं०१७**] ''**जं सव्वहा न वीसुं सव्वेसु वि तं न रेणुतेल्लं व। पत्तेयमणिच्छंतो कहमिच्छसि समुदए नाणं ?॥२०१॥** यद् वस्तु सर्वथा सर्वप्रकारैर्विष्वक् पृथग् नास्ति तत् समुदायेऽपि नाऽभ्युपगन्तव्यम्, यथा रेणुकणनिकरे प्रतिरेणुकमविद्यमानं तैलम्; एवं चेत्, तर्हि त्वमपि प्रत्येकमनिच्छन् कथं समुदये ज्ञानमिच्छसि ?। इदमुक्तं भवति- यदीन्द्रियविषयसंबन्धस्य प्रथमसमयादारभ्य व्यञ्जनावग्रह-संबन्धिनोऽसंख्येयान् समयान् यावत् प्रतिसमयं पुष्टिमाबिभ्रतीं ज्ञानमात्रां काश्चिदपि नेच्छसि, तर्हि चरमसमयशब्दादिविषयद्रव्यसंबन्धेन संपूर्णे समुदायेऽपि कथं तामिच्छसि ?- चरमसमयशब्दादिविषयद्रव्यसंबन्धे यदर्थावग्रह-ज्ञानमभ्युपगम्यते, तदपि प्रत्येकमसच्चरमसिकताकणे तैलवद् न प्राप्नोतीति भावः। तस्मात् तिलेषु तैलवत् सर्वेष्वपि समयेषु प्रत्येकं यच्च यावच्च ज्ञानमस्तीति प्रतिपत्तव्यम्॥ इति गाथार्थः॥२०१॥'' - **विशेषाव० मलधारि०।**

[पृ०२७१ पं०५] **''इट्ठा-णिट्ठाहारब्भवहारे होन्ति पुट्ठि-हाणीओ। जह, तह मणसो ताओ पोग्गलगुणउ त्ति को दोसो ?॥२२१॥** ननु किमिहाऽलौकिकम् ?, यतो भवतो लोकस्य च सबालगोपालस्य तावत्प्रतीतमिदं यदुत-इष्टो मनोऽभिरुचितो य आहारस्तस्याऽभ्यवहारे जन्तूनां शरीरस्य पुष्टिर्भवति, यस्त्वनिष्टोऽनभिमत आहारस्तस्याऽभ्यवहारे हानिर्भवतीति। ततश्च 'जह त्ति' यथा इष्टा-ऽनिष्टाहाराभ्यवहारे तत्पुद्गलानुभावात् पुष्टि-हानी भवतः, 'तह त्ति' तथा यदि द्रव्यमनोलक्षणात् मनसोऽपि सकाशात् 'ताउ त्ति' ते पुष्टि-हानी पुद्गलगुणतः पुद्गलानुभावाद् भवतः, तर्हि को दोषः ? न कश्चिदित्यर्थः। यथाऽऽहार इष्टा-ऽनिष्टपुद्गलमयत्वात् तदनुभावाज्जन्तुशरीराणां पुष्टि-हानी जनयति, तथा द्रव्यमनोऽपि तन्मयत्वाद् यदि तेषां ते निर्वर्तयति, तदा किं क्षूयते, येन पुद्गलमयत्वे समानेऽपि भवतोऽत्रैवाऽक्षमा ? इति भावः। तथा चोक्तम्– ''चिन्तया वत्स ! ते जातं शरीरकमिदं कृशम्'' इति। चिन्तैव तर्हि कार्श्याद्युपघातादिजनिकेति चेत्। न, तस्या अपि द्रव्यमनःप्रभवत्वात्, अन्यथा चिन्ताया ज्ञानरूपत्वात्, ज्ञानस्य चाऽमूर्तत्वात्, अमूर्तस्य च नभस इवोपघातादिहेतुत्वायोगात्, **जमणुग्गहोवघाया जीवाणं पोग्गलेहिंतो** [गा०२२३] इति वक्ष्यमाणत्वाच्च॥ इति गाथार्थ॥२२१॥'' - **विशेषाव० मलधारि०।**

[पृ०२७७ पं०१] ''यथाप्रतिज्ञातमेव संपादयन्नाह– **सामण्णमेत्तगहणं नेच्छइओ समयमोग्गहो पढमो। तत्तोऽणंतरमीहियवत्थुविसेसस्स जोऽवाओ॥२८२॥ सो पुणरीहाऽवायावेक्खाओ वग्गहो त्ति उवयरिओ। एस्सविसेसावेक्खं सामण्णं गेण्हए जेणं॥२८३॥ तत्तोऽणंतरमीहा तत्तो ऽवाओ य तव्विसेसस्स। इय सामण्ण-विसेसावेक्खा जावंतिमो भेओ॥२८४॥ व्या०** इहैकसमयमात्रमानो नैश्चयिको निरुपचरितः प्रथमोऽर्थावग्रहः। कथंभूतः ?, इत्याह-सामान्यमात्रस्याऽव्यक्तनिर्देश्यस्य वस्तुनो ग्रहणं सामान्यवस्तुमात्रग्राहक इत्यर्थः, सामयिकानि हि ज्ञानादिवस्तूनि परमयोगिन एव निश्चयवेदिनोऽवगच्छन्तीति नैश्चयिकोऽयमुच्यते। अथ च्छद्मस्थव्यवहारिभिरपि यो व्यवह्रियते, तं व्यावहारिकमुपचरितमर्थावग्रहं दर्शयति-'तत्तो इत्यादि' ततो नैश्चयिकार्थावग्रहादनन्तरमीहितस्य वस्तुविशेषस्य योऽपायः स पुनर्भाविनीहाम्, अपायं चाऽपेक्ष्योपचरितोऽवग्रहोऽर्थावग्रह इति द्वितीयगाथायां संबन्धः। उपचारस्यैवाऽस्य निमित्तान्तरमाह-'एस्सेत्यादि' एष्यो भावी योऽन्यो विशेषस्तदपेक्षया येन कारणेनाऽयमपायोऽपि सन् सामान्यं गृह्णाति, यश्च सामान्यं गृह्णाति सोऽर्थावग्रहो यथा प्रथमो नैश्चयिकः। एतदिह तात्पर्यम्-प्रथमं नैश्चयिकेऽर्थावग्रहे रूपादिभ्योऽव्यावृत्तमव्यक्तं शब्दादिवस्तुसामान्यं गृहीतम्, ततस्तस्मिन्नीहिते सति 'शब्द एवाऽयम्' इत्यादिनिश्चयरूपोऽपायो भवति। तदनन्तरं तु 'शब्दोऽयं किं शाङ्खः, शार्ङ्गो वा' इत्यादिशब्दविशेषविषया पुनरीहा प्रवर्तिष्यते, 'शाङ्ग एवाऽयं शब्दः' इत्यादिशब्द-

विशेषविषयोऽपायश्च यो भविष्यति तदपेक्षया 'शब्द एवाऽयम्' इति निश्चयः प्रथमोऽपायोऽपि सन्नुपचारादर्थावग्रहो भण्यते, ईहा-ऽपायापेक्षात इति, अनेन चोपचारस्यैकं निमित्तं सुचितम्। 'शाङ्गोऽयं शब्दः, इत्याद्येष्यविशेषापेक्षया येनाऽसौ सामान्यशब्दरूपं सामान्यं गृह्णातीति, अनेन तूपचारस्यैव द्वितीयं निमित्तमावेदितम्; तथाहि-यदनन्तरमीहा-ऽपायौ प्रवर्तेते, यश्च सामान्यं गृह्णाति, सोऽर्थावग्रहः, यथाऽऽद्यो नैश्चयिकः, प्रवर्तते च 'शब्द' एवाऽयम् इत्याद्यपायाऽनन्तरमीहा-ऽपायौ, गृह्णाति च 'शाङ्गोऽयम्' इत्यादिभाविविशेषापेक्षयाऽयं सामान्यम्। तस्मादर्थावग्रह एष्यविशेषापेक्षया सामान्यं गृह्णातीत्युक्तम्। ततस्तदनन्तरं किं भवति ?, इत्याह तृतीयगाथायाम्-'तत्तोऽणन्तरमित्यादि' ततः सामान्येन शब्दनिश्चयरूपात् प्रथमापायादनन्तरं 'किमयं शब्दः शाङ्गः, शार्ङ्गो वा ?' इत्यादिरूपेहा प्रवर्तते। ततस्तद्विशेषस्य शङ्गप्रभवत्वादेः शब्दविशेषस्य 'शाङ्ग एवाऽयम्' इत्यादिरूपेणाऽपायश्च निश्चयरूपो भवति। अयमपि च भूयोऽन्यतद्विशेषाकाङ्क्षावतः प्रमातुर्भाविनीमीहामपायं चाऽपेक्ष्य, एष्यविशेषापेक्षया सामान्यलम्बनत्वाच्चाऽर्थावग्रह इत्युपचर्यते। इयं च सामान्य-विशेषापेक्षा तावत् कर्तव्या, यावदन्त्यो वस्तुनो भेदो विशेषः। यस्माच्च विशेषात् परतो वस्तुनोऽन्ये विशेषा न संभवन्ति सोऽन्त्यः, अथवा संभवत्स्वपि अन्यविशेषेषु यतो विशेषात् परतः प्रमातुस्तज्जिज्ञासा निवर्तते सोऽन्त्यः, तमन्त्यं विशेषं यावद् व्यावहारिकाऽर्थवग्रहेहा-ऽपायार्थं सामान्य-विशेषाऽपेक्षा कर्तव्या॥ इति गाथात्रयार्थः॥२८२-२८३-२८४॥

इह च गाथात्रयेऽपि यः पर्यवसितोऽर्थो भवति, तमाह– **सव्वत्थे-हा-वाया निच्छयओमोत्तु माइसामण्णं। संववहारत्थं पुण सव्वत्थाऽवग्गहोऽवाओ॥२८५॥** सर्वत्र विषयपरिच्छेदे कर्तव्ये निश्चयतः परमार्थत ईहा-ऽपायौ भवतः, 'ईहा, पुनरपायः, पुनरीहा, पुनरप्यपायः' इत्येवं क्रमेण यावदन्त्यो विशेषः, तावदीहा-ऽपायावेव भवतः, नाऽर्थावग्रह इत्यर्थः। किं सर्वत्रैवमेव ?, न, इत्याह- 'मोत्तुमाइसामण्णं ति' आद्यमव्यक्तं सामान्यमात्रालम्बनमेकं सामयिकं ज्ञानं मुक्त्वाऽन्यत्रेहा-ऽपायौ भवतः, इदं पुनर्नेहा, नाऽप्यपायः, किन्त्वर्थावग्रह एवेति भावः। संव्यवहारार्थं व्यावहारिकजनप्रतीत्यपेक्षं पुनः सर्वत्र यो योऽपायः स स उत्तरोत्तरेहा-ऽपायापेक्षया, एष्यविशेषापेक्षया चोपचारतोऽर्थावग्रहः। एवं च तावद् नेयम्, यावत्तारतम्येनोत्तरोत्तरविशेषाकाङ्क्षा प्रवर्तते॥ इति गाथार्थः॥२८५॥ तरतमयोगाभावे तु किं भवति ?, इत्याह–

तरतमजोगाभावेऽवाउ च्चिय, धारणा तदंतम्मि। सव्वत्थ वासणा पुण भणिया कालंतरस्सई या॥२८६॥ तरतमयोगाभावे ज्ञातुरग्रेतनविशेषाकाङ्क्षानिवृत्तावपाय एव भवति, न पुनस्तस्याऽवग्रहत्वमिति भावः, तन्निमित्तानां पुनरीहादीनामभावादिति। यद्यग्रत ईहादयो न भवन्ति, तर्हि किं भवति ?, इत्याह-तदन्तेऽपायान्ते धारणा तदर्थोपयोगाऽप्रच्युतिरूपा भवति। शेषस्य

वासना-स्मृतिरूपस्य धारणाभेदद्वयस्य क्व संभवः ?, इत्याह-'सव्वत्थ वासणा पुणेत्यादि' वासना वक्ष्यमाणरूपा, तथा कालान्तरे स्मृतिः कालान्तरस्मृति, सा च सर्वत्र भणिता। अयमर्थः-अविच्युतिरूपा धारणाऽपायपर्यन्त एव भवति, वासना-स्मृती तु सर्वत्र कालान्तरेऽप्यविरुद्धे॥ इति गाथार्थः॥२८६॥" - **विशेषाव० मलधारि०।**

[पृ०२८१ पं०२] **"अत्थोग्गहो जहन्नो समयं सेसोग्गहादओ वीसुं। अंतोमुहुत्तमेगं तु वासनाधारणं मोत्तुं॥३३४॥** अवग्रह इत्यस्य व्याख्यानमर्थावग्रह इति, अयमपि निश्चय-व्यवहारभेदतो द्विधा, ततो व्यवहारार्थावग्रहव्यवच्छेदार्थमाह-'जहन्न इति' अतिस्तोककालत्वेन जघन्यो नैश्चयिकोऽर्थावग्रहो नेतर इत्यर्थः, अयमेकसमयं भवति। शेषास्त्वेकां वासनारूपां धारणां मुक्त्वा येऽवग्रहादयो व्यञ्जनावग्रह-व्यावहारिकार्थावग्रहे-हा-ऽपाया-ऽविच्युति-स्मृतिरूपा मतिभेदास्ते सर्वेऽपि विष्वक् पृथगेकमेवाऽन्तर्मुहूर्तं भवन्ति। वासनाधारणायास्तु निर्युक्तिगाथोक्तमेव कालमानमवगन्तव्यम्, इत्यभिप्रायः॥ इति गाथार्थः॥३३४॥" - **विशेषाव० मलधारि०।**

[पृ०२८३ पं०१] **"तोएण मल्लगं पिव वंजणमापूरियं ति जं भणियं। तं दव्वमिंदियं वा तस्संजोगो व न विरुद्धं॥२५०॥** 'जं भणियं' यदुक्तं नन्दिसूत्रकारेण। किं तत् ?, इत्याह-व्यञ्जनमापूरितमिति। केन किंवत् ?, इत्याह-तोयेन जलेन मल्लकं शरावं तद्वदिति। तस्मिन् सूत्रकारभणिते व्यञ्जनं द्रव्यं गृह्यते, इन्द्रियं वा, तयोर्वा द्रव्येन्द्रिययोः संयोगः संबन्धः, इति सर्वथाऽप्यविरोधः। इदमुक्तं भवति– व्यञ्जनशब्देन शब्दादिविषयपरिणतपुद्गलसमूहरूपं द्रव्यं, श्रोत्रादीन्द्रियं वा, द्रव्येन्द्रिययोः संबन्धो वा गृह्यते, न कश्चिद् विरोधः, व्यज्यते प्रकटीक्रियते विवक्षितोऽर्थोऽनेनेति व्यञ्जनमित्यस्या व्युत्पत्तेः सर्वत्र घटनात्॥ इति गाथार्थः॥२५०॥" - **विशेषाव० मलधारि०।**

[पृ०२८५ पं०१] **"ईहिज्जइ नाऽगहियं नज्जइ नाणीहियं न याऽनायं। धारिज्जइ जं वत्थु तेण कमोऽवग्गहाई उ॥२९६॥** यस्मादवग्रहेणाऽगृहीतं वस्तु नेह्यते-न तत्रेहा प्रवर्तते, ईहाया विचाररूपत्वात्, अगृहीते च वस्तुनि निरास्पदत्वेन विचाराऽयोगादिति भावः। तदनेन कारणेनाऽऽदावग्रहं निर्दिश्य पश्चादीहा निर्दिष्टा। न चाऽनीहितमविचारितं ज्ञायते-अपायविषयतां याति, अपायस्य निश्चयरूपत्वात् निश्चयस्य च विचारपूर्वकत्वादिति हृदयम्। एतदभिप्रायवता चाऽपायस्याऽऽदावीहा निर्दिष्टेति। न चाऽज्ञातम्-अपायेनाऽनिश्चितम्, धार्यते धारणाविषयीभवति, वस्तुधारणाया अर्थावधारणरूपत्वात्, अवधारणस्य च निश्चयमन्तरेणाऽयोगादित्यभिप्रायः। ततश्च धारणादावपायः। ततः किम् ?, इत्याह-तेनाऽवग्रहादिरेव क्रमो न्याय्यः, नोत्क्रमा-ऽतिक्रमौ, यथोक्तन्यायेन वस्त्वधिगमाभावप्रसङ्गात्॥ इति गाथार्थः॥२९६॥" - **विशेषाव० मलधारि०।**

[पृ०२८६ पं०३] दृश्यतां पृ० ५२ पं०२५॥

[पृ०२८७ पं०२] **''सेसेसु वि रूवाइसु विसएसु होंति सूवलक्खाइं। पायं पच्चासन्नत्तणेणमीहाइवत्थूणि॥२९२॥** यथा शब्दे, एवं शेषेष्वपि रूपादिविषयेषु साक्षादनुक्तान्यपि 'सूपलक्ष्याणि' - कथितानुसारप्रसरत्प्रज्ञानां चतुरचेतसां सुज्ञेयानि भवन्ति। कानि ?, इत्याह-ईहादीन्याभिनिबोधिकज्ञानस्य भेदवस्तूनि। केन सूपलक्ष्याणि ?, इत्याह-प्रायः प्रत्यासन्नत्वेन चक्षुरादिना गृह्यमाणस्य स्थाण्वादेः, तत्राऽगृह्यमाणेन पुरुषादिना सह प्रायो बहुभिर्धर्मैर्यत् प्रत्यासन्नत्वं या प्रत्यासत्तिः सादृश्यमिति यावत्, तेनेहादीनि ज्ञेयानि, न पुनरत्यन्तवैलक्षण्ये स्थाण्वादेरुष्ट्रादिना सहेत्यर्थः, इदमुक्तं भवति-अवग्रहे तावत् सामान्य-मात्रग्राहकत्वाद् द्वितीयवस्त्वपेक्षाऽपि न विद्यते, ईहा पुनरुभयवस्त्ववलम्बिनी, तत्र पुरोदृश्यमानस्य वस्तुनो यत् प्रतिपक्षभूतं वस्तु तत्प्रायो बहुभिर्धर्मैः प्रत्यासन्नं ग्राह्यम्, न पुनरत्यन्तविलक्षणम्; पुरो हि मन्दमन्दप्रकाशे दूराद् दृश्यमाने स्थाण्वादौ 'किमयं स्थाणुः, पुरुषो वा' इत्येवमेवेहा प्रवर्तते, ऊर्ध्वस्थानारोह-परिणाहतुल्यतादिभिः प्रायो बहुभिर्धर्मैः पुरुषस्य स्थाणुप्रत्यासन्नत्वादिति। 'किमयं स्थाणुः, उष्ट्रो वा ?' इत्येवं तु न प्रवर्तते, उष्ट्रस्य स्थाण्वपेक्षया प्रायोऽत्यन्तविलक्षणत्वात्। अत एव सामान्यमात्रग्राह्यवग्रहोऽत्रादौ न कृतः, किन्तु 'ईहादीनि' इत्येवमेवोक्तम्, उभयवस्त्व-लम्बित्वेनेहाया एव 'पायं पच्चासन्नत्तणेण' इतिविशेषणस्य सफलत्वात्। अपायस्याऽपि 'स्थाणुरेवाऽयं, न पुरुषः' इत्यादिरूपेण प्रवृत्तेः किञ्चिद् विशेषणस्य सफलत्वादादि-शब्दोऽप्यविरुद्धः॥ इति गाथार्थः॥ २९२॥ इह 'किं शब्दः, अशब्दो वा ?' इति श्रोत्रेन्द्रियस्य प्रत्यासन्नवस्तूपदर्शनं कृतमेव। अथ शेषचक्षुरादीन्द्रियाणां विषयभूतानि प्रत्यासन्नवस्तूनि क्रमेण प्रदर्शयति-

थाणु-पुरिसाइ-कुट्ठु-प्पलाइ-संभियकरिल्ल-मंसाई। सप्पु-प्पलनालाइ व्व समाण-रूवाइविसयाइं॥२९३॥ 'ईहादिवस्तूनि सूपलक्ष्याणि' इत्युक्तम्। कथंभूतानि सन्ति पुनस्तानि सूपलक्ष्याणि ?, इत्याह- समानः समानधर्मा रूपरसादिर्विषयो येषामीहादीनां तानि समानरूपादि-विषयाणीति पूर्वगाथायां संबन्धः। कः पुनरमीषां समानधर्मा रूपादिविषयः, इत्याह– स्थाणु-पुरुषादिवदिति पर्यन्ते निर्दिष्टोऽपि विषयोपदर्शनाभिद्योतको वच्छब्दः सर्वत्र योज्यते। ततश्चक्षुरिन्द्रियप्रभवस्येहादेः स्थाणु-पुरुषादिवत् समानधर्मा रूपविषयो द्रष्टव्यः, आदिशब्दात् 'किमियं शुक्तिका, रजतखण्डं वा ?' 'मृगतृष्णिका, पयःपूरो वा ?' रज्जुः, विषधरो वा ?' इत्यादिपरिग्रहः। घ्राणेन्द्रियप्रभवस्येहादेः कुष्ठो-त्पलादिवत् समानगन्धो विषयः, तत्र कुष्ठं गन्धिकहट्टविक्रेयो वस्तुविशेषः, उत्पलं पद्मम्; अनयोः किल समानो गन्धो भवति। तत ईदृशेन गन्धेन 'किमिदं कुष्ठम्, उत्पलं वा ?' इत्येवमीहाप्रवृत्तिः, आदिशब्दात् 'किमत्र सप्तच्छदाः, मत्तकरिणो वा ?' 'कस्तूरिका, वनगजमदो वा ?' इत्यादिपरिग्रहः। रसनेन्द्रियप्रभवस्येहादेः

संभृतकरील-मांसादिवत् समानरसो विषयः। तत्र संभृतानि संस्कृतानि संधानीकृतान्युद्धृतानि यानि वंशजालिसंबन्धीनि करीलानि, तथा मांसम्, अनयोः किलाऽऽस्वादः समानो भवति। ततोऽन्धकारादावन्यतरस्मिन् जिह्वाग्रप्रदत्ते भवत्येवम्-'किमिदं संभृतवंशकरीलम्, आमिषं वा ?' इति; आदिशब्दाद् 'गुडः, खण्डं वा ?' 'मृद्वीका, शुष्कराजादनं वा ?' इत्यादिपरिग्रहः। स्पर्शनेन्द्रियप्रभवस्येहादेः सर्पोत्पलनालादिवत् समानस्पर्शो विषयः, सर्पोत्पलनालयोश्च तुल्यस्पर्शत्वेनेहाप्रवृत्तिः सुगमैव, आदिशब्दात् स्त्री-पुरुष-लेष्टूपलादिसमानस्पर्शवस्तुपरिग्रहः॥ इति गाथार्थ॥२९३॥'' - **विशेषाव० मलधारि०।**

[**पृ०२८८ पं०९**] ''अथ शब्दलक्षणं विषयमाश्रित्य तावद् बह्वादीनामर्थं व्याख्यातुमाह- **नाणासद्दसमूहं बहुं पिहं मुणइ भिन्नजाईयं। बहुविहमणेगभेयं एक्केक्कं निद्ध-महुराइं ॥३०८॥ खिप्पमचिरेण तं चिय सरूवओ जं अणिस्सियमलिङ्गं। निच्छियमसंसयं जं धुवमच्चंतं न उ कयाइ॥३०९॥** इह श्रवणयोग्यदेशस्थे तूर्यसमुदाये युगपद् वाद्यमाने कोऽपि श्रोता तस्य तूर्यसंघातस्य संबन्धिनं पटह-ढक्का-शङ्ख-भेरि-भाणकादिनानाशब्दसमूहमाकर्णितं सन्तं क्षयोपशमविशेषाद् बहुमवग्रहादिना 'मुणति' जानाति। कोऽर्थः ?, इत्याह-पृथग् भिन्नजातीयम्, एतावन्तोऽत्र भेरिशब्दाः, एतावन्तो भाणकशब्दाः, एतावन्तस्तु शङ्ख-पटहादिशब्दाः, इत्येवं पृथगेकैकशो भिन्नजातीयत्वेन तं नानाशब्दसमूहं बुध्यत इत्यर्थः। अन्यस्त्वल्पक्षयोपशमत्वात् तत्समानदेशोऽप्यबहुं 'मुणति' सामान्येन 'नानातूर्यशब्दोऽयम्' इत्यादिमात्रकमेव जानातीति प्रतिपक्षः। एवमुत्तरगाथायामतिदेक्ष्यमाणा प्रतिपक्षभावना सर्वत्राऽवबोद्धव्या। अन्यस्तु क्षयोपशम-वैचित्र्याद् बहुविधं 'मुणति'। कोऽर्थः ? इत्याह-अनेकभेदम्, इदमपि व्याचष्टे-एकैकं शङ्ख-भेर्यादिशब्दं स्निग्धत्व-मधुरत्व-तरुण-मध्यम-वृद्धपुरुषवाद्यत्वादिबहुविधधर्मोपेतं जानातीत्यर्थः। अन्यस्त्वबहुविधं स्निग्ध-मधुरत्वादिस्वल्पधर्मान्वितमेव पृथग् भिन्नजातीयं नानाशब्दसमूहं जानाति। अन्यस्तु क्षिप्रम्। कोऽर्थः ? इत्याह-अचिरेण शीघ्रमेव परिच्छिनत्ति, न तु चिरेण विमृश्येत्यर्थः। अन्यस्त्वक्षिप्रं चिरविमर्शितं जानाति। तथा 'तं चिय सरूवओ जं अणिस्सियमिति' तमेव नानाशब्दसमूहं कोऽप्यनिश्रितं 'मुणति' इति संबन्धः। यं किम् ? इत्याह-यं स्वरूपतो जानाति। कोऽर्थः ?, इत्याह-अलिङ्गं पताकादिलिङ्गाऽनिश्रितमित्यर्थः। इदमुक्तं भवति-तमेव शब्दसमूहं 'देवकुलमत्र' तथाविधपताकादर्शनात्' इत्येवं लिङ्गनिश्रामकृत्वा स्वरूपत एव यमवगच्छति, तमनिश्रितं 'मुणति' इत्युच्यत इति। तमेव लिङ्गनिश्रया जानातो निश्रितं 'मुणति' इत्युच्यते। तथा 'निच्छियमसंसयं जं ति' यमसंशयमवच्छिनत्ति तं निश्चितं 'मुणति'। 'निश्चितं तावदित्थमेतद् मया, परं न जाने तथा वा स्यात्, अन्यथा वा', - इत्येवं संदेहानुविद्धं तु जानन्ननिश्चितं 'मुणति'। 'धुवमित्यादि' ध्रुवम् कोऽर्थः ? - अत्यन्तम्, न तु कदाचिदिति। इदमुक्तं भवति-

यथैकदा बह्वादिरूपेणाऽवगतं सर्वदैव तथाऽवबुध्यमानो ध्रुवं 'मुणति' इत्युच्यते। यस्तु कदाचिद् बह्वादिरूपेण, कदाचित् त्वबह्वादिरूपेण, सोऽध्रुवं 'मुणति'॥ इति गाथाद्वयार्थः॥३०८-३०९॥ इतरशब्दं व्याचिख्यासुराह–

एत्तो च्चिय पडिवक्खं साहिज्जा, निस्सिए विसेसो वा। परधम्मेहि विमिस्सं निस्सियमविणिस्सियं इयरं॥३१०॥ एतस्मादेवोक्तस्वरूपाद् बह्वादिपदषट्कसमूहात् प्रतिपक्षमेतद्विपर्ययमबह्व-बहुविधा-ऽक्षिप्र-निश्रिता-ऽनिश्रिता-ऽध्रुवपदषट्कलक्षणं साधयेत् स्वयमेव ब्रूयाद् मेधावी। स च लाघवार्थं बह्वादिविचार एव साधितः। तदेवं व्याख्याता द्वादशापि बह्वादयो भेदाः। अथवा निश्रिते सप्रतिपक्षेऽपि व्याख्यानान्तरलक्षणो विशेषो वक्तव्यः। कः ?, इत्याह- परधर्मैरश्वादिवस्तुधर्मैर्विमिश्रं युक्तं गवादिवस्तु गृह्णानस्य निश्रितं भवति-गामश्वादिरूपेण गृह्णतो येयं विपर्ययोपलब्धिः, तन्निश्रितमित्यर्थः। इतरत्तु यत्परधर्मैर्विमिश्रं वस्तु न गृह्णाति, किन्तु यथावस्थितमेव तत्सद्भूतोपलब्धिरूपमनिश्रितं गवादिकं वस्तु गवादिरूपेणैव गृह्णतो येयमविपर्ययोपलब्धिस्तदनिश्रितमित्यर्थः॥

अत्राह-ननु बहु-बहुविधपरिज्ञानादीनि विशेषणानि स्पष्टार्थग्राहकेष्वपायादिषु भवन्तु, व्यञ्जनावग्रह-निश्चयार्थावग्रहयोस्तु कथं तत्संभवः ?, तथाहि- **सामन्नमणिद्देसं सरूव-नामाइकप्पणारहियं** [गा०-२५२] इत्यादिवचनान्निश्चयार्थावग्रहे शब्दादिविशेषमात्रग्रहणमपि नास्ति, कुतो यथोक्तबह्वादिपरिज्ञानसंभवः ?, अथ व्याख्यानाद् व्यवहारार्थावग्रहोऽत्र गृह्यते, तस्मिंश्च विशेषग्राहित्वाद् बहुपरिज्ञानादिविशेषणान्युपपद्यन्त एव। भवत्वेवम्, तथाऽप्यष्टाविंशतिभेदमध्य-संगृहीतस्य व्यञ्जनावग्रहस्य कथमेतद्विशेषणसंभवः ? तत्र हि सामान्यार्थग्रहणमात्रमप्यपाकृतम्, बह्वादिपरिज्ञानं तु दूरोत्सारितमेवेति॥

सत्यमेतत्, किन्तु व्यञ्जनावग्रहादयः कारणमपायादीनाम्, तानन्तरेणाऽपायाद्यभावात्। ततश्चाऽपायादिगतं बह्वादिपरिज्ञानं तत्कारणभूतेषु व्यञ्जनावग्रहादिष्वपि योग्यतयाऽभ्युपगन्तव्यम्। न हि सर्वथाऽविशिष्टात् कारणाद् विशिष्टं कार्यमुत्पत्तुमर्हति, कोद्रवबीजादेरपि शालिफलादि-प्रसवप्रसङ्गात्, इति प्रागप्युक्तप्रायम्। इत्यलमतिचर्चितेन॥ इति गाथार्थः॥३१०॥'' - **विशेषाव० मलधारि०।**

[**पृ०२९० पं०५**] ''आदेशस्य व्याख्यानान्तरमाह– **आएसो त्ति व सुत्तं सुउवलद्धेसु तस्स मइनाणं। पसरइ तब्भावणया विणा वि सुत्तानुसारेण॥४०५॥** अथवाऽऽदेशः सूत्रमुच्यते, तेन सूत्रादेशेन सूत्रोपलब्धेष्वर्थेषु तस्य मतिज्ञानिनः सर्वद्रव्यादिविषयं मतिज्ञानं प्रसरति। ननु श्रुतोपलब्धेष्वर्थेषु यज्ज्ञानं तच्छ्रुतमेव भवति, कथं मतिज्ञानम् ? इत्याह- 'तब्भावणया इत्यादि' तद्भावनया, 'विणा वि सुत्तानुसारेण' श्रुतोपयोगमन्तरेण तद्वासनामात्रत एव, यद्

द्रव्यादिषु प्रवर्तते, तत् सूत्रादेशेन मतिज्ञानमिति भावः। .....॥४०५॥ कोऽयमादेशः ? इत्याह– **आएसो त्ति पगारो ओहादेसेण सव्वदव्वाइं। धम्मत्थिआइयाइं जाणइ न उ सव्वभेएणं॥४०३॥** इहाऽऽदेशो नाम ज्ञातव्यवस्तुप्रकारः। स च द्विविधः-सामान्यप्रकारः, विशेषप्रकारश्च। तत्रौघादेशेन सामान्यप्रकारेण द्रव्यसामान्येनेत्यर्थः, सर्वद्रव्याणि धर्मास्तिकायादीनि जानाति-'असंख्येयप्रदेशात्मको लोकव्यापकोऽमूर्तः प्राणिनां पुद्गलानां च गत्युपष्टम्भहेतुर्धर्मास्तिकायः' इत्यादिरूपेण कियत्पर्यायविशिष्टानि षडपि द्रव्याणि सामान्येन मतिज्ञानी जानातीत्यर्थः। अनभिमतप्रकारप्रतिषेधमाह- न तु सर्वभेदेन, न सर्वैरपिविशेषैर्न सर्वैरपि पर्यायैः केवलिदृष्टैर्विशिष्टानि तानि द्रव्याण्यसौ जानातीत्यर्थः, केवलज्ञानगम्यत्वादेव सर्वपर्यायाणामिति भावः॥४०३॥ धर्मास्तिकायादिभेदेन कथितं सामान्येन द्रव्यम्। अथ क्षेत्रादिस्वरूपं विशेषतः प्राह- **खेत्तं लोगा-लोगं कालं सव्वद्धमहव तिविहं ति। पंचोदइयाईए भावे जं नेयमेव इयं॥४०४॥** क्षेत्रमपि लोकालोकस्वरूपं सामान्यादेशेन कियत्पर्यायविशिष्टं सर्वमपि जानाति, न तु विशेषादेशेन सर्वपर्यायैर्विशिष्टमिति। एवं कालमपि सर्वाऽद्धारूपम्, अतीता-ऽनागत-वर्तमानभेदतस्त्रिविधं वेत्येक एवाऽर्थः। भावतस्तु सर्वभावानामनन्तभागं जानाति, औदयिकौपशमिक-क्षायिक-क्षायिकौपशमिक-पारिणामिकान् वा पञ्च भावान् सामान्येन जानाति, न परतः। कुतः ?, इत्याह-यद् यस्मादेतावदेव ज्ञेयमस्ति, नान्यदिति। इह क्षेत्र-कालौ सामान्येन द्रव्यान्तर्गतावेव, केवलं भेदेन रूढत्वात् पृथगुपादानमवसेयमिति॥४०४॥" - **विशेषाव० मलधारि०।**

[**पृ०२९१ पं०१५**] "**पारे-मध्येऽग्रेऽन्तः षष्ठ्या वा॥ ना० ८।५३।** 'पार' आदीनि नामानि षष्ठ्यन्तेन सह समस्यन्ते पूर्वपदार्थे वाच्ये, स च समासः अव्ययीभावः, तद्योगे निर्देशादेव 'पार' आदीनाम् एकारान्तत्वम्। पारेगङ्गम्। मध्येगङ्गम्। अग्रेवणम्। गिरेः अन्तः अन्तर्गिरि। पक्षे गङ्गापारम्। गङ्गामध्यम्। वनाग्रम्। गिर्यन्तः॥५४॥" **मलय० स्वो० टीका॥**

[**पृ०२९२ पं०१३**] "अथ परः सिद्धान्तस्य पूर्वापरविरोधमुद्भावयन्नाह– **लक्खेहिं एक्कवीसाए साइरेगेहिं पुक्खरद्धम्मि। उदये पेच्छंति नरा सूरं उक्कोसए दिवसे॥३४५॥**

ननु पुष्करवरद्वीपस्य मानुषोत्तरपर्वतद्विधाकृतस्याऽर्वाग्भागवर्तिन्यर्धे मानुषोत्तरसंनिधावुत्कृष्टे दिवसे कर्कटकसंक्रान्त्यामुदये, उपलक्षणत्वादस्तमयसमये च **नरा** मनुष्याः **सूरमादित्यं पश्यन्ति** अवलोकयन्ति। कियद्दूरं व्यवस्थितम् ?, इत्याह-सातिरेकैरेकविंशतिलक्षैर्योजनानाम्। एतदुक्तं भवति- **सीयालीससहस्सा दो य सया जोयणाण ते बद्धा। एगवीससट्ठिभागा कक्कडमाइम्मि पेच्छ नरा॥१॥** [ ] इति वचनाद् यथाऽत्र कर्कसंक्रान्तावुत्कृष्टे दिवसे एतावति दूरे व्यवस्थितं सूर्यं मनुष्याः पश्यन्ति, तथा पुष्करार्धेऽपि मानुषोत्तरसमीपे प्रमाणाङ्गुलनिष्पन्नैः सातिरेकैरेकविंशतियोजनलक्षै-

व्यवस्थितमादित्यं तत्र दिने तन्निवासिनो लोकाः समवलोकयन्ति। तत्र भ्रमितिबाहुल्यात्, सूर्याणां च शीघ्रतरगतित्वात्..... ॥३४५॥'' - **विशेषाव० मलधारि०।**

[**पृ०२९६ पं०६**] दृश्यतां पृ० ४९ पं० २२॥

[**पृ०२९८ पं०१५**] पूर्वं संज्ञायास्त्रैविध्यं यदुक्तम्, तत्र दीर्घकालिकीस्वरूपं तावदाह– **इह दीहकालिगी कालिगि त्ति सण्णा जया सुदीहं पि। संभरइ भूयमेस्सं चिंतेइ य किह णु कायव्वं ?॥५०८॥** इह दीर्घशब्दस्य लुप्तदर्शनाद् दीर्घकालिकी 'कालिकी' इत्युच्यते, कालिकी चासौ संज्ञा च पुंवद्भावात् 'कालिकसंज्ञा' इति द्रष्टव्यम्। यया सुदीर्घमपि कालं भूतमतीतमर्थं स्मरति, एष्यच्च भविष्यद्वस्तु चिन्तयति-'कथं नु नाम कर्तव्यम् ?' इत्येषा चिन्तामाश्रित्य दीर्घोऽतीताऽनागतवस्तुविषयः कालो यस्यां सा दीर्घकालिकी कालिकसंज्ञोच्यत इत्यर्थः॥५०८॥ एषा च संज्ञा यस्याऽस्त्यसौ कालिकसंज्ञी स च यो भवति, एतद् दर्शयति–

कालियसण्णि त्ति तओ जस्स तई सो य जो मणोजोग्गे। खंधेऽणंते घेत्तुं मन्नइ तल्लद्धिसंपण्णो॥५०९॥ 'तउ त्ति' तकोऽसौ 'कालिकसंज्ञी' इत्यभिधीयते। यस्य किम् ?, इत्यादि-'जस्स तई' त्ति यस्याऽसौ कालिकसंज्ञा प्राप्यते। स च को विज्ञेयः ?, इत्याह-'सो य जो मणोजोग्गे' इत्यादि। स च कालिकसंज्ञी विज्ञेयो यो यः कश्चिद् मनोज्ञानावरणकर्मक्षयोपशमाद् मनोलब्धिसंपन्नो मनोयोग्याननन्तान् स्कन्धान् मनोवर्गणाभ्यो गृहीत्वा मनस्त्वेन परिणमय्य मन्यते चिन्तनीयं वस्त्विति। स च गर्भजस्तिर्यङ् मनुष्यो वा, देवः, नारकश्चेति॥५०९॥'' - **विशेषाव० मलधारि०।**

[**पृ०२९९ पं०२१**] ''**जे पुण संचितेउं इट्ठाणिट्ठेसु विसयवत्थूसु। वट्टंति निवट्टंति य सदेहपरिपालणाहेउं॥५१५॥ पाएण संपए च्चिय कालम्मि न याइदीहकालण्णा। ते हेउवायसण्णी निच्चेट्ठा होंति अस्सण्णी॥५१६॥** ये पुनः संचिन्त्य संचिन्त्य इष्टा-ऽनिष्टेसु च्छाया-ऽऽतपा-ऽऽहारादिविषयवस्तुषु मध्ये स्वदेहपरिपालनाहेतोरिष्टेषु वर्तन्ते, अनिष्टेभ्यस्तु तेभ्य एव निवर्तन्ते, प्रायेण च सांप्रतकाल एव, न त्वतीता-ऽनागतकालावलम्बिनः, प्रायोग्रहणात् केचिदतीतानागतावलम्बिनोऽपि नातिदीर्घकालानुसारिणः, ते द्वीन्द्रियादयो हेतुवादोपदेशेन संज्ञिनो विज्ञेयाः, तथाहि- संज्ञिनो द्वीन्द्रियादयः संचिन्त्य संचिन्त्य हेयोपादेयेषु निवृत्तिप्रवृत्तेः, देवदत्तादिवदिति। तदेवं हेतुवादिनोऽभिप्रायेण निश्चेष्टाः पृथिव्यादय एवाऽसंज्ञिन इति॥५१५-१६॥'' - **विशेषाव० मलधारि०॥**

[**पृ०३०१ पं०१**] ''**सण्णि त्ति असण्णि त्ति य सव्वसुए कालिओवएसेणं। पायं संववहारो कीरइ तेणाइए स कओ॥५२६॥** इह सर्वस्मिन्नपि श्रुते आगमे योऽयं 'संज्ञीति असंज्ञ्य-संज्ञा' इति वा व्यवहारः स सर्वोऽपि प्रायो बाहुल्येन कालिकोपदेशेनैव क्रियते। तेनाऽऽदौ

स एव कालिकोपदेशः कृतः। इदमुक्तं भवति-यतः स्मरण-चिन्तादिदीर्घकालिकज्ञानसहितः समनस्कपञ्चेन्द्रियः संज्ञीत्यागमे व्यवह्रियते, असंज्ञी तु प्रसह्य प्रतिषेधमाश्रित्य यद्यप्येकेन्द्रियादिरपि लभ्यते, तथापि समनस्कसंज्ञी तावत् पञ्चेन्द्रिय एव भवति। ततः पर्युदासाश्रयणाद-संज्ञ्यप्यमनस्कसम्मूर्च्छनजपञ्चेन्द्रिय एवाऽऽगमे प्रायो व्यवह्रियते। तदेवंभूतः संज्ञा-संज्ञिव्यवहारो दीर्घकालिकोपदेशेनैवोपपद्यते। अतः प्रथमं स एव सूत्रे, तदनुरोधेनाऽत्र च निर्दिष्टः॥५२६॥'' - **विशेषाव० मलधारि०।**

[**पृ०३०१,३३६ पं०१८,१३**] ''एतदेवाह-'ज्ञान'मित्यादिना- **ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च, सहसिद्धं चतुष्टयम्॥१९५॥** ज्ञानम् 'अप्रतिघं' सर्वत्राप्रतिहतं यस्य, वैराग्यं च जगत्पतेः, अप्रतिहतमेव, ऐश्वर्यं चैव-अणिमाद्यप्रतिघम्, धर्मश्च-प्रयत्नसंस्काररूपोऽप्रतिघः, एतत्सहसिद्धं चतुष्टयम्, अनाद्येवेति भावः॥१९५॥

अस्य कर्तृ[जा]त्वमाह-'अज्ञ' इत्यादिना, **अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत्, स्वर्गं वा श्वभ्रमेव वा॥१९६॥** अज्ञो जन्तुः-विवेकशून्यः, 'अनीशोऽयम्' अप्रभुरयमात्मनः सुखदुःखयोः कर्त्तव्ययोः, प्रतिकूलप्रवृत्तिदर्शनात्, ज्ञस्य च तदयोगात्, तत्त्वतो ज्ञत्वानुपपत्तेः, यतश्चैवमत ईश्वरप्रेरितः सन् गच्छेत् स्वर्गं वा 'श्वभ्रमेव वा' नरकं वेति॥१९६॥'' - **शास्त्र० हारि०॥**

[**पृ०३०२ पं०६**] दृश्यतां पृ०१४ पं०९॥

[**पृ०३०३ पं०१८**] ''इदानीं गणिद्वारम्, साधुवर्गो गुणगणो वा गण इति, सोऽस्यास्तीति गणी। आचारायत्तं च गणित्वमिति प्रदर्शयन्नाह- **आयारम्मि अहीए जं णाओ होइ समणधम्मो उ। तम्हा आयारधरो भण्णइ पढमं गणिट्ठाणं॥१०॥ आयारम्मी**त्यादि। यस्माद् आचाराध्ययनात् क्षान्त्यादिकश्चरणकरणात्मको वा श्रमणधर्मः परिज्ञातो भवति तस्मात् सर्वेषां गणित्वकारणानामाचारधरत्वं **प्रथमम्** आद्यं प्रधानं वा **गणिस्थान**मिति॥१०॥'' - **आचा० शीलाचार्य०॥**

[**पृ०३०४ पं०९**] तुलना- ''**पञ्चम्यास्तृतीया च ॥३।१३६॥** पञ्चम्याः स्थाने क्वचित् तृतीय-सप्तम्यौ भवतः॥ चोरेण बीहइ। चोराद् बिभेतीत्यर्थः। ...॥१३६॥''-**हैमप्राकृत० स्वो०॥**

[**पृ०३१० पं०१**] ''तत्र नाम किमुच्यते ? इत्याशङ्क्य सामान्येन नाम्नस्तावल्लक्षणमाह- **पज्जायाऽणभिधेयं ठिअमण्णत्थे तयत्थनिरवेक्खं। जाइच्छिअं च नामं जावद्दव्वं च पाएण॥२५॥** यत् कस्मिंश्चिद् भृतकदारकादौ इन्द्राद्यभिधानं क्रियते, तद् नाम भण्यते। कथंभूतं तत् ?, इत्याह- पर्यायाणां शक्र-पुरन्दर-पाकशासन-शतमख-हरिप्रभृतीनां समानार्थवाचकानां ध्वनीनामनभिधेयमवाच्यम्, नामवतः पिण्डस्य संबन्धी धर्मोऽयं नाम्न्युपचरितः, स हि नामवान्

भृतकदारकादिपिण्डः किलैकेन संकेतितमात्रेणेन्द्रादिशब्देनैवाऽभिधीयते, न तु शेषैः शक्र-पुरन्दर-पाकशासनादिशब्दैः, अतो नामयुक्तपिण्डगतधर्मो नाम्न्युपचरितः पर्यायानभिधेयमिति। पुनरपि कथंभूतं तन्नाम ?, इत्याह- 'ठिअमण्णत्थे त्ति' विवक्षिताद् भृतकदारकादि-पिण्डादन्यश्चासावर्थश्चाऽन्यार्थो देवाधिपादिः, सद्भावतस्तत्र यत् स्थितम्, भृतकदारकादौ तु संकेतमात्रतयैव वर्तते, अथवा सद्भावतः स्थितमन्वर्थे-अनुगतः संबद्धः परमैश्वर्यादिकोऽर्थो यत्र सोऽन्वर्थः शचीपत्यादिः। सद्भावतस्तत्र स्थितं भृतकदारकादौ तर्हि कथं वर्तते ?, इत्याह- तदर्थनिरपेक्षं तस्येन्द्रादिनाम्नोऽर्थस्तदर्थः परमैश्वर्यादिस्तस्य निरपेक्षं संकेतमात्रेणैव तदर्थशून्ये भृतकदारकादौ वर्तते, इति पर्यायानभिधेयम्, स्थितमन्यार्थे अन्वर्थे वाः, तदर्थनिरपेक्षं यत् क्वचिद् भृतकदारकादौ इन्द्राद्यभिधानं क्रियते तद् नाम, इतीह तात्पर्यार्थः। प्रकारान्तरेणाऽपि नाम्नः स्वरूपमाह-यादृच्छिकं चेति, इदमुक्तं भवति-न केवलमनन्तरोक्तम्, किन्त्वन्यत्राऽवर्तमानमपि यदेवमेव यदृच्छया केनचिद् गोपालदारकादेरभिधानं क्रियते, तदपि नाम, यथा डित्थो डवित्थ इत्यादि। इदं चोभयरूपमपि कथंभूतम् ?, इत्याह-यावद् द्रव्यं च प्रायेणेति-यावदेतद्वाच्यं द्रव्यमवतिष्ठते तावदिदं नामाऽप्यवतिष्ठत इति भावः। किं सर्वमपि ?, न, इत्याह-प्रायेणेति, मेरु-द्वीप-समुद्रादिकं नाम प्रभूतं यावद्द्रव्यभावि दृश्यते; किञ्चित् त्वन्यथाऽपि समीक्ष्यते, देवदत्तादिनामवाच्यानां द्रव्याणां विद्यमानानामप्यपरापरनामपरावर्तस्य लोके दर्शनात्। सिद्धान्तेऽपि यदुक्तम्-''नाम आवकहिअं ति'' नाम यावत्कथिकमिति तत् प्रतिनियतजनपदादिसंज्ञामेवाऽङ्गीकृत्य, यथोत्तराः कुरव इत्यादि। तदेवं प्रकारद्वयेन नाम्नः स्वरूपमत्रोक्तम्, एतच्च तृतीय-प्रकारस्योपलक्षणम्, पुस्तक-पत्र-चित्रादिलिखितस्य वस्त्वभिधानभूतेन्द्रादिवर्णावलीमात्रस्याऽप्यन्यत्र नामत्वेनोक्तत्वादिति। एतच्च सामान्येन नाम्नो लक्षणमुक्तम्, प्रस्तुते त्वेवं योज्यते-यत्र मङ्गलार्थशून्ये वस्तुनि मङ्गलमिति नाम क्रियते, तद् वस्तु नाम्ना नाममात्रेण मङ्गलमिति कृत्वा नाममङ्गलमित्युच्यते। पुस्तकादिलिखितं च यद् मङ्गलमिति वर्णावलीमात्रम्, तदपि नाम च तद् मङ्गलं चेति कृत्वा नाममङ्गलमित्यभिधीयते॥ इति गाथार्थः॥२५॥ अथ सामान्येनैव स्थापनायाः स्वरूपमाह— **जं पुण तयत्थसुन्नं तयभिप्पाएण तारिसागारं। कीरइ व निरागारं इत्तरमियरं व सा ठवणा॥२६॥** सा स्थापनाऽभिधीयते, यत् किम् ?, इत्याह-यत् क्रियते इन्द्रादिस्थापनारूपतया विधीयते वस्तु, पुनःशब्दो नामलक्षणात् स्थापनालक्षणस्य वैसदृश्यद्योतकः। केन ?, इत्याह- तदभिप्रायेण तस्य सद्भूतेन्द्रस्याऽभिप्रायोऽध्यवसायस्तेन। कथंभूतं तद् वस्तु ?, इत्याह- तदर्थशून्यं स चाऽसावर्थश्च तदर्थः सद्भूतेन्द्रलक्षणस्तेन शून्यं तदर्थशून्यम्। पुनरपि कथंभूतम् ?, तादृशाकारं सद्भूतेन्द्रसमानाकारम्, वाशब्दस्य भिन्नक्रमत्वाद् निराकारं वा सद्भूतेन्द्राकारशून्यमित्यर्थः, चित्र-लेप्य-काष्ठ-पाषाणादिषु तादृशाकारं भवति, अक्षादिषु तु

निराकारमित्यर्थः। पुनः किं भूतम् ?, इत्वरम्-अल्पकालीनम्, इतरद्वा यावत्कथिकम्। तत्रेत्वरं चित्राक्षादिगतम्, यावत्कथिकं तु नन्दीश्वरचैत्यप्रतिमादिः तदपि हि 'तिष्ठतीति स्थापना' इति स्थापनात्वेन समये निर्दिष्टमेव। तदिदमिह तात्पर्यम्– यद् वस्तु सद्भूतेन्द्रार्थशून्यं सत् तद्बुद्ध्या तादृशाकारं निराकारं वा, स्तोककालं यावत्कथिकं वा स्थाप्यते सा स्थापनेति। प्रकृते योजना त्वित्थं क्रियते-चित्रकर्मादिगतः परममुनिः स्थापनं स्थापना तया मङ्गलम्, स्थाप्यत इति वा स्थापना तया मङ्गलं स्थापनामङ्गलमिति व्यपदिश्यते॥ इति गाथार्थः॥२६॥'' - **विशेषाव० मलधारि०।**

[**पं०१२**] तुलना- ''कथं पुनः प्रज्ञापकम्, प्रज्ञापनीयांश्चार्थानाश्रित्येदं साद्यादिरूपम् ?, इत्याह– **उवओग-सर-पयत्ता थाणविसेसा य होंति पण्णवए। गइ-ट्ठाण-भेय-संघाय-वण्ण-सद्दाइभावेसु॥५४७॥** उपयोग आन्तरः श्रुतपरिणामः, स्वरो ध्वनिः, प्रयत्नस्तालवादिव्यापारविषयो यत्नः, स्थानविशेषा आसनविशेषाः, प्रज्ञापके गुरौ व्याख्यानादि कुर्वति सत्येते भावा धर्मा भवन्ति। एते चाऽनित्यत्वात् सादि-सपर्यवसिताः। ततश्चैतानाश्रित्य वक्तुरनन्यत्वाच्छ्रुतमपि सादिसपर्यवसितं भवति। प्रज्ञापनीयार्थगतान् भावानाह-'गईत्यादि' गतिरण्वादीनां गमनपरिणामः, स्थानं तेषामेव स्थितिपरिणामः, भेदस्तेषामेवाऽन्यसंयुक्तानां विघटनम्, संघातस्त्वन्यैः सह संयोगः, वर्णः कृष्णादिः, शब्दो मधुरमन्द्रादिः आदिशब्दाद् रस-गन्ध-स्पर्श-संस्थानादिपरिग्रहः। एते गति-स्थित्यादयो भावाः पर्यायधर्मा भावेषु प्रज्ञापनीयेषु परमाण्वादिषु भवन्ति। ततोऽनित्यत्वादमी सादिसपर्यवसिताः। एते च श्रुतस्य ग्राह्याः, ग्राहकं च ग्राह्यनिबन्धनं भवति, अतः श्रुतमपि सादि-सपर्यवसितमिति भावः। तदेवं द्रव्य-क्षेत्र-काल-भावानाश्रित्य सादि-सपर्यवसितत्वलक्षणो दर्शितः प्रथमभङ्गः॥५४७॥'' - **विशेषाव० मलधारि०।**

[**पृ०३१२ पं०९**] ''अथैकैकस्याऽकाराद्यक्षरस्य यावन्तः पर्याया भवन्ति, तदेतद् विशेषतो दर्शयति– **एक्केक्कमक्खरं पुण स-परपज्जायभेयओ भिन्नं। तं सव्वदव्व-पज्जायरासिमाणं मुणेयव्वं॥४७७॥** इह भिन्नं पृथगेकैकमपि तदकाराद्यक्षरं पुनः स्व-परपर्यायभेदतः सर्वाणि यानि धर्मास्तिकायादीनि द्रव्याणि तत्पर्यायराशिमानं मुणितव्यम्। इदमुक्तं भवति-इह समस्तत्रिभुवनवर्तीनि यानि परमाणु-द्व्यणुकादीनि, एकाकाशप्रदेशादीनि च यानि द्रव्याणि, ये च सर्वेऽपि वर्णाः, तदभिधेयाश्चार्थाः, तेषां सर्वेषामपि पिण्डितो यः पर्यायराशिर्भवति स एकैकस्याऽप्यकाराद्यक्षरस्य भवति, तन्मध्ये ह्यकारस्य केचित् स्तोकाः स्वपर्यायास्ते चाऽनन्ताः, शेषास्त्वनन्तानन्तगुणाः परपर्यायाः, इत्येवं सर्वसंग्रहः। अयं च सर्वोऽपि सर्वद्रव्य-पर्यायराशिः सद्भावतोऽनन्तानन्तस्वरूपोऽप्यसत्कल्पनया किल लक्षम्, पदार्थाश्चाऽकारेकारादयो धर्मास्तिकायादयः सर्वाकाशप्रदेशसहिताः सर्वेऽपि किल सहस्रम्। तत्रैकस्याऽकारपदार्थस्य सर्वद्रव्यगतलक्षपर्यायराशिमध्यादस्तित्वेन संबद्धाः

किल शतप्रमाणाः स्वपर्यायाः, शेषास्तु नास्तित्वेन संबद्धाः सर्वेऽपि परपर्यायाः। एवमिकारादेः, परमाणु-द्व्यणुकादेश्चैकैकद्रव्यस्य वाच्यमिति॥४७७॥" - **विशेषाव० मलधारि०।**

[**पृ०३१४ पं०१६**] "**जेसु अनाएसु तओ न नज्जए, नज्जए य नाएसु। किह तस्स ते न धम्मा घडस्स रूवाइधम्म व्व ?॥४८५॥** तत् तस्माद् येषु घटादिपर्यायेष्वज्ञातेषु यदेकं प्रस्तुतमक्षरं न ज्ञायते, ज्ञातेषु च ज्ञायते, ते घटादिपरपर्यायाः कथं न तस्य प्रस्तुतैकाक्षरस्य धर्माः ? अपि तु धर्मा एव, यथा घटस्य रूपादयः प्रयोगः-येषामनुपलब्धौ यद् नोपलभ्यते उपलब्धौ चोपलभ्यते, तस्य ते धर्मा एव, यथा घटस्य रूपादयः, नोपलभ्यते प्रस्तुतमेकमक्षरं समस्तघटादिपरपर्यायाणामनुपलब्धौ, उपलभ्यते च तदुपलब्धौ, इति ते तस्य धर्मा इति॥४८५॥" - **विशेषाव० मलधारि०।**

[**पृ०३१५ पं०९**] तदेवं ज्ञानवादिनयमतविवक्षयैव केवलस्य परपर्यायाभावः प्रोक्तः, वस्तुस्थित्या पुनरिदमपि स्व-परपर्यायान्वितमेवेति दर्शयति- **वत्थुसहावं पइ तं पि स-परपज्जायभेयओ भिन्नं। तं जेण जीवभावो भिन्ना य तओ घडाईया॥४९५॥**

वस्तुस्वभावं प्रति यथावस्थितवस्तुस्वरूपमाश्रित्य तदपि केवलज्ञानमकाराद्यक्षरवत् स्व-परपर्यायभेदतो भिन्नमेव, न तु यथोक्तनीत्या स्वपर्यायान्वितमेवेति भावः। कुतः ?, इत्याह- येन कारणेन तत्केवलज्ञानं जीवभावः प्रतिनियतो जीवपर्यायो न घटादिस्वरूपं तत्, नापि घटादयस्तत्स्वभावाः किंतु ततो भिन्नाः। इति तेन ज्ञायमाना अपि एते कथं तस्य स्वपर्याया भवेयुः, सर्वसंकरैकत्वादिप्रसङ्गात् ?। तस्मादमूर्तत्वाच्चेतनत्त्व-सर्ववेत्तृत्वा-ऽप्रतिपातित्व-निरावरणत्वादयः केवलज्ञानसर्वपर्यायाः घटादिपर्यायास्तु व्यावृत्तिमाश्रित्य परपर्यायाः।

अन्ये तु व्याचक्षते-सर्वद्रव्यगतान् सर्वानपि पर्यायान् केवलज्ञानं जानाति, येन च स्वभावेनैकं पर्यायं जानाति न तेनैवाऽपरमपि, किन्तु स्वभावभेदेन, अन्यथा सर्वद्रव्य-पर्यायैकत्वप्रसङ्गात्। तस्मात् सर्वद्रव्य-पर्यायराशितुल्याः स्वभावभेदलक्षणाः केवलज्ञानस्य स्वपर्यायाः, सर्वद्रव्य-पर्यायास्तु परपर्यायाः, इत्येवं स्वपर्यायाः परपर्यायाश्चोभयेऽपि परस्परं तुल्याः केवलस्येति ॥४९५॥" - **विशेषाव० मलधारि०।**

[**पं०१६**] "यदि वाऽत्र श्रुताक्षरं तत्र केवलाक्षरमपि भवतु, न च श्रुताक्षरस्य केवलपर्यायतुल्यमानता विरुध्यते। कथम् ?, इत्याह- **सयपज्जवेहिं तं केवलेण तुल्लं न होज्ज न परेहिं। स-परपज्जाएहि उ तुल्लं तं केवलेणेव॥४९३॥** स्वकाः स्वकीया अकारेकारोकारादयोऽनुगताः श्रुतज्ञानस्य स्वपर्याया इत्यर्थः, तैरनुगतैः स्वपर्यायैस्तत् श्रुताक्षरं केवलेन केवलाक्षरेण तुल्यं न भवेत्, सर्वपर्यायानन्तभागवर्तित्वाच्छ्रुतज्ञानस्वपर्यायाणाम्; केवलज्ञानं तु सर्वद्रव्य-पर्यायराशिप्रमाणम्, सर्वेष्वपि तेषु व्यापारात्, तथाहि-लोके समस्तद्रव्याणां पिण्डितः

पर्यायराशिरनन्तानन्तस्वरूपोऽप्यसत्कल्पनया किल लक्षम्, एतन्मध्याच्छ्रुतज्ञानस्य स्वपर्यायाणां किल शतम्, तदूनलक्षं तु परपर्यायाः, केवलज्ञाने त्वेतल्लक्षमपि पर्यायाणामुपलभ्यते, सर्वोपलब्धिस्वभावात् तस्य। ते चोपलब्धिविशेषाः सर्वेऽपि केवलस्य पर्यायाः स्वभावाः, ज्ञेयोपलब्धिस्वभावत्वात् ज्ञानस्य। एवं च सति लक्षपर्यायं केवलम्, श्रुतस्य तु शतं स्वपर्यायाणाम्। अतस्तैस्तत्केवलपर्यायराशितुल्यं न भवेदिति स्थितम्। तर्हि परपर्यायैस्तत् तस्य तुल्यं भविष्यतीत्याह-न परैः-नापि परपर्यायैस्तत् केवलेन तुल्यं भवेत्; तथाहि घटादिव्यावृत्तिरूपाः परपर्यायास्तस्य विद्यन्तेऽनन्तानन्ताः, कल्पनया तु शतोनलक्षमानाः, तथापि सर्वद्रव्य-पर्यायराशितुल्या न भवन्ति, सर्वपर्यायानन्तभागेन कल्पनया शतरूपेण सद्भावतस्त्वनन्तात्मकेन स्वपर्यायराशिना न्यूनत्वात्, केवलस्य तु संपूर्णसर्वपर्यायराशिमानत्वादिति। स्व-परपर्यायैस्तु तत् केवलपर्यायतुल्यमेव, केवलवत् तस्यापि सर्वद्रव्य-पर्याय-प्रमाणत्वादिति॥४९३॥'' - **विशेषाव० मलधारि०।**

[**पृ०३१८ पं०१०**] ''**अतः अनेकस्वरात्॥ त०७।१४ ॥** अकारान्तात् अनेकस्वरात् मत्वर्थे 'इक'-'इन्' प्रत्ययौ भवतः। दण्डिकः, दण्डी, दण्डवान्। अनेकस्वरात् इति किम्? खवान्॥१४॥'' - **मलय० शब्दानु० स्वो०॥**

[**पृ०३२२ पं०२०**] ''**चत्तारि विचित्ताइं..... पायवगमणं अह करेइ॥२७१-२७३॥** चत्वारि वर्षाणि **विचित्राणि** विचित्रतपोऽनुष्ठानवन्ति भवन्ति, चतुर्थषष्ठाष्टमदशमद्वादशादिके कृते पारणकं सविकृतिकमन्यथा वेति, पञ्चमादारभ्य संवत्सरादपराणि चत्वारि वर्षाणि निर्विकृतिकमेव पारणकमिति, नवमदशमसंवत्सरद्वयं त्वेकान्तरितमाचाम्लमेकस्मिन्नहनि चतुर्थमपरेद्युराचाम्लेन पारणकमिति, तत एकादशसंवत्सरं द्विधा विधत्ते- तत्राद्यं षण्मासं नातिविकृष्टं तपः करोति, चतुर्थं षष्ठं वा विधाय परिमितेनाचाम्लेन पारणकं विद्यते, न्यूनोदरतां करोतीत्यर्थः, अपरषण्मासं तु विकृष्टतपश्चरणवतः पूर्वोक्तमेव पारणकम्, द्वादशं तु संवत्सरं कोटीसहितमाचाम्लं करोति, प्रतिदिनमाचाम्लेन भुङ्क्ते, आचाम्लस्य कोट्याः कोटिं मीलयत्यतः कोटीसहितमित्युक्तम्, चतुर्मासावशेषे तु संवत्सरे तैलगण्डूषानस्खलितनमस्काराद्यध्ययनायापगतवातमुखयन्त्रप्रचारार्थं पौनःपुन्येन करोतीति, तदेवमनयाऽऽनुपूर्व्या सर्वं विधाय सति सामर्थ्ये गुरुणाऽनुज्ञातो गिरिकन्दरं गत्वा स्थण्डिलं प्रत्युपेक्ष्य 'अथ' अनन्तरं पोदपोपगमनं करोति इङ्गितमरणं वा भक्तप्रत्याख्यानं वा यथासमाधि विधत्त इति गाथार्थः॥२७१-२७३॥'' - **आचा० शीला०॥**

''**चत्तारि विचित्ताइं विगईणिज्जूहिआइं चत्तारि। संवच्छरे उ दोण्णि उ एगंतरिअं च आयामं॥१५७४॥ णाइविगिट्ठो अ तवो छम्मासे परिमिअं च आयामं। अण्णेऽवि अ छम्मासे होइ विगिट्ठं तवोकम्मं॥१५७५॥ वासं कोडीसहिअं आयामं तह य**

आणुपुव्वीए। संघयणादणुरूवं एत्तो अद्धाइनिअमेण॥१५७६॥ चतुरः संवत्सरान् विचित्राणि तपांसि करोति, षष्ठादीनि, तथा 'विकृतिनिर्व्यूढानि' निर्विकृतिकानि चत्वारि, एवं संवत्सरौ द्वौ च तदूर्ध्वमेकान्तरितमेव च नियोगतः आयामं तपः करोतीति गाथार्थः॥७४॥ नातिविकृष्टं च तपः-चतुर्थादि षण्मासान् करोति, तत ऊर्ध्वं परिमितं चाऽऽयामं तत्पारणक इति, तैलगण्डूषधारणं च मुखभङ्गे, अन्यानपि च षण्मासान् अत ऊर्ध्वं भवति 'विकृष्टम्' अष्टमाद्येव तपःकर्मेति गाथार्थः॥७५॥ वर्षं कोटीसहितमायामम्, तथा चानुपूर्व्या एवमेव संहननाद्यनुरूपम्, आदिशब्दाच्छक्त्यादिग्रहः, 'अतः' उक्तात् कालादर्द्धादि-अर्द्ध प्रत्यर्द्धं वा नियमेन करोति... ॥१५७४-७६॥" - **पञ्चव०॥**

[**पृ०३२६ पं०११**] "**नाम्न्युत्तरपदस्य च।२।२।१३६॥** उदकस्य पूर्वपदस्य उत्तरपदस्य च नाम्नि संज्ञायाम् (विषये) उद इत्ययमादेशो भवति। उदपर्वतः। उदमेघो नाम कश्चित्। उत्तरपदस्य लवणोदः। कालोदः। क्षीरोदः। एवं नामानः समुद्राः॥२।२।१३६।" - **शाकटा० अमोघ० टीका०॥**

[**पृ०३२९ पं०१०**] "सम्प्रति यावन्तः श्रमणशब्दवाच्यास्तावतो दर्शयित्वा तेषु वनीपकत्वं यथा भवति तथा दर्शयति– **निग्गंथ सक्क तावस गेरुय आजीव पंचहा समणा। तेसि परिवेसणाए लोभेण वणिज्ज को अप्पं ?॥४४५॥ व्या०** 'निर्ग्रन्थाः' साधवः 'शाक्याः' मायासूनवीयाः, 'तापसाः' वनवासिनः पाखण्डिनः 'गैरुकाः' गेरुकरञ्जितवाससः परिव्राजकाः 'आजीवकाः' गोशालकशिष्या इति 'पञ्चधा' पञ्चप्रकाराः श्रमणा भवन्ति, एतेषां च यथायोगं गृहिगृहेषु समागतानां 'परिवेषणे' भोजनप्रदाने क्रियमाणे सति कोऽप्याहारलम्पटः साधुः 'लोभेन' आहारादिलुब्धतया वनति-शाक्यादिभक्तमात्मानं दर्शयति, तद्भक्तगृहिणः पुरत इति सामर्थ्यगम्यम्॥४४५॥" - **पिण्डनि० मलय०**

[**पृ०३३० पं०११**] "अथ चारित्राचारभेदानाह- **पणिहाणजोगजुत्तो पंचहिं समितिहिं तिहिं गुत्तीहिं। एस चरित्तायारो अट्ठविहो होइ नायव्वो॥१५॥२५॥ पणिहाण०** गाहा। - प्रणिधानं मनसः शुभमैकाग्र्यं तद्रूपस्तत्प्रधानो वा योगो व्यापारस्तेन युक्तोऽन्वितः। अथवा योगो मनोनिरोधः, ततश्च प्रणिधानयोगाभ्यां युक्तो यः स तथा। कस्मिन् विषय इत्याह-पञ्चसु समितिषु ईर्यासमित्यादिषु सम्यक्प्रवृत्तिरूपासु। तथा तिसृषु गुप्तिषु मनोवाक्कायानां शुभप्रवृत्त्यशुभनिवृत्तिलक्षणासु अथवा युक्तशब्दानुवर्तनतः पञ्चभिः समितिभिर्युक्त इत्यादि व्याख्येयम्। यो जीव इति शेषः। एष जीवः। किमित्याह-चरित्रे सत्याचारो व्यवहारो यः स चरित्राचारः, आचारतद्वतोरभेदात्। अष्टविधोऽष्टभेदः, समितिगुप्तियोगात्। भवति स्यात्। ज्ञातव्यः ज्ञेयः इति वृद्धव्याख्या। अन्ये त्वाहुः-प्रणिधानयोगयुक्तः समित्यादिभिरुपलक्षित एष

एवंविधश्चरित्राचारः। इति गाथार्थः॥१५।२५॥ अथ तपआचारदर्शनायाह- **बारसविहम्मि वि तवे सब्भिंतरबाहिरे कुसलदिट्ठे। अगिलाएँ अणाजीवी णायव्वो सो तवायारो॥१५॥२६॥** **बारस०** गाहा। द्वादशविधेऽपि द्वादशभेदेऽपि, आस्तां तदेकदेशे। तपसि तपस्यायां। कार्मणलक्षणाभ्यन्तरदेहस्यैव तापनात् प्रायः सम्यग्दृष्टिभिरेव वा तपस्तया प्रतीयमानत्वात् आभ्यन्तरं प्रायश्चित्तादि षोढा। तथा बाह्यदेहस्यापि तापमान्मिथ्यादृष्टिभिरपि वा तपस्तया प्रतीयमानत्वात् बाह्यम् अनशनादि षोढैव। सहाभ्यन्तरेण बाह्यं साभ्यन्तरबाह्यं तत्र। कुशलदृष्टे निपुणोपलब्धे सर्वज्ञप्ररूपित इत्यर्थः। अग्लान्याऽखेदेन। अनाजीवी तस्यैव तपसोऽनुपजीवकः सन्। यो जीवः प्रवर्तत इति शेषः। ज्ञातव्यो ज्ञेयः। स जीवः। तपआचारः तपसि तपोरूपो वाचारो व्यवहारस्तपआचारः, आचारतद्वतोरभेदात्। इति गाथार्थः॥१५।२६॥ वीर्याचारस्वरूपमाह- **अणिगूहियबलविरिओ परक्कमइ जो जहुत्तमाउत्तो। जुंजइ य जहत्थमं णायव्वो वीरियायारो॥१५।२७॥** **अणि०** गाहा। व्याख्या- अनिगूहिते अगोपिते बलवीर्ये देहप्राणचित्तोत्साहरूपे येन स तथा। पराक्रमते धर्मक्रियासु प्रवर्तते। यो जीवः। यथोक्तं यथागमं। आयुक्त उपयुक्तः सन्। अनेन शक्तेरप्रच्छादनमुक्तं। अथ शक्त्यनतिक्रममाह-युङ्क्ते प्रयुङ्क्ते। चः समुच्चये। यथास्थामं यथाबलं शक्त्यनतिक्रमेण आत्मानं धर्मक्रियास्विति गम्यं। ज्ञातव्यो ज्ञेयः। असाविति गम्यं। वीर्यस्य सामर्थ्यस्याचार आचरणं वीर्याचार आचारतद्वतोरभेदात् इति। वृद्धास्त्वाहुः- अनिगूहितबलवीर्यः पराक्रमते चेष्टते यथोक्तज्ञानाद्याचारमाश्रित्य ग्रहणकाले, तत ऊर्ध्वं युक्तं च प्रवर्तयति ज्ञानाद्याचारमेव यथास्थाम। इति गाथार्थः॥१५-२७॥" - **पञ्चाशक० अभय० टीका।**

[**पृ०३३२ पं०७**] "इदानीं परिमाणम्, किं पुनरस्याध्ययनतः पदतश्च परिमाणम् ? इति अत आह– **नवबंभचेरमइओ अट्ठारसपयसहस्सिओ वेओ। हवइ य सपंचचूलो बहु-बहुतरओ पयग्गेणं॥११॥** **नवे**त्यादि। तत्राध्ययनतो नवब्रह्मचर्याभिधानाध्ययनात्मकोऽयम्, पदतोऽष्टादशपदसहस्रात्मकः, वेद इति विदन्त्यस्माद् हेयोपादेयपदार्थानिति वेदः क्षायोपशमिक-भाववर्त्ययमाचार इति, सह पञ्चभिश्चूडाभिर्वर्तत इति सपञ्चचूडश्च भवति। उक्तशेषानुवादिनी चूडा। तत्र प्रथमा– **पिंडेसण सेज्जिरिया भासा वत्थेसणा य पाएसा।**

उग्गहपडिम त्ति सप्ताध्याययनात्मिका। द्वितीया सत्तसत्तिक्कया। तृतीया भावना। चतुर्थी विमुक्तिः। पञ्चमी **निशीथाध्ययनम्। बहु-बहुत्तरओ पदग्गेणं** ति तत्र चतुश्चूलिकात्मकद्वितीय-श्रुतस्कन्धप्रक्षेपाद् बहुः, **निशीथाध्ययन**पञ्चमचूलिकाप्रक्षेपाद् बहुतरः, अनन्तगमपर्यायात्मकतया बहुतमश्च, पदाग्रेण पदपरिमाणेन भवतीति॥११॥" - **आचा० शीलाचार्य० टीका॥**

[**पृ०३३५ पं०१९**] कालवादिमतमाह– 'न काले'त्यादिना- **न कालव्यतिरेकेण,**

